THE RIG-VEDA SAMHITÁ.

FOURTH ASHTAKA

WITH

PADA PATHA

AND

SÁYANÁCHÁRYA'S BHÁSHYA

EDITED BY

MAHÂMAHOPÂDHYÁYA RÂJÂRÂM SHÂSTRI BODAS,

SANSKRIT SHÁSTRI, ELPHINSTONE COLLEGE,

AND

SHIWARÂM SHÂSTRI GORÉ,

Teacher in the Gokuldas Tejpal Sanskrit Seminary

PUBLISHED BY

TOOKÂRÂM TÁTYÁ

FOR THE BOMBAY THEOSOPHICAL PUBLICATION FUND

Bombay

PRINTED AT THE GANPAT KRISHNAJI PRESS.

Shaka 1810.

श्रीः

ऋक्संहिता

सायणाचार्यविरचितभाष्यसहिता पदपाठयुताच.

इयंच

तत्त्वविवेचकग्रंथप्रसारकममित्याप्रेरितेन तुकारामतात्याभिख्येन.

गणपतकृष्णाजीमुद्रायंत्रालयाधिपतिना आत्मारामकान्होबाभिख्येन,

इत्येताभ्यां

बोडसोपाह्वमहामहोपाध्यायराजारामशास्त्रि,

गोरेइत्युपाभिधशिवरामशास्त्रिभ्यांशोधयित्वा

मुंबय्यां

गणपतकृष्णाजीमुद्रायंत्रालयेमुद्रयित्वा

प्रकाशिता.

तस्याअयंचतुर्थोऽष्टकः

शकाब्दाः १८

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

पञ्चमेमण्डलेप्रथमेनुवाकेपूर्वमष्टौसूक्तानिव्याख्यातानि त्वामग्नेहविष्मन्तइतिसप्तर्चंनवमं सूक्तम् आत्रेयस्यगयस्यार्षं सप्तमीपञ्चम्यौपङ्क्ती शिष्टाःपङ्क्त्यन्तस्यचसूक्तस्येतिपरिभाषयाअनुष्टुभः अग्निर्देवता तथाचानुक्रम्यते—त्वामग्नेगयोन्त्यापञ्चम्यौपङ्क्तीइति । प्रातरनुवाकेआश्विनशस्त्रेचएतदादिकेद्वेसूक्तेशंसनीये तथैवसूत्रितम्—त्वामग्नेहविष्मन्तइतिसूक्तेइति ।

तत्रैषाप्रथमा—

ॐम् त्वामग्नेहविष्मन्तोदेवंमर्तासईळते ।
मन्येत्वाजातवेदसंसहव्यावक्ष्यानुषक् ॥ १ ॥

त्वाम् । अग्ने । हविष्मन्तः । देवम् । मर्तासः । इळते । मन्ये ।
त्वा । जातऽवेदसम् । सः । हव्या । वक्षि । आनुषक् ॥ १ ॥

हेअग्ने त्वां देवं दीप्यमानं हविष्मन्तः होमसाधनद्रव्यसमेताः मर्तासोमर्त्याः ईळते स्तुवन्ति अहंच जातवेदसं जातमुत्पन्नंचराचरभूतजातंवेत्तीतिजातवेदाः अथवा जातानिस्थावरजङ्गमात्मकानि एनंविदुरितिजातवेदाः यद्वा वेदइतिधननाम जातंसर्ववेदोधनंयस्यासौजातवेदाः एवंविधं त्वा त्वां मन्ये स्तौमि मनिरत्रस्तुत्यर्थेवर्तते धातूनामनेकार्थत्वात् स त्वं हव्या हवनसाधनानिहवींषि आनुषक् निरन्तरतयाअनुषक्तं यथा तथा वक्षि वहसि ॥ हविष्मन्तः हविःशब्दः औणादिकइस्प्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः तदस्यास्तीतिमतुप् पदसंज्ञायाअपवादत्वेनतसौमत्वर्थेइतिभसंज्ञायांरुत्वाभावः मतुब्जसोरनुदात्तत्वात्प्रत्ययस्वरएवशिष्यते । देवं अच्प्रत्ययान्तत्वाद्देवशब्दोन्तोदात्तः । मर्तासः मृङ्प्राणत्यागे असिहसिमृङित्यादिनातन् गुणः मर्तः जसेरसुक् मर्तासः नित्त्वादाद्युदात्तः । ईळते ईडस्तुतौ अदादित्वाच्छपोलुक् आत्मनेपदेष्वनतः टेरेत्वम् अत्रडकारस्याध्येतृसंप्रदायप्राप्तोळकारः लसार्वधातुकानुदात्तत्वेनधातुस्वरेप्राप्ते आष्टमिकोनिघातः । मन्ये श्यनोनित्त्वादाद्युदात्तत्वम् । त्वा युषँमिश्रणे मदिक्प्रत्ययान्तोयुष्मच्छब्दः प्रत्ययस्वरेणान्तोदात्तः

त्वमावेकवचनेइतिमपर्यन्तस्यत्वादेशः द्वितीयांचेत्याकारःएकादेशउदात्तेनोदात्तइत्येकादेशोप्युदात्तएव त्वामौद्वितीयायाइतित्वादेशः स्थानिवद्भावेनान्तोदात्तत्वे प्राप्ते अनुदात्तंसर्वमपादादावित्यनुदात्तत्वम् । जातवेदसम् जनीप्रादुर्भावे क्तः श्वीदितोनिष्ठायामितीट्प्रतिषेधः जनसनखनांसञ्झलोरित्यात्वं प्रत्ययस्वरेणान्तोदात्तः वेदशब्दोप्यसुन्प्रत्ययान्तत्वादाद्युदात्तः कर्मधारयपक्षे समासान्तोदात्तापवादत्वेन तत्पुरुषेतुल्यार्थेत्यादिनापूर्वपदप्रकृतिस्वरत्वेप्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वं प्राप्तं तदपवादत्वेन-गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वं चेतिपूर्वपदप्रकृतिस्वरत्वं बहुव्रीहिपक्षे बहुव्रीहौप्रकृत्यापूर्वपदमिति । हव्या हवमर्हतीत्यस्मिन्नर्थेयइत्यनुवर्तमाने छन्दसिचेतियः नपुंसकत्वाच्छिरादेशः शेश्छन्दसिबहुलमितिलोपः प्रत्ययलक्षणेननुम् दीर्घनलोपौ प्रत्ययस्वरेणान्तोदात्तः । वक्षि वहप्रापणे सिप् लुगनुवृत्तौ बहुलं छन्दसीतिशपोलुक् ढत्वकत्वषत्वानि सिपःपित्त्वादनुदात्तत्वेन धातुस्वरेणाद्युदात्तत्वेप्राप्तेनिघातः । आनुषक् अनुपूर्वस्यषञ्जेःक्विप् नकरलोपः कुत्वंच धात्वादेःसकारस्यउपसर्गात्सुनोतीत्यादिनाषत्वं दीर्घश्छान्दसः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १ ॥

अथद्वितीया-

अग्निर्होतादास्वंतःक्षयंस्यवृक्तबर्हिषः ।
संयज्ञासश्चरंन्तियंसंवाजासःश्रवस्यवंः ॥ २ ॥

अग्निः । होता । दास्वंतः । क्षयंस्य । वृक्तऽबर्हिषः । सम् । यज्ञासः ।
चरन्ति । यम् । सम् । वाजासः । श्रवस्यवः ॥ २ ॥

यम् अग्निं यज्ञासः सर्वेयज्ञाः संचरन्ति सहितागच्छन्ति श्रवस्यवः यजमानस्यप्रभूतांकीर्तिं संपादयन्तोवाजासोहवींषियमग्निंसंचरन्ति प्राप्नुवन्ति एवंविशिष्टोग्निः दास्वतः हविःप्रक्षेपणादिदानवतः वृक्तबर्हिषः वृक्तानिलूनानिबर्हींषिदर्भायेनासौवृक्तबर्हिः तस्य क्षयस्य क्षियन्तिनिवसन्त्यस्मिन्स्वर्गसाधनफलानीतिक्षयः तस्य यजमानस्य यागार्थंहोतादेवानामाह्वाताभवति ॥ दास्वतः दादाने असुन्प्रत्ययान्तः मतुपः अदुपधात्वाद्वत्वं धातुस्वरेणाद्युदात्तएव । क्षयस्य क्षिनिवासगत्योः क्षयोनिवासेइत्याद्युदात्तत्वम् । वृक्तबर्हिषः वृजीवर्जने वर्जनमत्रोपचाराच्छेदनं निष्ठाप्रत्ययस्वरेणान्तोदात्तः बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वम् । यज्ञासः यज्ञशब्दःयजयाचेत्यादिनानङ्प्रत्ययान्तोन्तोदात्तः । चरन्ति चरगतिभक्षणयोः अदुपदेशाल्लसार्वधातुकानुदात्तत्वं यद्वृत्तान्नित्यमितिनिघाताभावः ।

वाजासः वजेर्घञ् वाजः कर्षात्वतइत्यन्तोदात्तत्वं छान्दसत्वात् ञ्नित्यादिर्नित्यमित्याद्युदात्तः । श्रवस्यवः छन्दसिपरेच्छायामितिक्यच् क्याच्छन्दसीत्युप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः ॥ २ ॥

अथतृतीया–

उतस्मयंशिशुंयथानवंजनिष्टारणी ।
धर्तारंमानुषीणांविशामग्निंस्वध्वरम् ॥ ३ ॥

उत । स्म । यम् । शिशुम् । यथा । नवम् । जनिष्ट । अरणी इति । धर्तारम् । मानुषीणाम् । विशाम् । अग्निम् । सुऽअध्वरम् ॥ ३ ॥

उतस्म अपिच मानुषीणां मनोर्जातानां विशां विशन्तिप्रविशन्तिगर्भाशयमितिविशः प्रजाः तासांधर्तारं आहारादिपाकद्वारेणशरीरधातूनांपोषकं स्वध्वरं शोभनयज्ञं यमग्निम् अरणी द्वेअरणी नवंनूतनंशिशुं यथा अपत्यमिवजनिष्ट अजनिषाताम् अरणी प्रजानांपोषणार्थंच एतमग्निं असृजतामित्यर्थः ॥ शिशुं शोतनूकरणे आदेचइत्यादिनाआत्वं शःकित्सन्वच्चेत्युप्रत्ययः सन्वद्भावश्च द्विर्भावः अभ्यासस्यह्रस्वश्च सन्यतइतीत्वं आतोधातोरित्याकारलोपः धान्येनिदित्यस्मात्सूत्रान्निदित्यनुवर्तते नित्त्वादाद्युदात्तः । यथा यथेतिपादान्तेइतिसर्वानुदात्तः । जनिष्ट जनीप्रादुर्भावे लुङ् छान्दसत्वाद्वचनव्यत्ययः । अरणी ऋगतौ अर्तिसृभृधृधम्यश्यवितृभ्योनिरितिअनिःप्रत्ययः आद्युदात्तः आभ्यामियर्तिगच्छत्यग्निरित्यरणी । कथमपादानार्थेऔणादिकोनिः । ताभ्यामन्यत्रोणादयइतिनियमात् भीमादित्वात्सिद्धम् । मानुषीणां मनोर्जातावञ्यतौषुक्चेत्यञ्प्रत्ययः षुगागमश्च ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । विशां विशप्रवेशने कर्तरिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् । स्वध्वरं ध्वरतिर्हिंसार्थस्यध्वरतेःपचाद्यच् नविद्यतेध्वरोहिंसायस्मिन्नित्यध्वरः बहुव्रीहिस्वरापवादत्वेननञ्सुभ्यामित्यन्तोदात्तः ॥ ३ ॥

अथचतुर्थी–

उतस्मदुर्गृभीयसेपुत्रोनह्वार्याणाम् ।
पुरूयोदग्धासिवनाग्नेपशुर्नयवसे ॥ ४ ॥

उत । स्म । दुःऽगृभीयसे । पुत्रः । न । ह्वार्याणाम् । पुरु । यः । दग्धा । असि । वना । अग्ने । पशुः । न । यवसे ॥ ४ ॥

उतस्म अपिच ह्वार्याणां कुटिलंगच्छतां सर्पाणां यद्वा आस्कान्दितादिगतिविशेषेणवक्रगमनानाम् अश्वानां पुत्रोन पुत्रइव बालसर्पइवअशिक्षितबालाश्वइव वा दुर्गृभीयसेदुःखेनगृह्यसे हेअग्ने यस्त्वं पुरु पुरूणि बहूनि वना वनानि दग्धासि दाहकोभवसि कथमिव यवसेतृणेपशुर्न पशुरिव । अयमर्थः—अत्यन्तक्षुधार्तःपशुः तृणविषयेविसृष्टःसन् यथासर्वंभक्षयति तद्वदित्यर्थः ॥ दुर्गृभीयसे ग्रहउपादाने यक् ब्रुवईडित्यनुवृत्तौ बहुलंछन्दसीतीडागमः ग्रह्यादिनासंप्रसारणं हृग्रहोर्भश्छन्दसीतिभकारः निघातः । ह्वार्याणां ह्वृकौटिल्ये ऋहलोर्ण्यत् आदिवृद्धिः तित्स्वरितइतिस्वरितत्वम् । पुरु पॄपालनपूरणयोः पॄभिदिव्यधिगृधिधृषिहृशिभ्यइतिकुप्रत्ययः उदोष्ठ्यपूर्वस्येतिउत्त्वम् प्रत्ययस्वरेणान्तोदात्तः । असि यद्वृत्तान्नित्यमितिननिघातः ॥ ४ ॥

अथपञ्चमी—

अधस्मयस्यार्चयःसम्यक्संयन्तिधूमिनः ।
यदीमहत्रितोदिव्युपध्मातेवधमतिशिशीतेध्मातरीयथा ॥ ५ ॥

अध । स्म । यस्य । अर्चयः । सम्यक् । सम्ऽयन्ति । धूमिनः ।
यत् । ईम् । अह । त्रितः । दिवि । उप । ध्माताऽइव । धमति ।
शिशीते । ध्मातरि । यथा ॥ ५ ॥

अधस्म अपिच धूमिनः धूमवतोयस्याग्नेरर्चयः अर्चींषि सम्यक् शोभनं संयन्ति सर्वतःप्राप्नुवन्ति त्रितः त्रिषुस्थानेषु ततोव्याप्तः त्रीणिस्थानानिवाअतीत्य दिवि अन्तरिक्षे यत् यदा ईमयमात्मानमुपधमति उपवर्धयति तदा ज्वालाः सर्वतोगच्छन्तीत्यर्थः कथमिव ध्मातेव कर्मारोयथाभस्त्रादिभिरग्निं संवर्धयतितद्वत् स्वात्मानंवर्धयतीत्यर्थः किंच ध्मातरियथायथाध्मातृसमीपेविद्यमानोग्निः तेनध्मायमानः आत्मानंशिशीते तीक्ष्णीकरोति तद्वत् स्वयमेव स्वात्मानंतीक्ष्णीकरोतीत्यर्थः अहेतिपादपूरणः ॥ यन्ति इण्गतौ यच्छब्दयोगान्निघाताभावः । धमति ध्माशब्दाग्निसंयोगयोः पाघ्रादिनाधमादेशः पूर्ववन्निघाताभावः । शिशीते शोतनूकरणे व्यत्ययेनात्मनेपदी श्लावित्यनुवर्तमाने बहुलंछन्दसीति विकरणस्यश्लुः आदेचउपदेशेशितीत्यात्त्वम् श्लावितिद्विर्वचनं बहुलंछन्दसीत्यभ्यासस्येत्त्वम् उभेअभ्यस्तमित्यभ्यस्तसंज्ञायाम् आतईहल्यघोरितीत्वं तिङउत्तरत्वान्निघाताभावः ॥ ५ ॥

अथषष्ठी–

तवाहमंग्नऊतिभिर्मित्रस्यंचप्रशंस्तिभिः ।
द्वेषोयुतोनदुंरितातुर्याममर्त्यानाम् ॥ ६ ॥

तवं । अहम् । अग्ने । ऊतिऽभिः । मित्रस्यं । च । प्रशंस्तिऽभिः ।
द्वेषःऽयुतः । न । दुःऽइता । तुर्याम । मर्त्यानाम् ॥ ६ ॥

हेअग्ने अहं मित्रस्य सर्वेषांमित्रभूतस्य तव ऊतिभिः युष्मत्कर्तृकरक्षणैः युष्मत्प्रशस्तिभिश्च अस्मत्कृतैःस्तोत्रैश्चमर्त्यानां शत्रुभूतानां मनुष्याणां दुरिता दुरितानि तत्कर्तृकानि पापसाधनकर्माणि द्वेषोयुतोन द्वेषयुक्तानशत्रूनिव तुर्याम तरेयम् अयमर्थः–त्वद्रक्षणैस्त्वत्संबन्धिस्तुतिभिश्च बाह्याभ्यन्तरशत्रून्तरेयामित्यर्थः ॥ ऊतिभिः अवरक्षणे क्तिन् ज्वरत्वरस्रिव्यविमवामुपधायाश्चेत्यूठ् ऊतियूतिजूतिसातिहेतिकीर्तयश्चेत्यन्तोदात्तत्वेननिपातितः । प्रशस्तिभिः शंसुस्तुतौ क्तिन् कृदुत्तरपदप्रकृतिस्वरापवादत्वेन तादौचनितिकृत्यतावितिगतेरुदात्तत्वम् । द्वेषोयुतः द्विषअप्रीतौ भावे असुन्प्रत्ययः युमिश्रणे कर्तरिक्विप् तुक् कृदुत्तरपदप्रकृतिस्वरत्वम् । तुर्याम तृप्लवनतरणयोः प्रार्थनायांलिङ् यासुट् लिङः सलोपोनन्त्यस्येतिसकारलोपः बहुलंछन्दसीतिशपोलुक् उदोष्ठ्यपूर्वस्यबहुलंछन्दसीत्युत्वं यासुडागमस्यउदात्तत्वात् शेषनिघातः अपादादावितिप्रतिषेधात् निघाताभावः ॥ ६ ॥

अथसप्तमी–

तंनोंअग्नेअभीनरोंर्यिंसंहस्वआभंर ।
सक्षेपयत्सपोषयद्भुवद्वाजंस्यसातयंउतैधिपृत्सुनोंवृधे ॥७॥१॥

तम् । नः । अग्ने । अभि । नरः । रयिम् । सहस्वः । आ । भर । सः ।
क्षेपयत् । सः । पोषयत् । भुवत् । वाजस्य । सातये । उत ।
एधि । पृत्ऽसु । नः । वृधे ॥ ७ ॥ १ ॥

हेअग्ने सहस्वः बलवन् नरः हविषांनेतारः नोस्माकं तं रयिं लोकेप्रसिद्धं पश्वादिलक्षणं धनम् अभ्याभर आभिमुख्येनआहर पूर्वोक्तःसोग्निः क्षेपयत् अस्मदीयान् शत्रून्क्षेपयतु सोग्निःपोषयत् अस्मान्पोषयतु वाजस्यान्नस्यसातयेलाभायभुवन् भवतु उत अपिच हेअग्ने पृत्सु पृतनासु युद्धेषु नोस्माकंवृधे

समृद्धये एधि भव संग्रामेशत्रुविजयार्थंसत्त्वसमृद्धिंकुर्वित्यर्थः ॥ सहस्वः सहमर्षणे असुन् सहत्य नेनशत्रूनितिसहोबलं मतुप् मादुपधायाइतिवत्वम् मतुवसोरुसंबुद्धौछन्दसीतिरुत्वम् आमन्त्रितस्य चेतिनिघातः । क्षेपयत् क्षिपप्रेरणे णिजन्ताल्लेट् इतश्चलोपः लेटोडाटावित्यडागमः शप् गुणायादेशौ पररूपत्वं च । पोषयत् पुषपुष्टौ । भुवत् भूसत्तायां भूसुवोस्तिङीतिगुणप्रतिषेधः उवङ् । एधि असभुवि घ्वसोरेद्धावभ्यासलोपश्चेत्येत्त्वं तस्यासिद्धत्वात् हुझल्भ्योहेर्धिरितिधिरादेशःनिघातः । पृत्सु पदादिष्वित्यादिनापृतनाशब्दस्यपृदादेशः सावेकाचइत्वादन्तोदात्तत्वम् ॥ ७ ॥

॥ इतिचतुर्थस्यप्रथमेप्रथमोवर्गः ॥ १ ॥

अग्नओजिष्ठमितिसप्तर्चंदशमंसूक्तम् ऋष्यादिविनियोगश्चपूर्ववत् चतुर्थीसप्तम्यौपङ्क्ती अग्नओजिष्ठमन्त्याचतुर्थीचेत्यनुक्रान्तम् ।

तत्रप्रथमा—

अग्नओजिष्ठमाभरद्युम्नमस्मभ्यमध्रिगो ।
प्रनोरायापरीणसारत्सिवाजायपन्थाम् ॥ १ ॥

अग्ने । ओजिष्ठम् । आ । भर । द्युम्नम् । अस्मभ्यम् ।
अध्रिगोइत्यध्रिऽगो । प्र । नः । राया । परीणसा । रत्सि ।
वाजाय । पन्थाम् ॥ १ ॥

हेअग्ने ओजिष्ठं बलवत्तमं द्युम्नं द्योततेकटकमुकुटादिरूपेणसर्वत्रप्रकाशतइतिद्युम्नं धनम् अस्मभ्यम् आभर आहर हेअध्रिगो अधृतगमन अधृतमप्रतिहतं गमनंयस्येत्यधृताः अनिवारिताः गावोरश्मयोयस्येतिवाअधृतगुः अध्रिगुः तस्यसंबोधनं नःअस्मान् परीणसा परितोव्यापकेन राया धनेन प्रकर्षेण योजय वाजाय अन्नलाभाय पन्थां पन्थानम् अन्नस्यमत्समीपप्राप्तिसाधनंमार्गंरत्सि विलिख कुर्वित्यर्थः ॥ ओजिष्ठं उब्जआर्जवे उब्जेर्बलेबलोपश्चेत्यसुन् बलोपश्च गुणः ओजः तदस्यास्तीत्यर्थे अस्मायामेधेत्यादिनाविनिः अतिशायनेइतिइष्ठन् विन्मतोर्लुक् टेरितिटिलोपः नित्त्वादाद्युदात्तः । द्युम्नं द्युतदीप्तावित्यस्माद्धातोः सुम्नद्युम्नेनिम्नेत्यादिना नप्रत्यय मकारश्चान्तादेशोनिपात्यते प्रत्ययस्वरेणान्तोदात्तः । अध्रिगो अधृतशब्दस्य अध्रिरादेशः गोशब्दस्योपसर्जनह्रस्वत्वम् आमन्त्रितस्यनिघातः ।

परीणस ' णसकौटिल्ये अत्रऽयाप्त्यर्थः धातूनामनेकार्थत्वात् अस्मात्संपदादिलक्षणोभावेक्विप् परिप्राप्तं नसूऽयापनंयस्य तत्तथोक्तम् उपसर्गादसमासेपीनिणत्वम्। अत्रप्रापणक्रिययायुक्तस्यपरेःणस-तिंप्रतिउपसर्गसंज्ञानास्ति यक्रियायुक्तास्तंप्रतिगत्युपसर्गसंज्ञकाइतिन्यायात् अतःकथंणत्वम् एवंतर्हि-उपसर्गाद्बहुलमितिवचनात् णसोणत्वं भविष्यति निपातस्यचेतिपूर्वपदस्यदीर्घः बहुव्रीहौप्रकृत्येतिपू-र्वपदप्रकृतिस्वरत्वम् । रत्सि रदविलेखने औवादिकः बहुलंछन्दसीतिशपोलुक् पादादित्वान्नि-घाताभावः । पन्थां द्वितीयैकवचने इतोत्सर्वनामस्थानेइत्यत् नकारलोपश्छान्दसः पथिमथोःसर्व-नामस्थानेइत्याद्युदात्तत्वम् ॥ १ ॥

अथद्वितीया–

त्वंनोअग्नेअद्भुतक्रत्वादक्षस्यमंहना ।
त्वेअसुर्यं१मारुहत्क्राणामित्रोनयज्ञियः ॥ २ ॥

त्वम् । नः । अग्ने । अद्भुत । क्रत्वा । दक्षस्य । मंहना । त्वे इति । असुर्यम् । आ । अरुहत् । क्राणा । मित्रः । न । यज्ञियः ॥ २ ॥

हे अग्ने अद्भुत सामर्थ्यातिशयेनसर्वेषामाश्चर्यभूत त्वं नोस्माकं क्रत्वा कर्मणा अस्मत्कृतेन यज्ञादिव्यापारेणप्रीतःसन् दक्षस्य बलस्य धनस्यवा मंहना मंहनंनामदानंकुर्विंतिशेषः यतःकारणात् त्वे त्वयि असुर्यम् असुरघ्नंबलम् आरुहत् आरूढम् अतः मित्रोन सूर्यइव यज्ञियः यज्ञार्हस्त्वं क्राणायज्ञवातकराक्षसापनोदनलक्षणानिकर्माणिकुर्वाणोभव ॥ अद्भुत आमन्त्रितस्याद्युदात्तत्वम् । क्रत्वा डुकृञ्करणे कृञःक्रतुरितिक्रतुप्रत्ययः ककारोगुणवृद्धिप्रतिषेधार्थः यणादेशः क्रतुःकर्म तृतीयैकवचनेनसादिपुवावचनमितिवचनान्नाभावाभावः । दक्षस्य दक्षगतिहिंसनयोः दक्ष्यन्तेहिंस्य-न्ते अनेनशत्रवइतिदक्षंबलं करणाधिकरणयोश्चेतिघञ् ञित्त्वादाद्युदात्तः । मंहना मंहतिर्दानकर्मा सुपांसुलुगित्याकारादेशः । त्वे सुपांसुलुगित्यादिनाङेःशेआदेशः सुवादेशत्वादनुदात्तः त्वशब्दः-प्रत्ययस्वरेणान्तोदात्तः एकादेशउदात्तेनोदात्तइत्येकादेशस्योदात्तत्वम्। आरुहत् रुहधातोर्लुङि कृमृ-दृरुहिभ्यश्छन्दसीतिच्लेरङादेशः ङित्त्वाद्गुणाभावः । क्राणा डुकृञ्करणे शानच् बहुलंछन्दसीति विकरणस्यलुक् यणादेशः सुपांसुलुगित्यात्वं चितइत्यन्तोदात्तः । यज्ञियः यज्ञमर्हतीत्यस्मिन्नर्थे यज्ञर्त्विग्भ्यांघखञावितिघः प्रत्ययस्वरेणान्तोदात्तः ॥ २ ॥

अथतृतीया—

त्वंनोअग्नएषांगयंपुष्टिंचवर्धय ।
येस्तोमेभिःप्रसूरयोनरोमघान्यानशुः ॥ ३ ॥

त्वम् । नः । अग्ने । एषाम् । गयम् । पुष्टिम् । च । वर्धय । ये ।
स्तोमेभिः । प्र । सूरयः । नरः । मघानि । आनशुः ॥ ३ ॥

हेअग्ने त्वम् एषां नः त्वत्स्तावकानामस्माकं गयं गम्यतेनिवासायेतिगयंगृहं गीयते स्त
इतिवागयंधनं पुष्टिंच गवादिविषयांपुष्टिंचवर्धय वृद्धिंप्रापय येलोकेप्रसिद्धाः सूरयोलब्धवा
स्तोतारोमनुष्याः स्तोमेभिः स्तोमैःस्तोत्रैः मघानिमंहनीयानिगवादिधनानि यथाप्रानशुः प्रा
तद्वद्वयमपीत्यर्थः ॥ गयं गृहपक्षेगमेरघ्न्यादयश्चेतियत्प्रत्ययान्तोमकारलोपश्चनिपात्यते ध
गास्तुतौ अस्मात् यत्प्रत्ययोहस्वत्वं यतोनावइत्याद्युदात्तत्वम् । पुष्टिम् पुषपुष्टौ स्त्रियां
छान्दसत्वादन्तोदात्तत्वम् । स्तोमेभिः ष्टुञ्स्तुतौ अर्तिस्तुसुहुइत्यादिनामन् गुणः नित्त्वादाद्युदा
आनशुः अशूव्याप्तौ लिट् द्विर्वचनं हलादिःशेषः अतआदेरित्यात्वम् अश्नोतेश्चेतिनुडा
निघातः ॥ ३ ॥

अथचतुर्थी—

येअग्नेचन्द्रतेगिरःशुम्भन्त्यश्वराधसः ।
शुष्मेभिःशुष्मिणोनरोदिवश्चिद्येषांबृहत्सुकीर्तिर्बोधतित्मना ।

ये । अग्ने । चन्द्र । ते । गिरः । शुम्भन्ति । अश्वऽराधसः ।
शुष्मेभिः । शुष्मिणः । नरः । दिवः । चित् । येषाम् । बृहत् ।
सुऽकीर्तिः । बोधति । त्मना ॥ ४ ॥

हेअग्ने चन्द्र सर्वेषांप्राणिनामाह्लादकर येनरः तेगिरः त्वत्संबन्धिस्तोत्ररूपावा
शुम्भन्ति शोभनाःकुर्वन्ति ते अश्वराधसः अश्वधनाभवन्ति एतेनसर्वसमृद्धिरुपलक्ष्यते त्वि
शुष्मिणःबलवन्तःसन्तः शुष्मेभिःशुष्मैः स्वकीयैर्बलैः सत्त्वैः शत्रुशोषकाभवन्ति येषां त्वत
बन्धिनंस्तवंकुर्वतां दिवश्चित् आकाशादपि बृहत् महतीसुकीर्तिर्भवति सर्वदिगन्तराल
र्तिनीकीर्तिर्भवतीत्यर्थः एवंविधंत्वां गयः त्मना आत्मना स्वयमेवबोधति बोधयति

शुंभंति शुभशुंभदीप्तौ तुदादिः पादादित्वान्निघाताभावः लसार्वधातुकानुदात्तत्वेप्राप्ते सतिशिष्टत्वाद्विकरणस्वरएव । अश्वराधसः अशूव्याप्तौ अशूप्रुषीत्यादिनाक्वन् अश्नुतेव्याप्नोत्यध्वानमित्यश्वः निच्वादाद्युदात्तः राधसाधसंसिद्धौ असुन् राध्नुवन्ति साधयन्ति अनेन धर्मादीनीतिराधोधनम बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वम् । बृहत् बृहबृहिवृद्धौ शतृ ङीपोलोपश्छान्दसः प्रत्ययस्वरः । बोधति बुधअवगमने ण्यन्तात् शपिकृते तस्यछन्दस्युभयथेतिसार्वधातुकसंज्ञायांणिलोपः यद्वृत्तान्नित्यमितिनिघाताभावः धातुस्वरेणाद्युदात्तः । त्मना मंत्रेष्वाङ्यादेरात्मनइत्याकारलोपः ॥ ४ ॥

अथपञ्चमी—

तव॒त्येअ॑ग्नेअ॒र्चयो॒भ्राज॑न्तोयन्ति॒धृ॒ष्णु॒या ।
परि॑ज्मानो॒नवि॒द्युतः॑स्वा॒नोरथो॒नवा॑ज॒युः ॥ ५ ॥

तव॑ । त्ये । अ॒ग्ने॒ । अ॒र्चयः॑ । भ्राज॑न्तः । यन्ति॑ । धृ॒ष्णु॒ऽया ।
परि॑ऽज्मानः । न । वि॒ऽद्युतः॑ । स्वा॒नः । रथः॑ । न । वा॒ज॒ऽयुः ॥ ५ ॥

हेअग्ने धृष्णुया धृष्णवः अत्यन्तप्रगल्भाः भ्राजन्तः दीप्यमानाः त्ये ते प्रसिद्धाः तव अर्चिषः त्वदीयारश्मयः यन्ति सर्वतोगच्छन्ति कथमिव परिज्मानः परितोगंत्र्यः सर्वतोव्याप्ताः विद्युतोन अचिरप्रभाइवअनेनप्रकाशातिशयउक्तः स्वानः शब्दायमानः रथोन रथइव अनेनअर्चिषां स्वनाधिक्यमुक्तं वाजयुर्न अन्नकामइव अन्नार्थयुद्धेषुशत्रुविजयायययथाप्रवर्ततेतद्वदित्यर्थः अनेनआहुतिविषयोभिलापउक्तः ॥ यंति इणगतौ । धृष्णुया ञिधृषाप्रागल्भ्ये त्रसिगृधिधृषीत्यादिनाक्नुप्रत्ययः आदितश्चेतीट्प्रतिषेधः बहुवचने सुपांसुलुगित्यादिनायाजादेशः चितइत्यंतोदात्तत्वम् । परिज्मानः अजव्रजगतौ परिपूर्वाद्धातोः अन्येभ्योपिदृश्यन्तइतिमनिन् अकारलोपश्छान्दसः निच्वादाद्युदात्तः । वाजयुः वाजंआत्मनइच्छतीतिक्यच् नच्छंदस्यपुत्रस्येतिईत्वदीर्घयोःप्रतिषेधः क्याच्छन्दसीत्युप्रत्ययः ॥ ५ ॥

अथषष्ठी—

नू॒नोअ॑ग्नऊ॒तये॑स॒बाध॑स॒श्चरा॒तये॑ ।
अ॒स्माका॑सश्चसू॒रयो॒विश्वा॒आशा॑स्तरी॒षणि॑ ॥ ६ ॥

नु । नः । अग्ने । ऊतये । सऽबाधसः । च । रातये । अस्माकासः । च । सूरयः । विश्वाः । आशाः । तरीषणि ॥ ६ ॥

हे अग्ने नोस्माकं नु क्षिप्रं ऊतये रक्षायै भव सबाधसश्च दारिद्र्यनिमित्तबाधसहितस्यच धनस्य रातये दानायभव किंच अस्माकासः अस्माकाः पुत्रमित्रादयः सूरयःस्तोतारः विश्वाः सर्वाः आशाः दिशः तरीषणि तासांतरणक्षमाभवन्तु अथवा आशाःकामाः अयमर्थः स्वाभिलषितप्रशस्तसमस्तवस्तुसंपादनंकुर्वित्यर्थः ॥ सबाधसः बाधेरसुन् बाधसासहवर्ततेइति सबाधाः वोपसर्जनस्येतिसहस्यसभावः कृदुत्तरपदप्रकृतिस्वरत्वम् । रातये रादाने क्तिन् मंत्रेवृषेषपचमनविदभूवीराउदात्तइतिअन्तोदात्तः । अस्माकासः तस्मिन्नणिचयुष्माकास्माकाविनिअणिकृते अस्माकादेशः छान्दसत्वादणोलोपः बहुवचने असुगागमः षष्ठीबहुवचनेमध्योदात्तत्वेनदृष्टत्वात् तथाविधमादेशमत्रापिकृतवानाचार्यः । विश्वाः विशेःअशूप्रुषीत्यादिनाक्वन् नित्त्वादाद्युदात्तः । तरीषणि तॄप्लवनतरणयोः कॄतॄभ्यामीषन्नितीषन् बहुलवचनत्वे अलोपाभावः अन्तोदात्तश्छान्दसः ॥ ६ ॥

अथसप्तमी—

त्वंनोअग्नेअङ्गिरःस्तुतःस्तवानआभर।
होतर्विभ्वासहंरयिंस्तोतृभ्यस्तवसेचनउतैधिपृत्सुनोवृधे॥७॥२॥

त्वम् । नः । अग्ने । अङ्गिरः । स्तुतः । स्तवानः । आ । भर । होतः । विभ्वऽसहम् । रयिम् । स्तोतृऽभ्यः । स्तवसे । च । नः । उत । एधि । पृत्ऽसु । नः । वृधे ॥ ७ ॥ २ ॥

हे अग्ने अंगिरः कार्यकारणयोरभेदोपचारात् अंगिरसांप्रकृतिभूतोप्यग्निः अंगिराइत्युच्यते हे अंगिरः पूर्वमहर्षिभिःस्तुतः स्तवानः इदानींतनैश्च स्तूयमानस्त्वं विश्वसहं महतामप्यभिभवितारंअभिभव हेतुत्वादभिभवितृधनमित्युच्यते रयिं धनं नोस्माकं आभर आहर हे होतः देवानामाह्वातःस्तोतृभ्योनोस्मभ्यं स्तवसे स्तोतुं सामर्थ्यंचप्रयच्छ उतापिच पृत्सुयुद्धेषु नोस्माकं वृधे समृद्धये एधि भव ॥ स्तवानः ष्टुञ्स्तुतौ शानचि कर्मणि व्यत्ययेनशप्प्रत्ययः आद्युदात्तश्च । विश्वासहं संहितायांविभ्वानामितिषष्ठी-

बहुवचनस्यसुपामित्यादिनाआकारादेशः तत्पुरुषेकृतिबहुलमितिषष्ठ्याअलुक् पदकारस्तु विपूर्वाद्भवतेरगागमे अन्येषामपिदृश्यतइतिदीर्घत्वंचमत्वा अवग्रहंकुर्वंति तदुत्तरपदप्रकृतिस्वरत्वम्। स्तवसे ष्टुञ्स्तुतौ तुमर्थेअसेन्प्रत्ययः नित्त्वादाद्युदात्तः ॥ ७ ॥

॥ इतिचतुर्थस्यप्रथमेद्वितीयोवर्गः ॥ २ ॥

जनस्यगोपाइतिषळृचमेकादशंसूक्तं आत्रेयस्यसुतंभरस्यार्षं जागतमाग्नेयं तथाचानुक्रान्तम्—जनस्यषट्सुतंभरोजागतमिति । प्रातरनुवाकेआश्विनशस्त्रेचास्यसूक्तस्यविनियोगः जनस्यगोपास्त्वामग्नऋतायवइति ।

तत्रप्रथमा—

जन॑स्य गो॒पा अ॑जनिष्ट॒ जागृ॑वि॒र॒ग्निः सु॒दक्षः॑ सुवि॒ताय॒ नव्य॑से ।
घृ॒तप्र॑तीको बृह॒ता दि॑वि॒स्पृशा॑ द्यु॒मद्वि भा॑ति भर॒तेभ्यः॒ शुचिः॑ ॥ १ ॥

जन॑स्य । गो॒पाः । अ॒ज॒नि॒ष्ट॒ । जागृ॑विः । अ॒ग्निः । सु॒ऽदक्षः॑ । सु॒वि॒ताय॑ । नव्य॑से । घृ॒तऽप्र॑तीकः । बृ॒ह॒ता । दि॒वि॒ऽस्पृशा॑ । द्यु॒ऽमत् । वि । भा॒ति॒ । भ॒र॒तेभ्यः॑ । शुचिः॑ ॥ १ ॥

जनस्यगोपाःगोपायिता रक्षिता जागृविः जागरणशीलः सदाप्रबुद्धः सुदक्षः सुबलः सर्वैः श्लाघनीयबलः सोग्निः नव्यसे नवतराय सुविताय लोकानांकल्याणायअजनिष्टजातः घृतप्रतीकः घृतेनप्रज्वालितांगः बृहतामहतादिविस्पृशा अभ्रंलिहनतेजसायुक्तः शुचिः शुद्धः एवंविधोग्निः भरतेभ्यः ऋत्विग्भ्यः तदर्थंद्युमत दीप्तिमत यथाभवतितथाविभाति प्रकाशते ॥ गोपाः गुपूरक्षणे आयःप्रत्ययः गोपायतेःक्विप् परस्यादकारलोपः अत्र परस्यादपृक्तलोपकृते वर्णाश्रयत्वात्प्रत्ययलक्षणाभावेनयलोपोनस्यात लोपोव्योर्वलीतिप्रथमंलोपग्रहणात ज्ञापकात् यलोपएवभवति लोपाओदेशस्य यलोपविधिंप्रतिनस्थानिवद्भावः प्रत्ययस्वरः । जागृविः जागृनिद्राक्षये जृशृस्तृजागृभ्यःक्विन्नितिक्विन्प्रत्ययःजाग्रोविचिणणल्ङित्स्वितिप्रतिषेधाद्गुणाभावः नित्त्वादाद्युदात्तः । सुदक्षः आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम । सुविताय तन्वादीनांछन्दस्युपसंख्यानमितिसोरुवङादेशः सपमानात्कइत्युत्तरपदाद्युदात्तत्वम । नव्यसे नवशब्दादतिशायनेर्थेईयसुनप्रत्ययः ईकारलोपश्छान्दसः अतोलोपः आद्युदात्तः । दिविस्पृशा हृद्युभ्यांङेरित्युपसंख्यानमित्यलुक् कृदुत्तरपदप्रकृतिस्वरत्वम । द्युमत ह्रस्वनुड्भ्यांमतुबितिह्रस्वात्परस्यमतुपः अन्तोदात्तत्वम् ॥ १ ॥

अथद्वितीया—

यज्ञस्यकेतुंप्रथमंपुरोहितमग्निंनरस्त्रिपधस्थेसमीधिरे।
इन्द्रेणदेवैःसरथंसबर्हिषिसीदन्निहोतायजथायसुक्रतुः ॥ २ ॥

यज्ञस्यं। केतुम्। प्रथमम्। पुरःऽहितम्। अग्निम्। नरः।
त्रिऽसधस्थे। सम्। ईधिरे। इन्द्रेण। देवैः। सऽरथम्। सः।
बर्हिषि। सीदत्। नि। होता। यजथाय। सुऽक्रतुः ॥ २ ॥

नरः ऋत्विजः यज्ञस्ययागस्यकेतुं प्रज्ञापकं पुरोहितं यजमानैःपुरस्कृतं इंद्रेण देवैश्च सरथं तेषां मान्यत्वात्समानरथं अग्निं त्रिसधस्थे त्रिस्थाने विहारप्रदेशे प्रथमं समीधिरे समैन्धत सुक्रतुः शोभनकर्माहोता देवानामाह्वाता सोग्निः बर्हिषि बर्हिर्युक्तेतस्मिन्स्थाने यजथाय यज्ञाय निषीदत् प्रतिष्ठितोभवदितियावत्॥ केतुं कितज्ञाने औणादिकउप्रत्ययःअन्तोदात्तः पुरोहितं पुरोव्ययमितिगतिसंज्ञायांगतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम। त्रिषधस्थे आहवनीयादिलक्षणेन्त्रिप्रकारेणअग्निनासहतिष्ठतीतित्रिषधस्थः कप्रत्ययः सधमादस्थयोश्छन्दसीतिसधादेशः कृदुत्तरपदप्रकृतिस्वरत्वम्। सीदत् सदःपाघ्रादिनासीदादेशः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः पादादित्वान्निघाताभावः। यजथाय यजेरौणादिकःअथप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः॥२॥

अथतृतीया—

असंमृष्टोजायसेमात्रोःशुचिर्मन्द्रःकविरुदतिष्ठोविवस्वतः।
घृतेनत्वावर्धयन्नग्नआहुतधूमस्तेकेतुरभवद्दिविश्रितः ॥ ३ ॥

असंमृऽष्टः। जायसे। मात्रोः। शुचिः। मन्द्रः। कविः। उत्।
अतिष्ठः। विवस्वतः। घृतेन। त्वा। अवर्धयन्। अग्ने।
आऽहुत। धूमः। ते। केतुः। अभवत्। दिवि। श्रितः ॥ ३ ॥

हेअग्ने मात्रोररण्योः स्वजननिमित्तत्वादरणीमातरावित्युच्येते ताभ्यां असंमृष्टः अबाधितएवजायसे प्रादुर्भूतोभवसि मंद्रः सर्वैःस्तुत्यः कविः क्रान्तः सर्वत्रव्याप्तः अथवा मेधावी शुचिस्त्वं विवस्वतः अग्निहोत्रार्थं गृहे विशेषेणवसतोयजमानात्उदतिष्ठः उदितो भवःपूर्वेमहर्षयः त्वा त्वां घृतेन अवर्धयन् वृद्धिमनयन् हेआहुत आहुतिभिर्हुत ते तवदिवि

अन्तरिक्षे श्रितोव्याप्तः धूमःकेतुः प्रज्ञापकोअभवत् अग्न्यनुमापकत्वात्धूमस्य ॥ मात्रोः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् । मन्द्रः मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु अत्रस्तुत्यर्थादस्मात् स्फायितंचीत्यादिनारक् अन्तोदात्तः । कविः कमेरिनसर्वधातुभ्यइतीन्प्रत्ययः बाहुल्कान्मकारस्यवत्वंरेफलोपश्च व्यत्ययेनान्तोदात्तत्वम् । उदतिष्ठः उत्पूर्वादूर्ध्वकर्मवाचिनस्तिष्ठतेरात्मनेपदाभावः । विवस्वतः विपूर्वाद्वसतेःसंपदादिलक्षणोभावेक्विप् तदस्यास्तीतिमतुप् मादुपधायाश्चेतिवत्वं मतुपोनुदात्तत्वाद्धातुस्वरः ॥ ३ ॥

अथचतुर्थी—

अग्निर्नोयज्ञमुपवेतुसाधुयाग्निंनरोविभरन्तेगृहेगृहे ।
अग्निर्दूतोअभवद्धव्यवाहनोग्निंवृणानावृणतेकविक्रतुम् ॥ ४ ॥

अग्निः । नः । यज्ञम् । उप । वेतु । साधुऽया । अग्निम् ।
नरः । वि । भरन्ते । गृहेऽगृहे । अग्निः । दूतः । अभवत् ।
हव्यऽवाहनः । अग्निम् । वृणानाः । वृणते । कविऽक्रतुम् ॥ ४ ॥

साधुया सर्वपुरुषार्थानांसाधकः अग्निर्नोयज्ञेअस्मदीयंयागंप्रति उपवेतु आगच्छतु नरः मनुष्याः गृहेगृहे अनुगृहं अग्निंविभरन्ते विहरन्ति विहरणंकुर्वतीत्यर्थः हव्यवाहनः हव्यानांहविषांवोढाअग्निः दूतः देवानांदूतःअभवत् वृणानाः संभजमानाःसन्तः कविक्रतुं क्रान्तयज्ञं अग्निंवृणते संभजन्ते ॥ साधुया सुपांसुलुगित्यादिनाविभक्त्यादेशः ॥ ४ ॥

अथपंचमी—

तुभ्येदमग्नेमधुमत्तमंवचस्तुभ्यंमनीषाइयमस्तुशंहृदे ।
त्वांगिरःसिन्धुमिवावनीर्महीरापृणन्तिशवसावर्धयन्तिच ॥ ५ ॥

तुभ्य । इदम् । अग्ने । मधुमत्ऽतमम् । वचः । तुभ्यम् । मनीषा ।
इयम् । अस्तु । शम् । हृदे । त्वाम् । गिरः । सिन्धुम्ऽइव ।
अवनीः । महीः । आ । पृणन्ति । शवसा । वर्धयन्ति । च ॥ ५ ॥

हेअग्ने तुभ्य तुभ्यं त्वदर्थं मधुमत्तमं अत्यन्तमधुरंइदंवचः क्रियते हृदे हृदि शंसुखंकुर्वती इयंमनीषास्तुतिः तुभ्यमस्तु गिरःस्तुतिरूपावाचःत्वांआपृणन्ति पूरयन्ति शवसाबलेनवर्धयन्तिच कथमिव महीः महत्यः अवनीः अवन्योनद्यः सिन्धुमिव समुद्रमिव ॥५॥

अथषष्ठी—

त्वामग्नेअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रियाणंवनेवने।
सजायसेमथ्यमानःसहोमहत्त्वामाहुःसहसस्पुत्रमङ्गिरः ॥ ६ ॥३॥

त्वाम्। अग्ने। अंगिरसः। गुहा। हितम्। अनु। अविन्दन्।
शिश्रियाणम। वनेऽवने। सः। जायसे। मथ्यमानः। सहः। महत्।
त्वाम्। आहुः। सहसः। पुत्रम्। अंगिरः॥ ६ ॥३॥

हेअग्ने अंगिरसऋषयः गुहा गुहायां हितं निहितं निगूढं वनेवने वृक्षेवृक्षे शिश्रियाणं आश्रितं त्वां अन्वविंदन् अलभन्त महत् महता सहः सहसा बलेनयुक्तः सत्वं मथ्यमानोजायसे हेअंगिरः अंगिरसांप्रकृतिभूत त्वांसहसस्पुत्रमाहुः॥ शिश्रियाणं श्रिञ्सेवायां लिटःकानच् शपःश्लुः श्लाविति द्विर्वचनं इयङादेशः चित्त्वादन्तोदात्तः ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेतृतीयोवर्गः ॥ ३ ॥

प्राग्नयेबृहतइतिषळृचंद्वादशंसूक्तं सुतंभरस्यार्षंत्रैष्टुभमाग्नेयं प्राग्नयइत्यनुक्रान्तम्। प्रातरनुवाकआग्नेयेक्रतौत्रैष्टुभेछन्दसिआश्विनशस्त्रेचेदंसूक्तं सूत्रितंच—प्राग्नयेबृहतेप्रवेधसेकवयइति।

तत्रेयंप्रथमा—

प्राग्नयेबृहतेयज्ञियायऋतस्यवृष्णेअसुरायमन्म।
घृतंनयज्ञआस्ये३सुपूतंगिरंभरेवृषभायप्रतीचीम् ॥ १ ॥

प्र। अग्नये। बृहते। यज्ञियाय। ऋतस्य। वृष्णे। असुराय।
मन्म। घृतम। न। यज्ञे। आस्ये। सुऽपूतम्। गिरम्। भरे।
वृषभाय। प्रतीचीम्॥ १ ॥

बृहते सामर्थ्यातिशयेनमहते यज्ञियाय यज्ञार्हाय ऋतस्योदकस्य वृष्णेवर्षित्रे ऋतमित्युदकनामसुपाठात् असुरायबलवते असेरौणादिकउरनप्रत्ययः वृषभाय कामानांवर्षित्रे मन्म ज्ञानसाधनं प्रतीचीं अभिमुखींगिरं स्तुतिरूपांवाचं प्रभरे प्रणयामि कथमिव सुपूतं सम्यक्संस्कृतमास्येप्रहुतं यज्ञेघृतंन घृतमिव आस्येप्रहुतंघृतंयथाप्रीतिकरंभवति तथा प्रीतिकरींस्तुतिमित्यर्थः ॥ १ ॥

अथद्वितीया—

ऋतंचिकित्वऋतमिच्चिकिद्ध्यृतस्यधारा अनुतृन्धिपूर्वीः ।
नाहंयातुंसहसानद्वयेनऋतंसपाम्यरुषस्यवृष्णः ॥ २ ॥

ऋतम् । चिकित्वः । ऋतम् । इत् । चिकिद्धि । ऋतस्य । धाराः ।
अनु । तृन्धि । पूर्वीः । न । अहम् । यातुम् । सहसा । न । द्वयेन ।
ऋतम् । सपामि । अरुषस्य । वृष्णः ॥ २ ॥

ऋतं स्तोत्रं हेचिकित्वः जानन् अग्ने त्वं ऋतं मयाक्रियमाणमिदंस्तोत्रंचिकिद्धि जानीहि कितज्ञाने जुहोत्यादिः लोटिरूपं इदिनिपूरणः ऋतमितिपदस्य परस्मिन्नामंत्रितेविद्यमानेपिछांदसत्वात्परांगवद्भावाभावः किंच पूर्वीः बह्वीः ऋतस्योदकस्यधाराः तस्यपोषणार्थं उत्पादयितुं अनुतृन्धि मेघाननुविध्य पातय सहसाबलेनयुक्तोहं यातुं कर्मणांनाशकरीं हिंसां नसपामि नस्पृशामि नकरोमीतियावत् द्वयेनच सत्यानृताभ्यांयत्किंचिदवैदिकंकृत्यं नसपामि षपसमवायेइतिधातुः किंतु अरुषस्यारोचमानस्यवृष्णः कामानांवर्षितुः तव ऋतंस्तोत्रमेवसपामि ॥ २ ॥

अथतृतीया—

कयानोअग्नऋतयन्नृतेनभुवोनवेदाउचथस्यनव्यः ।
वेदामेदेवऋतुपाऋतूनांनाहंपतिंसनितुरस्यरायः ॥ ३ ॥

कया । नः । अग्ने । ऋतयन् । ऋतेन । भुवः । नवेदाः । उचथस्य ।
नव्यः । वेद । मे । देवः । ऋतुऽपाः । ऋतूनाम् । न । अहम् । पतिम् ।
सनितुः । अस्य । रायः ॥ ३ ॥

हेअग्ने ऋतयन्सर्वप्राणिनांजीवनहेतुकमुदकंकुर्वन् त्वं कया केनापिकृतेन सत्येनक्रियमाणेनकर्मणा न उचथस्य अस्मदीयस्यस्तोत्रस्यनवेदाः ज्ञाताभुवः भवेः नव्यःस्तुत्यः ऋतूनां ऋतुपाः वसन्तादीनांप्रसद्यपालकः द्वितीयऋतुशब्दोनुवादकः दिवोद्योतमानोग्निः मे मां वेद वेत्तु सनितुर्भजमानस्यास्य मम रायः पश्वादिलक्षणस्यपतिं स्वामिनं तमग्निमहंनजानामि॥ भुवः भूसत्तायां लिङर्थेलेटयडागमः उवङादेशः। नवेदाः ननवेत्तीतिवेत्तीत्यस्मिन्नर्थेवर्तते कथमेतल्लभ्यते निपातनात् द्विनञ्पूर्वस्यासुन्प्रत्ययान्तस्यवेदेरेकस्यनञोलोपोअन्यस्यप्रकृतिभावश्चस्कंदस्वामिनानिपातितः पाणिनिनातु नभ्राण्नपादितिसूत्रे नवेत्तीत्येतस्मिन्नर्थेनिपातितः अस्यार्थस्यानुपपन्नत्वातस्कन्दस्वामिपक्षएवाश्रियते ॥ ३ ॥

अथचतुर्थी—

केतेअग्नेरिपवेबन्धनासःकेपायवःसनिषन्तद्युमन्तः।
केधासिमग्नेअनृतस्यपान्तिकआसतोवचसःसन्तिगोपाः ॥ ४॥

के। ते। अग्ने। रिपवे। बन्धनासः। के। पायवः। सनिषन्त। द्युऽमन्तः। के। धासिम्। अग्ने। अनृतस्य। पान्ति। के। असतः वचसः। सन्ति। गोपाः ॥ ४ ॥

हेअग्ने येरिपवे स्वकीयस्यशत्रोःबंधनासोबन्धकाः स्युः तेत्वत्संबन्धिनस्तेपुरुषाः के कीदृशाः सामर्थ्यातिशयादेवंविधाइतिकेनापिज्ञातुंनशक्यन्तइत्यर्थः येपायवोजनानांरक्षितारः द्युमन्तोदीप्तिमन्तः सनिषन्त दीनेभ्योधनंप्रयच्छन्ति त्वदीयाः के कीदृशाः ये अनृतस्यासत्यस्यधासिं धारकं जनं पान्तिरक्षन्ति ते त्वदीयाजनाः केसन्ति नकेपीत्यर्थः येअसतोदुष्टस्यअभिशापादिलक्षणस्यवचसोगोपाः गोपायितारोरक्षितारः तेत्वदीयाः केसन्ति नकेपीत्यर्थः अथवा येकेजनाः रिपोर्बन्धकाः येकेपायवोरक्षितारः सनिषन्त धनं प्रयच्छन्ति द्युमन्तः येकेअनृतस्यासत्यस्यधासिं धारकं जनं पान्ति अनृतजनितपापात्परिहृत्यसन्मार्गप्रदानेनरक्षन्ति येकेअसतः अभिशापादिलक्षणात्वचसोगोपाः गोपायितारःसन्ति तेसर्वेत्वदीयाःत्वदुपासकाःइत्यर्थः॥४

अथपंचमी—

सखायस्तेविषुणाअग्नएतेशिवासःसन्तोअशिवाअभूवन्।
अधूर्षतस्वयमेतेवचोभिर्ऋजूयतेवृजिनानिब्रुवन्तः ॥ ५॥

सखायः । ते । विषुणाः । अग्ने । एते । शिवासः । सन्तः । अशिवाः । अभूवन् । अधूर्षत । स्वयम् । एते । वचःऽभिः । ऋजुऽयते । वृजिनानि । ब्रुवन्तः ॥ ५ ॥

हेअग्ने तेसखायः स्तोतारोविषुणाः विप्रकीर्णाः सर्वत्रव्याप्ताः एतेपूर्वमशिवाः परनिन्दादि-कुर्वाणाः त्वत्परिचर्यांत्यजन्तोभद्राःसन्तः इदानींत्वत्परिचर्यांकुर्वन्तः शिवासः शिवाः आढ्याः अभूवन् किंच येऋजूयते ऋजुसम्यगाचरतेपि मह्यंवचोभिः असाधूक्तिभिः वृजिनानि कुटि-लानि ब्रुवन्तः तएतेममसपत्नाः स्वयमेववाधूर्षत अहिंस्यंत धूर्वतेर्हिंसाकर्मणइदंरूपम् ॥ ५ ॥

अथषष्ठी—

यस्तेअग्नेनमसायज्ञमीट्टऋतंसपात्यरुषस्यवृष्णः ।
तस्यक्षयःपृथुरासाधुरेतुप्रसर्स्राणस्यनहुषस्यशेषः ॥ ६ ॥ ४ ॥

यः । ते । अग्ने । नमसा । यज्ञम् । ईट्टे । ऋतम् । सः । पाति । अरुषस्य । वृष्णः । तस्य । क्षयः । पृथुः । आ । साधुः । एतु । प्रऽसर्स्राणस्य नहुषस्य । शेषः ॥ ६ ॥ ४ ॥

हेअग्ने योमनुष्यः यज्ञं यजनीयं ते त्वां नमसा स्तोत्रेण ईट्टे स्तौति यद्वा तेतुभ्यं यज्ञं यागं नमसा अन्नरूपेण हविषाईट्टेयजति अस्मिन्पक्षे यजेर्बहुलंछन्दसीतिशपःश्लुः श्लाविति द्विर्वचनं बहुलंछन्दसीतिसंप्रसारणं सवर्णदीर्घः जकारस्यटकारः सः अरुषस्यरोचमानस्य वृष्णः कामानांवर्षितुरग्नेः ऋतं स्तोत्रं पाति रक्षति तस्य यजमानस्य क्षयोगृहं पृथुविस्तीर्णंभ-वति पश्वादिलक्षणैर्धनैःसंपूर्णंभवतीत्यर्थः प्रसर्स्राणस्य प्रकर्षेणपरिचर्यांगच्छतः नहुषस्य मनु-ष्यस्य साधुः कामानांसाधकः शेषः शिष्यतइतिशेषःपुत्रः एतुआगच्छतु भवत्वित्यर्थः ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेचतुर्थोवर्गः ॥ ४ ॥

अर्चन्तस्त्वेतिषळृचंत्रयोदशंसूक्तं सुतंभरस्यार्षं गायत्रमाग्नेयं अनुक्रान्तंच—अर्चन्तोगा-यत्रंत्विति—प्रातरनुवाकाग्नेयेक्रतौगायत्रेछन्दसि आश्विनशस्त्रेइदमादिकेद्वेसूक्ते सूत्रितंच—अ-र्चन्तस्त्वेतिसूक्तेइति । आहवनीयोपस्थानेत्वमग्नेसप्रथाअसीत्येका सूत्रितंच--संनःसृजसुमत्या-

वाजवत्यात्वमग्नेसप्रथाअसीतिचेति । अश्वमेधेपौष्णेष्टौ त्वमग्नेसप्रथाइतिप्रथमाज्यभागानुवाक्या त्वमग्नेसप्रथाअसिसोमयास्तेमयोभुवःसद्वन्ताविति ।

तत्रप्रथमा—

अर्चन्तस्त्वाहवामहेर्चन्तःसमिधीमहि । अग्नेअर्चन्तऊतये॥ १

अर्चन्तः । त्वा । हवामहे । अर्चन्तः । सम् । इधीमहि । अग्ने । अर्चन्तः । ऊतये ॥ १ ॥

हेअग्ने त्वा त्वां अर्चन्तः पूजयन्तोवयं हवामहे आह्वयामः अर्चन्तस्तुवन्तोवयं ऊतये रक्षणाय तर्पणायवा त्वांसमिधीमहि समिद्भिःसंदीपयामः अर्चन्तइतितृतीयंपदमादरातिशयार्थम् ॥ १ ॥

अथद्वितीया—

अग्नेःस्तोमंमनामहेसिध्रमद्यदिविस्पृशः । देवस्यद्रविणस्यवः ॥२

अग्नेः । स्तोमंम् । मनामहे । सिध्रम् । अद्य । दिविऽस्पृशः । देवस्य द्रविणस्यवः ॥ २ ॥

द्रविणस्यवः द्रविणंधनमिच्छन्तोवयं दिविस्पृशः सूर्यआकाशंव्यामुवतोदेवस्यद्योतमानस्याग्नेः सिध्रं पुरुषार्थानांसाधकं स्तोमं स्तोत्रं अद्यास्मिन्नहनि मनापहे ब्रूमः ॥ २ ॥

अथतृतीया—

अग्निर्जुषतनोगिरोहोतायोमानुषेष्वा । सयक्षद्दैव्यंजनम् ॥ ३

अग्निः । जुषत । नः । गिरः । होता । यः । मानुषेषु । आ । सः । यक्षत् । दैव्यंम् । जनंम् ॥ ३ ॥

होता देवानामाह्वाता योग्निर्मानुषेषु आवसति सोग्निर्नोस्माकंगिरःस्तुतीः जुषत सेवतां सोग्निर्दैव्यंजनंदेवसंबन्धिनंजनं यक्षत् यजतु ॥ ३ ॥

अथचतुर्थी—

त्वमग्नेसप्रथाअसिजुष्टोहोतावरेण्यः । त्वयायज्ञंवितन्वते ॥ ४

त्वम् । अग्ने । सऽप्रथाः । असि । जुष्टः । होता । वरेण्यः । त्वया । यज्ञम् । वि । तन्वते ॥ ४ ॥

हेअग्ने जुष्टः सर्वदाप्रीतः वरेण्यः सर्वैर्वरणीयः होता त्वं सप्रथाः सर्वतःपृथुरसि भवसि तथाह्यास्कः—सप्रथाःसर्वतःपृथुरिति[1] । किंचसर्वेयजमानाः त्वयासाधनेन यज्ञं वितन्वते ॥ ४ ॥

अथपंचमी—

त्वामग्नेवाजसातममंविप्रावर्धन्तिसुष्टुतम् । सनोरास्वसुवीर्यम् ॥५॥

त्वाम् । अग्ने । वाजऽसातमम् । विप्राः । वर्धन्ति । सुऽस्तुतम् । सः । नः । रास्व । सुऽवीर्यम् ॥ ५ ॥

हेअग्ने विप्रामेधाविनः स्तोतारोवाजसातमं वाजोन्नंतद्ददतं सुष्टुतं पूर्वैर्महर्षिभिःसम्यक्स्तुतं त्वां वर्धन्ति स्तोत्रैर्वर्धयन्ति सत्वंनोस्मभ्यं सुवीर्यं सर्वैःश्लाघनीयंबलं रास्व देहि ॥ ५ ॥

अथषष्ठी—

अग्नेनेमिरराँइवदेवाँस्त्वंपरिभूरसि । आराधश्चित्रमृंजसे ॥ ६॥५॥

अग्ने । नेमिः । अरान्ऽइव । देवान् । त्वम् । परिऽभूः । असि । आ । राधः । चित्रम् । ऋञ्जसे ॥ ६ ॥ ५ ॥

हेअग्ने त्वं देवान् परिभूरसि स्वतेजसापरिभवसि कथमिव नेमिः प्रकाशमानः चक्रस्य बाह्योवलयः अरानिव नाभावर्पितानसूक्ष्मानस्थासकानिव किंच चित्रं नानाविधं राधः राध्नुवन्तिसाधयंत्यनेनपुरुषार्थानितिराधोधनं आऋंजसे स्तोतृभ्यःप्रसाधय धननामसुपाठाद्राधोधनमित्युक्तम् ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेपंचमोवर्गः ॥ ५ ॥

---

[1] नि० ६. ७.

अग्निंस्तोमेनेतिषळृचंचतुर्दशंसूक्तं सुतंभरस्यार्षंगायत्रमाग्नेयं अग्निंस्तोमेनेत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोःपूर्वसूक्तेनसहोक्तोविनियोगः ।

तत्रप्रथमा—

अग्निंस्तोमेनबोधयसमिधानोअमर्त्यम् । हव्यादेवेषुनोदधत् ॥ १ ॥

अग्निम् । स्तोमेन । बोधय । सम्ऽइधानः । अमर्त्यम् ।

हव्या । देवेषु । नः । दधत् ॥ १ ॥

हेस्तोतः अमर्त्य अमरणधर्माणमग्निंस्तोमेनस्तोत्रेणबोधय स्वाभिलषितार्थसिद्ध्येप्रबोधय योग्निःसमिधानः स्तोत्रैःसम्यक्प्रकाशमानः सनोहव्या अस्मदीयानिहव्यानिहवींषि देवेषुदधत् निदधातु ॥ १ ॥

अथद्वितीया—

तमध्वरेष्वीळतेदेवंमर्ताअमर्त्यम् । यजिष्ठंमानुषेजने ॥ २ ॥

तम् । अध्वरेषु । ईळते । देवम् । मर्ताः । अमर्त्यम् । यजिष्ठम् ।

मानुषे । जने ॥ २ ॥

मर्ताः मनुष्याः देवंद्योतमानममर्त्यं अमरणधर्माणं मानुषे मनुष्याणांसंबन्धिनि जने लोके यजिष्ठं यष्टृतमं तमग्निं अध्वरेषु सप्ततंतुषु ईळते स्तुवन्ति ॥ २ ॥

अथतृतीया—

तंहिशश्वन्तईळतेस्रुचादेवंघृतश्चुता । अग्निंहव्यायवोळ्हवे ॥ ३ ॥

तम् । हि । शश्वन्तः । ईळते । स्रुचा । देवम् । घृतऽश्चुता ।

अग्निम् । हव्याय । वोळ्हवे ॥ ३ ॥

शश्वन्तोबहवस्तोतारः तंदेवं अग्निंईळते स्तुवन्ति कीदृशास्ते घृतश्चुता घृतंक्षरंत्यास्रुचासहिताः किमर्थंस्तुवन्ति हव्याय हव्यवहनार्थं चरुपुरोडाशादिलक्षणं हविर्वोढवे वोढुम् ॥ ३ ॥

अथचतुर्थी—

अग्निर्जातोअरोचतघ्नन्दस्यूञ्ज्योतिषातमः । अविन्दद्गाअपःस्वः ॥ ४ ॥

अग्निः । जातः । अरोचत । घ्नन् । दस्यून् । ज्योतिषा । तमः ।
अविन्दत् । गाः । अपः । स्वरितिस्वः ॥ ४ ॥

जातः अरण्योर्मथ्यमानेनप्रादुर्भूतोग्निः दस्यून्यज्ञविघ्नकारिणःशत्रून् घ्नन् हिंसन् ज्योतिषा स्वेनतेजसा तमोघ्नन् अरोचत अदीप्यत किंच गाः अपः उदकानि स्वः सूर्यंच अविन्दत अवेदयत ॥ ४ ॥

अथपञ्चमी—

अग्निमीळेन्यंकविंघृतपृष्ठंसपर्यत । वेतुमेशृणवद्धवम् ॥ ५ ॥

अग्निम् । ईळेन्यम् । कविम् । घृतऽपृष्ठम् । सपर्यत । वेतु ।
मे । शृणवत् । हवम् ॥ ५ ॥

हेजनाः ईळेन्यंस्तुत्यंकविं क्रान्तदर्शिनं घृतपृष्ठं दीप्तोपरिभागं अग्निं सपर्यत पूजयत सोग्निर्मेहवं मदीयमाह्वानं वेतु कामयतां शृणवत् शृणोतुच ॥ ५ ॥

अथषष्ठी—

अग्निंघृतेनवावृधुस्तोमेभिर्विश्वचर्षणिम् । स्वाधीभिर्वचस्युभिः ॥६॥६॥

अग्निम् । घृतेन । ववृधुः । स्तोमेभिः । विश्वऽचर्षणिम् ।
सुऽआधीभिः । वचस्युऽभिः ॥ ६ ॥ ६ ॥

ऋत्विजः विश्वचर्षणिं विश्वस्यद्रष्टारं स्वाधीभिः शोभनाध्यानैः वचस्युभिः स्तुतिकामैर्देवैःसमेतमग्निं घृतेन स्तोमेभिः स्तोमैःस्तोत्रैः ववृधुः अवर्धयन् ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेषष्ठोवर्गः ॥ ६ ॥

॥ इतिपंचमेमडंलेप्रथमोनुवाकः ॥ १ ॥

द्वितीयेनुवाकेऽष्टादशसूक्तानि तत्रप्रवेधसइतिपंचर्चंप्रथमंसूक्तं आंगिरसस्यधरुणस्यार्षं त्रैष्टुभमाग्नेयं अत्रानुक्रमणिका—प्रवेधसेपंचांगिरसोधरुणइति । प्रातरनुवाकेआग्नेयेक्रतौ त्रैष्टुभेछन्दसि· आश्विनशस्त्रेचेदंसूक्तं सूत्रितंच—प्रवेधसेकवयेत्वंनोअग्नेवरुणस्यविद्वानितीति ।

तत्रेयंप्रथमा—

प्रवेधसेकवयेवेद्यायगिरंभरेयशसेपूर्व्याय ।
घृतप्रसत्तोअसुरःसुशेवोरायोधर्ताधरुणोवस्वोअग्निः ॥ १ ॥

प्र । वेधसे । कवये । वेद्याय । गिरम् । भरे । यशसे । पूर्व्याय ।
घृतऽप्रसत्तः । असुरः । सुऽशेवः । रायः । धर्ता । धरुणः । वस्वः ।
अग्निः ॥ १ ॥

योग्निर्घृतप्रसत्तः हवीरूपेणघृतेनप्रसन्नः असुरोबलवान् सुशेवः शोभनं शेवं सुखं यस्यासौसुशेवः शेवमितिसुखनामसुपाठात् रायोधनस्यधर्ता पोषकः धरुणः हविषां धारकः वस्वः वासकोग्निर्भवति वेधसे विधात्रे कवये क्रांतदर्शे वेद्याय स्तुत्याय विदिरयंमनिनासमानार्थः मनिश्चस्तुतिकर्मा यशसेयशस्विने पूर्व्याय मुख्याय तस्मैअग्नये गिरं स्तुतिं प्रभरेप्रणयामि ॥ १ ॥

अथद्वितीया—

ऋतेनऋतंधरुणंधारयन्तयज्ञस्यशाकेपरमेव्योमन् ।
दिवोधर्मन्धरुणेसेदुषोनॄञ्जातैरजाताँअभियेननक्षुः ॥ २ ॥

ऋतेन । ऋतम् । धरुणम् । धारयन्त । यज्ञस्य । शाके । परमे ।
विऽओमन् । दिवः । धर्मन् । धरुणे । सेदुषः । नॄन् । जातैः ।
अजातान् । अभि । ये । ननक्षुः ॥ २ ॥

येयजमानाः दिवोद्युलोकस्य धरुणे धारके धर्मन् यज्ञे सेदुषः आसीनान् नॄन् नेतॄन् अजातान् देवान् जातैर्मनुष्यैर्ऋत्विग्भिः अभिननक्षुः अभिप्राप्नुवन्ति तेयजमानाः यज्ञस्यधरुणं धारकं ऋतं सत्यरूपमग्निं शाके कर्मणिनिमित्ते परमे उत्कृष्टे व्योमन् स्थाने उत्तरवेद्यां ऋतेनस्तोत्रेणधारयन्तधारयन्ति ॥ २ ॥

अथतृतीया—

अंहोयुवस्तन्वस्तन्वतेविवयोमहद्दुष्टरंपूर्व्याय ।
ससंवतोनवजातस्तुतुर्यात्सिंहंनक्रुद्धमभितःपरिष्ठुः ॥ ३ ॥

अंहःऽयुवः । तन्वः । तन्वते । वि । वयः । महत् । दुस्तरम् ।
पूर्व्याय । सः । सम्ऽवतः । नवऽजातः । तुतुर्यात् । सिंहम् ।
न । क्रुद्धम् । अभितः । परि । स्थुः ॥ ३ ॥

येयजमानाः पूर्व्याय मुख्याय अस्मै अग्नये महत् अधिकं दुष्टरं राक्षसैर्दुःप्रापं वयः हवीरूपमन्नं प्रयच्छन्ति तेयजमानाः तन्वः स्वास्तनूः अंहोयुवः अंहसावियोजिकाः वितन्वते विस्तारयन्ति नवजातः सोग्निः संवतः संगतान्शत्रून् तुतुर्यात् तरतु किंच अभितः सर्वतोवर्तमानाः शत्रवः मां परिवर्जयित्वास्थुः तिष्ठेयुः कथमिव क्रुद्धंसिंहंन सिंहमिव ॥ ३ ॥

अथचतुर्थी–

मातेवयद्भरसेपप्रथानोजनंजनंधायसेचक्षसेच ।
वयोवयोजरसेयद्दधानःपरित्मनाविषुरूपोजिगासि ॥ ४ ॥

माताऽइव । यत् । भरसे । पप्रथानः । जनम्ऽजनम् । धायसे ।
चक्षसे । च । वयःऽवयः । जरसे । यत् । दधानः । परि । त्मना ।
विषुऽरूपः । जिगासि ॥ ४ ॥

पप्रथानः सर्वत्रप्रथानोयत् यस्त्वं मातेव जननीव जनंजनं सर्वंजनं भरसे बिभर्षि किंच धायसे धारणाय चक्षसे दर्शनायच सर्वैःप्रार्थ्यसे यत् यदा दधानोधार्यमाणोभवसि तदावयोवयः सर्वमन्नं जरसे जरयसि अपिच विषुरूपोनानारूपःसन् त्मना आत्मना परिजिगासि सर्वभूतानिपरिगच्छसि ॥ ४ ॥

अथपंचमी–

वाजोनुतेशवसस्पात्वन्तमुरुंदोघंधरुणंदेवरायः ।
पदंनतायुर्गुहादधानोमहोरायेचितयन्नत्रिमस्पः ॥ ५ ॥ ७ ॥

वाजः । नु । ते । शवसः । पातु । अन्तम् । उरुम् । दोघम् । धरुणम् ।
देव । रायः । पदम् । न । तायुः । गुहा । दधानः । महः ।
राये । चितयन् । अत्रिम् । अस्परित्यस्पः । ५ ॥ ७ ॥

हेदेव द्योतमानाग्ने उरुं पृथुं दोघं कामानांदोग्धारं रायोधनस्यधरुणं धारकं वाजो-हविर्लक्षणमन्नं तेत्वदीयस्यशवसोबलस्यान्तं समाप्तिं संपूर्तिं नु अद्य पातु रक्षतु तायुस्तस्करः तायुरितिस्तेननाम पदमिव आत्मीयंमार्गमिव गुहा गुहायां दधानः आत्मनःशत्रूणांप्रकाशं निदधानः महोमहते राये धनाय धनलाभार्थं चिंतयन् सन्मार्गंप्रकाशयन् अत्रिमस्यः अ-त्रिमृषिं अप्रीणयः यद्वा तं आपद्भ्यःअपारयः स्पृप्रीणनपारणयोरितिधातुः ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेसप्तमोवर्गः ॥ ७ ॥

बृहद्वयइतिपंचर्चंद्वितीयंसूक्तं आत्रेयस्यपूरोरार्षं अन्त्यापंक्तिः शिष्टाअनुष्टुभः अग्नि-र्देवता तथाचानुक्रान्तम्—बृहत्पूरुःपंत्क्यंतंहीति । प्रातरनुवाकेआग्नेयेक्रतौआनुष्टुभेछन्दसि आ-श्विनशस्त्रेचेदमादीनिदशसूक्तानि चतुर्थनवमवर्जितानि आदितस्त्रिषुसूक्तेषुअंत्यामुद्धरेत् त-थाचसूत्रितम्—बृहद्वयइतिदशानांचतुर्थनवमेउद्धरेदुत्तमांचादितस्त्रयाणामिति ।

तत्रेयंप्रथमा—

बृहद्वयोहिभानवेर्चादेवायाग्नये ।
यंमित्रंनप्रशस्तिभिर्मर्तासोदधिरेपुरः ॥ १ ॥

बृहत् । वयः । हि । भानवे । अर्च । देवाय । अग्नये । यम् ।
मित्रम् । न । प्रशस्तिऽभिः । मर्तासः । दधिरे । पुरः ॥ १ ॥

यज्ञे भानवे दीप्तिमते अग्नये बृहत् महते वयोहवीरूपमन्नंदीयतेहि अनस्त्वमपिदेवा-यद्योतमानायाग्नये अर्च प्रयच्छ मर्तासोमनुष्याःयमग्निंमित्रंन सखायमिव प्रशस्तिभिःप्रकृष्टा-भिःस्तुतिभिः पुरोदधिरे पुरस्कुर्वन्ति ॥ १ ॥

अथद्वितीया—

सहिद्युभिर्जनानांहोतादक्षस्यबाह्वोः ।
विहव्यमग्निरानुषग्भगोनवारमृण्वति ॥ २ ॥

सः । हि । द्युऽभिः । जनानाम् । होता । दक्षस्य । बाह्वोः । वि ।
हव्यम् । अग्निः । आनुषक् । भगः । न । वारम् । ऋण्वति ॥ २ ॥

योग्निर्हव्यं हविः आनुषक् देवेष्वनुषक्तंकरोति बाह्वोर्भुजयोर्दक्षस्यबलस्यद्युभिः द्युतिभिर्युक्तःसोग्निः जनानांयजमानानांहोता देवानामाह्वाताभवति भगोन सूर्यइव वारं वरणीयंधनं न्यृण्वति विशेषेणप्रयच्छतिमनुष्येषु ॥ २ ॥

अथतृतीया—

अस्यस्तोमेमघोनःसख्येवृद्धशोचिषः ।
विश्वायस्मिन्तुविष्वणिसमर्येशुष्ममादधुः ॥ ३ ॥

अस्य । स्तोमे । मघोनः । सख्ये । वृद्धऽशोचिषः । विश्वा । यस्मिन् । तुविऽस्वनि । सम् । अर्ये । शुष्मम् । आऽदधुः ॥ ३ ॥

मघोनोमघवतोधनवतः वृद्धशोचिषः वृद्धानिप्रवृद्धानिशोचींषितेजांसियस्यासौवृद्धशोचिः तस्यएवंविधस्यास्याग्नेः स्तोमे स्तोत्रे सख्येचस्याम तुविष्वणि बहुशब्दे अर्येस्वामिनि यस्मिन्नग्नौविश्वा सुपांसुलुगितिडादेशः विश्वेसर्वेऋत्विजः शुष्मंबलं हविर्भिःस्तोत्रैः समादधुः सम्यगादधति ॥ ३ ॥

अथचतुर्थी—

अधाह्यग्नएषांसुवीर्यस्यमंहना ।
तमिद्यह्वंनरोदसीपरिश्रवोबभूवतुः ॥ ४ ॥

अध । हि । अग्ने । एषाम् । सुऽवीर्यस्य । मंहना । तम् । इत् । यह्वम् । न । रोदसी इति । परि । श्रवः । बभूवतुः ॥ ४ ॥

हेअग्ने अध अथ एषामस्माकंयजमानानांसुवीर्यस्य सर्वैःस्पृहणीयस्य बलस्य मंहना मंहनायै दानायभव मंहतिर्दानकर्मा रोदसीद्यावापृथिव्यौ यह्वंन महान्तंसूर्यमिव श्रवःसर्वैः श्रवणीयंतमित् तमग्निमेवपरिबभूवतुः परिगृह्णीतः ॥ ४ ॥

अथपञ्चमी—

नूनएहिवार्यमग्नेगृणानआभर ।
येवयंयेचसूरयःस्वस्तिधामहेसचोतैधिपृत्सुनोवृधे ॥ ५ ॥ ८ ॥

नु । नः । आ । इहि । वार्यम् । अग्ने । गृणानः । आ । भर । ये ।
वयम् । ये । च । सूरयः । स्वस्ति । धामहे । सचा । उत । एधि ।
पृत्ऽसु । नः । वृधे ॥ ५ ॥ ८ ॥

हेअग्ने गृणानः स्तूयमानःसन् नुक्षिप्रं एहि यज्ञंप्रत्यागच्छ आगत्यच नोस्मभ्यंवार्यंवरणीयंधनं आभर संपादय येवयंयजमानाःयेचसूरयःस्तोतारः सचाहविर्भिःसहिता उभे ये वयं स्वस्ति स्तोत्रंधामहे कुर्मः उतअपिच पृत्सु पृतनासुनोस्माकंवृधेसमृद्ध्यै एधि भव ॥ ५॥

॥ इतिचतुर्थस्यप्रथमेष्टमोवर्गः ॥ ८ ॥

आयज्ञैरितिपंचर्चंतृतीयंसूक्तं आत्रेयस्यपूरोरार्षमाग्नेयम् अंत्यापंक्तिः शिष्टाःपंक्त्यंतपरिभाषयाअनुष्टुभः आयज्ञैरित्यनुक्रमणिका अंत्यावर्जंप्रातरनुवाकाश्विनशस्त्रयोर्बृहद्वयइत्यादिदशसूक्तमध्येविनियोगउक्तः ।

तत्रप्रथमा—

आयज्ञैर्देवमर्त्यइत्थातव्यांसमूतये ।
अग्निंकृतेस्वध्वरेपूरुरीळीतावसे ॥ १ ॥

आ । यज्ञैः । देव । मर्त्यः । इत्था । तव्यांसम् । ऊतये । अग्निम् ।
कृते । सुऽअध्वरे । पूरुः । ईळीत । अवसे ॥ १ ॥

हेदेव मर्त्यः मनुष्यः ऋत्विक् इत्था इत्थं तव्यांसं स्वतेजोभिःप्रवृद्धमग्निं ऊतयेतर्पणाय यज्ञैःस्तोत्रैराह्वयति किंच पूरुर्मनुष्यः स्तोता कृतेस्वध्वरेशोभनेक्रतौ तमग्निंअवसे रक्षणाय ईळीत स्तौति ॥ १ ॥

अथद्वितीया—

अस्यहिस्वयंशस्तरआसाविधर्मन्मन्यसे ।
तंनाकंचित्रशोचिषंमन्द्रंपरोमनीषया ॥ २ ॥

अस्य । हि । स्वयंशःऽतरः । आसा । विऽधर्मन् । मन्यसे । तम् ।
नाकम् । चित्रऽशोचिषम् । मन्द्रम् । परः । मनीषया ॥ २ ॥

हेविधर्मन् विशिष्टोधर्मोयस्यासौविधर्मा स्तोता तस्यसंबोधनं हेस्तोतः स्वयशस्तरः सुयशसांमध्येअतिशयेनसुयशास्त्वंमनीषयाप्रकृष्टबुद्ध्यासाधनेन तं प्रसिद्धं अस्य अमुं ह्यग्निं

आसा आस्येन वाचामन्यसेस्तौषि किंविशिष्टमग्निं नाकं सुखं अकंदुःखं नविद्यतेअकंयस्यसः तं चित्रशोचिषं चित्रतेजसं मन्द्रं स्तुत्यं परः परस्तात्स्थितम् ॥ २ ॥

अथतृतीया—

अस्यवासाउंअर्चिषायआयुक्ततुजागिरा।
दिवोनयस्यरेतंसाबृहच्छोचंन्त्यर्चयः ॥ ३ ॥

अस्य। वै। असौ। ऊँ इति। अर्चिषा। यः। अयुक्त। तुजा।
गिरा। दिवः। न। यस्य। रेतंसा। बृहत्। शोचन्ति। अर्चयः ॥३॥

योग्निः तुजा जगद्रक्षणसमर्थेनबलेन गिरास्तुत्या अयुक्त संबद्धोभवत् दिवोन द्योतमानस्यादित्यस्यैव यस्याग्नेरेतसा प्रभया कृत्स्नंजगद्व्याप्तं यस्याग्नेर्बृहद्बृहन्तःअर्चयोदीप्तयः शोचन्तिप्रकाशन्ते अस्यवैखल्वग्नेरर्चिषाप्रभयाअसावादित्यः अर्चिष्मान्भवति उइतिपूरणः ॥ ३ ॥

अथचतुर्थी—

अस्यक्रत्वाविचेतसोदस्मस्यवसुरथआ।
अधाविश्वासुहव्योग्निर्विक्षुप्रशंस्यते ॥ ४ ॥

अस्य। क्रत्वा। विऽचेतसः। दस्मस्य। वसु। रथे। आ। अध।
विश्वासु। हव्यः। अग्निः। विक्षु। प्र। शस्यते ॥ ४ ॥

विचेतसः सुमतयः ऋत्विजः दस्मस्य दर्शनीयस्यास्याग्नेः क्रत्वा कर्मणा यज्ञादिना वसु वसूनि धनानि रथे आदधति हव्यः यज्ञार्थआह्वातव्यः सोग्निः अध अथ उत्पत्त्यनंतरमेवविश्वासुसर्वासुविक्षुप्रजासु प्रशस्यते स्तूयते ॥ ४ ॥

अथपञ्चमी—

नूनइद्धिवार्यमासासंचन्तसूरयः।
ऊर्जोनपादभिष्टयेपाहिशग्धिस्वस्तयउतैधिपृत्सुनोवृधे ॥५॥१॥

नु। नः। इत्। हि। वार्यम्। आसा। सचन्त। सूरयः। ऊर्जः।
नपात्। अभिष्टये। पाहि। शग्धि। स्वस्तये। उत। एधि।
पृत्ऽसु। नः। वृधे॥ ५॥ १॥

हेअग्ने नोस्मभ्यंवार्यंवरणीयंधनंनुक्षिप्रंप्रयच्छ इद्धीतिपूरणौ यतःसूरयःस्तोतारः त्वत्तः सकाशादासा आस्येनस्तोत्रेणसचंत धनंलभन्ते किंच हेऊर्जोनपात् अन्नस्यनपातयितः बलस्यपुत्रवा अभिष्टये अभीच्छते मह्यं अन्नंप्रयच्छेतिशेषः पाहि अस्मानापद्भ्योरक्ष स्वस्तये क्षेमाय पश्वादिलक्षणस्यधनस्यक्षेमार्थंशग्धि त्वां याचे व्यत्ययेनमध्यमः शक्तोभवेतिवा हे अग्ने उतापिच पृत्सु पृतनासु नोवृधे समृद्धये एधि भव ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेनवमोवर्गः ॥ ९ ॥

प्रातरग्निमितिपंचर्चंचतुर्थंसूक्तं अत्रेयमनुक्रमणिका—प्रातर्मृक्तवाहाद्वितइतिविशेषणविशिष्टः आत्रेयोद्वितऋषिः पंक्त्यंतंहीति हिशब्दादस्यापिसूक्तस्यपंचमीपंक्तिः पंक्त्यंतपरिभाषया शिष्टाअनुष्टुभः उक्तोविनियोगःप्रातरनुवाकाश्विनशस्त्रयोः ।

तत्रप्रथमा—

प्रातरग्निःपुरुप्रियोविशस्तवेतातिथिः ।
विश्वानियोअमर्त्योहव्यामर्तेषुरण्यंति ॥ १ ॥

प्रातः । अग्निः । पुरुऽप्रियः । विशः । स्तवेत । अतिथिः । विश्वानि । यः । अमर्त्यः । हव्या । मर्तेषु । रण्यंति ॥ १ ॥

पुरुप्रियः बहुप्रियः विशः यजमानेधनस्यनिवेशकः अतिथिः यजमानानांगृहान्प्रतितिथिषु अभ्येतीत्यतिथिः तथाहयास्कः—अतिथिरभ्यतितोगृहान्भवत्यभ्येतितिथिषुपरकुलानीतिवापरगृहाणीतिवेति । एवंविधोग्निः प्रातःस्तवेत स्तूयते अमर्त्यः अमरणधर्मायोग्निः मर्तेषुमनुष्येषु यजमानेषु स्थितानि विश्वानि सर्वाणि हव्या हव्यानि हवींषि रण्यति कामयते ॥ १॥

अथद्वितीया—

द्वितायमृक्तवाहसेस्वस्यदक्षस्यमंहना ।
इन्दुंसधत्तआनुषक्स्तोताचित्तेअमर्त्य ॥ २ ॥

द्विताय । मृक्तऽवाहसे । स्वस्य । दक्षस्य । मंहना । इन्दुम् । सः । धत्ते । आनुषक् । स्तोता । चित् । ते । अमर्त्य ॥ २ ॥

हेअग्ने द्विताय द्वितनाम्नेत्रिपुत्राय मृक्तवाहसे मृक्तंशुद्धंहविर्देवेभ्योवहतिप्रापयतीतिमृक्तवाहः तस्मै स्वस्य आत्मीयस्यदक्षस्यबलस्यधनस्यवा मंहनामंहनायै दानायभव हेअमर्त्य

नित्याग्ने यतःकारणात् तेतुभ्यंसमृक्तवाहाः आनुषक् सर्वदाआनुषक्तमिन्दुंसोमंधत्ते धारयति स्तोताचित् स्तोताचभवति ॥ २ ॥

अथतृतीया—

तंवोदीर्घायुंशोचिषंगिराहुवेमघोनाम् ।
अरिष्टोयेषांरथोव्यंश्वदावन्नीयते ॥ ३ ॥

तम् । वः । दीर्घायुंऽशोचिषम् । गिरा । हुवे । मघोनाम् ।
अरिंष्टः । येषाम् । रथः । वि । अश्वऽदावन् । ईयंते ॥ ३ ॥

हेअग्ने दीर्घायुशोचिषं दीर्घगमनदीप्तिं तं वः पूजायांबहुवचनं त्वांमघोनां धनिनां कृते गिरा स्तोत्रेण हुवे आह्वयामि हेअश्वदावन् अश्वानांदातः येषांधनिनांरथः युद्धेषु अरिष्टः शत्रुभिरहिंसितोविनीयते विगच्छतु ॥ ३ ॥

अथचतुर्थी—

चित्रावायेषुदीधितिरासन्नुक्थापान्तिये ।
स्तीर्णंबर्हिःस्वर्णरेश्रवांसिदधिरेपरि ॥ ४ ॥

चित्रा । वा । येषु । दीधितिः । आसन् । उक्था । पान्ति । ये ।
स्तीर्णम् । बर्हिः । स्वःऽनरे । श्रवांसि । दधिरे । परि ॥ ४ ॥

येषुऋत्विक्षु चित्रानानाविधादीधितिः यज्ञविषयाक्रियाभवति ये आसन् आस्ये उक्थाउक्थानि स्तोत्राणि पान्ति रक्षन्ति तैर्ऋत्विग्भिःस्तीर्णं स्तीर्णस्यबर्हिः बर्हिषःपर्युपरिश्रवांसि अन्नानि हवींषि स्वर्नरे स्वःस्वर्गंनरंयजमानंनयतीतिस्वर्णरोयज्ञः तस्मिन् निदधिरे निधीयन्ते ॥ ४ ॥

अथपंचमी—

येमेपञ्चाशतंददुरश्वानांसधस्तुति ।
द्युमदग्नेमहिश्रवोबृहत्कृधिमघोनांनृवदमृतनृणाम् ॥ ५ ॥ १० ॥

ये । मे । पंचाशतम् । ददुः । अश्वानाम् । सधऽस्तुति । द्युऽमंत् ।
अग्ने । महि । श्रवः । बृहत् । कृधि । मघोनाम् । नृऽवत् ।
अमृत । नृणाम् ॥ ५ ॥ १० ॥

येमघवानोदातारोमेमह्यं सधस्तुतिस्तुत्यासहितं त्वत्स्तोत्रसमनंतरं अश्वानांपंचाशतंददुः हेअमृत अग्ने त्वं तेषांमघोनां नृणां द्युमत् दीप्तिमत् महि महत् बृहत् परिवृढं नृवत् परिचारकमनुष्ययुक्तं श्रवोन्नं कृधि कुरु देहीत्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेदशमोवर्गः ॥ १० ॥

अभ्यवस्थाइतिपंचर्चंपंचमंसूक्तं अत्रेयमनुक्रमणिका—अभ्यवस्थावव्रिर्गायत्र्यावनुष्टुभौविराड्रूपेति । आत्रेयोवव्रिर्ऋषिः प्रथमाद्वितीयेगायत्र्यौ तृतीयाचतुर्थ्यावनुष्टुभौ पंचमीविराड्रूपा एकादशिनस्त्रयोष्टकाश्चविराड्रूपेत्युक्तलक्षणोपेतत्वात् ।

तत्रेयंप्रथमा—

अभ्यवस्थाःप्रजायन्तेप्रवव्रेर्वव्रिश्चिकेत । उपस्थेमातुर्विचष्टे ॥ १ ॥

अभि । अवऽस्थाः । प्र । जायन्ते । प्र । वव्रेः । वव्रिः । चिकेत ।
उपऽस्थे । मातुः । वि । चष्टे ॥ १ ॥

वव्रेः ऋषेः अभि उत्तरोत्तरमवस्थाः अशोभनादशाः प्रजायन्ते तादृशीः वव्रिर्हविषांसंभक्तासोग्निः प्रचिकेत प्रजानीयात् ज्ञात्वाचापनयत्विति भावः योग्निर्मातुःपृथिव्याउपस्थेसमीपेस्थितंपदार्थजातं विचष्टे पश्यति ॥ १ ॥

अथद्वितीया—

जुहुरेविचितयन्तोनिमिषंनृम्णंपान्ति । आदृळ्हांपुरंविविशुः ॥ २ ॥

जुहुरे । वि । चितयन्तः । अनिऽमिषम् । नृम्णम् । पान्ति ।
आ । दृळ्हाम् । पुरम् । विविशुः ॥ २ ॥

येविर्चिंतयन्तः तव प्रभावंजानंतोजनाः अनिमिषं सर्वदाविजुहुरे जुह्विरे विशेषेणयज्ञार्थंत्वामाह्वयन्ति आहूयच नृम्णं तवबलं हविर्भिःस्तोत्रैश्च पांति रक्षंति तेदृह्ळां शत्रुभिःसाधयितुमशक्यांपुरं पुरीं आविविशुः प्रविशन्ति शतंपूर्भिरायसीभिर्निपाहीतिनिगमः ॥ २ ॥

अथतृतीया—

आश्वैत्रेयस्यंजन्तवोद्युमद्वर्धन्तकृष्टयः ।
निष्कग्रीवोबृहदुक्थएनामध्वानवाजयुः ॥ ३ ॥

आ । श्वैत्रेयस्यं । जन्तवः । द्युऽमत् । वर्धन्त । कृष्टयः ।
निष्कऽग्रीवः । बृहत्ऽउक्थः । एना । मध्वा । न । वाजऽयुः ॥३॥

जायन्तइतिजन्तवः कृष्टयोमनुष्याऋत्विजः मध्वान मधुनेव एना एनयास्तुत्या यद्वा नकारश्चार्थे मधुनाचश्वैत्रेयस्यश्वित्रमन्तरिक्षं तत्रभवस्यवैद्युतस्याग्नेर्द्युमत् दीप्तिमत् बलं आवर्धन्त अभिवर्धयन्ति किंविधाः कृष्टयः निष्कग्रीवः निष्केणसुवर्णेनालंकृतग्रीवाः व्यत्ययेनैकवचनं बृहदुक्थः बृहत्स्तोत्राः वाजयुः अन्नकामाः ॥ ३ ॥

अथचतुर्थी—

प्रियंदुग्धंनकाम्यमजामिजाम्योःसचा ।
घर्मोनवाजजठरोदब्धःशश्वतोदभः ॥ ४ ॥

प्रियम् । दुग्धम् । न । काम्यम् । अजामि । जाम्योः । सचा ।
घर्मः । न । वाजऽजठरः । अदब्धः । शश्वतः । दभः ॥ ४ ॥

जाम्योर्द्यावापृथिव्योःसचासहायभूतोग्निः दुग्धंन पयइव काम्यंकमनीयं अजामि दोषरहितंप्रियंअस्मदीयंस्तोत्रंशृणोतु किंविधोग्निः घर्मोन प्रवर्ग्यइव वाजजठरः वाजोन्नंजठरेयस्यसः घर्मोयथाहव्येनाज्येनपयसा आसिक्तोवाजजठरः तद्वद्धविर्जठरइत्यर्थः अदब्धःशत्रुभिः स्वयमहिंसितः शश्वतः शाश्वतोनित्यः दभः शत्रूणांहिंसकः ॥ ४ ॥

---

१ ऋ० सं० ५. २. ४.

अथपंचमी–

क्रीळंन्नोरश्मआभुंवःसंभस्मंनावायुनावेविंदानः
ताअंस्यसन्धृषजोनतिग्माःसुसंशितावक्ष्योंवक्षणेस्थाः ॥५॥११॥

क्रीळंन् । नः । रश्मे । आ । भुवः । सम् । भस्मंना । वायुनां ।
वेविंदानः । ताः । अस्य । सन् । धृषजंः । न । तिग्माः । सुऽसंशिताः ।
वक्ष्यंः । वक्षणेऽस्थाः ॥ ५ ॥ ११ ॥

हेरश्मे रश्मिमन्नग्ने क्रीळन् वनेषुक्रीडन् भस्मनास्वकार्येणभसितेनवायुनाप्रेरकेणमरुतावसंवेविदानःसम्यक्ज्ञायमानः त्वंनोस्माकं आभुवः अभिमुखोभव वक्षणेस्थाः वक्षणेवह्नौस्थिताः वक्ष्यः हविर्वहन्तीतिवक्ष्योज्वालाः सुसंशिताः सुतीक्ष्णाः धृषजः शत्रूणांधर्षकाः ताज्वालाः अस्ययजमानस्यमम न तिग्माः नतीक्ष्णाः सन् सन्तु अस्तेर्लिटिरूपम् ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेएकादशोवर्गः ॥ ११ ॥

यमग्नइतिचतुर्ऋचंषष्ठंसूक्तं अत्रीणांप्रयस्वतामार्षं आग्नेयं अंत्यापंक्तिः शिष्टाअनुष्टुभः तथाचानुक्रान्तं–यमग्नेचतुष्कंप्रयस्वन्तःपंक्त्यंतंहेति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः अत्रेश्चतुर्वीराख्येहीतिद्वितीयेहनीदंसूक्तंआज्यशस्त्रं सूत्रितंच–यमग्नेवाजसातमेतिद्वितीयेहन्याज्यमिति ।

तत्रप्रथमा–

यमंग्नेवाजसातमत्वंचिन्मन्यंसेरयिम् ।
तंनोगीर्भिःश्रवाय्यंदेवत्रापंनयायुजंम् ॥ १ ॥

यम् । अग्ने । वाजऽसातम । त्वम् । चित् । मन्यंसे । रयिम् ।
तम् । नः । गीःऽभिः । श्रवाय्यंम् । देवऽत्रा । पनय । युजंम् ॥ १ ॥

हेअग्ने हेवाजसातम अत्यन्तमन्नद त्वं यं रयिं धनं अस्माभिर्दीयमानं हवीरूपंधनं मन्यसेबुध्यसे चिदितिपादपूरणः श्रवाय्यंश्रवणीयं प्रशस्यं गीर्भिःस्तुतिभिःयुजं युक्तं नोस्मदीयंहविर्लक्षणेधनं तं देवत्रा देवेषु पनय प्रापयेत्यर्थः ॥ १ ॥

अथद्वितीया—

येअग्नेनेरयन्तितेवृद्धाउग्रस्यशवसः ।
अपद्वेषोअपह्वरोन्यव्रतस्यसश्चिरे ॥ २ ॥

ये । अग्ने । न । ईरयन्ति । ते । वृद्धाः । उग्रस्य । शवसः । अप ।
द्वेषः । अप । ह्वरः । अन्यऽव्रतस्य । सश्चिरे ॥ २ ॥

हेअग्ने येजनाःवृद्धाः पश्वादिलक्षणैर्धनैःसमृद्धाःसन्तः तेतुभ्यंनेरयन्ति हवींषिनप्रयच्छन्ति तेउग्रस्य अधिकेनशवसोबलेन अन्नेनवा अप अपनीताः बलान्नहीनाभवन्तीत्यर्थः किंच अन्यव्रतस्य अन्यदैदिकाद्विभक्तंव्रतंकर्मयस्यतस्यासुरस्यद्वेषः तत्संबंधिनंविरोधं ह्वरोहिंसाच अपसश्चिरे आत्मानं प्रापयन्ति ॥ २ ॥

अथतृतीया—

होतारंत्वावृणीमहेग्नेदक्षस्यसाधनम् ।
यज्ञेषुपूर्व्यंगिराप्रयस्वन्तोहवामहे ॥ ३ ॥

होतारम् । त्वा । वृणीमहे । अग्ने । दक्षस्य । साधनम् ।
यज्ञेषु । पूर्व्यम् । गिरा । प्रयस्वन्तः । हवामहे ॥ ३ ॥

हेअग्ने प्रयस्वन्तोन्नवन्तः एतन्नामकावयं दक्षस्यबलस्यसाधनं साधयितारं त्वां होतारं देवानामाह्वातारंवृणीमहे किंच यज्ञेषु पूर्व्यंमुख्यंत्वां गिरास्तुतिरूपयावाचाहवामहे स्तुमः ॥३॥

अथचतुर्थी—

इत्थायथातऊतयेसहसावन्दिवेदिवे ।
रायऋतायसुक्रतोगोभिःष्यामसधमादोवीरैःस्यामसधमादः ॥ ४ ॥ १२ ॥

इत्था । यथा । ते । ऊतये । सहसाऽवन् । दिवेऽदिवे । राये । ऋताय ।
सुक्रतो इतिसुऽक्रतो । गोभिः । स्याम । सधऽमादः । वीरैः ।
स्याम । सधऽमादः ॥ ४ ॥ १२ ॥

हेसहसावन् बलवन्नग्ने दिवेदिवे अन्वहं वयं ते तव ऊतये रक्षणाय यथास्याम तथा इत्थाइत्थंकुरु हेसुक्रतो राये धनाय ऋताय यज्ञायच यथास्याम तथाकुरु किंच गोभिःसधमादः सहमाद्यन्तः स्याम वीरैःपुत्रैश्चसधमादः सहमाद्यंतःस्याम तथाकुरु ॥ ४ ॥

॥ इतिचतुर्थस्यप्रथमेद्वादशोवर्गः ॥ १२ ॥

मनुष्वत्त्वेतिचतुर्ऋचंसप्तमंसूक्तं आत्रेयस्यससस्यार्षं मनुष्वत्ससइत्यनुक्रमणिका पंक्त्यंतंहेतिपूर्वोक्तत्वादिदमादीनित्रीणिसूक्तानिपंक्त्यन्तानि शिष्टाअनुष्टुभः अग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रेयंप्रथमा—

मनुष्वत्त्वानिधीमहिमनुष्वत्समिधीमहि ।
अग्नेमनुष्वदङ्गिरोदेवान्देवयतेयज ॥ १ ॥

मनुष्वत् । त्वा । नि । धीमहि । मनुष्वत् । सम् । इधीमहि ।
अग्ने । मनुष्वत् । अंगिरः । देवान् । देवऽयते । यज ॥ १ ॥

हेअग्ने त्वा त्वां मनुष्वत् मनुरिवनिधीमहि स्थापयामः मनुःशब्दोमनुपर्यायः (नभोंगिरोमनुषांवत्युपसंख्यानमितिभसंज्ञायांरुत्वाभावः) मनुष्वत् मनुरिव त्वासमिधीमहि समिद्भिः संदीपयामः हेअंगिरः अंगारात्मकाग्ने देवयते देवकामाय यजमानाय मनुष्वत् मनवे मनोरपत्यायदेवान्यज ॥ १ ॥

अथद्वितीया—

त्वंहिमानुषेजनेग्नेसुप्रीतइध्यसे ।
स्रुचस्त्वायन्त्यानुषक्सुजातसर्पिरासुते ॥ २ ॥

त्वम् । हि । मानुषे । जने । अग्ने । सुऽप्रीतः । इध्यसे । स्रुचः । त्वा ।
यन्ति । आनुषक् । सुऽजात । सर्पिःऽआसुते ॥ २ ॥

हेअग्ने त्वं मानुषेजने मनुष्यलोके सुप्रीतःस्तोत्रैःसुष्ठुप्रीतःसन् इध्यसे दीप्यसे स्रुचोहविर्भिः संपूर्णाआनुषक् अनुषक्तंयथाभवतितथा त्वा त्वाम् यन्ति प्राप्नुवन्ति हेसुजात हेसर्पिरासुते घृतयुक्तान्नेति ॥ २ ॥

अथतृतीया—

त्वांविश्वेसजोषसोदेवासोदूतमंक्रत ।
सपर्यन्तंस्त्वाकवेयज्ञेषुदेवमीळते ॥ ३ ॥

त्वाम् । विश्वे । सऽजोषसः । देवासः । दूतम् । अक्रत । सपर्यन्तः ।
त्वा । कवे । यज्ञेषु । देवम् । ईळते ॥ ३ ॥

सजोषसः सहप्रीयमाणाः विश्वेसर्वेदेवासोदेवाः त्वां दूतं अक्रत अकुर्वन् अतःकारणात् हेकवे क्रान्तदर्शिन् देवंद्योतमानं त्वा त्वां सपर्यन्तःपरिचरन्तोयजमानाः यज्ञेषुईळते देवानाह्वातुंयाचन्ते ॥ ३ ॥

अथचतुर्थी—

देवंवोदेवयज्ययाग्निमीळीतमर्त्यः ।
समिद्धःशुक्रदीदिह्यृतस्ययोनिमासदःससस्ययोनिमासदः ॥४॥१३॥

देवम् । वः । देवऽयज्यया । अग्निम् । ईळीत । मर्त्यः ।
समऽइद्धः । शुक्र । दीदिहि । ऋतस्य । योनिम् । आ । असदः ।
ससस्य । योनिम् । आ । असदः ॥ ४ ॥ १३ ॥

मर्त्योमनुष्यः देवंद्योतमानमग्निं अग्रण्यं वः त्वांदेवयज्यया देवयज्यायै देवयागार्थं ईळीत स्तोतुमर्हति हेशुक्र शोचिष्मन् समिद्धः हविर्भिःप्रवृद्धःसन् दीदिहि दीप्यस्व ऋतस्य सत्यभूतस्य ससस्यऋषेः ममयोनिःकारणं स्वर्गसाधनं यज्ञस्थानं आसदः देवतारूपेण आसीद आदरातिशयद्योतनार्थंपुनर्वचनम् ॥ ४ ॥

॥ इतिचतुर्थस्यप्रथमेत्रयोदशोवर्गः ॥ १३ ॥

प्रविश्वसामन्नितिचतुर्ऋचमष्टमंसूक्तं आत्रेयोविश्वसामाऋषिः चतुर्थीपंक्तिः शिष्टाअनुष्टुभः अग्निर्देवता तथाचानुक्रान्तं—प्रविश्वसामन्विश्वसामेति । उक्तोविनियोगःप्रातरनुवाकाश्विनशस्त्रयोः ।

तत्रेयंप्रथमा—

प्रविंश्वसामन्नत्रिवदर्चापावकशोचिषे ।
योअंध्वरेष्वीड्योहोतांमन्द्रतंमोविशि ॥ १ ॥

प्र । विश्वऽसामन् । अत्रिऽवत् । अर्च । पावकऽशोचिषे । यः ।
अध्वरेषु । ईड्यः । होता । मन्द्रऽतमः । विशि ॥ १ ॥

हेविश्वसामन् ऋषेःसंबोधनमेतत् त्वं अत्रिवत् अत्रिरिवपावकशोचिषे शोधकदीप्तये तस्मै अग्नये प्रार्च प्रगाय योग्निःअध्वरेषुईड्यःसर्वैर्यज्वभिःस्तुत्यः होता देवानामाह्वाता विशि जने मन्द्रतमः स्तुत्यतमः ॥ १ ॥

अथद्वितीया—

न्यग्निंजातवेदसंदधातादेवमृत्विजम् ।
प्रयज्ञएंत्वानुषगद्यादेवव्यंचस्तमः ॥ २ ॥

नि । अग्निम् । जातऽवेदसम् । दधात । देवम् । ऋत्विजम् । प्र ।
यज्ञः । एतु । आनुषक् । अद्य । देवव्यंचःऽतमः ॥ २ ॥

हेयजमानाः जातवेदसं जातप्रज्ञं जातधनंवा देवं द्योतमानं ऋत्विजं ऋतुयष्टारं अग्निं निदधात निधत्त किंच देवव्यचस्तमः देवानामाप्ततमोयज्ञोयज्ञसाधनं अस्माभिर्दीयमानंहविः आनुषक् अनुषक्तंयथाभवतितथा अद्यास्मिन्नहनि तमग्निंप्रैतु प्रयच्छतु ॥२ ॥

अथतृतीया—

चिकित्विन्मंनसंत्वादेवंमर्तासऊतयें ।
वरेंण्यस्यतेवंसइयानासोंअमन्महि ॥ ३ ॥

चिकित्वित्ऽमंनसम् । त्वा । देवम् । मर्तासः । ऊतयें । वरेण्यस्य ।
ते । अवंसः । इयानासंः । अमन्महि ॥ ३ ॥

हेअग्ने चिकित्वित्जानन्मनोयस्यासौचिकित्विन्मनाः तं देवं त्वा त्वां इयानासः उपगच्छन्तोमर्तासोमनुष्यावयं ऊतये रक्षणार्थं वरेण्यस्य संभजनीयस्य ते तव अवसः अवसे तर्पणाय अमन्महि स्तुमः ॥ ३ ॥

अथचतुर्थी–

अग्ने॑चिकि॒द्ध्य१॒॑स्यन॑इ॒दंवचः॑सहस्य ।
तंत्वा॑सुशिप्रदंपते॒स्तोमै॑र्वर्ध॒न्त्यत्र॑यो॒गी॒र्भिः॑शुंभ॒न्त्यत्र॑यः ॥४॥१४॥

अग्ने॑ । चि॒कि॒द्धि । अ॒स्य । नः॒ । इ॒दम् । वचः॑ । स॒ह॒स्य॒ । तम् । त्वा॒ ।
सु॒ऽशि॒प्र॒ । द॒म्ऽप॒ते॒ । स्तोमैः॑ । व॒र्ध॒न्ति॒ । अत्र॑यः । गीः॒ऽभिः॑ ।
शुं॒भ॒न्ति॒ । अत्र॑यः ॥ ४ ॥ १४ ॥

हेअग्ने सहस्य सहसोबलस्यपुत्र नोस्मदीयं अस्येदंपरिचरणं इदंवचः स्तोत्रंच चिकिद्धि जानीहि हेसुशिप्र शोभने शिप्रेहनूनासिकेवायस्यासौसुशिप्रः तस्यसंबोधनंसुशिप्र सुहनो दंपते गृहपते तं त्वां अत्रयोत्रिपुत्राः स्तोमैःस्तोत्रैः वर्धन्ति वर्धयन्ति अत्रयोगीर्भिःशुंभंत्यलंकुर्वन्ति ॥ ४ ॥

॥ इतिचतुर्थस्यप्रथमेचतुर्दशोवर्गः ॥ १४ ॥

अग्नेसहन्तमितिचतुर्ऋचंनवमंसूक्तं अत्रानुक्रमणिका–अग्नेद्युम्नोविश्वचर्षणिरिति । द्युम्नऋषिः चतुर्थीपंक्तिराद्यास्तिस्रोनुष्टुभः अग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तान्तःपातितत्वादुक्तोविनियोगः ।

तत्रेयंप्रथमा–

अग्ने॒सह॑न्त॒मा भ॑रद्यु॒म्नस्य॑प्रा॒सहा॑र॒यिम् ।
विश्वा॒यश्च॑र्ष॒णीर॒भ्या॒३॒॑सावाजे॑षुसा॒सह॑त् ॥ १ ॥

अग्ने॑ । सह॑न्तम् । आ । भ॒र॒ । द्यु॒म्नस्य॑ । प्र॒ऽसहा॑ । र॒यिम् ।
विश्वाः॑ । यः । च॒र्ष॒णीः । अ॒भि । आ॒सा । वाजे॑षु । स॒सह॑त् ॥ १ ॥

हेअग्ने प्रासहा प्रकृष्टेनबलेनसहंतं शत्रूनभिभवन्तं रयिं पुत्रं द्युम्नस्य द्युम्नाय मम ऋषये आभर आहर चतुर्थ्यर्थेषष्ठी एतदेवविवृणोति यःपुत्रः आसा आस्येन स्तोत्रेणयुक्तः सन् वाजेषु युद्धेषु अभि आभिमुख्येनगतान् विश्वाः सर्वान्चर्षणीर्मनुष्यान् शत्रून् ससहव अभिभवति ॥ १ ॥

अथद्वितीया—

तमग्नेपृतनाषहंरयिंसहस्वआभर ।
त्वंहिसत्योअद्भुतोदातावाजस्यगोमतः ॥ २ ॥

तम् । अग्ने । पृतनाऽसहम् । रयिम् । सहस्वः । आ । भर ।
त्वम् । हि । सत्यः । अद्भुतः । दाता । वाजस्य । गोऽमतः ॥ २ ॥

हेअग्ने हेसहस्वः बलवन् पृतनासहं पृतनाःसेनाः अभिभवितारं रयिं पुत्रं तं त्व माभर आहर त्वंहिसत्यःसत्यभूतः अद्भुतोमहान् गोमतः गोभिर्युक्तस्यवाजस्यान्नस्य दाता ॥ २ ॥

अथतृतीया—

विश्वेहित्वासजोषसोजनासोवृक्तबर्हिषः ।
होतारंसद्मसुप्रियंव्यन्तिवार्यापुरु ॥ ३ ॥

विश्वे । हि । त्वा । सऽजोषसः । जनासः । वृक्तऽबर्हिषः ।
होतारम् । सद्मऽसु । प्रियम् । व्यन्ति । वार्या । पुरु ॥ ३ ॥

हेअग्ने सजोषसः सहप्रीयमाणाः वृक्तबर्हिषोलूनबर्हिषोविश्वेसर्वेजनासोजनाः ऋत्विजः सद्मसु यज्ञगृहेषु होतारं देवानामाह्वातारं प्रियं सर्वेषांप्रीतिकरं त्वा त्वां पुरु पुरूणि बहूनि वार्या वरणीयानिधनानि व्यंति याचन्ते ॥ ३ ॥

अथचतुर्थी—

सहिष्मांविश्वचर्षणिरभिमातिसहोदधे ।
अग्नएषुक्षयेष्वारेवन्नःशुक्रदीदिहिद्युमत्पावकदीदिहि ॥ ४ ॥ १५

सः । हि । स्म । विश्वऽचर्षणिः । अभिऽमाति । सहः ।
दधे । अग्ने । एषु । क्षयेषु । आ । रेवत् । नः । शुक्र ।
दीदिहि । द्युऽमत् । पावक । दीदिहि ॥ ४ ॥ १५ ॥

हेअग्ने सः लोकेषुप्रसिद्धोविश्वचर्षणिर्ऋषिः अभिमाति शत्रूणांहिंसकंसहोबलंदधे धारयतु हेशुक्र शोचिष्मन् त्वं नोस्मदीयेषुक्षयेषुगृहेषुरेवत् धनयुक्तंयथाभवतितथाआदीदिहि आदीप्यस्व हेपावक पापानांशोधक अग्ने त्वं द्युमत् दीप्तियुक्तं यशोयुक्तंच दीदिहि दीप्यस्व ॥ ४ ॥

॥ इतिचतुर्थस्यप्रथमेपंचदशोवर्गः ॥ १५ ॥

अग्नेत्वंनइतिचतुर्ऋचंदशमंसूक्तं अत्रानुक्रमणिका—अग्नेत्वंगौपायनालौपायनावाबन्धुःसुबन्धुश्रुतबन्धुर्विप्रबन्धुश्चैकर्चाद्वैपदमिति । विंशतिकाद्विपदाविराजइत्युक्तत्वाच्चतस्रोद्विपदाविराजः बन्धुःसुबन्धुःश्रुतबन्धुर्विप्रबन्धुश्चक्रमेणचतसृणामृषयः तेचगौपायनालौपायनावा अग्निर्देवता महापितृयज्ञेआहवनीयंप्रतिगच्छन्तऋत्विजःइदंसूक्तंजपेयुः तथाचसूत्रितं—अथैनमभिसमायन्ति मामगामाग्नेत्वंनइतिजपन्तइति । दशरात्रेषष्ठेहनितृतीयसवनेमैत्रावरुणस्यअग्नेत्वमितिद्वे तंत्वाशोचिष्ठेत्येका एवंमिलितोद्वैपदस्तृचःस्तोत्रियःतथैवसूत्रितं—अग्नेत्वंनोअन्तमोग्नेभवसुषमिधेति ।

तत्रेमेप्रथमाद्वितीये—

अग्नेत्वंनोअन्तंमउतत्राताशिवोभंवावरूथ्यंः ।
वसुंरग्निर्वसुंश्रवाअच्छांनक्षिद्युमत्तंमंरयिंदाः ॥ १ ॥ २ ॥

अग्ने । त्वम् । नः । अन्तंमः । उत । त्राता । शिवः । भव ।
वरूथ्यंः । वसुंः । अग्निः । वसुंऽश्रवाः । अच्छं । नक्षि ।
द्युमत्ऽतंमम् । रयिम् । दाः ॥ १ ॥ २ ॥

हेअग्ने वरूथ्यः वरणीयः संभजनीयः यद्वा वरूथैःपरिधिभिर्वृतस्त्वंनोस्माकंअंतिमोन्तिकतमोभव उतापिच त्राता रक्षकः शिवः सुखकरश्चभव वसुर्वासकोग्निःसर्वेषामग्रणीः वसुश्रवाः व्याप्तान्नस्त्वं अच्छ आभिमुख्येननक्षि अस्मान्व्याप्नुहि द्युमत्तमं अतिशयेनदीप्तिमत् रयिं पश्वादिलक्षणंधनं दाः अस्मभ्यंदेहि ॥ १ ॥ २ ॥

अथतृतीयाचतुर्थ्यौ—

सनोंबोधिश्रुधीहवंमुरुष्याणोंअघायतःसंमस्मात् ।
तंत्वांशोचिष्ठदीदिवःसुम्नायंनूनमींमहेसखिंभ्यः ॥ ३ ॥ ४ ॥ १६ ॥

सः । नः । बोधि । श्रुधि । हवम् । उरुष्य । नः । अघऽयतः ।
समस्मात् । तम् । त्वा । शोचिष्ठ । दीदिऽवः । सुम्नाय ।
नूनम् । ईमहे । सखिऽभ्यः ॥ ३॥ ४ ॥ १६ ॥

हेअग्ने सत्वंनोस्मान्बोधि बुध्यस्व हवमस्मदीयमाह्वानंश्रुधि शृणु अघायतः अघमिच्छतः समस्मात् सर्वस्मात् जनात् नोस्मान्उरुष्य रक्ष हेशोचिष्ठ अतिशोचिष्मन् दीदिवः स्वतेजोभिर्दीप्ताग्ने तं त्वा त्वां सुम्नाय सुखाय सुम्नमितिसुखनाम तदर्थंसखिभ्यःसमानख्यातिभ्यः पुत्रेभ्यः तदर्थंच नूनं ईमहे याचामहे ॥ ३ ॥ ४ ॥

॥ इतिचतुर्थस्यप्रथमेषोडशोवर्गः ॥ १६ ॥

अच्छावोअग्निमितिनवर्चमेकादशंसूक्तं अत्रानुक्रमणिका—अच्छावोनववसूयवआनुष्टुभमिति । आत्रेयावसूयुनामानऋषयः अनुष्टुप् मंडलादिपरिभाषयाग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः प्रातःसवनेअच्छावाकवदस्वेत्युक्ते अच्छावोअग्निमवसइतितृचमनुब्रूयात् तथाचसूत्रितं—अच्छावोअग्निमवसइतितृचमन्वाहेति ।

तत्रेयंप्रथमा—

अच्छावोअग्निमवसेदेवंगासिसनोवसुः ।
रासत्पुत्रऋषूणामृतावापर्षतिद्विषः ॥ १ ॥

अच्छ । वः । अग्निम् । अवसे । देवम् । गासि । सः । नः । वसुः ।
रासत् । पुत्रः । ऋषूणाम् । ऋतऽवा । पर्षति । द्विषः ॥ १ ॥

हेवसूयवः वोयूयं देवमग्निं अवसे रक्षणाय अच्छगासि अभिगायत वसुः अग्निहोत्रार्थयजमानानांगृहेवासयितासोग्निर्नोस्मभ्यंरासत् कामान्ददातु ऋषूणामृषीणांपुत्रः ऋषिभिर्मन्थनेनजनितत्वात् पुत्रउपचर्यते ऋतावा ऋतावान् सत्यवानुदकवान्वासोग्निः द्विषः अस्माकं शत्रून्पर्षति पारयतु ॥ १ ॥

अथद्वितीया—

सहिसत्योयंपूर्वेचिद्देवासश्चिद्यमीधिरे ।
होतारंमन्द्रजिह्वमित्सुदीतिभिर्विभावसुम् ॥ २ ॥

सः । हि । सत्यः । यम् । पूर्वे । चित् । देवासः । चित् ।
यम् । ईधिरे । होतारम् । मन्द्रऽजिह्वम् । इत् । सुदीतिऽभिः ।
विभाऽवसुम् ॥ २ ॥

पूर्वेचित्पूर्वेमहर्षयः होतारं देवानामाह्वातारं मन्द्रजिह्वं हविषांप्रदानेनदेवानांमादयित्री जिह्वायस्यसः तं यद्वा मोदनजिह्वं तथाहयास्कः—मन्द्रजिह्वंमंदनजिह्वंमोदनजिह्वमितिवेति । सुदीतिभिः शोभनदीप्तिभिर्युक्तं विभावसुं प्रभाधनं यमग्निंईधिरे समैन्धत देवासश्चित् देवा-अपियमग्निमीधिरे समैन्धत सह्यग्निःसत्योभवति सत्यप्रतिश्रवोभवति इदितिपूरणः ॥ २ ॥

अथतृतीया—

सनोधीतीवरिष्ठयाश्रेष्ठयाचसुमत्या ।
अग्नेरायोदिदीहिनःसुवृक्तिभिर्वरेण्य ॥ ३ ॥

सः । नः । धीती । वरिष्ठया । श्रेष्ठया । च । सुऽमत्या । अग्ने ।
रायः । दिदीहि । नः । सुवृक्तिऽभिः । वरेण्य ॥ ३ ॥

सुवृक्तिभिः स्तुतिभिः स्तूयमान वरेण्य वरणीय हेअग्ने सत्वंवरिष्ठया वरतमेन श्रेष्ठया अतिशयेनप्रशस्येननोधीती धीत्या अस्मदीयेनपरिचरणात्मकेनकर्मणा सुमत्याच सुमतिरि-तिशस्त्रमुच्यते शस्त्रेणचप्रीतःसन् रायोधनानिनोस्मभ्यं दीदिहि देहि ॥ ३ ॥

अथचतुर्थी—

अग्निर्देवेषुराजत्यग्निर्मर्तेष्वाविशन् ।
अग्निर्नोहव्यवाहनोग्निंधीभिःसपर्यत ॥ ४ ॥

अग्निः । देवेषु । राजति । अग्निः । मर्तेषु । आऽविशन् ।
अग्निः । नः । हव्यऽवाहनः । अग्निम् । धीभिः । सपर्यत ॥ ४ ॥

योग्निर्देवेषु देवानांमध्येराजति देवतारूपेणप्रकाशते योग्निर्मर्तेषु मनुष्येषु आविशन् आ-हवनीयादिरूपेणप्रविष्टोभवति योग्निर्नोस्माकंहव्यवाहनोभवति अस्मदीयेषुयज्ञेषुदेवतार्थं ह-व्यानांवोढाभवति हेयजमानाः तमग्निंधीभिःस्तुतिभिःसपर्यत परिचरत ॥ ४ ॥

---

१ नि० ६. २३. ।

पुत्रकामेष्ट्यांअग्निस्तुविश्रवस्तममितिद्वेस्विष्टकृतोयाज्यानुवाक्ये सूत्रितंच—अग्निस्तुविश्रवस्तममितिद्वेसंयाज्येइति ।

अथपंचमी—

अग्निस्तुविश्रवस्तमंतुविब्रह्माणमुत्तमम् ।
अतूर्तंश्रावयत्पतिंपुत्रंददातिदाशुषे ॥ ५ ॥ १७ ॥

अग्निः । तुविश्रवःऽतमम् । तुविऽब्रह्माणम् । उत्ऽतमम् । अतूर्तम् ।
श्रवयत्ऽपतिम् । पुत्रम् । ददाति । दाशुषे ॥ ५ ॥ १७ ॥

अग्निस्तुविश्रवस्तमं अतिशयेनबह्वन्नं तुविब्रह्माणं बहुस्तोत्रं उत्तममुत्कृष्टं अतूर्तं शत्रुभिरहिंसितं श्रावयत्पतिं श्रावयति विश्रुतान्करोति पतीन् पालयितॄन्पितॄनिति स्वकर्मणापितॄणांप्रख्यापकइतिश्रावयत्पतिः तथाविधं पुत्रं दाशुषेहवींषिदत्तवतेयजमानाय ददातिददातु॥५॥

॥ इतिचतुर्थस्यप्रथमेसप्तदशोवर्गः ॥ १७ ॥

अथषष्ठी—

अग्निर्ददातिसत्पतिंसासाहयोयुधानृभिः ।
अग्निरत्यंरघुष्यदंजेतारमपराजितम् ॥ ६ ॥

अग्निः । ददाति । सत्ऽपतिम् । ससाह । यः । युधा । नृऽभिः ।
अग्निः । अत्यम् । रघुऽस्यदम् । जेतारम् । अपराऽजितम् ॥ ६ ॥

यःपुत्रः युधा युद्धेन नृभिःपरिजनैःससाह शत्रूनभिभवति सत्पतिं सतांपालयितारं तथाविधंपुत्रं अग्निर्ददाति अस्मभ्यंददातु किंचाग्निः रघुष्यदं रघुःलघुःस्यदोजवोयस्यतं जेतारंशत्रूणां अपराजितंशत्रुभिः अत्यं अततिसततंगच्छतयत्योश्वःतंददातु ॥ ६ ॥

अश्वमेधपौष्ण्यामिष्टौ यद्वाहिष्ठमितियाज्या सूत्रितंच—यद्वाहिष्ठंतदग्नयइतिसंयाज्येति ।

सैषासप्तमी—

यद्वाहिष्ठंतदग्नयेबृहदर्चविभावसो ।
महिषीवत्वद्रयिस्त्वद्वाजाउदीरते ॥ ७ ॥

यत् । वाहिष्ठम् । तत् । अग्नये । बृहत् । अर्च ।
विभावसो इति विभाऽवसो । महिषीऽइव । त्वत् ।
रयिः । त्वत् । वाजाः । उत् । ईरते ॥ ७ ॥

वाहिष्ठं वोढृतमं यत्स्तोत्रं तदग्नये क्रियते अतोहेविभावसो प्रभाधनाग्ने बृहत् बहुन्नं धनं अर्च अस्मभ्यंप्रयच्छ कथमस्यान्नधनप्रदातृत्वमित्यपेक्षायामाह यतः त्वत् त्वत्तः सकाशात् महिषीमहती रयिर्धनं उदीरते उद्गच्छति वाजाःअन्नानिच त्वत् उदीरते उद्गच्छन्ति इवेतिपूरणः ॥ ७ ॥

अथाष्टमी—

तवंद्युमन्तोअर्चयोग्रावेवोच्यतेबृहत् ।
उतोतेतन्यतुर्यथास्वानोअर्तत्मनादिवः ॥ ८ ॥

तवं । द्युऽमन्तः । अर्चयः । ग्रावाऽइव । उच्यते । बृहत् ।
उतो इति । ते । तन्यतुः । यथा । स्वानः । अर्त । त्मना । दिवः ॥८॥

हेअग्ने तवअर्चयोरश्मयः द्युमन्तोदीप्तिमन्तोभवन्ति बृहत् महत् त्वं ग्रावेव अभिषवग्रावेव उच्यते स्तूयसे उतअपिच त्मना आत्मना दिवोद्योतमानस्यतेतवस्वानःशब्दः तन्यतुर्यथामेघगर्जितमिवअर्तउद्गच्छति ॥ ८ ॥

अथनवमी—

एवाँअग्निंवसूयवःसहसानंववन्दिम ।
सनोविश्वाअतिद्विषःपर्षन्नावेवसुक्रतुः ॥ ९ ॥ १८ ॥

एव । अग्निम् । वसुऽयवः । सहसानम् । ववन्दिम । सः । नः ।
विश्वाः । अति । द्विषः । पर्षत् । नावाऽइव । सुऽक्रतुः ॥ ९ ॥ १८ ॥

वसूयवोवसुकामावयंसहसानमस्माकंबलमिवाचरंतमग्निं एवमुक्तप्रकारेण ववन्दिम स्तुमः सुक्रतुः शोभनकर्मासोग्निर्नोस्मान् विश्वाः सर्वान् द्विषःशत्रून् अतिपर्षत् अतिपारयतु कथमिव नावासाधनेनसिंधुमिव ॥ ९ ॥

॥ इतिचतुर्थस्यप्रथमेष्टादशोवर्गः ॥ १८ ॥

अग्नेपावकेतिनवर्चंद्वादशंसूक्तं वसूयवऋषयः गायत्रीछन्दः अग्निर्देवता तथाचानुक्रान्तम्—अग्नेगायत्रमिति। प्रातरनुवाकेआग्नेयेक्रतौगायत्रेछंदसिआश्विनशस्त्रेचेदंसूक्तं सूत्रितंच—अग्नेपावकदूतंवइतिसूक्तेइति । आधानेद्वितीयायामिष्टौप्रथमस्यहविषोग्नेपावकेत्येषायाज्या सूत्रितंच—सनःपावकदीदिवोग्नेपावकरोचिषेति ।

तत्रेयंप्रथमा—

अग्नेपावकरोचिषामन्द्रयादेवजिह्वया । आदेवान्वक्षियक्षिच ॥ १ ॥

अग्ने । पावक । रोचिषा । मन्द्रया । देव । जिह्वया । आ ।
देवान् । वक्षि । यक्षि । च ॥ १ ॥

हेपावक शोधक रोचिषा स्वदीप्त्या मन्द्रया देवानांमादयित्र्या जिह्वयाच हेदेव द्योतमानाग्ने देवानावक्षि यज्ञार्थमावह यक्षिच तान्यज ॥ १ ॥

अथद्वितीया—

तंत्वाघृतस्नवीमहेचित्रभानोस्वर्दृशम् । देवाँआवीतयेवह ॥ २ ॥

तम् । त्वा । घृतस्नो इति घृतऽस्नो । ईमहे । चित्रभानो इति-
चित्रऽभानो । स्वःऽदृशम् । देवान् । आ । वीतये । वह ॥ २ ॥

हेघृतस्नो घृतस्यप्रेरक यद्वा घृतेनजनित हेचित्रभानो चित्रानानाविधाभानवोरश्मयोयस्यासौचित्रभानुः तस्यसंबोधनं स्वर्दृशं सर्वद्रष्टारं तं त्वा त्वांईमहे याचामहे अतोवीतयेहविषां भक्षणायदेवानावह ॥ २ ॥

अथतृतीया—

वीतिहोत्रंत्वाकवेद्युमन्तंसमिधीमहि । अग्नेबृहन्तमध्वरे ॥ ३ ॥

वीतिऽहोत्रम् । त्वा । कवे । द्युऽमन्तम् । सम् । इधीमहि ।
अग्ने । बृहन्तम् । अध्वरे ॥ ३ ॥

हेकवे क्रान्तदर्शिन् अग्ने वीतिहोत्रं क्रांतयज्ञं यद्वा प्रिययज्ञं द्युमन्तं दीप्तिमन्तं बृहन्तं महान्तं त्वा त्वां अध्वरेयज्ञे समिधीमहि समिद्भिःसंदीपयामः ॥ ३ ॥

अथचतुर्थी–

अग्नेविश्वेभिरागंहिदेवेभिर्हव्यदांतये । होतांरंत्वावृणीमहे ॥ ४ ॥

अग्ने । विश्वेभिः । आ । गहि । देवेभिः । हव्यऽदांतये ।

होतारम् । त्वा । वृणीमहे ॥ ४ ॥

हेअग्ने विश्वेभिःसर्वैः देवेभिःदेवैः सह त्वं हव्यदातये हविषांदात्रे यजमानाय तदर्थं आगहि यज्ञंप्रत्यागच्छ यतः होतारंदेवानामाह्वातारं त्वा त्वां वृणीमहे प्रार्थयामहे ॥ ४ ॥

अथपञ्चमी–

यजमानायसुन्वतआग्नेसुवीर्यंवह । देवैरासत्सिबर्हिषि ॥ ५ ॥ १९ ॥

यजमानाय । सुन्वते । आ । अग्ने । सुऽवीर्यम् । वह ।

देवैः । आ । सत्सि । बर्हिषि ॥ ५ ॥ १९ ॥

हेअग्ने सुन्वते अभिषवंकुर्वतेयजमानाय सुवीर्यंशोभनं बलं आवह प्रापय किंच देवैः सहबर्हिषियज्ञे आसत्सि आसीदेति ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेएकोनविंशोवर्गः ॥ १९ ॥

अथषष्ठी–

समिधानःसंहस्रजिदग्नेधर्माणिपुष्यसि । देवानांदूतउक्थ्यः ॥ ६॥

समऽइधानः । सहस्रऽजित् । अग्ने । धर्माणि ।

पुष्यसि । देवानाम् । दूतः । उक्थ्यः ॥ ६ ॥

हेसहस्रजित् सहस्रजेतरग्ने समिधानः हविर्भिःसमिध्यमानः उक्थ्यः प्रशस्यस्त्वं देवानांदूतःसन् धर्माणि नः कर्माणि यज्ञादिक्रियाः पुष्यसि पोषयसि ॥ ६ ॥

अथसप्तमी–

न्य१ग्निंजातवेदसंहोत्रवाहंयविष्ठ्यम् । दधातादेवमृत्विजम् ॥ ७ ॥

नि । अग्निम् । जातऽवेदसम । होत्रऽवाहम । यविष्ठ्यम् ।

दधात । देवम् । ऋत्विजम् ॥ ७ ॥

हेयजमानाः जातवेदसं जातानिभूतानिवेत्तीतिजातवेदाः तं होत्रवाहं होत्रस्ययज्ञस्य वोढारं यविष्ठ्यंयुवतमं देवं द्योतमानं ऋत्विजं ऋतौयष्टारं अग्निंनिदधात निधत्त ॥ ७ ॥

अथाष्टमी–

प्रयज्ञएत्वानुषगद्यादेवव्यचस्तमः । स्तृणीतबर्हिरासदे ॥ ८॥

प्र । यज्ञः । एतु । आनुषक् । अद्य । देवव्यचःऽतमः ।
स्तृणीत । बर्हिः । आऽसदे ॥ ८ ॥

अद्यास्मिन्नहनि देवव्यचस्तमः देवैःप्रकाशमानैःस्तोतृभिर्व्याप्ततमोयज्ञोयज्ञसाधनंहविरानुषक् अनुषक्तंयथाभवतितथाप्रैतु देवान्गच्छतु हेऋत्विजः आसदे अग्नेरासदनार्थं बर्हिः स्तृणीत ॥ ८ ॥

अथनवमी–

एदंमरुतोअश्विनामित्रःसीदन्तुवरुणः । देवासःसर्वयाविशा ॥९॥२०॥

आ । इदम् । मरुतः । अश्विना । मित्रः । सीदन्तु । वरुणः ।
देवासः । सर्वया । विशा ॥ ९ ॥ २० ॥

मरुतोमरुद्गणाः अश्विना अश्विनौ देवानांभिषजौ मित्रःसूर्योवरुणश्च देवासः एते सर्वेदेवाः सर्वयाविशा समस्तेनस्वीयेनपरिजनेन सार्धमिदंबर्हिःसीदन्तु आसीदन्तु ॥ ९ ॥

॥ इतिचतुर्थस्यप्रथमेविंशोवर्गः ॥ २० ॥

अनस्वन्तेतिषळृचंत्रयोदशंसूक्तं अत्रानुक्रमणिका–अनस्वन्ताषट् त्रैवृष्णपौरुकुत्स्यौद्वौ त्र्यरुणत्रसदस्यूराजानौ भारतश्चाश्वमेधोन्त्यास्तिस्रोनुष्टुभोनात्मात्मनेदध्यादितिसर्वास्वत्रिंके चिदंत्यैन्द्राग्नीइति । त्रिवृष्णस्यपुत्रस्त्र्यरुणः पुरुकुत्सस्यपुत्रस्त्रसदस्युः भरतस्यपुत्रोश्वमेधःएतेत्रयोपिराजानः संभूयास्यसूक्तस्यऋषयः यद्वात्रिरेवऋषिः आद्यास्तिस्रस्त्रिष्टुभः चतुर्थ्याद्यास्तिस्रोनुष्टुभःषष्ठीन्द्राग्निदेवत्या शिष्टाःपंचाग्नेय्यः विनियोगोलैङ्गिकः ।

तत्रेयंप्रथमा–

अनस्वन्तासत्पतिर्मामहेमेगावाचेतिष्ठोअसुरोमघोनः ।
त्रैवृष्णोअग्नेदशभिःसहस्रैर्वैश्वानरत्र्यरुणश्चिकेत ॥ १ ॥

अनस्वन्ता । सत्ऽपतिः । ममहे । मे । गावा । चेतिष्ठः ।
असुरः । मघोनः । त्रैवृष्णः । अग्ने । दशऽभिः । सहस्रैः ।
वैश्वानर । त्रिऽअरुणः । चिकेत ॥ १ ॥

अत्रीराजर्षीणांदानमग्नेःपुरतोनेनसूक्तेनावर्णयत् हेवैश्वानर विश्वेषांनराणांनेतः अग्ने सत्पतिः सतांपालयिताचेतिष्ठोज्ञातृतमः असुरोबलवान् मघोनः मघवाधनवान् प्रथमार्थेङसि त्रैवृष्णः त्रिवृष्णपुत्रः त्र्यरुणःत्र्यरुणइतिनामाराजर्षिः अनस्वन्ता अनस्वन्तौ अनसाशकटेनसंपृक्तौ गावा गावौ अनड्वाहौ गवांहिरण्यानांवादशभिःसहस्रैःसहमेमह्यंममहे ददौ महिदानेसराजर्षिः चिकेत सर्वैर्जनैरनेनदानेनज्ञायते ॥ १ ॥

अथद्वितीया–

योमेशताचविंशतिंचगोनांहरीचयुक्तासुधुराददाति ।
वैश्वानरसुष्टुतोवावृधानोग्नेयच्छत्र्यरुणायशर्म ॥ २ ॥

यः । मे । शता । च । विंशतिम् । च । गोनाम् । हरी इति । च ।
युक्ता । सुऽधुरा । ददाति । वैश्वानर । सुऽस्तुतः । ववृधानः । अग्ने ।
यच्छ । त्रिऽअरुणाय । शर्म ॥ २ ॥

यस्त्र्यरुणः शता शतानि सुवर्णानांगोनांगवांविंशतिंचयुक्ता रथेनयुक्तौ सुधुरा सुधुरौ सुष्ठुधुरंवहन्तौ हरी अश्वौच मे मह्यं ददाति अददात् हेवैश्वानर अग्ने सुष्टुतः अस्माभिःसम्यक्स्तुतः ववृधानोहविर्भिर्वर्धमानः त्वं तस्मै त्र्यरुणाय शर्म सुखं यच्छ प्रयच्छ ॥ २ ॥

अथतृतीया–

एवातेअग्नेसुमतिंचकानोनविष्ठायनवमंत्रसदस्युः ।
योमेगिरस्तुविजातस्यपूर्वीर्युक्तेनाभित्र्यरुणोगृणाति ॥ ३ ॥

एव । ते । अग्ने । सुऽमतिम् । चकानः । नविष्ठाय । नवमम् ।
त्रसदस्युः । यः । मे । गिरः । तुविऽजातस्य । पूर्वीः । युक्तेन ।
अभि । त्रिऽअरुणः । गृणाति ॥ ३ ॥

यस्यपरुणः तुविजातस्य बह्वपत्यस्य मे पूर्वीर्बह्वीः गिरः स्तुतीः श्रुत्वाप्रीतःसन् युक्तेनाभियुक्तेनमनसा अभिगृणाति इदंगृहाणेदंगृहाणेतियथामांब्रवीति एव एवं हे-अग्ने नविष्ठाय अत्यन्तंस्तुत्याय ते तुभ्यं नवमं नवतमांसुमतिंस्तुतिंचकानः कामयमान-स्त्रसदस्युरपिइदंगृहाणेदंगृहाणेतिमांप्रार्थितवान् ॥ ३ ॥

अथचतुर्थी—

योमइतिप्रवोचत्यश्वमेधायसूरये ।
ददहचासनिंयतेददन्मेधामृतायते ॥ ४ ॥

यः । मे । इति । प्रऽवोचति । अश्वऽमेधाय । सूरये । ददत् ।
ऋचा । सनिम् । यते । ददत् । मेधाम् । ऋतऽयते ॥ ४ ॥

योभिक्षमाणोर्थीसूरयेप्रेरकाय धनानांदात्रेवा अस्मै अश्वमेधाय राजर्षये मे मह्यं देहीति प्रवोचति प्रब्रवीति योश्वमेधंधनानिभिक्षतइत्यर्थः ऋचाग्नेःस्तोत्रेणसहयते आत्मनःसमीपंगच्छ-ते तस्मै अर्थिने अश्वमेधः सनिं धनं ददत् ददाति हेअग्ने ऋतायते यज्ञमिच्छते तस्मै अश्व-मेधायमेधांयज्ञविषयांप्रज्ञां ददत् देहि ॥ ४ ॥

अथपंचमी—

यस्यमापरुषाःशतमुद्धर्षयन्त्युक्षणः ।
अश्वमेधस्यदानाःसोमाइवत्र्याशिरः ॥ ५ ॥

यस्य । मा । परुषाः । शतम् । उत्ऽहर्षयन्ति । उक्षणः ।
अश्वऽमेधस्य । दानाः । सोमाःऽइव । त्रिऽआशिरः ॥ ५ ॥

यस्य येन अश्वमेधस्याश्वमेधेन दानादत्ताःपरुषाःकामानांपूरकाःशतमुक्षणः उक्षाणो-बलीवर्दाः मा मां उद्धर्षयन्ति उत्कर्षेणहर्षयन्ति हेअग्ने ते उक्षाणःत्र्याशिरः दधिसक्तुपयो-रूपास्तिस्रआशिरः अधिश्रयणसाधनभूतायेषांतेत्र्याशिरः सोमाइव तवप्रीणनायभवन्तु ॥५॥

अथषष्ठी—

इन्द्राग्नीशतदाव्न्यश्वमेधेसुवीर्यम् ।
क्षत्रंधारयतंबृहद्दिविसूर्यमिवाजरम् ॥ ६ ॥ २१ ॥

इन्द्राग्नी इति । शतऽदाव्नि । अश्वऽमेधे । सुऽवीर्यम् । क्षत्रम् ।
धारयतम् । बृहत् । दिवि । सूर्यम्ऽइव । अजरम् ॥ ६ ॥ २१ ॥

हेइन्द्राग्नी शतदाव्नि शतमपरिमितमर्थिभ्योधनंददातीतिशतदावा तस्मिन्नश्वमेधेराजर्षौ सुवीर्यं शोभनवीर्यसहितं बृहन्महत् अजरं जरारहितं क्षत्रं धनं धारयतं निधारयतं कथमिव दिव्यंतरिक्षे सूर्यमिव ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेएकविंशोवर्गः ॥ २१ ॥

समिद्धोअग्निरितिषळृचंचतुर्दशंसूक्तं अत्रेयमनुक्रमणिका—समिद्धोविश्ववारात्रेयीत्रिष्टुब्जगतीत्रिष्टुबनुष्टुब्गायत्र्याविति । अत्रिगोत्रोत्पन्नाविश्ववारानामिकाअस्यसूक्तस्यऋषिः आद्यातृतीयेत्रिष्टुभौ द्वितीयाजगती चतुर्थ्यनुष्टुप् अंत्येगायत्र्यौ अग्निर्देवता सूक्तविनियोगोलैंगिकः ।

तत्रप्रथमा—

समिद्धोअग्निर्दिविशोचिरश्रेत्प्रत्यङ्ङुषसमुर्वियाविभाति ।
एतिप्राचीविश्ववारानमोभिर्देवाँईळानाहविषाघृताची ॥ १ ॥

सम्ऽइद्धः । अग्निः । दिवि । शोचिः । अश्रेत् । प्रत्यङ् । उषसम् ।
उर्विया । वि । भाति । एति । प्राची । विश्वऽवारा । नमःऽभिः ।
देवान् । ईळाना । हविषा । घृताची ॥ १ ॥

समिद्धः सम्यक्दीप्तोग्निः दिवि द्योतमानेन्तरिक्षे शोचिस्तेजः अश्रेत् श्रयति तथा उषसं प्रत्यङ्उषसमभिमुखःसन् उर्विया उरु विस्तीर्णं विभाति विशेषेणभ्राजते नमोभिः स्तोत्रैः देवान् इन्द्रादीन् ईळाना स्तुवती हविषापुरोडाशादिलक्षणेनयुक्तया घृताची घृताच्या स्रुचा सहिता विश्ववारा सर्वमपिपापरूपंशत्रुंवारयित्री एतन्नामिका प्राची प्राङ्मुखी सती एति एवंभूतमग्निंप्रतिगच्छति ॥ १ ॥

अथद्वितीया—

समिध्यमानोअमृतस्यराजसिहविष्कृण्वन्तंसचसेस्वस्तये ।
विश्वंसधत्तेद्रविणंयमिन्वस्यातिथ्यमग्नेनिचधत्तइत्पुरः ॥ २ ॥

सम्ऽइध्यमानः । अमृतस्य । राजसि । हविः । कृण्वन्तम् । सचसे । स्वस्तये । विश्वम् । सः । धत्ते । द्रविणम् । यम् । इन्वसि । आतिथ्यम् । अग्ने । नि । च । धत्ते । इत् । पुरः ॥ २ ॥

हेअग्ने समिध्यमानः सम्यगिध्यमानस्त्वं अमृतस्योदकस्यराजसि ईशिषे तथा हविष्कृण्वंतंपुरोडाशादिहविष्कर्तारं यजमानं स्वस्तये अविनाशाय सचसेसेवसे किंच यं यजमानं इन्वसि गच्छसि यजमानः विश्वं समस्तं द्रविणं पश्वादिलक्षणंधनं धत्ते धारयति अपिच हेअग्ने आतिथ्यं अतिथिरूपस्यतव योग्यं हविः पुरइत् पुरस्तादेवनिधत्तेच स्थापयतिच ॥ २ ॥

पवित्रेष्ट्यांस्विष्टकृतोग्नेशर्धेतियाज्या सूत्र्यतेहि—जुष्टोदमूनाअग्नेशर्धमहतेसौभगायेति संयाज्येइति । साकमेधेषुमरुद्भ्यःक्रीडिभ्यःपुरोडाशंसप्तकपालंइत्यत्राप्येषैवस्विष्टकृतोयाज्या सूत्रितंच—जुष्टोदमूनाअग्नेशर्धमहतेसौभगायेतिसंयाज्येइति ।

सैषातृतीया—

अग्नेशर्धमहतेसौभगायतवद्युम्नान्युत्तमानिसन्तु ।
संजास्पत्यंसुयममाकृणुष्वशत्रूयतामभितिष्ठामहांसि ॥ ३ ॥

अग्ने । शर्ध । महते । सौभगाय । तव । द्युम्नानि । उत्ऽतमानि । सन्तु । सम् । जाःऽपत्यम् । सुऽयमम् । आ । कृणुष्व । शत्रुऽयताम् । अभि । तिष्ठ । महांसि ॥ ३ ॥

हेअग्ने त्वं महते प्रभूताय सौभगाय अस्माकं शोभनधनत्वाय शर्ध शत्रून्सहस्व तथा तवसंबन्धीनिद्युम्नानिधनानितेजांसिवा उत्तमान्युत्कृष्टानिसन्तु भवन्तु किंच हेअग्ने संजास्पत्यं जाः जायाचपतिश्चजायापती तयोःकर्मजास्पत्यम् तत्सुयमं सुष्ठु नियमनोपेतं अन्योन्यसंश्लिष्टमित्यर्थः समाकृणुष्व सम्यक्कुरुष्व अपिच शत्रूयतां शत्रुमात्मनइच्छतां सपत्नानां महांसितेजांसिअभितिष्ठ आक्रमस्व ॥ ३ ॥

अथचतुर्थी—

समिद्धस्यप्रमहसोग्नेवन्देतवश्रियम् ।
वृषभोद्युम्नवाँअसिसमध्वरेष्विध्यसे ॥ ४ ॥

सम्ऽइद्धस्य । प्रऽमहसः । अग्ने । वन्दे । तव । श्रियम् । वृषभः ।
द्युम्नऽवान् । असि । सम् । अध्वरेषु । इध्यसे ॥ ४ ॥

हेअग्ने समिद्धस्य प्रवृद्धस्य प्रमहसः प्रकृष्टतेजसस्तवसंबन्धिनींश्रियंदीप्तिंवन्दे अहं यजमानःस्तौमि वृषभः कामानांवर्षिता त्वं द्युम्नवानसि धनवान्भवसि अध्वरेयज्ञेषुसमिध्यसे सम्यक्दीप्यसे ॥ ४ ॥

दर्शपूर्णमासयोःसमिद्धोअग्नआहुतेतिद्वेसामिधेन्यौ सूत्रितंच—समिद्धोअग्नआहुतेतिद्वेइति ।

सैषापंचमी—

समिद्धोअग्नआहुतदेवान्यक्षिस्वध्वर । त्वंहिहव्यवाळसि ॥ ५ ॥

सम्ऽइद्धः । अग्ने । आऽहुत । देवान् । यक्षि । सुऽअध्वर । त्वम् ।
हि । हव्यऽवाट् । असि ॥ ५ ॥

हेआहुत यजमानैरासमन्ताद्धुत हेस्वध्वर शोभनयज्ञोपेत हेअग्ने समिद्धः सम्यग्दीप्तस्त्वं देवान् द्योतमानानिन्द्रादीन् यक्षि यजस्व हियस्मात्कारणात् हेअग्ने त्वंहव्यवाडसि हव्यानांवोढाभवसि अतःकारणाद्देवान्यजस्वेतिसंबंधः ॥ ५ ॥

अथषष्ठी—

आजुहोतादुवस्यताग्निंप्रयत्यध्वरे । वृणीध्वंहव्यवाहनम् ॥६॥ २२ ॥

आ । जुहोत । दुवस्यत । अग्निम् । प्रऽयति । अध्वरे । वृणीध्वम् ।
हव्यऽवाहनम् ॥ ६ ॥ २२ ॥

हेऋत्विजोयूयं अध्वरे अस्मदीयेयागे प्रयति प्रवृत्तेसति हव्यवाहनं हविषांवोढारं एतन्नामकमग्निं आजुहोत आसमंताज्जुहोत तथा दुवस्यत परिचरत वृणीध्वंसंभजध्वंच हव्यवाहनंहव्यवाहननामकस्यैवाग्नेर्देवतासंबन्धोयजमानैर्वरणीयत्वंचतैत्तिरीयेस्पष्टमाम्नातं—त्रयोवाअ-

ग्नयोहव्यवाहनोदेवानांकव्यवाहनःपितॄणांसहरक्षाअसुराणांतएतर्ह्याशंसंतेमावरिष्यतेमामिति । वृणीध्वंहव्यवाहनमित्याहयएवदेवानांतंवृणीतइति ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेद्वाविंशोवर्गः ॥ २२ ॥

त्र्यर्यमेतिपंचदशर्चंपंचदशंसूक्तं अत्रानुक्रमणिका—त्र्यर्यमापंचोनागौरिवीतिःशाक्त्य-ऐन्द्रमुशनायदौशनसौवापादइति । शक्तिगोत्रोत्पन्नोगौरिवीतिर्नामऋषिः अनुक्तत्वात्त्रिष्टुप् इन्द्रो-देवता मंडलादिपरिभाषयानिवृत्तत्वात्उशनायत्सहस्यैरितिपादऔशनसः ऐन्द्रोवा आभिप्लवि-केतृतीयेहनिमरुत्वतीयेएतन्निविद्धानं सूत्रितंच—तृतीयस्यत्र्यर्यमायोजातएवेतिमाध्यंदिनइति ।

तत्रप्रथमा—

त्र्य॑र्य॒मा मनु॑षो दे॒वता॑ता॒ त्री रो॑च॒ना दि॒व्या धा॑रयन्त ।
अर्च॑न्ति त्वा म॒रुतः॑ पू॒तद॑क्षा॒स्त्वमे॑षा॒मृषि॑रिन्द्रासि॒ धीरः॑ ॥ १ ॥

त्री । अ॒र्य॒मा । मनु॑षः । दे॒व॒ऽता॑ता । त्री । रो॒च॒ना । दि॒व्या । धा॒र॒य॒न्त॒ । अर्च॑न्ति । त्वा॒ । म॒रुतः॑ । पू॒तऽद॑क्षाः । त्वम् । ए॒षा॒म् । ऋषिः॑ । इ॒न्द्र॒ । अ॒सि॒ । धीरः॑ ॥ १ ॥

मनुषोमनोःसंबंधिनिदेवताता देवतातौ यज्ञे त्री त्रीणि अर्यमा अर्यमाणि यानितेजांसि सन्ति तथा त्री त्रीणि रोचना रोचनानि वाय्वग्निसूर्यात्मकानि दिव्या दिव्यान्यंतरिक्षेभवा-नि तानि तेजांसि धारयन्त मरुतोधारयन्ति पूतदक्षाः शुद्धबलामरुतः त्वा त्वां अर्चन्ति स्तुवन्ति हेइन्द्र धीरः धीमांस्त्वं एषांमरुतांऋषिरसि द्रष्टाभवसि ॥ १ ॥

अथद्वितीया—

अनु॒ यदीं॑ म॒रुतो॑ मन्दसा॒नमार्च॒न्निन्द्रं॑ पपि॒वांसं॑ सु॒तस्य॑ ।
आद॑त्त॒ वज्र॑म॒भि यदहिं॒ हन्न॒पो य॒ह्वीर॑सृज॒त्सर्त॒वा उ॑ ॥ २ ॥

अनु॑ । यत् । ईम् । म॒रुतः॑ । म॒न्द॒सा॒नम् । आर्च॑न् । इन्द्र॑म् । प॒पि॒ऽवांस॑म् । सु॒तस्य॑ । आ । अ॒द॒त्त॒ । वज्र॑म् । अ॒भि । यत् । अहि॑म् । हन् । अ॒पः । य॒ह्वीः । अ॒सृ॒ज॒त् । सर्त॒वै । ऊँ॒ इति॑ ॥ २ ॥

१ तै० सं० २. ५. ८. ।

यद्यदामरुतः मन्दसानं तृप्यन्तं सुतस्याभिषुतंसोमं पपिवांसं पीतवन्तं ईमेनमिन्द्रं अन्वार्चन् अन्वस्तुवन् तदेन्द्रः वज्रमादत्त आददौ ततोयद्यदाअहिंवृत्रंअहिहन् अभ्यहन् अभिहतवान् तदायह्वीर्महतीरपः वृत्रेणनिरुद्धान्युदकानि सर्तवै स्वैरत्वेनसर्तुंगन्तुंअसृजत् निरोधाद्यामुंचत् ॥ २ ॥

अथतृतीया—

उतब्रह्माणोमरुतोमेअस्येन्द्रःसोमस्यसुषुतस्यपेयाः ।
तद्धिहव्यंमनुषेगाअविन्ददहन्नहिंपपिवाँइन्द्रोअस्य ॥ ३ ॥

उत । ब्रह्माणः । मरुतः । मे । अस्य । इन्द्रः । सोमस्य ।
सुऽसुतस्य । पेयाः । तत् । हि । हव्यम् । मनुषे । गाः । अविन्दत् ।
अहन् । अहिम् । पपिऽवान् । इन्द्रः । अस्य ॥ ३ ॥

उतापिच हेब्रह्माणोबृहन्तोहेमरुतोयूयमिन्द्रश्च सुसुतस्य सुष्ठुअभिषुतस्य मे मदीयस्यास्य सोमस्य इमंसोमं द्वितीयार्थेषष्ठी पेयाः पिबत पिबतेराशीर्लिङिमध्यमबहुवचनस्यैकवचनं तद्धि तत्खलु हव्यं युष्माभिःपीतंसोमात्मकंहविः मनुषे मनुष्याय यजमानाय गाः धेनूः वृष्टिलक्षणान्युदकानि वा अविन्दत् वेदयति यजमानंगालंभयतीत्यर्थः किंचास्येमंसोमंपपिवान्पीतवानिन्द्रः अहिंवृत्रं अहन् अवधीत् ॥ ३ ॥

अथचतुर्थी—

आद्रोदसीवितरंविष्कभायत्संविव्यानश्चिद्भियसेमृगंकः ।
जिगर्तिमिन्द्रोअपजर्गुराणःप्रतिश्वसन्तमवदानवंहन् ॥ ४ ॥

आत् । रोदसी इति । विऽतरम् । वि । स्कभायत् । सम्ऽविव्यानः ।
चित् । भियसे । मृगम् । करिति कः । जिगर्तिम् । इन्द्रः ।
अपऽजर्गुराणः । प्रति । श्वसन्तम् । अव । दानवम् । हन्निति हन् ॥ ४ ॥

इन्द्रः परमैश्वर्ययुक्तः आत् सोमपानानंतरं रोदसी द्यावापृथिव्यौ वितरमतिशयेन(अमुचच्छन्दसीतिवेस्तरपिकृते अमुप्रत्ययः)विष्कभायत् व्यस्तभ्नात् चलनरहिते अकरोत् संविव्यानश्चित् संवृण्वानः संगच्छमानोवेन्द्रः" व्ययंतर्वासंवरणकर्मणोवेतेर्वागतिकर्मणोरूपं चिदित्येवेत्यस्यार्थेवर्तते, मृगं मृगवत्पलायमानं वृत्रं भियसे भयाय कःअकार्षीत् (करोतेर्लुङि मंत्रेघसह्वरे-

त्यादिनाचेर्लोपः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः इन्द्रः जिगर्ति गिरंतमाच्छादयन्तं श्वसंतं भयार्थश्वासं अकुर्वन्तं दानवं दनोःपुत्रं वृत्रं अपजर्गुराणः आच्छादनाद्विमोचयन् प्रति प्रतिगत्य अवहन् अवहतवान् ॥ ४ ॥

अथपंचमी—

अधक्रत्वांमघवन्तुभ्यंदेवाअनुविश्वेअददुःसोमपेयम् ।
यत्सूर्यस्यहरितःपतन्तीःपुरःसतीरुपराएतशेकः ॥ ५ ॥ २३ ॥

अधं । क्रत्वां । मघऽवन् । तुभ्यंम् । देवाः । अनुं । विश्वे । अददुः । सोमऽपेयंम् । यत् । सूर्यस्य । हरितः । पतन्तीः । पुरः । सतीः । उपराः । एतंशे । करिति कः ॥ ५ ॥ २३ ॥

अधापिच हेमघवन् धनवन्निन्द्र क्रत्वा क्रतुना त्वदीयेनकर्मणा विश्वे सर्वे देवाः द्योतमानाःवह्न्यादयः तुभ्यं त्वदर्थं सोमपेयं सोमपानं अन्वददुः आनुपूर्व्येणदत्तवन्तः ततःप्रभृतीन्द्रोदेवेभ्यः सर्वेभ्योधिकोभवदित्यर्थः तथाचश्रूयते—समहान्भूत्वादेवताअब्रवीदुद्धारंमउद्धरतेत्यादि । हेइन्द्र यत् यस्त्वं पतन्तीरागच्छन्तीःपुरःसतीःपुरस्ताद्भवतीः सूर्यस्यसंबन्धिनीः हरितोवडवाः उपराउपरतीः मंदगतीःएतशे एतशाख्यायऋषये अकःअकार्षीत् एतशोहि स्वभावेनसूर्येणसहस्पर्धामकरोदितियावत् तथाचनिगमांतरे—प्रैतशंसूर्येपस्पृधानंसौवश्व्येसुष्विमावदिन्द्रइति ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेत्रयोविंशोवर्गः ॥ २३ ॥

अथषष्ठी—

नवयदस्यनवतिंचभोगान्त्साकंवज्रेणमघवाविवृश्चत् ।
अर्चन्तीन्द्रंमरुतःसधस्थेत्रैष्टुभेनवचसाबाधतद्याम् ॥ ६ ॥

नवं । यत् । अस्य । नवतिम् । च । भोगान् । साकम् । वज्रेण । मघऽवा । विऽवृश्चत् । अर्चन्ति । इन्द्रंम् । मरुतः । सधऽस्थे । त्रैस्तुभेन । वचसा । बाधत । द्याम् ॥ ६ ॥

---

१ ऐ० ब्रा० ३. २१. । २ ऋ० सं० १. ४. २९. ।

यद्यदा मघवा धनवानिन्द्रः अस्येत्यनेनशंबरउच्यते अस्यशंबरस्यसंबन्धीनि नव-नवसंख्याकानि नवतिंच नवतिसंख्याकानिच भोगान् पुराणि भोगानित्यन्तोदात्तः पुर-वचनः साकं युगपदेव वज्रेण विवृश्चत् व्यवृश्चत् अभिनत् तदामरुतःसधस्थे सह-स्थाने युद्धेवा स्थितमिन्द्रं त्रैष्टुभेन त्रिष्टुप्छन्दस्केनवचसा वाग्रूपेण स्तोत्रेणार्चन्ति अ-स्तुवन् इन्द्रः एवंस्तुतःसन् द्यां मरुद्भिःप्रयज्यमानेनमंत्रेणदीप्तंशंबराख्यमसुरं बाधताबाध-त पिपीडे ॥ ६ ॥

अथसप्तमी—

सखासख्येअपचत्तूयमग्निरस्यक्रत्वामहिषात्रीशतानि ।
त्रीसाकमिन्द्रोमनुषःसरांसिसुतंपिबद्वृत्रहत्यायसोमम् ॥ ७ ॥

सखा । सख्ये । अपचत् । तूयम् । अग्निः । अस्य । क्रत्वा । महिषा । त्री । शतानि । त्री । साकम् । इन्द्रः । मनुषः । सरांसि । सुतम् । पिबत् । वृत्रऽहत्याय । सोमम् ॥ ७ ॥

सखा इन्द्रस्यमित्रभूतोग्निः महिषा महिषाणांपशूनां त्री त्रीणि शतानि शतसं-ख्याकानि सख्ये सख्युर्मित्रभूतस्यास्येन्द्रस्य क्रत्वा कर्मणा निमित्तभूतेन तूयं क्षिप्रं अपचत् पपाच किंच इन्द्रःपरमैश्वर्ययुक्तःमनुषोमनोःसंबंधीनि त्री त्रीणिसरांसि पात्राणि अत्रसरस्शब्देन पूतभृदाधवनीयद्रोणकलशसंज्ञानिपात्राण्युच्यन्ते तेषुस्थितंसुतम भिषुतंसोमंसाकं युगपदेव वृत्रहत्याय वृत्रहननाय पिबदपिबत् पपौ ॥ ७ ॥

अथाष्टमी—

त्रीयच्छतामहिषाणामघोमास्त्रीसरांसिमघवासोम्यापाः ।
कारंनविश्वेअह्वन्तदेवाभरमिन्द्रायर्यदहिंजघान ॥ ८ ॥

त्री । यत् । शता । महिषाणाम् । अघः । माः । त्री । सरांसि । मघऽवा । सोम्या । अपाः । कारम् । न । विश्वे । अह्वन्त । देवाः । भरम् । इन्द्राय । यत् । अहिम् । जघान ॥ ८ ॥

हेइन्द्र त्वं यद्यदा त्री त्रयाणांशता शतसंख्याकानांमहिषाणांपशूनांमाः मांसानि अघःभक्षितवानसि घसेरत्तेर्वारूपं यदाच मघवाधनवांस्त्वं सोम्या सोममयानि त्री त्रीणि

सरांसि पात्राणि अपाः पीतवानसि यद्यदाइन्द्रोहिंवृत्रं जघान हतवान् तदाविश्वेसर्वेदेवाः भरं सोमपानादिनापूर्णं इन्द्रायेन्द्रं युद्धार्थं अह्वत आह्वयंत तत्रदृष्टान्तः—कारं न स्वामिनःकर्मकरमिव तद्वत् ॥ ८ ॥

उशनसःस्तोमेउशनायत्सहस्यैरितिमरुत्वतीयेसूक्तमुखीया सूत्रितंच—उशनसःस्तोमे नगरगीर्णमिवात्मानंमन्यमानोयजेतोशनायत्सहस्यैरयातमिति ।

तत्रैषानवमी—

उशनायत्सहस्यै३रयातंगृहमिन्द्रजूजुवानेभिरश्वैः ।
वन्वानोअत्रसरथंययाथकुत्सेनदेवैरवनोर्हशुष्णम् ॥ ९ ॥

उशना । यत् । सहस्यैः । अयातम् । गृहम् । इन्द्र । जूजुवानेभिः ।
अश्वैः । वन्वानः । अत्र । सऽरथम् । ययाथ । कुत्सेन । देवैः ।
अवनोः । ह । शुष्णम् ॥ ९ ॥

यद्यदा हेइन्द्र त्वं उशनाकाव्यश्च सहस्यैरभिभवनशीलैःजूजुवानेभिः जूजुवानैर्गच्छद्भिः अश्वैः कुत्सस्यगृहं अयातं अगच्छतं तदा हेइन्द्र त्वं अस्मिन्काले वन्वानः शत्रून्हिंसन् कुत्सेन देवैश्चसह सरथं समानमेकंरथं ययाथ जगन्थ किंच शुष्णमेतन्नामानमसुरं अवनोर्ह अहिंसीःखलु ॥ ९ ॥

अथदशमी—

प्रान्यच्चक्रमवृहःसूर्यस्यकुत्सायान्यद्वरिवोयातवेकः ।
अनासोदस्यूँरमृणोवधेननिदुर्योणआवृणङ्मृध्रवाचः ॥१०॥२४॥

प्र । अन्यत् । चक्रम् । अवृहः । सूर्यस्य । कुत्साय । अन्यत् ।
वरिवः । यातवे । अकरित्यकः । अनासः । दस्यून् । अमृणः ।
वधेन । नि । दुर्योणे । अवृणक् । मृध्रऽवाचः ॥ १० ॥ २४ ॥

हेइन्द्र पूर्वं द्विचक्रस्यसूर्यस्य अन्यदेकंचक्रं प्रावृहः पृथक्चकर्थ अन्यदेकंचक्रं कुत्साय कुत्सस्यवरिवोधनं यातवे प्राप्तुं अकः अकार्षीः किंच अनासः आस्यरहितान् आस्यशब्देनशब्दोलक्ष्यते अशब्दान् मूकान् दस्यून् असुरान् वधेनायुधेनवज्रेण अमृणः

अहिंसीः दुर्योणे संग्रामे मृध्रवाचः हिंसितवागिन्द्रियानसुरान् न्यवृणक् नितरांछिन्नवान-सि अमृणोन्यवृणगितिद्विरुक्तिरादरार्था ॥ १० ॥

॥ इतिचतुर्थस्यप्रथमेचतुर्विंशोवर्गः ॥ २४ ॥

अथैकादशी–

स्तोमा॑सस्त्वा॒गौरि॑वीतेरवर्ध॒न्नर॑न्धयोवैदथि॒नाय॒पिप्रु॑म् ॥ ॥
आत्वामृ॒जिश्वा॑स॒ख्याय॑चक्रे॒पच॑न्प॒क्तीरपि॑ब॒ः सोम॑मस्य ॥ ११ ॥

स्तोमा॑सः । त्वा॒ । गौरि॑ऽवीतेः । अ॒व॒र्ध॒न् । अर॑न्धयः । वै॒द॒थि॒नाय॑ । पिप्रु॑म् । आ । त्वाम् । ऋजिश्वा॑ । स॒ख्याय॑ । च॒क्रे॒ । पच॑न् । प॒क्तीः । अपि॑बः । सोम॑म् । अ॒स्य॒ ॥ ११ ॥

हेइन्द्र गौरिवीतेः एतन्नामकस्यमंत्रद्रष्टुर्ममसंबन्धीनिस्तोमासः स्तोत्राणि त्वा त्वां अवर्धन् वर्धयन्तु वैदथिनाय विदथिनःपुत्राय ऋजिश्वनाम्ने पिप्रुंएतन्नामकमसुरं अरंधयः वशमनयः हेइन्द्र ऋजिश्वनामाकश्चिदृषिः सख्याय तवसखित्वाय पक्तीःपक्व्यानि पुरोडाशादीनि पचन् पाकं कुर्वन् त्वा त्वां आचक्रे अभिमुखीचकार किंच त्वं अस्य ऋजिश्वनः संबन्धिनं सोमं अपिबः अपाः ॥ ११ ॥

दशपेयेहनिमरुत्वतीयशस्त्रेनवग्वासइतिसूक्तमुखीया सूत्रितंच—नवग्वासःसुतसोमासइन्द्रंसखाहयत्रसखिभिर्नवग्वैरितिनिविद्धानयोराज्येइति ।

अथद्वादशी–

नव॑ग्वासः सु॒तसो॑मास॒इन्द्रं॒दश॑ग्वासो अ॒भ्य॑र्चन्त्य॒र्कैः ।
गव्यं॑चिदू॒र्वम॑पि॒धान॑वन्तं॒तं॑चि॒न्नर॑ः शशमा॒ना अप॑व्रन् ॥ १२ ॥

नव॑ऽग्वासः । सु॒तऽसो॑मासः । इन्द्र॑म् । दश॑ऽग्वासः । अ॒भि । अ॒र्च॒न्ति॒ । अ॒र्कैः । गव्य॑म् । चि॒त् । ऊ॒र्वम् । अ॒पि॒धान॑ऽवन्तम् । तम् । चि॒त् । नर॑ः । श॒श॒मा॒नाः । अप॑ । व्र॒न् ॥ १२ ॥

नवग्वासः सत्रयागमनुतिष्ठन्तोयेनवभिर्मासैःसमाप्यगताः तेनवग्वाः दशभिर्मासैःसमाप्ययेगतास्तेदशग्वाः एतेउभयविधाअंगिरसः सुतसोमासः अभिषुतसोमाःसन्तः इन्द्रमर्कैरर्चनीयैःस्तोत्रैरभ्यर्चन्ति अभिष्टुवन्ति तथा शशमानाः स्तुवन्तः नरोनेतारोंगिरसः अपिधानवन्तं बलेनासुरेणाच्छादितवन्तं तंचित् बहुषुप्रदेशेषुप्रसिद्धमपि गव्यंचित् गोसंबंधिनमपि ऊर्वं समूहं अपव्रन् अपावृण्वन् ॥ १२ ॥

परिक्रीनाम्येकाहेमरुत्वतीयनिष्केवल्ययोःसूक्तमुखीये कथोनुतइत्याद्येद्वेऋचौ सूत्रितंच—कथोनुतेपरिचराणिविद्वानितिद्वेइति ।

सैषात्रयोदशी—

कथोनुतेपरिचराणिविद्वान्वीर्यामघवन्याचकर्थ ।
याचोनुनव्याकृणवःशविष्ठप्रेदुतातेविदथेषुब्रवाम ॥ १३ ॥

कथो इति । नु । ते । परि । चराणि । विद्वान् । वीर्या । मघऽवन् । या । चकर्थ । या । चो इति । नु । नव्या । कृणवः । शविष्ठ । प्र । इत् । ऊँ इति । ता । ते । विदथेषु । ब्रवाम ॥१३॥

हेमघवन् धनवन्निन्द्र त्वं या यानि वीर्या वीर्याणि चकर्थ चकृषे अहं तानि वीर्याणि विद्वान् जानन् ते तुभ्यं कथोनु कथंनु परिचराणि परिचर्यांकरवाणि हेशविष्ठ बलवत्तमेन्द्र याचो यानिचैव नव्या नव्यानि नूतनानि वीर्याणि नु क्षिप्रं कृणवः कुर्याः ते त्वदीयानि ता तानि वीर्याणि विदथेषु यज्ञेषु प्रेदु ब्रवाम प्रैववदाम ॥ १३ ॥

अथचतुर्दशी—

एताविश्वाचकृवाँइन्द्रभूर्यपरीतोजनुषावीर्येण ।
याचिन्नुवज्रिन्कृणवोदधृष्वान्नतेवर्तातविष्याअस्तितस्याः ॥ १४ ॥

एता । विश्वा । चकृऽवान् । इन्द्र । भूरि । अपरिऽइतः । जनुषा । वीर्येण । या । चित् । नु । वज्रिन् । कृणवः । दधृष्वान् । न । ते । वर्ता । तविष्याः । अस्ति । तस्याः ॥ १४ ॥

हेइन्द्र अपरीतः शत्रुभिरपरिगतस्त्वं जनुषा जननसिद्धेनात्मीयेनवीर्येणबलेनभूरि भूरीणि बहूनिएता एतानि प्रत्यक्षेणोपलभ्यमानानि विश्वा विश्वानि व्याप्तानि भुवनजातानि चकृवान् कृतवान् हेवज्रिन् वज्रवन्निन्द्र दधृष्वान् सपत्नान् धर्षयंस्त्वं नुक्षिप्रं याचित् यानिच विश्वानि कृणवः कुर्याः तेत्वदीयस्यतस्यास्तविष्याः तस्यबलस्यवर्ता निवारयिता नकोप्यस्ति ॥ १४ ॥

अथपंचदशी–

इन्द्रब्रह्मंक्रियमाणाजुषस्वयातेशविष्ठनव्याअकर्म।
वस्त्रेवभद्रासुकृतावसूयूरथंनधीरःस्वपाअतक्षम् ॥ १५ ॥ २५ ॥

इन्द्र । ब्रह्म । क्रियमाणा । जुषस्व । या । ते । शविष्ठ । नव्याः । अकर्म । वस्त्राऽइव । भद्रा । सुऽकृता । वसुऽयुः । रथम् । न । धीरः । सुऽअपाः । अतक्षम् ॥ १५ ॥ २५ ॥

हेशविष्ठ बलवत्तम शूरतमवेन्द्र ते तुभ्यं या यानि स्तोत्राणि नव्याःनूतनाः अद्यतनावयं अकर्म अकुर्म हेइन्द्र त्वं क्रियमाणा अस्माभिः क्रियमाणानि ब्रह्म ब्रह्माणि तानि स्तोत्राणि जुषस्व सेवस्व धीरोधीमान् स्वपाःशोभनकर्मा वसूयुर्धनकामोहं वस्त्रेव वस्त्राणीव भद्रा भद्राणि भजनीयानि सुकृता सुष्ठुकृतानि स्तोत्राणि रथंन रथमिव अतक्षं अकरवं स्तोत्राण्युपसंहारवद्ब्राह्मणीत्यभिप्रायेण वस्त्रनिदर्शनमुक्तं रथदृष्टान्तस्तु आगमनसाधनत्वप्रतिपादनाय स्तोत्राणिस्वीकृत्यमह्यंधनंप्रयच्छेत्यर्थः ॥ १५ ॥

॥ इतिचतुर्थस्यप्रथमेपंचविंशोवर्गः ॥ २५ ॥

क्वस्यवीरइतिपंचदशर्चंषोडशंसूक्तं अत्रानुक्रमणिका–क्वस्यबभ्रुर्ऋणंचयोप्यत्रराजास्तुतइति। बभ्रुर्ऋषिः अनुक्तत्वात्त्रिष्टुप् इन्द्रोदेवता ऋणंचयनामराजापिक्वचित्स्तूयते अतःसोपिदेवता तीव्रसोमाख्येएकाहेमरुत्वतीयशस्त्रेइदंसूक्तंनिविद्धानं सूत्रितंच–तीव्रसोमेनान्नाद्यकामःक्वस्यवीरइति।

तत्रप्रथमा–

क्व १ स्यवीरःकोअपश्यदिन्द्रंसुखरथमीयमानंहरिभ्याम्।
योरायावज्रीसुतसोममिच्छन्तदोकोगन्तापुरुहूतऊती ॥ १ ॥

कं । स्यः । वीरः । कः । अपश्यत् । इन्द्रम् । सुखऽरथम् ।
ईयमानम् । हरिऽभ्याम् । यः । राया । वज्री । सुतऽसोमम् ।
इच्छन् । तत् । ओकः । गन्ता । पुरुऽहूतः । ऊती ॥ १ ॥

वज्री वज्रवान्पुरुहूतोबहुभिराहूतोयइन्द्रः राया देयेनधनेनसहसुतसोममिच्छन् अभिषुतसोमंयजमानमन्विच्छन् ऊती ऊत्यै रक्षायै तत् तस्ययजमानस्य ओकोगृहंगंता प्राप्तोभवति वीरोविक्रान्तस्यसइन्द्रःक्कुत्रविद्यते सुखरथं शोभनाख्यद्वारोरथोयस्यससुखरथः सुष्ठुखनतिलिखतिभूमिमितिवासुखं तादृग्रथं सुहितं खेभ्यः खंपुनःखनतेरितियास्कः। हरिभ्यां स्ववाहनाभ्यामश्वाभ्यांईयमानंगच्छन्तमिन्द्रंकोपश्यत् कश्चददृशे ॥ १ ॥

अथद्वितीया–

अवाचचक्षंपदमस्यसस्वरुग्रंनिधातुरन्वायमिच्छन् ।
अपृच्छमन्याँउततेमआहुरिन्द्रंनरोबुबुधानाअशेम ॥ २ ॥

अव । चचक्षम् । पदम् । अस्य । सस्वः । उग्रम् । निऽधातुः ।
अनु । आयम् । इच्छन् । अपृच्छम् । अन्यान् । उत । ते ।
मे । आहुः । इन्द्रम् । नरः । बुबुधानाः । अशेम ॥ २ ॥

अस्येन्द्रस्य पदं स्थानं अवाचचक्षं अहमवाद्राक्षं कीदृशं सस्वोंतर्हितं उग्रमुद्गूर्णं किंच इच्छन्निन्द्रमन्विच्छन् अहं निधातुः स्वस्थापयितुरस्येन्द्रस्यपदमन्वायं अन्वगमं अन्यानुत अन्यानविदुषोपि मार्गे इन्द्रमपृच्छं पृष्टवानस्मि पृष्टास्ते मे मह्यं इन्द्रमाहुः किमाहुरितिउच्यते–नरोयज्ञानांनेतारोबुबुधानाः बुभुत्समानाः वयं अशेम इन्द्रंप्राप्तवन्तःस्म यद्यपीन्द्रोविद्यते तथापि दुर्लभश्चेदनुपगन्तव्यइति बुभुत्समानस्वभावमपृच्छत् पृष्टैश्चसुलभइत्युक्ते इन्द्रप्राप्त्यर्थंसूक्तशेषमपश्यदित्यर्थः ॥ २ ॥

अथतृतीया–

प्रनुवयंसुतेयातेकृतानीन्द्रब्रवामयानिनोजुजोषः ।
वेददविद्वाञ्छृणवच्चविद्वान्वहतेयंमघवासर्वसेनः ॥ ३ ॥

---

१ नि० ३. १३.

प्र । नु । वयम् । सुते । या । ते । कृतानि । इन्द्र । ब्रवाम । यानि ।
नः । जुजोषः । वेदत् । अविद्वान् । शृणवत् । च । विद्वान् ।
वहते । अयम् । मघऽवा । सर्वऽसेनः ॥ ३ ॥

हेइन्द्र तेत्वदीयानि यानिकृतानि कर्माणि सन्ति नु अद्यवयं स्तोतारः सुतेसोमे अभिषुतेसति तानिकर्माणिप्रब्रवाम प्रकर्षेणवदाम त्वमपिनोस्मदर्थेयानिकर्माणिजुजोषः असेवथाः तानिकर्माणि अविद्वान् इतःपूर्वमजानन् जनःवेदत् जानातु शृणवच्च शृणुयाच्च यद्वा विद्वान्जाननपुरुषःशृणवच्च अजानंतमपिजनंश्रावयेच्च सर्वसेनः सर्वाभिःसेनाभिर्युक्तः मघवा धनवान्विद्वान्जानन् अयमिन्द्रःजानतश्चशृण्वतश्च तान्जनान् प्रतिवहते अश्वैरुह्यते व्यत्ययेनकर्तृप्रत्ययः प्रापयति ॥ ३ ॥

अथचतुर्थी–

स्थिरंमनंश्चकृषेजातइन्द्रवेषीदेकोयुधयेभूयसश्चित् ।
अश्मानंचिच्छवसादिद्युतोविविदोगवामूर्वमुस्रियाणाम् ॥ ४ ॥

स्थिरम् । मनः । चकृषे । जातः । इन्द्र । वेषि । इत् । एकः ।
युधये । भूयसः । चित् । अश्मानम् । चित् । शवसा । दिद्युतः ।
वि । विदः । गवाम् । ऊर्वम् । उस्रियाणाम् ॥ ४ ॥

हेइन्द्र जातःउत्पन्नमात्रएवत्वं स्थिरं चलनरहितंमनश्चित्तंचकृषे चकर्थ सर्वान् बलिष्ठान् जयेयमितीदृशं तथाहेइन्द्र एकइत असहायएवत्वं युधये युद्धाय भूयसश्चित् बहुतरान्राक्षसादीनपिवेषि अवेः अगमः किंच अश्मानंचित् गवामावरकंपर्वतमपिशवसाबलेनविदिद्युतः व्यभिनः किंच उस्रियाणांक्षीरमुत्सारयन्तीनांगवांधेनूनांऊर्वंसमूहंविदः अवेदयः अलंभयः ॥ ४ ॥

अथपंचमी–

परोयत्त्वंपरमआजनिष्ठाःपरावतिश्रुत्यंनामबिभ्रत् ।
अतश्चिदिन्द्रादभयन्तदेवाविश्वाअपोअजयद्दासपत्नीः ॥ ५ ॥ २६ ॥

परः । यत् । त्वम् । परमः आऽजनिष्ठाः । पराऽवति । श्रुत्यम् ।
नाम । बिभ्रत् । अतः । चित् । इन्द्रात् । अभयन्त । देवाः ।
विश्वाः । अपः । अजयत् । दासऽपत्नीः ॥ ५ ॥ २६ ॥

यद्यदा हेइन्द्र परः परस्तात् उपरिष्टात् स्थितः परमउत्कृष्टतमस्त्वं परावति दूरे श्रुत्यं श्रवणीयंनामनामधेयंबिभ्रत् धारयन् आजनिष्ठाः आसमंतादजायथाः शेषःपरोक्षकृतः अतश्चित् अतआरभ्यैव देवाद्योतमानाःअग्न्यादयः इन्द्रादभयन्त बिभ्युःविश्वाअपः सर्वाण्युदकानि इन्द्रः अजयत् वशीचक्रे कीदृशाः दासपत्नीः दासोवृत्रःपतिःपालयितायासामपांताइति ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेषड्विंशोवर्गः ॥ २६ ॥

अथषष्ठी—

तुभ्येदेतेमरुतःसुशेवाअर्चन्त्यर्कंसुन्वन्त्यन्धः ।
अहिमोहानमपआशयानंप्रमायाभिर्मायिनंसक्षदिन्द्रः ॥ ६ ॥

तुभ्य । इत् । एते । मरुतः । सुऽशेवाः । अर्चन्ति । अर्कम् ।
सुन्वन्ति । अन्धः । अहिम् । ओहानम् । अपः । आऽशयानम् ।
प्र । मायाभिः । मायिनम् । सक्षत् । इन्द्रः ॥६॥

एतेमरुतः महद्रवन्तिवदन्तीति मरुतस्तोतारःसुशेवाः शेवमितिसुखनामैतत् शोभनसुखाःसन्तः स्तोत्रेण शोभनं सुखमुत्पादयन्तइत्यर्थः हेइन्द्र तुभ्येत् तुभ्यमेव अर्कमर्चनीयंस्तोत्रं अर्चन्ति स्तुवन्ति कुर्वन्तीत्यर्थः अन्धः सोमलक्षणमन्नंसुन्वन्ति अभिषवंकुर्वन्ति इन्द्रःपरमैश्वर्ययुक्तः मायाभिःस्वकीयाभिःशक्तिभिः अहिंवृत्रंप्रसक्षत् अभ्यभवत् कीदृशं ओहानं देवान्बाधमानं अपउदकानि आशयानं आवृत्यशयनंकुर्वन्तं मायिनं कपटवन्तमिति ॥ ६ ॥

अथसप्तमी—

विषूमृधोजनुषादानमिन्वन्नहन्गवामघवन्त्सञ्चकानः ।
अत्रादासस्यनमुचेःशिरोयदवर्तयोमनवेगातुमिच्छन् ॥ ७ ॥

वि । सु । मृधः । जनुषा । दानम् । इन्वन् । अहन् । गवा ।
मघऽवन् । सम्ऽचकानः । अत्र । दासस्य । नमुचेः । शिरः । यत् ।
अवर्तयः । मनवे । गातुम् । इच्छन् ॥ ७ ॥

हेमघवन धनवन्निन्द्र संचकानः अस्माभिःस्तूयमानस्त्वं संपूर्वःकायतिःशब्दकर्मा तस्यलडर्थेलिटिरूपं दानं देवानांबाधकंवृत्रमसुरंगवावज्रेणइन्वन् प्रेरयन् हिंसन् जनुषाजन्म-नामृधः तदनुचरान् राक्षसादीन् शत्रून् सु सुष्ठु व्यहन् विजघन्थ इन्द्रस्यासुराः जन्मआरभ्य शत्रवइत्यर्थः हेइन्द्र त्वं अत्रास्मिन्युद्धे मनवे नमुचिनापहृतगोधनायमह्यंगातुंसुखमिच्छन् अ-भिलषन् नमुचेरेतन्नामकस्य दासस्य उपक्षपयितुरसुरस्यसंबन्धिशिरः शीर्षं यद्यदाअवर्तयः अचूर्णयः तदाशत्रून्विजघन्थेतिपूर्वेणसंबन्धः ॥ ७ ॥

अथाष्टमी—

युजंहिमामकृथाआदिदिन्द्रशिरोदासस्यनमुचेर्मथायन् ।
अश्मानंचित्स्वर्यं१वर्तमानंप्रचक्रियेवरोदसीमरुद्भ्यः ॥ ८ ॥

युजम् । हि । माम् । अकृथाः । आत् । इत् । इन्द्र । शिरः ।
दासस्य । नमुचेः । मथायन् । अश्मानम् । चित् । स्वर्यम् ।
वर्तमानम् । प्र । चक्रियाऽइव । रोदसी इति । मरुत्ऽभ्यः ॥ ८ ॥

हेइन्द्र त्वं स्वर्यं स्वरेणसहितं वर्तमानं भ्रमन्तं अश्मानंचित् मेघमिवस्थितं दासस्य उपक्षपयितुर्नमुचेरसुरस्यशिरः मथायन् चूर्णयन् आदिदनन्तरमेवमां युजं सखायं अकृथाहि चकृषेखलु तदानींमरुद्भ्यः त्वत्सहायेभ्यः रोदसी द्यावापृथिव्यौचक्रियेव चक्रेइव प्रास्तां उ-पसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ ८ ॥

अथनवमी—

स्त्रियोहिदासआयुधानिचक्रेकिंमाकरन्नबलाअस्यसेनाः ।
अन्तर्ह्यख्यदुभेअस्यधेनेअथोपप्रैद्युधयेदस्युमिन्द्रः ॥ ९ ॥

स्त्रियः । हि । दासः । आयुधानि । चक्रे । किम् । मा । करन् ।
अबलाः । अस्य । सेनाः । अन्तः । हि । अख्यत् । उभे इति । अस्य ।
धेने इति । अथ । उप । प्र । ऐत् । युधये । दस्युम् । इन्द्रः ॥ ९ ॥

दासः उपक्षपयिता नमुचिरसुरः स्त्रियः स्त्रीः आयुधानि युद्धसाधनानि चक्रे हि कृतवान् खलु इन्द्रेण सह योद्धुं प्रहितवानित्यर्थः अस्यासुरस्य संबन्धिन्यः अबलाः स्त्रीरूपाः सेनाः मा मां किंकरन् किंकुर्युरिति मन्यमान इन्द्रः तासां मध्ये अस्यासुरस्य धेने पीणयित्र्यौ सुरूपे उभे द्वे स्त्रियौ अन्तरख्यद्धि गृहमध्ये निदधे खलु अथानंतरमिन्द्रः दस्युं नमुचिं युधये युद्धाय उपप्रैत् उपप्रागच्छत् ॥९॥

अथ दशमी–

समत्र गावोभितोनवन्तेहेह वत्सैर्वियुता यदासन् ।
सन्ता इन्द्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमन्दन् ॥१०॥२७॥

सम् । अत्र । । गावः । अभितः । अनवन्त । इहऽइह । वत्सैः ।
विऽयुताः । यत् । आसन् । सम् । ताः । इन्द्रः । असृजत् । अस्य ।
शाकैः । यत् । ईम् । सोमासः । सुऽसुताः । अमन्दन ॥१०॥ २७॥

यदा गावः वत्सैः वियुता आसन् वियुक्ता अभवन् अत्रास्मिन्काले अभितः सर्वतो नमुचिनापहृता गावः इहेह इह चेह च सर्वतः समनवन्त अत्यन्तमगच्छन् यत् यदा सुषुताः बभ्रुनाम्नाऋषिणा सुष्ठ्वभिषुताः सोमासः सोमाः ईम् एनमिन्द्रं अमन्दन् अमादयन् तदा इन्द्रः शाकैः शक्तैर्मरुद्भिः सह अस्य बभ्रोः संबन्धीर्नमुचिनापहृतास्ता गाः समसृजत् वत्सैः सह समयोजयत् ॥१०।

॥ इति चतुर्थस्य प्रथमे सप्तविंशो वर्गः ॥ २७ ॥

अथैकादशी–

यदीं सोमा बभ्रुधूता अमन्दन्नरोरवीद्वृषभः सादनेषु ।
पुरंदरः पपिवाँ इन्द्रो अस्य पुनर्गवामददादुस्रियाणाम् ॥ ११ ॥

यत् । ईम् । सोमाः । बभ्रुऽधूताः । अमन्दन् । अरोरवीत् । वृषभः ।
सदनेषु । पुरम्ऽदरः । पपिऽवान् । इन्द्रः । अस्य । पुनः । गवाम् ।
अददात् । उस्रियाणाम् ॥ ११ ॥

यद्यदा बभ्रुधूताः बभ्रुणाभिषुताः सोमाः ईम् एनमिन्द्रं अमन्दन् अमादयन् तदा वृषभः कामानां वर्षिता इन्द्रः सदनेषु युद्धेषु अरोरवीत् अत्यर्थं शब्दमकरोत् पुरंदरः पुरां दारयिता अस्येमं सोमं पपिवान् पीतवान् इन्द्रः पुनः उस्रियाणां क्षीरमुत्स्राविणीः गवां गाः अददात् बभ्रवे ददौ॥११

अथद्वादशी—

भद्रमिदंरुशमाअग्नेअक्रन्गवांचत्वारिददतःसहस्रा।
ऋणंचयस्यप्रयंतामघानिप्रत्यग्रभीष्मनृतमस्यनृणाम् ॥ १२ ॥

भद्रम्। इदम्। रुशमाः। अग्ने। अक्रन्। गवाम्। चत्वारि।
ददतः। सहस्रा। ऋणम्ऽचयस्य। प्रऽयंता। मघानि। प्रति।
अग्रभीष्म। नृऽतमस्य। नृणाम् ॥ १२ ॥

रुशमइतिकश्चिज्जनपदविशेषः अत्ररुशमशब्देनतत्रत्याजनाउच्यन्ते रुशमाः ऋणंचयनाम्नोराज्ञःकिंकराः हेअग्ने भद्रंकल्याणमिदंकर्म अक्रन् अकुर्वन् कीदृशाः गवांधेनूनांचत्वारि चतुःसंख्यायुक्तानि सहस्रासहस्राणि ददतः मह्यंप्रयच्छतः राज्ञाहिदीयमानानिधनानि राजपुरुषाएवप्रयच्छन्तीत्यर्थः नरांनेतॄणांमध्येनृतमस्य अतिशयेननेतृतमस्य ऋणंचयस्य एतन्नामकेनराज्ञाप्रयताप्रयतानिदत्तानिमघानि गोरूपाणिधनानि वयं प्रत्यग्रभीष्म प्रतिगृहीतवन्तःस्म पूजार्थंबहुवचनम् ॥ १२ ॥

अथत्रयोदशी—

सुपेशसंमावसृजंत्यस्तंगवांसहस्रैरुशमासोअग्ने।
तीव्राइन्द्रममन्दुःसुतासोक्तोर्व्युष्टौपरितक्म्यायाः ॥ १३ ॥

सुऽपेशसम्। मा। अव। सृजन्ति। अस्तम्। गवाम्। सहस्रैः।
रुशमासः। अग्ने। तीव्राः। इन्द्रम्। अममन्दुः। सुतासः। अक्तोः।
विऽउष्टौ। परिऽतक्म्यायाः ॥ १३ ॥

हेअग्ने रुशमासः रुशमाः ऋणंचयस्यकिंकराः सुपेशसं सुरूपमलंकाराच्छादनादिभिः सत्कृतं मा मांअस्तं गृहं गवांधेनूनांसहस्रैःसह अवसृजन्ति प्रापयन्तिस्म तदनंतरमेवतीव्राः रसवन्तः सुतासः लब्धबहुधनेनमयाभिषुताःसोमाः परितक्म्यायाः तमसाभूतानिपरितस्तकतिगच्छतीतिपरितक्म्या तस्याः अक्तोरात्रेः व्युष्टौ व्युच्छनेसति उषःकालइत्यर्थः इन्द्रममन्दुः अमादयन् बभ्रुः गवांप्राप्त्यनन्तरमविलंबितमेवसोमेनेजइत्यर्थः ॥ १३ ॥

अथचतुर्दशी—

औच्छत्सारात्रीपरितक्म्यायाँऋणंचयेराजनिरुशमानाम्।
अत्योनवाजीरघुरज्यमानोबभ्रुश्चत्वार्यसनत्सहस्रा॥ १४॥

औच्छत्। सा। रात्री। परिऽतक्म्या। या। ऋणम्ऽचये।
राजनि। रुशमानाम्। अत्यः। न। वाजी। रघुः। अज्यमानः।
बभ्रुः। चत्वारि। असनत्। सहस्रा॥ १४॥

रुशमानां रुशमनाम्नांजनानांराजनिप्रभौ ऋणंचये एतत्संज्ञके तत्समीपएवयारात्रिः परितक्म्या परितोगंत्रीभवति सारात्री औच्छत् व्युष्टाअभवत् अत्यः सततगामी वाजीन अश्वइव रघुः शीघ्रगामी अज्यमानः प्रेर्यमाणः बभ्रुः एतन्नामकऋषिः चत्वारि चतुःसंख्याकानि सहस्रा सहस्राणि गोरूपाणिधनानि असनत् अलभत॥ १४॥

अथपंचदशी—

चतुःसहस्रंगव्यस्यपश्वःप्रत्यग्रभीष्मरुशमेष्वग्ने।
घर्मश्चित्तप्तःप्रवृजेयआसीदयस्मयस्तम्वादामविप्राः॥ १५॥ २८॥

चतुःऽसहस्रम्। गव्यस्य। पश्वः। प्रति। अग्रभीष्म। रुशमेषु।
अग्ने। घर्मः। चित्। तप्तः। प्रऽवृजे। यः। आसीत्।
अयस्मयः। तम्। ऊँ इति। आदाम। विप्राः॥ १५॥ २८॥

हेअग्ने वयं रुशमेषु एतत्संज्ञकेषुजनेषु गव्यस्य गवात्मकस्यपश्वःपशोः पशूनां जातावेकवचनं चतुःसहस्रं चत्वारिसहस्राणि प्रत्यग्रभीष्म प्रतिगृहीतवन्तःस्म प्रवृजे प्रवृंजनार्थं तप्तः संतप्तः शोभनवर्णोघर्मश्चित् महावीरइव अयस्मयः अयोमयः हिरण्मयोयःकलशआसीत् अभवत् तमुदोहनार्थं कलशंच विप्रामेधाविनोवयंरुशमेषुआदाम आदत्तवन्तः॥ १५॥

॥ इतिचतुर्थस्यप्रथमेष्टाविंशोवर्गः॥ २८॥

इन्द्रोरथायेतित्रयोदशर्चंसप्तदशंसूक्तं अवस्युर्नामात्रेयऋषिः त्रिष्टुप्छन्दः इन्द्रोदेवता उग्रमयातंसहयद्वामितिपादयोःक्रमेणकुत्सोशनसौविकल्पेनदेवता इन्द्राकुत्सावहमानेत्यस्या-

इन्द्रःकुत्सश्च तथाचानुक्रान्तं—इन्द्रोरथायसप्तोनावस्युरुग्रमितिकौत्स्यौशनसौवापादौपरैन्द्राकौत्सीति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

इन्द्रोरथायप्रवतंकृणोतियमध्यस्थान्मघवावाजयन्तम् ।
यूथेवपश्वोव्युनोतिगोपाअरिष्टोयातिप्रथमःसिषासन् ॥ १ ॥

इन्द्रः । रथाय । प्रऽवतम् । कृणोति । यम् । अधिऽअस्थात् ।
मघऽवा । वाजऽयन्तम् । यूथाऽइव । पश्वः । वि । उनोति ।
गोपाः । अरिष्टः । याति । प्रथमः । सिसासन् ॥ १ ॥

मघवा धनवानिन्द्रः वाजयन्तमन्नमिच्छन्तं यं रथं अध्यस्थादधितिष्ठति तस्मैरथाय प्रवतं प्रवणमार्जिकृणोति करोति अपिच गोपाः गोपालः पश्वोयूथेव पशोःपशूनांयूथानियथाव्युनोतिप्रेरयति तथा शत्रुसैन्यानिप्रेरयति अरिष्टः शत्रुभिःस्वयमहिंसितः प्रथमोदेवानां मुख्यः इन्द्रः सिषासन् शत्रुधनानीच्छन् याति गच्छति ॥ १ ॥

अथद्वितीया—

आप्रद्रवहरिवोमाविवेनःपिशंगरातेअभिनःसचस्व ।
नहित्वदिन्द्रवस्योअन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ ॥ २ ॥

आ । प्र । द्रव । हरिऽवः । मा । वि । वेनः । पिशंगऽराते ।
अभि । नः । सचस्व । नहि । त्वत् । इन्द्र । वस्यः । अन्यत् ।
अस्ति । अमेनान् । चित् । जनिऽवः । चकर्थ ॥ २ ॥

हेहरिवः हरिवन्निन्द्र त्वं आ अस्मानभिमुखं प्रद्रव प्रकर्षेणगच्छ किन्तु माविवेनः वेनतिःकान्तिकर्मा अस्मासुविगतकामोमाभूः किंच हेपिशंगराते बहुरूपधनेन्द्र नोस्मानभिसचस्व अभिसेवस्व अपिच हेइन्द्र वस्योवसीयः श्रेयस्करं त्वत् त्वत्तः अन्यन्नह्यस्ति अन्यद्वसुजातंनास्ति अमेनांश्चित् मेनाशब्दःस्त्रीवाची अपगतस्त्रीकांश्चित् जनिवतः जायावतश्चकर्थ करोषि ॥ २ ॥

अथतृतीया—

उद्यत्सहःसहंसआजंनिष्टदेदिंष्टइन्द्रंइन्द्रियाणिविश्वां।
प्राचोदयत्सुदुघांवव्रेअन्तर्विज्योतिंषासंववृत्वत्तमोंवः ॥ ३ ॥

उत्। यत्। सहंः। सहंसः। आ। अजंनिष्ट। देदिंष्टे। इन्द्रंः।
इन्द्रियाणिं। विश्वां। प्र। अचोदयत्। सुऽदुघाः। वव्रे। अन्तः।
वि। ज्योतिंषा। सम्ऽववृत्वत्। तमंः। अवरित्यंवः ॥ ३ ॥

यद्यदा सहः सूर्यसंबन्धितेजः सहसःउषःसंबन्धिनस्तेजसःउदाजनिष्ट उपरिष्टात्प्रादुर्बभूव तदाइन्द्रः विश्वा विश्वानि सर्वाणि इन्द्रियाणिधनानि इन्द्रियमितिधननामैतत् देदिष्टे यजमानेभ्योदिशति वव्रे निवारकेपर्वते अन्तर्मध्येबलेननिरुद्धाः सुदुघाः सुष्ठुदोग्ध्रीर्गाः प्राचोदयत् प्रैरयत् ज्योतिषातेजसासंववृत्वत् संवरणशीलंतमः विवः निवारितवान् ॥३॥

अथचतुर्थी—

अनंवस्तेरथमश्वांयतक्षन्त्वष्टावज्रंपुरुहूतद्युमन्तंम्।
ब्रह्माणइन्द्रंमहयंन्तोअर्कैरवंर्धयन्नहंयेहन्तवाउ ॥ ४ ॥

अनंवः। ते। रथंम्। अश्वांय। तक्षन्। त्वष्टां। वज्रंम्। पुरुऽहूत।
द्युऽमन्तंम्। ब्रह्माणंः। इन्द्रंम्। महयंन्तः। अर्कैः। अवंर्धयन्।
अहंये। हन्तवै। ऊँ इतिं ॥ ४ ॥

हेपुरुहूत बहुभिराहूतेन्द्र तेत्वदीयंरथं अश्वाय अश्वाभ्यांसंयोगार्हं अनवः मनवोमनुष्या-ऋभवः तक्षन्नतक्षन्नकुर्वन् त्वष्टाचत्वदीयंवज्रं द्युमन्तंदीप्तिमन्तमकरोत् उ अपिच महयन्तः इन्द्रंपूजयन्तोब्रह्माणोङ्गिरसः परिवृढामरुतोवा अहये अहिंवृत्रंहन्तवै हन्तुं अर्कैःस्तोत्रैरवर्धयन् वर्धितवन्तः ॥ ४ ॥

अथपंचमी—

वृष्णेयत्तेवृषणोअर्कमर्चानिन्द्रग्रावाणोअदितिःसजोषाः।
अनश्वासोयेपवयोरथाइन्द्रेषिताअभ्यवर्तन्तदस्यून् ॥ ५ ॥२९॥

वृष्णे । यत् । ते । वृषणः । अर्कम् । अर्चान् । इन्द्र । ग्रावाणः ।
अदितिः । सऽजोषाः । अनश्वासः । ये । पवयः । अरथाः ।
इन्द्रऽइषिताः । अभि । अवर्तन्त । दस्यून् ॥ ५ ॥ २९ ॥

हेइन्द्र यद्यदा वृषणः सेचनसमर्थामरुतः वृष्णे कामानां वर्षित्रेते तुभ्यं अर्कं स्तोत्रंअ-र्चान् स्तुवन्नकुर्वन्नित्यर्थः तदा अदितिःअदीनाः वचनव्यत्ययः ग्रावाणोअभिषवणपाषाणाः सजोषाः संगताबभूवुरितिशेषः अनश्वासः अश्ववर्जिताः अरथाः रथहीनाः इन्द्रेषिताः इ-न्द्रेणप्रेषिताः पवयः पवमानागच्छन्तोयेमरुतः दस्यून्शत्रून् अभ्यवर्तन्त अभिभूतान्कुर्वंतोवर्तन्ते स्म तेमरुतः अर्चानितिसंबन्धः ॥ ५ ॥

॥ इतिचतुर्थस्यप्रथमेएकोनत्रिंशोवर्गः ॥ २९ ॥

अथषष्ठी–

प्रतेपूर्वाणिकरणानिवोचंप्रनूतनामघवन्याचकर्थ ।
शक्तीवोयद्विभरारोदसीउभेजयन्नपोमनवेदानुचित्राः ॥ ६ ॥

प्र । ते । पूर्वाणि । करणानि । वोचम् । प्र । नूतना । मघऽवन् ।
या । चकर्थ । शक्तिऽवः । यत् । विऽभराः । रोदसी इति ।
उभे इति । जयन् । अपः । मनवे । दानुऽचित्राः ॥ ६ ॥

हेइन्द्र तेत्वदीयानि पूर्वाणि पुराननानि करणानि कर्माणि प्रवोचं अहंप्रकर्षेणब्रवीमि नूतना नूतनानि नवानिकर्माणिप्रवोचं प्रब्रवीमि हेमघवन्धनवन्निन्द्र या यानिकर्माणिच-कर्थ कृतवानसि तानिप्रवोचमितिसंबन्धः हेशक्तीवः शक्तिमन् शक्तिर्वज्रंकर्मवातद्वन्निन्द्र य-त् यस्त्वंउभेरोदसी द्यावापृथिव्यौ जयन् वशीकुर्वन् अपः उदकानि मनवेमनुष्याय विभ-राः विविच्यबिभर्षि कीदृशीः दानुचित्राःचित्रदानाः ॥ ६ ॥

अथसप्तमी–

तदिन्नुतेकरणंदस्मविप्राहिंयद्घ्नन्नोजोअत्रामिमीथाः ।
शुष्णस्यचित्परिमायाअगृभ्णाःप्रपित्वंयन्नपदस्यूँरसेधः ॥ ७ ॥

तत्। इत्। नु। ते। करणम्। दस्म। विप्र। अहिम्। यत्।
घ्नन्। ओजः। अत्र। अमिमीथाः। शुष्णस्य। चित्। परि। मायाः।
अगृभ्णाः। प्रऽपित्वम्। यन्। अप। दस्यून्। असेधः॥ ७॥

हेदस्म दर्शनीयविप्र मेधाविन्निन्द्र त्वं अत्रास्मिन्लोके अहिंवृत्रमसुरंघ्नन् हिंसन् यदोजोयद्बलंअमिमीथाः प्रकाशितवानसि तदिन्नु ततखलु ते त्वदीयंकरणंकर्मविद्यते अपिच शुष्णस्यचित् एतन्नामकस्याप्यसुरस्यसंबंधिनीर्मायाः युवतीःपर्यगृभ्णाः परिगृहीतवानसि हेइन्द्र त्वंप्रपित्वं संग्रामं समीपंवायन् प्राप्नुवन् दस्यून् असुरान् अपासेधः अपबाधथाः॥ ७॥

अथाष्टमी—

त्वमपोयदवेतुर्वशायारमयःसुदुघाःपारइन्द्र।
उग्रमयातमवहोहकुत्सं संहयद्वामुशनारन्तदेवाः॥ ८॥

त्वम्। अपः। यदवे। तुर्वशाय। अरमयः। सुऽदुघाः। पारः।
इन्द्र। उग्रम्। अयातम्। अवहः। ह। कुत्सम्। सम्। ह। यत्।
वाम्। उशना। अरन्त। देवाः॥ ८॥

हेइन्द्र त्वं पारे नदीनांतीरे प्रवृद्धइतिशेषः सुदुघाः ओषधिवनस्पतीन् सुष्ठुदुहतीः अपउदकानियदवे यदुनामकायराज्ञे तुर्वशाय एतन्नामकायराज्ञेच अरमयः रमितवानसि हे इन्द्र युवां त्वं कुत्सश्चेतिशेषः उग्रं उद्गूर्णं शुष्णं अयातं अगच्छतं तदनंतरं त्वं शुष्णंहत्वा कुत्समवहोह स्वगृहंप्रापितवानसिखलु यद्यदा वां युवां इन्द्राकुत्सौउशनाभार्गवौ देवाश्च समरन्तह संभेजिरेखलु॥ ८॥

अथनवमी—

इन्द्राकुत्सावहमानारथेनावामत्याअपिकर्णेवहन्तु।
निष्षीमद्भ्योधमथोनिष्षधस्थान्मघोनोहृदोवरथस्तमांसि॥ ९॥

इन्द्राकुत्सा । वहमाना । रथेन । आ । वाम् । अत्याः । अपि ।
कर्णे । वहन्तु । निः । सीम् । अत्ऽभ्यः । धमथः । निः ।
सधऽस्थात् । मघोनः । हृदः । वरथः । तमांसि ॥ ९ ॥

हेइन्द्राकुत्सा इन्द्राकुत्सौ रथेनवहमानावहमानौ उह्यमानौ वां युवां अत्याःअश्वाः कर्णेपि स्तोत्राणिकृणोतिकरोतीतिकर्णःस्तोता यजमानोवा तत्समीपेअपीतियावत् आवहन्तु आसमन्ताद्वाहकाभवन्तु युवामपि अद्भ्योप्सुप्रविष्टंसीमेनंशुष्णासुरंनिर्धमथः अबाधेथां सीमिति शुष्णासुरोबुद्धिस्थःपरामृश्यते सधस्थात् स्वकीयात्स्थानात् निरबाधेथाम् मघोनोमघवतोहविष्मतोयजमानस्यहृदोहृदयात्तमांस्यज्ञानरूपाणि पापानि वरथोनिवारयथः ॥ ९ ॥

अथदशमी—

वातस्ययुक्तान्त्सुयुजश्चिदश्वान्कविश्चिदेषोअजगन्नवस्युः ।
विश्वेतेअत्रमरुतःसखायइन्द्रब्रह्माणितविषीमवर्धन् ॥१०॥३०॥

वातस्य । युक्तान् । सुऽयुजः । चित् । अश्वान् । कविः । चित् ।
एषः । अजगन् । अवस्युः । विश्वे । ते । अत्र । मरुतः । सखायः ।
इन्द्र । ब्रह्माणि । तविषीम् । अवर्धन् ॥ १० ॥ ३० ॥

कविश्चित्प्राज्ञोपि अवस्युरेतन्नामकएषमंत्रद्रष्टावा तस्यवायोर्वेगेनयुक्तान् संयुक्तान् सुयुजश्चित् सुष्ठुयोजनीयानश्वान् अजगन् प्रापोत् अवस्योः सखायः विश्वेसर्वेमरुतोबहवः स्तोतारः हेइन्द्र अत्रास्मिन्लोके तेत्वदीयां तविषीं बलं ब्रह्माणि ब्रह्मभिःस्तोत्रैः अवर्धन्नवर्धयन् ॥ १० ॥

॥ इतिचतुर्थस्यप्रथमेत्रिंशोवर्गः ॥ ३० ॥

अथैकादशी—

सूरश्चिद्रथंपरितक्म्यायांपूर्वंकरदुपरंजूजुवांसम् ।
भरच्चक्रमेतशःसंरिणातिपुरोदधत्सनिष्यतिक्रतुंनः ॥ ११ ॥

सूरः । चित् । रथम् । परिऽतक्म्यायाम् । पूर्वम् । करत् । उपरम् ।
जूजुऽवांसम् । भरत् । चक्रम् । एतशः । सम् । रिणाति । पुरः ।
दधत् । सनिष्यति । क्रतुम् । नः ॥ ११ ॥

इन्द्रः परितक्म्यायां संग्रामेपरितोगच्छन्त्यस्यांभयइतिपरितक्म्या संग्रामः तस्मिन्एतशाख्येनऋषिणासहयोद्धुः सूरश्चित् सूर्यस्यापिसंबन्धिनं जूजुवांसं वेगेनगच्छन्तं रथं उपरं उपरतव्यापारंपूर्वंकरत् पुराकरोत् एतशःएतशाय विभक्तिव्यत्ययः इन्द्रः पूर्वंद्विचक्रस्यरथस्य एकंचक्रंभरत् अहरत् सइन्द्रः तेनचक्रेणासुरान्संरिणाति हिनस्ति अपिच पुरोदधत् अस्मान्पुरस्कुर्वन्नोस्मदीयंक्रतुंयज्ञंसनिष्यति संभजतु ॥ ११ ॥

अथद्वादशी–

आयंजनाअभिचक्षेजगामेन्द्रःसखायंसुतसोममिच्छन् ।
वदन्ग्रावाववेदिंभ्रियातेयस्यंजीरमध्वर्यवश्चरन्ति ॥ १२ ॥

आ । अयम् । जनाः । अभिऽचक्षे । जगाम । इन्द्रः । सखायम् ।
सुतऽसोमम् । इच्छन् । वदन् । ग्रावा । अव । वेदिम् । भ्रियाते ।
यस्य । जीरम् । अध्वर्यवः । चरन्ति ॥ १२ ॥

हेजनाः अभिचक्षे युष्मानभिद्रष्टुमयमिन्द्रःसखायंस्तोतारंसुतसोमं अभिषुतसोमंयजमानं इच्छन्नभिलषन् आजगामागच्छति अध्वर्यवः यस्यग्राव्णः जीरंक्षेपणंप्रेरणंचरन्तिकुर्वन्तिसग्रावा सोमाभिषवपाषाणः वदन् शब्दंकुर्वन् वेदिं अवभ्रियाते अभिह्रियते ॥ १२ ॥

अथत्रयोदशी–

येचाकनन्तचाकनन्तनूतेमर्ताअमृतमोतेअंहआरन् ।
वावन्धियज्यूँरुततेषुधेह्योजोजनेषुयेषुतेस्याम ॥ १३ ॥ ३१ ॥

ये । चाकनन्त । चाकनन्त । नु । ते । मर्ताः । अमृत । मो इति ।
ते । अंहः । आ । अरन् । ववन्धि । यज्यून् । उत । तेषु ।
धेहि । ओजः । जनेषु । येषु । ते । स्याम ॥ १३ ॥ ३१ ॥

हेइन्द्र धनार्थंयेजनाः त्वांचाकनन्त अकामयन्त पुनश्चते नु क्षिप्रमेवत्वां चाकनन्त हे-अमृत अमरणशीलेन्द्र मर्ताः मरणधर्माणस्तेजनाः अंहोनर्थं मोआरन् मागमन् माउइतिनि-पातसमुदायोमेत्येकनिपातार्थेवर्तते उतापिच यज्यून् यजमानान् ववन्धि संभजस्व येषुजनेषु येषांजनानांमध्ये वयंस्तोतारः तेत्वदीयाःस्याम भवाम हेइन्द्र त्वंतेषुजनेषु ओजोबलंधेहि॥१३॥

॥ इतिचतुर्थस्यप्रथमेएकत्रिंशोवर्गः ॥ ३१ ॥

अदर्दरुत्समितिद्वादशर्चमष्टादशंसूक्तं गातुर्नामात्रेयऋषिः त्रिष्टुप्छन्दः इन्द्रोदेवता तथा-चानुक्रान्तं—अदर्दर्द्वादशगातुरिति । गतोविनियोगः ।

तत्रप्रथमा—

अदर्दरुत्समसृजोविखानित्वमर्णवान्बद्बधानाँअरम्णाः ।
महान्तमिन्द्रपर्वतंवियद्वःसृजोविधाराअवदानवंहन् ॥ १ ॥

अदर्दः । उत्सम् । असृजः । वि । खानि । त्वम् । अर्णवान् ।
बद्बधानान् । अरम्णाः । महान्तम् । इन्द्र । पर्वतम् । वि । यत् ।
वरितिवः । सृजः । वि । धाराः । अव । दानवम् । हन्निितिहन् ॥१॥

हेइन्द्र त्वं उत्सं उत्स्यंदमानंमेवं अदर्दः विदारितवानसि तदनंतरं खानि मेघस्थोदका-नांनिर्गमनद्वाराणि व्यसृजः विशेषेणसृष्टवानसि किंच बद्बधानान् बाध्यमानान् अर्णवान् उदकवतोमेघान् अरम्णाः विसर्जयसि क्षारयसीत्यर्थः अत्ररम्णातिविसर्जनकर्मा हेइन्द्र यत् यस्त्वं यदितिलिंगव्यत्ययः महान्तंप्रभूतंपवर्तंमेघं विवः विवृतवानसि धाराः अपांविसृजः विसृष्टवानसि अपिच दानवं दनोःपुत्रं वृत्रमसुरं यद्वा उदकस्यदातारंमेघंवा अवहन् अभि-हतवानसि अत्रनिरुक्तम्—अदृणांउत्समुत्सउत्सदनाद्वोत्स्यंदनाद्वोनत्तेर्वास्याम्रसृजोस्यखानित्व-मर्णवानर्णस्वतएतानित्यादि ॥ १ ॥

अथद्वितीया—

त्वमुत्साँऋतुभिर्बद्बधानाँअरंहऊधःपर्वतस्यवज्रिन् ।
अहिंचिदुग्रप्रयुतंशयानंजघन्वाँइन्द्रतविषीमधत्थाः ॥ २ ॥

त्वम् । उत्सान् । ऋतुऽभिः । बद्बधानान् । अरंहः । ऊर्धः ।
पर्वतस्य । वज्रिन् । अहिम् । चित् । उग्र । प्रऽयुतम् । शयानम् ।
जघन्वान् । इन्द्र । तविषीम् । अधत्थाः ॥ २ ॥

हेवज्रिन् वज्रवन्निन्द्र त्वं ऋतुभिः ऋतुषुवृष्टिकालेषुबद्बधानान् प्रतिबध्यमानान् उत्सान् मेघान् प्रतिबन्धनादमोचयइतिशेषः अपिच पर्वतस्यमेघस्यसंबन्धि ऊधोबलं अरंहः अगमयः हेउग्र उद्गूर्णबलेन्द्र प्रयुतमुद्युक्तं शयानं जलेशयनंकुर्वन्तं अहिंचिद्वृत्रंचजघन्वान् हतवानसि हेइन्द्र त्वंतविषींबलं अधत्थाः अधारयः वृत्रवधानंतरंइन्द्रोलोकेप्रख्यातोभवतीत्यर्थः ॥ २ ॥

अथतृतीया—

त्यस्यंचिन्महृतोनिर्मृगस्यवधंर्जघानतविंषीभिरिन्द्रंः ।
यएक्इदंप्रतिर्मन्यंमानआदंस्मादृन्योअंजनिष्टतव्यांन् ॥ ३ ॥

त्यस्यं । चित् । महतः । निः । मृगस्यं । वधंः । जघान ।
तविंषीभिः । इन्द्रंः । यः । एकंः । इत् । अप्रतिः । मन्यंमानः ।
आत् । अस्मात् । अन्यः । अजनिष्ट । तव्यांन् ॥ ३ ॥

निर्जघानायुधंशक्रोवृत्रेणक्षिप्तमोजसा ॥ वृत्रस्यगात्रादन्योन्यःप्रादुर्भूतोमहासुरः ॥ १ ॥
वृत्रंपूर्वंनिहत्येन्द्रोद्वितीयंशुष्णसंज्ञकं ॥ पुनर्जघानेन्द्रइतिपराभिःकीर्तयत्यृषिरिति ॥ २ ॥

इन्द्रोमहतःप्रभूतस्यमृगस्यमृगवच्छीघ्रगामिनः त्यस्यचित् तस्यवृत्रस्यसंबन्धि वधरायुधं तविषीभिः स्वकीयैर्बलैर्निर्जघान निःशेषेणावधीत् एकइत् असहायएव अप्रतिः प्रतिद्वंद्विरहितः मन्यमानः आत्मानंयोस्तीतिशेषः आत् तदानींअस्मात्वृत्रात् तव्यान् प्रवृद्धतरोन्योसुरः अजनिष्ट प्रादुरभूत् ॥ ३ ॥

अथचतुर्थी—

त्यंचिंदेषांस्वधयामदंन्तंमिहोनपातंसुवृधंतमोगाम् ।
वृषंप्रभर्मादानवस्यभामंवज्रेणवज्रीनिजंघानशुष्णंम् ॥ ४ ॥

त्यम् । चित् । एषाम् । स्वधया । मदन्तम् । मिहः । नपातम् ।
सुऽवृधम् । तमःऽगाम् । वृषऽप्रभर्मा । दानवस्य । भामम् ।
वज्रेण । वज्री । नि । जघान । शुष्णम् ॥ ४ ॥

एषांप्राणिनां स्वधयान्नेन मदन्तं मोदमानं सर्वप्राणिनामन्नं स्वयमेवभुंजानं मिहः सेचनसमर्थस्यमेघस्य नपातं पातारंरक्षितारं अत्रनपाच्छब्दःपातरिवर्तते प्राणोवैतनूनपात्सहितन्वःपातीतिब्राह्मणम् । सुवृधंप्रवृद्धं तमोगांतमोन्धकारंगच्छन्तं त्यंचित् तंचवृत्रंनिजघानेतिशेषः वृषप्रभर्मा वर्षणशीलस्यमेघस्यप्रहर्ता वज्रीवज्रवानिन्द्रः वज्रेणस्वकीयेनायुधेन दानवस्य दनुजस्यभामं अत्रक्रोधवाचिभामशब्देनक्रोधादुत्पन्नःशुष्णासुरोलक्ष्यते तंशुष्णमसुरंनिजघान हतवान् ॥ ४ ॥

अथपञ्चमी—

त्यंचिदस्यक्रतुभिर्निषत्तममर्मणोविददिदस्यमर्म ।
यदींसुक्षत्रप्रभृतामदस्ययुयुत्सन्तंतमसिहर्म्येधाः ॥ ५ ॥

त्यम् । चित् । अस्य । क्रतुऽभिः । निऽसत्तम् । अमर्मणः ।
विदत् । इत् । अस्य । मर्म । यत् । ईम् । सुऽक्षत्र । प्रऽभृता ।
मदस्य । युयुत्सन्तम् । तमसि । हर्म्ये । धाः ॥ ५ ॥

अमर्मणोमर्महीनमात्मानंमन्यमानस्यास्यवृत्रस्यनिषत्तं निषण्णं त्यंचित् त्यत् तदेव लिंगव्यत्ययः मर्म प्राणस्थानं यत्रस्थानेविद्धोम्रियते तन्मर्मेत्युच्यते अस्यवृत्रस्य क्रतुभिः प्रज्ञानैः हेइन्द्र त्वंविददिव् अज्ञासीरेव यद्यदा हेसुक्षत्र सुबलेन्द्र त्वं मदस्यमादकस्यसोमस्यप्रभृता प्रभृतौ संभरणेसति युयुत्सन्तं योद्धुमिच्छन्तं ईमेनंवृत्रं हर्म्ये हारके तमसि धाः न्यदधाः वृत्रः इन्द्रस्यभयात्तमसिप्राविशदित्यर्थः ॥ ५ ॥

---

१ ऐ० ब्रा० २. ४. ।

अथषष्ठी–

त्यंचिदित्थाकत्पयंशयानमसूर्येतमसिवावृधानम् ।
तंचिन्मन्दानोवृषभःसुतस्योच्चैरिन्द्रोअपगूर्याजघान ॥ ६ ॥३२।

त्यम् । चित् । इत्था । कत्पयम् । शयानम् । असूर्ये । तमसि ।
ववृधानम् । तम् । चित् । मन्दानः । वृषभः । सुतस्य । उच्चैः ।
इन्द्रः । अपऽगूर्य । जघान ॥ ६ ॥ ३२ ॥

सुतस्याभिषुतेनसोमेनमंदानोमोदमानःवृषभः कामानांवर्षितेन्द्रः उच्चैरूर्ध्वं अपगूर्य वज्रमुद्यम्य तंचित् तमेववृत्रंजघानावधीत् कीदृशं इत्थामुत्रान्तरिक्षलोके कत्पयं कत्सुखकरंपयोयस्यतं शयानं अप्सुशयानंकुर्वन्तं असूर्ये सूर्यरहिते तमस्यन्धकारे ववृधानं वर्धमानंत्यं चिदितिपुनर्वचनंपूरणार्थम् ॥ ६ ॥

॥ इतिचतुर्थस्यप्रथमेद्वात्रिंशोवर्गः ॥ ३२ ॥

अथसप्तमी–

उद्यदिन्द्रोमहतेदानवायवधर्यमिष्टसहोअप्रतीतम् ।
यदींवज्रस्यप्रभृतौददाभविश्वस्यजन्तोरधमंचकार ॥ ७ ॥

उत् । यत् । इन्द्रः । महते । दानवाय । वधः । यमिष्ट । सहः ।
अप्रतिऽइतम् । यत् । ईम् । वज्रस्य । प्रऽभृतौ । ददाभ ।
विश्वस्य । जन्तोः । अधमम् । चकार ॥ ७ ॥

यद्यदाइन्द्रः महतेप्रभूतायदानवाय वृत्रासुराय सहः शत्रूणामभिभवितृअप्रतीतं केनाप्यप्रतिगतंवधोवज्रंउद्यमिष्ट उदयच्छत् यद्यदावज्रस्यप्रभृतौ प्रहृतौ प्रहरणेसति हृग्रहोर्भइतिभत्वं ईमेनंवृत्रं ददाभ अहिंसीत् तदाविश्वस्यसर्वस्यजन्तोःप्राणिनः अधमंनीचंचकार अकरोत् ॥ ७ ॥

अथाष्टमी–

त्यंचिदर्णंमधुपंशयानमसिन्वंवव्रंमह्यादंदुग्रः ।
अपादमत्रंमहताधेननिदुर्योणआवृणङ्मृध्रवाचम् ॥ ८ ॥

त्यम् । चित् । अर्णम् । मधुऽपम् । शयानम् । असिन्वम् । वव्रम् । माहि । आदत् । उग्रः । अपादम् । अत्रम् । महता । वधेन । नि । दुर्योणे । अवृणक् । मृध्रऽवाचम् ॥ ८ ॥

उग्रः उद्गूर्णबलः इन्द्रोमहि महान्तं त्यंचित् तमेववृत्रं आददाददौ प्रत्यग्रहीत् कीदृशं अर्णं गन्तारं जलंमेघंवा आवृत्यशयानं शयनंकुर्वन्तं स्थितवन्तमित्यर्थः मधुपं मधुनोंभसःपातारं पालयितारं असिन्वंसपत्नानामवक्षेप्तारं अस्यतेरिदंरूपं वव्रं वृण्वन्तं सर्वमप्याच्छादयन्तं सइमान्लोकानवृणोद्यदिमान्लोकानवृणोत्तद्वृत्रस्यवृत्रत्वमितिहितैत्तिरीयकं । तदनंतरमिन्द्रः दुर्योणे संग्रामे महताप्रभूतेनवधेन वज्रेण अपादं पादरहितं अत्रममात्रं परिमाणरहितं मृध्रवाचं हिंसितवागिन्द्रियं जृंभाभिभूतमित्यर्थः वृत्रंन्यवृणक् नितरामहिंसीत् तस्माज्जंजभ्यमानात् अग्नीषोमौ निरक्रामतां प्राणापानौवाएनंतदुज्जिहातामितिहितैत्तिरीयकम् ॥ ८ ॥

अथनवमी–

कोअस्यशुष्मंतविषींवरातएकोधनाभरतेअप्रतीतः ।
इमेचिदस्यज्रयसोनुदेवीइन्द्रस्यौजसोभियसाजिहाते ॥ ९ ॥

कः । अस्य । शुष्मम् । तविषीम् । वराते । एकः । धना । भरते । अप्रतिऽइतः । इमे इति । चित् । अस्य । ज्रयसः । नु । देवी इति । इन्द्रस्य । ओजसः । भियसा । जिहाते इति ॥ ९ ॥

---

१ तै० सं० २. ४. १२. ।

अस्येन्द्रस्यसंबन्धिनींशुष्मंशोषणींतविषींबलं कोवरावे निवारयेत् शुष्मशब्दस्यस्त्री-लिंगविशेषणत्वेपि नियतलिंगत्वात्पुंसिपुल्लिंगत्वमेव अप्रतीतः केनाप्यप्रतिगतइन्द्रः एकोऽसहा-यएव धना धनानि शत्रूणांवसूनि भरते बिभर्ति हरतेवा देवी देव्यौ द्योतमाने इमेचित एतेएवद्यावापृथिव्यौ ज्रयसोवेगवतोस्येन्द्रस्यसंबन्धिनः ओजसोबलादुद्भूतेनभियसाभयेन नुक्षिप्रं जिहाते गच्छतः चलतइत्यर्थः ॥ ९ ॥

अथदशमी—

न्यंस्मैदेवीस्वधितिर्जिहीतइन्द्रायगातुरुशतीवंयेमे ।
संयदोजोयुवतेविश्वंमाभिरनुंस्वधाव्नेक्षितयोनमन्त ॥ १० ॥

नि । अस्मै । देवी । स्वऽधितिः । जिहीते । इन्द्राय । गातुः ।
उशतीऽइंव । येमे । सम् । यत् । ओजः । युवते । विश्वम् । आभिः ।
अनु । स्वधाऽव्ने । क्षितयः । नमन्त ॥ १० ॥

स्वधितिः स्वधृतिः स्वेनधृतादेवीद्योतमानाद्यौः अस्माइन्द्रायनिजिहीते नीचत्वेनया-ति गातुर्भूमिः उशतीव कामयमानायोषिदिव इन्द्राय येमे आत्मानंनियच्छती यथेष्ट-मात्मानंविनियोक्तुंयोग्याभवतीत्यर्थः यद्यदेन्द्रः विश्वंसमस्तं ओजोबलं आभिः प्रजाभिः संयुवते संयोजयति इन्द्रःस्वकीयंबलं सर्वासुप्रजासुनिहितवानित्यर्थः अनुआनुकूल्येनव-र्तमानाःक्षितयोमनुष्याः क्षितयइतिमनुष्यनामैतत् स्वधाव्नेबलवतइन्द्राय नमन्त सन्नमन्ति प्रह्वीभवंति ॥ १० ॥

अथैकादशी—

एकंनुत्वासत्पतिंपाञ्चंजन्यंजातंशृंणोमियशसंजनेषु ।
तंमेंजगृभ्रआशसोनविंष्ठंदोषावस्तोर्हवंमानासइन्द्रंम् ॥ ११ ॥

एकम् । नु । त्वा । सत्ऽपतिम् । पांचऽजन्यम् । जातम् । शृणोमि ।
यशसम् । जनेषु । तम् । मे । जगृभ्रे । आऽशसः । नविष्ठम् ।
दोषा । वस्तोः । हवमानासः । इन्द्रम् ॥ ११ ॥

हेइन्द्र त्वा त्वां एकंनु मुख्यमेव जनेषुसर्वेषुमनुष्येषुमध्ये अहं मंत्रद्रष्टाश्रृणोमि ऋषिमुख्येभ्यः कीदृशं सत्पतिं सतांपालकं पांचजन्यं पंचजनेभ्योमनुष्येभ्योहितं जातमुत्पन्नं यशसं यशोयुक्तं दोषा क्षपायां वस्तोर्वासरेच वहमानासः स्तुवन्तः आशसः कामानांशंसमानाः मे मदीयाःप्रजाः नविष्ठं अतिशयेनस्तुत्यं तमिन्द्रंजगृभ्रे गृह्णन्तु स्वीकुर्वन्तु ॥ ११ ॥

अथद्वादशी–

एवाहित्वामृतुथायातयन्तंमघाविप्रेभ्योददतंशृणोमि ।
किंतेब्रह्माणोगृहतेसखायोयेत्वायानिदधुःकाममिन्द्र ॥१२॥३३॥

एव । हि । त्वाम् । ऋतुऽथा । यातयन्तम् । मघा । विप्रेभ्यः ।
ददतम् । शृणोमि । किम् । ते । ब्रह्माणः । गृहते । सखायः । ये ।
त्वाऽया । निऽदधुः । कामम् । इन्द्र ॥ १२ ॥ ३३॥

एवएवमुक्तेनप्रकारेण हि ऋतुथा कालेकालेयातयन्तं जंतून्प्रेरयन्तं हेइन्द्र त्वां विप्रेभ्यःस्तोतृभ्यः मघा मघानि धनानि ददतं यच्छन्तं शृणोमि निशामयामि एतन्मृषैवप्रतिभाति हेइन्द्र त्वाया त्वयि येस्तोतारः कामंस्वकीयाभिलाषंनिदधुः न्यक्षिपन् ब्रह्माणोबृहन्तः तेत्वदीयाःसखायःस्तोतारः किं गृहते त्वत्तःकिंगृह्णन्ते ऋषिःस्वकीयाभिलाषप्राप्तिविलंबनादेवमुक्तवानित्यर्थः ॥ १२ ॥

॥ इतिचतुर्थस्यप्रथमेत्रयस्त्रिंशोवर्गः ॥ ३३ ॥

॥ इतिपंचमेमंडलेद्वितीयोनुवाकः ॥ २ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेप्रथमोध्यायः ॥ १ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥
चतुर्थेप्रथमाध्यायंव्याख्यायव्याकृतिक्षमः । सुधीःश्रीसायणाचार्योद्वितीयंव्याचिकीर्षति॥२॥

तत्रात्रेःपंचमेमंडलेतृतीयेनुवाकेद्वादशसूक्तानि तत्रमहिमहइतिदशर्चंप्रथमंसूक्तं प्रजापतिपुत्रःसंवरणऋषिः त्रिष्टुप्छन्दः इन्द्रोदेवता तथाचानुक्रान्तं—महिदशप्राजापत्यःसंवरणइति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

ॐम् महिमहेतवसेदीध्येनॄनिन्द्रायेत्थातवसेअतव्यान् ।
योअस्मैसुमतिंवाजसातौस्तुतोजनेसमर्यश्चिकेत ॥ १ ॥

महि । महे । तवसे । दीध्ये । नॄन् । इन्द्राय । इत्था । तवसे ।
अतव्यान् । यः । अस्मै । सुऽमतिम् । वाजऽसातौ । स्तुतः ।
जने । सऽमर्यः । चिकेत ॥ १ ॥

अहंसंवरणःअतव्यान् अत्यन्तमिवदुर्बलःसन् महि महत् प्रभूतंस्तोत्रं महे महते तवसे बलवतइन्द्रायेत्था इत्थंवक्ष्यमाणप्रकारेणदीध्ये दीपयामि प्रकाशयामि किमर्थं नॄन् षष्ठ्यर्थेद्वितीया मनुष्याणामस्मदीयानांतवसेबलाय यद्वा नॄनस्मद्विरोधिनामभिभवायेतिशेषः तदर्थंतवसेस्मद्बलाय इन्द्रोस्मैजने जनायसंवरणाय वाजसातौ संग्रामे वाजस्यान्नस्यवालाभेनिमित्तेसतिस्तुतःसन् सुमतिं समर्यः मर्त्यैःस्तोतृभिःसहितः यद्वा सह्रियमाणैर्युध्यमानैर्मरुदादिभिः अथवा समरार्हः चिकेत जानाति ॥ १ ॥

अथद्वितीया—

सत्वंनइन्द्रधियसानोअर्कैर्हरीणांवृषन्योक्त्रमश्रेः ।
याइत्थामघवन्ननुजोषंवक्षोअभिप्रार्यःसक्षिजनान् ॥ २ ॥

सः । त्वम् । नः । इन्द्र । धियसानः । अर्कैः । हरीणाम् । वृषन् ।
योक्त्रम् । अश्रेः । याः । इत्था । मघऽवन् । अनु । जोषम् ।
वक्षः । अभि । प्र । अर्यः । सक्षि । जनान् ॥ २ ॥

हेवृषन् वर्षकेन्द्र सप्रसिद्धस्त्वंनोस्मान्धियसानोध्यायन् अर्कैरर्चनसाधनैःस्तोत्रैर्निमित्तभूतैः हरीणांरथेनियोज्यानामश्वानांयोक्त्रंनियोजनरज्जुमश्रेः आश्रयसि याः लिंगव्यत्ययः यानर्कान् हेमघवन् इत्थाइत्थं जोषं प्रीतिं अनुवक्षोऽवहस्तैर्निमित्तैर्योक्त्रमश्रेरिति तथाकृत्वा अर्योस्मदरीन्जनान् अभि आभिमुख्येन प्र प्रकृष्टं सक्षि पराभव ॥ २ ॥

अथतृतीया—

नतेतंइन्द्राभ्य१स्मदृष्वायुक्तासोअब्रह्मतायदसंन् ।
तिष्ठारथमधितंवज्रहस्तारश्मिन्देवयमसेस्वश्वः ॥ ३ ॥

न । ते । ते । इन्द्र । अभि । अस्मत् । ऋष्व । अयुक्तासः ।
अब्रह्मता । यत् । असन् । तिष्ठ । रथम् । अधि । तम् ।
वज्रऽहस्त । आ । रश्मिम् । देव । यमसे । सुऽअश्वः ॥ ३ ॥

हेऋष्व महन् इन्द्र यत् ये अस्मदस्मत्तः त्वद्भक्तेभ्योन्ये अयुक्तासः त्वया असंयुक्ताअसन् आसन् अभवन् अब्रह्मता ब्रह्मपरिवृढंकर्मतद्रहितत्वात् तेनरास्तेत्वदीयानभवन्ति अतोस्मद्यज्ञमभ्यागन्तुं तं प्रसिद्धं रथं अधितिष्ठ हेवज्रहस्तेन्द्र देव स्वश्वः त्वंयंरथमारोढुंरश्मिंप्रग्रहं आयमसे नियमयसितमधितिष्ठ ॥ ३ ॥

अथचतुर्थी—

पुरूयत्तंइन्द्रसन्त्युक्थागवेचकर्थोर्वरासुयुध्यंन् ।
ततक्षेसूर्यायचिदोकसिस्वेवृषासमत्सुदासस्यनामंचित् ॥ ४ ॥

पुरु । यत् । ते । इन्द्र । सन्ति । उक्था । गवे । चकर्थ । उर्वरासु ।
युध्यन् । ततक्षे । सूर्याय । चित् । ओकसि । स्वे । वृषा ।
समत्ऽसु । दासस्य । नाम । चित् ॥ ४ ॥

हेइन्द्र ते तव यद्यदास्वभूतानि पुरु पुरूणि बहूनि उक्था उक्थानिशस्त्राणिसन्ति तदा उर्वरासु सस्योपेतासुभूमिषु निमित्तभूतासु गवे वृष्ट्युदकाय युध्यन् जलप्रतिबन्धकान् संहरन् चकर्थ करोषि भेदनं कुत्रेतिसूर्याय सूर्यस्यस्वेस्वकीयेओकसिस्थाने वृषा वर्षितासन् ततक्षे भेदनं संपादयसि समत्सु संग्रामेषु दासस्य वृष्टिप्रतिबन्धकर्तुरेतन्नामकस्यासुरस्य नामचिद् नामापि ततक्षे नाशयसीत्यर्थः ॥ ४ ॥

अथपंचमी—

वयंतेतइन्द्रयेचनरःशर्धोजज्ञानायाताश्चरथाः ।
आस्माञ्जगम्यादहिशुष्मसत्वाभगोनहव्यःप्रभृथेषुचारुः ॥५॥१॥

वयम् । ते । ते । इन्द्र । ये । च । नरः । शर्धः । जज्ञानाः ।
याताः । च । रथाः । आ । अस्मान् । जगम्यात् । अहिऽशुष्म ।
सत्वा । भगः । न । हव्यः । प्रऽभृथेषु । चारुः ॥ ५ ॥ १ ॥

हेइन्द्र येचनरः कर्मणांनेतारऋत्विग्यजमानाःवयंस्मः तेवयं ते त्वदीयाः कीदृशावयं शर्धोबलंजज्ञानाः उत्पादयन्तः स्तुतिभिः याताश्चहोतुंत्वांप्राप्ताश्च रथाःरंहणशीलाश्च किंच हेअहिशुष्मअहिरयनावसर्वतोव्याप्तबलेन्द्र त्वदनुग्रहात् हव्यः स्तुत्यः प्रतिभटैराह्वातव्योवा चारुःसंगंता सत्वाभृत्यादिः प्रभृथेषुसंग्रामेषुवा अस्मानाजगम्यात् आगच्छेत् भगोन भगइव हव्यश्चारुः भगदेवोयथास्मत्सहायआगच्छति तथा भृत्यादिरागच्छेदित्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी—

पपृक्षेण्यमिन्द्रत्वेह्योजोनृम्णानिचनृतमानोअमर्तः ।
सनएनींवसवानोरयिंदाःप्रार्यस्तुषेतुविमघस्यदानम् ॥ ६ ॥

पपृक्षेण्यम् । इन्द्र । त्वे इति । हि । ओजः । नृम्णानि । च ।
नृतमानः । अमर्तः । सः । नः । एनीम् । वसवानः । रयिम् । दाः ।
प्र । अर्यः । स्तुषे । तुविऽमघस्य । दानम् ॥ ६ ॥

हेइन्द्र मपृक्षेण्यं संपर्कार्हं पूज्यंवा ओजोबलंत्वेहि त्वयिखलु त्वदधीनमित्यर्थः नृतमानोनृत्यन्नमर्तोमरणधर्मा सत्वं वसवानः आच्छादयन् स्वतेजसाजगत् नृम्णानि नृमणानि द्रविणानि वक्ष्यमाणरय्यपेक्षयाचशब्दः एनीं एनवर्णां श्वेतवर्णां नोस्मभ्यंरयिंधनंदाः देहि अहंच अर्यईश्वरस्यतुविमघस्य प्रभूतधनस्यचदानंप्रस्तुवे स्तौमि ॥ ६ ॥

अथसप्तमी—

एवानंइन्द्रोतिभिरवपाहिगृणतःशूरकारून् ।
उतत्वचंददंतोवाजंसातौपिप्रीहिमध्वःसुषुतस्यचारोः ॥ ७ ॥

एव । नः । इन्द्र । ऊतिऽभिः । अव । पाहि । गृणतः । शूर ।
कारून् । उत । त्वचंम् । ददंतः । वाजंऽसातौ । पिप्रीहि ।
मध्वः । सुऽसुंतस्य । चारोः ॥ ७ ॥

हेशूरेन्द्र एव एवं नोस्मान्गृणतः स्तुवतः कारून् कर्तॄन् ऋत्विजः ऊतिभिः रक्षणैः अवपाहि अवपालय उतापिच वाजसातौ संग्रामे त्वचं आच्छादकंरूपंददतः प्रयच्छतः सुषुतस्यसुष्ठुभिषुतस्यचारोर्मनोहरस्यमध्वः सोमस्य पिप्रीहि प्रीणयात्मानं द्वितीयार्थेषष्ठी उक्तलक्षणंसोमंपिबेत्यर्थः अथवा तृतीयार्थेषष्ठी उक्तलक्षणेनसोमपानेनप्रीणय ॥ ७ ॥

अथाष्टमी—

उतत्येमापौरुकुत्स्यस्यसूरेस्त्रसदस्योर्हिरणिनोरराणाः ।
वहन्तुमादशश्येतासोअस्यगैरिक्षितस्यक्रतुभिर्नुसश्चे ॥ ८ ॥

उत । त्ये । मा । पौरुऽकुत्स्यस्यं । सूरेः । त्रसदंस्योः । हिरणिनंः ।
रराणाः । वहंन्तु । मा । दशं । श्येतांसः । अस्य । गैरिऽक्षितस्यं ।
क्रतुंऽभिः । नु । सश्चे ॥ ८ ॥

त्रसदस्युश्वविदथोध्वन्यश्चेतित्रयोनृपाः अश्वान्धनानिगाश्चादुर्ऋषये ·तद्वदत्यृषिः उत अपिच त्ये ते मा चतुर्थ्यर्थेद्वितीया मह्यमित्यर्थः रराणाः रातेर्दानार्थस्यकर्मणिलिटःकानचिरूपं दत्ताइत्यर्थः पौरुकुत्स्यस्य पुरुकुत्सापत्यस्य सूरेः प्रेरकस्य हिरणिनोहिरण्यवतोस्य त्रसदस्योः एतन्नामकस्यराजर्षेः गैरिक्षितस्य गिरिक्षितगोत्रोत्पन्नस्य श्येतासः शुभ्रवर्णाः

दशाश्वाः मा मां वहन्तु प्रापयन्तु अहंचक्रतुभिःकर्मभीरथनियोजनादिभिः यज्ञादिभिर्वा-
नु क्षिप्रं सत्थे गच्छेयम् ॥ ८ ॥

अथनवमी—

उतत्येमांमारुताश्वस्यशोणाःक्रत्वामघासोविदथस्यरातौ ।
सहस्रामेच्यवतानोददानआनूकमर्यौवपुषेनार्चत् ॥ ९ ॥

उत । त्ये । मा । मारुतऽअश्वस्य । शोणाः । क्रत्वाऽमघासः ।
विदथस्य । रातौ । सहस्रा । मे । च्यवतानः । ददानः ।
आनूकम् । अर्यः । वपुषे । न । आर्चत् ॥ ९ ॥

उत अपिच त्ये तेअश्वाः वक्ष्यमाणाः मारुताश्वस्य मरुत्सदृशवेगाश्ववान् मरुताश्वः
तदपत्यस्यविदथस्यैतन्नामकस्यराज्ञःशोणाःशोणवर्णाःक्रत्वामघासः क्रतुनाकर्मणाशीघ्रगमना-
दिलक्षणेनमहनीयाः अश्वाःरातौदानेविनियुक्तामांवहन्तीतिशेषः किंच सहस्रा सहस्राणि अ-
परिमितानिधनानिअर्यः पूज्यस्य मे चतुर्थ्यर्थेषष्ठी पूज्याय मह्यंच्यवतानः च्यावयन् ददानः
प्रयच्छन् सः आनूकं आभरणंच वपुषे स्वशरीरालंकाराय आर्चत प्रायच्छत् नेतिचार्थे ॥ ९ ॥

अथदशमी—

उतत्येमांध्वन्यस्यजुष्टालक्ष्मण्यस्यसुरुचोयतानाः ।
मह्नारायःसंवरणस्यऋषेर्व्रजंनगावःप्रयताअपिग्मन् ॥ १० ॥२॥

उत । त्ये । मा । ध्वन्यस्य । जुष्टाः । लक्ष्मण्यस्य । सुऽरुचः ।
यतानाः । मह्ना । रायः । समऽवरणस्य । ऋषेः । व्रजम् । न ।
गावः । प्रऽयताः । अपि । ग्मन् ॥ १० ॥ २ ॥

उतापिच त्ये ते वक्ष्यमाणारायः ध्वन्यस्य ध्वन्यनामकस्यलक्ष्मण्यस्य लक्ष्मणपुत्रस्य
राज्ञःसंबन्धिनोश्वाः जुष्टाः मांप्राप्ताः सुरुचः शोभनदीप्तयः यतानाः वहमानाययतमानाः
रायःमह्नामहत्त्वेनयुक्तारायः प्रयताः दत्ताःसन्त्यः संवरणस्यऋषेःअपिग्मन् अपिगताः प्रा-
प्तामदृहमितिशेषः व्रजंनगावः गोष्ठंगावइव यद्वा नेतिचार्थे गावश्चममव्रजंअपिग्मन् अ-
त्रैन्द्रेसूक्तेप्रायेणेन्द्रमरुतोराज्ञांचदानस्तुनयइत्युक्तत्वाद्राज्ञांदानस्तुतिरविरुद्धा ॥ १० ॥

॥ इतिचतुर्थस्यद्वितीयेद्वितीयोवर्गः ॥ २ ॥

अजातशत्रुमितिनवर्चंद्वितीयंसूक्तं प्राजापत्यस्यसंवरणस्यार्षमैन्द्रं नवमीत्रिष्टुप् शिष्टा-स्त्रिष्टुबन्तपरिभाषयाजगत्यः अजातशत्रुंनवत्रिष्टुबन्तमित्यनुक्रमणिका । विनियोगोलैंगिकः ।

तत्रप्रथमा—

अजातशत्रुमजरास्वर्वत्यनुस्वधामितादस्ममीयते ।
सुनोतनपचतब्रह्मवाहसेपुरुष्टुतायप्रतरंदधातन ॥ १ ॥

अजातऽशत्रुम् । अजरा । स्वःऽवती । अनु । स्वधा । अमिता । दस्मम् । ईयते । सुनोतन । पचत । ब्रह्मऽवाहसे । पुरुऽस्तुताय । प्रऽतरम् । दधातन ॥ १ ॥

अजातशत्रुं अनुत्पन्नाःशातयितारोयस्यतं दस्मं शत्रूणामुपक्षपयितारं अजरा अक्षीणा स्वर्वतीस्वरणवतीअमिता अपरिमिता स्वधा अन्नं हविरन्वीयते अनुप्राप्नोति तदर्थं हेऋत्वि-जः सुनोतन अभिषुणुत पचत पुरोडाशादिकं कस्मै ब्रह्मवाहसे ब्रह्मणःपरिवृढस्यस्तोत्रस्यवाह-कायपुरुष्टुतायबहुभिःस्तुतायेन्द्राय प्रतरं प्रकृष्टतरं दधातन धारयत स्वस्वोचितकर्म ॥ १ ॥

अथद्वितीया—

आयःसोमेनजठरमपिप्रतामन्दतमघवामध्वोअन्धसः ।
यदीमृगायहन्तवेमहावधःसहस्रभृष्टिमुशनावधंयमत् ॥ २ ॥

आ । यः । सोमेन । जठरम् । अपिप्रत । अमन्दत । मघऽवा । मध्वः । अन्धसः । यत् । ईम् । मृगाय । हन्तवे । महाऽवधः । सहस्रऽभृष्टिम् । उशना । वधम् । यमत् ॥ २ ॥

योमघवा सोमेनजठरंस्वकीयं आसर्वतः अपिप्रत अपूरयत् मध्वोमधुरसस्यान्धसःसो-मस्यपानेनामंदतातृप्यत् यद्यदा ईमयंमृगायैतन्नामकायासुरायहन्तवे तंहन्तुंमहावधः महावज्रः सहस्रभृष्टिरपरिमिततेजाः उशनाकामयमानःशत्रुं यद्वा उशनसासहवधं वज्रंयमत् उदयच्छत् तदापिप्रतामंदत ॥ २ ॥

अथतृतीया—

योअस्मैघ्रंसउतवायऊधनिसोमंसुनोतिभवतिद्युमाँअह ।
अपांपशक्रस्ततनुष्टिमूहतितनूशुभ्रंमघवायःकवासखः ॥ ३ ॥

यः । अस्मै । घ्रंसे । उत । वा । यः । ऊधनि । सोमम् । सुनोति ।
भवति । द्युऽमान् । अह । अपऽअप । शक्रः । ततनुष्टिम् । ऊहति ।
तनूऽशुभ्रम् । मघऽवा । यः । कवऽसखः ॥ ३ ॥

योयजमानः अस्मैइन्द्राय घ्रंसे अहर्नामैतत् गृह्यन्तेस्मिन्रसाइतिघ्रंसः तस्मिन् उतवा अथवा योयजमानः ऊधनि उद्धततरंभवति उन्नद्धमितिवाऊधोरात्रिः स्नेहप्रदानरसाभ्यामूधसि रात्रौच समत्वात् रात्रेरप्यूधउच्यते अहनिरात्रौच सोमंसुनोति सभवतिद्युमान्दीप्तिमान् अहेति विनिग्रहार्थीयः किंच शक्रः शक्तोयमिन्द्रः ततनुष्टिं ततं धर्मसन्ततिं नुदति वष्टि कामयते कामानितिततनुष्टिः तंतनूशुभ्रं तनूःशुभ्राशोभनीयालंकारादिभिर्यस्यतंतादृशं स्वपोषकमयज्वानं अपोहति अपरोपशब्दःपूरणः मघवा धनवान् यःकवासखःकुत्सितपुरुषसहायःतमपोहतीति ॥ ३ ॥

अथचतुर्थी—

यस्यावधीत्पितरंयस्यमातरंयस्यशक्रोभ्रातरंनातईषते ।
वेतीद्वस्यप्रयतायतंकरोनकिल्बिषादीषतेवस्वआकरः ॥ ४ ॥

यस्य । अवधीत् । पितरम् । यस्य । मातरम् । यस्य । शक्रः ।
भ्रातरम् । न । अतः । ईषते । वेति । इत् । ऊँ इति । अस्य । प्रऽयता ।
यतमऽकरः । न । किल्बिषात् । ईषते । वस्वः । आऽकरः ॥ ४ ॥

शक्रःशक्तोयं यस्यायज्वनः पितरं अवधीत् हतवान् यस्यचमातरंअवधीत् यस्य चभ्रातरं अतोस्मात् अयज्वनःसकाशात् नेषते नबिभेति नगच्छतिवा किंत्वस्यप्रयता प्रदत्तानिहवींषि वेतीदु कामयतएव अयज्वानं शिक्षयित्वानियोजयतीत्यर्थः यतंकरः यमनकर्ता वस्वोवसुनोधनस्य आकरः आभिमुख्यकर्तायःकिल्बिषात् पित्रादिधनयुक्तात् नेषते नचलति नबिभेतिवा इन्द्रस्यास्तोतॄणांहतिरिन्द्रोयतीन्सालावृकेभ्यःप्रायच्छत् अंत-

रिक्षेपौलोमान्पृथिव्यांकालकांज्यान् अरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छमित्यादिश्रुतिषुप्रसिद्धा ॥ ४ ॥

अथपंचमी—

नपञ्चभिर्दशभिर्वष्ट्यारभंनासुन्वतासचतेपुष्यंताचन ।
जिनातिवेदमुयाहन्तिवाधुनिरादेवयुंभजतिगोमतिव्रजे ॥५॥३॥

न । पंचऽभिः । दशऽभिः । वष्टि । आऽरभम् । न । असुन्वता ।
सचते । पुष्यंता । चन । जिनाति । वा । इत् । अमुया । हन्ति ।
वा । धुनिः । आ । देवऽयुम् । भजति । गोऽमति । व्रजे ॥ ५ ॥ ३ ॥

अयमिन्द्रः पंचभिर्दशभिर्वासहायैरारभं आरभंशत्रुहननायालंबनंनवष्टि साहाय्यं नापेक्षतइत्यर्थः यद्वा अमुमिन्द्रं पंचभिर्दशभिर्वायज्ञादन्यैरुपायैरारभमारब्धमुद्योगंकर्तुंनवष्टि नकामयते असुन्वता अभिषवमकुर्वता सहपुष्यताच न बंध्वादीनपोषयतापि नसचते नसंगच्छते असुन्वंतं अभिषवमकुर्वाणं अयष्टारं अपुष्णंतंचनप्राप्नोतीत्यर्थः नकेवलमप्राप्तिमात्रं किंतु जिनातिवा वाशब्दश्चार्थे जिनातिच बाधते इदितिपूरणः हन्तिवामुया अमुमयष्टारं धुनिः कंपकःशत्रूणां देवयुंदेवमिन्द्रंकामयमानं यजमानं गोमति व्रजे आभजति जयतीत्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेतृतीयोवर्गः ॥ ३ ॥

अथषष्ठी—

वित्वक्षणःसमृतौचक्रमासजोसुन्वतोविषुणःसुन्वतोवृधः ।
इन्द्रोविश्वस्यदमिताविभीषणोयथावशंनयतिदासमार्यः ॥ ६ ॥

विऽत्वक्षणः । समृऽऋतौ । चक्रमऽआसजः । असुन्वतः । विषुणः ।
सुन्वतः । वृधः । इन्द्रः । विश्वस्य । दमिता । विऽभीषणः ।
यथाऽवशम् । नयति । दासम् । आर्यः ॥ ६ ॥

समृतौसंग्रामेविलक्षणः विशेषेणतनूकर्ताशत्रूणांतदर्थंचक्रमासजः रथचक्रस्यासंजयिता असुन्वतोयजमानस्यविषुणःपराङ्मुखःसुन्वतोयजमानस्यवृधोवर्धयिताइन्द्रोविश्वस्यदमिताशिक्षयिताविभीषणःभयजनकःआर्यःस्वामी यथावशंयथेच्छंदासंदासकर्माणंजनंनयतिस्ववशम्॥६॥

अथसप्तमी—

समीं॑पणेर॑जतिभोज॑नंमुषेविदा॒शुषे॒भजतिसू॒नरं॒वसु॑ ।
दु॒र्गेच॒नाध्रि॑यते॒विश्व॒आपु॒रुजनो॒योअ॑स्य॒तवि॑षी॒मचु॑क्रुधत् ॥ ७ ॥

सम् । ईम् । पणेः । अजति । भोज॑नम् । मुषे । वि । दाशुषे ।
भजति । सूनर॑म् । वसु॑ । दुःऽगे । चन । ध्रियते । विश्वः । आ ।
पुरु । जनः । यः । अस्य । तविषीम् । अचुक्रुधत् ॥ ७ ॥

ईमयमिन्द्रः पणेर्वणिजइव लुब्धकस्यादातुर्भोजनंधनमन्नंवामुषेचोरयितुंसमजति सम्यग्गच्छति गत्वाचादायदाशुषेहविर्दात्रेयजमानायविभजति सूनरंशोभनमनुष्यंवसुधनं अयष्टुर्धनमाकृष्ययष्ट्रेप्रयच्छतीत्यर्थः नकेवलंवणिक्धनप्रदानमात्रं किंतु पुरुपुरूणिबहून्यन्यान्यपिधनानि किंच दुर्गेचनदुःखेननगन्तव्ये आपद्यपिविश्वःसर्वोपिदातृजनः आध्रियते आस्थाप्यते योजनः अस्येन्द्रस्यतविषींबलमचुक्रुधत् विहिताकरणादिनातस्यपणेरजतीतिपूर्वशेषः यद्वा योस्यतविषीमचुक्रुधत् ससर्वोपिजनोदुर्गेचनाध्रियते इन्द्रेणचनेत्येकपदमध्येतृसंप्रदायप्राप्तम् ॥ ७ ॥

अथाष्टमी—

सं॑यज्जनौ॑सु॒धनौ॒विश्व॑शर्धसा॒ववे॒दिन्द्रो॒मघवा॒गोषु॑शु॒भ्रिषु॑ ।
युजं॒ह्य१॒न्यमकृ॑तप्रवेप॒न्युदीं॒गव्यं॑सृज॒तेसत्व॑भि॒र्धुनिः॑ ॥ ८ ॥

सम् । यत् । जनौ । सुऽधनौ । विश्वऽशर्धसौ । अवेत् ।
इन्द्रः । मघऽवा । गोषु । शुभ्रिषु । युजम् । हि । अन्यम् । अकृत ।
प्रऽवेपनी । उत् । ईम् । गव्यम् । सृजते । सत्वऽभिः । धुनिः ॥ ८ ॥

समवेत् संजानाति यद्यदाजनौपरस्परमतिद्वंद्विनौ सुधनौ शोभनधनौ विश्वशर्धसौ व्याप्तबलौ बहूत्साहौवा तदा मघवाधनवानिन्द्रोगोषुशुभ्रिषुशोभनासुगोषुनिमित्तभूतासुअन्यंयष्टारंयुजं

सहायमकृतकृतवान् प्रवेपनीशत्रूणांप्रवेपनवान् ईमस्मै गव्यंगोसमूहं उत्सृजते सत्वभिर्मरुद्भिः सहधुनिःमेघानांकंपयितेन्द्रः यजमानमयजमानंवायंजानातिगोनिमित्तंज्ञात्वायज्वनेगोसमूहं प्रयच्छतीत्यर्थः ॥ ८ ॥

अथनवमी—

सहस्रसामाग्निवेशिंगृणीषेशत्रिमग्नउपमांकेतुमर्यः ।
तस्माआपःसंयतःपीपयन्ततस्मिन्क्षत्रममवत्त्वेषमस्तु॥ ९ ॥ ४ ॥

सहस्रऽसाम् । आग्निऽवेशिम् । गृणीषे । शत्रिम् । अग्ने । उपऽमाम् । केतुम् । अर्यः । तस्मै । आपः । सम्ऽयतः । पीपयन्त । तस्मिन् । क्षत्रम् । अमऽवत् । त्वेषम् । अस्तु ॥ ९ ॥ ४ ॥

अग्निवेशसुतंशत्रिमसंख्यातधनप्रदं ॥ आशास्तऋषिरंत्यर्चाप्रजापतिसुतःसुधीः ॥ १ ॥
अर्योहंसहस्रसां अपरिमितधनप्रदं आग्निवेशिं अग्निवेशसुतंशत्रिंएतन्नामकंराजर्षिं गृणीषे गृणे स्तौमि हेअग्ने अंगनादिगुणविशिष्टेन्द्र कीदृशंतं उपमां उपमानभूतंकेतुंप्रज्ञापकंप्रख्यातमित्यर्थः तस्मैआपःसंयतः सम्यग्गच्छन्त्यःपीपयंत प्यायन्तां तस्मिन्राज्ञिक्षत्रंधनं अमवद् बलसहितंत्वेषंदीप्तिमदस्त्विति ॥ ९ ॥

॥ इतिचतुर्थस्यद्वितीयेचतुर्थोवर्गः ॥ ४ ॥

यस्तेसाधिष्ठइत्यष्टर्चंतृतीयंसूक्तं अंगिरोगोत्रःप्रभूवसुर्नामऋषिः अंत्यापंक्तिः पंक्त्यंतपरिभाषयाशिष्टाअनुष्टुभः इन्द्रोदेवता यस्तेष्टौप्रभूवसुरांगिरसःपंक्त्यंतमित्यनुक्रान्तं । सूक्तविनियोगोलैंगिकः आभिप्लविकेषूक्थ्येषुतृतीयसवनेआद्यस्तृचोच्छावाकस्यवैकल्पिकोनुरूपःसूत्रितंच—यस्तेसाधिष्ठोवसेपुरांभिन्दुर्युवाकविरिति । द्वितीयतृतीययोः स्वरसाम्नोश्चाद्यौतृचावनुरूपौ यस्तेसाधिष्ठोवसइतिषळनुष्टुभइतिहिसूत्रम् ।

तत्रप्रथमा—

यस्तेसाधिष्ठोवसइन्द्रक्रतुष्टमाभर ।
अस्मभ्यंचर्षणीसहंसस्निंवाजेषुदुष्टरम् ॥ १ ॥

यः । ते । साधिष्ठः । अवसे । इन्द्र । क्रतुः । तम् । आ । भर । अस्मभ्यम् । चर्षणिऽसहम् । सस्निम् । वाजेषु । दुस्तरम् ॥ १ ॥

हेइन्द्र ते तव यः साधिष्ठोतिशयेनसाधकः क्रतुरुकलक्षणंकर्मप्रज्ञावास्ति तंक्रतुंनोवसे-स्मद्रक्षणायास्मभ्यं आभर आहर कीदृशंतं चर्षणीसहं सर्वेषांमनुष्याणामभिभवितारंसस्निं संस्नातं शुद्धं वाजेषुसंग्रामेषुदुष्टरं अन्यैरनभिभाव्यम् ॥ १ ॥

अथद्वितीया—

यदिन्द्रतेचतस्रोयच्छूरसन्तितिस्रः।
यद्वापञ्चक्षितीनामवस्तत्सुनआभर ॥ २ ॥

यत्। इन्द्र। ते। चतस्रः। यत्। शूर। सन्ति। तिस्रः। यत्। वा।
पंच। क्षितीनाम्। अवः। तत्। सु। नः। आ। भर ॥ २ ॥

हेइन्द्र ते तव यत् याऊतयः चतस्रः चतसृषुवर्णेषुसंश्रिताःसन्ति याश्चहेशूर तिस्रःत्रिषु लोकेषुवर्तमानाः यद्वा वाशब्दश्चार्थे यत्याश्चपंचक्षितीनांपंचजनसंबन्धिन्यऊतयःसन्ति अवो-रक्षणंतत्सर्वं सुसुष्ठुनोस्मभ्यमाभर आहरेति ॥ २ ॥

अथतृतीया—

आतेवोवरेण्यंवृषंतमस्यहूमहे।
वृषजूतिर्हिजज्ञिषआभूभिरिन्द्रतुर्वणिः ॥ ३ ॥

आ। ते। अवः। वरेण्यम्। वृषन्ऽतमस्य। हूमहे। वृषऽजूतिः।
हि। जज्ञिषे। आऽभूभिः। इन्द्र। तुर्वणिः ॥ ३ ॥

हेइन्द्र वृषन्तमस्यफलानांवर्षकतमस्यतेतवावोरक्षणं गमनंवा वरेण्यं वरणीयमाहूमहे आह्वयामः हेइन्द्र वृषजूतिः वर्षणगमनः तुर्वणिस्तूर्णवनिर्हिंसकोवात्वं आभूभिः सर्वतोभवद्भिः व्याप्तैर्मरुद्भिःसहावोहि जज्ञिषे उत्पादयसिखलु तेअवआह्वयामइति यद्वा वृषगमनःसन् अ-द्ययज्ञमागत्यफलंजज्ञिषे तस्मात्तेवोहूमहइति ॥ ३ ॥

अथचतुर्थी—

वृषाह्यसिराधसेजज्ञिषेवृष्णितेशवः।
स्वक्षत्रंतेधृषन्मनःसत्राहमिन्द्रपौंस्यम् ॥ ४ ॥

वृषा । हि । असि । राधसे । जज्ञिषे । वृष्णि । ते । शवः ।
स्वऽक्षत्रम् । ते । धृषत् । मनः । सत्राऽहम् । इन्द्र । पौंस्यम् ॥ ४ ॥

हेइन्द्र राधसे यजमानानांसमृद्धये वृषाह्यसि फलस्यवर्षकोसिखलु यद्वा वृषाख-ल्वसि राधसेधनार्थंजज्ञिषे उत्पद्यसे तेशवोबलंवृष्णिवर्षितृ तेमनःस्वक्षत्रंस्वायत्तबलंधृषत् धर्षकंविरोधिनां हेइन्द्र तेपौंस्यं पुंस्त्वं सत्राहं संघहन्तृ ॥ ४ ॥

अथपञ्चमी—

त्वंतमिन्द्रमर्त्यममित्रयन्तंमद्रिवः ।
सर्वरथाशतक्रतोनियाहिशवसस्पते ॥ ५ ॥ ५ ॥

त्वम् । तम् । इन्द्र । मर्त्यम् । अमित्रऽयन्तम् । अद्रिऽवः । सर्वऽरथा ।
शतक्रतो इति शतऽक्रतो । नि । याहि । शवसः । पते ॥ ५ ॥ ५ ॥

हेइन्द्र त्वं तममित्रयन्तं शत्रुत्वमाचरन्तं शत्रुंवाइच्छंतंमर्त्यं हेअद्रिवोवज्रवन्निन्द्र स-र्वरथासर्वत्रव्याप्तेनरथेन सुपांसुलुगित्याकारः हेशतक्रतो हेशवसस्पते बलस्यपालकेन्द्र नियाहि नितरांगच्छ अभिभवितुम् ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेपंचमोवर्गः ॥ ५ ॥

अथषष्ठी—

त्वामिद्वृत्रहन्तमजनासोवृक्तबर्हिषः ।
उग्रंपूर्वीषुपूर्व्यंहवन्तेवाजसातये ॥ ६ ॥

त्वाम् । इत् । वृत्रहन्ऽतम । जनासः । वृक्तऽबर्हिषः । उग्रम् ।
पूर्वीषु । पूर्व्यम् । हवन्ते । वाजऽसातये ॥ ६ ॥

हेवृत्रहन्तम अतिशयेनशत्रूणांहन्तरिन्द्र त्वामित् त्वामेवजनासोजनाः वृक्तबर्हिषः आच्छादितदर्भाः प्रवृत्तयज्ञाइत्यर्थः उग्रमुद्गूर्णबलं पूर्वीषुबह्वीषुप्रजासुमध्ये पूर्व्यं पुरातनं सन्तं वाजसातये संग्रामाय हवन्ते आह्वयन्ते ॥ ६ ॥

अथसप्तमी—

अस्माकंमिन्द्रदुष्टरंपुरोयावानमाजिषु ।
सयावानंधनेधनेवाजयन्तंमवारथम् ॥ ७ ॥

अस्माकम् । इन्द्र । दुस्तरम् । पुरःऽयावानम् । आजिषु ।
सऽयावानम् । धनेऽधने । वाजऽयन्तम् । अव । रथम् ॥ ७ ॥

हेइन्द्रास्माकंरथं रंहणस्वभावंवा पुत्रमवरक्ष कीदृशंरथं दुष्टरं दुःखेनतरणीयं आजिषुसंग्रामेषुपुरोयावानं पुरतोमिश्रयितारं सयावानं अनुचरैःसहगन्तारं धनेधने सर्वेषुधनेषु वाजयन्तं संग्रामंधनंवाइच्छन्तम् ॥ ७ ॥

अथाष्टमी—

अस्माकमिन्द्रेहिनोरथमवापुरंध्या ।
वयंशविष्ठवार्यंदिविश्रवोदधीमहिदिविस्तोमंमनामहे ॥ ८ ॥ ६ ॥

अस्माकम् । इन्द्र । आ । इहि । नः । रथम् । अव । पुरम्ऽध्या ।
वयम् । शविष्ठ । वार्यम् । दिवि । श्रवः । दधीमहि । दिवि ।
स्तोमम् । मनामहे ॥ ८ ॥ ६ ॥

हेइन्द्रास्माकं अस्मदीयएवसन् एहि आगच्छ आगत्यच पुरंध्याशोभनबुद्ध्यानोस्माकं रथमव रक्ष वयंच हेशविष्ठ अतिशयेनबलवन् त्वदनुग्रहाद्वार्यं वरणीयं श्रवोन्नं कीर्तिंवा दिवि द्योतमानेत्वयि दधीमहि स्थापयामः तथा दिवित्वयिस्तोमंस्तोत्रंमनामहे करवामहेइत्यर्थः ॥ ८ ॥

॥ इतिचतुर्थस्यद्वितीयेषष्ठोवर्गः ॥ ६ ॥

सआगमदितिषळृचंचतुर्थंसूक्तं आंगिरसःप्रभूवसुर्ऋषिः तृतीयाजगती शिष्टाअनुक्तत्वात्रिष्टुभः इन्द्रोदेवता अनुक्रांतंच—सआगमत्षट्तृतीयाजगतीति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

सआगमदिन्द्रोयोवसूनांचिकेतद्दातुंदामनोरयीणाम् ।
धन्वचरोनवंसगस्तृषाणश्चकमानःपिबतुदुग्धमंशुम् ॥ १ ॥

सः । आ । गमत् । इन्द्रः । यः । वसूनाम् । चिकेतत् । दातुम् ।
दामनः । रयीणाम् । धन्वऽचरः । न । वंसगः । तृषाणः ।
चकमानः । पिबतु । दुग्धम् । अंशुम् ॥ १ ॥

सइन्द्रोस्मद्यज्ञंप्रत्यागमदागच्छतु योदेवोवसूनांधनानां कर्मणिषष्ठी वसूनिधनानिचि-केतत् जानातिप्रदातुं सकीदृशः दामनादातादानमनावारयीणांधनानां गमनेदृष्टान्तः—धन्व-चरोन धनुषासहसंचरन्धानुष्कइव वंसगोवननीयगमनः तृषाणः अत्यंततृषितः चकमानः का-मयमानश्चसन् दुग्धं अभिषुतमंशुंसोमंपिबतु ॥ १ ॥

अथद्वितीया—

आतेहनूहरिवःशूरशिप्रेरुहत्सोमोनपर्वतस्यपृष्ठे ।
अनुत्वाराजन्नर्वतोनहिन्वन्गीर्भिर्मदेमपुरुहूतविश्वे ॥ २ ॥

आ । ते । हनू इति । हरिऽवः । शूर । शिप्रे इति । रुहत् ।
सोमः । न । पर्वतस्य । पृष्ठे । अनु । त्वा । राजन् । अर्वतः । न ।
हिन्वन् । गीःऽभिः । मदेम । पुरुऽहूत । विश्वे ॥ २ ॥

हेइन्द्र हेहरिवः हरिभ्यांतद्वन् शूर ते तव हनू हननसाधने यद्यप्ययंशिप्रावचनः त-थापि पुनःशिप्राभिधानाद्गौणोवगन्तव्यः उक्तरूपेसंहतेवाशिप्रे आरुहत् आरोहतु प्राप्नोतु सोमोस्मद्दत्तः पर्वतस्यपृष्ठेनरुहत् नारोहति तत्रनतिष्ठतीत्यर्थः यद्वा नशब्दःपुरस्तात्प्रयुक्तो-प्यत्रोपमार्थः पर्वतस्यपृष्ठे उपरिप्रदेशे सोमोनतत्रयथाविस्रंभेणप्रसरतितद्वत् हेराजन्राजमा-नेन्द्र त्वा त्वामनु त्वयासह तृतीयार्थइत्यनोःकर्मप्रवचनीयत्वं विश्वेवयमर्वतोन अश्वानिव तृ-णादिभिःगीर्भिःस्तुतिभिर्हिन्वनहिन्वन्तः त्वांप्रीणयन्तःसन्तोमदेम हृष्येम हेपुरुहूत बहुप्रकारंबहु-भिर्वाहूतेन्द्र ॥ २ ॥

अथतृतीया—

चक्रंनवृत्तंपुरुहूतवेपतेमनोभियामेअमतेरिदद्रिवः ।
रथादधित्वाजरितासदावृधकुविन्नुस्तोषन्मघवन्पुरूवसुः ॥ ३ ॥

चक्रम् । न । वृत्तम् । पुरुऽहूत । वेपते । मनः । भिया । मे ।
अमतेः । इत् । अद्रिऽवः । रथात् । अधि । त्वा । जरिता ।
सदाऽवृध । कुवित् । नु । स्तोषत् । मघऽवन् । पुरुऽवसुः ॥ ३ ॥

हेपुरुहूत बहुभिराहूत हेअद्रिवः वज्रवन्निन्द्र मेमनःअमतेरिव दारिद्र्यादस्तोतुर्वासकाशात् भिया भित्या वेपते कंपते वृत्तंचक्रंन भूमौवर्तमानंचक्रमिव यस्मादेवंतस्मात् रथादधि उपरिस्थितं त्वा त्वां हेसदावृध सर्वदावर्धमान हेमघवन् इन्द्र जरितास्तोतापुरूवसुरहमृषिः कुवित् बहु नुक्षिप्रं स्तोषत् स्तोष्यति स्तूयात् अत्र कुविच्छब्दयोगेपिआख्यातस्य बहुलग्रहणान्निघातः ॥ ३ ॥

अथचतुर्थी—

एषग्रावेवजरितातइन्द्रेयर्तिवाचंबृहदाशुषाणः ।
प्रसव्येनमघवन्यंसिरायःप्रदक्षिणिद्धरिवोमाविवेनः ॥ ४ ॥

एषः । ग्रावांऽइव । जरिता । ते । इन्द्र । इयर्ति । वाचम् ।
बृहत् । आशुषाणः । प्र । सव्येन । मघऽवन् । यंसि ।
रायः । प्र । दक्षिणित् । हरिऽवः । मा । वि । वेनः ॥ ४ ॥

एषजरितागरितास्तोताग्रावेव अभिषवाश्मेव सयथारसंजनयतितद्वत् हेइन्द्र तेतुभ्यंवाचंस्तुतिं इयर्ति प्रेरयतीत्यर्थः बृहत्महत्प्रभूतंफलंआशुषाणः आशुसंभक्तासन् हेमघवन सव्येनहस्तेन रायोधनानि प्रयंसि प्रयच्छसि हेहरिवः हर्यश्वेन्द्र दक्षिणित् दक्षिणेनापिप्रयंसीतिशेषः माविवेनः विगतकामंमाकार्षीः ॥ ४ ॥

अथपञ्चमी—

वृषात्वावृषणंवर्धतुद्यौर्वृषावृषभ्यांवहसेहरिभ्याम् ।
सनोवृषावृषरथःसुशिप्रवृषक्रतोवृषावज्रिन्भरेधाः ॥ ५ ॥

वृषा । त्वा । वृषणम् । वर्धतु । द्यौः । वृषा । वृषऽभ्याम् ।
वहसे । हरिऽभ्याम् । सः । नः । वृषा । वृषऽरथः । सुऽशिप्र ।
वृषक्रतो इति वृषऽक्रतो । वृषा । वज्रिन् । भरे । धाः ॥ ५ ॥

हेइन्द्र त्वा त्वां वृषा वर्षित्रीद्यौः द्योतयित्रीस्तुतिः द्योततेर्दीव्यतेर्वास्तुत्यर्थस्येदंरू कामानांवर्षकं त्वां वर्धतु वर्धयतु वृषात्वंवृषभ्यांसेकृभ्यांहरिभ्यांवहसे यज्ञंप्रत्युह्यसे हे शोभनहनो वृषकृतो वर्षणकर्मन् हेवज्रिन् वज्रयुक्तेन्द्र सत्वंवृषावृषरथश्चसन् नोस्मान्भं भरणवतियज्ञेवाधाः धारय ॥ ५ ॥

अथषष्ठी—

योरोहितौवाजिनौवाजिनीवान्त्रिभिःशतैःसचमानावदिष्ट।
यूनेसमस्मैक्षितयोनमन्तांश्रुतरथायमरुतोदुवोया ॥ ६ ॥ ७

यः। रोहितौ। वाजिनौ। वाजिनीऽवान्। त्रिऽभिः। शतैः।
सचमानौ। अदिष्ट। यूने। सम्। अस्मै। क्षितयः। नमन्ताम्।
श्रुतऽरथाय। मरुतः। दुवःऽया ॥ ६ ॥ ७ ॥

इयंश्रुतरथस्यराज्ञोदानस्तुतिः योराजावाजिनीवानन्नवान्श्रुतरथोरोहितौरोहितवर्णौ जिनौवेजनवन्तावश्वौत्रिभिःशतैःगवांधनानांवाउक्तसंख्याभिःसचमानौसंगच्छमानौअदिष्ट दे तेर्दिशतेर्वालुङीदंरूपं यूनेसर्वत्रमिश्रयित्रे नित्यतरुणायवा अस्मै श्रुतरथाय क्षितयः स र्वाः प्रजाः दुवोया तृतीयैकवचनस्ययाजादेशः परिचर्ययासंनमंतां प्रणताभवन्तु सेवन्ता मित्यर्थः हेमरुतइतिइन्द्रसहायभूतानांमरुतांसंबोधनम् ॥ ६ ॥

॥ इतिचतुर्थस्यद्वितीयेसप्तमोवर्गः ॥ ७ ॥

संभानुनेतिपंचर्चंपंचमंसूक्तं अत्रेरार्षंत्रैष्टुभमैन्द्रं संभानुनापंचात्रिरित्यनुक्रमणिका वि- नियोगोलैंगिकः ।

तत्रप्रथमा—

संभानुनायततेसूर्यस्याजुह्वानोघृतपृष्ठःस्वञ्चाः।
तस्माअमृध्राउषसोव्युच्छान्यइन्द्रायसुनवामेत्याह ॥ १ ॥

सम्। भानुना। यतते। सूर्यस्य। आऽजुह्वानः। घृतऽपृष्ठः।
सुऽअंचाः। तस्मै। अमृध्राः। उषसः। वि। उच्छान्। यः।
इन्द्राय। सुनवाम। इति। आह ॥ १ ॥

सूर्यस्यभानुनातेजसासह आजुह्वानः सर्वत्रहूयमानः कर्मणिकर्तृप्रत्ययः घृतपृष्ठः प्रदीप्तज्वालःघृतयुक्तपृष्ठप्रदेशोवा स्वंचाः स्वंचनोग्निः संयततेसम्यक्प्रयत्नंकरोति उदयकालेग्नयःप्रज्वाल्यन्ते तस्मात्कारणात्योयजमानः इन्द्राय सुनवामेत्याहब्रूतेअध्वर्युंप्रति तस्मैयजमानाय अमृध्राः अहिंसिताः उषसोव्युच्छान् व्युच्छन्तु उदयकालेग्निःप्रज्वालितस्तस्मात्सोमयागंकुर्मइतियोब्रूतेतस्यसुदिनानिभवंतीत्यर्थः ॥ १ ॥

अथद्वितीया—

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावासुतसोमोजराते ।
ग्रावाणोयस्येषिरंवदन्त्ययदध्वर्युर्हविषावसिन्धुम् ॥ २ ॥

समिद्धःऽअग्निः । वनवत् । स्तीर्णऽबर्हिः । युक्तऽग्रावा । सुतऽसोमः । जराते । ग्रावाणः । यस्य । इषिरम् । वदन्ति । अयत् । अध्वर्युः । हविषा । अव । सिन्धुम् ॥ २ ॥

समिद्धाग्निः प्रदीप्ताग्निः स्तीर्णबर्हिः प्रस्तृतदर्भोयंयजमानोवनवत् संभजते युक्तग्रावा नियुक्ताभिषवपाषाणः सुतसोमोभिषुतसोमोजराते जरति स्तौति यस्याध्वर्योर्ग्रावाणोभिषवसाधनाइषिरंएषणीयंगमनशीलंवाशब्दंवदन्ति सोध्वर्युर्हविषासहसिंधुं अवनेजनीरपः अवायत् अवगच्छति ॥ २ ॥

अथतृतीया—

वधूरियंपतिमिच्छन्त्येतियईंवहातेमहिषीमिषिराम् ।
आस्यश्रवस्याद्रथआचघोषात्पुरूसहस्रापरिवर्तयाते ॥ ३ ॥

वधूः । इयम् । पतिम् । इच्छन्ती । एति । यः । ईम् । वहाते । महिषीम् । इषिराम् । आ । अस्य । श्रवस्यात् । रथः । आ । च । घोषात् । पुरु । सहस्रा । परि । वर्तयाते ॥ ३ ॥

इयंवधूरिन्द्रस्यपत्नी पतिमिच्छन्ती स्वप्रियंयज्ञगमनायप्रकृतमिच्छन्त्येतिअनुगच्छति यइन्द्रः ईमेनांमहिषींवहाते वहति इषिरांगमनवतीं अस्येन्द्रस्यरथः आअर्वागस्मदभिमुखंश्रव-

स्याव् अन्नमिच्छन्ति आचघोषाव् आघुष्यतिशब्दयति पुरु अत्यधिकंसहस्रा सहस्राणिधना-
नि परिपरितोवर्तयाते वर्तयति प्रापयति श्रवस्यादाचघुष्यादितिवा ॥ ३ ॥

अथचतुर्थी—

नसराजाव्यथतेयस्मिन्निन्द्रस्तीव्रंसोमंपिबतिगोसखायम् ।
आसत्वनैरजतिहन्तिवृत्रंक्षेतिक्षितीःसुभगोनामपुष्यन् ॥ ४ ॥

न । सः । राजा । व्यथते । यस्मिन् । इन्द्रः । तीव्रम् । सोमम् ।
पिबति । गोऽसखायम् । आ । सत्वनैः । अजति । हन्ति । वृत्रम् ।
क्षेति । क्षितीः । सुऽभगः । नाम । पुष्यन् ॥ ४ ॥

सराजानव्यथते व्यथितोनभवति यस्मिन्राजनितदीयेयज्ञे इन्द्रस्तीव्रंमदजनकंसोमंपि-
बति गोसखायं विकारेप्रकृतिशब्दः क्षीरादिमिश्रणवन्तं सराजासत्वनैः सत्वभिरनुचरैः आस-
र्वतः अजति गच्छति हन्तिचवृत्रं पापं वैरिणंवा क्षेतिगच्छतिक्षितीः प्रजाः अथवाक्षितीः
निवासान् निवसते सुभगःशोभनसुखोनामनामकंधनंइन्द्रस्यस्तोत्रंवापुष्यन्पोषयन् ॥ ४ ॥

अथपंचमी—

पुष्यात्क्षेमेअभियोगेभवात्युभेवृतौसंयतीसंजयाति ।
प्रियःसूर्येप्रियोअग्नाभवातियइन्द्रायसुतसोमोददाशत् ॥ ५॥८॥

पुष्यात् । क्षेमे । अभि । योगे । भवाति । उभे इति । वृतौ ।
संयती इति सम्ऽयती । सम् । जयाति । प्रियः । सूर्ये । प्रियः ।
अग्ना । भवाति । यः । इन्द्राय । सुतऽसोमः । ददाशत् ॥ ५ ॥ ८ ॥

पुष्यात् पोषयेत् बंध्वादीन् क्षेमे प्राप्तस्यधनस्यरक्षणे योगे अलब्धस्यप्राप्तौचाभिभवा-
तिभवति अभीत्यनर्थकोधात्वर्थानुवादीवा प्रभुर्भवतीत्यर्थः तथा उभे वृतौवर्तमानेसंयतीनि-
यते अहोरात्रे संजयाति सम्यक्जयति तेसुखकरेस्यातामित्यर्थः किंच सप्रियोभवति सूर्येत-
थाग्नाअग्नौप्रियोभवति यइन्द्रायसुतसोमोददाशत्सोमंददाति ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेष्टमोवर्गः ॥ ८ ॥

उरोष्टइतिपंचर्चंषष्ठंसूक्तं अत्रेरार्षमानुष्टुभमैन्द्रं उरोरानुष्टुभमित्यनुक्रान्तं विनियोगोलैं-गिकः ।

तत्रप्रथमा—

उरोष्टंइन्द्रराधंसोविभ्वीरातिःशतक्रतो ।
अधानोविश्वचर्षणेद्युम्नासुंक्षत्रमंहय ॥ १ ॥

उरोः । ते । इन्द्र । राधंसः । विऽभ्वी । रातिः ।
शतक्रतो इतिं शतऽक्रतो । अधं । नः । विश्वऽचर्षणे । द्युम्ना ।
सुऽक्षत्र । मंहय ॥ १ ॥

हेइन्द्र शतक्रतो बहुकर्मन् तेतव उरोः प्रभूतस्यराधसोधनस्य रातिर्दानं विभ्वीमहती अध अतःकारणात् नोस्मभ्यं हेविश्वचर्षणे सर्वस्यद्रष्टः सुक्षत्र शोभनधनेन्द्र क्षत्रमितिधन-नाम द्युम्ना द्युम्नानिधनानिमंहय प्रयच्छ ॥ १ ॥

अथद्वितीया—

यदींमिन्द्रश्रवाय्यमिषंशविष्ठदधिषे ।
पप्रथेदींर्घश्रुत्तमंहिरंण्यवर्णदुष्टरंम् ॥ २ ॥

यत् । ईम् । इन्द्र । श्रवाय्यंम् । इषंम् । शविष्ठ । दधिषे । पप्रथे ।
दीर्घश्रुत्ऽतंमम् । हिरंण्यऽवर्ण । दुस्तरंम् ॥ २ ॥

हेइन्द्र शविष्ठ अतिशयेनबलवन यत् इषमन्नंश्रवाय्यंश्रवणीयं ईं सर्वतोदधिषे धारय-सि ददासिवा इषशब्दोनपुंसकलिंगोप्यस्ति हेहिरण्यवर्णेन्द्र तदन्नं पप्रथेप्रथते कथंदीर्घश्रुत्तमं अतिदूरश्रवणीयतमं सर्वत्रकीर्त्यमित्यर्थः दुष्टरं अनभिभाव्यं उक्तलक्षणंप्रथते ॥ २ ॥

अथतृतीया—

शुष्मांसोयेतेअद्रिवोमेहनांकेतसापंः ।
उभादेवावभिष्टयेदिवश्चग्मश्चंराजथः ॥ ३ ॥

शुष्मा॑सः । ये । ते॒ । अ॒द्रि॒ऽव॒ः । मे॒हना॑ । के॒त॒ऽसाप॑ः । उ॒भा । दे॒वौ ।
अ॒भिष्ट॑ये । दि॒वः । च॒ । ग्मः । च॒ । रा॒ज॒थ॒ः ॥ ३ ॥

हेअद्रिवोवज्रवन्निन्द्र तेत्वदीयाः येशुष्मासोबलभूतामरुतःसन्ति कीदृशास्ते मेहना मंहनीयाः केतसापः प्रज्ञापकंकर्मान्तरिक्षंवास्पृशन्त उभौदेवौ त्वंच मरुत्समूहश्चेत्युभौ युवांदिवश्च द्युलोकात् ग्मश्च भूमेःसकाशात् अभिष्टये अभितोगमनाय राजथः ईशाथे ॥ ३॥

अथचतुर्थी–

उ॒तोनो॑अ॒स्यक॑स्य॑चि॒द्दक्ष॑स्य॒तव॑वृत्रहन् ।
अ॒स्मभ्यं॒नृ॒म्णमाभ॑रा॒स्मभ्यं॒नृमणस्यसे ॥ ४ ॥

उ॒तो इति॑ । न॒ः । अ॒स्य । कस्य॑ । चि॒त् । दक्ष॑स्य । तव॑ । वृ॒त्र॒ऽह॒न् ।
अ॒स्मभ्य॑म् । नृ॒म्णम् । आ । भ॒र॒ । अ॒स्मभ्य॑म् । नृ॒ऽम॒न॒स्य॒से ॥ ४ ॥

उतो अपिच हेवृत्रहन्निन्द्र नोस्मभ्यं कस्यचिदनिर्देश्यस्यदक्षस्यप्रवृद्धस्यादातुर्वास्यतवस्वभूतेभ्योस्मभ्यं पुनःश्रुतिरादरार्था नृम्णं नृमणं धनमाभरआहर हेइन्द्र यतस्त्वमस्मभ्यंनृमणस्यसे धनमिच्छसि ॥ ४ ॥

अथपंचमी–

नू॒तेआ॒भिर॒भिष्टि॑भि॒स्तव॒शर्म॑ञ्छतक्रतो ।
इन्द्र॒स्याम॑सु॒गो॒पाः॒शूर॒स्याम॑सु॒गो॒पाः ॥ ५ ॥ ९ ॥

नु । ते॒ । आ॒भिः । अ॒भिष्टि॑ऽभिः । तव॑ । शर्म॑न् ।
श॒त॒क्र॒तो॒ इति॑ शत॒ऽक्र॒तो॒ । इन्द्र॑ । स्याम॑ । सु॒ऽगो॒पाः । शूर॑ ।
स्याम॑ । सु॒ऽगो॒पाः ॥ ५ ॥ ९ ॥

हेशतक्रतो इन्द्र ते तवाभिरभिष्टिभिः अभिगमनैर्नु शीघ्रं समृद्धाभवेमेतिशेषः हेइन्द्र तवशर्मन् शर्मणि सुखेसति सुगोपाः स्याम भवेम हेशूर तवशर्मणिसुगोपाः शोभनरक्षणाःस्याम भवेम पुनरुक्तिरादरार्था ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेनवमोवर्गः ॥ ९ ॥

यदिन्द्रचित्रेतिपंचर्चंसप्तमंसूक्तं अत्रेरार्षं ऐन्द्रं अंत्यापंक्तिः शिष्टापंक्त्यन्तपरिभाषयानुष्टुभः यदिन्द्रपंक्त्यन्तमित्यनुक्रमणिका आभिप्लविकेषूक्थ्येषुतृतीयसवनेआद्यस्तृचोच्छावाकस्यवैकल्पिकस्तोत्रियः सूत्रितंच—यदिन्द्रचित्रमेहनायस्तेसाधिष्ठोवसइति ।

तत्रप्रथमा—

यदि॑न्द्र चित्र मे॒हनास्ति॒त्वादा॑तमद्रिवः ।
राध॒स्तन्नो॑विदद्वसउभया॒ह॒स्त्याभ॑र ॥ १ ॥

यत् । इ॒न्द्र॒ । चि॒त्र॒ । मे॒हना॑ । अस्ति॑ । त्वाऽदा॑तम् । अ॒द्रि॒ऽव॒ः ।
राधः॑ । तत् । न॒ः । वि॒द॒द्व॒सो॒ इति॑ विदत्ऽवसो । उ॒भ॒या॒ह॒स्ति॒ ।
आ । भ॒र॒ ॥ १ ॥

हेइन्द्र हेचित्र चायनीय हेअद्रिवोवज्रवन् यत् मेहनामेहनीयं त्वादातं त्वयादातव्यं राधोधनमस्ति तद्धनं हेविदद्वसो लब्धधनेन्द्र नोस्मभ्यं उभयाहस्ति उभाभ्यांहस्ताभ्यां आभर आहर अत्र यदिन्द्रचित्रचायनीयंमंहनीयंधनमस्तीत्यादिनिरुक्तंद्रष्टव्यम् ॥ १ ॥

अथद्वितीया—

यन्मन्य॑से॒वरे॑ण्य॒मिन्द्र॑द्यु॒क्षंतदाभ॑र ।
वि॒द्याम॒तस्य॑ते॒व॒यमकू॑पारस्य॒दा॒वने॑ ॥ २ ॥

यत् । मन्य॑से । वरे॑ण्यम् । इन्द्र॑ । द्यु॒क्षम् । तत् । आ । भ॒र॒ ।
वि॒द्याम॑ । तस्य॑ । ते॒ । व॒यम् । अकू॑पारस्य । दा॒वने॑ ॥ २ ॥

हेइन्द्र यत् द्युक्षमन्नं वरेण्यं वरणीयं मन्यसे तत् द्युक्षं आभरास्मभ्यं ते तवसंबन्धिनोवयं तस्य तादृशस्योक्तलक्षणस्याकूपारस्य अकुत्सितः पारोन्तोयस्यतादृशस्यान्नस्य दावने दाने विद्याम स्याम ॥ २ ॥

वाजपेयेअतिरिक्तोक्थ्येयत्तेदित्स्वेषा सूत्रितंच—यत्तेदित्सुप्रराध्यंत्वामिच्छवसस्पतइति ।

---

१ नि० ४. ४. ।

सैषातृतीया—

यत्तेदित्सुप्रराध्यंमनोअस्तिश्रुतंबृहत् ।
तेनदृळ्हाचिदद्रिवआवाजंदर्षिसातये ॥ ३ ॥

यत् । ते । दित्सु । प्रऽराध्यम् । मनः । अस्ति । श्रुतम् । बृहत् ।
तेन । दृळ्हा । चित् । अद्रिऽवः । आ । वाजम् । दर्षि । सातये ॥ ३।

हेइन्द्र ते तव यद्दित्सुदानेषु प्रराध्यं प्रकर्षेणस्तुत्यं श्रुतं विश्रुतं बृहत् महत् मनःअस्ति तेनममसा हेअद्रिवोवज्रवन्निन्द्र दृळ्हाचित् दृढमपि वाजमन्नं आदर्षि आदरयसि सातयेस्मत्संभजनायलाभायवा ॥ ३ ॥

अथचतुर्थी—

मंहिष्ठंवोमघोनांराजानंचर्षणीनाम् ।
इन्द्रमुपप्रशस्तयेपूर्वीभिर्जुजुषेगिरः ॥ ४ ॥

मंहिष्ठम् । वः । मघोनाम् । राजानम् । चर्षणीनाम् ।
इन्द्रम् । उप । प्रऽशस्तये । पूर्वीभिः । जुजुषे । गिरः ॥ ४ ॥

मघोनां हविर्लक्षणधनवतां वोयुष्माकं मंहिष्ठं अतिशयेनपूज्यं चर्षणीनांमनुष्याणांराजानं इन्द्रं उपउपेत्य प्रशस्तये प्रशंसितुं पूर्वीभिः पुरातनीभिः वाग्भिःगिरःस्तोतारोजुजुषे सेवन्ते ॥ ४ ॥

अथपंचमी—

अस्माइत्काव्यंवचउक्थमिन्द्रायशंस्यम् ।
तस्माउब्रह्मवाहसेगिरोवर्धन्त्यत्रयोगिरःशुंभन्त्यत्रयः ॥५॥१०॥

अस्मै । इत् । काव्यम् । वचः । उक्थम् । इन्द्राय । शंस्यम् ।
तस्मै । ऊँ इति । ब्रह्मऽवाहसे । गिरः । वर्धन्ति । अत्रयः ।
गिरः । शुंभन्ति । अत्रयः ॥ ५ ॥ १० ॥

अस्माइव अस्माएवेन्द्राय काव्यं कवेःस्तोतुःसंबन्धि यद्वा कुशब्दे शब्दनीयंवचोवा-ग्रूपं उक्थं शस्त्रं शंस्यं शंसनीयं यस्मादेवंतस्मात् तस्माउ तस्मैइन्द्रायैव ब्रह्मवाहसे परिवृ-ढस्यस्तोत्रस्यवाहकाय गिरःस्तुतीरत्रयोत्रिगोत्रावर्धन्तिवर्धयन्ति अत्रयोगिरःशुंभन्ति दीपय-न्ति पुनरुक्तिरादरार्था ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेदशमोवर्गः ॥ १० ॥

आयाह्यद्रिरितिनवर्चमष्टमंसूक्तं अत्रेयमनुक्रमणिका—आयाहिनवत्र्युष्णिगाद्यंत्यानु-ष्टुम्मध्येचसासौरीतदादीतिहासस्तुतिकर्मत्वादत्रिरेवदेवइति । कृत्स्नस्यऋषिश्चान्यस्मादितिप-रिभाषयात्रिर्ऋषिः आद्यास्तिस्रउष्णिहः पंचमीनवम्यावनुष्टुभौ शिष्टाश्चतस्रस्त्रिष्टुभः अ-त्रेःस्तूयमानत्वात्षष्ठ्याद्याअत्रिदेवताका अत्र्यार्षेयाश्चपंचमीसूर्यदेवत्या शिष्टाऐन्द्र्यः । दशरा-त्रेतृतीयेहनिप्रउगशस्त्रेआद्यस्तृचः ऐन्द्रःपंचमः सूत्रितंच—आयाह्यद्रिभिःसुतंसजूर्विश्वेभिर्देवे-भिरिति । महाव्रतेप्ययौष्णिहतृचाशीतावयंतृचः ।

तत्रप्रथमा—

आयाह्यद्रिभिःसुतंसोमंसोमपतेपिब । वृषन्निन्द्रवृषभिर्वृत्रहन्तम ॥१॥

आ । याहि । अद्रिऽभिः । सुतम् । सोमम् । सोमऽपते ।
पिब । वृषन् । इन्द्र । वृषऽभिः । वृत्रहन्ऽतम ॥ १ ॥

हेइन्द्र आयाहि अस्मद्यज्ञमागच्छ आगत्यच हेसोमपते सोमस्यस्वामिन्निन्द्र अद्रिभि-ग्रावभिःसुतमभिषुतंसोमंपिब हेवृषन् फलस्यवर्षयितः वृत्रहन्तम अतिशयेनशत्रूणांहन्तृतम वृषभिर्वर्षकैर्मरुद्भिःसहायाहि पिबच ॥ १ ॥

अथद्वितीया—

वृषाग्रावावृषामदोवृषासोमोअयंसुतः । वृषन्निन्द्रवृषभिर्वृत्रहंतम ॥२॥

वृषा । ग्रावा । वृषा । मदः । वृषा । सोमः । अयम् । सुतः ।
वृषन् । इन्द्र । वृषऽभिः । वृत्रहन्ऽतम ॥ २ ॥

ग्रावा अभिषवसाधनःपाषाणोवृषा वर्षकः सोमरसस्य फलस्यवामदः सोमपानेनज-नितः वृषा वर्षकः अयंसुतोभिषुतः सोमोवृषा तंसोमंवृषभिःसहपिब ॥ २ ॥

अथतृतीया—

वृषात्वावृषणंहुवेवज्रिञ्चित्राभिरूतिभिः ।
वृषन्निन्द्रवृषभिर्वृत्रहंतम ॥ ३ ॥

वृषा । त्वा । वृषणम् । हुवे । वज्रिन् । चित्राभिः । ऊतिऽभिः ।
वृषन् । इन्द्र । वृषऽभिः । वृत्रहन्ऽतम ॥ ३ ॥

हेवज्रिन् वज्रवन्निंद्र वृषासोमरसस्यसेक्ताहं वृषणं त्वां हुवे आह्वयामि किमर्थं चित्राभिश्चायनीयाभिः ऊतिभीरक्षाभिः निमित्तभूताभिः शिष्टंगतम् ॥ ३ ॥

ऋजीषीवज्रीत्येषाब्राह्मणाच्छंसिनःशस्त्रयाज्या ऋजीषीवज्रीवृषभस्तुराषाडितियाज्येतिहिसूत्रितम् ।

सैषाचतुर्थी—

ऋजीषीवज्रीवृषभस्तुराषाट्शुष्मीराजावृत्रहासोमपावा ।
युक्त्वाहरिभ्यामुपयासदर्वाङ्माध्यंन्दिनेसवनेमत्सदिन्द्रः ॥ ४ ॥

ऋजीषी । वज्री । वृषभः । तुराषाट् । शुष्मी । राजा । वृत्रऽहा ।
सोमऽपावा । युक्त्वा । हरिऽभ्याम् । उप । यासत् । अर्वाङ् ।
माध्यंन्दिने । सवने । मत्सत् । इन्द्रः ॥ ४ ॥

ऋजीषी सवनद्वयेभिषुतस्यगतसारस्यसोमरसस्यतृतीयसवने आप्यायाभिषुतोयोस्तिसऋजीषः सोमः सोस्यास्तीतिऋजीषी वज्री वज्रवान् वृषभोवर्षिता तुराषाट् तुराणांत्वरमाणानांशत्रूणांसोढा शुष्मी बलवान् राजा ईश्वरःसर्वस्य वृत्रहा वृत्रस्यहन्ता सोमपावा सोमरसस्य पाता एवंमहानुभावइन्द्रोहरिभ्यांयुक्त्वारथंयोजयित्वोपयासत् उपगच्छतु अर्वागस्मदभिमुखंआगच्छतु माध्यंदिनेसवनेमत्सत् माद्यतुसोमेनेन्द्रः ॥ ४ ॥

अथपंचमी—

यत्त्वासूर्यस्वर्भानुस्तमसाविध्यदासुरः ।
अक्षेत्रविद्यथामुग्धोभुवनान्यदीधयुः ॥ ५ ॥ ११ ॥

यत्। त्वा। सूर्य। स्वःऽभानुः। तमसा। अविध्यत्। आसुरः।
अक्षेत्रऽवित्। यथा। मुग्धः। भुवनानि। अदीधयुः॥ ५॥ ११॥

इदमादिचतुर्भिर्मंत्रैरत्रीणांकर्मकीर्त्यते हेसूर्य प्रेरक देव त्वा त्वां यद्यदा आसुरः असुरस्यप्राणापहर्तुरसुर्यावापुत्रः स्वर्भानुः स्वर्भानुसंज्ञकस्तमसामायानिर्मितेनाविध्यत् आवृणोदित्यर्थः तदा भुवनानिसर्वाणि अदीधयुः दृश्यन्ते तथा तत्रत्यःसर्वोजनः अक्षेत्रवित् स्वस्वस्थानमजानन् मुग्धोमूढोभवति तथा॥ ५॥

॥ इतिचतुर्थस्यद्वितीयेएकादशोवर्गः॥११॥

अथषष्ठी—

स्वर्भानोरधयदिन्द्रमायाअवोदिवोवर्तमानाअवाहन्।
गूळ्हंसूर्यंतमसापव्रतेनतुरीयेणब्रह्मणाविन्ददत्रिः॥ ६॥

स्वःऽभानोः। अध। यत्। इन्द्र। मायाः। अवः। दिवः।
वर्तमानाः। अवऽअहन्। गूळ्हम्। सूर्यम्। तमसा। अपऽव्रतेन।
तुरीयेण। ब्रह्मणा। अविन्दत्। अत्रिः॥ ६॥

अध अथ जगन्मौढ्यानन्तरं स्वर्भानोरसुरस्य यत् यामायाःसन्ति कीदृश्यस्ताः दिवोद्योतमानादादित्यात् अवः अवस्तात्वर्तमानाः तदुपरिनिरोधानासामर्थ्यादितिभावः हेइन्द्र ताः सर्वाः अवाहन् अवहंसि अथात्रेर्वपरोक्षवादः तमसान्धकारेण अपव्रतेन अपगतकर्मणा गूळ्हं सूर्यं अन्धकारस्यावरणरूपत्वादपव्रतत्वं तथाविधं तुरीयेणब्रह्मणामंत्रेण ग्राव्णोब्रह्मेत्यनेनात्रिर विन्दत् लब्धवान् आवरणापगमोपायंनिवारणंगूढ्वंवासूर्यमितिपूर्वमत्रापेक्षयास्यतुरीयत्वं एकैकंमायांशमेकैकेनमंत्रेणापनोद्य चतुर्थेनमंत्रेण निलीनंनमोप्यनुददित्यर्थः॥ ६॥

अथसप्तमी—

मामामिमंतवसन्तमत्रइरस्याद्रुग्धोभियसानिगारीत्।
त्वंमित्रोअसिसत्यराधास्तौमेहावतंवरुणश्चराजा॥ ७॥

मा। माम्। इमम्। तव। सन्तम्। अत्रे। इरस्या। द्रुग्धः।
भियसा। नि। गारीत्। त्वम्। मित्रः। असि। सत्यऽराधाः।
तौ। मा। इह। अवतम्। वरुणः। च। राजा॥ ७॥

इदंसूर्यवाक्यं हेअत्रे मामिमं ईदृगवस्थं मां तवसन्तं तवस्वभूतमिरस्यान्नेच्छया द्रुग्धाद्रोग्धा असुरोभियसा भयजनकेनतमसा अन्धकारेण मानिगारीत् मागिरतु किंच हेमित्र त्वंमित्रोसि प्रमीतेःसकाशात्त्राताभवसि सत्यराधाः सत्यधनश्च तौ राजावरुणश्च त्वंच तौ युवां मामामिहावतं रक्षतं यद्वा अत्रिरेवमित्रउच्यते वरुणश्चयुवाम्॥ ७॥

अथाष्टमी—

ग्राव्णोब्रह्मायुयुजानःसपर्यन्कीरिणादेवान्नमसोपशिक्षन्।
अत्रिःसूर्यस्यदिविचक्षुराधात्स्वर्भानोरपमायाअघुक्षत्॥ ८॥

ग्राव्णः। ब्रह्मा। युयुजानः। सपर्यन्। कीरिणा। देवान्। नमसा।
उपऽशिक्षन्। अत्रिः। सूर्यस्य। दिवि। चक्षुः। आ। अधात्।
स्वःऽभानोः। अप। मायाः। अघुक्षत्॥ ८॥

ब्रह्मा ब्राह्मणोत्रिः ग्राव्णः अभिषवसाधनाययुयुजानः युंजन् इन्द्रार्थंसोममभिषुण्वन्नित्यर्थः तथा कीरिणा कीर्यतेविक्षिप्यतेइतिकीरि स्तोत्रं तेनदेवान्सपर्यन् पूजयन् किंच नमसान्नेनहविर्लक्षणेननमस्कारेणवा उपशिक्षन् शिक्षतिर्दानार्थोत्रप्रसाधनेवर्तते प्रसाधयन् एवमुक्तैःसाधनैःसूर्यस्यसर्वप्रेरकस्यचक्षुःसर्वस्यव्यापकंमंडलं दिवि अन्तरिक्षे आधात् निस्तमस्कंकृतवानित्यर्थः तदेवस्पष्टयति—स्वर्भानोरेतन्नामकस्यासुरस्यमायाः स्वाश्रयमया मोहयन्ती परान् तथाकुर्वन्ती मायेत्युच्यते तादृशीर्मायाः तुरीयेण ब्रह्मणेत्युक्तं तदेतदुक्तं यत्तुरीयंब्रह्मतेनात्रिःसहायः इन्द्रोपाघुक्षत् अपजुगोप न्यवारयदित्यर्थः अथवातृतीयपादएवंव्याख्येयः सूर्यस्यदिविपूर्वमावृतेप्रकाशेतदपनोद्यस्वकीयंचक्षुराधात् निवारणंतेजः संस्थापयंदृष्टवानित्यर्थः स्वर्भानुमाययासूर्यस्यावृत्तिःहारिद्रविकेसमाम्नाता— स्वर्भानुश्चासुरःसूर्यंतमसाविध्यत्तस्मैदेवाःप्रायश्चित्तिमैच्छन्तस्ययत्प्रथमंतमोपाघ्नन्साकृष्णाविरभवद्यद्द्वितीयंसाफाल्गुनीयत्तृतीयंसावलक्षीयदध्यस्थादपाकृंतन्नित्यादि॥ ८॥

अथनवमी–

यंवैसूर्यंस्वर्भानुस्तमसाविध्यदासुरः ।
अत्रयस्तमन्वविन्दन्नह्यन्येअशक्नुवन् ॥ ९ ॥ १२ ॥

यम् । वै । सूर्यम् । स्वःऽभानुः । तमसा । अविध्यत् । आसुरः ।
अत्रयः । तम् । अनु । अविन्दन् । नहि । अन्ये । अशक्नुवन् ॥ ९ ॥ १२

अत्रिकृतंसामर्थ्यमनुवदति यंवैसूर्यमिति निगतव्याख्यैषा अत्रयस्तंसूर्यंअन्वविन्दन् इन्द्रार्थंसोमयागदेवतास्तुतिनमस्कारैः अनुक्रमेणईषत्तमोविरुध्यलब्धवन्तइत्यर्थःअन्येनह्यशक्नुवन नलब्धवन्तःखलु ॥ ९ ॥

॥ इतिचतुर्थस्यद्वितीयेद्वादशोवर्गः ॥ १२ ॥

कोनुवामितिविंशत्यृचंनवमंसूक्तं भौमस्यात्रेरार्षं षोडशीसप्तदश्यावतिजगत्यौ विंश्यैकपदाविराट् शिष्टाःसप्तदशत्रिष्टुभः विश्वेदेवादेवताः तथाचानुक्रान्तं–कोनुविंशतिर्वैश्वदेवंवैतत्षोडश्याद्यतिजगत्यावन्त्यैकपादेति । विनियोगोलैंगिकः ।

तत्रप्रथमा–

कोनुवांमित्रावरुणावृतायन्दिवोवांमहःपार्थिवस्यवादे ।
ऋतस्यंवासदसित्रासीथांनोयज्ञायतेवापशुषोनवाजान् ॥ १ ॥

कः । नु । वाम् । मित्रावरुणौ । ऋतऽयन् । दिवः । वा । महः ।
पार्थिवस्य । वादे । ऋतस्य । वा । सदसि । त्रासीथाम् । नः ।
यज्ञाऽयते । वा । पशुऽसः । न । वाजान् ॥ १ ॥

हेमित्रावरुणौ देवौ वांयुवां कोनु कःखलुयजमानः ऋतायन् यज्ञमिच्छन् शक्नुयादितिशेषः तस्मादृतंमयैवदिवःसदसिद्युलोकसंबन्धिनिस्थाने महोमहतःपार्थिवस्यसदसि ऋतस्योत्पादकस्यांतरिक्षस्यसदसि तद्धनुवाताच्छन्द्यं त्रिपुस्थानेषुनोस्मान्त्रासीथां रक्षतं वाशब्दश्चार्थे किंच यज्ञायते यज्ञमिच्छते हविर्दात्रेच मह्यं पशुषोनवाजान् पशुषुसीदतोवाजानन्नानिक्षीरदध्यादीनीवतानियथाप्रयच्छथः तद्वद्दत्तमिति यद्वा नशब्दश्चार्थे पशुषःपशून्वाजांश्चदत्तमित्यर्थः ॥ १ ॥

अथद्वितीया—

तेनोमित्रोवरुणोअर्यमायुरिन्द्रऋभुक्षामरुतोजुषन्त ।
नमोभिर्वायेदधतेसुवृक्तिंस्तोमंरुद्रायमीळ्हुषेसजोषाः ॥ २ ॥

ते । नः । मित्रः । वरुणः । अर्यमा । आयुः । इन्द्रः । ऋभुक्षाः । मरुतः । जुषन्त । नमःऽभिः । वा । ये । दधते । सुऽवृक्तिम् । स्तोमम् । रुद्राय । मीळ्हुषे । सऽजोषाः ॥ २॥

तेमित्रादयोदेवाः नोस्माकं सुवृक्तिं स्तोमं शोभनपापादिवर्जनवत्स्तोत्रं नमोभिर्वा हविर्भिश्च जुषंत सेवन्तां येदधतेधारयन्ति उक्तलक्षणंस्तोत्रं देवाःद्विविधाः स्तोत्रभाजोहविर्भाजश्च अत्रस्तोत्रभाजउच्यन्ते आयुः सततगतिर्वायुरुच्यते अथमरुतएववियुज्यविशेष्यन्ते रुद्रायमीळ्हुषे तृतीयार्थेचतुर्थी रुद्रेणसहसजोषाःसजोषसःसहप्रीयमाणाः तेषांपुत्रत्वादितिभावः केचन रुद्रायसजोषाइत्येतन्मित्रादिसर्वदेवताविशेषणमितिकथयन्ति ॥ २ ॥

अथतृतीया—

आवांयेष्ठाश्विनाहुवध्यैवातस्यपत्मन्रथ्यस्यपुष्टौ ।
उतवादिवोअसुरायमन्मप्रान्धांसीवयज्यवेभरध्वम् ॥ ३ ॥

आ । वाम् । येष्ठा । अश्विना । हुवध्यै । वातस्य । पत्मन् । रथ्यस्य । पुष्टौ । उत । वा । दिवः । असुराय । मन्म । प्र । अन्धांसिऽइव । यज्यवे । भरध्वम् ॥ ३ ॥

अनयाश्विनौ रुद्रश्चोच्यन्ते हेअश्विना अश्विनौ येष्ठा कामानांयंतृतमौ वां युवां वातस्यपत्मन् धर्मसाम्याद्धर्मिग्रहणं वायुसमानगतेरश्वस्यगमनेप्राप्तौ रथ्यस्य रथस्यपुष्टौच निमित्तेसति हुवध्यै हुवे आह्वयामि आह्वातुंप्रभवामि वा अथवा वायुवद्युवयोःशीघ्रगमनसाधनरथस्यपोषेचनिमित्तेसति उतवा किंचेत्यर्थः दिवोद्योतमानाय चतुर्थ्यर्थेषष्ठी असुरायप्राणापहर्त्रेरुद्राय यद्वा द्युलोकसंबन्धिने असुरायप्राणदात्रे सूर्यायवायवेवा यज्यवे यागसाधकाय मन्ममननीयंस्तोत्रंप्रभरध्वं संपादयत हेऋत्विजः अन्धांसीव अन्नानिहविर्लक्षणानिहवींषिस्तोत्रंचेत्यर्थः ॥ ३ ॥

अथचतुर्थी—

प्रसक्षणोदिव्यःकण्वंहोतात्रितोदिवःसजोषावातोअग्निः ।
पूषाभगःप्रभृथेविश्वभोजाआजिनजग्मुराश्वंश्वतमाः ॥ ४ ॥

प्र । सक्षणः । दिव्यः । कण्वऽहोता । त्रितः । दिवः । सऽजोषाः । वातः । अग्निः । पूषा । भगः । प्रऽभृथे । विश्वऽभोजाः । आजिम् । न । जग्मुः । आश्वंश्वऽतमाः ॥ ४ ॥

अत्रलिंगोक्तादेवताःप्रजग्मुरितिसंबन्धः सक्षणोयज्ञंसेवमानः शत्रूणांसोढावादिव्योदिविभवः कण्वहोता कण्वाऋषयोमेधाविनोवाहोतारआह्वातारोयस्यसतथोक्तः त्रितः त्रिषुक्षित्यादिस्थानेषु तायमानोदिवःसूर्येणसहसजोषाःसमानगतिः समानप्रीतिर्वा वातः उक्तलक्षणकोवायुरग्निः पूषापोषकएतन्नामाभगश्चप्रभृथे प्रभरणवत्यस्मिन्यज्ञेउक्ताःसर्वेदेवाः विश्वभोजाविश्वरक्षकाः कृत्स्नात्तारोवा आश्वश्वतमाः प्रकृष्टगमनाश्ववतांश्रेष्ठाःसन्तः आजिंन संग्राममिव प्रजग्मुः प्रगच्छन्ति ॥ ४ ॥

अथपञ्चमी—

प्रवोरयिंयुक्ताश्वंभरध्वंरायएषेवसेदधीतधीः ।
सुशेवएवैरौशिजस्यहोतायेवएवामरुतस्तुराणाम् ॥ ५ ॥ १३ ॥

प्र । वः । रयिम् । युक्तऽअश्वम् । भरध्वम् । रायः । एषे । अवसे । दधीत । धीः । सुऽशेवः । एवैः । औशिजस्य । होता । ये । वः । एवाः । मरुतः । तुराणाम् ॥ ५ ॥ १३ ॥

हेमरुतोवोयूयं रयिं धनं युक्ताश्वं अश्वसहितं अश्वयोग्यंपुत्रंवाप्रभरध्वं संपादयत रायोधनानि गवाश्वादिलक्षणानि एषे प्राप्तुं अवसे अवइत्यन्ननाम अन्नाय प्राप्तानां धनानांरक्षणायवाधीः स्तोतादधीत धारयतिस्तुतिम् सचौशिजस्यकक्षीवतोहोतात्रिः एवैर्गन्तव्यैःकामैः गमनसाधनैरश्वैर्वा सुशेवः शेवमितिसुखनाम सुसुखोभवतु हेमरुतस्तुराणांत्वरमाणानांवोयुष्माकंयेएवाः कामाः अश्वावासंतितैरिति ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेत्रयोदशोवर्गः ॥ १३ ॥

प्रवोवायुमितिषष्ठीवायव्येपशौहविषोयाज्या प्रवोवायुंरथयुजंकृणुध्वमुतत्वामदितेमहीति सूत्रितंतत्पाठस्तु ।

अथषष्ठी—

प्रवोवायुंरथयुजंकृणुध्वंप्रदेवंविप्रंपनितारमर्कैः ।
इषुध्यवऋतसापःपुरंधीर्वस्वीर्नोअत्रपत्नीराधियेधुः ॥ ६ ॥

प्र । वः । वायुम् । रथऽयुजम् । कृणुध्वम् । प्र । देवम् । विप्रम् ।
पनितारम् । अर्कैः । इषुध्यवः । ऋतऽसापः । पुरम्ऽधीः । वस्वीः ।
नः । अत्र । पत्नीः । आ । धिये । धुरितिधुः ॥ ६ ॥

हेमदीयाऋत्विजोवोयूयंवायुंवायुदेवंरथयुजं यज्ञगमनाय रथसंबद्धंकृणुध्वं कुरुध्वं प्रदेवं द्योतमानं विप्रं विशेषेणकामानांपूरकं विप्रवत्पूज्यंवा पनितारं कर्मणिकर्तृप्रत्ययः स्तुत्यमित्यर्थः फलप्रदातारंवा अर्कैरर्चनीयसाधनैर्मंत्रैःप्रकृणुध्वं स्तुत किंच इषुध्यवः गंत्र्यः ऋतसापः यज्ञस्पृशः पुरंधीःपुरंध्यः स्त्रीरूपाः रूपवत्योवावस्वीः प्रशंस्यापत्नीर्देवपत्न्योत्रास्मिन्यज्ञेनोस्मदीयायधियेकर्मणेतन्निष्पत्तयेआधुः आगतवत्यः ॥ ६ ॥

अथसप्तमी—

उपवएषेवन्द्येभिःशूषैःप्रयह्वीदिवश्चितयद्भिरर्कैः ।
उषासानक्ताविदुषीवविश्वमाहावहतोमर्त्याययज्ञम् ॥ ७ ॥

उप । वः । एषे । वंद्येभिः । शूषैः । प्र । यह्वी इति । दिवः ।
चितयत्ऽभिः । अर्कैः । उषसानक्ता । विदुषीइवेतिविदुषीऽइव ।
विश्वम् । आ । ह । वहतः । मर्त्याय । यज्ञम् ॥ ७ ॥

हेउषासानक्ता अहोरात्राभिमानिदेवते यह्वी महत्यौ वन्द्येभिर्वन्दनार्हैरितरैःदेवैःसहदिवोन्तरिक्षादविशेषेणसर्वप्रदेशात्वोयुष्मभ्यंउपप्रैषे उपप्रापयामिहविः ईषिःप्रापणकर्मास्यादुपप्राभिः समन्वितः शूषैःसुखकैरश्चितयद्भिःज्ञापयद्भिरर्कैर्मंत्रैःसहोपप्रापयामि हेउक्तेदेवते भवत्यौ विश्वं सर्वंकर्तव्यजातं विदुषीइव जानंत्याविव मर्त्याययजमानाययज्ञमावहतः अभिमुखंप्रापयतः हेति पूरणः यद्वा शूषैरित्यादीनितृतीयाबहुवचनान्तानिवन्द्येभिरित्यस्यविशेषणानीतिकेचिदाहुः॥७॥

अथाष्टमी–

अभिवोंअर्चेपोष्यावंतोनॄन्वास्तोष्पतिंत्वष्टांररांणः।
धन्यांसजोषांधिषणानमोभिर्वनस्पतीँरोषंधीरायएषे ॥ ८ ॥

अभि । वः । अर्चे । पोष्याऽवंतः । नॄन् । वास्तोः । पतिम् ।
त्वष्टांरम् । ररांणः । धन्यां । सऽजोषाः । धिषणां । नमंःऽभिः ।
वनस्पतीन् । ओषंधीः । रायः । एषे ॥ ८ ॥

अहं पोष्यावतोबहुपोष्यजनयुक्तान्नॄन्कर्मनेतॄन् वोयुष्मानभ्यर्चे अभिपूजयामि स्तौमीत्यर्थः केपुनस्तेयूयं उच्यते–वास्तोष्पतिंत्वष्टारंरराणःस्तोत्रादिभिःक्रीडन् हविर्दददाहंधन्याधनकरीसजोषाः इतरदेवैःसहगच्छन्तीमीणयन्तीवा धिषणा वाङ्नामैतत् वाग्देवता एताद्वितीयार्थेप्रथमा उक्तलक्षणांवाणींवनस्पतीनोषधीश्च नमोभिःसहार्चइतिसंबन्धः किमर्थं रायएषे धनानिप्राप्तुम् ॥ ८ ॥

अथनवमी–

तुजेनस्तनेपर्वताःसन्तुस्वैतंवोयेवसंवोनवीराः।
पनितआप्त्योयंजतःसदांनोवर्धान्नःशंसंनर्योअभिष्टौ ॥ ९ ॥

तुजे । नः । तनें । पर्वताः । सन्तु । स्वऽएंतवः । ये ।
वसंवः । न । वीराः । पनितः । आप्त्यः । यजतः । सदां । नः ।
वर्धात् । नः । शंसंम् । नर्यः । अभिष्टौ ॥ ९ ॥

पर्वताः पर्ववन्तः पुराणवन्तोमेघाः तनेविस्तृतेतुजेदाने यद्वा तनेतिपुत्रनाम षष्ठ्यर्थेचतुर्थी पुत्रस्यदानइत्यर्थः अथवा नस्तुजेपुत्रेतनेतत्पुत्रेच स्वैतवः शोभनमनाःसन्तु भवन्तु कीदृशास्ते येवसवः जगतोवासयितारः वीरान वीराइव किंच पनितः स्तुतः आप्त्यः आप्तव्यः सर्वैर्यजतोयजनीयआदित्यः सदासर्वदा नः शंसं अस्माकंस्तुतिं नर्योनरेभ्योहितोदेवःअभिष्टौ अभिगतएषणे अभिगमनेवासति वर्धात् वर्धयतु ॥ ९ ॥

अथदशमी—

वृष्णोअस्तोषिभूम्यस्यगर्भंत्रितोनपातमपांसुवृक्ति ।
गृणीतेअग्निरेतरीनशूषैःशोचिष्केशोनिरिणातिवना ॥१०॥१४॥

वृष्णः । अस्तोषि । भूम्यस्य । गर्भम् । त्रितः । नपातम् ।
अपाम् । सुऽवृक्ति । गृणीते । अग्निः । एतरि । न । शूषैः ।
शोचिःऽकेशः । नि । रिणाति । वना ॥ १० ॥ १४ ॥

भूम्यस्य भूमिरंतरिक्षं तदर्हस्यतादृशस्य वृष्णोवर्षकस्यपर्जन्यस्य अथवाभूम्योभूमेरेवार्हः तदुचितवृष्टिप्रदानात् तादृशस्यमेघस्यगर्भंगर्भस्थानीयं अपांनपातं रक्षकं वैद्युतमग्निं सुवृक्ति स्तोत्रकर्मैतत् शोभनपापादिवर्जनवतास्तोत्रेण अस्तोषि स्तुतवानहं सत्रितस्तीर्णतमः त्रिषुस्थानेषुत्रित्वापन्नेषुतायमानोग्निः एतरिगन्तरिमयि शूषैः सुखकरैः रश्मिभिः नगृणीते नगरणंकुरुते नक्रुध्यतीत्यर्थः किंतु शोचिष्केशः प्रदीप्तरश्मिःसन् वना वनानि निरिणाति हिनस्ति दहतीत्यर्थः ॥ १० ॥

॥ इतिचतुर्थस्यद्वितीयेचतुर्दशोवर्गः ॥ १४ ॥

अथैकादशी—

कथामहेरुद्रियायब्रवामकद्रायेचिकितुषेभगाय ।
आपओषधीरुतनोवन्तुद्यौर्वनागिरयोवृक्षकेशाः ॥ ११ ॥

कथा । महे । रुद्रियाय । ब्रवाम । कत् । राये । चिकितुषे ।
भगाय । आपः । ओषधीः । उत । नः । अवन्तु । द्यौः । वना ।
गिरयः । वृक्षऽकेशाः ॥ ११ ॥

वयमत्रयः कथा केनप्रकारेण महे महते रुद्रियाय रुद्रपुत्राय मरुद्गणाय ब्रवाम स्तुतीः कत् किंच स्तोत्रं राये धनलाभाय चिकितुषे सर्वजानते भगायैतन्नामकायदेवायब्रवाम उतापिच आपः अब्देवताः ओषधीरोषधयोद्यौर्द्युदेवतावनावनानि गिरयोवृक्षकेशाः वृक्षाएवकेशस्थानीयायेषांते एता उक्तदेवतानोस्मानवन्तुरक्षन्तु ॥ ११ ॥

अथद्वादशी–

शृणोतुनऊर्जांपतिर्गिरःसनभस्तरीयाँइषिरःपरिज्मा ।
शृण्वन्त्वापःपुरोनशुभ्राःपरिस्रुचोबबृहाणस्याद्रेः ॥ १२ ॥

शृणोतु । नः । ऊर्जाम् । पतिः । गिरः । सः । नभः । तरीयान् ।
इषिरः । परिऽज्मा । शृण्वन्तु । आपः । पुरः । न । शुभ्राः ।
परि । स्रुचः । बबृहाणस्य । अद्रेः ॥ १२ ॥

नोस्माकंगिरः स्तुतीः शृणोतु कः उर्जांबलानांपतिर्वायुः अथवाऊर्जामन्नानांपतिःप्राणोपाधिकस्यवायोःकृत्स्नात्तृत्वंप्रसिद्धं श्रुतिश्चभवति–प्राणस्यान्नमिदंसर्वंप्रजापतिरकल्पयदिति । सः नभोनभसिचारी तरीयान् तरितव्यः इषिरोगमनशीलः परिज्मापरितोगन्ता किंच आपः शृण्वन्तु गिरः कीदृश्यस्ताः पुरोन पुराणीव शुभ्राःदीप्ताः बबृहाणस्यवर्धमानस्यअद्रेर्मेघस्य वापर्वतस्यवापरिपरितःस्रुचःसरणशीलाः ॥ १२ ॥

अथत्रयोदशी–

विदाचिन्नुमहान्तोयेवएवाब्रवामदस्मावार्यंदधानाः ।
वयश्चनसुभ्वंआवयन्तिक्षुभामर्तमनुयतंवधस्नैः ॥ १३ ॥

विद । चित् । नु । महान्तः । ये । वः । एवाः । ब्रवाम । दस्माः ।
वार्यम् । दधानाः । वयः । चन । सुऽभ्वः । आ । अव । यन्ति ।
क्षुभा । मर्तम् । अनुऽयतम् । वधऽस्नैः ॥ १३ ॥

हेमहान्तोमरुतोनु क्षिप्रं यूयं विद जानीथस्तोत्रं हेदस्माः दर्शनीयाः वोयुष्मान्येएवाः गन्तारोयुष्मान् भजमानाःवार्यंवरणीयंहविः दधानाः ददानाधारयन्तोवावयंब्रवामस्तुतिं यद्वा येवः यूयमित्यर्थः येयूयमेवाः अस्मद्यज्ञंअभिगन्तारः तेविद चिदितिपूरणः वयश्चन आगन्ता रश्चैतमरुतःसुभ्वःसुष्टुभवन्तः प्रवृद्धाः आ अस्मदभिमुखमवयन्ति गच्छन्ति किंकुर्वन्तः क्षुभा क्षोभकेणसहितंमर्तंमरणधर्माणंवैरिणं अनुयतं अभिगतं वधस्नैरायुधैःपरिहरन्तोवयन्ति ॥ १३ ॥

अथचतुर्दशी–

आदैव्यानिपार्थिवानिजन्मापश्चाच्छासुमखायवोचम् ।
वर्धन्तांद्यावोगिरश्चन्द्राग्राउदावर्धन्तामभिषाताअर्णाः ॥ १४ ॥

आ । दैव्यानि । पार्थिवानि । जन्म । अपः । च । अच्छ ।
सुऽमखाय । वोचम् । वर्धन्ताम् । द्यावः । गिरः । चन्द्रऽअग्राः ।
उदा । वर्धन्ताम् । अभिऽसाताः । अर्णाः ॥ १४ ॥

दैव्यानि देवसंबंधीनि पार्थिवानि पृथिवीसंबंधीनिच जन्म जन्मानि अपश्च अपसा-च्छाभिप्राप्तुंसुमखायशोभनयज्ञायमरुद्गणायवोचंब्रवीमिगिरः स्तुतयोवर्धंतां द्यावोद्योतमानाः स्वप्रतिपाद्यार्थप्रकाशिन्यः चन्द्राग्राः आह्लादनंहिरण्यंवा अग्रे यासां तास्तादृश्यः सत्योव-र्धन्तां अर्णाःनद्यश्चअभिषाताः मरुद्भिःसंभक्ताः उदा उदकेनवर्धन्तां समृद्धाभवन्तु ॥ १४ ॥

अथपंचदशी–

पदेपदेमेजरिमानिधायिवरूत्रीवाशक्रायापायुभिश्च ।
सिषक्तुमातामहीरसानस्मत्सूरिभिर्ऋजुहस्तऋजुवनिः ॥ १५ ॥ १५ ॥

पदेऽपदे । मे । जरिमा । नि । धायि । वरूत्री । वा । शक्रा ।
या । पायुऽभिः । च । सिसक्तु । माता । मही । रसा । नः ।
स्मत् । सूरिऽभिः । ऋजुऽहस्ता । ऋजुऽवनिः ॥ १५ ॥ १५ ॥

जरिमास्तुतिर्मेमदीयापदेपदे तदातदाभूमौनिधायि निधीयते स्थाप्यते क्रिय-तइत्यर्थः याचशक्रा शक्तासती पायुभीरक्षणैः वरूत्री अस्मदुपद्रववारयित्रीभवति वाशब्द-श्चार्थे मातासर्वस्यनिर्मात्री मही महती पूज्या रसा सारभूताभूमिः सिषक्तु सेवतां नोस्माकं स्तुतिं अथवा स्तुतानोस्मान्सिषक्तु स्मच्छब्दःप्रशस्तवचनः प्रशस्तैःसूरिभिःमेधाविभिःस्तोतृ-भिःनिमित्तैःतेषांपरिचर्ययामीतेत्यर्थः ऋजुहस्ताअस्मदनुकूलहस्ताऋजुवनिःकल्याणदानाभ-वतु ॥ १५ ॥

॥ इतिचतुर्थस्यद्वितीयेपंचदशोवर्गः ॥ १५ ॥

अथषोडशी—

कुथादांशेमनमंसासुदानूनेवयामरुतोअच्छोंक्तौप्रश्रंवसोमरुतोअच्छोंक्तौ।
मानोहिर्बुध्न्योरिषेधादस्माकंभूदुपमातिवनिः ॥ १६ ॥

कथा । दाशेम । नमंसा । सुऽदानून् । एवऽया । मरुतः । अच्छंऽउक्तौ ।
प्रऽश्रंवसः । मरुतः । अच्छंऽउक्तौ । मा । नः । अहिः । बुध्न्यः ।
रिषे । धात् । अस्माकम् । भूत् । उपमातिऽवनिः ॥ १६ ॥

वयं कथा केनप्रकारेण दाशेम परिचरेम नमसास्तोत्रेणान्नेनवासुदानून् शोभनदानान्मरुतःएवयाएवंक्रियमाणप्रकारेणअच्छोक्तौ आभिमुख्येनवचनेनिमित्तेसति तान्मरुतःकथंपरिचरेम तेषांदुराराध्यत्वादितिभावः कथं प्रश्रवसः प्रकृष्टान्नाभवन्ति अच्छोक्तौ अभिगंत्र्युक्तिः स्तुतिर्यस्यतादृशेमयि यद्वा प्रश्रवसःप्रकृष्टान्नस्यममअच्छोक्तौस्तोत्रनिमित्तेसति मरुतःकथाकेनप्रकारेणदाशेम पुनरुक्तिरादरार्था अहिर्बुध्न्योदेवोस्मान् रिषे हिंसकाय माधात् मास्थापयतु सदेवोस्माकंभूत् भवतु उपमातिवनिः शत्रूणांहन्ता ॥ १६ ॥

अथसप्तदशी—

इतिचिन्नुप्रजायैपशुमत्यैदेवासोवनतेमर्त्योवआदेवासोवनतेमर्त्योवः ।
अत्राशिवांतन्वोधासिमस्याजरांचिन्मेनिर्ऋतिर्जग्रसीत ॥ १७ ॥

इति । चित् । नु । प्रऽजायै पशुऽमत्यै । देवासः । वनते । मर्त्यः ।
वः । आ । देवासः । वनते । मर्त्यः । वः । अत्र । शिवाम् । तन्वः ।
धासिम् । अस्याः । जराम् । चित् । मे । निःऽऋतिः । जग्रसीत ॥ १७ ॥

हेदेवासोदेवाः वोयुष्मान् इतिचित इत्थमेव नु क्षिप्रं प्रजायै पशुमत्यै पशुसहितायापत्याय वनते भजते मर्त्योमनुष्योयजमानः आदेवासइतिपुनरुक्तिरादरार्था अत्रास्मिन्यज्ञे शिवांधासिं अन्नं मे मम अस्यास्तन्वोदेवैरनुगृहीतस्यपुत्रस्य करोतु निर्ऋतिर्देवता जरांचित् जरांच जग्रसीतग्रसतु ॥ १७ ॥

अथाष्टादशी–

तांवोदेवाःसुमतिमूर्जयन्तीमिषमश्यामवसवःशसागोः ।
सानःसुदानुर्मृळयन्तीदेवीप्रतिद्रवन्तीसुवितायगम्याः ॥ १८

ताम् । वः । देवाः । सुऽमतिम् । ऊर्जयन्तीम् । इषम् । अश्याम
वसवः । शसा । गोः । सा । नः । सुऽदानुः । मृळयन्ती ।
देवी । प्रति । द्रवन्ती । सुविताय । गम्याः ॥ १८ ॥

हेदेवाः हेवसवोवासयितारोवोयुष्माकं स्वभूतांतांप्रसिद्धां सुमतिंशोभनमननसा नां अन्नेनमतिवृद्धिरन्नमयंहिसौम्यमनइत्यादिषुप्रसिद्धा ऊर्जयन्तींबलकरीं इषंएषणसा नमन्नं क्षीरदध्यादिलक्षणं शसास्तुत्या गोःसकाशादश्यामप्राप्नुयाम सादेवी नोस्मान् वितायसुखाय प्रतिगम्याःप्रतिगम्यावअभिगच्छेव् साइट्देवताविशेष्यते सुदानुःशोभनदाः मृळयन्तीसुखयन्ती द्रवन्तीअस्मदभिमुखंगच्छन्ती ॥ १८ ॥

अथैकोनविंशी–

अभिनइळायूथस्यमातास्मन्नदीभिरुर्वशीवागृणातु ।
उर्वशीवाबृहद्दिवागृणानाभ्यूर्ण्वानाप्रभृथस्यायोः ॥ १९ ॥

अभिः । नः । इळा । यूथस्य । माता । स्मत् । नदीभिः ।
उर्वशी । वा । गृणातु । उर्वशी । वा । बृहत्ऽदिवा । गृणाना ।
अभिऽऊर्ण्वाना । प्रऽभृथस्य । आयोः ॥ १९ ॥

अभिगृणातु नोस्मानिळाभूमिः यूथस्यगोसंघस्य मातानिर्मात्री यद्वा इळा गोरूप धरामनोःपुत्रीत्याहुः यद्वा यूथस्यमरुद्गणस्य निर्मात्री इळामाध्यमिकीवाक् अ थवोर्वशीमाध्यमिकीवाक् नदीभिर्गङ्गादिभिःसह गृणातु स्मच्छब्दःप्रशस्तवचनइत्युक्तं प्राशस्त्यंगृणातु अथवा अन्तरिक्षस्थानादेवता नोस्माकं प्राशस्त्यंगृणातु वाअथव उर्वशीबहूनांवशयित्री आदित्याख्याद्युस्थानदेवता नःप्राशस्त्यंगृणातु कीदृशीसा उर्वशीबृ हद्दिवाप्रभूतदीप्तिः गृणानाशब्दयन्ती अस्मदीयंकर्मप्रशंसन्ती अभ्यूर्ण्वानाआच्छादयन्ती

कं आयोःआयुंमनुष्यंयजमानं केन प्रभृथस्यतेजसोवोदकस्यवादानेन प्रभृथस्यतेजसो-वोदकस्येतिनिरुक्तं । अथवा प्रभृथस्यप्रभरणवतआयोर्यज्ञमभ्यूर्ण्वानाआच्छादयन्ती ॥ १९ ॥

अथविंशी–

सिषक्तुनऊर्जव्यस्यपुष्टेः ॥ २० ॥ १६ ॥

सिसक्तु । नः । ऊर्ज्ऽव्यस्य । पुष्टेः ॥ २० ॥ १६ ॥

ऊर्जव्यस्यैतन्नामकस्यराज्ञःपुष्टेःपोषकस्य संबन्धिनोनोस्मान् सिषक्तुसेवतांसामर्थ्या-देवसंघइतिगम्यते अथवा उर्वशीमरुद्गणोवागृह्यते प्रकृतत्वादिति ॥ २० ॥

॥ इतिचतुर्थस्यद्वितीयेषोडशोवर्गः ॥ १६ ॥

प्रशंतमेत्यष्टादशर्चंदशमंसूक्तं भौमस्यात्रेरार्षंत्रैष्टुभं पूर्वसूक्तेवैतदित्युक्तत्वात् इदम-पिवैश्वदेवं तमुष्टुहीत्येकादशीरुद्रदेवत्या सप्तदश्येकपदा एतयोरुपांत्यैकपदेत्यनुक्रमिष्यमाण-त्वात् अत्रानुक्रमणिका–प्रशंतमाष्टानैकादशीरौद्रीति । विनियोगोलैंगिकः ।

तत्रप्रथमा–

प्रशंतमावरुणंदीधितीगीर्मित्रंभगमदितिंनूनमश्याः ।
पृषंद्योनिःपञ्चहोताशृणोत्वतूर्तपन्थाअसुरोमयोभुः ॥ १ ॥

प्र । शम्ऽतमा । वरुणम् । दीधिती । गीः । मित्रम् । भगम् ।
अदितिम् । नूनम् । अश्याः । पृषत्ऽयोनिः । पंचऽहोता । शृणोतु ।
अतूर्तऽपन्थाः । असुरः । मयःऽभुः ॥ १ ॥

शंतमा अत्यन्तसुखकरी गीः स्तुतिरूपावाक् वरुणंमित्रंभगंअदितिंच दीधिती दीधित्याकर्मणा हविःप्रक्षेपणात्मकेनसह नूनमवितथं प्राश्याःप्राप्नोतु किंच पृषद्योनिः पृषद्वर्णान्तरिक्षस्थः पंचहोता पंचविधस्यप्राणापानादिहोमस्यसाधकोवायुः यद्वा पंचहोतेतिवायोर्नाम वायुःपंचहोतासप्राणइतिहिश्रुतेः । सचातूर्तपन्थाः अहिंसितगतिः असुरःप्राणस्यदाता मयोभुःसुखस्यास्पदभूतः एवमुक्तलक्षणोवायुः शृणोतुस्तोत्रमिति ॥ १ ॥

---

१ नि० १०. ४१.

अथद्वितीया–

प्रतिमेस्तोममदितिर्जगृभ्यात्सूनुंनमाताहृद्यंसुशेवम् ।
ब्रह्मंप्रियंदेवहितंयदस्त्यहंमित्रेवरुणेयन्मयोभु ॥ २ ॥

प्रति । मे । स्तोमम् । अदितिः । जगृभ्यात् । सूनुम् । न । माता ।
हृद्यम् । सुऽशेवम् । ब्रह्म । प्रियम् । देवऽहितम् । यत् । अस्ति ।
अहम् । मित्रे । वरुणे । यत् । मयःऽभु ॥ २ ॥

मेमदीयं स्तोमंस्तोत्रं अदितिर्देवता प्रतिजगृभ्यात्प्रतिगृह्णातु सूनुंनमाता स्वतनुजंजननी-व सायथाप्रतिगृह्यआलिंग्यपरितुष्यति तद्वदित्यर्थः कीदृशंतं हृद्यंहृदयंगमं सुशेवं शोभन-सुखकरं एतद्द्वयंसाधारणं किंच ब्रह्म मंत्रजातं प्रियंप्रियकरं देवहितं देवैःप्राप्यंयदस्ति यद्ब्रह्म मयोभु सुखसाधनंतदहंमित्रेवरुणेचप्रापयामीतिशेषः यद्वा मित्रेवरुणेच अहोरात्राभिमानिदेवयोः यदुक्तलक्षणं ब्रह्म परिवृढं यज्ञादिरूपं कर्मास्तितदहंधारयामीति ॥ २ ॥

उदीरयेत्येषा एकादशिनेसावित्रेपशौवपायाज्या सूत्रितंच–उदीरयकवितमंकवीनांभर्गं-धियंवाजयन्तःपुरंधिमितिद्वेइति ।

सैषातृतीया–

उदीरयकवितमंकवीनामुनत्तैनमभिमध्वाघृतेन ।
सनोवसूनिप्रयताहितानिचन्द्राणिदेवःसवितासुवाति ॥ ३ ॥

उत् । ईरय । कविऽतमम् । कवीनाम् । उनत्त । एनम् । अभि ।
मध्वा । घृतेन । सः । नः । वसूनि । प्रऽयता । हितानि । चन्द्राणि ।
देवः । सविता । सुवाति ॥ ३ ॥

अनया अग्निःसविताचस्तूयते हेऋत्विजः कवीनां कवितमं अतिशयेनक्रान्तदर्शिनं अ-मुं पुरोवर्तिनंअग्निंसवितारंवा उदीरय ऊर्ध्वंप्रापयत हर्षयतेत्यर्थः एनंदेवं मध्वा मधुरेणसोमर-सेनघृतेनच अभ्युनत्त अभिषिंचत तर्पयतेत्यर्थः ससवितादेवोनोस्मभ्यं वसूनि निवासयोग्या-नि गवादिधनानि प्रयता प्रयतानिहितानि चन्द्राणिआह्लादकानि हिरण्यानि सुवाति प्रय-च्छत्वित्यर्थः ॥ ३ ॥

अथचतुर्थी—

समिन्द्रणोमनसानेषिगोभिःसंसूरिभिर्हरिवःसंस्वस्ति ।
संब्रह्मणादेवहितंयदस्तिसंदेवानांसुमत्यायज्ञियानाम् ॥ ४ ॥

सम् । इन्द्र । नः । मनसा । नेषि । गोभिः । सम् । सूरिऽभिः ।
हरिऽवः । सम् । स्वस्ति । सम् । ब्रह्मणा । देवऽहितम् । यत् ।
अस्ति । सम् । देवानाम् । सुऽमत्या । यज्ञियानाम् ॥ ४ ॥

हेइन्द्र नोस्मान् मनसा प्रकृष्टेनचेतसा गोभिःसह संनेषिनयसि अस्मभ्यंगाःदापयसीत्यर्थः एवंसर्वत्र हेहरिवः हरिभ्यांतद्वन्निन्द्र सूरिभिर्मेधाविभिःपुत्रैर्ऋत्विग्भिर्वा सन्नेषि तथा स्वस्तिभिःक्षेमैःसंनेषि ब्रह्मणा प्रभूतेनान्नेनसंनेषि यदन्नंदेवहितमस्ति तेन किंच यज्ञियानां यज्ञार्हाणांदेवानां सुमत्या अनुग्रहबुध्यासंनेषि ॥ ४ ॥

अथपंचमी—

देवोभगःसवितारायोअंशइन्द्रोवृत्रस्यसंजितोधनानाम् ।
ऋभुक्षावाजउतवापुरंधिरवन्तुनोअमृतासस्तुरासः ॥ ५ ॥ १७ ॥

देवः । भगः । सविता । रायः । अंशः । इन्द्रः । वृत्रस्य । सम्ऽजितः ।
धनानाम् । ऋभुक्षाः । वाजः । उत । वा । पुरम्ऽधिः । अवन्तु ।
नः । अमृतासः । तुरासः ॥ ५ ॥ १७ ॥

अत्रलिंगोक्तादेवताः भगोदेवःसविताच रायोधनस्यस्वामी अंशस्त्वष्टा वृत्रस्यहन्ताइन्द्रश्च एतेदेवाः धनानांसंजितःसम्यक्जेतारः ऋभुक्षाः ऋभुर्वाजश्च उतवा अपिच पुरंधिर्बहुधीः विश्वोच्यते एतेच अमृतासोअमृताअमरणधर्माणः भगादिदेवाः तुरासः अस्मद्यज्ञंप्रति त्वरमाणाःसंतोनोस्मानवन्तुरक्षन्तु ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेसप्तदशोवर्गः ॥ १७ ॥

अथषष्ठी—

मरुत्वंतोअप्रंतीतस्यजिष्णोरजूर्यतःप्रब्रवामाकृतानि ।
नतेपूर्वेमघवन्नापरासोनवीर्यं१नूतनःकश्चनाप ॥ ६ ॥

मरुत्वंतः । अप्रतिऽइतस्य । जिष्णोः । अजूर्यतः । प्र । ब्रवाम । कृतानि । न । ते । पूर्वे । मघऽवन् । न । अपरासः । न । वीर्यम् । नूतनः । कः । चन । आप ॥ ६ ॥

वयं यजमानामरुत्वतोमरुद्भिस्तद्वतइन्द्रस्य कृतानि कर्माणि प्रब्रवाम प्रख्यापयाम कीदृशस्य तस्य अप्रतीतस्य अप्रतिगतस्य युद्धे अपलायमानस्य नकेवलंतावन्मात्रं जिष्णोर्जयनशीलस्य अजूर्यतः अजीर्यमाणस्य सर्वदायूनइत्यर्थः अथप्रत्यक्षेणोच्यते हेमघवन्निन्द्र तेतव वीर्यं पराक्रमं पूर्वेपुरातनाः पुरुषाःनापुः नापरासोअपरेपिनापुः किंबहुना नूतनःकश्चनआश्चर्यभूतोयःकोपिवीर्यंनाप नप्रामोति ॥ ६ ॥

अथसप्तमी—

उपंस्तुहिप्रथमंरत्नधेयंबृहस्पतिंसनितारंधनानाम् ।
यःशंसंतेस्तुवतेशंभंविष्ठःपुरूवसुरागमज्जोहुंवानम् ॥ ७ ॥

उपं । स्तुहि । प्रथमम् । रत्नऽधेयम् । बृहस्पतिम् । सनितारम् । धनानाम् । यः । शंसंते । स्तुवते । शंम्ऽभंविष्ठः । पुरुऽवसुः । आऽगमंत् । जोहुंवानम् ॥ ७ ॥

हेअन्तरात्मन् त्वं प्रथमंमुख्यंप्रकृष्टतममित्यर्थः रत्नधेयं रमणीयधनदातारं धनानां हविर्लक्षणानां सनितारं संभक्तारं अथवा रत्नशब्देनमणिमुक्तादयोगृहीताः इह धनशब्देन गवादयः गवादिदातारं बृहस्पतिं बृहतोमंत्रस्यपतिंस्वामिनंदेवं उपस्तुहि देवःशंसते स्तोत्रैः स्तुवते सामभिर्यजमानाय शंभविष्ठः सुखस्यभावयितृतमोभवति यश्च जोहुवानं आह्वयन्तं यजमानं पुरुवसुः प्रभूतधनःसन् आगमत्आगच्छति तमुपस्तुहि ॥ ७ ॥

अथाष्टमी–

तवोतिभिःसचमानाअरिष्टाबृहस्पतेमघवानःसुवीराः ।
येअश्वदाउतवासन्तिगोदायेवस्त्रदाःसुभगास्तेषुरायः ॥ ८ ॥

तव । ऊतिऽभिः । सचमानाः । अरिष्टाः । बृहस्पते । मघऽवानः ।
सुऽवीराः । ये । अश्वऽदाः । उत । वा । सन्ति । गोऽदाः । ये ।
वस्त्रऽदाः । सुऽभगाः । तेषु । रायः ॥ ८ ॥

हेबृहस्पते तवोतिभिः रक्षाभिः सचमानाः संगच्छमानाः अरिष्टाः अहिंसिताः मघवानो-धनवन्तः सुवीराः शोभनपुत्राश्चभवन्ति येत्वदनुगृहीताःअश्वदाः बहूनामश्वानांदातारःसन्ति उतवा अथवा गोदाःसन्ति येच वस्त्रदाः सुभगाः शोभनधनाःसन्ति तेषुसर्वेषु रायोधनानि संभवंत्विति शेषः ॥ ८ ॥

अथनवमी–

विसर्माणंकृणुहिवित्तमेषांयेभुञ्जतेअपृणन्तोनउक्थैः ।
अपव्रतान्प्रसवेवावृधानान्ब्रह्मद्विषःसूर्याद्यावयस्व ॥ ९ ॥

विऽसर्माणम् । कृणुहि । वित्तम् । एषाम् । ये । भुंजते । अपृणन्तः ।
नः । उक्थैः । अपऽव्रतान् । प्रऽसवे । ववृधानान् । ब्रह्मऽद्विषः ।
सूर्यात् । यवयस्व ॥ ९ ॥

एषां वक्ष्यमाणानां वित्तं धनं विसर्माणं विसरणशीलं कृणुहिकुरु हेब्रह्मणस्पते एषा-मित्युक्तेकेषामित्याह येभुंजते अपृणन्तोअप्रयच्छन्तः केभ्यः उक्थैः स्तुतिप्रतिपादकैःशस्त्रै-र्विशिष्टेभ्योनोस्मभ्यं तानपव्रतानअपगतकर्मणः प्रसवे उत्पत्तिमति मनुष्यलोके ववृधानान् वर्धमानान् ब्रह्मद्विषोब्राह्मणद्वेष्टॄनमन्त्रद्वेष्टॄन्वासूर्यात् यवयस्व पृथक्कुरु अन्धकारेस्थापयेत्यर्थः॥९॥

अथदशमी–

यओहतेरक्षसोदेववीतावचक्रेभिस्तंमरुतोनियात ।
योवःशमींशशमानस्यनिन्दात्तुच्छ्यान्कामान्करतेसिष्विदानः॥१०॥१८॥

यः । ओहते । रक्षसः । देवऽवीतौ । अचक्रेभिः । तम् । मरुतः । नि । यात । यः । वः । शमीम् । शशमानस्य । निन्दात् । तुच्छयान् । कामान् । करते । सिस्विदानः ॥ १० ॥ १८ ॥

योयजमानोरक्षसोबलिनोराक्षसात् ओहते प्रापयति देववीतौ देवानांवीतिःप्राप्तिर्भक्षणं वायत्रसतथोक्तःतस्मिन्यज्ञे अन्यथानुष्ठानादिनाआसुरंकरोतीत्यर्थः तंयजमानमचक्रेभिःअचक्रैः रथैः हेमरुतोनियात नितरांप्रापयतअंधकारं यद्वा अचक्रेभिरितिपूर्वत्रान्वयः चक्रशब्देनांगान्युच्यन्ते पुनःपुनःअंगरहितैःकेवलैरेवप्रधानैरोहतेप्रापयति सांगंहिकर्मदेवानभ्येति यश्चवोयुष्माकं शमींकर्मस्तुतिलक्षणं शशमानस्य शंसमानस्यममसंबन्धि निन्दात्निन्देत् वैदिकंज्योतिष्टोमादिरूपंकर्म निन्दति स्वयंच तुच्छयान्नश्वरान्कामान्कृष्यादिजनितभोगान् करते कुरुते सिष्विदानः स्विद्यन्नात्मानंक्लेशयन् अथवा युष्मासु कमनीयान्भोगान्तुच्छयान्करोति ॥ १० ॥

॥ इतिचतुर्थस्यद्वितीयेष्टादशोवर्गः ॥ १८ ॥

अथैकादशी-

तमुष्टुहियःस्विषुःसुधन्वायोविश्वस्यक्षयतिभेषजस्य । यक्ष्वामहेसौमनसायरुद्रंनमोभिर्देवमसुरंदुवस्य ॥ ११ ॥

तम् । ऊं इति । स्तुहि । यः । सुऽइषुः । सुऽधन्वा । यः । विश्वस्य । क्षयति । भेषजस्य । यक्ष्व । महे । सौमनसाय । रुद्रम् । नमःऽभिः । देवम् । असुरम् । दुवस्य ॥ ११ ॥

हेआत्मन् तमु तमेवरुद्रं स्तुहि स्तुतिंकुरु यःस्विषुः शोभनबाणः सुधन्वाच विरोधिहंतृत्वात्सुष्ठुत्वं यश्च विश्वस्यभेषजस्य सर्वस्यौषधस्यक्षयति ईश्वरोभवति शारीरस्य सांसारिकस्यवारिष्टस्यशमनायेश्वरसेवातिरिक्तस्यौषधस्याभावात् भिषक्तमत्वाच्चास्यभेषजस्वामित्वं भिषक्तमंत्वाभिषजांशृणोमिइत्यादिश्रुतेः । किंच तमेवरुद्रं दुःखात्तत्साधनाद्दुरिताद्वा मोचयितारंदेवं यक्ष्व यजच महे महते सौमनसाय सुमनस्त्वाय ईश्वराराधनाच्चित्तशांतिः प्रसिद्धा किंच नमोभिर्हविर्भिर्नमस्कारैर्वा देवं द्योतमानं असुरम् प्रकृष्टासुंबलवंतमित्यर्थः यद्वा प्राणदातारंरुद्रंदुवस्यपरिचरेति ॥ ११ ॥

अथद्वादशी—

दमूनसोअपसोयेसुहस्तावृष्णःपत्नीर्नद्योविभ्वतष्टाः ।
सरस्वतीबृहद्दिवोतराकादशस्यन्तीर्वरिवस्यन्तुशुभ्राः ॥ १२ ॥

दमूनसः । अपसः । ये । सुऽहस्ताः । वृष्णः । पत्नीः । नद्यः ।
विभ्वऽतष्टाः । सरस्वती । बृहत्ऽदिवा । उत । राका । दशस्यन्तीः ।
वरिवस्यन्तु । शुभ्राः ॥ १२ ॥

अत्रलिंगोक्तदेवताः दमूनसोदानमनसोदान्तमनसोवा अपसः चमसाश्वरथगवादिशोभनकर्मवन्तः मत्वर्थोलुप्यते अतएव सुहस्ताः कुशलहस्तायेसन्ति तेऋभवः वृष्णः वर्षकस्येन्द्रस्य पत्नीः पत्न्यःपालयित्र्यः नद्योनदनशीलागंगाद्याः विभ्वतष्टाः ऋभूणांमध्यमेनकृताः सरस्वती एतन्नामिकानदीवाग्देवीवा बृहद्दिवा प्रभूतदीप्तिः उत अपिच राकादेवीच दशस्यन्तीर्दशस्यंत्यः कामान्प्रयच्छन्त्यः शुभ्रादीप्तास्ताश्चवरिवस्यन्तु अस्मभ्यंधनमिच्छन्तु ॥ १२ ॥

अथत्रयोदशी—

प्रसूमहेसुशरणायमेधांगिरंभरेनव्यसींजायमानाम् ।
यआहनादुहितुर्वक्षणासुरूपामिनानोअकृणोदिदंनः ॥ १३ ॥

प्र । सु । महे । सुऽशरणाय । मेधाम् । गिरम् । भरे । नव्यसीम् ।
जायमानाम् । यः । आहनाः । दुहितुः । वक्षणासु । रूपा ।
मिनानः । अकृणोत् । इदम् । नः ॥ १३ ॥

सु सुष्ठु प्रभरे प्रकर्षेणसंपादयामि महे महते सुशरणाय शोभनरक्षकायेन्द्राय पर्जन्यायवासुसुखायवा किं मेधां मतौधीयमानां गिरं स्तुतिं कीदृशीं नव्यसीं नवतरांअतिशयेनस्तुत्यांवाजायमानां इदानींउत्पद्यमानांनूतनामित्यर्थः यइन्द्रःपर्जन्योवा आहना आहन्तासेक्ता दुहितुर्दुहितृस्थानीयायाःपृथिव्याः हिताय वक्षणासु नदीषु रूपा रूपाणि मिनानःकुर्वाणइदमुदकंनोस्मभ्यंअकृणोत् करोतु ॥ १३ ॥

अथचतुर्दशी–

प्रसुंष्टुतिःस्तनयंन्तंरुवन्तंमिळस्पतिंजरितर्नूनमंश्याः ।
योअंब्दिमाँउंदनिमाँइयर्तिप्रविद्युतारोदंसीउक्षमांणः ॥ १४ ॥

प्र । सुऽस्तुतिः । स्तनयंन्तम् । रुवन्तंम् । इळः । पतिंम् । जरितः ।
नूनम् । अश्याः । यः । अब्दिऽमान् । उदनिऽमान् । इयर्ति । प्र ।
विऽद्युता । रोदंसी इति । उक्षमांणः ॥ १४ ॥

अत्रपर्जन्यःस्तूयते सुष्टुतिः शोभनास्तुतिः स्तनयन्तं गर्जन्तं रुवन्तं वर्षणजनितंशब्दंकुर्वाणं इळः अन्नस्योदकस्यवापतिंस्वामिनं हेजरितः स्तोतः त्वदीयास्तुतिः नूनंप्राश्याः प्रकर्षेणव्याप्नोतु यश्चपर्जन्यःअब्दिमान् अब्दिः अपांदानवान्मेघःतद्वान् उदनिमान् उदकवान् विद्युता तडिता रोदसी द्यावापृथिव्यावुक्षमाणःसिंचन् प्रेयर्तिगच्छति ॥ १४ ॥

अथपंचदशी–

एषःस्तोमोमारुतंशर्धोअच्छांरुद्रस्यंसूनूँर्युवन्यूँरुदंश्याः ।
कामोरायेहंवतेमास्वस्त्युपंस्तुहिपृषंदश्वाँअयासंः ॥ १५ ॥

एषः । स्तोमंः । मारुंतम् । शर्धः । अच्छं । रुद्रस्यं । सूनून् ।
युवन्यून् । उत् । अश्याः । कामंः । राये । हवते । मा ।
स्वस्ति । उपं । स्तुहि । पृषंत्ऽअश्वान् । अयासंः ॥ १५ ॥

एषमयासंपादितःस्तोमः स्तोत्रं मारुतंशर्धः मरुतांबलं अच्छ अभिमुखं अश्याः प्राप्नोतु समुदायरूपेणस्तुत्वा समुदायिरूपेणाह–रुद्रस्यसूनून् एषांरुद्रेणपुत्रत्वेनपरिकॢप्तिरसकृदुक्ता युवन्यून् यूनोमिश्रणेच्छून्वा उत् उन्नतं अत्यधिकं अश्याःव्याप्नुहि हेमनः कामः संकल्पोरायेधनार्थं मा मां स्वस्ति अविनश्वरं हवते आह्वयति प्रेरयतीत्यर्थः यस्मादेवंतस्मात् पृषदश्वान् पृषद्वर्णाश्वोपेतान् अयासोयज्ञगंतॄन् उप उपेत्य स्तुहि ॥ १५ ॥

अथषोडशी–

प्रैषःस्तोमंःपृथिवीमन्तरिंक्षंवनस्पतीँरोषंधीरायेअंश्याः ।
देवोदेवःसुहवोभूतुमह्यंमानोमातापृथिवीदुर्मतौधांत् ॥ १६ ॥

प्र । एषः । स्तोमः । पृथिवीम् । अन्तरिक्षम् । वनस्पतीन् ।
ओषधीः । राये । अश्याः । देवःऽदेवः । सुऽहवः । भूतु । मह्यम् ।
मा । नः । माता । पृथिवी । दुःऽमतौ । धात् ॥ १६ ॥

एषःस्तोमःस्तुतिः पृथिव्यादिदेवताः प्राश्याःप्राप्नोतु किमर्थं राये धनार्थं देवोदेवः सर्वोपिदेवः मह्यं मदर्थं सुहवोभूतु स्वाह्वानोभवतु नोस्मान् दुर्मतौ माता सर्वस्यनिर्मात्री यद्वात्रेर्भौमत्वाद्विशेषेणमाता तादृशीपृथिवी माधात् मास्थापयतु ॥ १६ ॥

अथसप्तदशी—

उरौदेवाअनिबाधेस्याम ॥ १७ ॥

उरौ । देवाः । अनिऽबाधे । स्याम ॥ १७ ॥

हेदेवाः युष्माकंसंबन्धिन्युरौमहति अनिबाधे नितरांबाधरहिते सुखे स्याम भवेम वयंअत्रयः ॥ १७ ॥

अथाष्टादशी—

समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम ।
आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ॥१८॥१९॥

सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती ।
गमेम । आ । नः । रयिम् । वहतम् । आ । उत । वीरान् ।
आ । विश्वानि । अमृता । सौभगानि ॥ १८ ॥ १९ ॥

वयंअश्विनोः नूतनेनपूर्वमन्यैरननुभूतेन मयोभुवा सुखस्यभावयित्रा सुप्रणीती शोभनप्रणयनवता अवसा रक्षणेन संगमेम संगच्छेमहि हेअमृता अमरणावश्विनौ नोस्मभ्यंरयिंधनंआवहतंप्रापयतं ओतवीरान् सुवीर्यवतः पुत्रानप्यावहतं विश्वानि सौभगान्यप्यावहतम् ॥ १८ ॥

॥ इतिचतुर्थस्यद्वितीयेएकोनविंशोवर्गः ॥ १९ ॥

आधेनवइतिसप्तदशर्चंएकादशंसूक्तं अत्रेरार्षंत्रैष्टुभंवैश्वदेवं अत्रानुक्रमणिका—आधेनवरूयूनैतयोरुपांत्यैकपदेति। विनियोगोलैंगिकः अपोनप्त्रीयएकधनासु हविर्धानंप्रतिनीयमानासुआद्यानुप्रवचनीया सूत्रितंच—आधेनवःपयसातूर्ण्यर्थाःसमन्यायन्त्युपयन्त्यन्याइति।

तत्रप्रथमा—

आधेनवःपयसातूर्ण्यर्थाअमर्धन्तीरुपनोयन्तुमध्वा।
महोरायेबृहतीःसप्तविप्रोमयोभुवोजरिताजोहवीति॥ १॥

आ। धेनवः। पयसा। तूर्णिऽअर्थाः। अमर्धन्तीः। उप। नः।
यन्तु। मध्वा। महः। राये। बृहतीः। सप्त। विप्रः। मयःऽभुवः।
जरिता। जोहवीति॥ १॥

धनेवः प्रीणयित्र्योनद्योमध्वा मधुरेण पयसारसेनसहिताः तूर्ण्यर्थाः त्वरमाणगमनाः अर्थोर्तेरितियास्कः। अमर्धन्तीरहिंसंत्यःसत्योनोस्मानुपायंतुउपागच्छन्तु तदर्थं महोमहते राये धनाय बृहतीर्महतीः सप्त सर्पणस्वभावाः सप्तसंख्यान्वा इमंमेगंगइतिमंत्रोक्ताः द्यावा तत्रहिप्राधान्येनसप्तैवोक्ताः मयोभुवः सुखस्यभावयित्र्योविप्रो विशेषेणप्रीणयिता जरिता स्तोता जोहवीति आजुह्वयति॥ १॥

अथद्वितीया—

आसुष्टुतीनमसावर्तयध्यैद्यावावाजायपृथिवीअमृध्रे।
पितामातामधुवचाःसुहस्ताभरेभरेनोयशसावविष्टाम्॥ २॥

आ। सुऽस्तुती। नमसा। वर्तयध्यै। द्यावा। वाजाय।
पृथिवी इति। अमृध्रे इति। पिता। माता। मधुऽवचाः।
सुऽहस्ता। भरेऽभरे। नः। यशसौ। अविष्टाम्॥ २॥

१ नि० १. १८.।

अहं सुष्टुती सुष्टुत्या शोभनस्तोत्रेण नमसाहविषाच अमृध्रे हिंसारहिते द्यावापृथिवी द्यावापृथिव्यावावर्तयध्यै आवर्तयितुमिच्छामि वाजायान्नार्थं अन्नंवैवाजइतिहिश्रुतिः । पिता पालयित्रीद्यौर्माता निर्मात्रीपृथिवी मधुवचाः प्रियवचनाः सुहस्ता अभिमतदानेनशोभन-हस्ता एते उभयविशेषणे यशसौ यशोयुक्तौ द्यावापृथिव्यौ भरेभरे सर्वेषुसंग्रामेषुयज्ञेषुवा नोस्मानविष्टांरक्षताम् ॥ २ ॥

अथतृतीया—

अध्वर्यवश्चकृवांसोमधूनिप्रवायवेभरतचारुशुक्रम् ।
होतेवनःप्रथमःपाह्यस्यदेवमध्वोररिमातेमदाय ॥ ३ ॥

अध्वर्यवः । चकृऽवांसः । मधूनि । प्र । वायवे । भरत ।
चारु । शुक्रम् । होताऽइव । नः । प्रथमः । पाहि । अस्य ।
देव । मध्वः । ररिम । ते । मदाय ॥ ३ ॥

हे अध्वर्यवः ध्वरंयुंजानाः मधूनि मधुरसानिसोमाज्यादीनि चकृवांसः कुर्वाणायू-यं वायवे प्रथमंप्रभरत प्रकर्षेणसंपादयन्त चारु चरणीयं शुक्रं दीप्तंसोमं हेवायो त्वं चहोतेव होतायथाप्रथमंपिबतितद्वन्नोस्मदर्थं अस्य अमुंसोमंप्रथमःइतरदेवेभ्यःपूर्वंपाहिपि-ब हेदेववायो मध्वोमधुरंसोमरसं तेमदायररिमददाम वायोःपूर्वपानमसकृत्प्रपंचितं ॥ ३ ॥

अथचतुर्थी—

दशक्षिपोयुञ्जतेबाहूअद्रिंसोमस्ययाशमितारासुहस्ता ।
मध्वोरसंसुगभस्तिर्गिरिष्ठांचनिश्चदद्दुहेशुक्रमंशुः ॥ ४ ॥

दश । क्षिपः । युंजते । बाहू इति । अद्रिम् । सोमस्य । या ।
शमितारा । सुऽहस्ता । मध्वः । रसम् । सुऽगभस्तिः ।
गिरिऽस्थाम् । चनिश्चदत् । दुदुहे । शुक्रम् । अंशुः ॥ ४ ॥

---

१ तै० ब्रा० १. ३. ६ ।

अत्राभिषवस्यप्रतिपाद्यमानत्वात्सोमोदेवता यद्वाऐन्द्री अद्रिमभिषवग्रावाणं दशक्षि दशसंख्याकाःक्षेप्त्र्योंगुलयोयुंजतेगृह्णन्ति यद्वा परस्परंयुक्ताभवन्ति बाहू अप्यध्वर्युसंबं नावद्रिंयुंजाते या यौ सुहस्ता शोभनहननौ सोमस्यशमितारावऽभिषोतारौ तौबाहू जाते मध्वोमधुरस्यसोमस्यरसं गिरिष्ठांगिरिस्थायिनं गिरिवदुन्नतप्रदेशस्थितंवा सुगभ शोभनांगुलिरध्वर्युः चनिश्चदत् आह्लादयन् चदिआह्लादनेइत्यस्मात्यङ्लुकिछान्दसं दुदुहे दोग्धि सचांशुः शुक्रं निर्मलंरसं दुदुहे दुग्धे यद्वैकंवाक्यं अंशुर्व्याप्तः सुग स्तिः सुहस्तोध्वर्युर्मध्वोरसं दुदुहे दोग्धि ॥ ४ ॥

अथपंचमी–

असा॑वि ते जुजुषा॒णाय॒ सोमः॒ क्रत्वे॒ दक्षा॑य बृह॒ते मदा॑य ।
हरी॒ रथे॑ सु॒धुरा॒ योगे॑ अ॒र्वागिन्द्र॑ प्रि॒या कृ॑णुहि हू॒यमा॑नः ॥ ५ ॥ २०

असा॑वि । ते॒ । जु॒जु॒षा॒णाय॑ । सोमः॑ । क्रत्वे॑ । दक्षा॑य । बृ॒ह॒ते । मदा॑
हरी॒ इति॑ । रथे॑ । सु॒ऽधुरा॑ । योगे॑ । अ॒र्वाक् । इन्द्र॑ । प्रि॒या । कृ॒णु॒
हू॒यमा॑नः ॥ ५ ॥ २० ॥

हेइन्द्र तेतुभ्यं जुजुषाणाय सेवमानाय सोमःअसावि अभिषुतः किमर्थं क्र क्रतवे वृत्रवधादिकर्मणे दक्षाय बलाय बृहतेमदायच यस्मादेवंतस्मात् हेइन्द्र त्वं हूय मानःसन् सुधुरा शोभनायांधुरिनियुक्तौप्रिया प्रियौ हरीअश्वौ योगे योगार्हेयुक्तेवा र थेयोजयित्वा तंरथंअर्वागस्मदभिमुखंकृणुहिकुरु ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेविंशोवर्गः ॥ २० ॥

अथषष्ठी–

आ नो॑ म॒हीम॒रम॑तिं स॒जोषा॒ ग्नां दे॒वीं नम॑सा रा॒तह॑व्याम् ।
मधो॒र्मदा॑य बृह॒तीमृ॑त॒ज्ञामाग्ने॑ वह प॒थिभि॑र्देव॒यानैः॑ ॥ ६ ॥

आ । नः॒ । म॒हीम् । अ॒रम॑तिम् । स॒ऽजोषाः॑ । ग्नाम् । दे॒वीम् । नम॑सा
रा॒तऽह॑व्याम् । मधोः॑ । मदा॑य । बृ॒ह॒तीम् । ऋ॒त॒ऽज्ञाम् । आ ।
अ॒ग्ने॒ । व॒ह॒ । प॒थिऽभिः॑ । दे॒व॒ऽयानैः॑ ॥ ६ ॥

अत्राग्निंसंबोध्य ग्नादेवतायाआवाह्यत्वात् अस्याग्निग्नावादेवता हेअग्ने सजोषाः अस्माभिःसहप्रीयमाणस्त्वं ग्नां देवीं सर्वैर्गन्तव्यांएतन्नामिकांदेवतां मेनाग्नाइतिस्त्रीणामितियास्कः । नोस्मदर्थं देवयानैर्देवैर्गंतव्यैः पथिभिर्मार्गैः अभिमुखंआवह कीदृशीं महीं महतीं अरमतिं आसमन्तादरममाणां सर्वत्रगन्त्रींवा नमसा स्तोत्रेणसह रातहव्यां रातंदत्तंदानायसंकल्पितंहव्यंयस्याःतांदत्तहविष्कामित्यर्थः किमर्थं मधोर्मधुरस्यसोमस्यमदाय पुनःकीदृशीं बृहतीं प्रवृद्धां ऋतज्ञां यज्ञमभिजानतीं ॥ ६ ॥

प्रवर्ग्येमहावीरेअज्यमानेअंजन्तियमित्येषा सूत्रितंच—अंजन्तियंप्रथयन्तोनविप्राइत्यज्यमानइति ।

सैषासप्तमी—

अंजन्तियंप्रथयंन्तोनविप्रांवपावंन्तंनाग्निनातपंन्तः ।
पितुर्नपुत्रउपसिप्रेष्ठआघर्मोअग्निमृतयंन्नसादि ॥ ७ ॥

अंजन्ति । यम् । प्रथयंन्तः । न । विप्राः । वपाऽवंन्तम् । न । अग्निनां । तपंन्तः । पितुः । न । पुत्रः । उपसि । प्रेष्ठः । आ । घर्मः । अग्निम् । ऋतयंन् । असादि ॥ ७ ॥

यंघर्मं महावीरंप्रथयन्तोन नेतिसंप्रत्यर्थीयः अस्त्युपमार्थस्यसंप्रत्यर्थेप्रयोगः[1] इदानीं प्रथयन्तोविप्रामेधाविनऋत्विजोध्वर्य्वादयः वपावन्तंन वपावन्तंप्रवृद्धपशुंयथाग्नौतपन्तितद्वदग्निनातपन्तःअंजन्ति पितुर्नपुत्रउपसिप्रेष्ठः पितुरुपस्थेप्रियतमःपुत्रइव घर्मोमहावीरः यद्घ्रइत्यतपत्तद्घर्मस्यघर्मत्वंइतिहिश्रुतिः[2] । सऋतयन यज्ञमिच्छन् अग्निमग्नावसादिआसादितः अत्रपितृपुत्रदृष्टान्तःस्फोटादिराहित्येनसुखदवासप्रख्यापनार्थः ॥ ७ ॥

अथाष्टमी—

अच्छांमहीबृहतीशंतमागीर्दूतोनगंन्त्वश्विनांहुवध्यै ।
मयोभुवांसरथायांतमर्वाग्गन्तंनिधिंधुरंमाणिर्ननाभिम् ॥ ८ ॥

---

१ नि० ३. २१. २ तै० अरण

अच्छं । मही । बृहती । शम्ऽतंमा । गीः । दूतः । न । गन्तु । अश्विना । हुवध्यै । मयःऽभुवा । सऽरथा । आ । यातम् । अर्वाक् । गन्तम् । निऽधिम् । धुरम् । आणिः । न । नाभिम् ॥ ८ ॥

अच्छाभिमुखं अश्विना अश्विनौ हुवध्यै आह्वातुं गीरस्मदीयास्तुतिः दूतोन दूतइव आह्वातेव गन्तु गच्छतु गीर्विशेष्यते मही पूज्या बृहती महती शंतमा सुखतमा हेअश्विनौ मयोभुवा सुखस्यभावयितारौ सरथा एकरथौसन्तौ गन्तं गच्छन्तं द्रवीभूतं निधिं निहितंसोमं अर्वागभिमुखं आयातं आगच्छतं धुरं भारवाहिकांनाभिं आणिर्न कीलइव यथानिष्कीला नाभीरथंननिर्वहतितद्वत् युवाभ्यांवियुक्तःसोमोयागंननिर्वहतीतिज्ञापयितुमेवंदृष्टान्तितं ॥ ८ ॥

अथनवमी—

प्रतव्यसोनमंउक्तिंतुरस्याहंपूष्णउतवायोरंदिक्षि ।
याराधंसाचोदितारांमतीनांयावाजस्यद्रविणोदाउतत्मन् ॥ ९ ॥

प्र । तव्यसः । नमःऽउक्तिम् । तुरस्य । अहम् । पूष्णः । उत । वायोः । अदिक्षि । या । राधंसा । चोदितारा । मतीनाम् । या । वाजस्य । द्रविणःऽदौ । उत । त्मन् ॥ ९ ॥

अहमृषिः स्तव्यसः प्रकृष्टबलस्य तुरस्य त्वरमाणस्य पूष्णः पोषकस्य देवस्य उक्तगुणकायदेवाय उतापिच वायोरुक्तगुणायच नमउक्तिं नमइतिवचनंस्तोत्रं मादिक्षिप्रदिशामि या यौपूषवायू राधसा हविर्लक्षणेननिमित्तेन मतीनांचोदितारामेरयितारौ यद्वा राधसेतिषष्ठ्यर्थेतृतीया राधसोधनस्यमतीनांच चोदयितारौ यौच वाजस्यान्नस्यसंग्रामस्यवा चोदयितारौ तौदेवौ उतअपिच त्मन् आत्मनि अनन्यप्रेरणायैव द्रविणोदौभवतमितिशेषः ॥ ९ ॥

अथदशमी—

आनामंभिर्मरुतोवक्षिविश्वानारूपेभिर्जातवेदोहुवानः ।
यज्ञंगिरोजरितुःसुष्टुतिंचविश्वेगन्तमरुतोविश्वंऊती ॥ १० ॥ २१ ॥

आ । नामंऽभिः । मरुतः । वक्षि । विश्वान् । आ । रूपेभिः । जातऽवेदः । हुवानः । यज्ञम् । गिरः । जरितुः । सुऽस्तुतिम् । च । विश्वे । गन्त । मरुतः । विश्वे । ऊती ॥ १० ॥ २१ ॥

हेजातवेदः जातप्रज्ञाग्ने हुवानोस्माभिराहूयमानःसन् विश्वान्मरुतः सर्वानपिस्तोत्रभा-गोहविर्भाजश्चदेवान् नामभिरिन्द्रवरुणेत्यादिलक्षणैरावक्षिआवहसि रूपेभिः सहस्राक्षवज्र-हस्तत्वादिलक्षणैरूपैः आवक्षि वहसियज्ञम् किंच हेमरुतो विश्वेसर्वेयूयंयज्ञमस्मदीयंयज्ञसं-बंधिहविर्वा जरितुः स्तोतुःसंबन्धिनीर्गिरः स्तुतिवचांसि सुष्टुतिं तत्साध्यांशोभनफलांस्तुतिंच अवयविन्यास्तुतेरेकत्वादेकवचनं अवयवानां बहुत्वाद्बहुवचनं उक्ते यज्ञस्तुती अभिलक्ष्य गन्त आगच्छत विश्वेच यूयमूती ऊत्यारक्षयाच सहगन्त ॥ १० ॥

॥ इतिचतुर्थस्यद्वितीयेएकविंशोवर्गः ॥ २१ ॥

आनोदिवइत्येकादशी व्यूढेदशरात्रेनवमेहनिप्रउगशस्त्रेसारस्वततृचेद्वितीया सूत्रितंच— आनोदिवोबृहतःपर्वतादासरस्वत्यभिनोनेषिवस्यइतितत्पाठस्तु ।

अथैकादशी—

आनोदिवोबृहतःपर्वतादासरस्वतीयजतागन्तुयज्ञम् ।
हवंदेवीजुजुषाणाघृताचीशग्मांनोवाचमुशतीश्रृणोतु ॥ ११ ॥

आ । नः । दिवः । बृहतः । पर्वतात् । आ । सरस्वती । यजता । गन्तु । यज्ञम् । हवम् । देवी । जुजुषाणा । घृताची । शग्माम् । नः । वाचम् । उशती । श्रृणोतु ॥ ११ ॥

नोस्माकंयज्ञं यजता यष्टव्या देवी सरस्वती दिवोद्योतमानात् द्युलोकादागन्तु आग-च्छतु तथा बृहतोमहतः पर्वतात् पर्ववतः पूरणवतःप्रीणनवतोवान्तरिक्षान्मेघाद्वा सरस्वती आगन्तुआगच्छतु अनेनमाध्यमिकीवागुच्यते यद्वैनदिवइत्यस्यविशेषणं सन्तिहिद्युलोकस्य त्रीणिपर्वाणितिस्रोदिवःपृथिवीरित्यादिश्रुतेः । अस्मिनपक्षेद्वितीयआकारःपूरणः तदर्थं हव-मस्मदीयमाह्वानं देवी सरस्वती जुजुषाणा स्तुतिंसेवमाना घृताची घृतमुदकमंचती नोस्मदी-यांशग्मां सुखकरीं वाचं स्तुतिमुशतीकामयमानासतीश्रृणोतु ॥ ११ ॥

अथद्वादशी—

आवेधसंनीलपृष्ठंबृहन्तंबृहस्पतिंसदनेसादयध्वम् ।
सादद्योनिंदमआदीदिवांसंहिरण्यवर्णमरुपंसपेम ॥ १२ ॥

---

१ ऋ० सं० ३. ८. ४.

आ । वेधसम् । नीलऽपृष्ठम् । बृहन्तम् । बृहस्पतिम् । सदने । सादयध्वम् । सादत्ऽयोनिम् । दमे । आ । दीदिऽवांसम् । हिरण्यऽवर्णम् । अरुषम् । सपेम ॥ १२ ॥

एषाबार्हस्पत्या हेऋत्विजोयूयं बृहस्पतिं बृहतोमंत्रस्यस्वामिनं देवं सदनेसमद्यागगृहे आसादयध्वं स्थापयध्वं कीदृशंदेवं वेधसं विविधकर्तारं नीलपृष्ठं स्निग्धांगं बृहन्तं महान्तं तथासन्तंवयमृत्विग्यजमानाः सपेम परिचरेम सएवविशेष्यते सादद्योनिं योनौसीदन्तं दमे यागगृहे आसर्वतोदीदिवांसंदीप्यमानं हिरण्यवर्णं हितरमणीयवर्णं अरुषमारोचमानं अथवेयमाग्नेयी बृहतः परिवृढस्यकर्मणः स्वामीतिबृहस्पतिरग्निरुच्यते तथानीलवर्णधूमपृष्ठत्वसदनसादनहिरण्यवर्णत्वादिलिंगैरप्यग्निरेवबृहस्पतिः ॥ १२ ॥

अथत्रयोदशी–

आधर्णसिर्बृहद्दिवोरराणोविश्वेभिर्गन्त्वोमभिर्हुवानः ।
ग्नावसानओषधीरमृध्रस्त्रिधातुशृङ्गोवृषभोवयोधाः ॥ १३ ॥

आ । धर्णसिः । बृहत्ऽदिवः । रराणः । विश्वेभिः । गन्तु । ओमऽभिः । हुवानः । ग्नाः । वसानः । ओषधीः । अमृध्रः । त्रिधातुऽश्रृंगः । वृषभः । वयःऽधाः ॥ १३ ॥

इदमाद्यृक्त्रयंआग्नेयं अग्निरागन्तु आगच्छतुअस्मयज्ञं धर्णसिः सर्वस्यधारकः बृहद्दिवः प्रभूतदीप्तिः रराणोरममाणः कामान्प्रयच्छन्वा आविश्वेभिः सर्वैः ओमभिः रक्षणैः सह हुवानः आहूयमानः ग्नाः गंत्रीर्ज्वालाः ओषधीश्च वसानः अमृध्रोअहिंसितः त्रिधातुश्रृंगः त्रिप्रकारश्रृंगवदुन्नतः लोहितशुक्लकृष्णवर्णज्वालः वृषभोवर्षिता वयोधाः अन्नस्यदाताहविषोवाधारकः ॥ १३ ॥

अथचतुर्दशी–

मातुष्पदेपरमेशुक्रआयोर्विपन्यवोरास्पिरासोअग्मन् ।
सुशेव्यंनमसारातहव्याःशिशुंमृजन्त्यायवोनवासे ॥ १४ ॥

मातुः । पदे । परमे । शुक्रे । आयोः । विपन्यवः । रास्पिरासः ।
अग्मन् । सुऽशेव्यम् । नमसा । रातऽहव्याः । शिशुम् । मृजन्ति ।
आयवः । न । वासे ॥ १४ ॥

आयोर्मनुष्यस्ययजमानस्य विपन्यवः स्तोतृनामैतत् स्तोतारोहोत्रादयोरास्पिरासः राधनंह-विर्लक्षणं तत्स्पृशन्तिरास्पाजुह्वाद्यःतद्वान् रास्पी तद्वन्तोरास्पिराः उक्तविधाऋत्विजोमातुर्निर्मातुः पृथिव्याः शुक्रे दीप्ते परमे पदेउत्तरवेद्यांस्थितमग्मन अगमन व्रजन्ते तदर्थं सुशेव्यं सुखायहितं शिशुं उत्पन्नमात्रं वासे वासाय नमसा स्तोत्रेण रातहव्याः दत्तहव्याः हविष्काइत्यर्थः तादृ-शास्तेमृजन्तिसंमार्जयन्ति तत्रदृष्टान्तः—आयवोन लौकिकामनुष्याइव तेयथाशिशुंवासायमृज-न्तितद्वत् ॥ १४ ॥

अथपंचदशी—

बृहद्वयोबृहतेतुभ्यमग्नेधियाजुरोमिथुनासःसचन्त ।
देवोदेवःसुहवोभूतुमह्यंमानोमातापृथिवीदुर्मतौधात् ॥ १५ ॥

बृहत् । वयः । बृहते । तुभ्यम् । अग्ने । धियाऽजुरः । मिथुनासः ।
सचन्त । देवःऽदेवः । सुहवः । भूतु । मह्यम् । मा । नः । माता ।
पृथिवी । दुःऽमतौ । धात् ॥ १५ ॥

बृहत् प्रभूतं वयोन्नं हेअग्ने बृहते तुभ्यं धियाजुरः कर्मणाजीर्णाः मिथुनासोदंपतीभिःस-हिताः सचन्त सेवन्ते जायापत्नीअग्निमादधीयातामित्यादिश्रुतेः । अधिकाराध्यायेषष्ठेस्त्रि-याअप्यधिकारः सच पत्न्यासहेतिहिप्रतिपादितं अवशिष्टंगतम् ॥ १५ ॥

अथषोडशी—

उरौदेवाअनिबाधेस्याम ॥ १६ ॥

उरौ । देवाः । अनिऽबाधे । स्याम ॥ १६ ॥

---

१ तै० कल्पसूत्रम्

अथसप्तदशी–

समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम ।
आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ॥१७॥२२॥

सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम । आ । नः । रयिम् । वहतम् । आ । उत । वीरान् । आ । विश्वानि । अमृता । सौभगानि ॥ १७ ॥ २२ ॥

व्याख्यातेद्वे ॥ १६ ॥ १७ ॥

॥ इतिचतुर्थस्यद्वितीयेद्वाविंशोवर्गः ॥ २२ ॥

तंप्रत्नथेतिपंचदशर्चंद्वादशंसूक्तं अवत्सारोनामऋषिः सचकश्यपगोत्रः यास्वृक्षुसदापृणबाहुवृक्तादयःश्रुताःतासुतेपिसमुच्चीयन्ते चतुर्दशीपंचदश्यौत्रिष्टुभौ शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः विश्वेदेवादेवताः अनुक्रान्तंच–तंप्रत्नथापंचोनाकाश्यपोवत्सारोन्येचऋषयोत्रदृष्टलिंगाद्वित्रिष्टुबन्तमिति । वाजपेयेअतिरिक्तोक्थ्ये आदितस्त्रयोदशर्चःशंसनीयाः सूत्रितंच–तंप्रत्नथेतित्रयोदशानामेकांशिष्ट्वाहूयदूरोहणंरोहेदिति ।

तत्रप्रथमा–

तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदंस्वर्विदम् ।
प्रतीचीनंवृजनंदोहसेगिराशुंजयन्तमनुयासुवर्धसे ॥ १ ॥

तम् । प्रत्नऽथा । पूर्वऽथा । विश्वऽथा । इमऽथा । ज्येष्ठऽतातिम् । बर्हिऽसदम् । स्वःऽविदम् । प्रतीचीनम् । वृजनम् । दोहसे । गिरा । आशुम् । जयन्तम् । अनु । यासु । वर्धसे ॥ १ ॥

इयमुत्तराचद्वेऐन्द्र्यावित्याहुः तत्रोपपत्तिमेवमाहुः तंप्रत्नथेत्येषाशुक्रामन्थिग्रहणेविनियुक्ता ऐन्द्र्यौचशुक्रामन्थिनौ यदैन्द्रंशंसतितेनशुक्रामन्थिनाउक्थवतावितिहिब्राह्मणं[1] । अध्वर्युसंप्रैषोपिभवति प्रातःप्रातःसवनस्यशुक्रवन्तोमधुश्चुतइन्द्रायसोमान्प्रस्थितान्प्रेष्येतिप्रशास्तृ-

---

१ ऐ० ब्रा० ३. १. ।

प्रैषश्चभवति । होतायक्षदिन्द्रंप्रातःप्रातःसावस्येत्यादि प्रस्थिताइन्द्रायसोमाइतियाज्याचैन्द्री इदंतेसोम्यंमध्विति तस्मादैन्द्र्यौ तमिन्द्रं प्रत्नथा पुरातनायजमानाइव पूर्वथा अस्मदीयाःपूर्वेयथा विश्वथा विश्वेसर्वेप्राणिनोयथा इमथा इममिदानींवर्तमानायजमानाःतेयथेन्द्रस्यस्तुत्याफलमलभन्त तद्वदयमपि हेअन्तरात्मन् त्वमपि ज्येष्ठतातिं ज्येष्ठं बर्हिषदं बर्हिषिसीदन्तं स्वर्विदं सर्वज्ञं सर्वस्यलंभयितारंवाफलंभावयितारंवा प्रतीचीनं प्रतिअस्मदभिमुखमंचंतं वृजनं बलनामैतद्बलवतिवर्ततेबलवन्तं आशुं शीघ्रगामिनं व्यातं वाजयन्तं सर्वमभिभवंतमिन्द्रं गिरा स्तुत्यासाधनेन दोहसे धुक्ष्व सर्वदासर्वान्कामानित्यन्तरात्मनःप्रैषः यासुस्तुतिषुवर्धसेप्रवृद्धोभवसिवर्धयसिवेन्द्रं यथास्तुत्येति यास्विति॰व्यत्ययेनबहुवचनम् ॥ १ ॥

अथद्वितीया–

श्रियेसुदृशीरुपरस्ययाःस्वर्विरोचमानःककुभामचोदते ।
सुगोपाअसिनदभायसुक्रतोपरोमायाभिर्ऋतआसनामते ॥ २ ॥

श्रिये । सुऽदृशीः । उपरस्य । याः । स्वः । विऽरोचमानः ।
ककुभाम् । अचोदते । सुऽगोपाः । असि । न । दभाय ।
सुक्रतो इति सुऽक्रतो । परः । मायाभिः । ऋते । आस । नाम । ते ॥ २ ॥

हेइन्द्र स्वः स्वर्गे विरोचमानस्त्वं अचोदते अप्रेरयितुः षष्ठ्यर्थेचतुर्थी उपरस्य मेघस्य संबन्धिन्यः सुदृशीःसुरोचमानायाआपःसन्ति तासामपां ककुभां सर्वासांदिशांमध्ये श्रिये प्राणिनांश्रयणायप्रेरकोभवेतिशेषः हेसुक्रतो शोभनवृष्टिप्रदानादिकर्मकेन्द्र त्वं सुगोपाः प्राणिनांसुष्ठुगोपायितासि अतोनदभाय नदंभनायवधाय प्राणिनानासि नप्रभवसि त्वंच मायाभिरासुरीभिः परोमायाभ्यःपरस्ताद्वर्तमानः यस्मात्तेत्वदीयंनाम नामकं रूपे ऋते सत्यलोके आस आस्ते ॥ २ ॥

अथतृतीया–

अत्यंहविःसंचतेसच्चधातुचारिष्टगातुःसहोतासहोभरिः ।
प्रसस्त्राणोअनुबर्हिर्वृषाशिशुर्मध्येयुवाजरोविस्रुहाहितः ॥ ३ ॥

अत्य॑म् । ह॒विः । स॒च॒ते॒ । सत् । च॒ । धातु॑ । च॒ । अरि॑ष्टऽगातुः ।
सः । होता॑ । स॒ह॒ःऽभ॑रिः । प्र॒ऽसस्रा॑णः । अनु॑ । ब॒र्हिः । वृषा॑ ।
शिशुः॑ । मध्ये॑ । । युवा॑ । अ॒जरः॑ । वि॒ऽस्रुहा॑ । हि॒तः ॥ ३ ॥

इयमाग्नेयी होतृत्वयुवत्वादिलिंगैः अयमग्निः अत्यं सततमतनार्हं हविराज्यादिकं सचते सेवते कीदृशंहविः सत् सत्फलसाधनत्वाद्धविरपिसत् धातुच धारकं सर्वस्यहूयमानस्यहविषः आदित्यद्वारावृष्टिसाधनत्वात् तयाचवृष्ट्या प्रजोत्पत्तेर्धारकत्वं तथाहि अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते। आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति। कीदृशोग्निः अरिष्टगातुः अहिंसितगमनः सतितस्यगमने यज्ञनिष्पत्त्याफलसिद्धेररिष्टगमनत्वं तदेवाह सः सखलु होता होमनिष्पादकः सहोभरिः बलस्यभर्ता बर्हिरनुप्रसस्राणः प्रकर्षेणसरन् वृषा वर्षकःफलस्य शिशुः सद्वरक्षणीयः अप्रौढोवा युवा सर्वत्रमिश्रयिता अजरोजरारहितः विस्रुहा विस्रुहाणामोषधीनांमध्ये हितोनिहितः स्थापितःएवंभूतः सचते ॥ ३ ॥

अथचतुर्थी—

प्रवं॑ए॒तेसु॒यु॒जो॒याम॑न्नि॒ष्टये॒नीची॑र॒मुष्मै॒यम्यं॑ऋ॒ता॒वृधः॑ ।
सु॒यन्तु॑भिःसर्वशा॒सैर॒भीशु॑भिः॒क्रिवि॒र्नामा॑निप्रव॒णेमु॑षायति ॥ ४ ॥

प्र । वः॒ । ए॒ते । सु॒ऽयुजः॑ । याम॑न् । इ॒ष्टये॑ । नीची॑ः । अ॒मुष्मै॑ ।
य॒म्यः॑ । ऋ॒त॒ऽवृधः॑ । सु॒यन्तु॑ऽभिः । स॒र्व॒ऽशा॒सैः । अ॒भीशु॑ऽभिः ।
क्रिविः॑ । नामा॑नि । प्र॒व॒णे । मु॒षा॒य॒ति॒ ॥ ४ ॥

एषसौरीवा एतेरश्मयः सुयुजः सुष्ठुपरस्परंसंयुक्तायामन्यज्ञगमने इष्टये एषणाय नीचीर्नीचंगच्छन्तीतिशेषः अमुष्मै यजमानाय यम्योयम्याःगमनार्हाः अथवा यमोनियमितादित्यः तस्यसंबन्धिनः ऋतावृधः यज्ञस्यवर्धयितारश्च अयमादित्यः सुयन्तुभिःसुगमनैः सर्वशासैः सर्वस्यशासकैः अभीशुभीरश्मिभिः क्रिविः कर्ता नामानि नामकानिउदकानि प्रवणे निम्ने भूप्रदेशे मुषायति मुष्णातिआदत्तइत्यर्थः अथवाग्निनाआवाह्यस्याग्नेरेतेश्वाः इष्टये यज्ञगमनाय यामनि रथेसुयुजःप्रगच्छन्ति शिष्टंसमानं क्रिविः क्रिविसदृशोग्निः प्रवणे नामानिहवींष्युक्तलक्षणाभिः ज्वालाभिर्मुषायत्यादत्ते ॥ ४ ॥

अथपञ्चमी—

संजर्भुराणस्तरुंभिःसुतेगृभंवयाकिनंचित्तगर्भासुसुस्वरुः ।
धारवाकेष्वृजुगाथशोभसेवर्धस्वपत्नीरभिजीवोअध्वरे ॥५॥२३॥

सम्ऽजर्भुराणः । तरुंऽभिः । सुतेऽगृभम् । वयाकिनम् । चित्तऽगर्भासु
सुऽस्वरुः । धारऽवाकेषु । ऋजुऽगाथ । शोभसे । वर्धस्व ।
पत्नीः । अभि । जीवः । अध्वरे ॥ ५ ॥ २३ ॥

हेऋजुगाथ शोभनस्तुतिकाग्ने तरुभिः तरुविकारैर्ग्रहैः सुतेगृभं अभिषुतेनरसेनगृहीतं वयाकिनं कुत्सिताःअल्पाःवयाःशाखावयाकाःलताः तद्वन्तं सोमं चित्तगर्भासु चित्तग्राहिणीषु स्तुतिभिःसह संजर्भुराणः गृण्णन् गृह्णन् सुस्वरुः शोभनगमनःशोभनस्तुतिकोवा त्वं धारवाकेषु धारयन्तिवाकानस्तोत्राणीतिधारवाकाऋत्विग्यजमानाः तेषुमध्येशोभसे किंच अध्वरे जीवः सर्वस्यजीवयिता पत्नीः पालयित्रीःओषधीर्ज्वालावा अभि अभिमुखंवर्धस्वअभिवर्धय॥५॥

॥ इतिचतुर्थस्यद्वितीयेत्रयोविंशोवर्गः॥ २३ ॥

अथषष्ठी—

यादृगेवददृशेतादृगुच्यतेसंछाययादधिरेसिध्रयाप्स्वा ।
महीमस्मभ्यमुरुषामुरुज्रयोबृहत्सुवीरमनपच्युतंसहः ॥ ६ ॥

यादृक् । एव । ददृशे । तादृक् । उच्यते । सम् । छायया । दधिरे ।
सिध्रया । अप्ऽसु । आ । महीम् । अस्मभ्यम् । उरुऽसाम् ।
उरु । ज्रयः । बृहत् । सुऽवीरम । अनपऽच्युतम् । सहः ॥ ६ ॥

एषावैश्वदेवी यादृगेवददृशे यादृग्रूपमेवददृशे तादृगुच्यते तादृग्रूपमेवोच्यते यथादृष्टमेवस्तूयतेनतुपरवचनप्रत्ययेन यस्माच्छायया दीप्त्या सिध्रया साधिकयासह अप्सु व्यापकासु स्तुतिषु अप्स्वेववाआसंदधिरे सम्यग्धारयन्ति स्वीयंरूपंस्तुतिंवा तेदेवामहींमहतींपूज्यामुरुषां बहुदात्रीं रयिं उरु प्रभूतं ज्रयोवेगं बृहन्महत् सुवीरं शोभनवीर्यमपत्यं अनपच्युतं अनुपक्षीणं सहोबलंचाभिभावुकमस्मभ्यंप्रयच्छंतित्यर्थः ॥ ६ ॥

अथसप्तमी—

वेत्यग्रुर्जनिवान्वाअतिस्पृधःसमर्यतामनसासूर्यःकविः ।
घ्रंसंरक्षन्तंपरिविश्वतोगयमस्माकंशर्मवनवत्स्वावसुः ॥ ७ ॥

वेति । अग्रुः । जनिऽवान् । वै । अति । स्पृधः । सऽमर्यता ।
मनसा । सूर्यः । कविः । घ्रंसम् । रक्षन्तम् । परि । विश्वतः ।
गयम् । अस्माकम् । शर्म । वनवत् । स्वऽवसुः ॥ ७ ॥

इयंसौरी सूर्योदेवः अग्रुरग्रगामी जनिवान्वै जन्मवानजायावान्वा उषाह्यस्यजायावाइ तिप्रसिद्धौ कविः क्रान्तदर्शी समर्यता समरमिच्छता मनसास्पृधः संग्रामान् अतिवेति अतिगच्छति मंदेहानसुरान्योद्धुं घ्रंसं दीप्तं गयं गृहंअंतरिक्षंवा विश्वतःसर्वतोरक्षन्तंपरिचरेमेतिशेष सदेवोस्माकं शर्म सुखं परि सम्यक् वनवत् दद्यात् स्वावसुः स्वायत्तधनःसन् ॥ ७ ॥

अथाष्टमी—

ज्यायांसमस्ययतुनस्यकेतुनऋषिस्वरंचरतियासुनामते ।
यादृश्मिन्धायितमपस्ययाविदद्यउस्वयंवहतेसोअरंकरत् ॥ ८ ।

ज्यायांसम् । अस्य । यतुनस्य । केतुना । ऋषिऽस्वरम् । चरति ।
यासु । नाम । ते । यादृश्मिम् । धायि । तम् । अपस्यया ।
विदत् । यः । ऊँ इति । स्वयम् । वहते । सः । अरम् । करत् ॥ ८

इयमाग्नेयीसौरीवा हेदेव ज्यायांसं अतिशयेनप्रवृद्धं अस्य यतुनस्य यततिर्गतिकर्मा गन्तुरस्य सूर्यस्य कर्मणिषष्ठ्यौ अमुं गन्तारं केतुना प्रज्ञापकेनकर्मणा उदयादिलक्षणेनविशिष्ट ऋषिस्वरं ऋषिभिःस्तुत्यं त्वांचरतिगच्छति भजते यजमानः केनसाधनेन यासुस्तुतिषु तेत्वदीयं नामनमनं नामकंवारूपंवर्ततेताभिरित्यर्थः यद्वा अस्य यतुनस्य गमनशीलस्यतव केतुना तमोनिर्हरणादिकर्मणा विशिष्टंत्वांचरति यादृश्मिन् यादृशेकामेधायि धत्ते कर्तरिचिण् सामर्थ्यान्मनः गम्यते तंयथानिर्देशंप्रति निर्दिष्टव्यत्वात्तादृशमित्यर्थोज्ञातव्यः तादृशंकामं अपस्यया कर्मणा हविः स्तुत्यादिलक्षणेन विदत् विन्दते यउ यएव स्वयं अनन्यप्रेरितःसन्

स्वमनीषयैव वहते धारयतिफलं सः अरं अलं अत्यर्थं करत् करोतीतिशेषः अथवा यउ यएव स्वयंवहते स्वयमेवानुतिष्ठति सोत्यर्थंकुर्यात् नह्यन्येनकारितंफलवद्भवति ॥ ८ ॥

अथनवमी—

समुद्रमांसामवंतस्थेअग्रिमानरिष्यतिसवंनंयस्मिन्नायंता ।
अत्रानहार्दिंक्रवणस्यरेजतेयत्रांमतिर्विद्यतेंपूतबन्धंनी ॥ ९ ॥

समुद्रम् । आसाम् । अवं । तस्थे । अग्रिमा । न । रिष्यति ।
सवंनम् । यस्मिन् । आऽयंता । अत्रं । न । हार्दि । क्रवणस्यं ।
रेजते । यत्रं । मतिः । विद्यतें । पूतऽबन्धंनी ॥ ९ ॥

इयमपिसौरी आसांस्तुतीनां समुद्रं समुद्रवत्पर्यवसानभूतंसूर्यं अग्रिमा अत्यन्तंश्रेष्ठा अस्मदीयास्तुतिरवतस्थेअवगच्छति यद्वा आसांप्रजानांकृत्विजांस्तुतिरितिसंबन्धः सवनं सूयतेसोमोत्रेतिसवनं यज्ञगृहं नरिष्यति नहिंस्यते किंतु प्रवर्धतइत्यर्थः यस्मिन्नायताविस्तीर्णा-नि स्तोत्राणि तत्सदनमिति अत्रास्मिन्यजमानगृहे क्रवणस्य स्तुतिकर्तुः हार्दि हृदयसं-बन्धि हृदयगतंकाम्यंफलं नरेजते नविचलति नमृषाभवति यत्र यस्मिन्स्तोतृगृहे मतिः स्तुतिः पूतबन्धनी पूतं सूर्यं अनुबध्नन्तीविद्यते अत्रनरेजतइति ॥ ९ ॥

अथदशमी—

सहिक्षत्रस्यंमनसस्यचित्तिंभिरेवावदस्यंयजतस्यसध्रेंः ।
अवत्सारस्यंस्पृणवामरण्वंभिःशविंष्ठंवाजंविदुषांचिदर्ध्यंम् ॥ १० ॥ २४ ॥

सः । हि । क्षत्रस्यं । मनसस्यं । चित्तिंऽभिः । एवऽवदस्यं ।
यजतस्यं । सध्रेंः । अवऽत्सारस्यं । स्पृणवाम । रण्वंऽभिः । शविंष्ठम् ।
वाजंम् । विदुषां । चित् । अर्ध्यंम् ॥ १० ॥ २४ ॥

इयमपिसौरी सहि सखलुसवितादेवः सर्वैःस्तुत्यः सर्वकामपूरकइत्यर्थः हिशब्दोलोक-वेदयोःप्रसिद्धिद्योतकः तस्मात्सकाशात् अत्रान्यचकृषयोत्रदृष्टलिंगाइत्युक्तत्वात् क्षत्रादयकृष-यः क्षत्रस्यमनसस्य एवावदस्ययजतस्य सध्रेः अवत्सारस्यचैषामृषीणामस्माकं रणभीर-

मणीयाभिश्चित्तिभिःमनोरथैः स्पृणवाम पूरयाम किंशविष्ठंवाजं अतिशयेनबलवदन्नंअन्नंवैवा-जइतिश्रुतेः। विदुषाचित् विपश्चिता अर्ध्यं समर्धनीयंस्पृणवाम क्षत्रादयोनयमितिसंबन्धः॥१०

॥ इतिचतुर्थस्यद्वितीयेचतुर्विंशोवर्गः ॥ २४ ॥

अथैकादशी—

श्येनआसामदितिःकक्ष्यो३मदोविश्ववारस्ययजतस्यमायिनः। समन्यमन्यमर्थयन्त्येतवेविदुर्विषाणंपरिपानमन्तिते ॥ ११ ॥

श्येनः। आसाम्। अदितिः। कक्ष्यः। मदः। विश्वऽवारस्य। यजतस्य। मायिनः। सम्। अन्यम्ऽअन्यम्। अर्थयन्ति। एतवे। विदुः। विऽसानम्। परिऽपानम्। अन्ति। ते ॥ ११ ॥

मददेवत्येयं विश्ववारादीनांत्रयाणामृषीणांस्वभूतः आसामपां सोमरसलक्षणानां मदः श्येनः शंसनीयगमनः शीघ्रंपातृसकाशगन्ता अदितिरदीनःअतिसमृद्धः कक्ष्यकक्ष्यपूरकश्चभवतीतिशेषः तेविश्ववारादयःसत्रेप्रवृत्ताएतवे सोमंप्राप्तुंतत्पानाय अन्यमन्यं परस्परंसमर्थयंति याचन्ते अनुज्ञां तेविषाणं विशेषेणमदस्यदातारं परिपानं अन्ति अन्तिके विदुर्जानंतिलभन्तेवा ॥११॥

अथद्वादशी—

सदापृणोयजतोविद्विषोवधीद्बाहुवृक्तःश्रुतवित्तर्योवःसचा। उभासवराप्रत्येतिभातिचयदींगणंभजतेसुप्रयावभिः ॥ १२ ॥

सदाऽपृणः। यजतः। वि। द्विषः। वधीत्। बाहुऽवृक्तः। श्रुतऽवित्। तर्यः। वः। सचा। उभा। सः। वरा। प्रति। एति। भाति। च। यत्। ईम्। गणम्। भजते। सुप्रयावऽभिः ॥ १२ ॥

सदापृणः सर्वदादानशीलः एतन्नामा यजतोयष्टाच बाहुवृक्तः बाहुभ्यांवृक्तदर्भश्च श्रुतवित् श्रुतस्यवेत्ताच तर्यश्च एतेषांपंचानांपरस्परापेक्षयाप्रत्येकमेकवचनं ससऋषिर्विद्विषः शत्रून् वधीद्धिंस्यात् वोयुष्माकं सचा सहितः युष्माभिःसहितइत्यर्थः सऋषिः वरा श्रेष्ठौ उभा

१ तै० ब्रा० १. ३. ६.।

उभौ इहलोकपरलोकविषयौकामौ प्रत्येति अभिगच्छति भातिच यद्यस्मादीमेनंगणं देवसंघं सुप्रयावभिः सुष्ठुप्रकर्षेणमिश्रयद्भिःस्तोत्रैः भजते तस्मादेवंभातीति ॥ १२ ॥

अथत्रयोदशी—

सुतंभरोयजमानस्यसत्पतिर्विश्वासामूधःसधियामुदंचनः ।
भरद्धेनूरसवच्छिश्रियेपयोनुब्रुवाणोअध्येतिनस्वपन् ॥ १३ ॥

सुतम्ऽभरः । यजमानस्य । सत्ऽपतिः । विश्वासाम् । ऊधः । सः । धियाम् । उत्ऽअंचनः । भरत् । धेनुः । रसऽवत् । शिश्रिये । पयः । अनुऽब्रुवाणः । अधि । एति । न । स्वपन् ॥ १३ ॥

यजमानस्यावत्सारस्य मम सुतंभरोयागनिर्वाहकएतन्नामाऋषिः सत्पतिः सतांविद्यमानानांफलानांपालयिता होतादाताभवतीत्यर्थः सच विश्वासांधियांसर्वेषांकर्मणां ऊधः उद्धततरंफलं उदंचनः ऊर्ध्वमुद्गमयिता फलप्रापकइत्यर्थः धेनुर्गौः रसवत् सारवत्पयोभरत्अहरत् तत्र पयःशिश्रिये श्रयतिचास्यसामर्थ्यात् तत्सर्वमनुब्रुवाणःअनुक्रमेणसंकीर्तयन् नस्वपन् स्वापमकुर्वन् अनवरतमध्येति स्मरति अवत्सारः सुतंभरस्तादृशइति ॥ १३ ॥

अथचतुर्दशी—

योजागारतमृचःकामयन्तेयोजागारतमुसामानियन्ति ।
योजागारतमयंसोमआहतवाहमस्मिसख्येन्योकाः ॥ १४ ॥

यः । जागार । तम् । ऋचः । कामयन्ते । यः । जागार । तम् । ऊँ इति । सामानि । यन्ति । यः । जागार । तम् । अयम् । सोमः । आह । तव । अहम् । अस्मि । सख्ये । निऽओकाः ॥ १४ ॥

योदेवोजागार सर्वदाविनिद्रोजागरूकोगृहेवर्तते तमृचः सर्वशास्त्रात्मिकाः कामयन्ते यश्च जागार तमु तमेव सामानि स्तोत्ररूपाणि यन्ति प्राप्नुवन्ति योजागारतमयं अभिषुतः सोमआह वक्ति मांस्वीकुर्विति हेअग्ने तादृशस्य तवसख्येसमानख्याने हितकरणेन्योकाः नियतस्थानोहं अस्मि भवामि ॥ १४ ॥

अथपंचदशी—

अ॒ग्निर्जा॑गार॒तमृचः॑कामयन्ते॒ग्निर्जा॑गार॒तमु॒सामा॑नियन्ति।
अ॒ग्निर्जा॑गार॒तम॒यंसोम॑आह॒तवा॒हम॑स्मिस॒ख्येन्यो॑काः ॥१५॥२५॥

अ॒ग्निः । जा॒गा॒र॒ । तम् । ऋचः॑ । का॒म॒य॒न्ते॒ । अ॒ग्निः । । जा॒गा॒र॒ ।
तम् । उँ॒ इति॑ । सामा॑नि । य॒न्ति॒ । अ॒ग्निः । जा॒गा॒र॒ । तम् । अ॒यम् ।
सोम॑ः । आ॒ह॒ । तव॑ । अ॒हम्। अ॒स्मि॒ ।स॒ख्ये । निऽओ॑काः॥१५॥२५॥

अग्निर्जागारेतिपंचदशी पूर्वयैवनिगदितव्याख्या यइत्यस्यस्थाने अग्निरितिविशेषः ॥१५॥

॥ इतिचतुर्थस्यद्वितीयेपंचविंशोवर्गः ॥ २५ ॥

॥ इतिपञ्चमेमण्डलेतृतीयोनुवाकः ॥ ३ ॥

अथचतुर्थेनुवाकेद्वादशसूक्तानि तत्रविदादिवइत्येकादशर्चंप्रथमंसूक्तं सदापृणोनामात्रेयऋषिः त्रिष्टुपछन्दः वैतदित्युक्तत्वादिदमपिवैश्वदेवं विदाएकादशसदापृणइत्यनुक्रमणिका विनियोगोलैंगिकः ।

तत्रप्रथमा—

वि॒दादि॒वोवि॒ष्यन्नाद्रि॑मु॒क्थैरा॑य॒त्याउ॒षसो॑अ॒र्चिनो॑गुः ।
अपा॑वृतव्र॒जिनी॒रुत्स्व॑गा॒द्विदु॒रो॒मानु॑षीर्दे॒वआ॑वः ॥ १ ॥

वि॒दाः । दि॒वः । वि॒ऽस्यन् । अद्रि॑म् । उ॒क्थैः । आ॒ऽय॒त्याः । उ॒षसः॑ ।
अ॒र्चिन॑ः । गु॒ः । अप॑ । अ॒वृत॒ । व्र॒जिनीः॑ । उत् । स्वः॑ । गा॒त् । वि ।
दुर॑ः । मानु॑षीः । दे॒वः । आ॒व॒रित्या॑वः ॥ १ ॥

अत्रेन्द्रादयोलिंगोक्तदेवताः अत्रांगिरसां पणिभिरपहृत्यगिरेरधःस्थापितानांगवामिन्द्रेणविमोकःप्रतिपाद्यते विदाः अवेदयदिन्द्रः किं गानिगूढाःइतिसंबन्धः किंकुर्वन् उक्थैरंगिरसांस्तुतिभिः निमित्तभूताभिः आद्रिं वज्रं विष्यन् प्रक्षिपन् रक्षकाणामुपरि गिरिभेदनायच विष्यन्आयत्याः आगामिन्याउषसःसंबन्धिनोर्चिनोरश्मयोगुःअगच्छन् सर्वत्रप्रसृताअभवन् अपावृत अपावृणोत् व्रजिनीः तमःपुंजवतीर्निशाः स्वः स्वरणशीलआदित्यः उद्गात् उदगात्

तथाकृत्वा मानुषीः मनुष्यसंबन्धिनीः दुरोद्वाराणि देवः सूर्योव्यावःव्यवृणोत् अन्धकारापनयनेनमनुष्यादिव्यवहारायाकरोदित्यर्थः ॥ १ ॥

अथद्वितीया—

विसूर्योअमतिंनश्रियंसादोर्वाद्गवांमाताजानतीगात् ।
धन्वर्णसोनद्यः१खादोअर्णाःस्थूणेवसुमितादृंहतद्यौः ॥ २ ॥

वि । सूर्यः । अमतिम् । न । श्रियम् । सात् । आ । ऊर्वात् । गवाम् । माता । जानती । गात् । धन्वऽअर्णसः । नद्यः । खादःऽअर्णाः । स्थूणाऽइव । सुऽमिता । दृंहत । द्यौः ॥ २ ॥

सूर्योदेवः श्रियंदीप्तिं विसात् विभजते प्रकाशयतीत्यर्थः अमतिंन रूपनामैतत् रूपमिवद्रव्यं यथा द्रव्याणि घटपटादीनिनीलपीतादिरूपंलभन्तेतद्वत् तथा गवांरश्मीनांमातोषा जानती सूर्यउदेष्यति मयाच व्युच्छनंकर्तव्यमितिजानती ऊर्वात् महतोन्तरिक्षात् आगादागच्छति तथानद्यश्च धन्वर्णसः धन्वतिर्गतिकर्मा धन्वंति गच्छंन्ति अर्णांसि यासु तास्तथोक्ताः दीर्घाभावश्छान्दसः खादोअर्णाः भक्षितकूलोदकाः कूलंकषाइत्यर्थः नद्यश्चैवंरूपाभवन्ति किंच द्यौश्चसुमिता सुष्ठुगृहेस्थापिता स्थूणेव गृहाधारस्तंभइव दृंहत दृढाभवत् एतत्सर्वंसूर्यस्याज्ञयेतिभावः ॥ २ ॥

अथतृतीया—

अस्माउक्थायपर्वतस्यगर्भोमहीनांजनुषेपूर्व्याय ।
विपर्वतोजिहीतसाधतद्यौराविवासन्तोदसयन्तभूम ॥ ३ ॥

अस्मै । उक्थाय । पर्वतस्य । गर्भः । महीनाम् । जनुषे । पूर्व्याय । वि । पर्वतः । जिहीत । साधत । द्यौः । आऽविवासन्तः । दसयन्त । भूम ॥ ३ ॥

अस्मै मह्यं उक्थाय स्तोत्रे पर्वतस्य पर्ववतोमेवस्य गर्भोगर्भस्थानीयमुदकं जिहीत चलति चालयतिवेन्द्रः कीदृशायास्मै महतीनां महीनांस्तुतीनां जनुषेउत्पादयित्रे पूर्व्याय प्रत्ना-य तदेवपुनरुच्यते पर्वतोमेघोविजिहीत द्यौश्च साधत साधयतिवृष्टिं आविवासन्तः सर्वतःप-रिचरन्तोंगिरसोभूमअत्यधिकंयन्त उपक्षपयन्त्यात्मानंकर्मभिः ॥ ३ ॥

अथचतुर्थी—

सूक्तेभिर्वोवचोभिर्देवजुंष्टैरिन्द्रान्व१ग्नीअवंसेहुवध्यै ।
उक्थेभिर्हिष्मांकवयंःसुयज्ञाआविवांसन्तोमरुतोयजंन्ति ॥ ४

सुऽउक्तेभिः । वः । वचःऽभिः । देवऽजुंष्टैः । इन्द्रा । नु । अग्नी इति अवसे । हुवध्यै । उक्थेभिः । हि । स्म । कवयः । सुऽयज्ञाः । आऽविवासन्तः । मरुतः । यजंन्ति ॥ ४ ॥

हेइन्द्रा हेअग्नी परस्परापेक्षयाप्रत्येकंद्विवचनं यद्यप्येकमेवपदं मध्येव्यवधानंछान्दसं हेइन्द्राग्नी वोयुवां व्यत्ययेनबहुवचनं देवजुष्टैः देवैःसेवनीयैः सूक्तेभिः सूक्तैः सुवचनैः शोभ-नगुणप्रकाशनप्रवणैः वचोभिरवसेस्मद्रक्षणाय हुवध्यै आह्वयामि नुक्षिप्रं युवामुक्थेभिः स्तो-त्रैः कवयोनूचानाः पूर्वेऋषयः सुयज्ञाः शोभनयागाः आविवासन्तः स्तुत्यादिनापरिचरन्तः मरुतोमरुत्सदृशाः कर्मसुशीघ्राः यजन्ति पूजयन्ति हिस्मेतिपूरणौ ॥ ४ ॥

अथपंचमी—

एतोन्व१द्यसुध्यो३ंभवांमप्रदुच्छुनांमिनवामावरींयः ।
आरेद्वेषांसिसनुतर्दधामायांमप्राञ्चोयजंमानमच्छं ॥ ५ ॥ २६ ॥

एतो इति । नु । अद्य । सुऽध्यः । भवाम । प्र । दुच्छुनाः । मिनवाम । वरीयः । आरे । द्वेषांसि । सनुतः । दधाम । अयाम । प्राञ्चः । यजंमानम् । अच्छ ॥ ५ ॥ २६ ॥

अयमंगिरसांवादः अद्यास्मिन्यागदिने नुक्षिप्रमेतोएतगच्छत सुध्यः शोभनकर्माणो-भवाम दुच्छुनाः द्विषः प्रमिनवाम प्रकर्षेणाहिंसाम वरीयोत्यन्तमित्यर्थः तदेवोच्यते सनुतः संभक्षणे द्वेषांसि यजमानस्यद्वेष्टॄन् आरे दूरे दधाम स्थापयाम यद्वा सनुतइत्यन्तर्हितनाम पूर्व प्रकाशवैरिणांवधउक्तः इदानीं प्रच्छन्नानामितिविवेकः तदर्थं यजमानंप्राचः सदापृणमवत्सारं चाच्छाभिमुखमयाम गच्छाम ॥ ५ ॥

॥ इतिचतुर्थस्यद्वितीयेषड्विंशोवर्गः ॥ २६ ॥

अथषष्ठी–

एताधियंकृणवामासखायोपयामातांकृणुतव्रजंगोः ।
ययामनुर्विशिशिप्रंजिगाययर्यावणिग्वङ्कुरापापुरीषम् ॥ ६ ॥

आ । इत । धियम् । कृणवाम । सखायः । अप । या । माता ।
कृणुत । व्रजम् । गोः । यया । मनुः । विशिऽशिप्रम् । जिगाय ।
यया । वणिक् । वंकुः । आप । पुरीषम् ॥ ६ ॥

इदमप्यंगिरसांवाक्यं एत आगच्छत आगत्यच धियं स्तुतिं कृणवाम करवाम हेसखा-यः परस्परंसखिभूताअंगिरसइत्यंगिरसांवचनं याधीः माता गवांनिर्मात्रीगोर्गवांव्रजंपणिभिर-पहृतं अपकृणुत अपावृणोत् ययाच मनुः विशिशिप्रं विगतहनुं शत्रुंजिगाय जितवान् यद्वा म-नुः सर्वस्यमन्तेन्द्रः विशिशिप्रोवृत्रः सतमस्माभिःकृतया स्तोमलक्षणयाधिया जिगाय याच वणिक् वणिगिवाल्पेनकर्मणा बहुफलाकांक्षी कक्षीवान् वंकुर्जलेच्छयावनगामी पुरीषं पूरक-मुदकमाप याभिः सुदानूऔशिजायवणिजेदीर्घश्रवसेमधुकोशेइतिहिश्रुतं ॥ ६ ॥

अथसप्तमी–

अनूनोदत्रहस्तंयतोअद्रिरार्चन्येनदशमासोनवंग्वाः ।
ऋतंयतीसरमागाअविन्दद्विश्वानिसत्याङ्गिराश्चकार ॥ ७ ॥

---

१ ऋ० सं० १. ७. ३५. ।

अनूनोत् । अत्र । हस्तऽयतः । अद्रिः । आर्चन् । येन । दश । मासः । नवऽग्वाः । ऋतम् । यती । सरमा । गाः । अविन्दत् । विश्वानि । सत्या । अंगिराः । चकार ॥ ७ ॥

अत्रास्मिन्यज्ञे अद्रिरभिषवग्रावा हस्तयतोहस्तेनसंहतःसन् अनूनोत् नौतिरत्रशब्दमात्रेवर्तते अशब्दयत् येनग्राव्णा तदभिषवेण दशमासोमासान् दशमासपर्यन्तं नवग्वा नवमासपर्यन्तं गवार्थमनुतिष्ठन्तोंगिरसोनवग्वाःनवगोयुक्तावा आर्चन् अपूजयन्निन्द्रं यद्वा दशसंख्याकामासोपेताः दशमासानुष्ठानाः अंगिरसोपरेनवग्वाश्चैतेसर्वेपि येनार्चन्ति नवग्वासुतसोमासइन्द्रमितिहिनिगमः । ऋतं सत्यंयज्ञंवायतीप्राप्नुवती सरमा सरणशीलास्तुतिरूपवाक् अंगिरसां गवार्थं इन्द्रेणप्रहितादेवशुनीवा गाअविन्दत् पणिभिरपहृताः विश्वानि सर्वाणिस्तुत्यादिलक्षणानि सत्या सत्यानि चकारांगिराः ॥ ७ ॥

अथाष्टमी—

विश्वेअस्याव्युषिमाहिनायाःसंयद्गोभिरङ्गिरसोनवन्त ।
उत्सआसांपरमेसधस्थऋतस्यपथासरमाविदद्गाः ॥ ८ ॥

विश्वे । अस्याः । विऽउषि । माहिनायाः । सम् । यत् । गोभिः । अंगिरसः । नवन्त । उत्सः । आसाम् । परमे । सधऽस्थे । ऋतस्य । पथा । सरमा । विदत् । गाः ॥ ८ ॥

विश्वे सर्वे अंगिरसोमाहिनायाः मंहनीयायाः अस्याउषसोव्युषि व्युच्छनेसति गवाभावरकेन्धकारे अपवृतेसति यद्यदा गोभिःसंनवन्त संजग्मिरे तदा आसांगवां उत्सः क्षाराद्युत्स्रवः परमे उत्कृष्टे सधस्थे सहस्थाने यज्ञे उपयुक्तोभवदित्यर्थः ऋतस्य सत्यस्य पथा मार्गेण सरमा वाक्देवशुनीवा गानिगूढाविदत् अलभत् यद्वा आसांगवां परमेसधस्थेसहस्थाने व्रजस्य निगूहनप्रदेशे उत्सः उदकस्यप्रस्रवणोवर्ततेबिलमित्यर्थः तेन ऋतस्योदकस्य पथा मार्गेण सरमा गाविदत् ॥ ८ ॥

---

१ ऋ०सं० ४. १. २५. ।

अथनवमी–

आसूर्योयातुसप्ताश्वःक्षेत्रंयदस्योर्वियादीर्घयाथे ।
रघुःश्येनःपतयदन्धोअच्छायुवाकविर्दीदयद्गोषुगच्छन् ॥ ९ ॥

आ । सूर्यः । यातु । सप्तऽअश्वः । क्षेत्रम् । यत् । अस्य । उर्विया । दीर्घऽयाथे । रघुः । श्येनः । पतयत् । अन्धः । अच्छ । युवा । कविः । दीदयत् । गोषु । गच्छन् ॥ ९ ॥

सूर्यः सर्वस्यप्रेरकोदेवः सप्ताश्वः सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वोवा आयातु अस्मदभिमुखमागच्छतु यद्यस्मादस्यसूर्यस्य दीर्घयाथे दीर्घगमने क्षेत्रं गंतव्यप्रदेशः उर्विया उरुअतिप्रभूतायामः सएवदेवोरघुः लघुगमनः सश्येनः शंसनीयगमनः अन्धोदीयमानंहविः अच्छाभिलक्ष्यपतयत् आगच्छति युवा सर्वत्रमिश्रयिता कविः क्रान्तदर्शी सन् गोषुरश्मिषुगच्छन् मध्येवर्तयन् दीदयत् दीप्यते यद्वा श्येनः सुपर्णः अंधअच्छपतयत् द्युलोकस्थंसोमलक्षणं देवानामन्नमस्मद्यागार्थमानेतुंतदभिमुखमगात् युवेत्यादि शिष्टंसमानम् ॥ ९ ॥

अथदशमी–

आसूर्योअरुहच्छुक्रमर्णोयुक्तयद्धरितोवीतपृष्ठाः ।
उद्नाननावमनयन्तधीराआशृण्वतीरापोअर्वागतिष्ठन् ॥ १० ॥

आ । सूर्यः । अरुहत् । शुक्रम् । अर्णः । अयुक्त । यत् । हरितः । वीतऽपृष्ठाः । उद्ना । न । नावम् । अनयन्त । धीराः । आऽशृण्वतीः । आपः । अर्वाक् । अतिष्ठन् ॥ १०॥

सूर्योदेवः शुक्रं दीप्तं अर्णउदकंप्रति आरुहत् सर्वतःप्रादुर्भवति यद्यस्मात् यदावा हरितोश्वान् वीतपृष्ठाः कान्तपृष्ठानयुक्त रथेअयोजयत् तदा तंसूर्यं धीराधीमन्तोयजमा-

नादयः उद्गा उदकेननावंन नावमिवानयन्त तदा आश्रृण्वतीः सर्वतोनुज्ञांकुर्वाणाआपो-अर्वाक्अवाङ्मुखाअतिष्ठन् अभवन् ॥ १० ॥

अथैकादशी–

धियंवोअप्सुदधिषेस्वर्षांययातरंदशमासोनवग्वाः ।
अयाधियास्यामदेवगोपाअयाधियातुतुर्यामात्यंहः ॥११॥२७॥

धियम् । वः । अप्ऽसु । दधिषे । स्वःऽसाम् । यया । अतरन् ।
दश । मासः । नवऽग्वाः । अया । धिया । स्याम । देवऽगोपाः ।
अया । धिया । तुतुर्याम । अति । अंहः ॥ ११ ॥ २७ ॥

हेदेवाः वोयुष्माकं धियं स्तुतिं अप्सु अप्निमित्तां स्वर्षां सर्वस्यदात्रीं दधिषे धारयामि व्यत्ययेनमध्यमः ययाधिया कर्मणानवग्वाः अंगिरसः दशमासःअतरन्समनुतिष्ठन्तः अया अनयाधिया देवगोपाः देवैर्गुप्ताःस्यामभवेम अयाधिया अंहः पापं अतितुतुर्याम अतितरेम ॥ ११ ॥

॥ इतिचतुर्थस्यद्वितीयेसप्तविंशोवर्गः॥ २७ ॥

हयोनविद्वानित्यष्टर्चंद्वितीयंसूक्तं प्रतिक्षत्रस्यार्षं अष्टमीद्वितीयाचत्रिष्टुभौ शिष्टाःषट्जगत्यः आदितःषड्वैश्वदेव्यः सप्तम्यष्टम्योर्देवपत्न्योदेवता तथाचानुक्रान्तं–हयोष्टौप्रतिक्षत्रोंत्यो-द्वचोदेवपत्नीस्तवोंत्यात्रिष्टुप्द्वितीयाचेति । सूक्तविनियोगोलैंगिकः ।

तत्रप्रथमा–

हयोनविद्वाँअयुजिस्वयंधुरितांवहामिप्रतरणीमवस्युवम् ।
नास्यावश्मिविमुचंनावृतंपुनर्विद्वान्पथःपुरएतऋजुनेषति ॥ १ ॥

हयः । न । विद्वान् । अयुजि । स्वयम् । धुरि । ताम् । वहामि ।
प्रऽतरणीम् । अवस्युवम् । न । अस्याः । वश्मि । विऽमुचम् । न ।
आऽवृतम् । पुनः । विद्वान् । पथः । पुरःऽएता । ऋजु । नेषति ॥ १ ॥

हयोन अश्वइव विद्वान् सर्वज्ञः प्रतिक्षत्रः स्वयंअनन्यप्रेरितःसन् धुरि यज्ञात्मिकायां अयुजि युक्तोभवत् तांधुरं प्रतरणीं प्रकर्षेणतारयित्रीं अवस्युवं रक्षयित्रीं वहामि धारयाम्यहमध्वर्युर्होतावा अस्याधुरोविमुचंविमोचनंपरित्यागं नवश्मि नकामये नावृतं पुनः पुनःआवरणं धारणमपि नचवश्मि ममकोभारइति तदेवोच्यते विद्वान् मार्गाभिज्ञोन्तर्यामीदेवः पुरएता पुरतोगन्तासन् पथोयज्ञमार्गान् ऋजुअकुटिलं नेषति प्रापयति ॥ १ ॥

अथद्वितीया—

अग्नइन्द्रवरुणमित्रदेवाःशर्धःप्रयन्तमारुतोतविष्णो ।
उभानासत्यारुद्रोअधग्नाःपूषाभगःसरस्वतीजुषन्त ॥ २ ॥

अग्ने । इन्द्र । वरुण । मित्र । देवाः । शर्धः । प्र । यन्त । मारुत । उत । विष्णो इति । उभा । नासत्या । रुद्रः । अध । ग्नाः । पूषा । भगः । सरस्वती । जुषन्त ॥ २ ॥

हेअग्ने इन्द्रवरुणमित्रदेवाःयूयं शर्धोबलमस्माकं प्रयन्त प्रापयत अत्रसर्वत्रपूर्वस्याविद्यमानत्वेनोत्तरस्यपादादित्वादनिघातः प्रथमस्यतु स्वतएवपादादित्वं उतअपिच हेमारुत मारुतानि मरुतांबलानि हेविष्णो यूयंशर्धः प्रयन्त विष्णोइत्यस्यउतेत्यनेनव्यवधानान्निघातः, किंच उभा उभौ नासत्या सत्यभूतौ रुद्रः अध अथ ग्नाः एतेषांदेवानांस्त्रियश्च पूषा भगः सरस्वतीच जुषन्त सेवन्तां अस्मदीयंयज्ञंस्तुतिंवा ॥ २ ॥

अथतृतीया—

इन्द्राग्नीमित्रावरुणादितिंस्वःपृथिवींद्यांमरुतःपर्वताँअपः ।
हुवेविष्णुंपूषणंब्रह्मणस्पतिंभगंनुशंसंसवितारमूतये ॥ ३ ॥

इन्द्राग्नी इति । मित्रावरुणा । अदितिम् । स्व१रितिस्वः । पृथिवीम् । द्याम् । मरुतः । पर्वतान् । अपः । हुवे । विष्णुम् । पूषणम् । ब्रह्मणः । पतिम् । भगम् । नु । शंसम् । सवितारम् । ऊतये ॥ ३ ॥

इन्द्रादिसवित्रन्तान् चतुर्दशदेवान् ऊतयेस्मद्रक्षणाय हुवे आह्वयामि स्तौमिवा स्वरि-त्यादित्यउच्यते स्वरणात् ॥ ३ ॥

अथचतुर्थी—

उतनोविष्णुरुतवातोअस्रिधोद्रविणोदाउतसोमोमयस्करत् ।
उतऋभवउतरायेनोअश्विनोतत्वष्टोतविभ्वानुमंसते ॥ ४ ॥

उत । नः । । विष्णुः । उत । वातः । अस्रिधः । द्रविणःऽदाः । उत ।
सोमः । मयः । करत् । उत । ऋभवः । उत । राये । नः । अश्विना ।
उत । त्वष्टा । उत । विऽभ्वा । अनु । मंसते ॥ ४ ॥

उत अपिच नोस्माकं विष्णुर्व्यापकोदेवोमयस्करत् मयइतिसुखनाम सुखंकरोतु उतापि च वातोवायुः अस्रिधोहिंसकःसन् मयस्करत् किंच द्रविणोदाः धनस्यदातासोमोपि मयस्करत् उतापिच ऋभवोनोस्मभ्यं राये धनाय अनुमंसते अनुमन्यन्तां उताश्विनाश्विनौच उतत्वष्टादेवः उतविभ्वा ऋभूणामन्यतमोदेवः एतेसर्वेपि अनुमंसते यद्वा अनुमंस्तइतिप्रत्येकंसंबन्धनीयम् ॥ ४ ॥

अथपंचमी—

उतत्यन्नोमारुतंशर्धआगमद्दिविक्षयंयजतंबर्हिरासदे ।
बृहस्पतिःशर्मपूषोतनोयमद्वरूथ्यं१वरुणोमित्रोअर्यमा ॥ ५ ॥

उत । त्यत् । नः । मारुतम् । शर्धः । आ । गमत् । दिविऽक्षयम् ।
यजतम् । बर्हिः । आऽसदे । बृहस्पतिः । शर्म । पूषा । उत ।
नः । यमत् । वरूथ्यम् । वरुणः । मित्रः । अर्यमा ॥ ५ ॥

उतापिच त्यत् तन्मारुतंशर्धोमरुतांबलं संघोनोस्मानागमदागच्छतु कीदृशंतच्छर्धः दि-विक्षयं द्युलोकेवर्तमानं यजतं पूज्यं किमर्थमागमनमितितदुच्यते बर्हिः बर्हिष्यासदे उपवेष्टुं उप-विश्यहविःस्वीकारायेत्यर्थः किंच बृहस्पतिर्देवः शर्म सुखं यमत् यच्छतु उतनोस्मभ्यं पूषापि यमत् कीदृशं शर्म वरूथ्यं वारयतिशीतवातादिकमितिवरूथंगृहं तदर्हंवरूथ्यं किंच वरुणाद-यस्त्रयोपिप्रत्येकंशर्मयच्छन्तु ॥ ५ ॥

अथषष्ठी–

उतत्येनःपर्वतासःसुशस्तयःसुदीतयोनद्य१स्त्रामणेभुवन् ।
भगोविभक्ताशवसावसागमदुरुव्यचाअदितिःश्रोतुमेहवम् ॥ ६ ॥

उत । त्ये । नः । पर्वतासः । सुऽशस्तयः । सुऽदीतयः । नद्यः ।
त्रामणे । भुवन् । भगः । विऽभक्ता । शवसा । अवसा ।
आ । गमत् । उरुऽव्यचाः । अदितिः । श्रोतु । मे । हवम् ॥ ६ ॥

उतापिच त्ये ते पर्वतासः पर्ववन्तोद्रयः सुशस्तयः शोभनस्तुतयः किंच सुदीतयः सुदानानद्यश्च त्रामणे पालने नोस्माकं भुवन्भवन्तु भगोदेवोविभक्ता धनानांविभागकर्ता दाता सन् शवसा अन्नेन अवसा रक्षणेनच सहागमदागच्छतु उरुव्यचाः प्रभूतव्याप्तिः अदितिः अदीना देवमाता मेहवं स्तुतिमाह्वानंवा श्रोतु शृणोतु ॥ ६ ॥

पत्नीसंयाजेषुदेवपत्नीनांदेवानांपत्नीरित्यादिकेद्वेयाज्यानुवाक्ये सूत्रितंच–देवानांपत्नीरुशतीरवन्तुनइतिद्वेइति । आग्निमारुतशस्त्रेप्येतेदेवानांपत्नीरुशतीरवन्तुनइतिद्वेराकामहमितिद्वेइतितयोर्मध्येप्रथमा ।

सूक्तेसप्तमी–

देवानांपत्नीरुशतीरवन्तुनःप्रावन्तुनस्तुजयेवाजसातये ।
याःपार्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःशर्मयच्छत ॥७॥

देवानाम् । पत्नीः । उशतीः । अवन्तु । नः । प्र । अवन्तु । नः ।
तुजये । वाजऽसातये । याः । पार्थिवासः । याः । अपाम् । अपि ।
व्रते । ताः । नः । देवीः । सुऽहवाः । शर्म । यच्छत ॥ ७ ॥

देवानांइन्द्रादीनां पत्नीः पत्न्यः उशतीः उशत्यः अस्मदीयांस्तुतिंकर्मवा कामयमानाः नोस्मानवन्तुरक्षन्तु तथा नोस्माकं तुजये बलवते पुत्राय वाजसातये अन्नलाभाय संग्रामाय वा प्रावन्तु प्रकर्षेणरक्षन्तु गच्छन्तुवा याः पार्थिवासः पृथिवीसंबन्धिन्यः याश्चापांउदकानां व्रतेकर्मण्यन्तरिक्षेवर्तन्ते ताहेदेवीर्देव्यः हेसुहवाः शोभनाह्वानाः यूयं नोस्मभ्यंशर्मयच्छत ॥७॥

अथाष्टमी–

उतग्नाव्र्यन्तुदेवपत्नीरिन्द्राण्य१ग्नाय्य१श्विनीराट् ।
आरोदसीवरुणानीशृणोतुव्यन्तुदेवीर्यऋतुर्जनीनाम् ॥ ८ ॥२८॥

उत । ग्नाः । व्यन्तु । देवऽपत्नीः । इन्द्राणी । अग्नायी । अश्विनी । राट् । आ । रोदसी इति । वरुणानी । शृणोतु । व्यन्तु । देवीः । यः । ऋतुः । जनीनाम् ॥ ८ ॥ २८ ॥

उतअपिच ग्नाः स्त्रियोदेवपत्नीर्देवपत्न्यः देवाःपतयोयासांताः तादृश्योव्यन्तु हविर्भक्षयन्तु ताविविच्योच्यन्ते इन्द्रस्यपत्नी अग्नाय्यग्नेःपत्नी अश्विनी अश्विनोःपत्नी राट् राजमाना किंच रोदसी रुद्रस्यपत्नीतियास्केनोक्तं(एवंसति विषितस्तुकारोदसीत्यत्र यथाआद्युदात्तमगृह्यतेनस्तस्तद्वदत्रापिभाव्यं तथापि शाकल्येनमहर्षिणैवमुक्तत्वात्तथैवद्रष्टव्यं) वरुणानी वरुणस्यपत्नी आसर्वतः प्रत्येकंश्शृणोतु किंच देवीः पत्नीसंयाजदेव्योव्यन्तुखादन्तुहविः योजनीनां देवजायानां ऋतुः कालः तदभिमानादेव्योपि शृण्वन्तु व्यन्तुच अत्रापिच ग्नाव्यन्तुदेवपत्न्यइत्यादिनिरुक्तंद्रष्टव्यम् ॥ ८ ॥

॥ इतिचतुर्थस्यद्वितीयेष्टाविंशोवर्गः ॥ २८ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ॥पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेद्वितीयोध्यायः॥२॥

---

१ नि० १२. ४६. ।

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

अथतृतीयोध्यायआरभ्यते तत्रप्रयुंजतीतिसप्तर्चंतृतीयंसूक्तं प्रतिरथस्यार्षंत्रैष्टुभं पूर्वत्रवैश्वदेवं वैतदित्युक्तत्वादिदमपिवैश्वदेवं प्रयुंजतीसप्तप्रतिरथइत्यनुक्रमणिका । विनियोगोलैंगिकः ।

तत्रप्रथमा—

ॐम् प्रयुञ्जतीदिवएतिब्रुवाणामहीमातादुहितुर्बोधयन्ती ।
आविवासन्तीयुवतिर्मनीषापितृभ्यआसदनेजोहुवाना ॥ १ ॥

प्रऽयुञ्जती । दिवः । एति । ब्रुवाणा । मही । माता । दुहितुः ।
बोधयन्ती । आऽविवासन्ती । युवतिः । मनीषा । पितृऽभ्यः ।
आ । सदने । जोहुवाना ॥ १ ॥

एषोषस्या प्रयुंजती प्राणिनःप्रस्तुतेषुकर्मसु दिवोद्युलोकादेतिआगच्छति ब्रुवाणा स्तूयमाना कर्मणिकर्तृप्रत्ययः मही महती माता प्रकाशस्यदेवानांवानिर्मात्री दुहितुः भूम्याबोधयन्तीबोधंकुर्वाणा तदुपजीव्यत्वाद्दुहितृत्वमुपचर्यते यद्वा दुहितुर्दिवइतिसंबन्धः उषसोदिवोदुहितृत्वंव्युच्छादुहितर्दिवइत्यादिषुप्रसिद्धं । अन्यत्रच दिवोदुहिताभुवनस्यपत्नीत्युषसोदुहितृत्वमाम्नातं । अतइदमधिगम्यते कदाचिद्द्यौरुषसोजायते उषाश्चदिवइति प्रजापतिर्वैस्वांदुहितरमभ्यध्यायद्दिवमित्यन्यआहुरुषसमित्यन्यइतिहिश्रूयते । लिंगंचदृश्यते कार्यकारणभावव्यत्यये अदितेर्दक्षोजायतदक्षाद्वदितिरिति । किंच आविवासन्ती परिचरन्ती युवतिः मिश्रयन्ती सर्वत्रनित्यतरुणीवा मनीषा स्तुतिमती पितृभ्यः तृतीयार्थेपंचमी पितृभिः पालकैर्देवैःसह सदने यागगृहे आसर्वतोजोहुवाना हूयमाना यद्वा पितृभ्यःकर्मणांपालकेभ्योयजमानेभ्यः इष्टप्रापणेनपालकेभ्योवा तेषामर्थायजोहुवाना ॥ १ ॥

---

१ ऋ० सं० ४. ४. २२. । २ ऋ० सं० ५. ५. २२. ।
३ ऐ० ब्रा० ३. ३३. । ४ ऋ. सं. ८. ३. १. ।

अथद्वितीया—

अजिरासस्तदपईयमानाआतस्थिवांसोअमृतस्यनाभिम् ।
अनन्तासउरवोविश्वतःसींपरिद्यावापृथिवीयन्तिपन्थाः ॥ २ ॥

अजिरासः । तत्ऽअपः । ईयमानाः । आतस्थिऽवांसः ।
अमृतस्य । नाभिम् । अनन्तासः । उरवः । विश्वतः । सीम् ।
परि । द्यावापृथिवी इति । यन्ति । पन्थाः ॥ २ ॥

अजिरासोगमनशीलाः अजिरिरच्प्रत्ययान्तोजिरशिशिरेत्यादिनानिपातितः, तदपः तदेवप्रकाशनरूपंकर्मयस्यतत्तादृशमुहरीयमानागच्छन्तः अमृतस्य सूर्यस्य नाभिं सन्नाहकं मंडलं अमृतस्योदकस्यवानाभिमन्तरिक्षं आतस्थिवांसः आतिष्ठन्तः अनन्तासःअपरिमिताः उरवोव्याप्ताः पन्थाः पतनशीलाः रश्मयोद्यावापृथिवी परिदिवंच पृथिवींचान्तरिक्षंच विश्वतः परितोयन्ति गच्छन्ति सीमितिपूरणः ॥ २ ॥

अथतृतीया—

उक्षासमुद्रोअरुषःसुपर्णःपूर्वस्ययोनिंपितुराविवेश ।
मध्येदिवोनिहितःपृश्निरश्माविचक्रमेरजसस्पात्यन्तौ ॥ ३ ॥

उक्षा । समुद्रः । अरुषः । सुऽपर्णः । पूर्वस्य । योनिम् । पितुः ।
आ । विवेश । मध्ये । दिवः । निऽहितः । पृश्निः । अश्मा ।
वि । चक्रमे । रजसः । पाति । अन्तौ ॥ ३ ॥

सौर्योयंतृचः उक्षा उदकस्यकामानांवासेक्ता समुद्रः समुन्दनः यद्वा संमोदन्तेतस्मिन्देवाइतिसमुद्रः अरुषः आरोचमानः सुपर्णः सुगमनः पूर्वस्य पूर्वावयवलक्षणेयंपूर्वदिगवयवस्य पितुः पालकस्यान्तरिक्षस्य योनिमुत्पादकमवयवमाविवेश आविष्टवान् पश्चाद्दिवोमध्येनिहितः पृश्निः प्राश्नुत एनंवर्णइति पृश्निरादित्यः अश्मा सर्वत्रव्याप्तः लुप्तोपमावा अश्मसदृशः रजसोन्तरिक्षस्यान्तौ पूर्वापरभागौ विचक्रमे विक्रमते पातिचजगत् जगद्रक्षार्थंक्रमतइत्यर्थः ॥ ३ ॥

अथचतुर्थी—

चत्वारईंबिभ्रतिक्षेमयन्तोदशगर्भंचरसेधापयन्ते ।
त्रिधातवःपरमाअस्यगावोदिवश्चरन्तिपरिसद्योअन्तान् ॥ ४ ॥

चत्वारः । ईम् । बिभ्रति । क्षेमऽयन्तः । दश । गर्भम् । चरसे ।
धापयन्ते । त्रिऽधातवः । परमाः । अस्य । गावः । दिवः ।
चरन्ति । परि । सद्यः । अन्तान् ॥ ४ ॥

चत्वारऋत्विजः ईमेनमादित्यं क्षेमयन्त क्षेममात्मनइच्छन्तोबिभ्रतिधारयन्ति हविर्भिः स्तुतिभिश्च किंच दशदिशोगर्भं गर्भवन्मध्येउत्पन्नमेनं चरसेचरणाय उदयास्तमयव्यवहाराय धापयन्ते गमयन्ति त्रिधातवः त्रिप्रकाराःशीतोष्णवर्षभेदेनत्रिविधाः अस्यादित्यस्य परमाः उत्कृष्टागावोरश्मयोदिवोन्तरिक्षस्यान्तान् परि परितः सद्यः उदयानन्तरमेवचरन्तिगच्छन्ति ॥ ४ ॥

अथपञ्चमी—

इदंवपुर्निवचनंजनासश्चरन्तियन्नद्यस्तस्थुरापः ।
द्वेयदींबिभृतोमातुरन्येइहेहजातेयम्याऽसबन्धू ॥ ५ ॥

इदम् । वपुः । निऽवचनम् । जनासः । चरन्ति । यत् । नद्यः ।
तस्थुः । आपः । द्वे इति । यत् । ईम् । बिभृतः । मातुः । अन्ये इति ।
इहऽइह । जाते इति । यम्या । सबन्धूइतिसऽबन्धू ॥ ५ ॥

जनासोहेजनाऋत्विजः इदंपुरतोदृश्यमानंवपुः शरीरमंडलं निवचनं स्तुत्यंभवतीतिशेषः यन्मंडलंउपजीव्य नद्यश्चरन्ति प्रवहन्ति आपश्च यन्मंडलमधितस्थुः मंडलाधीनत्वात्तासां ईमेतदुक्तलक्षणं यन्मंडलं द्वे अहोरात्रे मातुर्निर्मातुः मातृस्थानीयादन्तरिक्षादन्ये इहेहजाते इहचेहचसूर्येजाते निष्पन्ने यम्या यम्ये नियमनीयेयुग्मभूतेवा सबन्धू समानबले समानबन्धने उभयोरप्येकएवसूर्योबन्धकोक्षोम्नयोस्तादृश्यौबिभृतोधारयतः ॥ ५ ॥

अथषष्ठी—

वितन्वतेधियोअस्माअपांसिवस्त्रापुत्रायमातरोवयन्ति ।
उपप्रक्षेवृषणोमोदमानादिवस्पथावध्वोयन्त्यच्छ ॥ ६ ॥

वि । तन्वते । धियः । अस्मै । अपांसि । वस्त्रा । पुत्राय ।
मातरः । वयन्ति । उपऽप्रक्षे । वृषणः । मोदमानाः । दिवः ।
पथा । वध्वः । यन्ति । अच्छ ॥ ६ ॥

अस्मैसूर्याय धियः स्तुतीः अपांसि कर्माणिचवितन्वते विस्तारयन्ति यजमानाः पुत्राय पुत्रस्थानीयाय मातरोनिर्मात्र्यः उषसोदिशोवा वस्त्रा वस्त्राणि वयन्ति निष्पादयन्ति वस्त्रसदृशानितेजांसिनिबिडानिसंपादयन्तीत्यर्थः वृषणः सेक्तुःसूर्यस्य उपप्रक्षे उपपर्चनेसं-पर्केसति मोदमानाहृष्यन्तोवध्वोवधूस्थानीयाःरश्मयोदिवस्पथा सूर्यसंबन्धिनामार्गेणाच्छा-स्मदभिमुखं यन्ति गच्छन्तिप्रसरन्ति ॥ ६ ॥

अथसप्तमी—

तदस्तुमित्रावरुणातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तम् ।
अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ॥ ७ ॥ १ ॥

तत् । अस्तु । मित्रावरुणा । तत् । अग्ने । शम् । योः ।
अस्मभ्यम् । इदम् । अस्तु । शस्तम् । अशीमहि । गाधम् । उत ।
प्रतिऽस्थाम् । नमः । दिवे । बृहते । सदनाय ॥ ७ ॥ १ ॥

अत्रलिंगमिद्धादेवताः हेमित्रावरुणा मित्रावरुणौ तत् इदंसूक्तंशस्तम् स्तुतमस्तु भवतु हेअग्ने तत्सूक्तंशस्तमस्तु अस्मभ्यं शं सुखाय योर्दुःखानाममिश्रणायेदं शस्तमस्तु व-यंचाशीमहि प्राप्नुयाम गाधं स्थितिं उतापिच प्रतिष्ठां स्थितेरविच्छित्तिंचाशीमहि नमोनम-स्करोमि दिवे द्योतमानाय सूर्याय बृहते महते सादनायाश्रयायविश्वस्य ॥ ७ ॥

॥ इतिचतुर्थस्यतृतीयेप्रथमोवर्गः ॥ १ ॥

कदुप्रियायेतिपंचर्चंचतुर्थंसूक्तं प्रतिभानुर्नामात्रेयऋषिः जगतीछन्दः विश्वेदेवादेवताः अत्रानुक्रमणिका—कदुपंचप्रतिभानुर्जागतमिति । आभिप्लविकेपंचमेहनिवैश्वदेवशस्त्रेइदंसूक्तंनि-विद्धानं सूत्रितंच—कदुप्रियायेतिवैश्वदेवमिति ।

तत्रप्रथमा—

कदुप्रियायधाम्नेमनामहेस्वक्षत्रायस्वयशसेमहेवयम् ।
आमेन्यस्यरजसोयदभ्रआँअपोवृणानावितनोतिमायिनी ॥ १ ॥

कत् । ऊँ इति । प्रियाय । धाम्ने । मनामहे । स्वऽक्षत्राय ।
स्वऽयशसे । महे । वयम् । आऽमेन्यस्य । रजसः । यत् । अभ्रे ।
आ । अपः । वृणाना । विऽतनोति । मायिनी ॥ १ ॥

अत्रवैद्युताग्निसंस्तवः कदु कदा उइतिपूरणः प्रियाय सर्वेषांप्रियभूताय वृष्टिद्वारा हविरादिप्रयोजकत्वात्सर्वप्रियत्वमस्यप्रसिद्धं तादृशाय धाम्ने तेजसे वैद्युताय उत्तरवाक्ये अभ्रेपोवितनोतीतिवक्ष्यमाणत्वादिदंलक्ष्यते कीदृशाय स्वक्षत्राय स्वभूतबलाय किंच स्वयशसे स्वभूतान्नाय सर्वमप्यन्नंह्यस्यस्वं महे महते पूज्याय वयं कदा मनामहे स्तवाम यत् उत्तरत्रस्त्रीलिंगनिर्देशात् येतिविपरिणामयितव्यम् या आग्नेयीशक्तिः आमेन्यस्य समन्तान्मातव्यस्य रजसोन्तरिक्षस्य अपरिमितमपिनभइयदितिसर्वैर्मीयते संबन्धिनि अभ्रे मेघे आअधि मेघस्योपरि अपउदकानि वृष्टिलक्षणानि वितनोति विस्तारयति वृणाना आच्छादयन्तीसेव्यमानावा मायिनी मायेतिप्रज्ञानाम प्रज्ञावतीसती यत् यस्यसंबन्धिनीमाध्यमिकीवागितिवायोज्यम् ॥ १ ॥

अथद्वितीया—

ताअंत्नतवयुनंवीरवंक्षणंसमान्यावृतयाविश्वमारजः ।
अपोअपाचीरपराअपेजतेप्रपूर्वाभिस्तिरतेदेवयुर्जनः ॥ २ ॥

ताः । अत्नत । वयुनंम् । वीरऽवंक्षणम् । समान्या । वृतयां ।
विश्वंम् । आ । रजंः । अपो इतिं । अपांचीः । अपंराः ।
अपं । ईजते । प्र । पूर्वाभिः । तिरते । देवऽयुः । जनंः ॥ २ ॥

इयमुषस्या ताउषसः अत्नत वितन्वन्ति किं वयुनं प्रज्ञानं कीदृशं वीरवक्षणं वीरैर्ऋत्विग्भिर्वहनीयं यद्वा वंक्षणाः कार्यवोढारोयेनप्रर्यन्तेतत्तादृशं किंच समान्या एकरूपया वृतया आवरकयादीप्त्या विश्वमासर्वमपिरजःजगदत्नत एवंसति देवयुः देवकामोजनः अपाचीः अपांचनाः प्रतिनिवृत्तमुखीः अपरा अन्याआगामिनीरुषसःअपोएजते अपचालयति अपरोपशब्दःपूरणः सर्वाभिस्ताभिःप्रतिरते प्रपूर्वस्तिरतिर्वर्धनार्थः वर्धयतिस्वमनीषां वर्धतेवास्वयम ॥ २ ॥

अथतृतीया—

आग्रावंभिरहन्येभिरक्तुभिर्वरिष्ठंवज्रमाजिघर्तिमायिनि ।
शतंवायस्यंप्रचरन्त्स्वेदमेसंवर्तयन्तोविचवर्तयन्नहा ॥ ३ ॥

आ । ग्रावं॑ऽभिः । अ॒ह॒न्ये॑भिः । अ॒क्तुऽभिः॑ । वरि॑ष्ठम् । वज्र॑म् ।
आ । जि॒घ॒र्ति॒ । मा॒यिनि॑ । श॒तम् । वा॒ । यस्य॑ । प्र॒ऽचर॑न् । स्वे ।
दमे॑ । स॒म्ऽव॒र्तय॑न्तः । वि । च॒ । व॒र्तय॑न् । अहा॑ ॥ ३ ॥

अत्रपूर्वार्धेइन्द्रउच्यते उत्तरार्धेइन्द्रात्मासूर्यः आहूयतइतिशेषः कैः अहन्येभिः अहनि संपादितैः अक्तुभीरात्रिभिः तत्रनिष्पन्नैरित्यर्थः तथाविधैर्ग्रावभिः साध्ये साधनशब्दः ग्रावसाध्यैरभिषवैर्निमित्तभूतैः आगत्यात्र सोमीसन् मायिनि वृत्रेनिमित्तेसति वरिष्ठमुरुतरंवज्रं आसर्वतोजिघर्ति चालयतिदीपयतिवा किंच वाशब्दश्चार्थे यस्येन्द्रात्मकस्यादित्यस्य शतं शतसंख्याकारश्मयः स्वेदमे स्वकीयेगृहे आकाशे प्रचरन् प्रचरन्ति किंकुर्वन्तः प्राणिनोनाशयन्तः यद्वा अहा अहानिदिवसान्संवर्तयन्तः सम्यक्प्रवर्तयन्तःविचवर्तयन् अहानिनिवर्तयन्तिगतान्येवपुनःप्रापयन्तिच तपपरिस्पंदाधीनत्वात्प्राणिनामायुःक्षयस्याहोरात्रादिव्यवहारस्यच ॥ ३ ॥

अथचतुर्थी—

ताम॑स्यरी॒तिंप॑र॒शोरि॑व॒प्रत्यनी॑कमख्यंभु॒जेअ॑स्य॒वर्प॑सः ।
सचा॒यदि॑पितु॒मन्त॑मिव॒क्षयं॒रत्नं॒दधा॑ति॒भर॑हूतयेवि॒शे ॥ ४ ॥

ताम् । अ॒स्य॒ । री॒तिम् । प॒र॒शोःऽइ॑व । प्रति॑ । अनी॑कम् ।
अ॒ख्य॒म् । भु॒जे । अ॒स्य॒ । वर्प॑सः । सचा॑ । यदि॑ । पि॒तु॒मन्त॑म्ऽइव ।
क्षय॑म् । रत्न॑म् । दधा॑ति । भर॑ऽहूतये । वि॒शे ॥ ४

इयमाग्नेयी तां प्रसिद्धामस्याग्नेःरीतिंस्वभावगतिंवा परशोरिवप्रतिपरशोः प्रतिनिधिमिव पश्यामि परशुर्यथास्वस्वामिन्यभिमतंसाधयतितद्वदित्यर्थः अस्य वर्पसोरूपवतोस्यादित्यस्यानीकंरश्मिसमूहं भुजे भोगाय अख्यं कथयाम्यहं यदि यस्मात् सचदेवः सचात्मत्सहायः सन् पितुमंतं अन्नवन्तं क्षयमिव निवासमिव भरहूतये संग्रामेयज्ञेवा आह्वानयुक्ताय विशे यजमानाय रत्नं रमणीयंधनं दधाति धारयति उभयमपिददातीत्यर्थः ॥ ४ ॥

अथपंचमी—

सजि॒ह्वया॒चतु॑रनीकऋञ्जते॒चारु॒वसा॑नो॒वरु॑णो॒यत॑न्न॒रिम् ।
नतस्य॑विद्मपुरुष॒त्वता॑व॒यंयतो॒भगः॑सवि॒तादाति॒वार्य॑म् ॥ ५ ॥३॥

सः । जिह्वया । चतुः॒ऽअनीकः । ऋञ्जते । चारु । वसानः । वरुणः ।
यतन् । अरिम् । न । तस्य । विद्म । पुरुषत्वता । वयम् । यतः ।
भर्गः । सविता । दाति । वार्यम् ॥ ५ ॥ २ ॥

सोग्निश्चतुरनीकः चतुर्दिक्षुप्रसृतज्वालःसन् जिह्वया ऋंजते गच्छति घृतादिकं यद्वा जिह्वयाचतुरनीकःसन् ऋंजते अलंकरोतिस्वात्मानं किंकुर्वन् चारु चरणीयं तेजोवसानआच्छादयन् वरुणस्तमोवारकःसन् अरिममित्रं यतन् उद्धरन् तस्यतमित्यर्थः तंनविद्म नजानीमः वयं पुरुषत्वता पुरुषत्वेन कामानांपूरकत्वेनवायुक्तं अपरोभावप्रत्ययःपूरणः यतोयं भर्गोमहान्भजनीयः सविता प्रेरकोदेवोदाति यच्छति वार्यं वरणीयंधनं ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेद्वितीयोवर्गः ॥ २ ॥

देवंवइतिपंचर्चंपंचमंसूक्तं आत्रेयस्यप्रतिप्रभस्यार्षं त्रैष्टुभं वैश्वदेवम् देवंवःप्रतिप्रभोत्या-तृणपाणिरित्यनुक्रमणिका । विनियोगोलैंगिकः ।

तत्रप्रथमा—

देवंवोअद्यसवितारमेषेभगंचरत्नंविभजंन्तमायोः ।
आवांनरापुरुभुजाववृत्यांदिवेदिवेचिदश्विनासखीयन् ॥ १ ॥

देवम् । वः । अद्य । सवितारम् । आ । ईषे । भगम् । च । रत्नम् ।
विऽभजन्तम् । आयोः । आ । वाम् । नरा । पुरुऽभुजा । ववृत्याम् ।
दिवेऽदिवे । चित् । अश्विना । सखिऽयन् ॥ १ ॥

देवं द्योतमानं सवितारं सर्वस्याभ्यनुज्ञातारं वः त्वामित्यर्थः यद्वा होतुरिदंवाक्यं वोयज-मानेभ्योयुष्मभ्यमर्थाय अद्य इदानीं आईषेउपगच्छामि भगंच भजनीयंदेवं आयोर्मनुष्यस्य यजमानस्य रत्नं रमणीयं हविर्विभजन्तम भगोवांविभजत्विति हि भगस्यविभजनंप्रसिद्धं रा-योविभक्तासंभरश्चवस्वः । भगोविभक्ताशवसेतिचश्रुतिः । यद्वा चतुर्थ्यर्थेषष्ठी यजमानार्थं रत्नं रमणीयंधनं विभजन्तं हेनरा नेतारौ हेपुरुभुजा पुरुभुंजातेइतिपुरुभुजौ अश्विना अश्विनौ वां युवां दिवेदिवे प्रतिदिनं आववृत्यां आवर्तयामिअस्मदभिमुखं सखीयन् युवयोःसखित्व-मिच्छन् चिदितिपूरणः ॥ १ ॥

---

१ ऋ० सं० ३. ५. २३. । २ ऋ० सं० ४. २. २८. ।

अथद्वितीया—

प्रतिप्रयाणमसुरस्यविद्वान्त्सूक्तैर्देवंसवितारंदुवस्य ।
उपब्रुवीतनमसाविजानञ्ज्येष्ठंचरत्नंविभजन्तमायोः ॥ २ ॥

प्रति । प्रऽयानम् । असुरस्य । विद्वान् । सुऽउक्तैः । देवम् ।
सवितारम् । दुवस्य । उप । ब्रुवीत । नमसा । विऽजानन् ।
ज्येष्ठम् । च । रत्नम् । विऽभजन्तम् । आयोः ॥ २ ॥

असुरस्य शत्रूणांनिरसितुः सवितुः प्रतिप्रयाणं प्रत्यागतिं विद्वान् जानन् सूक्तैः सवितारंदेवं दुवस्य परिचर हेअन्तरात्मन् किंच आयोर्मनुष्याय ज्येष्ठं रत्नंधनंच विभजंतं ददतमित्यर्थः नमसा नमस्कारेण हविषावा विजानन् विशेषेणभावयन्नित्यर्थः यद्वान्तर्णीतण्यर्थोयं ज्ञापयन् उपब्रुवीत स्तौतुभवान् ॥ २ ॥

अथतृतीया—

अदत्रयादयतेवार्याणिपूषाभगोअदितिर्वस्तउस्रः ।
इन्द्रोविष्णुर्वरुणोमित्रोअग्निरहानिभद्राजनयन्तदस्माः ॥ ३ ॥

अदत्रऽया । दयते । वार्याणि । पूषा । भगः । अदितिः ।
वस्ते । उस्रः । इन्द्रः । विष्णुः । वरुणः । मित्रः । अग्निः ।
अहानि । भद्रा । जनयन्त । दस्माः ॥ ३ ॥

अयमग्निरदत्रया अदनीयानि (अदेरौणादिकोऽत्रप्रत्ययः सुपांसुलुगितियाजादेशः अथवा अत्तीत्यदत्राजिह्वातयावार्याणि वरणीयानि) काष्ठानि दयते दयतिरनेककर्मा अत्रदहने वर्तते दहतीत्यर्थः सामर्थ्यादग्निरितिगम्यते यद्वा अदनीयानि वरणीयानि अन्नानि दयते ददातियजमानाय दयदानगतिहिंसाबलाख्यानेषु कीदृशोग्निः पूषा पोषकः भगोभजनीयः अदितिरखंडनीयः यद्वा पूषादयस्त्रयोपिप्रत्येकं अदनीयानि वार्याणिचान्नानिदयते उस्रःसूर्यो वस्तेआच्छादयति सामर्थ्यात्तेजांसि इन्द्रादयःपंचापिदेवाः दस्माः दर्शनीयाः अहानि सर्वाण्यागन्तॄणि भद्रा शोभनीयानि जनयन्त जनयन्ति दिवसानां यागदानादिविशिष्टत्वमेवभद्रत्वम् ॥ ३ ॥

अथचतुर्थी—

तन्नोअनर्वासविितावरूथंतत्सिन्धवइषयन्तोअनुग्मन् ।
उपयद्वोचेअध्वरस्यहोतारायःस्यामपतयोवाजरत्नाः ॥ ४ ॥

तत् । नः । अनर्वा । सविता । वरूथम् । तत् । सिन्धवः ।
इषयन्तः । अनु । ग्मन् । उप । यत् । वोचे । अध्वरस्य ।
होता । रायः । स्याम । पतयः । वाजऽरत्नाः ॥ ४ ॥

तत्प्रसिद्धं वरूथं वरणीयमस्मदभिमतंधनं नोस्मभ्यं अनर्वा अप्रत्यृतः केनाप्यतिरस्कृतः सवितादेवः प्रयच्छत्विितिशेषः तद्धनं सिन्धवः स्यन्दनशीलाइषयन्तोगच्छन्त्योनद्यः अनु अनुसृत्य ग्मन् गच्छन्तु धनंदातुंगच्छन्त्वित्यर्थः यद्यस्मात् अध्वरस्य यागस्य होता होमनिष्पादकोहं उपवोचे उपेत्य ब्रवीमि तस्मात्तत्प्रयच्छन्त्वितिशेषः वयंचात्रयोरायोधनस्य बहुविधस्य पतयः स्वामिनः स्याम भवेम वाजरत्नाः अन्नेनबलेनवारमणीयाः अथवा यद्यस्माद्वोचेस्तौमि तस्मात्सविता नोवरूथमागच्छतु तस्मान्नद्यश्चनोवरूथं यज्ञमनुग्मन् अनुगच्छंत्विितिवायोज्यम ॥ ४ ॥

अथपञ्चमी—

प्रयेवसुभ्यईवदानमोदुर्येमित्रेवरुणेसूक्तवाचः ।
अवैत्वभ्वंकृणुतावरीयोदिवस्पृथिव्योरवसामदेम ॥ ५ ॥ ३ ॥

प्र । ये । वसुऽभ्यः । ईवत् । आ । नमः । दुः । ये । मित्रे ।
वरुणे । सूक्तऽवाचः । अव । एतु । अभ्वम् । कृणुत । वरीयः ।
दिवःपृथिव्योः । अवसा । मदेम ॥ ५ ॥ ३ ॥

येयजमानाः वसुभ्योयज्ञनिवासेभ्योदेवेभ्यः ईवत् गमनवत् नमोन्नंपश्वात्मकं प्रदुः प्रादुः येचमित्रेदेवेवरुणेच सूक्तवाचः सूक्तवचसोभवन्ति तानस्मानभ्वं महद्धनं तेजोवा अवैतु अवगच्छतु हेदेवाः कृणुत कुरुतच एतेभ्योवरीयउरुतरं सुखं दिवस्पृथिव्योर्द्यावापृथिव्योरवसारक्षणेन मदेम हृष्येम ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेतृतीयोवर्गः ॥ ३ ॥

विश्वोदेवस्येतिपंचर्चंषष्ठंसूक्तं स्वस्त्यात्रेयमुनेरार्षंवैश्वदेवं पंचमीपंक्तिः आद्याश्चतस्रोनुष्टुभः तदुक्तमनुक्रमण्यां—विश्वःस्वस्त्यात्रेयःपंक्त्यन्तमिति । पृष्ठ्याभिप्लवषडहयोःप्रथमेहनि वैश्वदेवशस्त्रे विश्वोदेवस्येतिप्रतिपत्तृचस्याद्यः सूत्रितंच—विश्वोदेवस्यनेतुरित्येकेति । आभिप्लविकेषुद्वितीयचतुर्थषष्ठेष्वहःसुएषैववैश्वदेवस्यशस्त्रस्यप्रतिपद्युग्मेष्वेवमभिप्लवइतिसूत्रितत्वात् ।

तत्रप्रथमा—

विश्वो॑दे॒वस्य॑ने॒तुर्मर्तो॑वुरीतस॒ख्यम् ।
विश्वो॑रा॒यइ॑षुध्यतिद्यु॒म्नंवृ॑णीतपु॒ष्यसे॑ ॥ १ ॥

विश्वः॑ । दे॒वस्य॑ । ने॒तुः । मर्तः॑ । वु॒री॒त॒ । स॒ख्यम् । विश्वः॑ ।
रा॒ये । इ॒षु॒ध्य॒ति॒ । द्यु॒म्नम् । वृ॒णी॒त॒ । पु॒ष्यसे॑ ॥ १ ॥

विश्वः सर्वोमर्तोनेतुः देवस्यसवितुरित्यर्थः तस्यसख्यं वुरीत वृणीत विश्वोजनो रायेधनस्य इषुध्यति पंचमलकारः ईशीत तस्यानुग्रहात् सर्वोजनोद्युम्नंधनं वृणीत सवितारं पुष्यसे पुष्ट्यै पर्याप्तंधनम् ॥ १ ॥

अथद्वितीया—

तेते॑देवनेत॒र्येचे॒माँअ॑नु॒शसे॑ । तेरा॒यातेह्या॒३॑पृचे॒सचे॑महिस॒चथ्यैः॑ ॥२॥

ते । ते॒ । दे॒व॒ । ने॒तः॒ । ये । च॒ । इ॒मान् । अ॒नु॒ऽशसे॑ । ते ।
रा॒या । ते । हि । आ॒ऽपृचे॑ । सचे॑महि । स॒च॒थ्यैः॑ ॥ २ ॥

हेनेतर्देव ते तव स्वभूतास्तेवयंयजमानाः येचान्ये इमान् विभक्तिव्यत्ययः इमे होत्रादयः अनुशसे शंसितुंप्रभवन्ति तेपित्वदीयाः यद्वा इमानन्यानिन्द्रादीननुशसे क्रमेणशंसितुंप्रभवन्ति एकैववामहानात्मादेवतासस्सूर्यः सहिसर्वभूतात्मेत्युक्तत्वादितरासांदेवतानां तदन्तर्भावादितिभावः नकेवलं त्वच्छंसकाएवेत्यर्थः ते उभे वयं रायाधनेन सचेमहीतिसंबन्धः तेहि तेखलु आपृचे आपर्चनीयाः (कृत्यार्थेकेन्प्रत्ययः कृन्मेजन्तइत्यव्ययत्वाद्विभक्तेरदर्शनं) सचथ्यैः सर्वैःकामैः सचेमहि संगच्छेमहि ॥ २ ॥

अथतृतीया–

अतोनआनॄनतिथीनतःपत्नीर्दशस्यत ।
आरेविश्वंपथेष्ठांद्विषोयुयोतुयूयुविः ॥ ३ ॥

अतः । नः । आ । नॄन् । अतिथीन् । अतः । पत्नीः । दशस्यत ।
आरे । विश्वम् । पथेऽस्थाम् । द्विषः । युयोतु । युयुविः ॥ ३ ॥

अतः अस्मिन्यज्ञेसार्वविभक्तिकस्तसिः नोस्माकमृत्विजां नॄन् नेतॄन् अतिथीन् तद्वत्पूज्यानदेवान् आदशस्यत सर्वतःपरिचरत अतोस्मिन्यज्ञे पत्नीर्देवानांपत्नीरपि आदशस्यतहविःप्रदानादिना यद्वा नोस्मभ्यं नॄन् पुत्रभृत्यादीन् अतिथीन्पत्नीश्च एतत्त्रयमत्रदशस्यत हेदेवाः प्रयच्छत आरे दूरे विश्वं सर्वं पथेष्ठां मार्गेवर्तमानं वैरिणं द्विषः अन्यानपि द्विषोद्वेष्टॄन् युयोतु पृथक्करोतुदेवसंघःसवितावा युयुविः सर्वस्यामिश्रयिता पृथक्कर्ता ॥ ३ ॥

अथचतुर्थी–

यत्रवह्निरभिहितोदुद्रवद्द्रोण्यःपशुः ।
नृमणावीरपस्त्योर्णाधीरेवसनिता ॥ ४ ॥

यत्र । वह्निः । अभिऽहितः । दुद्रवत् । द्रोण्यः । पशुः । नृऽमनाः ।
वीरऽपस्त्यः । अर्णा । धीराऽइव । सनिता ॥ ४ ॥

यत्र यस्मिन्यज्ञे वह्निर्यज्ञस्यवोढा अभिहितोयूपंप्रापितोद्रोण्योयूपार्हःपशुः दुद्रवत् गच्छतियूपंप्रति तत्र नृमणाः यजमानमनाः सविता वीरपस्त्यः वीराऋत्विग्यजमानाःपुत्रभृत्यादयोवा तद्वत्पस्त्यंगृहंयस्यसतादृशः प्रेरितगृहोवा पुत्राद्युपेतगृहप्रदइत्यर्थः सनिता संभक्ताभवति अर्णा अरणकुशलाधीरेव योषिदिव यद्वार्णानि हवींषि अभिलक्ष्यसनिताभवति ॥ ४ ॥

अथपञ्चमी–

एषतेदेवनेतारथस्पतिःशंरयिः ।
शंरायेशंस्वस्तयइषःस्तुतोमनामहेदेवस्तुतोमनामहे ॥ ५ ॥ ४ ॥

एषः । ते । देव । नेतरिति । रथःपतिः । शम् । रयिः । शम् ।
राये । शम् । स्वस्तये । इषःऽस्तुतः । मनामहे । देवऽस्तुतः ।
मनामहे ॥ ५ ॥ ४ ॥

हेनेतर्देव सवितः ते तव एषरथः पतिः सर्वस्यपालकः रयिः दातव्यधनवान् मत्वर्थोलुप्यते शंकरोत्वितिशेषः वयंच रायेधनस्य शं सुखाय यद्वा रायेधनाय शंसुखायच स्वस्तये अविनाशाय इषस्तुतः एषणीयस्यसवितुः स्तोतारोवयं मनामहे स्तुमः देवस्तुतः देवानां देवस्यवा सवितुःस्तोतारोमनामहे स्तुमः ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेचतुर्थोवर्गः ॥ ४ ॥

अग्नेसुतस्येतिपंचदशर्चंसप्तमंसूक्तं अत्रेयमनुक्रमणिका—अग्नेपंचोनाचतस्रोगायत्र्यःषळुष्णिहस्तिस्रोजगत्यस्त्रिष्टुभोवान्त्येअनुष्टुभाविति । ऋषिश्चान्यस्मादितिपरिभाषयास्वस्त्यात्रेयऋषिः आदितश्चतस्रोगायत्र्यः पंचम्याद्याःषळुष्णिहः एकादश्याद्यास्तिस्रोजगत्यस्त्रिष्टुभोवा चतुर्दशीपंचदश्यावनुष्टुभौविश्वेदेवादेवता ।

तत्रप्रथमा—

अग्नेसुतस्यपीतयेविश्वैरूमेभिरागहि । देवेभिर्हव्यदातये ॥ १ ॥

अग्ने । सुतस्य । पीतये । विश्वैः । ऊमेभिः । आ । गहि ।
देवेभिः । हव्यऽदातये ॥ १ ॥

हेअग्ने त्वं सुतस्यपीतये सोमपानाय विश्वैरूमेभिः ऊमैः सर्वैरपिरक्षकैः देवेभिःदेवैरिन्द्रादिभिःसह हव्यदातये अस्माकंहविर्दानाय तद्दात्रेयजमानायवा आगहि आगच्छ ॥१॥

अथद्वितीया—

ऋतधीतयआगतसत्यधर्माणोअध्वरम् । अग्नेःपिबतजिह्वया ॥ २ ॥

ऋतऽधीतयः । आ । गत । सत्यऽधर्माणः । अध्वरम् । अग्नेः ।
पिबत । जिह्वया ॥ २ ॥

हेऋतधीतयः सत्यस्तुतयः अबाध्यकर्मणोवादेवाः अध्वरमस्मद्यज्ञं आगत आगच्छत आगत्यच हेसत्यधर्माणः सत्यस्यधारयितारोयूयं अग्नेर्जिह्वया पिबत आज्यसोमादिकम्॥२॥

अथतृतीया—

विप्रेभिर्विप्रसन्त्यप्रातर्यावभिरागहि। देवेभिःसोमपीतये॥ ३ ॥

विप्रेभिः। विप्र। सन्त्य। प्रातर्यावऽभिः। आ। गहि।
देवेभिः। सोमऽपीतये॥ ३ ॥

हेविप्र मेधाविन् विविधकामानांवापूरक हेसन्त्य संभजनीयाग्ने विप्रेभिःउक्तलक्षणैः प्रातर्यावभिः प्रातःकालेआगन्तृभिः देवेभिःदेवैःसार्द्धं आगह्यागच्छ किमर्थं सोमपीतये सोमपानाय ॥ ३ ॥

अथचतुर्थी—

अयंसोमश्चमूसुतोमत्रेपरिषिच्यते। प्रियइन्द्रायवायवे॥ ४ ॥

अयम्। सोमः। चमू इति। सुतः। अमत्रे। परि। सिच्यते।
प्रियः। इन्द्राय। वायवे॥ ४ ॥

अयंपुरतोवर्तमानःसोमः चमू चम्वोः अन्योः अभिषवणफलकयोः सुतः अभिषुतः सन् अमत्रे पात्रे परिषिच्यते पूर्यते सच इन्द्रायवायवेच प्रियः तं पातुं हेइन्द्रवायू आगच्छतमितिशेषः ॥ ४ ॥

वायवायाहीत्येषापृष्ठ्यस्यतृतीयेहनिप्रउगशस्त्रवायव्येतृचस्याद्या सूत्रितंच—वायवायाहिवीतयइत्येकावायोयाहिशिवादिवइतिद्वइति।

सैषापंचमी—

वायवायाहिवीतयेजुषाणोहव्यदातये।
पिबासुतस्यान्धसोअभिप्रयः॥ ५ ॥ ५ ॥

वायो इति। आ। याहि। वीतये। जुषाणः। हव्यऽदातये।
पिब। सुतस्य। अन्धसः। अभि। प्रयः॥ ५॥ ५॥

हेवायो प्रयोन्नं सोमाख्यं अभि अभिलक्ष्य आयाहि वीतये भक्षणाय जुषाणः प्रीयमाणः हव्यदातये हविर्दात्रेयजमानाय तदर्थं आगत्यच सुतस्यान्धसः अभिषुतमन्धोन्नं सोमलक्षणं पिब ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेपंचमोवर्गः ॥ ५ ॥

पृष्ठ्यस्यतृतीयेहनिप्रउगशस्त्रेऐन्द्रवायवस्तृचः इन्द्रश्चेत्यादिकेद्वेऋचौशंसेत् तयोःप्रथमां-द्वितीयांवा आवर्त्य तृचंसंपादयेत् तथाचसूत्रितं—इन्द्रश्चवायवेषांसुतानामितिद्वयोरन्यतरांद्विरिति ।

द्वचेप्रथमासूक्तेषष्ठी—

इन्द्र॑श्चवायवेषां॒सु॒ताना॑म्पी॒तिम॑र्हथः ।
ताञ्जु॑षेथामरे॒पसा॑व॒भिप्रयः॑ ॥ ६ ॥

इन्द्रः॑ । च॒ । वा॒यो॒ इति॑ । ए॒षा॒म् । सु॒ताना॑म् । पी॒तिम् । अ॒र्ह॒थः॒ ।
तान् । जु॒षे॒था॒म् । अ॒रे॒पसौ॑ । अ॒भि । प्रयः॑ ॥ ६ ॥

हेवायो त्वंचेन्द्रश्चैषां पुरतोगृहीतानां सुतानां अभिषुतानां सोमानां पीतिं पानमर्हथः यस्मादेवं तस्मात् तान् सोमरसान् जुषेथां सेवेथां अरेपसौ अहिंसकौ तदर्थं प्रयः सोमाख्यमन्नमभिलक्ष्यागच्छतमितिशेषः यद्वा प्रयोन्नरूपान् ॥ ६ ॥

अथसप्तमी—

सु॒ताइन्द्रा॑यवा॒यवे॒सोमा॑सो॒दध्या॑शिरः ।
नि॒म्नंनय॑न्ति॒सिन्ध॑वो॒भिप्रयः॑ ॥ ७ ॥

सु॒ताः । इन्द्रा॑य । वा॒यवे॑ । सोमा॑सः । दधि॑ऽआशिरः । नि॒म्नम् ।
न । य॒न्ति॒ । सिन्ध॑वः । अ॒भि । प्रयः॑ ॥ ७ ॥

इन्द्रायवायवेच सोमासः सोमाः दध्याशिरः दध्याश्रयणाः सुताः अभिषुताः संपादिताः तेच निम्नंगर्तं सिन्धवोन नद्यइव हेइन्द्रवायू युवामभियन्ति प्रयोन्नरूपाः ॥ ७ ॥

तृतीयेहनिप्रउगशस्त्रेसजूर्विश्वेभिरितिवैश्वदेवस्तृचः सूत्रितंच—सजूर्विश्वेभिर्देवेभिरुतनःप्रियाप्रियास्विति ।

तैषांतृचेप्रथमासूक्तेष्टमी—

सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसासजूः ।
आयाह्यग्नेअत्रिवत्सुतेरण ॥ ८ ॥

सऽजूः । विश्वेभिः । देवेभिः । अश्विऽभ्याम् । उषसा । सऽजूः ।
आ । याहि । अग्ने । अत्रिऽवत् । सुते । रण ॥ ८ ॥

हेअग्ने विश्वेभिः सर्वैःदेवेभिःदेवैः सजूः संगतःसन् अश्विभ्यांउषसाच सजूः समानप्रीतिः सन् आयाहि आगहि अत्रिवत् अत्रिरिव अत्रेर्यज्ञेयथातथेत्यर्थः यद्वा अत्रिर्यथायज्ञेरमतेतद्वत् सुते अभिषुतेसोमे रण रमस्व ॥ ८ ॥

अथनवमी—

सजूर्मित्रावरुणाभ्यांसजूःसोमेनविष्णुना ।
आयाह्यग्नेअत्रिवत्सुतेरण ॥ ९ ॥

सऽजूः । मित्रावरुणाभ्याम् । सऽजूः । सोमेन । विष्णुना । आ ।
याहि । अग्ने । अत्रिऽवत् । सुते । रण ॥ ९ ॥

अथदशमी—

सजूरादित्यैर्वसुभिःसजूरिन्द्रेणवायुना ।
आयाह्यग्नेअत्रिवत्सुतेरण ॥ १० ॥ ६ ॥

सऽजूः । आदित्यैः । वसुऽभिः । सऽजूः । इन्द्रेण । वायुना । आ ।
याहि । अग्ने । अत्रिऽवत् । सुते । रण ॥ १० ॥ ६ ॥

उत्तरेद्वेनवमीदशम्यौस्पष्टे ॥ ९ ॥ १० ॥

॥ इतिचतुर्थस्यतृतीयेषष्ठोवर्गः ॥ ६ ॥

पृष्ठ्यस्यषष्ठेहनिवैश्वदेवशस्त्रेस्वस्तिनइतितृचः सूत्रितंच—स्वस्तिनोमिमीतामश्विनाभगइ-तितृचइतिवैश्वदेवमिति । तथाबृहस्पतिसवेवैश्वदेवनिविद्धानार्थोयंतृचः स्वस्तिनोमिमीतामश्वि-नाभगइतिवैश्वदेवमितिसूत्रितत्वात् ।

तृचेप्रथमासूक्तेएकादशी—

स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः ।
स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना ॥ ११॥

स्वस्ति । नः । मिमीताम् । अश्विना । भगः । स्वस्ति । देवी ।
अदितिः अनर्वणः । स्वस्ति । पूषा । असुरः । दधातु । नः ।
स्वस्ति । द्यावापृथिवी इति । सुऽचेतुना ॥ ११ ॥

नोस्मभ्यं अश्विना अश्विनौ स्वस्ति अविनाशं क्षेमंमिमीतांकुरुतां भगश्चस्वस्तिक्षेमं मिमीतां तथा देव्यदितिश्च स्वस्तिमिमीतां अनर्वणः अप्रत्यृतः पूषा असुरः शत्रूणां निरसिता प्राणानां बलानांदातावा नःस्वस्तिदधातु नोस्मभ्यं द्यावापृथिवीद्यावापृथिव्यावपि सुचेतुना शोभनेनप्रज्ञानेन विशिष्टे स्वस्तिमिमीतां ॥ ११ ॥

अथद्वादशी—

स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः ।
बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवन्तुनः ॥ १२ ॥

स्वस्तये । वायुम् । उप । ब्रवामहै । सोमम् । स्वस्ति । भुवनस्य ।
यः । पतिः । बृहस्पतिम् । सर्वऽगणम् । स्वस्तये । स्वस्तये ।
आदित्यासः । भवन्तु । नः ॥ १२ ॥

स्वस्तये क्षेमाय वायुमुपब्रवामहै स्तुमइत्यर्थः सोमंचोपब्रवामहै यश्चसोमोभुवनस्य पतिः पालकः सर्वलोकजीवनस्यसोमायत्तत्वात् तथा सर्वगणं सर्वदेवगणोपेतं बृहस्पतिं बृहतःकर्मणोमंत्रस्यवापालयितारं स्वस्तयेस्तुमः आदित्यासः आदित्याअदितेःपुत्राःसर्वेदेवाः अरुणादयोद्वादशवा नोस्माकं स्वस्तयेभवंतु ॥ १२ ॥

सत्रमध्येदीक्षितेव्याधितेसति तस्मिन्नहनि वैश्वदेवशस्त्रेयंतृचोनिविद्धानार्थः सूत्रितंच—स्वस्त्यात्रेयंनिविदंदध्यादिति । स्वस्त्यात्रेयशब्देनायंतृचोविवक्षितइतितत्रव्याख्यातं तथारूपादिकेसत्ययंतृचोजप्यः ।

अथत्रयोदशी–

विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये ।
देवाअवन्त्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः ॥ १३ ॥

विश्वे । देवाः । नः । अद्य । स्वस्तये । वैश्वानरः । वसुः ।
अग्निः । स्वस्तये । देवाः । अवन्तु । ऋभवः । स्वस्तये ।
स्वस्ति । नः । रुद्रः । पातु । अंहसः ॥ १३ ॥

विश्वे सर्वेपिदेवानोस्मान् अद्यास्मिन्यागदिने स्वस्तये क्षेमायावन्तु वैश्वानरोविश्व-एनंनरानयन्तीतिवैश्वानरः वसुः सर्वस्यवासयिता अग्निर्देवः अयमेवाग्निर्वैश्वानरइतिशा-कपूणिरितियास्कः । सोपिस्वस्तयेवतु देवाःऋभवोपिस्वस्तयेवन्तु रुद्रोदुःखाद्द्रावयिता देवोपि अंहसः पापात् स्वस्तिपातुनोस्मान् ॥ १३ ॥

अथचतुर्दशी–

स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति ।
स्वस्तिनइन्द्रश्चाग्निश्चस्वस्तिनोअदितेकृधि ॥ १४ ॥

स्वस्ति । मित्रावरुणा । स्वस्ति । पथ्ये । रेवति । स्वस्ति । नः ।
इन्द्रः । च । अग्निः । च । स्वस्ति । नः । अदिते । कृधि ॥ १४॥

हेमित्रावरुणा अहोरात्राभिमानिदेवौ स्वस्तिकुरुतं हेपथ्ये पथ्यास्वस्तिदेवि पन्थाअन्त-रिक्षमार्गः तत्रहितामार्गः तत्रहितामार्गाभिमानिनीदेवी हेतादृशि रेवति धनवति देविस्वस्ति कृधि इन्द्रश्चाग्निश्चप्रत्येकंनोस्मभ्यं स्वस्तिकृधि हेअदितेदेवि नः स्वस्तिकृधिकुरु ॥ १४ ॥

अथपंचदशी–

स्वस्तिपन्थामनुचरेमसूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नताजानतासंगमेमहि ॥ १५ ॥ ७ ॥

---

१ नि० ७. २३. ।

स्वस्ति । पन्थाम् । अनु । चरेम । सूर्याचन्द्रमसौऽइव । पुनः
ददता । अघ्नता । जानता । सम् । गमेमहि ॥ १५ ॥ ७ ॥

पन्थां पन्थानं स्वस्ति क्षेमेणानुचरेम सूर्याचन्द्रमसाविवतौ यथानिरा राक्षसादिभिरनुपद्रुतौसंचरतस्तद्वत् किंच वयं प्रवसन्तः पुनर्ददताभिमतं अघ्नता चिरविलंबकोपेनाहिंसता जानताअविस्मरतामदीयश्चिरकालंगतः कोयमितिसन्देहमकुर्वताम यमितिबुध्यमानेनेत्यर्थः उक्तलक्षणेन बन्धुजनेन संगमेहि यद्वा पूर्वार्धे प्रवसतांवाक्यं उ बन्धूनां वयंबन्धवः ददताअभिमतमुपार्जितं यच्छता अघ्नता प्रयासकोपेन अहिंसताजा सन्देहमधिगच्छता प्रवसता संगमेमहि ॥ १५ ॥

॥ इतिचतुर्थस्यतृतीयेसप्तमोवर्गः ॥ ७ ॥

प्रश्यावाश्वेतिसप्तदशर्चमष्टमंसूक्तं अत्रेयमनुक्रमणिका—प्रश्यावाश्वऽयूनाश्यावाश्वोम रुतंहतत्पंक्तिःषष्ठ्यन्त्याचेति । आत्रेयःश्यावाश्वऋषिः हतदितिप्रयोगादिदमादीनिदशसूक्ता मरुद्देवत्यानि षष्ठीसप्तदशीचपंक्त्यौ शिष्टाःपंक्त्यंतपरिभाषयानुष्टुभः गतोविनियोगः ।

तत्रप्रथमा—

प्रश्यावाश्वधृष्णुयार्चामरुद्भिर्ऋक्वभिः ।
येअंद्रोघमनुष्वधंश्रवोमदन्तियज्ञियाः ॥ १ ॥

प्र । श्यावऽअश्व । धृष्णुऽया । अर्च । मरुत्ऽभिः । ऋक्वऽभिः ।
ये । अद्रोघम् । अनुऽस्वधम् । श्रवः । मदन्ति । यज्ञियाः ॥ १ ॥

हेश्यावाश्व एतन्नामकऋषे धृष्णुया धृष्णुत्वं ऋक्वभिः मरुद्भिः स्तुत्यान् मरुतः प्रा द्वितीयार्थेतृतीया एवं स्वयमेवसंप्रेष्यति यद्वा यजमानोहोतारंश्यावाश्वंब्रूते यद्वा मरुद्भि मरुत्सदृशैर्ऋक्वभिःस्तोतृभिःसहस्तोत्रैर्वार्च स्तुहीत्यर्थः येमरुतोयज्ञियायज्ञार्हाअनुष्वधं प्रत्य हंहविर्लक्षणान्नप्रदानं स्वधानुपश्चाद्वा अद्रोघमहिंसकं श्रवोन्नंलब्ध्वा मदन्तिहृष्यन्ति ॥ १ ॥

अथद्वितीया—

तेहिस्थिरस्यशवसःसखायःसन्तिधृष्णुया ।
तेयामन्नाधृषद्विनस्त्मनापान्तिशश्वतः ॥ २ ॥

ते । हि । स्थिरस्य । शवसः । सखायः । सन्ति । धृष्णुऽया ।
ते । यामन् । आ । धृषत्ऽविनः । त्मना । पान्ति । शश्वतः ॥ २ ॥

तेहि तेखलु स्थिरस्याविचलितस्य शवसोबलस्य सखायःसन्ति भवन्ति महांधृष्णुया धृष्णवः तेचयामन्ना आइतिचार्थे गमनेपि धृषद्विनोधर्षणवन्तः त्मना आत्मना अनुग्रहेणैव अस्मदुपकारमनपेक्ष्यैव शश्वतोबहूनस्मान्पुत्रभृत्यादीन् पान्तिरक्षन्ति ॥ २ ॥

अथतृतीया—

तेस्पन्द्रासोनोक्षणोतिष्कन्दन्तिशर्वरीः ।
मरुतामधामहोदिविक्षमाचमन्महे ॥ ३ ॥

ते । स्पन्द्रासः । न । उक्षणः । अति । स्कन्दन्ति । शर्वरीः ।
मरुताम् । अध । महः । दिवि । क्षमा । च । मन्महे ॥ ३ ॥

हेमरुतः स्पंद्रासः स्पन्दनशीलाः उक्षणोजलस्यसेक्तारश्च नेतिचार्थे यस्मात्स्पन्द्राः अन्येषांतस्मात्शर्वरीः शर्वर्योरात्रयः कालावयवानित्यर्थः तानतिस्कन्दन्ति अतिक्रम्यगच्छन्ति नित्याइत्यर्थः यस्मादेतेएवंविधाः तस्मात् मरुतां अधं अधुना महस्तेजोदिविद्युलोके क्षमा क्षमायांभूमौचवर्तमानं मन्महे स्तुमः ॥ ३ ॥

अथचतुर्थी—

मरुत्सुवोदधीमहिस्तोमंयज्ञंचधृष्णुया ।
विश्वेयेमानुषायुगापान्तिमर्त्यंरिषः ॥ ४ ॥

मरुत्ऽसु । वः । दधीमहि । स्तोमम् । यज्ञम् । च । धृष्णुऽया ।
विश्वे । ये । मानुषा । युगा । पान्ति । मर्त्यम् । रिषः ॥ ४ ॥

हेअध्वर्युहोत्रादयोवोयूयंमरुत्सु धृष्णुया धर्षकेषु दधीमहि व्यत्ययेनोत्तमः धत्त किं स्तोमं स्तोत्रं यज्ञंच इज्यते अनेनेतियज्ञंहविः तदुभयंकिमर्थंदीयतइति येमरुतोविश्वेसर्वेपि मानुषा मानुषाणि युगा युगानि सर्वेषुकालेष्वित्यर्थः मर्त्यं मरणधर्माणं यजमानं रिषोहिंसकात् सकाशात्पान्ति रक्षन्ति ॥ ४ ॥

अथपंचमी—

अर्हन्तोयेसुदानवोनरोअसामिशवसः ।
प्रयज्ञंयज्ञियेभ्योदिवोअर्चामरुद्भ्यः ॥ ५ ॥ ८ ॥

अर्हन्तः । ये । सुऽदानवः । नरः । असामिऽशवसः । प्र ।
यज्ञम् । यज्ञियेभ्यः । दिवः । अर्च । मरुत्ऽभ्यः ॥ ५ ॥ ८ ॥

हेहोतः हेआत्मन्वा येअर्हन्तः पूज्याः सुदानवः शोभनदानाः नरोनेतारः कर्मणां असामिशवसोऽनल्पबलाःसन्ति तेभ्योयज्ञियेभ्योयज्ञार्हेभ्योदिवोद्योतमानेभ्योमरुद्भ्यः विभक्तिवचनयोर्व्यत्ययः यद्वा कर्मणिषष्ठी दीप्तं यज्ञं यज्ञसाधनंहविः प्रार्च पूजय प्रयच्छेत्यर्थः अथवा दिवोन्तरिक्षादागतेभ्यइतिसंबन्धः ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेऽष्टमोवर्गः ॥ ८ ॥

अथषष्ठी—

आरुक्मैरायुधानरऋष्वाऋष्टीरसृक्षत ।
अन्वेनाँअहविद्युतोमरुतोजज्झतीरिवभानुरर्तत्मनादिवः ॥ ६ ॥

आ । रुक्मैः । आ । युधा । नरः । ऋष्वाः । ऋष्टीः । असृक्षत ।
अनु । एनान् । अह । विऽद्युतः । मरुतः । जज्झतीःऽइव ।
भानुः । अर्त । त्मना । दिवः ॥ ६ ॥

नरोवृष्टेर्नेतारः ऋष्वाः महान्तोमरुतोरुक्मैः रोचमानैराभरणविशेषैरारोचन्तइतिशेषः उपसर्गश्रुतेःसंगतक्रियाध्याहारः तथायुधाप्रहरणसाधनेनायुधेन आरोचन्ते एते मरुतः ऋष्टीः आयुधविशेषान् असृक्षत प्रक्षिपन्ति मेघभेदार्थं एनान्मरुतोविद्युतोपि जज्झतीरिव शब्दकारिण्यआपइव जज्झतीरापोभवन्तिशब्दकारिण्यइतिनिरुक्तं[1] । अन्वहअनुगच्छन्त्येव दिवोद्योतमानस्य मरुद्गणस्य भानुर्दीप्तिः त्मना स्वयमेव अर्त निरगात् ॥ ६ ॥

---

१ नि० ६. १६. ।

अथसप्तमी—

येवांवृधन्तपार्थिवायउरावन्तरिक्षआ ।
वृजनेवानदीनांसधस्थेवामहोदिवः ॥ ७ ॥

ये । वृवृधन्त । पार्थिवाः । ये । उरौ । अन्तरिक्षे । आ । वृजने ।
वा । नदीनाम् । सधऽस्थे । वा । महः । दिवः ॥ ७ ॥

येमरुतः पार्थिवाः पृथिवीसंबद्धाःसन्तोववृधन्तवर्धन्ते येचोरौ महत्यन्तरिक्षेच ववृधन्त आइतिचार्थे नदीनां नदनवतीनां वृजनेवाबलेववृधन्त महोमहतः दिवोद्युलोकस्य सधस्थेवा सहस्थानेच ववृधन्त उभयत्रवाशब्दश्चार्थे एवंसर्वत्रवर्धमानामरुतोवृष्ट्यर्थंऋष्टीरसृक्षतेतिपूर्वत्रसंबन्धः ॥ ७ ॥

अथाष्टमी—

शर्धोमारुतमुच्छंससत्यशवसमृभ्वसम् ।
उतस्मतेशुभेनरःप्रस्पन्द्रायुजतत्मना ॥ ८ ॥

शर्धः । मारुतम् । उत् । शंस । सत्यऽशवसम् । ऋभ्वसम् । उत ।
स्म । ते । शुभे । नरः । प्र । स्पन्द्राः । युजत । त्मना ॥ ८ ॥

हेस्तोतः मारुतं शर्धोबलं उदुत्कृष्टं शंस स्तुहि कीदृशं शर्धः सत्यशवसं सत्यवेगं ऋभ्वसं महदतिप्रवृद्धं उतस्मापिच नरोवृष्टेर्नेतारस्तेमरुतः शुभे उदकार्थं प्रयुजत प्रयुंजत समयोजयन् त्मना आत्मनैव जगद्रक्षाबुध्यैव स्पन्द्राः चलनस्वभावाः पृषतीरित्यर्थः ॥ ८ ॥

अथनवमी—

उतस्मतेपरुष्ण्यामूर्णावसतशुन्ध्यवः ।
उतपव्यारथानामद्रिंभिन्दन्त्योजसा ॥ ९ ॥

उत । स्म । ते । परुष्ण्याम् । ऊर्णाः । वसत । शुन्ध्यवः ।
उत । पव्या । रथानाम् । अद्रिम् । भिन्दन्ति । ओजसा ॥ ९ ॥

उतस्म अपिच तेमरुतः परुष्ण्यां एतन्नामिकायांनद्यां वर्तन्ते यऊर्णाः दीप्तीः शुन्ध्यवः शोधिकाः अपः वसत आच्छादयन्ति तेउतापिच पव्या नेम्या रथानां स्वकीयानां रथचक्रेणौजसा बलेनचाद्रिंभिन्दन्ति मेघंगिरिंवाविदारयन्ति ॥ ९ ॥

अथदशमी—

आपंथयोविपंथयोन्तस्पथाअनुंपथाः ।
एतेभिर्मह्यंनामंभिर्यज्ञंविष्टारओहते ॥ १० ॥ ९ ॥

आऽपंथयः । विऽपंथयः अन्तःऽपथाः अनुंऽपथाः । एतेभिः ।
मह्यंम् । नामंऽभिः । यज्ञम् । विऽस्तारः । ओहते ॥ १० ॥ ९ ॥

आपथयः अस्मदभिमुखामार्गायेषांतेतादृशाः विपथयोविष्वङ्मार्गाः अन्तस्पथाः दरीसुषिरादिमार्गाः अनुपथाः अनुकूलमार्गाश्च येमरुतःसन्ति ते एतेभिः एतैश्चतुर्विधैर्नामभिर्नामकैः स्वरूपैर्मह्यं मदर्थं यज्ञं विस्तारः विस्तृताःसन्तः ओहते वहन्ति यद्वा एतैर्नामभिरुदकैः सार्धंयज्ञमोहते ॥ १० ॥

॥ इतिचतुर्थस्यतृतीयेनवमोवर्गः ॥ ९ ॥

अथैकादशी—

अधानरोन्योहतेधानियुतंओहते ।
अधापारांवताइतिचित्रारूपाणिदर्श्या ॥ ११ ॥

अधं । नरंः । नि । ओहते । अधं । निऽयुतंः । ओहते । अधं ।
पारांवताः । इति । चित्रा । रूपाणि । दर्श्या ॥ ११ ॥

अध अथ नरोभिमतवृष्ट्यादिनेतारोन्योहते नितरांवहन्तिजगत् अध नियुतः स्वयमेव मिश्रयितारः सन्तः ओहते अधाथ पारावताः परवद्दूरदेशःतत्संबन्धिनश्च अन्तरिक्षादिदूरदेशे ग्रहतारामेघादिधारकाःसन्तः ओहतइत्यर्थः इतिउक्तप्रकारेण तेषांरूपाणि चित्रा नानाविधानि चायनीयानिवा दर्श्यास्वव्यापारैर्दर्शनीयानिभवंत्वितिशेषः ॥ ११ ॥

अथद्वादशी—

छन्दःस्तुभःकुभन्यवउत्समाकीरिणोनृतुः ।
तेमेकेचिन्नतायवऊमाआसन्दृशित्विषे ॥ १२ ॥

छन्दःऽस्तुभः । कुभन्यवः । उत्सम् । आ । कीरिणः । नृतुः । ते । मे ।
के । चित् । न । तायवः । ऊमाः । आसन् । दृशि । त्विषे ॥ १२ ॥

छन्दःस्तुभः छन्दोभिःस्तोतारः कुभन्यवः उदकेच्छवः कीरिणः स्तोतारः उत्सं कूपमपेक्ष्य तृषिताय गोतमाय यान्मरुतः आनृतुः सर्वतोऽकुर्वन् अनयन्वास्तोत्रं यद्वा येछन्दस्तुभः छन्दोभिःस्तुत्याः (स्तोभतिःस्तुतिकर्मा) कुभन्यवः सेकारोवृष्ट्युदकस्य कुभिरुन्दनकर्मा कीरिणः स्तोतुः गोतमस्यपानार्थं उत्सं कूपं आनृतुः आनीतवन्तः असिंचन्नुत्संगोतमायतृष्णजइतिह्युक्तं । नृनयेइत्यस्यवानर्ततेर्वाविक्षेपमात्रार्थस्येदंरूपं तेमरुतः केचित् मे मह्यं तायवोन कदाचिदप्यदृश्यास्तस्कराइवस्थिताः ऊमारक्षकाः दृशिदर्शने आसन् विषयभूताअभवन् केचित् त्विषे शरीरदीप्त्यै बलायवासन् प्राणरूपेणेतिभावः ॥ १२ ॥

अथत्रयोदशी—

यऋष्वाऋष्टिविद्युतःकवयःसन्तिवेधसः ।
तमृषेमारुतंगणंनमस्यारमयागिरा ॥ १३ ॥

ये । ऋष्वाः । ऋष्टिऽविद्युतः । कवयः । सन्ति । वेधसः । तम् ।
ऋषे । मारुतम् । गणम् । नमस्य । रमय । गिरा ॥ १३ ॥

येमरुतः ऋष्वाः दर्शनीयाः ऋष्टिविद्युतः आयुधैर्विद्योतमानाः कवयोमेधाविनोवेधसः सर्वत्रविधातारः सन्ति तं तेषांमारुतंगणं रमया रमणीययागिरास्तुत्या हेऋषे श्यावाश्व नमस्य परिचर स्तुहि ॥ १३ ॥

अथचतुर्दशी—

अच्छऋषेमारुतंगणंदानामित्रंनयोषणा ।
दिवोवाधृष्णवओजसास्तुताधीभिरिषण्यत ॥ १४ ॥

---

१ ऋ० सं० १. ५. १०.

अच्छं । ऋषे । मारुतम् । गणम् । दाना । मित्रम् । न ।
योषणा । दिवः । वा । धृष्णवः । ओजसा । स्तुताः ।
धीभिः । इषण्यत ॥ १४ ॥

हेऋषे मारुतंगणं मरुत्संघं मित्रंन आदित्यमिव दाना हविर्दानेन योषणा यौते-रिदंरूपं यौतीतियोषास्तुतिः तयाचाच्छ आगच्छेतिशेषः ऋषेः उत्तरार्धःप्रत्यक्षवादः ओ-जसा बलेन हेधृष्णवोधर्षकामरुतः दिवोवा द्युलोकाद्वा वाशब्दश्रुतेरितरलोकद्वयाद्वा धी-भिरस्मदीयाभिःस्तुतिभिः स्तुताइषण्यत गच्छतयज्ञं ॥ १४ ॥

अथपंचदशी—

नूमन्वानएषांदेवाँअच्छानवक्षणा ।
दानासंचेतसूरिभिर्यामश्रुतेभिरञ्जिभिः ॥ १५ ॥

नु । मन्वानः । एषाम् । देवान् । अच्छं । न । वक्षणा । दाना ।
सचेत । सूरिऽभिः । यामंऽश्रुतेभिः । अञ्जिऽभिः ॥ १५ ॥

नुक्षिप्रं एषां मरुतां एतान्मरुतइत्यर्थः मन्वानः स्तुवन् देवान्मरुद्व्यतिरिक्तान् वक्षणा वहनेननिमित्तेन अच्छ अभिप्राप्तुंनमनुते सस्तोता सूरिभिर्मेधाविभिः प्रेरयितृभिः यामश्रुतेभिः शीघ्रगमनेनविश्रुतैः अंजिभिः फलस्यव्यंजकैर्मरुद्भिः सर्वाःपंचम्यर्थेतृतीयाः उक्तलक्षणेभ्योम-रुद्भ्योदानाअभिमतदानानि सचेतसंगच्छते ॥ १५ ॥

अथषोडशी—

प्रयेमेबन्ध्वेषेगांवोचन्तसूरयःपृश्निंवोचन्तमातरम् ।
अधापितरमिष्मिणंरुद्रंवोचन्तशिक्वसः ॥ १६ ॥

प्र । ये । मे । बन्धुऽएषे । गाम् । वोचन्त । सूरयः । पृश्निम् ।
वोचन्त । मातरम् । अर्ध । पितरम् । इष्मिणम् । रुद्रम् ।
वोचन्त । शिक्वसः ॥ १६ ॥

येमरुतोमेमह्यं बन्ध्वेषे स्वेषांबन्धूनामन्वेषणेसति सूरयः प्रेरकाः गां माध्यमिकांवाचं गोदेवतांवा प्रवोचन्त प्रावोचन् अवशिष्टमृषेर्वाक्यं मेऋषिर्मरुद्वाक्यमनुवदति तस्मादुत्तरयोर्निघातयोर्यच्छब्दानन्वयान्निघातः तेपृश्निं द्युदेवतां पृश्निवर्णांगांवा मातरंवोचन्तअब्रुवन् पृश्निर्यैवैपयसोमरुतोजाताइतिश्रुतेः। अधाथ पितरं स्वकीयं इष्मिणं गमनवन्तमन्नवन्तंवा रुद्रं वोचन्त शिक्वसः शक्तास्ते मरुतां रुद्रेणपुत्रत्वपरिग्रहोबहुकृत्वउपपादितः ॥ १६ ॥

अथसप्तदशी–

सप्तमेंसप्तशाकिनएकमेकाशताददुः।
यमुनायामधिश्रुतमुद्राधोगव्यंमृजेनिराधोअश्व्यंमृजे ॥१७॥१०॥

सप्त। मे। सप्त। शाकिनः। एकम्ऽएका। शता। ददुः। यमुनायाम्। अधि। श्रुतम्। उत्। राधः। गव्यम्। मृजे। नि। राधः। अश्व्यम्। मृजे ॥ १७ ॥ १० ॥

सप्त सप्तसंख्याकाः संघाः सप्तगणावैमरुतइतिश्रुतेः। दितिगर्भेवर्तमानंवायुमिन्द्रःप्रविश्य सप्तधाविदार्य पुनरेकैकं सप्तधाव्यदारयत् तेएकोनपंचाशन्मरुद्गणाअभवन्नितिपुराणेषुप्रसिद्धं तेच सप्तसप्तसंख्याकाः शाकिनः सर्वमपिकर्तुंशक्ताः तेचकमेका एकैकोगणोमह्यंशता शतसंख्यानि गवाश्वयूथानिददुः दत्तवन्तः प्रयच्छन्त्विनिवाआशीः तैर्दत्तं यमुनायांनद्यां अधि अयंसप्तम्यर्थानुवादी तत्रश्रुतं प्रसिद्धं गव्यं गोसमूहात्मकं गोसंबन्धिवा राधोधनं उन्मृजे उन्मार्जयामि तथातैर्दत्तं अश्व्यं अश्वसमूहात्मकं तत्संबन्धिवा राधोनिमृजे निमार्ज्मि ॥ १७ ॥

॥ इतिचतुर्थस्यतृतीयेदशमोवर्गः ॥ १०॥

कोवेदजानमितिषोडशर्चंनवमंसूक्तं श्यावाश्वऋषिः आद्यापंचमीदशम्येकादशीपंचदश्यः ककुभः षष्ठीसप्तमीनवमीत्रयोदशीचतुर्दशीषोळश्यःसतोबृहत्यः अष्टमीद्वादशीचगायत्र्यौ द्वितीयाबृहती तृतीयाअनुष्टुप् चतुर्थीपुरउष्णिक् मरुतोदेवता तथाचानुक्रान्तं–कोवेदषोळशककुब्बृहत्यनुष्टुप्पुरउष्णिक्ककुप्सतोबृहत्योगायत्रीसतोबृहतीककुभौगायत्रीसतोबृहत्यौककुप्सतोबृहतीति। विनियोगोलैंगिकः।

१ तै० सं० २. २. ११.।   २ तै० स० २. २. ५.।

तत्रप्रथमा—

कोवेदजानमेषांकोवापुरासुम्नेष्वासमरुताम् । यद्युयुज्रेकिलास्यः ॥१॥

कः । वेद । जानम् । एषाम् । कः । वा । पुरा । सुम्नेषु । आस । मरुताम् । यत् । युयुज्रे । किलास्यः । १ ॥

एषां मरुतां (पूर्वसूक्ते प्रस्तुतत्वादत्रान्वादेशविषयत्वादेषामित्यस्यनिघातता) जानमुत्पत्तिं कोवेद जानातिकःपुमान् । कोवापुरापूर्वं अप्येषांमरुतां सुम्नेषु सुखेषु आस भवति यद्यदा एते किलास्यः किलासीः पृषतीरित्यर्थः तायुयुज्रे रथेयोजितवन्तः तदैषां स्थितिं बललक्षणानिसुखानिच कोजानातीत्यर्थः वेगविषये सर्वत्रवायोरुपमास्पदत्वादितिभावः ॥ १ ॥

अथद्वितीया—

ऐतान्रथेषुतस्थुषःकःशुश्रावकथायथुः ।
कस्मैसस्रुःसुदासेअन्वापयइळाभिर्वृष्टयःसह ॥ २ ॥

आ । एतान् । रथेषु । तस्थुषः । कः । शुश्राव । कथा । ययुः । कस्मै । सस्रुः । सुऽदासे । अनु । आपयः । इळाभिः । वृष्टयः । सह ॥ २ ॥

एतान्मरुतोरथेषु तस्थुषः स्थितवतः कआशुश्राव श्रावयेदित्यर्थः यद्वैतेषां क्रोशध्वनिं रथध्वनिंच कःशृणुयात् कथा कथं ययुर्गच्छन्ति तदपिकोजानाति यद्वा तान् कथमन्येदेवादयोअनुगच्छेयुः कस्मै सुदासे सुदानाय आपयोबन्धुभूताव्याप्ताः वृष्टयोवर्षकाः अयंकर्तरिक्तिच् इळाभिर्बहुविधैरन्नैःसह सहिताः अनुसस्रुः अनुक्रमेणावतरेयुः ॥ २ ॥

अथतृतीया—

तेमआहुर्यआययुरुपद्युभिर्विभिर्मदे ।
नरोमर्याअरेपसइमान्पश्यन्नितिष्टुहि ॥ ३ ॥

ते । मे । आहुः । ये । आऽययुः । उप । द्युऽभिः । विऽभिः । मदे । नरः । मर्याः । अरेपसः । इमान् । पश्यन् । इति । स्तुहि ॥ ३ ॥

ऋषिर्ऋग्द्वयाभ्यांमरुत्प्रादुर्भावमाख्यास्यन् अनया प्रादुर्भूतान्पश्यन्नाह—तेमरुतः इत्थंलप-ते मे मह्यमाहुः येउपाययुः येमरुतोमांप्राप्ताः कैःसाधनैः द्युभिर्द्योतमानैः विभिर्गन्तृभिरश्वैः किमर्थं मदे मदाय सोमपानजनिताय किमाहुरिति तदनुब्रूते नरोनेतारोमर्याःमनुष्येभ्योहि-ताः अरेपसोऽलेपास्ते हेऋषे इमानस्मान् पश्यन् तथास्थितान् चक्षुषावलोकयन् स्तुहीत्याहुः यद्वा इतिइत्थंपश्यनस्तुहीति ॥ ३ ॥

अथचतुर्थी—

येअ॒ञ्जिषु॒येवाशी॑षु॒स्वभा॑नवःस्र॒क्षुरु॒क्मेषु॑खा॒दिषु॑ ।
श्रा॒यारथे॑षु॒धन्व॑सु ॥ ४ ॥

ये । अ॒ञ्जिषु॑ । ये । वाशी॑षु । स्वऽभा॑नवः । स्र॒क्षु । रु॒क्मेषु॑ ।
खा॒दिषु॑ । श्रा॒याः । रथे॑षु । धन्व॑ऽसु ॥ ४ ॥

अनया मरुतांस्वरूपंनिरूपयति हेमरुतोयुष्माकं येप्रसिद्धाः स्वभानवः स्वदीप्तयोञ्जि-षुआभरणेषु श्रायाःआश्रयभूताःसन्ति येच वाशीष्वायुधेषु येच स्रक्षु माल्येषु येरुक्मेषु उरोभूष-णेषु येचखादिषु हस्तपादस्थितकटकेषु हस्तेषुखादिश्चक्रतिश्रैपृत्सुखादयईतिहश्रुतीभवतः। रथेषु धन्वसुच येचस्वभानवः श्रायाःसन्ति सुधन्वानइषुमन्तः सुरथाः पृश्निमातरइतिचनिगमः। ता-न्सर्वानस्तुमइतिशेषः यद्वा येस्वभानवः स्वायत्तदीप्तयोमरुतोञ्जिषु आभरणेषु निमित्तेषु श्रायाआश्रयाभविष्यामः येचवाशीषुनिमित्तेषु एवंसर्वत्रयोज्यं तादृग्विधानिमान् पश्यन स्तु-हीतिपूर्वत्रसंबन्धः तेषामेवेदंवाक्यं ॥ ४ ॥

अथपंचमी—

यु॒ष्माकं॒स्मा॒रथाँ॒अनु॑मु॒देद॑धेमरुतोजीरदानवः ।
वृ॒ष्टीद्यावो॑य॒तीरि॑व ॥ ५ ॥ ११ ॥

यु॒ष्माक॑म् । स्म॒ । रथा॑न् । अनु॑ । मु॒दे । द॒धे । म॒रु॒तः॒ । जी॒र॒ऽदा॒न॒वः॒ ।
वृ॒ष्टी । द्याव॑ः । य॒तीः॒ऽइ॑व ॥ ५ ॥ ११ ॥

---

१ ऋ० सं० २. ४. ६. । २ ऋ० सं० ४. ३. १६. । ३ ऋ० सं० ४. ३. २१. ।

हेजीरदानवः शीघ्रदानाः हेमरुतः युष्माकंरथान अनुउद्दिश्य मुदे मोदाय दधे धारयामि करोमीत्यर्थः सामर्थ्यात्स्तुतीरितिलभ्यते स्मेतिपूरणः वृष्टीर्वृष्ट्यापतीःसर्वत्रगच्छन्तीः द्यावोदीप्तिरिवदृश्यमानान्रथानितिसंबंधः ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेएकादशोवर्गः ॥ ११ ॥

कारीर्यांतिस्रःपिंड्योहोतव्याः तत्रद्वितीयायाआयंनरइत्यनुवाक्या सूत्रितंच—आयंनरःसुदानवोददाशुषेविद्युन्महसोनरोअश्मदिद्यवइति ।

सैषाषष्ठी—

आयंनरः॑सु॒दान॑वोददा॒शुषे॑दि॒वःकोश॒मचु॑च्यवुः ।
विप॒र्जन्यं॑सृजन्ति॒रोद॑सी॒अनु॒धन्व॑नायन्ति॒वृष्टयः॑ ॥ ६ ॥

आ । यम् । नरः॑ । सु॒ऽदान॑वः । द॒दा॒शुषे॑ । दि॒वः । कोश॑म् । अचु॑च्यवुः । वि । प॒र्जन्य॑म् । सृ॒जन्ति॒ । रोद॑सी॒ इति॑ । अनु॑ । धन्व॑ना । य॒न्ति॒ । वृ॒ष्टयः॑ ॥ ६ ॥

नरोनेतारः सुदानवः शोभनदानाः मरुतोयंकोशं मेघनामैतत् अपांकोशवद्धारकं मेघं ददाशुषे हविर्दत्तवतेयजमानाय दिवोन्तरिक्षात् आअचुच्यवुः आच्यावयन्ति पर्जन्यं मेघं रोदसीअनु द्यावापृथिव्यावनुसृत्य विसृजन्ति विमोचयन्ति पश्चात् धन्वना सर्वत्र गच्छतोदकेनसह वृष्टयोवृष्टिप्रदामरुतोयन्ति सर्वत्रव्याप्नुवन्ति ॥ ६ ॥

अथसप्तमी—

त॒तृ॒दा॒नाःसिन्ध॑वः॒क्षोद॑सा॒रजः॒प्रस॑स्रु॒र्धे॒नवो॒यथा ।
स्य॒न्नाअश्वा॑इ॒वाध्व॑नो॒वि॒मोच॑ने॒वियद्वर्त॑न्तए॒न्यः॑ ॥ ७ ॥

त॒तृ॒दा॒नाः । सिन्ध॑वः । क्षोद॑सा । रजः॑ । प्र । स॒स्रुः॒ । धे॒नवः॑ । य॒था॒ । स्य॒न्नाः । अश्वाः॑ऽइव । अध्व॑नः । वि॒ऽमोच॑ने । वि । यत् । वर्त॑न्ते । ए॒न्यः॑ ॥ ७ ॥

सिन्धवः स्यन्दमानाअपः ततृदानाः निर्भिदन्तोमेघान्मरुतः क्षोदसा उदकेनसह रजोन्तरिक्षं प्रसस्रुः प्रसरन्ति धेनवोयथापयःसिंचन्त्योनवप्रसूतिकागावइव किंचदृष्टान्तान्तरं स्यन्नाआशुगतयोश्वाइव यथाध्वनोविमोचने मनुष्याणामध्वविमोकायसंचरन्तितथेत्यर्थः यद्यद्राएन्यः नदीनामैतत् नद्योविवर्तन्ते विविधंसंचरन्ति अथवा प्रतिनिवृत्य वर्तन्ते प्रवर्धन्तेइत्यर्थः तदेवंकुर्वन्तीतिपूर्वत्रान्वयः ॥ ७ ॥

अथाष्टमी–

आयातमरुतोदिवआन्तरिक्षादमादुत । मावस्थातपरावतः ॥८॥

आ । यात । मरुतः । दिवः । आ । अन्तरिक्षात् । अमात् ।
उत । मा । अव । स्थात । पराऽवतः ॥ ८ ॥

हेमरुतः परावतः अत्यन्तदूरदेशाव दिवोद्युलोकादायात तथाअन्तरिक्षादायात उतअपिच अमात् अस्माल्लोकादायात परावतइत्यत्रवायोज्यम् परावतोदूरदेशेतत्रतत्रद्युलोकादौ मावस्थात अवस्थितिंमाकुरुत ॥ ८ ॥

अथनवमी–

मावोरसानितभाकुभाक्रुमुर्मावःसिन्धुर्निरीरमत् ।
मावःपरिष्ठात्सरयुःपुरीषिण्यस्मेइत्सुम्नमस्तुवः ॥ ९ ॥

मा । वः । रसा । अनितभा । कुभा । क्रुमुः । मा । वः । सिन्धुः ।
नि । रीरमत् । मा । वः । परि । स्थात् । सरयुः । पुरीषिणी ।
अस्मे इति । इत् । सुम्नम् । अस्तु । वः ॥ ९ ॥

हेमरुतोवोयुष्मान् रसा नदीनामैतत् रसानदीभवतीतिनिरुक्तं[1]। रसनवती शब्दवती अनितभा इताप्राप्ताभायस्याःसाइतभा नताद्दशीअनितभा कुभा कुत्सितदीप्तिश्च मानिरीरमत् मानिकृष्टंरमतु क्रुमुः सर्वत्रक्रमणः सिन्धुः समुद्रश्च मानिरीरमत् तथापुरीषिणीपुरीषमुदकं तद्वतीसरयुरपि मापरिष्ठात् परितस्तिष्ठतु मानिरुणद्धु अस्मेइत् अस्मास्वेवअस्तु सुम्नं त्वदागमनजनितंसुखं वोयुष्माकंसंबन्धि युष्मत्स्वभूतम ॥ ९ ॥

---

१ नि० ११. २५. ।

अथदशमी–

तंवःशर्धंरथानांत्वेषंगणंमारुतंनव्यसीनाम् । अनुप्रयन्तिवृष्टयः ॥ १० ॥ १२ ॥

तम् । वः । शर्धम् । रथानाम् । त्वेषम् । गणम् । मारुतम् ।
नव्यसीनाम् । अनु । प्र । यन्ति । वृष्टयः ॥ १० ॥ १२ ॥

तंमारुतमित्यनेनसंबध्यते वोयुष्माकं प्रेरकं नव्यसीनांनूतनानां रथानां शर्धं बलं त्वेषं दीप्तं तंमारुतंगणंच स्तौमीत्यर्थः यद्वा रथानां रंहणशीलानां वोयुष्माकं शर्धं परेषामभिभावुकं गणंस्तौमीत्येकमेववाक्यं अथपरोक्षकृतः वृष्टयोयुष्माननुप्रयन्ति प्रकर्षेणगच्छन्ति यद्वा वर्षकामरुतःअनुअनुकूलंप्रकृष्टं यन्तिगच्छन्ति ॥ १० ॥

॥ इतिचतुर्थस्यतृतीयेद्वादशोवर्गः ॥ १२ ॥

अथैकादशी–

शर्धंशर्धंवएषांव्रातंव्रातंगणंगणंसुशस्तिभिः । अनुक्रामेमधीतिभिः ॥ ११ ॥

शर्धम्ऽशर्धम् । वः । एषाम् । व्रातम्ऽव्रातम् । गणम्ऽगणम् ।
सुशस्तिऽभिः । अनु । क्रामेम । धीतिऽभिः ॥ ११ ॥

हेमरुतः एषांवोयुष्माकं शर्धंशर्धं तत्तद्बलं व्रातंव्रातं अविवक्षितगणोव्रातः तंतंव्रातं वोगणंगणं तंतंसप्तसप्तसमुदायात्मकंगणंगणंच सुशस्तिभिः शोभनस्तुतिभिः धीतिभिः कर्मभिः हविःप्रदानादिलक्षणैरनुक्रामेम अनुगच्छेम ॥ ११ ॥

अथद्वादशी–

कस्मांअद्यसुजातायरातहव्यायप्रययुः । एनायामेनमरुतः ॥ १२ ॥

कस्मै । अद्य । सुऽजाताय । रातऽहव्याय । प्र । ययुः । एना ।
यामेन । मरुतः ॥ १२ ॥

अद्यास्मिन्दिने कस्मै सुजाताय रातहव्याय दत्तहविष्काय प्रययुः प्रकर्षेणगच्छेयुः एना अनेन यामेन रथेनमरुतः ॥ १२ ॥

अथत्रयोदशी–

येनंतोकायतनंयायधान्यं१बीजंवहंध्वेअक्षितम् ।
अस्मभ्यंतद्धंत्तनयद्वईमंहेराधोविश्वायुसौभंगम् ॥ १३ ॥

येनं । तोकायं । तनंयाय । धान्यंम् । बीजंम् । वहंध्वे ।
अक्षितम् । अस्मभ्यंम् । तत् । धत्तन । यत् । वः । ईमंहे । राधंः ।
विश्वऽआंयु । सौभंगम् ॥ १३ ॥

हेमरुतोयेनसदयेनमनसा तोकाय पुत्राय तनयाय तत्पुत्राय धनायवा धान्यं बीजं अक्षितं अक्षीणं वहध्वे धारयध्वे तेनचित्तेनास्मभ्यं तद्धान्यंबीजं धत्तन यच्चवोयुष्मानीमहे याचामहे राधोधनं विश्वायु सर्वान्नोपेतं कृत्स्नायुष्योपेतंवा सौभगं सौभाग्यंच तद्धत्तनेतिसमन्वयः ॥ १३ ॥

अथचतुर्दशी–

अतीयामनिदस्तिरःस्वस्तिभिर्हित्वावद्यमरांतीः ।
वृष्ट्वीशंयोरापंउस्रिभेषजंस्यामंमरुतःसह ॥ १४ ॥

अतिं । इयाम । निदंः । तिरः । स्वस्तिऽभिंः । हित्वा । अवद्यम् ।
अरांतीः । वृष्ट्वी । शम् । योः । आपंः । उस्रि । भेषजम् ।
स्यामं । मरुतः । सह ॥ १४ ॥

हेमरुतोवयं स्वस्तिभिः क्षेमैरवद्यंपापं हित्वा परित्यज्य निदोनिन्दकानरातीःशत्रून् तिरःप्राप्तान् यद्वा तिरःअन्तर्हितान अतीयाम अतिक्रम्यगच्छेम निरस्कुर्मइत्यर्थः अनेनानिष्टपरिहारःप्रार्थितः उत्तरेणेष्टप्राप्तिरुच्यते वृष्ट्वी वृष्टिपुयुष्मत्प्रेरितासु सतीषु शं सुखं योः पापानांयावनंच आपउदकानि शमःस्थानेजस् उस्रि गोयुक्तंभेषजं यद्यप्येतदुदकनाम तथापिपृथगपामभिधानादत्रतद्धेतुकार्यमन्नमुच्यते तत्सर्वंसहस्याम लभेमहि हेमरुतोवयं यद्वां अपोयुष्मत्प्रेरिताः उक्तंसर्वंकुर्वन्तु वयंसर्वेसहैवस्याम भवेमयुष्मत्स्वभूताः ॥ १४ ॥

विद्युन्महसइतितृतीयाकारीर्यामेवद्वितीयस्याःपिंड्याचायाज्या सूत्रितंच—विद्युन्महसोनरोश्मदिद्यवःकृष्णंनियानंहरयःसुपर्णाइति । तत्पाठस्तु ।

अथतृतीया—

विद्युन्महसोनरोअश्मदिद्यवोवातत्विषोमरुतःपर्वतच्युतः ।
अब्दयाचिन्मुहुराह्रादुनीवृतस्तनयदमारभसाउदोजसः ॥ ३ ॥

विद्युत्ऽमहसः । नरः । अश्मऽदिद्यवः । वातऽत्विषः । मरुतः ।
पर्वतऽच्युतः । अब्दऽया । चित् । मुहुः । आ । ह्रादुनिऽवृतः ।
स्तनयत्ऽअमाः । रभसाः । उत्ऽओजसः ॥ ३ ॥

विद्युन्महसोविद्योतमानतेजसोनरोवृष्ट्यादेर्नेतारः अश्मदिद्यवोव्याप्तायुधाः अश्मसारमयायुधावा वातत्विषः प्राप्तदीप्तयः पर्वतच्युतः पर्वतानांमेघानांवाच्यावयितारः अब्दयामुहुःउदकानांदातारः शसोयाजादेशः चिदितिपूरणः ह्रादुनीवृतः ह्रादुन्याः अशनेःप्रवर्तकाः स्तनयदमाः अमाशब्दःसाहित्यवाची शब्दोपेतगणाइत्यर्थः रभसा वृष्ट्यर्थमुद्युंजानाः उदोजसः उद्धतबलाः मरुतोवृष्ट्यर्थंप्रादुर्भवन्तीत्यर्थः ॥ ३ ॥

अथचतुर्थी—

व्य१क्तून्रुद्राव्यहानिशिक्वसोव्य१न्तरिक्षंविरजांसिधूतयः ।
वियदज्राँअजथनावईयथाविदुर्गाणिमरुतोनाहरिष्यथ ॥ ४ ॥

वि । अक्तून् । रुद्राः । वि । अहानि । शिक्वसः । वि । अन्तरिक्षम् ।
वि । रजांसि । धूतयः । वि । यत् । अज्रान् । अजथ । नावः ।
ईम् । यथा । वि । दुःऽगानि । मरुतः । न । अह । रिष्यथ ॥ ४ ॥

हेरुद्राः रुद्रपुत्रामरुतः अक्तून् रात्रीः विअजथेत्युत्तरार्धगतेनसंबध्यते एवंसर्वत्रेति क्षिपथेतितस्यार्थः अहा अहान्यपि व्यजथ हेशिक्वसः शक्ताः सर्वमपिकर्तुं अन्तरिक्षं व्यजथ तथा रजांसि लोकान् व्यजथ धूतयःकंपकाः यद्यदा अज्रान् मेघान् व्यजथ गमयथ नावईं तायथासमुद्रंतद्वत् दुर्गाणिशत्रुनगराणि विऽव्यजथ हेमरुतोनाहरिष्यथ नैवहिंसथ ॥ ४ ॥

अथपंचमी–

तद्वीर्यंवोमरुतोमहित्वनंदीर्घंततानसूर्योनयोजनम् ।
एतानयामेअगृभीतशोचिषोनश्वदांयन्न्ययातनागिरिम् ॥५॥१४॥

तत् । वीर्यम् । वः । मरुतः । महिऽत्वनम् । दीर्घम् । ततान ।
सूर्यः । न । योजनम् । एताः । न । यामे । अगृभीतऽशोचिषः ।
अनश्वऽदाम् । यत् । नि । अयातन । गिरिम् ॥ ५ ॥ १४ ॥

हेमरुतोवोयुष्माकं तद्वीर्यं प्रसिद्धं सामर्थ्यं महित्वनं महत्त्वं दीर्घं अत्यन्तमायतं ततान तनोति स्तोता लोके सूर्योन योजनंसूर्यस्तेजइव एतान एतवर्णादेवानामश्वाइव तेयथा यामे गमने योजनंदीर्घंतन्वंति तद्वदित्यपरोदृष्टान्तः तेचागृभीतशोचिषः अगृहीततेजस्काः यद्वै-तन्मरुतांविशेषणं हेमरुतोयूयमगृभीतशोचिषःसन्तोयद्यदा अनश्वदां व्यापकोदकादातारं पणिभिरपहृतानां अश्वानामप्रदातारंवा गिरिं मेघं पर्वतं वा न्ययातन निहतवन्तः ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेचतुर्दशोवर्गः ॥ १४ ॥

अथषष्ठी–

अभ्राजिशर्धोमरुतोयदर्णसंमोषथावृक्षंकपनेववेधसः ।
अधस्मानोअरमतिंसजोषसश्चक्षुरिवयन्तमनुनेषथासुगम् ॥६॥

अभ्राजि । शर्धः । मरुतः । यत् । अर्णसम् । मोषथ । वृक्षम् ।
कपनाऽइव । वेधसः । अध । स्म । नः । अरमतिम् । सऽजोषसः ।
चक्षुःऽइव । यन्तम् । अनु । नेषथ । सुऽगम ॥ ६ ॥

हेवेधसोवृष्टेर्विधातारः हेमरुतः शर्धोभवतांगणमभ्राजि भ्राजते यद्यस्मादर्णसमुदकवन्तं वृक्षं वृश्च्यते विदार्यतेइतिवृक्षोमेघः तंमोषथ ताडयथेत्यर्थः कपनाइव इवेत्यनर्थकः कंपनाः सन्तः यद्वा कंपनाः क्रिमयोवृक्षंघुणादयः तेयथा मुष्णंतितद्वत् अध अपिच स्मेतिपूरणः नो-स्मान्मामित्यर्थः हेसजोषसः युष्मासु परस्परंसमानप्रीतयोयूयं अरमतिं आरमणं धनादिकं प्रतियन्तं गच्छन्तं अनुनेषथ अनुक्रमेणनयथ सुगं सुगमनंमार्गं तत्रदृष्टान्तः—चक्षुरिव तद्य-थामार्गप्रदर्शनेननायकंभवतितद्वत् ॥ ६ ॥

अथसप्तमी—

नसजीयतेमरुतोनहन्यतेनस्रेधतिनव्यथतेनरिष्यति ।
नास्यरायउपदस्यन्तिनोतयऋषिंवायंराजानंवासुषूदथ ॥ ७ ॥

न । सः । जीयते । मरुतः । न । हन्यते । न । स्रेधति । न । व्यथते ।
न । रिष्यति । न । अस्य । रायः । उप । दस्यन्ति । न । ऊतयः ।
ऋषिम् । वा । यम् । राजानम् । वा । सुसूदथ ॥ ७ ॥

हेमरुतोयूयं यमृषिं मंत्रद्रष्टारं ब्राह्मणं राजानंवा सुषूदथ क्षारयथ प्रेरयथ सत्कर्मसुसऋषिः राजावानजीयते अन्यैर्नपराभाव्यते (जिजयेज्यावयोहानावित्यस्यवारूपं हेमरुतः नहन्यते नहिंस्यते अत्यर्थं प्राणैर्नवियुज्यते नस्रेधति नक्षीयते नव्यथते नपीड्यते नरिष्यति नहिंस्यते अत्रहिंसाबाधमात्रं नास्यरायोधनानि नोपदस्यन्ति नोपक्षीयन्ते तथानोतयोरक्षाअप्युपदस्यन्ति ॥ ७ ॥

कारीर्यामिवतृतीयस्याःपिंडचायाज्यानियुत्वंतइत्येषा सूत्रितंच—नियुत्वंतोग्रामजितोयथानरोग्नेबाधस्वविमृधोविदुर्गहेति ।

सैषाष्टमी—

नियुत्वन्तोग्रामजितोयथानरोर्यमणोनमरुतःकवन्धिनः ।
पिन्वन्त्युत्संयदिनासोअस्वरन्व्युन्दन्तिपृथिवींमध्वोअन्धसा ॥ ८ ॥

नियुत्वन्तः । ग्रामऽजितः । यथा । नरः । अर्यमणः । न ।
मरुतः । कवन्धिनः । पिन्वन्ति । उत्सम् । यत् । इनासः ।
अस्वरन् । वि । उन्दन्ति । पृथिवीम् । मध्वः । अन्धसा ॥ ८ ॥

नियुत्वंतोनियुत्संज्ञकैरश्वैस्तद्वन्तोमरुतः ग्रामजितः संघात्मकस्यपदार्थस्यविश्लेषयितारः नरोनराकारानेतारोवामरुतः यद्वा नियुत्वन्तः अयंशब्दोत्राश्वसामान्येवर्तते नितरां यवनवन्तोश्ववन्तोग्रामजितःग्रामस्यजेतारोनरइवमनुष्याइवतथाभवन्ति अर्यमणोनअर्यमप्रभृतयः आदित्याइवदीप्ताइतिशेषः तादृशामरुतःकवंधिनः उदकवन्तोभवन्ति यद्यदा इनासः

ईश्वराः उत्सं कूपादिनिम्नप्रदेशं मेघंवा पिन्वन्ति प्याययंत्युदकेन यदा अस्वरन् शब्दयन्ति यदा व्युन्दन्ति पृथिवीं मध्वः मधुरस्योदकस्यान्धसासारेण तदैवंभवन्ति यद्वा यदा अस्वरन तदा पिन्वंत्युत्समिनासः तदांधसः पृथिवींव्युन्दन्तीति ॥ ८ ॥

अथनवमी—

प्रवत्वंतीयंपृथिवीमरुभ्द्यःप्रवत्वंतीद्यौर्भवतिप्रयभ्द्यः ।
प्रवत्वंतीःपथ्याअन्तरिक्ष्याःप्रवत्वंन्तःपर्वताजीरदानवः ॥ ९ ॥

प्रवत्वंती । इयम् । पृथिवी । मरुतऽभ्यः । प्रवत्वंती । द्यौः ।
भवति । प्रयतऽभ्यः । प्रवत्वंतीः । पथ्याः । अन्तरिक्ष्याः ।
प्रवत्वंन्तः । पर्वताः । जीरऽदानवः ॥ ९ ॥

इयंपृथिवी मरुद्भ्योमरुतामर्थाय प्रवत्वती प्रवन्तः प्रकर्षवन्तोविस्तीर्णाः प्रदेशायस्यां साप्रवत्वती तादृशी भवति कृत्स्नापिभूमिर्मरुत्पराभवतीत्यर्थः तां सर्वामपिव्याप्नुवन्तिइतियावत् तथा द्यौरपि प्रयद्भ्यः प्रकर्षेणगच्छद्भ्यः तेभ्यः प्रवत्वतीभवति साापिमरुतांसंचाराय तथा अन्तरिक्ष्याः अन्तरिक्षेभवाः पथ्याः सुगतयोपि प्रवत्वतीः प्रवत्वत्योमरुद्भ्योभवन्ति पर्वताः अद्रयोमेघावा प्रवत्वन्तोभवन्ति जीरदानवः क्षिप्रदानामरुद्भ्यः ॥ ९ ॥

अथदशमी—

यन्मरुतःसभरसःस्वर्णरःसूर्यउदितेमदथादिवोनरः ।
नवोश्वाःश्रथयन्ताहसिस्रतःसद्योअस्याध्वनःपारमश्नुथ ॥ १० ॥ १५ ॥

यत् । मरुतः । सऽभरसः । स्वःऽनरः । सूर्ये । उतऽइते । मदथ ।
दिवः । नरः । न । वः । अश्वाः । श्रथयन्त । अह । सिस्रतः । सद्यः ।
अस्य । अध्वनः । पारम् । अश्नुथ ॥ १० ॥ १५ ॥

हेमरुतः सभरसः सहबलाः स्वर्णरः सर्वस्यनेतारोयूयं यद्यदा सूर्यउदिते उद्गते मध्याह्ने मदथ सोमेन हेदिवोद्युलोकस्य नरोनेतारः यदा सोमंपातुमिच्छथेत्यर्थः तदावोश्वाः सिस्रतः

सरन्तोनाहश्रथयन्त नैवश्लथयन्ति सद्यस्तदानीमेवास्याध्वनोदेवयजनमार्गस्य पारमश्नुथ व्या-प्नुथ यद्वा यदा सोमेनमदथ तदा त्वदीयाअश्वानशिथिलाभवन्ति यूयंच कृत्स्नस्य लोकत्रय-मार्गस्य पारमश्नुथ ॥ १० ॥

॥ इतिचतुर्थस्यतृतीयेपंचदशोवर्गः ॥ १५ ॥

अथैकादशी—

अंसेषुवऋष्टयःपत्सुखादयोवक्षःसुरुक्मामरुतोरथेशुभः ।
अग्निभ्राजसोविद्युतोगभस्त्योःशिप्राःशीर्षसुवितताहिरण्ययीः ॥११॥

अंसेषु । वः । ऋष्टयः । पत्ऽसु । खादयः । वक्षःऽसु । रुक्माः ।
मरुतः । रथे । शुभः । अग्निऽभ्राजसः । विऽद्युतः । गभस्त्योः ।
शिप्राः । शीर्षऽसु । विऽतताः । हिरण्ययीः ॥ ११ ॥

हेमरुतोवोयुष्माकमंसेषु ऋष्टयआयुधानिभासन्तइतिशेषः पत्सुखादयः कटकाः वक्षःसु-रुक्माःहाराः रथेशुभः मधुराप्रुषाआपः अग्निभ्राजसोग्निदीप्ताः विद्युतोगभस्त्योः हस्तयोर्भास-न्तइत्यर्थः शीर्षसुशिरःसुहिरण्ययीः हिरण्यमय्यः शिप्राः उष्णीषमय्यः वितताविस्तृताःप्रति-वाक्यंवितताइतिवासंबन्धनीयं ॥ ११ ॥

अथद्वादशी—

तंनाकमर्योअगृभीतशोचिषंरुशत्पिप्पलंमरुतोविधूनुथ ।
समच्यन्तवृजनातित्विषन्तयत्स्वरन्तिघोषंविततमृतायवः ॥१२॥

तम् । नाकम् । अर्यः । अगृभीतऽशोचिषम् । रुशत् । पिप्पलम् ।
मरुतः । वि । धूनुथ । सम् । अच्यन्त । वृजना । अतित्विषन्त ।
यत् । स्वरन्ति । घोषम् । विऽततम् । ऋतऽयवः ॥ १२ ॥

हेमरुतोअर्योगंतारोयूयं तं प्रसिद्धंनाकमादित्यं नास्मिन्नकमस्तीतिनाकः तं अगृभी-तशोचिषं असुरैरनपहततेजस्कं तं रुशच्छुभ्रवर्णं पिप्पलमुदकं विधूनुथ विविधंचालयथ अ-र्यद्विकर्मकः यद्यदा वृजना बलानि समच्यन्त संगताबलिनोभवथ हविर्भिरस्मद्दत्तैरितिभावः

पश्चाददतित्विषन्त दीप्ताभवथ उभयत्रपुरुषव्यत्ययः यद्वा यदा असुरावृजनाबलैः समच्यन्त अतित्विषन्त तदा घोषं भयजनकं शब्दं विततं विस्तृतं स्वरन्ति कुरुतेत्यर्थः ऋताय-वउदकमिच्छन्तोयूयं यद्वोत्तरार्धऋत्विग्यजमानपरतयाव्याख्येयः यद्यदा ऋतायवोयज्ञकामाः यजमानादयः यदा समच्यन्त संगताः वृजना बलानि अतित्विषन्त च स्वरन्ति घोषं स्तोत्रं विततं तदानीं पिप्पलं विधूनुथेतिसंबन्धः ॥ १२ ॥

अथत्रयोदशी—

युष्मादत्तस्यमरुतोविचेतसोरायःस्यामरथ्योवयस्वतः ।
नयोयुच्छतितिष्योयथादिवो३स्मेरारन्तमरुतःसहस्रिणम् ॥ १३ ॥

युष्माऽदत्तस्य । मरुतः । विऽचेतसः । रायः । स्याम । रथ्यः ।
वयस्वतः । न । यः । युच्छति । तिष्यः । यथा । दिवः । अस्मे इति ।
ररन्त । मरुतः । सहस्रिणम् ॥ १३ ॥

हेविचेतसोविविधप्रज्ञाहेमरुतोयुष्मादत्तस्य युष्माभिर्दत्तस्य वयस्वतोन्नवतोरायो-धनस्य स्याम भवेम स्वामिनः के रथ्योरथस्वामिनोवयं योयुष्माभिर्दत्तोराः नयुच्छति नच्यवते यथा दिवःसकाशात्तिष्यआदित्योनयुच्छति तथा अस्मे अस्मासु सहस्रिणं अपरि-मितं तंरायं ररन्त रमयत हेमरुतः ॥ १३ ॥

अथचतुर्दशी—

यूयंरयिंमरुतःस्पार्हवीरंयूयमृषिमवथसामविप्रम् ।
यूयमर्वन्तंभरतायवाजंयूयंधत्थराजानंश्रुष्टिमन्तम् ॥ १४ ॥

यूयम् । रयिम् । मरुतः । स्पार्हऽवीरम् । यूयम् । ऋषिम् ।
अवथ । सामऽविप्रम् । यूयम् । अर्वन्तम् । भरताय । वाजम् ।
यूयम् । धत्थ । राजानम् । श्रुष्टिऽमन्तम् ॥ १४ ॥

हेमरुतोयूयं रयिं धनं स्पार्हवीरं स्पृहणीयैःवीरैःपुत्रभृत्यादिभिरुपेतं धत्थ दत्थ हेमरुतो-यूयं सामविप्रं साम्नांविविधंप्रेरयितारं यद्वा सामसहिताविप्रायस्यतादृशं ऋषिमवथ रक्षथ हे-

यूयं अर्वन्तं अश्वं वाजमन्नंचभरताय देवान् बिभ्रते श्यावाश्वाय धत्थ हेमरुतोयूयं र दीप्तंस्वामिनंवा श्रुष्टिमन्तं सुखवन्तं पुत्रमित्यर्थः धत्थ ॥ १४ ॥

अथपंचदशी–

तद्वोयामिद्रविणंसद्यऊतयोयेनास्व१र्णंततनामनॄँरभि ।
इदंसुमेमरुतोहर्यतावचोयस्यतरेमतरसाशतंहिमाः ॥१५॥

तत् । वः । यामि । द्रविणम् । सद्यःऽऊतयः । येन । स्वः । न । ततनाम । नॄन् । अभि । इदम् । सु । मे । मरुतः । हर्यत । वचः । यस्य । तरेम । तरसा । शतम् । हिमाः ॥ १५ ॥ १६ ॥

हेसद्यऊतयः तदानीमेवरक्षायेषांतेतादृशाः सद्योगमनावा वोयुष्मानद्रविणं धनं याचामहे येनधनेन नॄनस्मत्पुत्रभृत्यादीन् अभिततनाम स्वर्णआदित्यइवरश्मीन हेमरुतो स्वभूतमिदं इदानींक्रियमाणं वचः स्तोत्रं सु सुष्ठु हर्यत कामयध्वं यस्यस्तोत्रवचसः बलेनशतं शतसंख्याकान् हिमाः हेमन्तान् तरेम शतसंवत्सरंजीवेमेत्यर्थः ॥ १५ ॥

॥ इतिचतुर्थस्यतृतीयेषोडशोवर्गः ॥ १६ ॥

प्रयज्यवइतिदशर्चंएकादशंसूक्तं श्यावाश्वस्यार्षंमारुतं दशमीत्रिष्टुप् शिष्टाजगत्य यज्यवोदशान्त्यात्रिष्टुबित्यनुक्रमणिका । आभिप्लविकेषष्ठेहनिआग्निमारुतइदंसूक्तंमारुतं स्थानीयं सूत्रितंच–प्रयज्यवइमंस्तोममित्याग्निमारुतमिति ।

तत्रप्रथमा–

प्रयज्यवोमरुतोभ्राजदृष्टयोबृहद्वयोदधिरेरुक्मवक्षसः ।
ईयन्तेअश्वैःसुयमेभिराशुभिःशुभंयातामनुरथाअवृत्सत ॥

प्रऽयज्यवः । मरुतः । भ्राजत्ऽऋष्टयः । बृहत् । वयः । दधिरे । रुक्मऽवक्षसः । ईयन्ते । अश्वैः । सुऽयमेभिः । आशुऽभिः । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ १ ॥

प्रयज्यवः प्रकर्षेणयष्टारोभ्राजदृष्टयोदीप्तायुधाः मरुतः बृहत् प्रभूतम् वयोयौवनलक्षणं प्रभूतमन्नंवा दधिरे धारयन्ति रुक्मवक्षसोहारायतवक्षस्काः तेमरुतः सुयमेभिः सुखेननियमितुंशक्यैः आशुभिः शीघ्रगैरश्वैरीयन्तेप्राप्यन्ते शुभं शोभनंयथाभवतितथा यद्वोदकमभिलक्ष्य यातां गच्छतां मरुतांरथाअप्यन्ववृत्सत अनुवर्तन्ते ॥ १ ॥

अथद्वितीया–

स्वयंदधिध्वेतविषींयथाविदबृहन्महान्तउर्वियाविराजथ ।
उतान्तरिक्षंममिरेव्योजसाशुभंयातामनुरथाअवृत्सत ॥ २ ॥

स्वयम् । दधिध्वे । तविषीम् । यथा । विद । बृहत् । महान्तः ।
उर्विया । वि । राजथ । उत । अन्तरिक्षम् । ममिरे । वि । ओजसा ।
शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ २ ॥

हेमरुतोयूयं स्वयंअसहायेनैव दधिध्वे धारयध्वे कुरुध्वइत्यर्थः किं तविषीं बलं सामर्थ्यं यथाविद जानीथ अप्रतिबद्धसामर्थ्याइत्यर्थः हेमहान्तोयूयं उर्वियाउरवः सन्तोविराजथ उतापिचान्तरिक्षं ओजसा बलेन विममिरे व्याप्नुथ शुभमित्यादिगतं ॥ २ ॥

अथतृतीया–

साकंजाताःसुभ्वःसाकमुक्षिताःश्रियेचिदाप्रतरंवावृधुर्नरः ।
विरोकिणःसूर्यस्येवरश्मयःशुभंयातामनुरथाअवृत्सत ॥ ३ ॥

साकम् । जाताः । सुऽभ्वः । साकम् । उक्षिताः । श्रिये । चित् ।
आ । प्रऽतरम् । ववृधुः । नरः । विऽरोकिणः । सूर्यस्यऽइव ।
रश्मयः । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ३ ॥

साकं सहैवजाताउत्पन्नाः सुभ्वः सुष्ठुभवन्तः महान्तइत्यर्थः तथैवसाकंसहैवउक्षिताः सेक्तारोवर्षकाः श्रियेचित् शोभायैएव प्रतरं प्रकृष्टतरं आसर्वतोववृधुरवर्धयन् नरः कर्मणांनेतारः विरोकिणः विरोचमानाः सूर्यस्येवरश्मयः सूर्यरश्मयइवशुभमित्यादिगतं ॥ ३ ॥

अथचतुर्थी—

आभूषेण्यंवोमरुतोमहित्वनंदिदृक्षेण्यंसूर्यस्येवचक्षणम् ।
उतोअस्माँअमृतत्वेदधातनशुभंयातामनुरथाअवृत्सत ॥ ४

आ॒ऽभू॒षेण्य॑म् । वः॒ । म॒रु॒तः॒ । म॒हि॒ऽत्व॒नम् । दि॒दृ॒क्षेण्य॑म् ।
सूर्य॑स्यऽइव । चक्ष॑णम् । उ॒तो इति॑ । अ॒स्मान् । अ॒मृ॒त॒ऽत्वे ।
द॒धा॒त॒न॒ । शुभ॑म् । या॒ता॒म् । अनु॑ । रथाः॑ । अ॒वृ॒त्स॒त॒ ॥ ४ ॥

हेमरुतः वोयुष्माकं महित्वनं महत्त्वं आभूषेण्यं स्तुत्यं किंच सूर्यस्येवचक्षणंरूपमिव दिदृक्षेण्यं दर्शनीयं उतोअपिचास्मान् अमृतत्वे मोक्षेस्वर्गइत्यर्थः तत्रदधातन धारयत शिष्टंगतं

कारीर्यांप्रथमस्याःपिंड्याउदीरयथेत्यनुवाक्या सूत्रितंच—उदीरयथामरुतःसमुद्रतः मरुतस्तविषाउदन्यवइति ।

सैषापंचमी—

उदीरयथामरुतःसमुद्रतोयूयंवृष्टिंवर्षयथापुरीषिणः ।
नवोदस्राउपदस्यन्तिधेनवःशुभंयातामनुरथाअवृत्सत ॥५॥

उत् । ई॒र॒य॒थ॒ । म॒रु॒तः॒ । स॒मु॒द्र॒तः । यू॒यम् । वृ॒ष्टिम् । व॒र्ष॒य॒थ॒ ।
पु॒री॒षि॒णः॒ । न । वः॒ । द॒स्राः॒ । उप॑ । द॒स्य॒न्ति॒ । धे॒नवः॑ । शुभ॑म् ।
या॒ता॒म् । अनु॑ । रथाः॑ । अ॒वृ॒त्स॒त॒ ॥ ५ ॥ १७ ॥

हेमरुतोयूयंसमुद्रतः समुद्रवणसाधनादन्तरिक्षात् उदीरयथ प्रेरयथवृष्टिं अयमेव पुनरुच्यते हेपुरीषिणः पृणतेः प्रीणातेर्वापुरीषमुदकं हेतद्वन्तोयूयं वृष्टिंवर्षयथ हेदस्राः दर्शनीयाः शत्रूणामुपक्षपयितारोवा वोयुष्माकं धेनवः प्रीणयितारोमेघाः नोपदस्यन्ति नशुष्यन्ति ॥ ५

॥ इतिचतुर्थस्यतृतीयेसप्तदशोवर्गः ॥ १७ ॥

अथषष्ठी—

यदश्वान्धूर्षुपृषतीरयुग्ध्वंहिरण्ययान्प्रत्यत्काँअमुग्ध्वम् ।
विश्वाइत्स्पृधामरुतोव्यस्यथशुभंयातामनुरथाअवृत्सत ॥ ६ ॥

यत् । अश्वान् । धूःऽसु । पृषतीः । अयुग्ध्वम् । हिरण्ययान् ।
प्रति । अत्कान् । अमुग्ध्वम् । विश्वाः । इत् । स्पृधः । मरुतः ।
वि । अस्यथ । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ६ ॥

हेमरुतः यूयं यद्यदाश्वान् धूर्षु रथसंबन्धिनीष्वयुग्ध्वं योजितवन्तःस्थ कीदृशानश्वान् पृषतीः पृषत्योमरुतामित्युक्तत्वात् पृषद्वर्णावडवाः सारंगीर्वात्राश्वशब्दवाच्या हिरण्ययान् हिरण्यवर्णान् अत्कान् कवचान् प्रत्यमुग्ध्वं प्रत्यमुंचत एवंकृत्वा विश्वाइत्स्पृधः सर्वानपिसंग्रामान् हेमरुतः व्यस्यथ विक्षिपथ शुभमित्यादिगतं ॥ ६ ॥

अथसप्तमी—

नपर्वतानन्द्योवरन्तवोयत्राचिध्वंमरुतोगच्छथेदुतत् ।
उतद्यावापृथिवीयाथनापरिशुभंयातामनुरथाअवृत्सत ॥ ७ ॥

न । पर्वताः । न । नद्यः । वरन्त । वः । यत्र । अचिध्वम् ।
मरुतः । गच्छथ । इत् । ऊँ इति । तत् । उत । द्यावापृथिवी इति ।
याथन । परि । शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ७ ॥

हेमरुतःवोयुष्मान् पर्वताः शिलोच्चयानवरन्त नवारयन्तु तथा नद्यश्च नवारयन्तु किन्तु यत्र यस्मिन् यज्ञादिस्थाने अचिध्वं जानीथसंकल्पयथ तत्स्थानं गच्छथेदु गच्छथैव उतापिच द्यावापृथिवीच परि परितोयाथनयाथ वृष्ट्यर्थमिति ॥ ७ ॥

अथाष्टमी—

यत्पूर्व्यंमरुतोयच्चनूतनंयदुद्यतेवसवोयच्चशस्यते ।
विश्वस्यतस्यभवथानवेदसःशुभंयातामनुरथाअवृत्सत ॥ ८ ॥

यत् । पूर्व्यम् । मरुतः । यत् । च । नूतनम् । यत् । उद्यते । वसवः ।
यत् । च । शस्यते । विश्वस्य । तस्य । भवथ । न । वेदसः ।
शुभम् । याताम् । अनु । रथाः । अवृत्सत ॥ ८ ॥

हेमरुतोयूयं यत्पूर्व्यं पूर्वतनं पूर्वमनुष्ठितंयत्कर्मास्तितदित्यर्थः यच्चनूतनं कर्मास्ति यच्चोद्यते ऊर्ध्वंप्राप्यते स्तूयतेइत्यर्थः हेवसवोवासकाः यच्च शस्यते शंसनंक्रियते तस्य विश्वस्योत्कृष्टस्य नवेदसः जानन्तोभवथ ॥ ८ ॥

अथनवमी–

मृळतंनोमरुतोमावंधिष्टनास्मभ्यंशर्मंबहुलंवियंन्तन ।
अधिस्तोत्रस्यंसख्यस्यंगातनशुभंयातामनुरथांअवृत्सत ॥९॥

मृळतं । नः । मरुतः । मा । वधिष्टन । अस्मभ्यंम् । शर्मं ।
बहुलम् । वि । यन्तन । अधिं । स्तोत्रस्यं । सख्यस्यं । गातन ।
शुभंम् । याताम् । अनुं । रथाः । अवृत्सत ॥ ९ ॥

हेमरुतःनोस्मान्मृळत सुखयत मावधिष्टन असम्यक्करणादिजनितेनकोपेन मावधिध्वं किंतु अस्मभ्यं शर्म सुखं बहुलं अत्यधिकं वियन्तन कुरुत किंच स्तोत्रस्यस्तोत्रं सख्यस्य सख्यं अधिगातन अधिगच्छत स्तुतिमनुभूयास्मासुसख्यंकुरुतेत्यर्थः ॥ ९ ॥

अथदशमी–

यूयमस्मान्नंयतवस्योअच्छानिरंहतिभ्योंमरुतोगृणानाः ।
जुषध्वंनोहव्यदांतिंयजत्रावयंस्यांमपतंयोरयीणाम् ॥१०॥ १८॥

यूयम् । अस्मान् । नयत । वस्यः । अच्छं । निः । अंहतिऽभ्यः ।
मरुतः । गृणानाः । जुषध्वम् । नः । हव्यऽदांतिम् । यजत्राः ।
वयम् । स्याम । पतंयः । रयीणाम् ॥ १० ॥ १८ ॥

हेमरुतोयूयमस्मान् वस्योवसीयोधनं स्वर्गादिलक्षणंस्थानंवा अछ अभिलक्ष्य नयत प्रापयत किंच अंहतिभ्यः पापेभ्योनिर्णयत निर्गमयत गृणानाः स्तूयमानाः कर्मणिकर्तृप्रत्ययः जुषध्वं सेवध्वं नोस्माकं हव्यदातिं हविर्दानवन्तंयज्ञं हेयजत्राः यष्टव्यायूयंवयंच रयीणां बहुविधानांधनानां पतयः स्याम भवेम ॥ १० ॥

॥ इतिचतुर्थस्यतृतीयेष्टादशोवर्गः ॥ १८ ॥

अग्नेशर्धन्तमितिनवर्चंद्वादशंसूक्तं श्यावाश्वस्यार्षंमारुतं तृतीयासप्तम्यौसतोबृहत्यौ शिष्टाबृहत्यः अग्नेनवबार्हतंतृतीयासप्तम्यौसतोबृहत्यावित्यनुक्रमणिका ।

तत्रप्रथमा—

अग्नेशर्धन्तमागणंपिष्टंरुक्मेभिरञ्जिभिः ।
विशोअद्यमरुतामवंह्वयेदिवश्चिद्रोचनादधि ॥ १ ॥

अग्ने । शर्धन्तम् । आ । गणम् । पिष्टम् । रुक्मेभिः । अञ्जिऽभिः । विशः । अद्य । मरुताम् । अव । ह्वये । दिवः । चित् । रोचनात् । अधि ॥१॥

हेअग्ने शर्धन्तं शत्रूनभिभवन्तं यज्ञायोत्सहमानंवा गणं मरुतांगणं आह्वयेइतिशेषः कीदृशंगणं रुक्मेभिः रुक्मैः रोचमानैरंजिभिः आभरणैश्च पिष्टं अवयवितं युक्तमित्यर्थः अद्यास्मिन्यागदिनेमरुतांविशः प्रजाः गणानित्यर्थः तान्रोचनाद्रोचमानाद्दिवोद्युलोकादधीतिपंचम्यर्थानुवादी चित्पूरणः अव अवस्तात् अस्मदभिमुखं ह्वये आह्वयामि ॥ १ ॥

अथद्वितीया—

यथाचिन्मन्यसेहृदातदिन्मेजग्मुराशसः ।
येतेनेदिष्ठंहवनान्यागमंतान्वर्धभीमसंदृशः ॥ २ ॥

यथा । चित् । मन्यसे । हृदा । तत् । इत् । मे । जग्मुः । आऽशसः । ये । ते । नेदिष्ठम । हवनानि । आऽगमन् । तान् । वर्ध । भीमऽसन्दृशः ॥ २ ॥

हेअग्ने त्वं हृदा हृदयेन मरुतोयथाचिन्मन्यसे चिदितिपूजायां येनप्रकारेण अतिपूजितं जानासि तेष्वादरंकरोषीत्यर्थः तदित् तथैव मेमदर्थं जग्मुर्गच्छन्तु आशसः आशंसितारः इच्छन्तः शत्रून्हिंसन्तोवा अनन्तरं येमरुतोनेदिष्ठं अत्यंतांतिकंसन्निधावेव ते तव हवनान्याह्वानानिश्रुत्वा आगमन् आगच्छन्ति तान् भीमसंदृशः कालविलंबासहनेनभयंकरदर्शनान् वर्ध वर्धय हविःप्रापणेन ॥ २ ॥

अथतृतीया—

मीह्ळुष्मतीवपृथिवीपराहतामदन्त्येत्यस्मदा ।
ऋक्षोनवोमरुतःशिमीवाँअमोदुध्रोगौरिवभीमयुः ॥ ३

मीह्ळुष्मतीऽइव । पृथिवी । पराऽहता । मदन्ती । एति ।
अस्मत् । आ । ऋक्षः । न । वः । मरुतः । शिमीऽवान् ।
अमः । दुध्रः । गौःऽईव । भीमऽयुः ॥ ३ ॥

मीह्ळुष्मतीप्रबलस्वामिका पराहता अन्यैरभिभूतापृथिवीव अत्रपृथिवीशब्दस्तदधिष्ठितांप्रजांलक्षयति सायथा स्वस्वामिनमुपद्रुताभिगच्छतितद्वदिति मरुतांसाकल्येनसर्वथाप्राप्तेदृष्टान्तः एवंमदन्तीहृष्यन्ती मरुत्सेना अस्मत अस्मानित्यर्थः आएति आगच्छति हेमरुतेवोयुष्माकं अमोबले गणः ऋक्षान अग्निरिव शिमीवान कर्मवान दुध्रोदुर्धरः गौरिवभीमभीमैर्वृषभैर्युक्तागौरिव सयथा शिमीवान् कर्मवान ॥ ३ ॥

अथचतुर्थी—

नियेरिणन्त्योजसावृथागावोनदुर्धुरः ।
अश्मानंचित्स्वर्यं[1]पर्वतंगिरिंप्रच्यावयन्तियामभिः ॥४

नि । ये । रिणन्ति । ओजसा । वृथा । गावः । न । दुःऽधुरः ।
अश्मानम् । चित् । स्वर्यम् । पर्वतम् । गिरिम् । प्र । च्यवयन्ति ।
यामऽभिः ॥ ४ ॥

येमरुतोओजसा स्वीयेनबलेन निरिणन्ति हिंसन्ति शत्रून् वृथा अनायासंसंचारमात्रेण गावोन दुर्धुरः दुःखेनहिंस्याअश्वाइव तेमरुतः स्वर्यं शब्दयन्तंश्मानं व्याप्तंपर्वतं जगत्पूरकोदकवन्तं पर्ववान्पर्वतः पर्वपुनःपृणातेःप्रीणातेर्वाइतिनिरुक्तं।दृशं गिरिं मेघं यद्वा पर्वतमितिविशेष्यंगिरिमिनिविशेषणं निगिरत्युदकमितिगिरिःयामभिर्गमनैः प्रच्यावयन्ति उदकनिर्गमनार्थं ॥ ४ ॥

---

[1] नि० १. २०.।

अथपंचमी–

उत्तिष्ठनूनमेषांस्तोमैःसमुंक्षितानाम् ।
मरुतांपुरुतममपूर्व्यंगवांसर्गमिवह्वये ॥ ५ ॥ १९ ॥

उत् । तिष्ठ । नूनम् । एषाम् । स्तोमैः । । समऽउंक्षितानाम् ।
मरुताम् । पुरुऽतमम् । अपूर्व्यम् । गवाम् । सर्गम्ऽइव । ह्वये ॥ ५ ॥

हेमरुतोयूयं उत्तिष्ठ उत्तिष्ठत व्यत्ययेनैकवचनं नूनं निश्चयं एषांस्तोमैःस्तोत्रैः समुक्षितानां वर्धितानांमरुतां यद्वा स्तोमैरुपह्वयइतिसंबन्धः तादृशां मरुतां पुरुतमं प्रभूततमं अपूर्व्यं नविद्यतेपूर्वोयेभ्यस्तंअपूर्व्यं सर्गं संघं गवामुदकानां प्रसिद्धानांगवांवा सर्गं संघमिवह्वये आह्वये ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेएकोनविंशोवर्गः ॥ १९ ॥

अथषष्ठी–

युङ्ध्वंह्यरुषीरथेयुङ्ध्वंरथेषुरोहितः ।
युङ्ध्वंहरीअजिराधुरिवोळ्हवेवहिष्ठाधुरिवोळ्हवे ॥ ६ ॥

युङ्ध्वम् । हि । अरुषीः । रथे । युङ्ध्वम् । रथेषु । रोहितः ।
युङ्ध्वम् । हरी इति । अजिरा । धुरि । वोळ्हवे । वहिष्ठा ।
धुरि । वोळ्हवे ॥ ६ ॥

हेमरुतोयूयं रथे युष्मदीये सर्वेषांसाधारणभूते अरुषीरारोचमानावडवाः युङ्ध्वं योजयध्वं तथा रथेषु युष्मदीयेषु रोहितोरोहितवर्णायुङ्ध्वं हरी अश्वौ अजिरा अजिरौ आशुगमनौ धुरिवोळ्हवे वहनाययुङ्ध्वं आदरार्थंपुनरुच्यते वहिष्ठा वोढृतमावश्वौधुरिवोळ्हवे ॥ ६ ॥

अथसप्तमी–

उतस्यवाज्यरुषस्तुविष्वणिरिहस्मधायिदर्शतः ।
मावोयामेषुमरुतश्चिरंकरत्प्रतंरथेषुचोदत ॥ ७ ॥

उत । स्यः । वाजी । अरुषः । तुविऽस्वनिः । इह । स्म । धायि । दर्शतः । मा । वः । यामेषु । मरुतः । चिरम् । करत् । प्र । तम् । रथेषु । चोदत ॥ ७ ॥

उतापिच स्यः सवाजी वेजनवानरुषआरोचनः तुविष्वणिः प्रभूतध्वनिरश्वः अरुष-इत्यनेनरोहितइत्युक्तंभवति प्रष्टिर्वहतिरोहितइतिह्युक्तं । इहेदानीं दर्शतोदर्शनीयःसन् धायि र-थेनियोजितः स्मेतिपूरणः हेमरुतोवोयामेषु गमनेषु सोश्वश्चिरंविलंबंमाकरत् माकरोतु तं रथेषु रथेयुक्तमितिशेषः प्रचोदत प्रेरयत यथाविलंबंनकुर्यात्तथाप्रेरयत ॥ ७ ॥

अथाष्टमी—

रथंनुमारुतंवयंश्रवस्युमाहुवामहे ।
आयस्मिन्तस्थौसुरणानिबिभ्रतीसचामरुत्सुरोदसी ॥ ८ ॥

रथम् । नु । मारुतम् । वयम् । श्रवस्युम् । आ । हुवामहे । आ । यस्मिन् । तस्थौ । सुऽरणानि । बिभ्रती । सचा । मरुत्ऽसु । रोदसी ॥ ८ ॥

वयमात्रेयाः रथं रंहणस्वभावं मारुतं मरुतांसंबन्धिनंरथं श्रवस्युं अन्नेच्छुं नुअद्य आ-हुवामहे आह्वयामः यस्मिन्रथे सुरणानि सुरमणानि जलानि बिभ्रती धारयन्ती रोदसी रु-द्रस्यपत्नी मरुतांमाता यद्वा रुद्रोवायुः तत्पत्नी माध्यमिकादेवीमरुत्सु सचा सहिता आत-स्थौ आस्थितवती तंरथमाहुवे ॥ ८ ॥

अथनवमी—

तंवःशर्धंरथेशुभंत्वेषंपनस्युमाहुवे ।
यस्मिन्त्सुजातासुभगामहीयतेसचामरुत्सुमीळ्हुषी ॥ ९ ॥ २० ॥

तम् । वः । शर्धम् । रथेऽशुभम् । त्वेषम् । पनस्युम् । आ । हुवे । यस्मिन् । सुऽजाता । सुऽभगा । महीयते । सचा । मरुत्ऽसु । मीळ्हुषी ॥ ९ ॥ २० ॥

---

१ ऋ० सं० ५. ८. ३.

हेमरुतः वः शर्धं युष्मदीयं बलं गणं रथेशुभं रथेशोभमानं त्वेषं दीप्तं पनस्युं स्तुत्यमाहुवे आह्वये यस्मिन्शर्धे सुजाता सुष्टुप्रवृद्धा सुभगा शोभनभाग्या अतिमहती मीळ्हुषी मीळ्हुष्टमशिवतमेत्यादौदर्शनान्मीढ्वान्रुद्रः तत्पत्नीमीळ्हुषी मरुत्सु सचा सह महीयते पूज्यते तंशर्धमाहुवे आपस्तंबोपिरुद्रपत्नींमीळ्हुषीसंज्ञयाव्यवजहार उत्तरया दक्षिणस्यामीशानमावाहयति लौकिक्यावाचोत्तरस्यां मीळ्हुषीं मध्येजयन्तमिति ॥ ९ ॥

॥ इतिचतुर्थस्यतृतीयेविंशोवर्गः ॥ २० ॥

॥ इतिपञ्चमेमण्डलेचतुर्थोनुवाकः ॥ ४ ॥

पंचमेनुवाकेषोडशसूक्तानि तत्रारुद्रासइत्यष्टर्चंप्रथमंसूक्तं श्यावाश्वस्यार्षंमारुतं सप्तम्यष्टम्यौत्रिष्टुभौ शिष्टाषड्जगत्यः आरुद्रासोष्टौद्वित्रिष्टुबन्तमित्यनुक्रमणिका। विनियोगोलैंगिकः।

तत्रप्रथमा—

आरुद्रासइन्द्रवन्तःसजोषसोहिरण्यरथाःसुवितायगन्तन।
इयंवोअस्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिवउत्सा उदन्यवे ॥ १ ॥

आ। रुद्रासः। इन्द्रऽवन्तः। सऽजोषसः। हिरण्यऽरथाः।
सुवितायं। गन्तन। इयम्। वः। अस्मत्। प्रति। हर्यते। मतिः।
तृष्णऽजे। न। दिवः। उत्साः। उदन्यवे ॥ १ ॥

हेरुद्रासोरुद्रपुत्राः इन्द्रवन्तः इन्द्रेणयुष्मत्स्वामिनातद्वन्तः सजोषसः परस्परंसमानप्रीतयोहिरण्यरथाः हिरण्मयरथाःसन्तः सुविताय सुगमनाय तत्साधनाय सुष्टु सर्वैर्गन्तव्याय यज्ञाय तदर्थं आगन्तन आगच्छत किमत्रविद्यतइनितदुच्यते इयं अस्मदस्मदीया मतिः स्तुतिर्वोयुष्मान् प्रतिहर्यते कामयते तस्मादागच्छत उदन्यवे उदकेच्छवे तृष्णजे गोतमाय दिवः द्युलोकसकाशात् उत्साः उदकनिष्पन्दायथायुष्माभिः प्रेरितास्तद्वदस्मदर्थमप्यागत्याभिमतंददतेत्यर्थः ॥ १ ॥

अथद्वितीया—

वाशीमन्तऋष्टिमन्तोमनीषिणःसुधन्वानइषुमन्तोनिषङ्गिणः।
स्वश्वास्थसुरथाःपृश्निमातरःस्वायुधामरुतोयाथनाशुभम् ॥ २ ॥

वाशीऽमन्तः । ऋष्टिऽमन्तः । मनीषिणः । सुऽधन्वानः । इषुऽमन्तः ।
निषङ्गिणः । सुऽअश्वाः । स्थ । सुऽरथाः । पृश्निऽमातरः ।
सुऽआयुधाः । मरुतः । याथन । शुभम् ॥ २ ॥

हेमरुतः यूयंवाशीमन्तः वाशीतितक्षणसाधनमायुधं तद्वन्तःस्थ ऋष्टिमन्तः ऋष्टिर्नाम छुरिका तद्वन्तःस्थ एवंसर्वत्रयोज्यं मनीषिणः मनसईश्वराः मनस्विनः सुधन्वानः शोभनधनुष्काः इषुमन्तोबाणवन्तः निषंगिणोनिषंगवन्तः स्वश्वाःस्थ शोभनाश्वाभवथ सुरथाः शोभनरथाः पृश्निमातरः पृश्नेःपुत्राः स्वायुधाः खड्गपरश्वादिसकलायुधोपेताः एवंमहात्मानःसन्तः शुभंशोभनंयथाभवतितथाशुभं उदकायवा रथेनयाथन गच्छथ ॥ २ ॥

अथतृतीया—

धूनुथद्यांपर्वतान्दाशुषेवसुनिवोवनाजिहतेयामनोभिया ।
कोपयथपृथिवींपृश्निमातरःशुभेयदुग्राःपृषतीरयुग्ध्वम् ॥ ३ ॥

धूनुथ । द्याम् । पर्वतान् । दाशुषे । वसु । नि । वः । वना । जिहते ।
यामनः । भिया । कोपयथ । पृथिवीम् । पृश्निऽमातरः । शुभे ।
यत् । उग्राः । पृषतीः । अयुग्ध्वम् ॥ ३ ॥

हेमरुतः द्यांदिवीत्यर्थः पर्वतान् मेघान् दाशुषे हविर्दात्रेयजमानाय वसु धनानिच धूनुथ प्रापयथ वोयुष्माकं यामनः गमनस्यभियाभीत्या वना वनानि वृक्षादिसमूहानि निजिहते नितरांकंपते अवनताभृशंशंसंतीत्यर्थः हेपृश्निमातरः पृश्नेःपुत्राः पृश्नियैवैपयसोमरुतोजाताइतिहिश्रुतिः[1] । हेमरुतः पृथिवीं कोपयथ अभिवृष्ट्या क्षोभयथ हेउग्राउद्गूर्णबलाः यूयं यद्यदा शुभे उदकार्थं पृषतीर्युष्मदीयाअश्वाःअयुग्ध्वं योजयथ तदा कोपयथपृथिवीं ॥ ३ ॥

अथचतुर्थी—

वातत्विषोमरुतोवर्षनिर्णिजोयमाइवसुसदृशःसुपेशसः ।
पिशङ्गाश्वाअरुणाश्वाअरेपसःप्रत्वक्षसोमहिनाद्यौरिवोरवः ॥ ४ ॥

---

1 तै० सं० २. २. ११. ।

वातऽत्विषः । मरुतः । वर्षऽनिर्निजः । यमाःऽइव । सुऽसदृशः ।
सुऽपेशसः । पिशङ्गऽअश्वाः । अरुणऽअश्वाः । अरेपसः ।
प्रऽत्वक्षसः । महिना । द्यौःऽइव । उरवः ॥ ४ ॥

वाततिवषः सर्वदासंप्राप्तदीप्तयः वर्षनिर्णिजः वृष्टेःशोधयितारः अथवा निर्निगिति रूपनाम वर्षमेवरूपंयेषांतेतादृशाः वृष्टिप्रदाइत्यर्थः यमाइव युगलोत्पन्नाइव सुसदृशः परस्परंबलरूपादिभिरत्यन्तंसरूपाः सुपेशसःशोभनरूपाः पिशंगाश्वाः पिशंगवर्णाश्वोपेताः तथा अरुणाश्वाःअरेपसोअपापाः प्रत्वक्षसः प्रकृष्टंतनूकर्तारोद्वेष्टॄणां महिना महत्त्वेन द्यौरिवान्तरिक्षमिव उरवःविस्तीर्णाउक्तलक्षणाः नामभेजिरेइत्युत्तरेणसंबन्धः ॥ ४ ॥

अथपंचमी—

पुरुद्रप्साअञ्जिमन्तःसुदानवस्त्वेषसन्दृशोअनवभ्रराधसः ।
सुजातासोजनुषारुक्मवक्षसोदिवोअर्काअमृतंनामभेजिरे ॥५॥२१॥

पुरुऽद्रप्साः । अञ्जिऽमन्तः । सुऽदानवः । त्वेषऽसन्दृशः ।
अनवभ्रऽराधसः । सुऽजातासः । जनुषा । रुक्मऽवक्षसः ।
दिवः । अर्काः । अमृतम् । नाम । भेजिरे ॥ ५ ॥ २१ ॥

पुरुद्रप्साः प्रभूतोदकाः अंजिमन्तः आभरणवन्तः सुदानवः शोभनदानाः त्वेषसंदृशोदीप्तरूपाः अनवभ्रराधसोनवभ्रष्टधनाः सुजातासः शोभनजननाः जनुषा जन्मनैव उक्तरूपाः रुक्मवक्षसोहारवक्षस्काः अर्काः पूज्याः मरुतोदिवोद्युलोकादागत्य अमृतममरणसाधनंनाम-उदकं नमनहेतुकमुक्तलक्षणंहविर्वा भेजिरे लब्धवन्तः ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेएकविंशोवर्गः ॥ २१ ॥

अथषष्ठी—

ऋष्टयोवोमरुतोअंसयोरधिसहओजोबाह्वोर्वोबलंहितम् ।
नृम्णाशीर्षस्वायुधारथेषुवोविश्वावःश्रीरधितनूषुपिपिशे ॥ ६ ॥

ऋष्टर्यः । वः । मरुतः । अंसयोः । अधि । सहः । ओजः ।
बाह्वोः । वः । बलम् । हितम् । नृम्णा । शीर्षऽसु । आयुधा । रथेषु ।
वः । विश्वा । वः । श्रीः । अधि । तनूषु । पिपिशे ॥ ६ ॥

हेमरुतः वोयुष्माकमंसयोरधि ऋष्टयआयुधविशेषाः हिताः आश्रिताः वक्ष्यमाणहितशब्दोविपरिणेतव्यः अधीतिसप्तम्यर्थानुवादी तथा वोबाह्वोरधिसहः शत्रूणामभिभावुकं ओजः ओजोनामाष्टमोधातुः तद्रूपंबलं हितं निहितं शीर्षसु शिरःसु नृम्णा नृम्णानि हिरण्यमयानि पट्टोष्णीषादीनि निहितानि रथेष्वायुधा आयुधानि युद्धसाधनानि निहितानि विश्वा सर्वा वःश्रीः युष्माकंकान्तिः तनूषु तदीयेषु अधिपिपिशे अधिष्ठिताआश्रिता ॥ ६ ॥

अथसप्तमी—

गोमदश्वावद्रथवत्सुवीरंचन्द्रवद्राधोमरुतोददानः ।
प्रशस्तिंनःकृणुतरुद्रियासोभक्षीयवोवसोदैव्यस्य ॥ ७ ॥

गोऽमत् । अश्वऽवत् । रथऽवत् । सुऽवीरम् । चन्द्रऽवत् ।
राधः । मरुतः । दद । नः । प्रऽशस्तिम् । नः । कृणुत । रुद्रियासः ।
भक्षीय । वः । अवसः । दैव्यस्य ॥ ७ ॥

हेमरुतः नोस्मभ्यं गोमत् बहुभिर्गोभिरुपेतं अश्वावत् बहुभिरश्वैरुपेतं रथवत् रथोपेतं सुवीरं सुष्ठु पुत्रोपेतं चंद्रवत् हिरण्योपेतं राधोन्नं दद ददत व्यत्ययेनैकवचनं अथवालोडर्थस्य लिटोमध्यमबहुवचनं हेरुद्रियासोरुद्रपुत्रामरुतःनोस्मदीयां प्रशस्तिंसमृद्धिमित्यर्थः तांकृणुत कुरुत वोयुष्माकंस्वभूतं अवसोवोरक्षणं दैव्यस्य दैव्यं देवार्हंभक्षीय भजेय ॥ ७ ॥

अथाष्टमी—

हयेनरोमरुतोमृळतानस्तुवीमघासोअमृताऋतज्ञाः ।
सत्यश्रुतःकवयोयुवानोबृहद्गिरयोबृहदुक्षमाणाः ॥ ८ ॥ २२ ॥

हये । नरः । मरुतः । मृळत । नः । तुविऽमघासः । अमृताः ।
ऋतऽज्ञाः । सत्यऽश्रुतः । कवयः । युवानः ।
बृहत्ऽगिरयः । बृहत् । उक्षमाणाः ॥ ८ ॥ २२ ॥

हये हेनरोनेतारः नःमरुतोस्मान् मृळत सुखयत अस्मभ्यंहितायवा सुखिनोभ-वत हेतुवीमघासः प्रभूतधनाः अमृताः अमरणस्वभावाः ऋतज्ञाः उदकस्ययज्ञस्यवा ज्ञातारः कर्तारइत्यर्थः सत्यश्रुतः सत्येनसत्यफलत्वेनप्रसिद्धाः कवयोमेधाविनः युवानो-नित्यतरुणाः बृहद्गिरयः प्रभूतस्तुतयः बृहदत्यधिकं उक्षमाणाः हविर्भिःसेविताः उदकं वासिंचन्तोयूयंमृळत ॥ ८ ॥

॥ इतिचतुर्थस्यतृतीयेद्वाविंशोवर्गः ॥ २२ ॥

तमुनूनमित्यष्टर्चंद्वितीयंसूक्तं श्यावाश्वस्यार्षंत्रैष्टुभंमारुतं तम्वित्यनुक्रमणिका वि-नियोगोलैंगिकः ।

तत्रप्रथमा—

तमुनूनंतविषीमन्तमेषांस्तुषेगणंमारुतंनव्यंसीनाम् ।
यआश्वंश्वाअमवद्वहन्तउतेशिरेअमृतस्यस्वराजः ॥ १ ॥

तम् । ऊँ इति । नूनम् । तविषीऽमन्तम् । एषाम् । स्तुषे ।
गणम् । मारुतम् । नव्यंसीनाम् । ये । आशुऽअंश्वाः । अमंऽवत् ।
वहंन्ते । उत । ईशिरे । अमृतंस्य । स्वऽराजंः ॥ १ ॥

तमु तमेव पूर्वंस्तुतमेव मारुतं मरुतांसंबन्धिनं तंगणं तविषीमन्तं दीप्तिमन्तं नू-नं अद्य स्तुषे कीदृशांमरुतां नव्यसीनां लिंगव्यत्ययः नवतराणांस्तुत्यानांवा एषांमारु-तंगणं गणावयवभूतामरुतः कीदृशाइतिउच्यते येमरुतः आश्वश्वाः शीघ्रगाम्यश्वोपेताः अमवत् बलवत् बलवन्तोयथाभवन्तितथावहन्तोगच्छन्तः उतापिच ईशिरे ईश्वराभवन्ति अमृतस्योदकस्य स्वराजः स्वायत्तदीप्तयः स्वयमेवराजमानाः तेषांगणंस्तुषे ॥ १ ॥

अथद्वितीया—

त्वेषंगणंतवसंखादिहस्तंधुनिव्रतंमायिनंदातिवारम् ।
मयोभुवोयेअमितामहित्वावन्दस्वविप्रतुविराधसोनॄन् ॥ २ ॥

त्वेषम् । गणम् । तवसंम् । खादिऽहस्तम् । धुनिऽव्रतम् । मायिनंम् ।
दातिऽवारम् । मयःऽभुवंः । ये । अमिताः । महिऽत्वा । वन्दंस्व ।
विप्र । तुविऽराधंसः । नॄन् ॥ २ ॥

त्वेषं दीप्तंगणं मारुतं तवसं बलवन्तं खादिहस्तं कटकहस्तं धुनिव्रतं कंपयितृ-कर्माणं मायिनं प्रज्ञावन्तं दातिवारं दत्तधनं हेविप्र होतः वंदस्व स्तुहीतिसंबन्धः येमरुतोमयोभुवः सुखस्यभावयितारः महित्वा महत्त्वेन अमिताः अपरिच्छिन्नाः तान् तुविराधसः प्रभूतधनान् नॄन् नेतॄन् वन्दस्व ॥ २ ॥

अथतृतीया—

आवोयन्तूदवाहासोअद्यवृष्टिंयेविश्वेमरुतोजुनन्ति ।
अयंयोअग्निर्मरुतःसमिद्धएतंजुषध्वंकवयोयुवानः ॥ ३ ॥

आ । वः । यन्तु । उदऽवाहासः । अद्य । वृष्टिम् । ये । विश्वे । मरुतः । जुनन्ति । अयम् । यः । अग्निः । मरुतः । सम्ऽइद्धः । एतम् । जुषध्वम् । कवयः । युवानः ॥ ३ ॥

येविश्वेव्याप्ताः मरुतोवृष्टिंजुनन्ति प्रेरयन्ति तेउदवाहासः उदकस्यवोढारोमरुतः अद्येदानीं वोयुष्मान् आयन्तु आगच्छन्तु ऋत्विग्यजमानाः अथप्रत्यक्षवादः हेमरुतः यःप्रसिद्धोयमग्निः समिद्धः सम्यग्दीपितः एतमग्निं जुषध्वं सेवध्वं हेकवयोमेधाविनोहेयुवानः नित्यतरुणाः सर्वत्रव्याप्तावा ॥ ३ ॥

अथचतुर्थी—

यूयंराजानमिर्यंजनायविभ्वतष्टंजनयथायजत्राः ।
युष्मदेतिमुष्टिहाबाहुजूतोयुष्मत्सदश्वोमरुतःसुवीरः ॥ ४ ॥

यूयम् । राजानम् । इर्यम् । जनाय । विभ्वऽतष्टम् । जनयथ । यजत्राः । युष्मत् । एति । मुष्टिऽहा । बाहुऽजूतः । युष्मत् । सत्ऽअश्वः । मरुतः । सुऽवीरः ॥ ४ ॥

हेमरुतः यूयं जनाय यजमानाय राजानं स्वामिनं राजमानंवा इर्यं शत्रूणांप्रेरकं च्यावयितारं विभ्वतष्टं विभ्वानामऋभूणांमध्यमः सकुशली तेननिर्मितं अत्यन्तरूपवन्तमित्यर्थः तादृशंपुत्रं जनयथ उत्पादयथ हेयजत्राः यष्टव्याः हेमरुतोयुष्मद्युष्मत्तः एति गच्छति पुत्रःकीदृशः मुष्टिशब्दोबाहूपलक्षकः स्वभुजबलेनैवहन्ताशत्रूणां तदेवोच्यते बाहुजूतः बाहुप्रेरकः

शत्रूणां यस्यतादृशःपुत्रएति तथायुष्मतयुष्मन्तः सदश्वोविद्यमानाश्वः बह्वश्वइत्यर्थः सुवीरः शोभनवीर्यःपुत्रएति जायतइत्यर्थः ॥ ४ ॥

वरुणप्रघासेमारुत्याआमिक्षायाअराइवेतियाज्या सूत्रितंच—अराइवेदचरमाअहेवेमंमेवरुणश्रुधीति । एकादशिनेमारुतेपशावेवैषपशुपुरोडाशस्ययाज्या सूत्रितंच—अराइवेदचरमाअहेवयावःशर्मशशमानायसन्तीति ।

सैषापंचमी—

अराइवेदचरमाअहेवप्रप्रजायन्तेअकवामहोभिः ।
पृश्नेःपुत्राउपमासोरभिष्ठाःस्वयामत्यामरुतःसंमिमिक्षुः ॥ ५ ॥

अराःऽइव । इत् । अचरमाः । अहाऽइव । प्रऽप्र । जायन्ते ।
अकवाः । महःऽभिः । पृश्नेः । पुत्राः । उपऽमासः । रभिष्ठाः ।
स्वया । मत्या । मरुतः । सम् । मिमिक्षुः ॥ ५ ॥

अराइवेत रथशंकवइव अचरमाः अनिकृष्टाः सर्वसमाः सहैवोत्पन्नाश्चेत्यर्थः अहेव अहानीव दिवसायथासर्वेपिषष्टिघटिकात्मकाःतद्वत्सप्तसंख्योपेतसप्तगणरूपेणसमाइत्यर्थः अनेनदृष्टान्तद्वयेनवैसादृश्याभावःप्रतिपादितः एवमुक्तलक्षणाः महोभिस्तेजोभिः प्रप्रजायन्ते प्रकर्षेणप्रादुर्भवन्ति एकः प्रसमुपोदःपादपूरणइत्युपसर्गाभ्यासः सचपूरणः तेचाकवाः अनल्पाः यद्वा महोभिरित्यस्यविशेषणं पृश्नेर्माध्यमिकायावाचोगोरूपायाअन्तरिक्षस्यवा पुत्रस्थानीयाः उपमासः प्रत्येकंसमानाः रभिष्ठाः प्रकृष्टवेगाः एवंमहानुभावामरुतः स्वयामत्या स्वकीययैवानुग्रहबुध्या संमिमिक्षुः वृष्ट्यासम्यक्सिंचन्ति ॥ ५ ॥

अथषष्ठी—

यत्प्रायासिष्टपृषतीभिरश्वैर्वीळुपविभिर्मरुतोरथेभिः ।
क्षोदन्तआपोरिणतेवनान्यवोस्रियोवृषभःक्रन्दतुद्यौः ॥ ६ ॥

यत् । प्र । अयासिष्ट । पृषतीभिः । अश्वैः । वीळुपविऽभिः ।
मरुतः । रथेभिः । क्षोदन्ते । आपः । रिणते । वनानि । अव ।
उस्रियः । वृषभः । क्रन्दतु । द्यौः ॥ ६ ॥

हेमरुतः यद्यदा प्रायासिष्ट प्रगच्छथ पृषतीभिः पृषत्संज्ञकैरश्वैः वाहनसाधनैरश्वैः अश्वशब्दोत्रवाहनसामान्यवचनः अतःपुंल्लिंगता तथान्यत्र यदश्वान्धूर्षुपृषतीरयुग्ध्वं । रोहिदश्वोजाश्वइतिसामानाधिकरण्यप्रयोगः एवंभूताश्वयुक्तैः वीळुपविभिः दृढरथनेमिभिः रथेभिः प्रायासिष्ट यद्वाश्वैरथैश्चसह मरुतोयदाप्रायासिष्ट तदा आपः क्षोदन्ते क्षरन्ति वनानि वृक्षसमूहाः रिणते हिंस्यन्ते वेगेनभज्यन्ते उस्रियः उस्राः सूर्यरश्मयः तत्संबन्धीपर्जन्यः वृषभोपांवर्षिता द्योद्योतमानः अवक्रन्दतु अवाङ्मुखंशब्दयतुवृष्ट्यर्थम्॥ ६ ॥

अथसप्तमी–

प्रथिष्ट्यामन्पृथिवीचिदेषांभर्तेवगर्भंस्वमिच्छवोधुः ।
वातान्ह्यश्वान्धुर्यायुयुज्रेवर्षंस्वेदंचक्रिरेरुद्रियासः ॥ ७ ॥

प्रथिष्ट । यामन् । पृथिवी । चित् । एषाम् । भर्ताऽइव ।
गर्भम् । स्वम् । इत् । शवः । धुः । वातान् । हि । अश्वान् । धुरि ।
आऽयुयुज्रे । वर्षम् । स्वेदम् । चक्रिरे । रुद्रियासः ॥ ७ ॥

एषांमरुतां यामन् यामनि गमनेपृथिवी भूमिः चिदितिपूरणः प्रथिष्ट प्रख्याताभवत् गर्भयोग्याभवदित्यर्थः तेचमरुतोभर्ता लौकिकःपतिः गर्भमिव भार्यायाः तथाभूम्याः स्वमित् स्वभूतंगर्भं गर्भस्थानीयं शवः उदकं धुः स्थापितवन्तः हियस्मात् वातान् गन्तॄनश्वान् धुरि रथसंबन्धिन्यां आयुयुज्रे आयोजितवन्तः तस्माद्वर्षं स्वेदं स्वेदस्थानीयं वृष्टिसंस्त्यायं चक्रिरे कुर्वन्ति रुद्रियासोरुद्रपुत्राः ॥ ७ ॥ अथाष्टमी–

हयेनरोमरुतोमृळतानस्तुवीमघासोअमृताऋतज्ञाः ।
सत्यश्रुतःकवयोयुवानोबृहद्गिरयोबृहदुक्षमाणाः ॥ ८ ॥ २३ ॥

हये । नरः । मरुतः । मृळत । नः । तुविऽमघासः । अमृताः ।
ऋतऽज्ञाः । सत्यऽश्रुतः । कवयः । युवानः । बृहत्ऽगिरयः ।
बृहत् । उक्षमाणाः ॥ ८ ॥ २३ ॥

हयेनरइत्यष्टमीगता ॥ ८ ॥

॥ इतिचतुर्थस्यतृतीयेत्रयोविंशोवर्गः॥ २३ ॥

---

१ ऋ० सं० ४. ३. १८. ।

प्रवःस्पडितिअष्टर्चंतृतीयंसूक्तं श्यावाश्वस्यार्षंमारुतम् अष्टमीत्रिष्टुप् शिष्टाःसप्तजगत्यः प्रवस्त्रिष्टुबंतमित्यनुक्रमणिका । विनियोगोलैंगिकः ।

तत्रप्रथमा—

प्रवःस्पळक्रन्त्सुवितायंदावनेर्चांदिवेप्रपृंथिव्याऋतंभरे ।
उक्षन्तेअश्वान्तरुंषन्तआरजोनुस्वंभानुंश्रथयन्तेअर्णवैः ॥ १ ॥

प्र । वः । स्पट् । अक्रन् । सुवितायं । दावने । अर्च । दिवे । प्र । पृथिव्यै । ऋतम् । भरे । उक्षन्ते । अश्वान् । तरुंषन्ते । आ । रजः । अनु । स्वम् । भानुम् । श्रथयन्ते । अर्णवैः ॥ १ ॥

हेमरुतःवोयुष्मभ्यं सुविताय सुष्ठुप्राप्तव्याय दावने हविःप्रदानाय स्पट् स्प्रष्टा होता प्र प्रकर्षेण अक्रन् क्रन्दति स्तौति वोयुष्मान्वा सुष्ठुप्राप्तव्यायदानायाक्रन् (क्रन्दतेःशब्दकर्मणोलङर्थेलुङितिप्रिरूपं)हेहोतः दिवोद्योतमानाय द्युदेवाय प्रार्च प्रकर्षेणस्तुहि हेआत्मन् तथा पृथिव्यै पृथिव्याश्च ऋतं स्तोत्रं भरे संपादयामि द्यावापृथिव्यावपिमरुतामाधारत्वात् अत्रनिपातभाजोभवतः किंच तेमरुतोअश्वान व्यापकानुदकसंघान् उक्षन्तेसिंचन्ति रजआअन्तरिक्षं आसर्वतस्तरुषन्तेतरन्ति संचरन्ति स्वंभानुं स्वकीयंतेजः अर्णवैःमेघैःसह अनुश्रथयन्ते अनुश्लेषयन्ति अनुकूलंप्रापयन्तीत्यर्थः ॥ १ ॥

अथद्वितीया—

अमादेषांभियसाभूमिरेजतिनौर्नपूर्णाक्षरतिव्यथिर्यती ।
दूरेदृशोयेचितयंन्तएमंभिरन्तर्महेविदथेयेतिरेनरः ॥ २ ॥

अमात् । एषाम् । भियसा । भूमिः । एजति । नौः । न । पूर्णा । क्षरति । व्यथिः । यती । दूरेऽदृशः । ये । चितयन्ते । एमंऽभिः । अन्तः । महे । विदथे । येतिरे । नरः ॥ २ ॥

एषां अन्वादेशविषयत्वादनुदात्तः एषांमरुतां भियसा भयेन भूमिरेजति कंपते नौर्न पूर्णा प्राणिभिः सायथोदकमध्ये क्षरति चलति व्यथिः व्यथितायती गच्छन्ती एवतुभयंनोवि-

शेषणं दूरेदृशोदूरेदृश्यमानाअपि येमरुतः एमभिर्गमनैः चितयन्ते ज्ञायन्ते तेमहान्तोमरुतोविदथे यज्ञे महे महते हविषे हविर्भक्षणाय अमात् स्वस्थानात् अन्तर्द्यावापृथिव्योर्मध्ये येतिरे यतन्ते नरोनेतारोमरुतः ॥ २ ॥

अथतृतीया—

गवांमिवश्रियसेशृङ्गमुत्तमंसूर्योनचक्षूरजसोविसर्जने।
अत्यांइवसुभ्वश्चारवस्थनमर्याइवश्रियसेचेतथानरः ॥ ३ ॥

गवाम्ऽइव। श्रियसे। शृङ्गम्। उत्ऽतमम्। सूर्यः। न। चक्षुः। रजसः। विऽसर्जने। अत्याःऽइव। सुऽभ्वः। चारवः। स्थन। मर्याःऽइव। श्रियसे। चेतथ। नरः ॥ ३ ॥

हेमरुतः यूयं गवांशृंगमिव उत्तममुत्कृष्टं उष्णीषपट्टादिकं श्रियसे श्रिये धारयथ इतिशेषः सूर्योन सूर्यइव सयथा रजसः तेजसोविसर्जने चक्षुः दर्शनसाधनं मंडलं धत्ते तद्वद्रजसोवृष्टेर्विसर्जने विसर्जनाय चक्षुः सर्वस्यप्रकाशकंतेजोधारयथ अत्याइवाश्वाइव सुभ्वः सुष्ठुसर्वत्रभवन्तः वेगवन्तः चारवोदर्शनीयाः स्थन भवथ मर्यामर्त्यायजमानाइव तेयथा श्रियसे जानन्ति यज्ञादिकंतद्वच्छ्रियेचेतथ जानथ हेनरानेतारोमरुतः ॥ ३ ॥

अथचतुर्थी—

कोवोमहान्तिमहतामुदश्नवत्कस्काव्यामरुतःकोहपौंस्या।
यूयंहभूमिंकिरणंनरेजथप्रयद्भरध्वेसुवितायदावने ॥ ४ ॥

कः। वः। महान्ति। महताम्। उत्। अश्नवत्। कः। काव्या। मरुतः। कः। ह। पौंस्या। यूयम्। ह। भूमिम्। किरणम्। न। रेजथ। प्र। यत्। भरध्वे। सुविताय। दावने ॥ ४ ॥

हेमरुतः वोयुष्माकं महतां पूज्यानां कोयजमानोमहान्तिश्रेयांसि उदश्नवत् उत्कृष्टं प्राप्नुयात् कश्चतदर्थं काव्या काव्यानि कवीनां युष्माकंसंबन्धीनि स्तोत्राणि उदश्नवत् कोहकश्च पौंस्या पौंस्यानि पराक्रमान् उदश्नवत् आदरार्थंपुनर्वचनं यूयंह यूयंखलु

भूमिं किरणंन किरणमिव रेजथ किरणंयथावृष्ट्यर्थंचालयथ तद्वत् भूमिंरेजथ यद्यस्मात्सुविताय सुष्ठुप्राप्तव्याय प्राप्तव्यस्येत्यर्थः तादृशस्य धनस्य वृष्ट्युदकस्यवा दावने दानाय प्रभरध्वे प्रकर्षेणसंपादयथवृष्टिं यस्माद्यूयं एवंकुरुथ तस्मात्कएवंकरोतीत्यर्थः॥ ४ ॥

अथपंचमी—

अश्वाइवेदरुषासःसबन्धवःशूराइवप्रयुधःप्रोतयुयुधुः ।
मर्याइवसुवृधोवावृधुर्नरःसूर्यस्यचक्षुःप्रमिनन्तिवृष्टिभिः ॥ ५ ॥

अश्वाःऽइव । इत् । अरुषासः । सऽबन्धवः । शूराःऽइव । प्रऽयुधः । प्र । उत । युयुधुः । मर्याःऽइव । सुऽवृधः । वावृधुः । नरः । सूर्यस्य । चक्षुः । प्र । मिनन्ति । वृष्टिऽभिः ॥ ५ ॥

मरुतएतेअश्वाइव शीघ्रगन्तारः अरुषासः आरोचमानाः सबन्धवः समानएकएवबन्धुर्बन्धकोरुद्रोयेषांतेतादृशाः परस्परंबंधवः स्नेहयुक्तावा शूराभटाइव प्रयुधः प्रयोद्धारोवैरिभिःसह तादृशाः उतापिच प्रयुयुधुः प्रकर्षेण युध्यन्ते मर्याइव मनुष्यायथावर्धन्ते तथा सुवृधः सुष्ठुवर्धयितारोवर्धमानावा नरोनेतारोववृधुः वर्धन्ते एवं महात्मानः सूर्यस्यचक्षुस्तेजःसमूहं मंडलंवा वृष्टिभिः प्रमिनन्ति प्रकर्षेणहिंसन्ति आवृण्वन्तीत्यर्थः ॥ ५ ॥

अथषष्ठी—

तेअंज्येष्ठाअकनिष्ठासउद्भिदोमध्यमासोमहसाविवावृधुः ।
सुजातासोजनुषापृश्निमातरोदिवोमर्याआनोअच्छाजिगातन ॥६॥

ते । अज्येष्ठाः । अकनिष्ठासः । उत्ऽभिदः । अमध्यमासः । महसा । वि । वावृधुः । सुऽजातासः । जनुषा । पृश्निऽमातरः । दिवः । मर्याः । आ । नः । अच्छ । जिगातन ॥ ६ ॥

तेमरुतः अज्येष्ठाः अकनिष्ठासः अकनिष्ठाः उद्भिदउद्भेदयितारः शत्रूणां अमध्यमासः अमध्यमाः सर्वप्रकारैःसमः महसा तेजसा विववृधुः विवर्धन्ते सुजातासः सुष्ठुसंभूताः जनुषा जन्मना पृश्निमातरः पृश्नेःपुत्राः मर्यामनुष्येभ्योहितायूयं दिवःसकाशात् नोस्मानच्छाभिमुखं आजिगातन सर्वतःप्रशंसत साध्वनुष्ठितमिति उत्तरार्धःप्रत्यक्षकृतः यद्वा येसुजाताजनुषापृ-

भिमातरश्वतान् दिवआगवान् हेऋत्विजोमर्यायूयमाजिगातन आगच्छत अथवा तेनोच्छाग-च्छन्त्वस्मदभिमुखं ॥ ६ ॥

अथसप्तमी–

वयोनयेश्रेणीःपप्तुरोजसान्तान्दिवोबृहतःसानुनस्परि ।
अश्वासएषामुभयेयथाविदुःप्रपर्वतस्यनभनूँरचुच्यवुः ॥ ७ ॥

वयः । न । ये । श्रेणीः । पप्तुः । ओजसा । अन्तान् । दिवः । बृहतः ।
सानुनः । परि । अश्वासः । एषाम् । उभये । यथा । विदुः ।
प्र । पर्वतस्य । नभनून् । अचुच्यवुः ॥ ७ ॥

येमरुतोवयोन पक्षिणइव श्रेणीः पंक्तयःसन्तः ओजसा बलेन दिवोन्तरिक्षस्यआदित्यस्यवा अन्तान् पर्यन्तान् बृहतोमहतः सानुनः समुन्नतस्याकाशवलयस्य परि परितः पप्तुः पतन्ति एषामश्वासःअश्वाः पर्वतस्य मेघस्य नभनून् नभतेःशब्दकर्मणोनभ्राट्इतिवत् नभनवः उदकानि प्राचुच्यवुः च्यावयन्ति उभयेदेवामनुष्याश्च यथाविदुर्जानन्ति तथामनुष्याणांज्ञानंप्रसिद्धं देवाश्चवृष्टौसत्यां आग्रयणादौ हविःप्रदानेनजानन्ति देवानांवृष्टिसंपूर्तिपरज्ञानमाश्वलायनेनउक्तं यदावर्षस्यतृप्तःस्यादथाग्रयणेनयजेतेत्युपक्रम्यापिदेवाआहुस्तृप्तोनूनंवर्षस्याग्रयणेनहियजतइति ॥ ७ ॥

अथाष्टमी–

मिमातुद्यौरदितिर्वीतयेनःसंदानुचित्राउषसोयतन्ताम् ।
आचुच्यवुर्दिव्यंकोशमेतऋषेरुद्रस्यमरुतोगृणानाः ॥ ८ ॥२४॥

मिमातु । द्यौः । अदितिः । वीतये । नः । सम् । दानुऽचित्राः ।
उषसः । यतन्ताम् । आ । अचुच्यवुः । दिव्यम् । कोशम् ।
एते । ऋषे । रुद्रस्य । मरुतः । गृणानाः ॥ ८ ॥ २४ ॥

नोस्मदर्थं द्यौरंतरिक्षं मिमातुनिर्मिमातुवृष्टिं अस्मदनुकूलांकरोत्वित्यर्थः कीदृशी अदितिरदीना यद्वा द्यौर्मिमातु अदितिर्भूमिश्च मिमातु सुखं किमर्थं वीतये उत्पत्तये प्रजननायवा दानुचित्राः विचित्रप्रकाशादिदानाः उषसः संयतंतां हेऋषे त्वया

गृणानाः स्तूयमानामरुतः रुद्रस्यपुत्राइत्यर्थः एते दिव्यंकोशं मेघमुदकमाचुच्यवुः आच्यावयन्ति द्विकर्मकोयं ॥ ८ ॥

॥ इतिचतुर्थस्यतृतीयेचतुर्विंशोवर्गः॥२४॥

ईळेअग्निंस्ववसमित्यष्टर्चंचतुर्थसूक्तं श्यावाश्वस्यार्षं सप्तम्यष्टम्यौजगत्यौ शिष्टाःषट् त्रिष्टुभः मरुद्देवताकं अग्निमरुद्देवताकंवा अनुक्रान्तंच—ईळेद्विजगत्यन्तमाग्नेयंचवेति । सूक्तविनियोगोलैंगिकः आद्याकारीर्यांसामिधेनीषुधाय्या सूत्रितंच—ईळेअग्निंस्ववसंनमोभिरितिधाय्येइति ।

सैषाप्रथमा—

ईळे॑अ॒ग्निंस्ववसं॒नमो॑भिरि॒हप्र॑स॒त्तोवि॑चयत्कृ॒तंनः॑ ।
रथैं॑रिव॒प्रभ॑रेवाज॒यद्भिः॑प्रदक्षि॒णिन्म॒रुतां॒स्तोम॑मृध्याम् ॥ १ ॥

ईळे॑ । अ॒ग्निम् । सु॒ऽअव॑सम् । नमः॑ऽभिः । इ॒ह । प्र॒ऽस॒त्तः ।
वि । च॒य॒त् । कृ॒तम् । न॒ः । रथैः॑ऽइव । प्र । भ॒रे॒ । वा॒ज॒यत्ऽभिः॑ ।
प्र॒ऽद॒क्षि॒णित् । म॒रुता॑म् । स्तोम॑म् । ऋ॒ध्या॒म् ॥ १ ॥

अहंश्यावाश्वोऽग्निं स्ववसं स्वायनरक्षणं नमोभिःस्तोत्रैः ईळे स्तौमि तत्स्तोत्रंकृतमिहेदानीं प्रसत्तः प्रसन्नः प्रकर्षेणयज्ञंप्राप्तोवासन् नोस्मदर्थं विचयत् विजानातु वाजयद्भिरन्नमिच्छद्भिः स्तोत्रैः रथैरिव रथैर्यथाभिमतंप्राप्नुवन्ति तद्वत् रंहणसाधनैः प्रभरे प्रकर्षेण संपादयामि अभिमतं प्रदक्षिणित् प्रादक्षिण्येनगच्छन् मरुतांस्तोमं स्तोत्रमृध्यांवर्धयेयम् ॥ १ ॥

अथद्वितीया—

आयेत॒स्थुःपृष॑तीषु॒श्रु॒तासु॑सु॒खेषु॑रु॒द्रामरुतो॒रथे॑षु ।
वना॑चिदुग्राजिहते॒निवो॑भि॒यापृथि॒वीचि॑द्रेजते॒पर्व॑तश्चित् ॥ २ ॥

आ । ये । त॒स्थुः । पृष॑तीषु । श्रु॒तासु॑ । सु॒ऽखेषु॑ । रु॒द्राः । म॒रुतः॑ ।
रथे॑षु । वना॑ । चि॒त् । उ॒ग्राः॒ । जि॒ह॒ते॒ । नि । व॒ः । भि॒या ।
पृ॒थि॒वी । चि॒त् । रे॒ज॒ते॒ । पर्व॑तः । चि॒त् ॥ २ ॥

येमरुतोरुद्रारुद्रपुत्राः आतस्थुः आतिष्ठन्ति पृषतीषु मरुतांवाहनेषु श्रुतासु श्रान्तासु प्रसिद्धासुवा सुखेषु खमाकाशंछिद्रं शोभनरथाक्षद्वारेषु रथेषु रथानातस्थुरातिष्ठन्ति हेउग्राः उद्गूर्णबलामरुतोयूयं यदा रथमारूढाःस्थ तदानींवनाचित् वनान्यपिनिजिहतेन्यग्गच्छन्ति वो-युष्माकं भिया भीत्या पृथिवीचित् पृथिव्यपिरेजते पर्वतश्चित् पर्वतोपिरेजते कंपते उत्तरार्धः प्रत्यक्षकृतः पूर्वार्धेयएवमकुर्वन् तेषांस्तोममृध्यामितिपूर्वत्रान्वयः ॥ २ ॥

कारीर्यांमारुतस्यसप्तकपालस्यपर्वतश्चिदित्येषायाज्या सूत्रितंच—पर्वतश्चिन्महिवृद्धोबि-भायसृजन्तिरश्मिमोजसेति ।

सैषातृतीया—

पर्वतश्चिन्महिवृद्धोबिभायदिवश्चित्सानुरेजतस्वनेवः ।
यत्क्रीळथमरुतऋष्टिमन्तआपइवसध्र्यञ्चोधवध्वे ॥ ३ ॥

पर्वतः । चित् । महि । वृद्धः । बिभाय । दिवः । चित् ।
सानु । रेजत । स्वने । वः । यत् । क्रीळथ । मरुतः ।
ऋष्टिऽमन्तः । आपःऽइव । सध्र्यञ्चः । धवध्वे ॥ ३ ॥

हेमरुतः वोयुष्माकं स्वनेभयंकरशब्देसति पर्वतश्चित् पर्वतोपि महि महान्वृद्धःसन्नपि बिभाय बिभेति दिवश्चित् अन्तरिक्षस्यापि सानुसमुच्छ्रितःप्रदेशोरेजत कंपते यद्यदा क्रीडथ हेमरुतोयूयं ऋष्टिमन्तआयुधवन्तःसन्तः तदा आपइव उदकानीव सध्र्यंचः सहांचनाः धवध्वे धावध्वे गच्छथ ॥ ३ ॥

अथचतुर्थी—

वराइवेद्रैवतासोहिरण्यैरभिस्वधाभिस्तन्वःपिपिश्रे ।
श्रियेश्रेयांसस्तवसोरथेषुसत्रामहांसिचक्रिरेतनूषु ॥ ४ ॥

वराःऽइव । इत् । रैवतासः । हिरण्यैः । अभि । स्वधाभिः ।
तन्वः । पिपिश्रे । श्रिये । श्रेयांसः । तवसः । रथेषु । सत्रा ।
महांसि । चक्रिरे । तनूषु ॥ ४ ॥

वराइव विवाहयोग्यायुवानइव तेयथा रैवतासोधनवन्तोहिरण्यैःहिरण्यमयैराभरण-विशेषैः स्वधाभिरुदकैश्च तन्वः स्वीयानिशरीराणि अभिपिपिश्रे संयोजयन्ति अलंकुर्वन्ति तद्वदेतेमरुतोपि रैवतासः धनवन्तः हिरण्यैर्हिरण्यस्थानीयैः विद्युदाख्यैराभरणैः स्वधाभिश्च तन्वः स्वीयानिशरीराणि पिपिश्रे श्रियै शोभायै श्रेयांसः श्रेष्ठाः तवसोबल-वन्तोमरुतोरथेषु सत्रा सत्यं सहवा तनूषु महांसि चक्रिरे कृतवन्तः सर्वाभरणैरुदके-श्चोपेताःरथानधिष्ठाय शरीरेषु तेजांस्यधारयन्नित्यर्थः ॥ ४ ॥

अथपञ्चमी–

अज्येष्ठासोअकनिष्ठासएतेसंभ्रातरोवावृधुःसौभगाय ।
युवापितास्वपारुद्रएषांसुदुघापृश्निःसुदिनामरुद्भ्यः ॥ ५ ॥

अज्येष्ठासः । अकनिष्ठासः । एते । सम् । भ्रातरः । ववृधुः । सौभगाय । युवा । पिता । सुऽअपाः । रुद्रः । एषाम् । सुऽदुघा । पृश्निः । सुऽदिना । मरुत्ऽभ्यः ॥ ५ ॥

अज्येष्ठासःअकनिष्ठासः परस्परंज्येष्ठकनिष्ठभावरहिताः सहैवोत्पन्नाः समानबला-एतेमरुतः भ्रातरः परस्परंभ्रातृभूताःसन्तः सौभगाय सुभगत्वाय संववृधुर्वर्धन्ते युवा नित्यतरुणः स्वपाः शोभनकर्मैषांमरुतां रुद्रःपिता सुदुघा सुष्ठुदोग्ध्री पृश्निर्गोदेवता मा-तृभूता मरुद्भ्योमरुदर्थं सुदिना शोभनदिनानि अकुरुतामितिशेषः ॥ ५ ॥

अथषष्ठी–

यदुत्तमेमरुतोमध्यमेवायद्वावमेसुभगासोदिविष्ठ ।
अतोनोरुद्राउतवान्व१स्याग्नेवित्ताद्धविषोयद्यजाम ॥ ६ ॥

यत् । उत्ऽतमे । मरुतः । मध्यमे । वा । यत् । वा । अवमे । सुऽभगासः । दिवि । स्थ । अतः । नः । रुद्राः । उत । वा । नु । अस्य । अग्ने । वित्तात् । हविषः । यत् । यजाम ॥ ६ ॥

हेमरुतःयद्यूयं उत् उत्कृष्टे उत्तमेचरमेवा दिवि द्युलोके मध्यमेवादिवि यद्वा अवमेदिवि हेसुभगासः स्थ भवथ त्रयोवाइमेत्रिवृतोलोकाअस्तिस्रोदिवःपृथिवीरित्यादिश्रुतेः। द्युलोकस्य त्रैविध्यं अतः अस्मात् स्थानत्रयान्नोस्मदर्थं हेरुद्राआगच्छतेतिशेषः उतवा अथवा नु अद्य यद्यजाम यद्धविःप्रक्षिपामः हेअग्ने त्वं अस्यहविषः एतद्धविर्वित्तात् विद्धि ॥ ६ ॥

अथसप्तमी–

अग्निश्चयन्मरुतोविश्ववेदसोदिवोवहध्वउत्तरादधिष्णुभिः।
तेमन्दसानाधुनयोरिशादसोवामंधत्तयजमानायसुन्वते ॥ ७ ॥

अग्निः। च। यत्। मरुतः। विश्वऽवेदसः। दिवः। वहध्वे।
उत्ऽतरात्। अधि। स्नुऽभिः। ते। मन्दसानाः। धुनयः।
रिशादसः। वामम्। धत्त। यजमानाय। सुन्वते ॥ ७ ॥

हेविश्ववेदसः सर्वस्यज्ञातारोविश्वधनावा हेमरुतोयद्यूयमग्निश्च दिवोद्युलोकादुत्तरादुत्कृष्टतरात् अधि उपरि स्नुभिः सानुभिः उपरिप्रदेशे वहध्वे उह्यध्वे तत्रनिवसथेत्यर्थः यद्वा स्नुशब्देन तत्सदृशाअश्वाउच्यन्ते तैर्वाउह्यध्वे तेयूयं मन्दसाना मोदमानाअस्मदीयैः स्तोत्रैर्हविर्भिश्च धुनयः शत्रूणांकंपयितारः रिशादसः अस्मद्धिंसकानामत्तारःसन्तोवामं वमनीयंधनं धत्तदत्त यजमानाय सुन्वतेअभिषवंकुर्वते ॥ ७ ॥

अग्नेमरुद्भिरित्यष्टमीआग्निमारुतस्ययाज्या अग्नेमरुद्भिःशुभयद्भिर्ऋक्वभिरितिसूत्रितत्वात् तत्पाठस्तु।[1]

अथाष्टमी–

अग्नेमरुद्भिःशुभयद्भिर्ऋक्वभिःसोमंपिबमन्दसानोगणश्रिभिः।
पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानरप्रदिवाकेतुनासजूः ॥८॥२५॥

अग्ने। मरुत्ऽभिः। शुभयत्ऽभिः। ऋक्वऽभिः। सोमम्। पिब।
मन्दसानः। गणश्रिऽभिः। पावकेभिः। विश्वम्ऽइन्वेभिः।
आयुऽभिः। वैश्वानर। प्रऽदिवा। केतुना। सऽजूः ॥ ८ ॥ २५ ॥

१ ऐ० ब्रा० २. १७. । २ ऋ० सं० ३. ८. ४. ।

हेअग्ने मरुद्भिःसह मन्दसानःसन् सोमंपिब कीदृशैर्मरुद्भिः शुभयद्भिः शोभमानैः अन्यान् शोभयद्भिर्वा ऋक्वभिः स्तुत्यैः गणश्रिभिः गणभावमाश्रयद्भिः पावकेभिः शोधकैः विश्वमिन्वेभिः विश्वंवृष्ट्याप्रीणयद्भिः आयुभिः आयुष्मद्भिः हेवैश्वानर विश्वनरहिताग्ने प्रदिवा पुराणेन केतुना ज्वालापुंजेन सजूः सहितः ॥ ८ ॥

॥ इतिचतुर्थस्यतृतीयेपंचविंशोवर्गः ॥२५॥

केष्ठानरइत्येकोनविंशत्यृचंपंचमंसूक्तं अत्रानुक्रमणिका—केष्ठैकोनागायत्रंश्यावाश्वोत्रवैददश्वीतरंतपुरुमीह्लौदाल्भ्यंरथवीतिंमरुतश्चदानतुष्टःप्रशशंसबुध्वाचतरन्तमहिषींशशीयसींपंचम्यनुष्टुन्नवमीसतोबृहतीति । श्यावाश्वऋषिः पंचम्यनुष्टुप् नवमीसतोबृहती शिष्टागायत्र्यः आद्याश्चतस्रोमरुद्देवताकाः सनत्सेत्यादीनांचतसृणांशशीयसीनामतरन्तस्यराज्ञोभार्यांदेवता उतमेरपदित्यस्यावैददश्विःपुरुमीह्लोदेवता योमेधेनूनामित्यस्यावैददश्विस्तरन्तोराजादेवता यईवहन्तइत्याद्याःषण्मारुत्यः एतंमइत्यस्यतृचस्यदाल्भ्योरथवीतिर्नामराजादेवता विनियोगोलैंगिकः । अत्राश्चर्यंपुरावृत्तमाहुरागमपारगाः ॥ अर्चनानाःपुरात्रेयोदाल्भ्येनरथवीतिना ॥ १ ॥ आर्त्विज्यायवृतोयज्ञेविततेहौत्रआस्थितः ॥ रथवीतिसुतांकन्यांददर्शपितुरंतिके ॥ २ ॥ ययाचेम्वकुमारायश्यावाश्वायचतांसुतां ॥ सप्रदानमनाभार्यामपृच्छत्किंप्रयच्छसि ॥ ३ ॥ इतिपृष्टापुनःप्राहकथमस्मैप्रदास्यसि ॥ इतःपूर्वंसुतादत्तानासीदनृषयेक्कचित् ॥ ४ ॥ तत्तथैवेतिनिश्चित्यप्रत्याचष्टार्चनानसं ॥ श्यावाश्वःसंस्थितेयज्ञेतेनराज्ञानिराकृतः ॥ ५ ॥ तत्प्रत्याशान्वितोविप्रस्तपस्येपमुदारुणं ॥ ब्रह्मचर्येरतःशान्तोभिक्षार्थंपर्यटन्द्विजः ॥ ६ ॥ तरन्तमहिषींसाध्वींविभिक्षेसांशशीयसीं ॥ सासंप्राप्यान्तिकंपत्युःप्रोवाचागतवानृषिः ॥ ७ ॥ इत्युक्तो नृपतिर्भार्यांप्रत्याहेनंप्रपूजय ॥ सानुज्ञानागवांयूथंप्रादादाभरणानिच ॥ ८ ॥ तरन्तोपिपुनस्तस्मैप्रादाद्धनमपेक्षितं ॥ दत्वाचपुरुमीह्लस्यस्वानुजस्यान्तिकंप्रति ॥ ९ ॥ प्रेरयामासतमृषिंसोपित्वांमानयिष्यति ॥ १० ॥ तथेतिराजोवचनंनिशम्यनद्धार्ययादर्शितसर्वमार्गः ॥ गच्छन्शनैरर्धपथेमरुद्गणानसमानरूपान्सदिदृक्षयागतान् ॥ ११ ॥ विलोक्यविप्रःसभयःप्रणम्यकृतांजलिःकंटकितांगसंघः ॥ तुष्टावदृष्टानमरान्विशिष्टैरर्थैर्वचोभिःपरितुष्टचित्तः ॥ १२ ॥ संप्राप्य सर्वंस्वमनीषितंतदामरुद्गणेभ्योमुदितान्महाद्युः ॥ १३ ॥ तदाभवदृषिःसत्कृदष्टाश्यावाश्वनामकः ॥ पश्चात्पुनर्गृहंगत्वाभूयोलब्ध्वागवांशतं ॥ १४ ॥ दाल्भ्योमंत्रदृशेराज्ञाचोदितःस्वसुतांददौ ॥ पुरुमीह्लस्तरन्तश्चतद्भार्याचशशीयसी ॥ १५ ॥ दाल्भ्योयोरथवीत्याख्यःसप्तयेमरुतांगणः ॥ तेनस्मैयद्ददुस्तुष्टास्तत्केष्ठेत्यत्रवर्ण्यते ॥ १६ ॥

तत्रसूक्ते प्रथमा—

केष्ठानरःश्रेष्ठतमायएकंएकआयय । परमस्याःपरावतः ॥ १ ॥

के । स्थ । नरः । श्रेष्ठऽतमाः । यः । एकःऽएकः । आऽयय ।
परमस्याः । पराऽवतः ॥ १ ॥

हे नरो नेतारो मरुतः श्रेष्ठतमाः अत्यन्तं श्रेष्ठाः यूयं के स्थ के भवथ एवं स्वरूपानिश्चयात् संदिह्य ब्रवीति ये यूयं एक एकः प्रत्येकं आयय आगच्छथ कस्मादिति उच्यते परमस्याः परावतः अत्यन्तदूरदेशात् अन्तरिक्षादित्यर्थः ॥ १ ॥

अथ द्वितीया—

क्वैवोश्वाःक्वाभीशवःकथंशेककथायय । पृष्ठेसदोनसोर्यमः ॥ २ ॥

क्व । वः । अश्वाः । क्व । अभीशवः । कथम् । शेक । कथा ।
यय । पृष्ठे । सदः । नसोः । यमः ॥ २ ॥

हे मरुतो वो युष्माकं अश्वाः क्व कुत्र त्याः क्व चाभीशवो बन्धनरज्जवः कथं च शेक शीघ्रं गन्तुं शक्ता भवथ कथा कथं यय याताः स्थ पृष्ठे अश्वानां पृष्ठदेशे सदः सीदति निषीदत्यत्रेति सदः पर्याणं तद्दृश्यते तथा नसोर्नासिकयोर्यमो नियमिता प्रत्यायनरश्मिबन्धकारी प्रग्रहो नासिकयोर्दृश्यते तस्मादश्वादिभिरङ्गैः कुत्रापि त्वरितगमनाय एव न तिष्ठन्ति कं पूर्वमिति देवरूपमनवधायाह ॥ २ ॥

अथ तृतीया—

जघनेचोदएषांविसक्थानिनरोयमुः । पुत्रकृथेनजनयः ॥ ३ ॥

जघने । चोदः । एषाम् । वि । सक्थानि । नरः । यमुः ।
पुत्रऽकृथे । न । जनयः ॥ ३ ॥

एषामश्वानां जघने हन्तव्यप्रदेशे चोदः प्रेरिका कशा अगमकामविशेषाभावा वर्तते शीघ्रगमनाय ताडयन्ति वर्तत इत्यर्थः सक्थानि ऊरुप्रदेशान् नरो नेतारो मरुतः वि वियम्य यमुः नियच्छन्ति आरोहणवेलायां विवृता भवन्तीत्यर्थः विवृतौ दृष्टान्तः—पुत्रकृथे पुत्रकरणे उत्पादने जनयः अपत्योत्पादयित्र्यो योषित इव यथा पुत्रोत्पादनकाले संगमसमये ऊरू विवृतौ कुर्वन्ति तद्वदित्यर्थः ॥ ३ ॥

अथचतुर्थी—

परावीरासएतनमर्यासोभद्रजानयः। अग्नितपोयथासथ ॥ ४ ॥

परा। वीरासः। इतन। मर्यासः। भद्रऽजानयः। अग्निऽतपः। यथा। असथ ॥ ४ ॥

कशाताडनादिलिंगेन जिगमिषूनमत्वाब्रूते—हेवीरासोवीराः अमित्राणामीरयितारः हेमर्यासोमर्त्येभ्योहिताः हेभद्रजानयः भद्रःस्तुत्योजानिर्जन्मयेषांतेतथोक्ताः रुद्रपुत्राइत्यर्थः अग्नितपोग्निनातप्ताः ताम्रादयोयथादीप्ताः तद्वत्प्रदीप्ताः असथ भवथ अथवाग्नितप्तादग्धदेहायथापलायन्तेतथाभवथेति ॥ ४ ॥

अथपंचमी—

सनत्साश्व्यंपशुमुतगव्यंशतावयम्।
श्यावाश्वस्तुताययादोर्वीरायोपबर्बृहत् ॥ ५ ॥ २६ ॥

सनत्। सा। अश्व्यम्। पशुम्। उत। गव्यम्। शतऽअवयम्। श्यावाश्वऽस्तुताय। या। दोः। वीराय। उपऽबर्बृहत् ॥ ५ ॥ २६ ॥

सातरन्तमहिषी मर्त्यंसनत् प्रादात् किं अश्व्यं अश्वात्मकं तत्समूहात्मकंवा पशुं जातावेकवचनं उतापिच गव्यं गोसमूहात्मकं पशुं शतावयं अनेकैरविभिर्युक्तं सनदिति सेत्युक्तं केत्याह याश्यावाश्वस्तुताय श्यावाश्वेनमयास्तुतायवीराय तरन्ताय दोः स्वकीयंभुजं उपबर्बृहत् उपोदयच्छदालिंगनाय सासनदिति यतोभर्तृप्रेमास्पदा तस्मादेव बहुधनंदातुंशक्तेत्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेषड्विंशोवर्गः॥२६॥

अथषष्ठी—

उतत्वास्त्रीशशीयसीपुंसोभवतिवस्यसी। अदेवत्रादराधसः ॥ ६ ॥

उत। त्वा। स्त्री। शशीयसी। पुंसः। भवति। वस्यसी। अदेवऽत्रात्। अराधसः ॥ ६ ॥

उतापिच त्वा एका शशीयसी शशीयसीतिएतन्महिष्यानाम सैवस्त्री यद्वा उतेत्ययमेव-कारार्थे स्त्रीषुसैवप्रशस्येत्यर्थः त्वसमसिमनेमेत्यनुच्चानीतिवचनात् त्वेतिनिघातः सैवपुंसःपुरु-षाद्वस्यसी वसीयसी भवति कस्मात्पुंसइत्युच्यते अदेवत्रात् देवान् येनत्रायन्तेस्तुत्यादिनासः अदेवत्रः तस्मादराधसः राधोधनं दानार्हधनरहितात्लुब्धकादित्यर्थः ॥ ६ ॥

अथसप्तमी—

वियाजानातिजसुरिंवितृष्यंतंविकामिनम् । देवत्राकृणुतेमनः ॥ ७ ॥

वि । या । जानाति । जसुरिम् । वि । तृष्यन्तम् । वि ।
कामिनम् । देवऽत्रा । कृणुते । मनः ॥ ७ ॥

याशशीयसी जसुरिं व्यथितं जसिस्ताडनकर्मा उपक्षेपणकर्मावा तंविजानाति तथातृष्यन्तं विजानाति कामिनं धनाद्यभिलाषवन्तं विजानाति अनुकंपयाभिमतं द-त्तवतीत्यर्थः देवत्रा देवेषु मनः कृणुते कुरुते देवप्रीत्यर्थंप्रदानबुद्धिंकरोतियासैवस्त्री-तिपूर्वत्रसंबन्धः ॥ ७ ॥

अथाष्टमी—

उतघानेमोअस्तुतःपुमाँइतिब्रुवेपणिः । सवैरदेयइत्समः ॥ ८ ॥

उत । घ । नेमः । अस्तुतः । पुमान् । इति । ब्रुवे । पणिः ।
सः । वैरऽदेये । इत् । समः ॥ ८ ॥

उतघापिच घेतिपूरणः नेमः त्वोनेमइत्यर्धस्येतिनिरुक्तं[1] । नेमःअर्धःजायापत्योर्मिलि-त्वैककार्यकर्तृत्वादेकएवपदार्थः अर्धशरीरस्यभार्येत्यादिस्मृतेः शशीयस्याअर्धभूतस्तरन्तः पुमान् अस्तुतइतिब्रुवे बहुधा स्तुतोपिगुणस्यातिबाहुल्यादस्तुतएवेतिब्रुवे पणिः स्तोताहं सच तरन्तोवैरदेये वीराधनानांप्रेरयितारोदानशीलाः तैर्दातव्यंधनंदेयं तस्मिन्धने समः सर्वेभ्योदातेत्यर्थः इदितिपूरणः ॥ ८ ॥

---

1 नि० ३. २०.।

अथनवमी—

उतमेरपद्युवतिर्ममन्दुषीप्रतिश्यावायवर्तनिम् ।
विरोहितापुरुमीह्ळायेयेमतुर्विप्रायदीर्घयशसे ॥ ९ ॥

उत । मे । अरपत् । युवतिः । ममन्दुषी । प्रति । श्यावाय । वर्तनिम् ।
वि । रोहिता । पुरुऽमीह्ळाय । येमतुः । विप्राय । दीर्घऽयशसे ॥९॥

उतापिच श्यावाय श्यावाश्वाय मह्यं अरपत् अलपत् स्पष्टमाचष्ट किं वर्तनिंमार्गं कीदृशीसायुवतिः प्रवृत्तयौवना प्रतिममन्दुषीप्रतिमोदमाना कस्मै दीर्घयशसे प्रभूतान्नाय प्रभूतकीर्तयेवा पुरुमीह्ळायैतन्नामकाय प्रभूतगृहाय (क्रियार्थोपपदस्यचकर्मणिस्थानिनइति-चतुर्थी) पुरुमीह्ळंप्राप्तुमित्यर्थः तदर्थंरोहितारोहितवर्णावश्वौशशीयस्यादत्तौ वियेमतुः विशेषेणयमयतुः धृतवन्तावित्यर्थः यःअश्वाभ्यांयुक्तेरथे स्थापयित्वा पुरुमीह्ळगृहस्यमार्गं प्रदर्शयन्ती पुरतोगता सैवपुंसोभवति वस्यसीतिपूर्वत्रसंबन्धः ॥ ९ ॥

अथदशमी—

योमेधेनूनांशतंवैददश्विर्यथाददत् । तरन्तइवमंहना ॥ १० ॥ २७ ॥

यः । मे । धेनूनाम् । शतम् । वैदत्ऽअश्विः । यथा । ददत् ।
तरन्तःऽइव । मंहना ॥ १० ॥ २७ ॥

इयंपुरुमीह्ळस्तुतिः वैददश्विः पुरुमीह्ळोपियः मे मह्यं धेनूनांशतं यथा येनप्रकारेण ददत् दत्तवान् तथा मंहना मंहनीयानिधनान्यपि ददत् तरन्तइव सयथा धेनुशतंबहुविधंधनंचदत्तवान् तद्वद्वैददश्विःपुरुमीह्ळोपिददत् तंस्तुवइतिशेषः ॥ १० ॥

॥ इतिचतुर्थस्यतृतीयेसप्तविंशोवर्गः ॥ २७ ॥

अथैकादशी—

यईंवहन्तआशुभिःपिबन्तोमदिरंमधु । अत्रश्रवांसिदधिरे ॥ ११ ॥

ये । ईम् । वहन्ते । आशुऽभिः । पिबन्तः । मदिरम् । मधु ।
अत्र । श्रवांसि । दधिरे ॥ ११ ॥

इदानींमरुतएवैतइतिनिश्चित्य जनप्रसिद्धैर्माहात्म्यैःस्तौति–येमरुतईं इदानीं आशुभिः शीघ्रगामिभिरश्वैः वहन्ते उह्यन्ते किंकुर्वन्तः मदिरं मदकरं मधु सोमरसंपिबन्तः पाथेयत्वेन धृतंसोममित्यर्थः तेमरुतोत्रास्मिन्देशे श्रवांसि स्तुतिजनितानियशांसि दधिरे धारयन्ति॥११॥

अथद्वादशी–

येषांश्रियाधिरोदसीविभ्राजन्तेरथेष्वा। दिविरुक्मइवोपरि ॥ १२ ॥

येषाम्। श्रिया। अधि। रोदसी इति। विऽभ्राजन्ते।
रथेषु। आ। दिवि। रुक्मःऽइव। उपरि ॥ १२ ॥

येषांमरुतां श्रिया कांत्या रोदसी द्यावापृथिव्यावधि अधिष्ठिते भवतइतिशेषः यस्मादे- तेमरुतोरथेषु विभ्राजन्ते विशेषेणदीप्यन्ते आइतिचार्थे तत्रदृष्टान्तः–उपरि उपरिभूतेदिवि- द्युलोके रुक्मोरोचमानआदित्यइव यद्वा उपरि रथस्योपरीतिवायोज्यम् ॥ १२ ॥

अथत्रयोदशी–

युवासमारुतोगणस्त्वेषरथोअनेद्यः। शुभंयावाप्रतिष्कुतः ॥ १३ ॥

युवा। सः। मारुतः। गणः। त्वेषऽरथः। अनेद्यः।
शुभम्ऽयावा। अप्रतिऽस्कुतः ॥ १३ ॥

समारुतोगणोयुवा सर्वत्रमिश्रयिता नित्यतरुणोवा त्वेषरथोदीप्तरथः अनेद्यः अनि- न्द्यः शुभंयावा शोभनंगन्ता अप्रतिष्कुतः अप्रतिगतः अप्रतिशब्दितोवा एवंमहानुभावोग- णोदीप्यतइति ॥ १३ ॥

अथचतुर्दशी–

कोवेदनूनमेषांयत्रामदन्तिधूतयः। ऋतजाताअरेपसः ॥ १४ ॥

कः। वेद। नूनम्। एषाम्। यत्र। मदन्ति। धूतयः।
ऋतऽजाताः। अरेपसः ॥ १४ ॥

एषांमरुतांस्थानं कोवेद कोजानाति नूनं इदानीं यत्रस्थाने धूतयः शत्रूणांकंपकाः मद- न्ति हृष्यन्ति ऋतजाताः जलार्थमुत्पन्नाः यज्ञेवाप्रादुर्भूताः अरेपसःअपापाः ॥ १४ ॥

अथपंचदशी–

यूयंमर्तंविपन्यवःप्रणेतारइत्थाधिया। श्रोतारोयामहूतिषु ॥१५॥२८॥

यूयम्। मर्तम्। विपन्यवः। प्रऽनेतारः। इत्था। धिया।
श्रोतारः। यामऽहूतिषु ॥ १५॥ २८ ॥

हेविपन्यवः स्तुतिकामामरुतोयूयं मर्तं मरणस्वभावं यजमानं इत्था अनयाधिया इदानींकृतप्रकारया अनुग्रहबुद्ध्या ईदृशेनस्तुतिकर्मणावा निमित्तेनप्रणेतारः प्रकर्षेणप्रापयितारोभिमतंस्वर्गादिकं यामहूतिषु यामोगमनं तदर्थाहूतयोयस्मिन्नितियामहूतयोयज्ञाः तेषु श्रोतारःआह्वानानां ॥ १५ ॥

॥ इतिचतुर्थस्यतृतीयेऽष्टाविंशोवर्गः ॥ २८ ॥

अथषोडशी–

तेनोवसूनिकाम्यापुरुश्चन्द्रारिशादसः। आयज्ञियासोववृत्तन ॥१६॥

ते। नः। वसूनि। काम्या। पुरुऽचन्द्राः। रिशादसः।
आ। यज्ञियासः। ववृत्तन ॥ १६ ॥

हेरिशादसः हिंसकानांशत्रूणामत्तारः हेयज्ञियासोयज्ञार्हाः पुरुश्चन्द्राः प्रभूताह्लादकधनाः तेयूयं नोस्मभ्यं वसूनि निवासयोग्यानिधनानि काम्या स्पृहणीयानि आववृत्तन आवर्तयथेत्यर्थः मरुतांदानप्रशंसायाअपेक्षितत्वान्नप्रार्थनोचिता ॥ १६ ॥

अथसप्तदशी–

एतंमेस्तोमंमूर्म्येदार्भ्यायपरावह। गिरोदेविरथीरिव ॥ १७ ॥

एतम्। मे। स्तोमम्। ऊर्म्ये। दार्भ्याय। परा। वह।
गिरः। देवि। रथीःऽइव ॥ १७ ॥

संपन्नऋषिभावस्यश्यावाश्वस्यार्चनानसः ॥ रथवीतिसुतायाश्चविवाहंशौनकोब्रवीत् ॥ १ ॥
कथं––मरुत्सुतुप्रयातेषुश्यावाश्वःसुमहायशाः ॥ प्रादुर्भूतार्षमात्मानंज्ञात्वात्रिकुलनंदनः ॥ २ ॥
रथवीतेर्दुहितरमगच्छन्मनसातदा ॥ ससत्यमृषिमात्मानंप्रवक्ष्यन्रथवीतये ॥ ३ ॥

एतंमेस्तोममित्याख्यांदौत्येरात्रिंन्यवेदयत् ॥ ऋषेर्नियोगमाज्ञायदेव्यारात्र्याप्रचोदितः ॥ ४ ॥
आदायकन्यकांदातुमुपेयायार्चनानसं ॥ पादौतस्योपसंगृह्यस्थित्वाप्रह्वःकृतांजलिः ॥ ५ ॥
रथवीतिरहंदार्भ्यइतिनामशशंससः ॥ मयासंयोगमिच्छन्तंत्वांप्रत्याचक्षियत्पुरा ॥ ६ ॥
तत्क्षमस्वनमस्तेस्तुमेमास्मभगवन्क्रुधीः ॥ ऋषेःपुत्रःस्वयमृषिःपितासिभगवानृषेः ॥ ७ ॥
इंतप्रतिगृहाणेमांस्नुषामित्येनमब्रवीत् ॥ तस्मैददावश्वशतंसराजास्वलंकृतांचापिसुतांस्नुषार्थं ॥
विवाहकालेपिददौनरेन्द्रःशतंहयानांदुहितुःसहस्रं ॥ गवांसहस्रंवसुचप्रभूतंतमुतपोन्तेथवनंजगा-
मेति ॥ हेऊर्म्ये रात्रिदेवि ऊर्म्येतिरात्रिनाम ममदीयं एतं स्तोमं मरुद्भ्यःकृतंस्तोत्रं अहंमं-
त्रदृक्भूत्वा मरुतःस्तुतवानित्येवं दार्भ्याय श्यावाश्वाय परा पराङ्मुखी दार्भ्याभिमुखीस-
तीवह प्रापयेत्यर्थः तदेवादरार्थमुच्यते हेरात्रिदेवि गिरः स्तुतीः मरुद्विषयाः परावह रथी-
रिव रथीयथारथेभिप्रेतं वसु स्थापयित्वाभिमतप्रदेशंप्रापयतितद्वत् ॥ १७ ॥

अथाष्टादशी—

उतमेवोचतादितिसुतसोमेरथवीतौ । नकामोअपवेतिमे ॥ १८ ॥

उत । मे । वोचतात् । इति । सुतऽसोमे । रथऽवीतौ । न ।
कामः । अप । वेति । मे ॥ १८ ॥

हेऊर्म्ये उतापिच मे मां वोचतात् ब्रूहि किमिति उच्यते इति इत्थं कथमिति सुतसोमे कृतसोमयागे रथवीतौ राज्ञि मेकामः तत्पुत्रीविषयोनापवेति नापगच्छति नविरमत इतीत्थं वोचतात् ॥ १८ ॥

अथैकोनविंशी—

एषक्षेतिरथवीतिर्मघवागोमतीरनु । पर्वतेष्वपश्रितः ॥ १९ ॥ २९ ॥

एषः । क्षेति । रथऽवीतिः । मघऽवा । गोऽमतीः । अनु ।
पर्वतेषु । अपऽश्रितः ॥ १९ ॥ २९ ॥

कन्यांदत्वाकृतार्थंतंश्यावाश्वोथवनंगतं ॥ रथवीतिंनपश्यन्नंमंप्रक्ष्यार्षेणचक्षुषा ॥ रम्ये-हिमवतःपृष्ठेएषक्षेतीतिसोब्रवीत् ॥ एषरथवीतिर्मघवा धनवान गोमतीरनु उदकवतीर्नदीरनु अनुसृत्य नदीनांतीरे क्षेति निवसति पर्वतेषु हिमवत्पर्वतप्रान्तेषु अपश्रितः आश्रितः ॥ १९ ॥

॥ इतिचतुर्थस्यतृतीयेएकोनत्रिंशोवर्गः ॥ २९ ॥

ऋतेनऋतमितिनवर्चंषष्ठंसूक्तं आत्रेयस्यश्रुतविदआर्षं त्रैष्टुभं मैत्रावरुणं तथाचानुक्रम्यते—ऋतेननवश्रुतविन्मैत्रावरुणंवैतदिति । वैतदित्युभयोःप्रयोगात् तुह्यादिपरिभाषया एतदादीन्येकादशसूक्तानिमित्रावरुणदेवत्यानि विनियोगोलैंगिकः ।

तत्रप्रथमा—

ऋतेनं ऋतमपिंहितं ध्रुवं वां सूर्यस्य यत्रं विमुचन्त्यश्वान् ।
दश शता सह तंस्थुस्तदेकं देवानां श्रेष्ठं वपुंषामपश्यम् ॥ १ ॥

ऋतेनं । ऋतम् । अपिंऽहितम् । ध्रुवम् । वाम् । सूर्यस्य ।
यत्रं । विऽमुचन्ति । अश्वान् । दशं । शता । सह । तस्थुः ।
तत् । एकम् । देवानाम् । श्रेष्ठम । वपुंषाम् । अपश्यम् ॥ १ ॥

सूर्यस्य ऋतंसत्यभूतं मंडलं ऋतेनोदकेनापिहितमाच्छादितं ध्रुवं शाश्वतं अपश्यमिति संबन्धः यत्र वां युवाभ्यांस्थितं तदित्यर्थः सूर्यमंडलेमित्रावरुणयोःस्थितिः(चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः उद्वांचक्षुर्वरुणसुप्रतीकंदेवयोरेतिचक्षुर्मित्रस्यवरुणस्येत्यादिषुप्रसिद्धा) यत्र यस्मिन्मंडले स्थितानश्वान् विमुचन्ति विमोचयन्तिस्तोतारः मंदेहादिभिः निरुद्धानित्यर्थः अथवा शीघ्रधावनाय स्तुत्याप्रेरयन्ति तस्मिंश्चमंडले दश शता शतानि सहस्रसंख्याकारश्मयः तस्थुस्तिष्ठन्ति तादृशं देवानांवपुषां वपुष्मतां तेजोवतामग्न्यादीनां श्रेष्ठं प्रशस्यं (मत्वर्थलक्षणा अथवा व्यधिकरणषष्ठी) देवानांवपुषांशरीराणां श्रेष्ठंमंडलंहिसूर्यस्य वपुस्थानीयं तन्मंडलमपश्यं अथवा वां युवयोर्मध्ये सूर्यस्यमंडलं अपश्यमितिव्याख्येयं मैत्रंवाअहरितिश्रुतेर्मित्रस्यैवसूर्यत्वादित्याशयेन ॥ १ ॥

अथद्वितीया—

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहंभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनुं वामेकः पविरा ववर्त ॥ २ ॥

१ ऋ० सं० १.८.७. । २ ऋ० सं० ५.५.३. ।
३ तै० ब्रा० १.७.९. ।

तत् । सु । वाम् । मित्रावरुणा । महिऽत्वम् । ईर्मा । तस्थुषीः । अहऽभिः । दुदुह्रे । विश्वाः । पिन्वथः । स्वसरस्य । धेनाः । अनु । वाम् । एकः । पविः । आ । ववर्त ॥ २ ॥

हेमित्रावरुणा वांयुवयोस्तन्महित्वं महत्त्वं सु सुष्ठु अतिप्रशस्तमित्यर्थः किंतदित्युच्यते ईर्मा सततगन्ता सर्वस्यप्रेरकोवा आदित्यः अहभिरहोभिर्वर्षर्तुसंबन्धिभिः तस्थुषीः स्थावरभूताःअपोदुदुह्रे दुग्धे किंच स्वसरस्य स्वयंसर्तुरादित्यस्य विश्वाः सर्वाधेनाः लोकानां प्रीणयित्रीर्द्युतीः पिन्वथः वर्धयथः वांयुवयोरेकः अप्रतियोगीपविः पविरितिरथस्यनेमिः पवीरथनेमिर्भवतीतियास्कवचनात् । तथाप्यत्रलक्षितलक्षणयारथेवर्तते केवलचक्रस्यावर्तनायोगात् युवयोरेकोरथअन्वाववर्त अनुक्रमेणपरिभ्रमते ॥ २ ॥

अथतृतीया–

अधारयतंपृथिवीमुतद्यांमित्रराजानावरुणामहोभिः ।
वर्धयतमोषधीःपिन्वतंगाअववृष्टिंसृजतंजीरदानू ॥ ३ ॥

अधारयतम् । पृथिवीम् । उत । द्याम् । मित्रराजाना । वरुणा । महःऽभिः । वर्धयतम् । ओषधीः । पिन्वतम् । गाः । अव । वृष्टिम् । सृजतम् । जीरदानू इति जीरऽदानू ॥ ३ ॥

हेमित्रराजाना मित्रभूताःस्तोतारोराजानःस्वामिनईश्वराभवन्ति ययोःसकाशात् तौ मित्रराजानौ हेवरुणा प्रतियोग्यपेक्षयाद्विवचनं अत्रपादादित्वादाद्यंपदंननिहन्यते वरुणेत्येतस्यतु आमन्त्रितंपूर्वमविद्यमानवदितिपूर्वस्याविद्यमानवत्त्वेनास्यैवपादादित्वादनिघातत्वंयुक्तं नैवंभवति नामंत्रितेसमानाधिकरणेसामान्यवचनमिति वरुणेत्येतस्यामंत्रितसमानाधिकरणत्वादस्यचसामान्यवचनत्वादविद्यमानवत्त्वाभावेन पादादित्वाभावादुत्तरस्यनिघातत्वंयुक्तं हे देवौ महोभिस्तेजोभिः स्वसामर्थ्यैः पृथिवीं उतापिच द्यां अधारयतं हेदेवौ युवामोषधीर्वर्धयतं वृष्टिप्रेरणेन गाःपिन्वतं गवाश्वादीन्वर्धयतं तदर्थं वृष्टिमवसृजतं अवाङ्मुखंप्रेरयतं हेजीरदानूक्षिप्रदानौ ॥ ३ ॥

---

१ नि० ५. ५. ।

अथचतुर्थी—

आवामश्वासःसुयुजोवहन्तुयतरंश्मयउपंयन्त्ववाक् ।
घृतस्यंनिर्णिगनुंवर्ततेवामुपसिन्धवःप्रदिविंक्षरन्ति ॥ ४ ॥

आ । वाम् । अश्वांसः । सुऽयुजः । वहन्तु । यतऽरंश्मयः ।
उपं । यन्तु । अर्वाक् । घृतस्यं । निःऽनिक् । अनुं । वर्तते ।
वाम् । उपं । सिन्धवः । प्रऽदिवि । क्षरन्ति ॥ ४ ॥

हेमित्रावरुणौ वां युवां अश्वासोश्वाः सुयुजः सुष्ठुरथेयुक्ताः सन्तःआवहन्तु यतरश्मयः सारथिनियतप्रग्रहाः ते अर्वागुपयन्तु घृतस्योदकस्य निर्निग्रूपं वामनुवर्तते अनुगच्छति किंच प्रदिवि पुराणनामैतत् पुराणाः सिन्धवः उपक्षरन्ति उपगच्छन्ति युवयोरनुग्रहात् ॥ ४ ॥

अथपंचमी—

अनुंश्रुताममतिंवर्धदुर्वीबर्हिरिवयजुंषारक्षंमाणा ।
नमंस्वन्ताधृतदक्षाधिगर्तेमित्रासांथेवरुणेळास्वन्तः ॥ ५ ॥ ३० ॥

अनुं । श्रुताम् । अमतिम् । वर्धत् । उर्वीम् । बर्हिःऽइंव । यजुंषा ।
रक्षंमाणा । नमंस्वन्ता । धृतऽदक्षा । अधि । गर्ते । मित्रं ।
आसांथे इति । वरुण । इळांसु । अन्तरिति ॥ ५ ॥ ३० ।

श्रुतां विश्रुतां अमतिं रूपनामैतत् शरीरदीप्तिमित्यर्थः तामनुवर्धत् अनुवर्धयन्तौ बर्हिर्यज्ञः सइव सयथा यजुषामंत्रेणरक्ष्यते तद्वदुर्वीरक्षमाणा पालयन्तौ नमस्वन्ता अन्नवन्तौ हेधृतदक्षा आत्तबलौ हेमित्र हेवरुण हेमित्रावरुणौ युवामुक्तलक्षणौसन्तौ इळासु यागभूमिषु अंतर्मध्ये गर्तेधिरथे आसाथे उपविशथः रथोपिगर्तउच्यतइतियास्कः । आरोहथोवरुणमित्रगर्तमिति ॥ ५ ॥

॥ इतिचतुर्थस्यतृतीयेत्रिंशोवर्गः ॥ ३० ॥

---

१ नि० ३. ५. ।   २ ऋ० सं० ४. ३. ३१. ।

अथषष्ठी—

अक्रविहस्तासुकृतेपरस्पायत्रासाथेवरुणेळास्वन्तः ।
राजानाक्षत्रमहृणीयमानासहस्रस्थूणंबिभृथःसहद्वौ ॥ ६ ॥

अक्रविऽहस्ता । सुऽकृते । परःऽपा । यम् । त्रासाथे इति ।
वरुणा । इळासु । अन्तरिति । राजाना । क्षत्रम् । अहृणीयमाना ।
सहस्रऽस्थूणम् । बिभृथः । सह । द्वौ ॥ ६ ॥

अक्रविहस्ता अकृपणहस्तौ दानशूरावित्यर्थः कस्मै सुकृते शोभनस्तुतिकर्त्रे परस्पा परस्तात्पातारौ रक्षितारौ हेवरुणा मित्रावरुणौ युवां यंयजमानं इळासु यागभूमिषु अन्तर्मध्ये त्रासाथे रक्षथः तस्मै सुकृते अक्रविहस्ता परस्पाचभवथेतिसंबन्धः किंच युवांराजाना राजमानौ अहृणीयमाना अक्रुध्यन्तौ द्वौ परस्परंसहसाहित्येन क्षत्रं धनं सहस्रस्थूणं अनेकावष्टंभकस्तंभोपेतं सौधादिरूपंगृहंच बिभृथोधारयथः सुकृते यजमानाय अथवा क्षत्रं बलं अपरिमिताभिःस्थूणाभिरुपेतंरथंचागमनार्थं सहधारयथः ॥ ६ ॥

अथसप्तमी—

हिरण्यनिर्णिगयोअस्यस्थूणाविभ्राजतेदिव्य१श्वाजनीव ।
भद्रेक्षेत्रेनिमितातिल्विलेवासनेममध्वोअधिगर्त्यस्य ॥ ७ ॥

हिरण्यऽनिर्निक् । अयः । अस्य । स्थूणा । वि । भ्राजते ।
दिवि । अश्वाजनीऽइव । भद्रे । क्षेत्रे । निऽमिता । तिल्विले ।
वा । सनेम । मध्वः । अधिऽगर्त्यस्य ॥ ७ ॥

अनयोरथः हिरण्यनिर्निक् हिरण्यरूपं निर्निगितिरूपनाम अस्यरथस्य स्थूणाः कीलकादयः अयः हिरण्यनामैतत् अयोविकारा इत्यर्थः अयोमयावा तादृशोरथोदिवि अन्तरिक्षे विभ्राजते किमिव अश्वाजनीव अश्वाव्यापनशीलामिवाः तानजतिगच्छतीत्यश्वाजनीविद्युत् सेव दिविभ्राजते किंच भद्रे कल्याणे स्तुत्येवा क्षेत्रे देवयजने तिल्विलेवा तिलस्नेहने तिलः स्निग्धा इला भूमिर्यस्यतत्क्षेत्रंतिल्विलं देवयजनं घृतसोमादिना

स्निग्धे भद्रेच क्षेत्रे निमिता स्थूणा यूपयष्टिरवस्थितः मध्वोमधुपूर्णे गर्तस्य गर्तेरथं सनेम संभजेम कर्मणिषष्ठ्यौ अधीतिपूरणः अथवा गर्तस्याधि रथस्योपरि मध्वोमधुसोमरसं सनेम स्थापयेमेत्यर्थः गर्त्यस्येतितुपाठे मधुनोविशेषणं दिगादित्वाद्यत् ॥ ७ ॥

अथाष्टमी—

हिरण्यरूपमुषसोव्युष्टावयःस्थूणमुदितासूर्यस्य ।
आरोहथोवरुणमित्रगर्तमतश्चक्षाथेअदितिंदितिंच ॥ ८ ॥

हिरण्यऽरूपम् । उषसः । विऽउष्टौ । अयःऽस्थूणम् । उत्ऽइता ।
सूर्यस्य । आ । रोहथः । वरुण । मित्र । गर्तम् । अतः ।
चक्षाथे इति । अदितिम् । दितिम् । च ॥ ८ ॥

उषसोव्युष्टौ प्रातःकालेइत्यर्थः सूर्यस्य उदिता उदितौ उदये सएवकालः प्रकारान्तरेणोक्तः तस्मिन्काले हिरण्यरूपं अयःस्थूणं अयोमयशंकुं गर्तं रथं हेवरुण हेमित्र युवां गर्तमारोहथः यज्ञंप्राप्तुं अतः अस्माद्धेतोः अदितिमखंडनीयांभूमिं दितिंखंडितां प्रजादिकांच चक्षाथे पश्यथः ॥ ८ ॥

दाक्षायणयज्ञेयद्बंहिष्ठमितिनवमी द्वितीयस्याममावास्यायां मैत्रावरुणस्यहविषोयाज्या सूत्रितंच—आनोमित्रावरुणायद्बंहिष्ठंनातिविधेसुदानूइति । मैत्रावरुणेपशौहविषएवैवयाज्या सूत्रितंच—यद्बंहिष्ठंनातिविधेसुदानूहिरण्यगर्भःसमवर्तताग्रइति । तत्पाठस्तु ।

अथनवमी—

यद्बंहिष्ठंनातिविधेसुदानूअच्छिद्रंशर्मभुवनस्यगोपा ।
तेननोमित्रावरुणावविष्टंसिषासन्तोजिगीवांसःस्याम ॥९॥३१॥

यत् । बंहिष्ठम् । न । अतिऽविधे । सुदानू इति सुऽदानू । अच्छिद्रम् ।
शर्म । भुवनस्य । गोपा । तेन । नः । मित्रावरुणौ । अविष्टम् ।
सिसासन्तः । जिगीवांसः । स्याम ॥ ९ ॥ ३१ ।

हेसुदानू शोभनदानौ हेभुवनस्यगोपा गोपौ युवां वंहिष्ठं बहुतमं यदच्छिद्रं अनवच्छिन्नं शर्म सुखंगृहंवा नातिविधे अतिवेद्धुमशक्यं शर्मेतिशर्मविशेषणं व्यधताडनइत्यस्मादत्युपपदे-कृत्यार्थेकेन् संप्रसारणंच तादृशंशर्म धारयतः तेनशर्मणा नोस्मानविष्टं रक्षतं हेमित्रावरुणौ सिषासन्तोधनानिसंभक्तुमिच्छन्तोवयं जिगीवांसः शत्रूणांधनानिजेतुमिच्छन्तः स्याम भवेम ॥ ९ ॥

॥ इतिचतुर्थस्यतृतीयेएकत्रिंशोवर्गः ॥ ३१ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणामात्येनविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेतृतीयोऽध्यायःसमाप्तः ॥ ३ ॥

॥ श्रीगणेशाय नमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरं ॥ १ ॥
अष्टकस्यचतुर्थस्यतृतीयोव्याकृतःस्फुटं ॥ अध्यायःसायणार्येणचतुर्थोव्याकरिष्यते ॥ २ ॥
ऋतस्यगोपाविति सप्तर्चं सप्तमं सूक्तं अत्रेयमनुक्रमणिका—ऋतस्यसप्तार्चनानाजागतमिति ।
आत्रेयोर्चनानानामऋषिः जगतीछन्दः तुह्यादिपरिभाषयामित्रावरुणौदेवता विनियोगोलैंगिकः ।

तत्रप्रथमा—

ॐम् ऋतस्यगोपावधितिष्ठथोरथंसत्यधर्माणापरमेव्योमनि ।
यमत्रमित्रावरुणावथोयुवंतस्मैवृष्टिर्मधुमत्पिन्वतेदिवः ॥ १ ॥

ऋतस्य । गोपौ । अधि । तिष्ठथः । रथम् । सत्यऽधर्माणा ।
परमे । विऽओमनि । यम् । अत्र । मित्रावरुणा । अवथः ।
युवम् । तस्मै । वृष्टिः । मधुऽमत् । पिन्वते । दिवः ॥ १ ॥

हेऋतस्योदकस्यगोपौरक्षितारौ सत्यधर्माणा सत्यधर्माणौ युवां रथमधितिष्ठथः आरोहथः अस्मद्यज्ञमागमनार्थं कुत्र परमेव्योमनि निरतिशयेआकाशे हेमित्रावरुणौ युवं युवां अत्रास्मिन्यज्ञे यं यजमानं अवथोरक्षथः तस्मैयजमानाय वृष्टिः पर्जन्योमधुमदुदकं दिवोद्युलोकात्पिन्वते सिंचतिवर्धयति ॥ १ ॥

अथद्वितीया—

सम्राजावस्यभुवनस्यराजथोमित्रावरुणाविदथेस्वर्दृशा ।
वृष्टिंवांराधोअमृतत्वमीमहेद्यावापृथिवीविचरन्तितन्यवः ॥ २ ॥

सम्ऽराजौ । अस्य । भुवनस्य । राजथः । मित्रावरुणा । विदथे ।
स्वःऽदृशा । वृष्टिम् । वाम् । राधः । अमृतऽत्वम् । ईमहे ।
द्यावापृथिवी इति । वि । चरन्ति । तन्यवः ॥ २ ॥

हेमित्रावरुणौ सम्राजौ सम्यक्राजमानौ युवामस्य भुवनस्य राजथः ईशाथे स्वर्दृशा स्वर्गस्य द्रष्टारौ युवां विदथेस्मद्यज्ञे सम्राजावितिसंबन्धः वां युवां वृष्टिं राधोधनं वृष्ट्याख्यंधनं अमृतत्वंस्वर्गंच ईमहे प्रार्थयामहे युवयोस्तन्यवोविस्तृताःरश्मयोद्यावापृथिवी विचरन्ति विविधंप्राप्नुवन्ति अथवा वृष्टिंधनममृतत्वंचईमहे ॥ २ ॥

अथतृतीया—

सम्राजाउग्रावृषभादिवस्पतीपृथिव्यामित्रावरुणाविचर्षणी । चित्रेभिरभ्रैरुपतिष्ठथोरवंद्यांवर्षयथोअसुरस्यमायया ॥ ३ ॥

सम्ऽराजौ । उग्रा । वृषभा । दिवः । पती इति । पृथिव्याः । मित्रावरुणा । विचर्षणीइतिविऽचर्षणी । चित्रेभिः । अभ्रैः । उप । तिष्ठथः । रवम् । द्याम् । वर्षयथः । असुरस्य । मायया ॥३॥

सम्राजौ सम्यक्राजमानौ उग्रा उद्गूर्णबलौ वृषभा वर्षितारौ दिवोद्युलोकस्यपती स्वामिनौ पृथिव्याश्चपती विश्वचर्षणी सर्वस्यद्रष्टारौ मित्रावरुणौ एवंमहानुभावौ चित्रेभिश्चायनीयैरभ्रैर्मेघैःसह रवं स्तोत्रं उपतिष्ठथः पश्चात् द्यांच वर्षयथः असुरस्योदकनिरसितुः पर्जन्यस्य मायया प्रज्ञया सामर्थ्येन ॥ ३ ॥

अथचतुर्थी—

मायावांमित्रावरुणादिविश्रितासूर्योज्योतिश्चरतिचित्रमायुधम् । तमभ्रेणवृष्ट्यागूहथोदिविपर्जन्यद्रप्सामधुमन्तईरते ॥ ४ ॥

माया । वाम् । मित्रावरुणा । दिवि । श्रिता । सूर्यः । ज्योतिः । चरति । चित्रम् । आयुधम् । तम् । अभ्रेण । वृष्ट्या । गूहथः । दिवि । पर्जन्य । द्रप्साः । मधुऽमन्तः । ईरते ॥ ४ ॥

हेमित्रावरुणा वां युवयोर्माया दिविश्रिता आश्रिता कैषा युवयोर्मायाउच्यते सूर्यः सर्वस्यप्रेरकोज्योतिर्दीप्यमानः चित्रं चायनीयमायुधं उक्तलक्षणायुधरूपश्चरति परिभ्रमत्यंतरिक्षे शत्रुमारकत्वादायुधमुच्यते तंसूर्यं अभ्रेण मेघेन वृष्ट्या दिवि गूहथोगोपायथः हेपर्जन्य देव त्वया मित्रावरुणाभ्यां प्रेरितेन मधुमन्तोद्रप्साआपः ईरतेईर्यन्ते त्वत्सृष्टावागच्छन्ति ॥४॥

अथपंचमी—

रथंयुञ्जतेमरुतःशुभेसुखंशूरोनामित्रावरुणागविष्टिषु ।
रजांसिचित्राविचरन्तितन्यवोदिवःसम्राजापयसानउक्षतम् ॥५॥

रथम् । युञ्जते । मरुतः । शुभे । सुऽखम् । शूरः । न । मित्रावरुणा । गोऽइष्टिषु । रजांसि । चित्रा । वि । चरन्ति । तन्यवः । दिवः । सम्ऽराजा । पयसा । नः । उक्षतम् ॥ ५ ॥

हेमित्रावरुणौ युवयोरनुग्रहात् मरुतः शुभे उदकार्थं सुखं शोभनाक्षद्वारं रथंयुंजते अश्वैर्योजयन्ति शूरोन शूरइव सयथायुद्धार्थंरथंयुनक्तितद्वत् गविष्टिषु गवामुदकानामेषणेषुनिमित्तेषु चित्रा चायनीयानि रजांसि लोकान् तन्यवः ततास्तेमरुतोविचरन्ति विविधंचरन्ति तस्मात्तैःसहितौ हेसम्राजा युवां दिवोद्युलोकात् पयसोदकेन नोस्मानुक्षतं सिंचतं ॥ ५ ॥

अथषष्ठी—

वाचंसुमित्रावरुणाविरांवतींपर्जन्यश्चित्रांवदतित्विषीमतीम् ।
अभ्रावसतमरुतःसुमाययाद्यांवर्षयतमरुणामरेपसम् ॥ ६ ॥

वाचम् । सु । मित्रावरुणौ । इरांऽवतीम् । पर्जन्यः । चित्राम् । वदति । त्विषिऽमतीम् । अभ्रा । वसत । मरुतः । सु । मायया । द्याम् । वर्षयतम् । अरुणाम् । अरेपसम् ॥ ६ ॥

हेमित्रावरुणौ युवयोरनुग्रहात् पर्जन्योमेघः सु सुष्ठु इरावतीं अन्नवतीमन्नसाधिकां चित्रां चायनीयां त्विषीमतीं दीप्तिमतीं वाचं गर्जनशब्दं वदति शब्दयति वृष्ट्यर्थं मरुतश्चाभ्रा अभ्राणि मेघान् सु सुष्ठु वसत आच्छादयन्ति मायया स्वप्रज्ञया युवांच पर्जन्येनमरुद्भिश्च सहारुणामरुणवर्णां अरेपसं अपापां वृष्ट्याविघातिनीं द्यां वर्षयतम् ॥ ६ ॥

अथसप्तमी—

धर्मणामित्रावरुणाविपश्चितावृतारक्षेथेअसुरस्यमायया ।
ऋतेनविश्वंभुवनंविराजथःसूर्यमाधत्थोदिविचित्र्यंरथम् ॥ ७ ॥ १ ॥

धर्मणा । मित्रावरुणा । विपःऽचिता । व्रता । रक्षेथे इति । असुरस्य मायया । ऋतेन । विश्वम् । भुवनम् । वि । राजथः । सूर्यम् । आ । धत्थः । दिवि । चित्र्यम् । रथम् ॥ ७ ॥ १ ॥

हेमित्रावरुणा युवां धर्मणा जगद्धारकेण विपश्चिता स्तुत्येनेत्यर्थः व्रता व्रतेन कर्मणा अथवा विपश्चितास्तोतृनामैतत् यजमानेन वृष्ट्या जगद्रक्षणस्य यजमानोपिकारणं तत्कृतयाहुत्या वृष्ट्युत्पत्तेः व्रता व्रतेन युवयोःकर्मणा यज्ञादिकर्माणि रक्षेथे पालयथः असुरस्य मेघानांनिरसितुःपर्जन्यस्य मायया प्रज्ञयाच ऋतेनोदकेन यज्ञेनवा निमित्तेन विश्वं भुवनं सर्वभूतजातं विराजथः विदीपयथइत्यर्थः सूर्यमासूर्यंच चित्र्यं पूज्यं रथं रंहणस्वभावं दिवि द्युलोके धत्थः धारयथोजगदुपकारार्थम् ॥ ७ ॥

॥ इतिचतुर्थस्यचतुर्थेप्रथमोवर्गः ॥ १ ॥

वरुणंवइतिसप्तर्चमष्टमंसूक्तं अर्चनानसआर्षं मैत्रावरुणं पंक्त्यन्तपरिभाषया आनुष्टुभं अन्त्यापंक्तिः वरुणंपंक्त्यन्तंत्वित्यनुक्रमणिका विनियोगोलैंगिकः ।

तत्रप्रथमा—

वरुणंवोरिशादसमृचामित्रंहवामहे ।
परिव्रजेवबाह्वोर्जगन्वाँसास्वर्णरम् ॥ १ ॥

वरुणम् । वः । रिशादसम् । ऋचा । मित्रम् । हवामहे । परि । व्रजाऽइव । बाह्वोः । जगन्वांसा । स्वःऽनरम् ॥ १ ॥

वोयुवयोर्मध्ये व्यत्ययेनबहुवचनं रिशादसं रिशन्तिहिंसन्तीतिरिशाःशत्रवः तेषांप्रेरकं स्वर्णरं स्वर्गस्यनेतारं एतद्व्यवहितमप्युभयत्रसंबध्यते एवंविधंवरुणं उक्तलक्षणंमित्रं च ऋचा मंत्रेण हवामहे आह्वयामः अथावयुत्योच्यते व्रजेव गोयूथानीव बाह्वोःबलेन परिजगन्वांसा परिगच्छन्तौ ॥ १ ॥

अथद्वितीया—

ताबाहवासुचेतुनाप्रयन्तमस्माअर्चते ।
शेवंहिजार्यंवांविश्वासुक्षासुजोगुवे ॥ २ ॥

ता । बाहवा । सुऽचेतुना । प्र । यन्तम् । अस्मै । अर्चते ।
शेवम् । हि । जार्यम् । वाम् । विश्वासु । क्षासु । जोगुवे ॥ २ ॥

ता तौ युवां बाहवा बाहुना सुचेतुना सुष्ठुप्रज्ञात्रा प्रयासभूयस्त्वंजानतेत्यर्थः यद्य-प्यात्मेवज्ञाता नहस्तः तथापि तद्धर्ममत्रारोप्यस्तूयते यद्वैतत्ताविव्यस्यविशेषणं सुज्ञानावि-त्यर्थः शोभनहस्तेन अस्मैअर्चतेस्तुवते मह्यं प्रयन्तं अभिमतंसुखंगमयतं अन्तर्भावितण्य-र्थोद्रष्टव्यः यमिर्दानकर्मावाद्रष्टव्यः प्रयच्छतमित्यर्थः जार्यं स्तुत्यं शेवं सुखं वांयुवयोः संबन्धि युवाभ्यांकृतंवा विश्वासुसर्वासु क्षासु भूमिषु जोगुवे गच्छतिव्यामोति अवतेगवतइति गतिकर्मसुपाठात् अयमपिगतिकर्मा अथवा जोगुवे सर्वत्रशब्दयामीत्यर्थः ॥ २ ॥

अथतृतीया—

यन्नूनमश्यांगतिंमित्रस्ययायांपथा ।
अस्यप्रियस्यशर्मण्यहिंसानस्यसश्चिरे ॥ ३ ॥

यत् । नूनम् । अश्याम् । गतिम् । मित्रस्य । यायाम् । पथा ।
अस्य । प्रियस्य । शर्मणि । अहिंसानस्य । सश्चिरे ॥ ३ ॥

यत्यदा नूनमिदानीं गतिं गमनमश्यांप्राप्नुयां यद्योगादनिघातः तदामित्रस्य मित्रभूत-स्य पथा मार्गेण मित्रप्रापकेणमार्गेण यायां गच्छेयं मित्रोनयतुविद्वानित्यादिषुमित्रस्येष्टदेश-गमयितृत्वंप्रसिद्धं नकेवलमहमेकएवगन्ता किन्तु सर्वेपितथागमन्नित्याह अस्यप्रियस्यमित्र-स्येत्यर्थः अहिंसानस्य अहिंसतः यतोयमहन्ता अतःप्रियइत्यर्थः तस्यशर्मणि सुखे गृहेस्था-नेवा सश्चिरे संगताः ॥ ३ ॥

अथचतुर्थी—

युवाभ्यांमित्रावरुणोपमंधेयामृचा ।
यद्धक्षयेमघोनांस्तोतॄणांचस्पूर्धसे ॥ ४ ॥

युवाभ्याम् । मित्रावरुणा । उपऽमम् । धेयाम् । ऋचा ।
यत् । ह । क्षये । मघोनाम् । स्तोतॄणाम् । च । स्पूर्धसे ॥ ४ ॥

---

१ ऋ० सं० १. ६. १७. ।

हेमित्रावरुणा युवाभ्यांदातव्यं उपमं उपसमीपमीयमानंधनं ऋचा स्तुत्यासाधनेन धेयां धारयामि यद्ध यत्खलु युवाभ्यांसकाशाद्दामंधनं मघोनां धनवतां अदातॄणांस्तोतॄणांच क्षये गृहे स्पूर्धसे स्पर्धनायभवति धनिकानांस्तोतॄणांच धनाधिक्यविषयेस्पर्धाभवतीत्यर्थः अपरिमितंधनंभवतीतिभावः ॥ ४ ॥

अथपंचमी–

आनोमित्रसुदीतिभिर्वरुणश्चसधस्थआ ।
स्वेक्षयेमघोनांसखीनांचवृधसे ॥ ५ ॥

आ । नः । मित्र । सुदीतिऽभिः । वरुणः । च । सधऽस्थे । आ ।
स्वे । क्षये । मघोनाम् । सखीनाम् । च । वृधसे ॥ ५ ॥

हेमित्र त्वंचवरुणश्च सुदीतिभिः सुदीप्तियुक्तौ युवां नोस्मभ्यं सधस्थे सहस्थानेयज्ञे आगच्छतं द्वितीयआकारोनर्थकआदरार्थोवा किमर्थमिति उच्यते मघोनां धनवतां हविष्मतां सखीनांच युवयोः सखीभूतानामस्माकं क्षये गृहे स्वे स्वकीये वृधसे वर्धनाय॥५॥

अथषष्ठी–

युवंनोयेषुवरुणक्षत्रंबृहच्चबिभृथः ।
उरुणोवाजसातयेकृतंरायेस्वस्तये ॥ ६ ॥

युवम् । नः । येषु । वरुणा । क्षत्रम् । बृहत् । च । बिभृथः ।
उरु । नः । वाजऽसातये । कृतम् । राये । स्वस्तये ॥ ६ ॥

हेवरुणा मित्रावरुणौ युवं युवां नोस्माकं क्षत्रं बलं बृहत् ब्रह्मपरिवृढमन्नंच येषु स्तोत्रेषुनिमित्तेषु बिभृथः धारयथः युवाभ्यांधृतंबलमन्नंच नोस्मभ्यं वाजसातये अन्नस्यलाभाय यज्ञायवा राये धनाय स्वस्तये क्षेमायच उरु विस्तीर्णं कृतं कुरुतम् ॥ ६ ॥

अथसप्तमी–

उच्छन्त्यांमेयजतादेवक्षत्रेरुशद्गवि ।
सुतंसोमंनहस्तिभिरापड्भिर्धावतंनराबिभ्रतावर्चनानसम् ॥ ७ ॥ २ ॥

उच्छन्त्याम् । मे । यजता । देवऽक्षत्रे । रुशत्ऽगवि ।
सुतम् । सोमम् । न । हस्तिऽभिः । आ । पट्ऽभिः । धावतम् ।
नरा । बिभ्रतौ । अर्चनानसम् ॥ ७ ॥ २ ॥

उच्छन्त्यां उषसि मेसोममितिसंबन्धः यजता यष्टव्यौ रुशद्गवि रोचमानरश्मौप्रातःसवने देवक्षत्रे देवानांक्षत्रंबलंयस्मिन्गृहेतद्देवक्षत्रं तस्मिन्मेमदीयं सुतमभिषुतं सोमं न नेतिसंप्रत्यर्थे इदानीं हस्तिभिः हस्तवद्भिः हंतेर्गतिकर्मणोहस्तशब्दः गमनसाधनपादवद्भिरित्यर्थः पड्भिः पादवद्भिश्च पादचतुष्टयोपेतैरश्वैराधावतं आगच्छतं नरा हेनेतारौमित्रावरुणौ ॥ ७ ॥

॥ इतिचतुर्थस्यचतुर्थेद्वितीयोवर्गः ॥ २ ॥

यश्चिकेतेतिषळृचंनवमंसूक्तं रातहव्यस्यात्रेयस्यार्षं मैत्रावरुणं यश्चिकेतषळ्रातहव्यइत्यनुक्रमणिका । पंक्त्यंतंत्वित्युक्तत्वात्पंक्त्यन्तपरिभाषयानुष्टुभं अन्त्यापंक्तिः विनियोगोलैंगिकः ।

तत्रप्रथमा—

यश्चिकेतसंसुक्रतुर्देवत्रासब्रवीतुनः ।
वरुणोयस्यंदर्शतोमित्रोवावनंतेगिरः ॥ १ ॥

यः । चिकेत । सः । सुऽक्रतुः । देवऽत्रा । सः । ब्रवीतु । नः ।
वरुणः । यस्य । दर्शतः । मित्रः । वा । वनते । गिरः ॥ १ ॥

यःस्तोता चिकेत जानातिस्तुतिं युवयोः ससुक्रतुः सएवशोभनकर्मा देवत्रा देवेषु स्तोतृषुमध्ये यद्वा देवेषुमध्ये युवयोरेवस्तुतिंयश्चिकेतससुक्रतुरिति ससुकर्मा नोस्माकंब्रवीतु स्तुतिंपरमुपदिशतु यस्यदर्शतोदर्शनीयोवरुणोदर्शनीयोमित्रोवा मित्रश्च वाशब्दश्चार्थे गिरोस्मदीयास्तुतीर्वनतेसंभजते ॥ १ ॥

अथद्वितीया—

ताहिश्रेष्ठवर्चसाराजानादीर्घश्रुत्तमा ।
तासत्पतीऋतावृधऋतावानाजनेजने ॥ २ ॥

ता । हि । श्रेष्ठऽवर्चसा । राजाना । दीर्घश्रुत्ऽतमा । ता । सत्पती इति सत्ऽपती । ऋतऽवृधा । ऋतऽवाना । जनेऽजने ॥ २ ॥

आ । चिकितान । सुक्रतू इति सुऽक्रतू । देवौ । मर्त । रिशादसा ।
वरुणाय । ऋतऽपेशसे । दधीत । प्रयसे । महे ॥ १ ॥

हेचिकितान जानन्स्तुतिं हेमर्त मनुष्य रातहव्यत्वमितितस्यैवंसंबोधनं सुक्रतू शोभनकर्माणौ रिशादसा हिंसकानांहिंसकौदेवौ आ आकारयेतिशेषः आहूयच ऋतपेशसे पेशइतिरूपनाम ऋतमुदकं उदकमेवरूपंयस्यतादृशाय वरुणाय प्रयसे मत्वर्थोलुप्यते हविर्लक्षणान्नवते महे महतेपूज्याय दधीतदद्याः हविरितिशेषः द्वितीयार्थेवाचतुर्थी महद्धविर्दधीतमहतोन्नस्यलाभायेतिवायोज्यं ॥ १ ॥

अथद्वितीया—

ताहिक्षत्रमविह्रुतंसम्यगसुर्य१माशाते ।
अधव्रतेवमानुषंस्व१र्णधायिदर्शतम् ॥ २ ॥

ता । हि । क्षत्रम् । अविऽह्रुतम् । सम्यक् । असुर्यम् । आशाते इति ।
अध । व्रताऽइव । मानुषम् । स्वः । न । धायि । दर्शतम् ॥ २ ॥

ताहि हीतिहेतौ यस्मात्ता तौ क्षत्रं बलं अविह्रुतं अहिंस्यं असुर्यं असुरविघाति महद्बलं सम्यगाशाते व्याप्नुतः अध अतोहेतोर्मानुषंमनुष्येषुप्रवृत्तं व्रतेव कर्मेव तद्यथा मनुष्येषु नियतं स्वर्णसूर्यइव सयथादिविदृश्यतेतद्वत् दर्शतं दर्शनीयं बलं धायि यज्ञनिहितं ॥ २ ॥

अथतृतीया—

तावामेषेरथानामुर्वीगव्यूतिमेषाम् ।
रातहव्यस्यसुष्टुतिंदधृक्स्तोमैर्मनामहे ॥ ३ ॥

ता । वाम् । एषे । रथानाम् । उर्वीम् । गव्यूतिम् । एषाम् ।
रातऽहव्यस्य । सुऽस्तुतिम् । दधृक् । स्तोमैः । मनामहे ॥ ३ ॥

हेमित्रावरुणौ ता तौप्रसिद्धौ वां युवां रथानां अस्मदीयानामेषांपुरतोवर्तमानानां उर्वीं प्रभूतां गव्यूतिं अतिविस्तृतंमार्गं एषे गन्तुं मार्गरक्षणायेत्यर्थः तुमर्थेअसेन्प्रत्ययः तदर्थंवां मनामहे स्तुमः रातहव्यस्यऋषेः रातहव्यसंबन्धिभिः सुष्टुतिं सुष्टुतिभिः शोभनस्तुतिसाधनैः स्तोमैः दधृक् धर्षकौयुवां ॥ ३ ॥

अथचतुर्थी—

अधाहिकाव्यांयुवंदक्षस्यपूर्भिरद्भुता ।
निकेतुनाजनानांचिकेथेपूतदक्षसा ॥ ४ ॥

अध । हि । काव्यां । युवम् । दक्षस्य । पूःऽभिः । अद्भुता ।
नि । केतुना । जनानाम् । चिकेथे इति । पूतऽदक्षसा ॥ ४ ॥

अध अपिच हिप्रसिद्धौ काव्या स्तुत्यौ युवं युवां दक्षस्य प्रवृद्धस्य ममपूर्भिः पूरकैः स्तवैः हेअद्भुता महान्तौ आश्चर्यभूतौसन्तौ केतुना प्रज्ञानेनअनुकूलेनमनसा जनानां यजमानानामित्यर्थः स्तोत्रंनिचिकेथे नितरांजानीथः हेपूतदक्षसा शुद्धबलौयुवां ॥ ४ ॥

अथपंचमी—

तदृतंपृथिविबृहच्छ्रवएषऋषीणाम् ।
ज्रयसानावरंपृथ्वतिक्षरन्तियामभिः ॥ ५ ॥

तत् । ऋतम् । पृथिवि । बृहत् । श्रवःऽएषे । ऋषीणाम् ।
ज्रयसानौ । अरम् । पृथु । अति । क्षरन्ति । यामऽभिः ॥ ५ ॥

हेपृथिविदेवि त्वयि तत् सर्वैरर्थ्यमानत्वेन प्रसिद्धं बृहत् प्रभूतं ऋतमुदकं ऋषीणांस्तोतॄणामस्माकं श्रवएषे अन्नस्यैषणेसति ज्रयसानौ गच्छन्तौ छन्दस्यसानच्शुजृभ्यामित्यसानच् ज्रयतेरपिभवति. चितइत्यन्तोदात्तः अरं अलं अत्यर्थंपृथुयथाभवतितथा यामभिर्गमनैः अतिक्षरन्ति अत्यर्थंवर्षतः व्यत्ययेनबहुवचनम् ॥ ५ ॥

अथषष्ठी—

आयद्वामीयचक्षसामित्रवयंचसूरयः ।
व्यचिष्ठेबहुपाय्येयतेमहिस्वराज्ये ॥ ६ ॥ ४ ॥

आ । यत् । वाम् । ईयऽचक्षसा । मित्रा । वयम् । च । सूरयः ।
व्यचिष्ठे । बहुऽपाय्ये । यतेमहि । स्वऽराज्ये ॥ ६ ॥ ४ ॥

हेईयचक्षसा व्याप्तदर्शनौ हेमित्रा मित्रावरुणौ वां युवां यत्र येवयंच सूरयः स्तोतारः आ आह्वयामः व्यचिष्ठे अत्यन्तविस्तृते बहुपाय्ये बहुभिर्गन्तव्ये बहुभीरक्षितव्येवा स्वराज्ये स्वराट्त्वाय एवंविधराज्यार्थं यतेमहि गच्छेम ॥ ६ ॥

॥ इतिचतुर्थस्यचतुर्थेचतुर्थोवर्गः ॥४॥

बळित्थादेवेतिपंचर्चमेकादशंसूक्तं अत्रेयमनुक्रमणिका—बळित्थापंचयजतइति यजतोनामात्रेयऋषिः आनुष्टुभंत्वित्युक्तत्वादिदमप्यानुष्टुभं मित्रावरुणौदेवता विनियोगोलैंगिकः।

तत्रप्रथमा—

बळित्थादेवनिष्कृतमादित्यायजतंबृहत्।
वरुणमित्रार्यमन्वर्षिष्ठंक्षत्रमाशाथे ॥ १ ॥

बट्। इत्था। देवा। निःऽकृतम्। आदित्या। यजतम्। बृहत्।
वरुण। मित्र। अर्यमन्। वर्षिष्ठम्। क्षत्रम्। आशाथे इति ॥ १ ॥

हेदेवा द्योतमानौ हेआदित्या अदितेःपुत्रौ हेवरुण हेअर्यमन् अरीणांनियमितर्मित्रदेव युवां बट् सत्यं अबाध्यं इत्था इत्थं इदानीं वर्तमानप्रकारेण यजतं यष्टव्यं बृहदतिप्रवृद्धं वर्षिष्ठं प्रवृद्धतमं क्षत्रं बलं आशाथे अश्नुवाथे यद्वा अर्यमा पृथगेव निर्देष्टव्यः द्विवचनं बहुवचनीकर्तव्यम् ॥ १ ॥

अथद्वितीया—

आयद्योनिंहिरण्ययंवरुणमित्रसदथः।
धर्तारांचर्षणीनांयन्तंसुम्नंरिशादसा ॥ २ ॥

आ। यत्। योनिम्। हिरण्ययम्। वरुण। मित्र। सदथः।
धर्तारा। चर्षणीनाम्। यन्तम्। सुम्नम्। रिशादसा ॥ २ ॥

यद्यस्माद्धिरण्ययं हितरमणीयं योनिं यज्ञभूमिं हेवरुण हेमित्र आसदथः आगच्छथः तस्माच्चर्षणीनां मनुष्याणां धर्तारा धारकौच हेरिशादसा हिंसकानांक्षेप्तारौयुवां अस्मभ्यं सुम्नं सुखं यन्तं कुरुतमित्यर्थः ॥ २ ॥

अथतृतीया—

विश्वेहिविश्ववेदसोवरुणोमित्रोअर्यमा ।
व्रतापदेवसश्चिरेपांतिमर्त्यंरिषः ॥ ३ ॥

विश्वे । हि । विश्वऽवेदसः । वरुणः । मित्रः । अर्यमा ।
व्रता । पदाऽइव । सश्चिरे । पान्ति । मर्त्यम् । रिषः ॥ ३ ॥

विश्वेहि सर्वेपि हीतिअप्यर्थे विश्ववेदसः सर्वविदः सर्वधनावा वरुणोमित्रोर्यमाचैतेत्रयः सर्वे व्रतास्मदीयानिकर्माणि पदेव स्थानानीव सश्चिरे संगताभवन्ति आगत्यच मां मर्त्यं रिषोहिंसकात् पान्ति रक्षन्ति ॥ ३ ॥

अथचतुर्थी—

तेहिसत्याऋतस्पृशऋतावानोजनेजने ।
सुनीथासःसुदानवोंहोश्चिदुरुचक्रयः ॥ ४ ॥

ते । हि । सत्याः । ऋतऽस्पृशः । ऋतऽवानः । जनेऽजने ।
सुऽनीथासः । सुऽदानवः । अंहोः । चित् । उरुऽचक्रयः ॥ ४ ॥

तेहि तेखलु सत्याः सत्यभूताः सत्यफलावा ऋतस्पृशउदकस्पृशत्वस्यकर्तारः ऋतावानोयज्ञवन्तः जनेजने सर्वेषुयजमानेषु सुनीथासः सुनयनाः सुदानवः सुदानाः हीतिप्रसिद्धवाची सर्वत्रसंबन्धनीयः एवंमहानुभावावरुणादयःअंहोश्चित् चिदप्यर्थे पापिनोपिस्वस्तोतुरुरुचक्रयः प्रभूतधनादिकर्तारः ॥ ४ ॥

अथपंचमी—

कोनुवांमित्रास्तुंतोवरुणोवातनूनाम् ॥
तत्सुवामेषंतेमतिरत्रिभ्यएषंतेमतिः ॥ ५ ॥ ५ ॥

कः । नु । वाम् । मित्र । अस्तुतः । वरुणः । वा । तनूनाम् । तत् । सु ।
वाम् । आ । ईषते । मतिः । अत्रिऽभ्यः । आ । ईषते । मतिः ॥ ५ ॥ ५ ॥

हेमित्र वां युवयोर्मध्ये त्वंचवरुणोवा कोनुअस्तुतः सर्वैरस्तूयमानःकोस्ति उभौअ-पिस्तुत्यौइत्यर्थः तनूनामितितृतीयार्थेषष्ठी तनुभिस्तुतिभिरस्तुतइतिसंबंधः अत्रमित्रशब्दे-नमित्रस्यैकस्यैवसंबोधनं वरुणेळास्वन्तरित्यत्रेवात्रद्विवचनसूचकस्याकरस्यानाम्नानात् लो-केषु बहुषुसंनिहितेषु एकमेवसंबोध्य युवयोरिदंयुष्माकमिदमितिप्रयुंजते तत् तस्मात् य-स्मात्सर्वैस्तुवन्तितस्मात् तनूनामित्येतद्व्यवहितमपिउत्तरत्रवायोज्यं तनूनामल्पमतीनां अ-स्माकंमतिःस्तुतिर्वा युवां आईषते अभिगच्छति अत्रिभ्योत्रिगोत्रेभ्यः अस्मभ्यं अस्म-दीयमतिः एषते आदरार्थंपुनर्वचनं ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेपंचमोवर्गः ॥ ५ ॥

प्रवोमित्रायेतिपंचर्चंद्वादशंसूक्तं आत्रेयस्ययजतस्यार्षं गायत्रं मैत्रावरुणं तथाचानु-क्रम्यते—प्रवोगायत्रमिति । अग्निष्टोमेप्रातःसवने मैत्रावरुणशस्त्रे एतत्सूक्तं सूत्रितंच—प्रवोमित्रा-यप्रमित्रयोर्वरुणयोरिति । अभिप्लवषळहे पृष्ठ्यषडहेच स्तोमनिमित्तावापार्थमिदमादीनिद्वि-तीयवर्जितानि चत्वारिसूक्तानि तथैवसूत्रितं—प्रवोमित्रायेतिचतुर्णांद्वितीयमुद्धरेदिति ।

तत्रप्रथमा—

प्रवोमित्रायगायतवरुणायविपागिरा । महिक्षत्रावृतंबृहत् ॥ १ ॥

प्र । वः । मित्राय । गायत । वरुणाय । विपा । गिरा ।
महिऽक्षत्रौ । ऋतम् । बृहत् ॥ १ ॥

हेमदीयाऋत्विजः वोयूयमित्यर्थः मित्रायवरुणायच विपा व्याप्तया गिरा स्तुत्या प्रगायत स्तुतिंकुरुत स्तुत्यास्तुवतेत्येतत्पाकंपचतीतिवत् हेमहिक्षत्रौ प्रभूतबलौ युवां ऋतं यज्ञं बृहत् महत् अतिप्रशस्तंस्तुत्यर्थमागच्छतमितिशेषः अथवा महत्प्रभूतं ऋतं स्तोत्रं शृणु-तमितिशेषः ॥ १ ॥

अथद्वितीया—

सम्राजायाघृतयोनीमित्रश्चोभावरुणश्च । देवादेवेषुप्रशस्ता ॥ २ ॥

सम्ऽराजा । या । घृतयोनीइतिघृतऽयोनी । मित्रः । च ।
उभा । वरुणः । च । देवा । देवेषु । प्रऽशस्ता ॥ २ ॥

या यौमित्रश्चवरुणश्च परस्परापेक्षयाचशब्दः उभा उभौ सम्राजा सर्वस्यस्वामिनौ घृतयोनी उदकस्योत्पादकौ देवौ द्योतमानौ देवेषुमध्ये प्रशस्ता प्रकर्षेणस्तुत्यौ तौ गायतेतिपूर्वत्रान्वयः ॥ २ ॥

अथतृतीया—

तानः शक्तंपार्थिवस्यमहोरायोदिव्यस्य । महिवांक्षत्रंदेवेषु ॥ ३ ॥

ता । नः । शक्तम् । पार्थिवस्य । महः । रायः । दिव्यस्य । महि । वाम् । क्षत्रम् । देवेषु ॥ ३ ॥

ता तौ देवौ नोस्मदर्थं पार्थिवस्य पृथिवीसंबद्धस्य दिव्यस्य दिविभवस्यच महोमहतोरायोधनस्य शक्तं समर्थौभवतं दातुमितिशेषः हेदेवौ वांयुवयोर्महि महत्पूज्यं क्षत्रं बलं देवेषु प्रसिद्धंस्तुमइतिशेषः ॥ ३ ॥

अथचतुर्थी—

ऋतमृतेनसपन्तेषिरंदक्षमाशाते । अद्रुहादेवौवर्धेते ॥ ४ ॥

ऋतम् । ऋतेन । सपन्ता । इषिरम् । दक्षम् । आशाते इति । अद्रुहा । देवौ । वर्धेते इति ॥ ४ ॥

ऋतेनोदकेननिमित्तेन ऋतं यज्ञं सपन्ता स्पृशन्तौ इषिरं एषणवन्तं दक्षं प्रवृद्धं यजमानं हविर्वा आशाते व्याप्नुतः अद्रुहा.अद्रोग्धारौ देवौ मित्रावरुणौ युवांवर्धेते प्रवृद्धौभवतः ॥४॥

अथपंचमी—

वृष्टिद्यावारीत्यापेषस्पतीदानुमत्याः । बृहन्तंगर्तमाशाते ॥५॥६॥

वृष्टिऽद्यावा । रीतिऽआपा । इषः । पती इति । दानुऽमत्याः । बृहन्तम् । गर्तम् । आशाते इति ॥ ५ ॥ ६ ॥

वृष्टिद्यावा वृष्ट्यर्थाद्यौःस्तुतिर्ययोस्तौवृष्टिद्यावा अथवा वृष्टिर्वर्षिका द्यौरन्तरिक्षं याभ्यां तौ तादृशौ रीत्यापा रीगतिरेषणयोः रीतिः प्राप्तिः सैवआपाआप्तिरभिमतप्राप्तिर्ययोस्तौ

तादृशौ इषोन्नस्य पती स्वामिनौ वृष्टिप्रदत्वात्स्वामित्वं दानुमत्याः दानवत्याः दातृपुउचितायाइत्यर्थः एतदिद्विशेषणं एवंमहानुभावौ बृहन्तं महान्तं गर्तं रथमाशातेव्यामुतः अधितिष्ठतोयागार्थं ॥५॥

॥ इतिचतुर्थस्यचतुर्थेषष्ठोवर्गः ॥ ६ ॥

त्रीरोचनेतिचतुर्ऋचंत्रयोदशंसूक्तं उरुचक्रिर्नामात्रेयऋषिः त्रिष्टुप् मित्रावरुणौदेवता अनुक्रम्यतेच—त्रीरोचनाचतुष्कमुरुचक्रिरिति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

त्रीरो॑च॒ना व॑रु॒ण त्रीँरु॒त द्यून् त्रीणि॑ मित्र धारयथो॒ रजां॑सि ।
वा॒वृ॒धा॒नाव॒मतिं॑ क्ष॒त्रि॒य॒स्यानु॑ व्र॒तं रक्ष॑माणावजु॒र्यम् ॥ १ ॥

त्री । रो॒च॒ना । व॒रु॒ण॒ । त्रीन् । उ॒त । द्यून् । त्रीणि॑ । मि॒त्र॒ ।
धा॒र॒य॒थः॒ । रजां॑सि । व॒वृ॒धा॒नौ । अ॒मति॑म् । क्ष॒त्रिय॑स्य ।
अनु॑ । व्र॒तम् । रक्ष॑माणौ । अ॒जु॒र्यम् ॥ १ ॥

हेवरुण हेमित्र युवां त्री त्रीणि रोचना रोचनानि द्युलोकान्धारयथइतिसंबन्धः उत अपिच त्रीन्द्यून् द्योतमानानंतरिक्षलोकान् धारयथः तथात्रीणिरजांसि भूलोकान् कीदृशौ युवां वावृधाना वर्धमानौ क्षत्रियस्य क्षत्रं बलं तद्वतइन्द्रस्य यद्वा क्षत्रियजातीयस्ययजमानस्य अमतिं रूपनामैतत् रूपंव्रतंकर्मच अजुर्यं अजीर्णंअविरतंवा रक्षमाणौ ॥ १ ॥

अथद्वितीया—

इरा॑वती॒र्वरुण धे॒नवो॑ वां॒ मधु॑मद्वां॒ सिन्ध॑वो मित्र दुह्रे ।
त्रय॑स्तस्थुर्वृष॒भास॑स्तिसृ॒णां धि॒षणा॑नां॒ रेतो॒धा वि द्यु॒मन्तः॑ ॥ २ ॥

इरा॑वतीः । व॒रु॒ण॒ । धे॒नवः॑ । वा॒म् । मधु॑ऽमत् । वा॒म् । सिन्ध॑वः ।
मि॒त्र॒ । दु॒ह्रे॒ । त्रयः॑ । त॒स्थुः॒ । वृ॒ष॒भासः॑ । ति॒सृ॒णाम् । धि॒षणा॑नाम् ।
रे॒तः॒ऽधाः । वि । द्यु॒ऽमन्तः॑ ॥ २ ॥

हेवरुण हेमित्र वांयुवयोराज्ञया धेनवोगावः इरावतीः इराक्षीरलवणात्त-द्वत्योभवन्ति तथासिंधवः स्यंदनशीलामेघानद्योवा मधुमत् मधुरसमुदकं दुह्रे दुहन्ति तथा त्रयः त्रिसंख्याकावृषभासोवर्षितारः रेतोधाः उदकस्यधारकाः द्युमंतोदीप्तिमन्तः अग्निवाय्वा-दित्याः तिसॄणां त्रिसंख्याकानां धिषणानां स्थानानां पृथिव्यंतरिक्षद्युलोकानां स्वामिनःस-न्तः वि विविधं प्रत्येकं तस्थुस्तिष्ठन्ति युवयोरनुग्रहात्त्रयोपिदेवास्त्रिषुस्थानेषुवर्ततइत्यर्थः॥२॥

अथतृतीया—

प्रातर्देवीमदितिंजोहवीमिमध्यन्दिनउदितासूर्यस्य ।
रायेमित्रावरुणासर्वतातेळेतोकायतनयायशंयोः ॥ ३ ॥

प्रातः । देवीम् । अदितिम् । जोहवीमि । मध्यन्दिने । उत्ऽइता । सूर्यस्य । राये । मित्रावरुणा । सर्वऽताता । ईळे । तोकाय । तनयाय । शम् । योः ॥ ३ ॥

अहमृषिः प्रातः प्रातःकाले अदितिमखंडनीयां देवानांजननीं देवीं द्योतमानां जोहवीमि आह्वयामि तथामध्यन्दिने सूर्यस्य उदिता उदितौ तत्समृद्धिकाले माध्यन्दिनेसवने जोहवीमि हेमित्रावरुणा युवां राये धनप्राप्तये सर्वतातौ यज्ञे ईळे स्तौमि पुनःकिमर्थं तोकाय पुत्राय तनयाय तत्पुत्रायच शं अरिष्टशमनाय योः सुखस्यमिश्रणायच ईळइति ॥ ३ ॥

अथचतुर्थी—

याधर्तारारजसोरोचनस्योतादित्यादिव्यापार्थिवस्य ।
नवांदेवाअमृताआमिनन्तिव्रतानिमित्रावरुणाध्रुवाणि ॥४॥७॥

या । धर्तारा । रजसः । रोचनस्य । उत । आदित्या । दिव्या । पार्थिवस्य । न । वाम् । देवाः । अमृताः । आ । मिनन्ति । व्रतानि । मित्रावरुणा । ध्रुवाणि ॥ ४ ॥ ७ ॥

या यौ रोचनस्य रोचमानस्य रजसोलोकस्य स्वर्गाख्यस्येत्यर्थः उतापिच पार्थि-वस्य रजसोयायौधर्तारौ आदित्या अदितेःपुत्रौ दिव्या दिविभवौ तौ युवांईळइतिपू-

र्वतसंबन्धः हेमित्रावरुणा वांयुवयोः ध्रुवाणि व्रतानिकर्माणि देवाः अन्येइन्द्रादयः अमृताः अमरणधर्माणोपि नामिनन्ति नहिंसन्ति यतोध्रुवाणि अतइत्यभिप्रायः ॥ ४ ॥

॥ इतिचतुर्थस्यचतुर्थेसप्तमोवर्गः ॥ ७ ॥

पुरूरुणेतिचतुर्ऋचंचतुर्दशंसूक्तं उरुचक्रेरार्षं गायत्रं मैत्रावरुणं पुरूरुणागायत्रंत्वित्यनुक्रमणिका पृष्ठ्याभिप्लवषडहयोःप्रातःसवने आवापार्थत्वेनेदमपिसूक्तंपूर्वसूक्तेनसह प्रवोमित्रायेतिचतुर्णांद्वितीयमुद्धरेदितिह्युक्तं चातुर्विंशेहनिप्रातःसवनेमैत्रावरुणशस्त्रेआद्यस्तृचःषळहस्तोत्रियसंज्ञकः सूत्रितंच—पुरूरुणाचिद्ध्यस्तिप्रतिवांसूरउदितइति ।

तत्रप्रथमा—

पुरूरुणांचिद्ध्यस्त्यवोनूनंवांवरुण । मित्रवंसिवांसुमतिम् ॥ १ ॥

पुरुऽउरुणां । चित् । हि । अस्ति । अवः । नूनम् । वाम् । वरुण । मित्र । वंसि । वाम् । सुऽमतिम् ॥ १ ॥

हेमित्रावरुणौ वांयुवयोः पुरूरुणाचित् अत्र सोः सुपांसुलुगित्याकारः पुरोरपिबहुउरुबहुतरं अथवा पुरुचतदुरुचपुरूरु अत्यन्तमुरुतरमित्यर्थः तादृगवोरक्षणं नूनं निश्चयेन अस्ति हिप्रसिद्धौ चिदितिपूरणः हेवरुण हेमित्र वांयुवयोः सुमतिं अनुग्रहबुद्धिं वंसि संभजेय यस्मादवोस्तितस्माद्वंसीतिभावः ॥ १ ॥

अथद्वितीया—

तावांसम्यगद्रुह्वाणेषमश्यामधायसे । वयंतेरुद्रास्याम ॥ २ ॥

ता । वाम् । सम्यक् । अद्रुह्वाणा । इषम् । अश्याम । धायसे । वयम् । ते । रुद्रा । स्याम ॥ २ ॥

हेअद्रुह्वाणा हेअद्रोग्धारौ ता तौ प्रसिद्धौ वां युवां सम्यक्स्तुमइतिशेषः स्तोतारोवयं इषमन्नं धायसे पानाय भोजनाय अश्याम प्राप्नुयाम हेरुद्रा रुतः दुःखात् द्रावयितारौ रुदद्भिर्द्रवणीयौवा तेस्तोतारोवयं स्याम भवेम समृद्धाइतिशेषः युवाभ्यांस्वभूतावास्याम ॥ २ ॥

अथतृतीया-

पातंनोरुद्रापायुभिरुतत्रायेथांसुत्रात्रा ।
तुर्यामदस्यून्तनूभिः ॥ ३ ॥

पातम् । नः । रुद्रा । पायुऽभिः । उत । त्रायेथाम् । सुऽत्रात्रा ।
तुर्याम । दस्यून् । तनूभिः ॥ ३ ॥

हेरुद्रा उक्तरूपौ देवौ युवां नोस्मान् पायुभिः रक्षणैःपातं रक्षतं उतापिच सुत्रात्रा शोभनेनत्राणेन त्रायेथां पालयेथां इष्टप्राप्त्यनिष्टपरिहारभेदेनभेदः स्तोत्रादिवैकल्याच्छत्रोर्वा त्रायेथां अभिमतप्रापणेनरक्षतमित्यर्थः वयंच तनूभिः पुत्रादिभिःसहिताः स्वीयैरंगैर्वा दस्यून् शत्रून्तुर्याम हिंस्याम तरेमवा ॥ ३ ॥

अथचतुर्थी-

माकस्याद्भुतक्रतूयक्षंभुजेमातनूभिः ।
माशेषसामातनसा ॥ ४ ॥ ८ ।

मा । कस्य । अद्भुतक्रतूइत्यद्भुतऽक्रतू । यक्षम् । भुजेम । तनूभिः ।
मा । शेषसा । मा । तनसा ॥ ४ ॥ ८ ॥

हेअद्भुतक्रतू आश्चर्यकर्माणौ वयं कस्य अन्यस्यकस्यच नयक्षं पूजितं धनंमाभुजेम माभुंजीमहि तनूभिरस्मदीयैरवयवैः युवयोरनुग्रहात् समृद्धावयं अन्यथावयंकस्यचिद्धनेन शरीरपोषणंकुर्मइत्यर्थः तथा शेषसा अपत्येनसहितामाभुजेम तनसा पौत्रादिनासहितामाभुजेम अस्मत्कुलेनकेपिभुंजीमहीत्यर्थः ॥ ४ ॥

॥ इतिचतुर्थस्यचतुर्थेऽष्टमोवर्गः ॥ ८ ॥

आनोगन्तमितितृचात्मकंपंचदशंसूक्तं बाहुवृक्तस्यात्रेयस्यार्षं गायत्रं मैत्रावरुणं आनस्तृचंबाहुवृक्तइत्यनुक्रमणिका उक्तःसूक्तविनियोगः अग्निष्टोमेप्रातःसवनेमैत्रावरुणशस्त्रे अयमनुरूपस्तृचः सूत्रितंच-आनोमित्रावरुणाआनोगन्तंरिशादसेति ।

तत्रप्रथमा—

आनोगन्तंरिशादसावरुणमित्रबर्हणा ।
उपेमंचारुमध्वरम् ॥ १ ॥

आ । नः । गन्तम् । रिशादसा । वरुण । मित्र । बर्हणा । उप ।
इमम् । चारुम् । अध्वरम् ॥ १ ॥

हेवरुण हेमित्र हेरिशादसा शत्रूणांप्रेरकौयुवां नोस्माकमिमं चारुं चरणीयं अध्वरं अहिंसकं यज्ञमुपागन्तं उपागच्छतं कीदृशौ बर्हणा परिबर्हणौ निबर्हणौ हन्तारौशत्रूणाम् ॥१॥

अथद्वितीया—

विश्वस्यहिप्रचेतसावरुणमित्रराजथः ।
ईशानापिप्यतंधियः ॥ २ ॥

विश्वस्य । हि । प्रऽचेतसा । वरुण । मित्र । राजथः ।
ईशाना । पिप्यतम् । धियः ॥ २ ॥

हेवरुण हेमित्र हेप्रचेतसा प्रकृष्टज्ञानौयुवां विश्वस्यराजथः सर्वस्यस्वामिनौ भवथः हीति प्रसिद्धौ हेईशाना अस्माकमीश्वरौयुवां धियोस्मदीयानिकर्माणि पिप्यतं प्याययतंफलैः ॥ २ ॥

अथतृतीया—

उपनःसुतमागतंवरुणमित्रदाशुषः ।
अस्यसोमस्यपीतये ॥ ३ ॥ ९ ॥

उप । नः । सुतम् । आ । गतम् । वरुण । मित्र ।
दाशुषः । अस्य । सोमस्य । पीतये ॥ ३ ॥ ९ ॥

नोस्माकं सुतमभिषुतं सोमंप्रति हेवरुण हेमित्र युवां उपागतं उपागच्छतं दाशुषोहविर्दातुर्ममास्यसोमस्य पीतये पानाय ॥ ३ ॥

॥ इतिचतुर्थस्यचतुर्थेनवमोवर्गः ॥ ९ ॥

आमित्रेवरुणइतितृचात्मकंषोडशंसूक्तं बाहुवृक्तस्यार्षमौष्णिहं मैत्रावरुणं आमित्रऔ-ष्णिहमित्यनुक्रमणिका दशरात्रेतृतीयेहनिप्रउगशस्त्रेअयंमैत्रावरुणस्यतृचः सूत्रितंच—आमि-त्रेवरुणेवयमश्विनावेहगच्छतमिति ।

तत्रप्रथमा—

आमित्रेवरुणेवयंगीर्भिर्जुहुमोअत्रिवत् ।
निबर्हिषिसदतंसोमपीतये ॥ १ ॥

आ । मित्रे । वरुणे । वयम् । गीःऽभिः । जुहुमः । अत्रिऽवत् ।
नि । बर्हिषि । सदतम् । सोमऽपीतये ॥ १ ॥

वयमात्रेयाः मित्रवरुणे मित्रावरुणयोरर्थाय गीर्भिर्मन्त्रैराजुहुमः अत्रिवत् अस्मद्गोत्र-प्रवर्तकोत्रिरिव तस्मात् मित्रावरुणौ सोमपीतये बर्हिषिनिषदतं निषीदतम् ॥ १ ॥

अथद्वितीया—

व्रतेनस्थोध्रुवक्षेमाधर्मणायातयज्जना ।
निबर्हिषिसदतंसोमपीतये ॥ २ ॥

व्रतेन । स्थः । ध्रुवऽक्षेमा । धर्मणा । यातयत्ऽजना ।
नि । बर्हिषि । सदतम् । सोमऽपीतये ॥ २ ॥

हेमित्रावरुणौ युवां धर्मणा जगद्धारकेण व्रतेन कर्मणायोगेन ध्रुवक्षेमा स्थः अवि-चलितस्थानौभवथः यातयज्जनौ यातयन्तः कर्मसुप्रवर्तयन्तोजनाऋत्विजोययोस्तौयातयज्जनौ अथवा यातयन्तोशत्रून्हिंसन्तोजनाभृत्याययोस्तौ शिष्टंगतम् ॥ २ ॥

अथतृतीया—

मित्रश्चनोवरुणश्चजुषेतांयज्ञमिष्टये ॥
निबर्हिषिसदतांसोमपीतये ॥ ३ ॥ १० ॥

मित्रः । च । नः । वरुणः । च । जुषेताम् । यज्ञम् । इष्टये ।
नि । बर्हिषि । सदताम् । सोमऽपीतये ॥ ३ ॥ १० ॥

मित्रश्चवरुणश्चोभौ नोस्माकं यज्ञमिष्टये अभीष्टाय जुषेतां सेवेतां आगत्यच बर्हिषि निषदतं निषीदतं सोमपानाय ॥ ३ ॥

॥ इतिचतुर्थस्यचतुर्थेदशमोवर्गः ॥ १० ॥

॥ इतिपंचमेमंडलेपंचमोनुवाकः ॥ ५ ॥

षष्ठेनुवाकेपंचदशसूक्तानि तत्रयदद्यस्थइतिदशर्चंप्रथमंसूक्तं आत्रेयस्यपौरनाम्नआर्षं आनुष्टुभमाश्विनं अनुक्रान्तंच—यदद्यदशपौरआश्विनंतदानुष्टुभंत्विति । तदित्युक्तत्वादिदमादी-निषदूसूक्तान्याश्विनानि आनुष्टुभंत्वितितुशब्दादिदमुत्तरंचद्वेआनुष्टुभे प्रातरनुवाके आश्विने क्रतौ आनुष्टुभेछन्दसि आश्विनशस्त्रेचेदमादिकेद्वेसूक्ते यदद्यस्थइतिसूक्तेइतिसूत्रितम् ।

तत्रप्रथमा—

यदद्यस्थःपरावतियदर्वावत्यश्विना ।
यद्वांपुरूपुरुभुजायदन्तरिक्षआगतम् ॥ १ ॥

यत् । अद्य । स्थः । पराऽवति । यत् । अर्वाऽवति । अश्विना ।
यत् । वा । पुरु । पुरुऽभुजा । यत् । अन्तरिक्षे । आ । गतम् ॥१॥

हेपुरुभुजा बहुषु यज्ञेषु भोक्तारौ अधिकं रक्षितारौवा हेअश्विना अश्विनौ यद्यदि अद्या-स्मिन्काले परावति अत्यंतंदूरेदेशे द्युलोके स्थोभवथः यद्वा अर्वावति अरणवति गन्तुंशक्येप्रदेशे अन्तिकेस्थः यत् यदिवा अथवा पुरु बहु प्रदेशेषुस्थः यद्यदि अन्तरिक्षेस्थः तस्मात्सर्वस्मा-दद्यागतं आगच्छतम् ॥ १ ॥

अथद्वितीया—

इहत्यापुरुभूतमापुरूदंसांसिबिभ्रता ।
वरस्यायाम्यध्रिगूहुवेतुविष्टमाभुजे ॥ २ ॥

इह । त्या । पुरुऽभूतमा । पुरु । दंसांसि । बिभ्रता । वरस्या ।
यामि । अध्रिगूइत्यध्रिऽगू । हुवे । तुविःऽतमा । भुजे ॥ २ ॥

इहास्मिन्यज्ञे त्या तौ पुरुभूतमा पुरूणां बहूनां यजमानानां भावयितृतमौ पुरु पुरूणि दंसांसि कर्माणि बिभ्रता धारयन्तौ वरस्यावरणीयौ अध्रिगू अन्यैरधृतगमनकर्माणौ यामि उपागच्छामि तुविष्टमा प्रभूततमौ भुजे भोगाय पालनायवा हुवे आह्वयामि ॥ २॥

अथतृतीया—

ई॒र्मान्यद्वपु॑षे॒ वपु॑श्च॒क्रं रथ॑स्य येमथुः ।
पर्य॒न्या नाहु॑षा यु॒गा म॒ह्ना रजां॑सि दीयथः ॥ ३ ॥

ई॒र्मा । अ॒न्यत् । वपु॑षे । वपुः॑ । च॒क्रम् । रथ॑स्य । ये॒म॒थुः॒ । परि॑ ।
अ॒न्या । नाहु॑षा । यु॒गा । म॒ह्ना । रजां॑सि । दी॒य॒थः॒ ॥ ३ ॥

हेअश्विनौ युवां रथस्ययुष्मदीयस्यान्यच्चक्रं ईर्मा अर्तेरीर्मेतिरूपं गंतर्यादित्ये वपुषे तस्यशोभायै वपुर्वपुष्मत् तेजोवतच्चक्रंयेमथुः नियमितवन्तौस्थः अन्या अन्येनचक्रेण मह्ना महत्त्वेन स्वसामर्थ्येन नाहुषायुगा नहुषामनुष्याः तेषांयुगा युगोपलक्षितान्कालान् प्रातरादिसवनान् अहोरात्रादिकालान्वा रजांसि लोकांश्च परिगच्छथः परिदीयथः न्यघ्न्यस्यमूर्धनिचक्रंरथस्ययेमथुरित्युक्तम् ॥ ३ ॥

अथचतुर्थी—

तदू॒ षु वा॑मे॒ना कृ॒तं विश्वा॒ यद्वा॒मनु॒ ष्टवे॑ ।
नाना॑ जा॒ताव॑रे॒पसा॒ सम॒स्मे बन्धु॒मेय॑थुः ॥ ४ ॥

तत् । ऊँ इति॑ । सु । वा॒म् । ए॒ना । कृ॒तम् । विश्वा॑ । यत् ।
वा॒म् । अनु॑ । स्तवे॑ । नाना॑ । जा॒तौ । अ॒रे॒पसा॑ । सम् ।
अ॒स्मे इति॑ । बन्धु॑म् । आ । ई॒य॒थुः॒ ॥ ४ ॥

हेविश्वाव्याप्तौ यत् येनस्तोत्रेणवां युवां अनुष्टवे अनुस्तवे तदु उइतिपूरणः एना अनेनपौरेण सु सुष्टुवां युवाभ्यां कृतं संपादितंभवतु नाना पृथगेव जातौ समृद्धौ अरेपसा अपापौ अस्मे अस्मभ्यं बन्धुं अन्नंधनंवा समेयथुः सम्यग्गमयथः सम्यक्प्रयच्छतमित्यर्थः ॥ ४ ॥

अथपंचमी—

आ यद्वां॑ सू॒र्या रथं॒ तिष्ठ॑द्रघु॒ष्यदं॒ सदा॑ ।
परि॑ वामरु॒षा वयो॑ घृ॒णा व॑रन्त आ॒तपः॑ ॥ ५ ॥ ११ ॥

---

१ ऋ० सं० १. २. ३१. ।

अथदशमी–

इमाब्रह्माणिवर्धनाश्विभ्यांसन्तुशन्तमा ।
यातक्षामरथाँइवावोचामबृहन्नमः ॥ १० ॥ १२ ॥

इमा । ब्रह्माणि । वर्धना । अश्विऽभ्याम् । सन्तु । शम्ऽतमा ।
या । तक्षाम । रथान्ऽइव । अवोचाम । बृहत् । नमः ॥१०॥१२॥

अथस्तुतिंनिगमयति इमा इमानीदानींकृतानि ब्रह्माणि परिवृढानि स्तोत्राणि अश्विभ्यां वर्धना वर्धनानि समर्धकानि शंतमा सुखतमानिसन्तु या यानि तक्षाम संपादयाम रथानिवशिल्पी तद्वत्तक्षाम तानिसुखतमानिसन्तु वयं बृहत्प्रभूतं प्रभूतफलप्रदं नमोनमस्कारोक्तिमवोचाम ॥ १० ॥

॥ इतिचतुर्थस्यचतुर्थेद्वादशोवर्गः ॥ १२ ॥

कूष्ठइतिदशर्चंद्वितीयंसूक्तं पौरस्यार्षं कूष्ठइत्यनुक्रमणिका पूर्वत्रतुशब्दादिदमप्यानुष्टुभं आश्विनं तदितिपूर्वोक्तत्वात् प्रातरनुवाकाश्विनशस्त्रयोःपूर्वसूक्तेनसहोक्तोविनियोगः ।

तत्रप्रथमा–

कूष्ठोदेवावश्विनाद्याद्वियोमनावसू ।
तच्छ्रवथोवृषण्वसूअत्रिर्वामाविवासति ॥ १ ॥

कूऽस्थः । देवौ । अश्विना । अद्य । दिवः । मनावसू इति ।
तत् । श्रवथः । वृषण्वसू इति वृषण्ऽवसू । अत्रिः । वाम् । आ ।
विवासति ॥ १ ॥

हेदेवौ हेमनावसू स्तुतिधनौ श्रृणुथःअश्विनाद्यास्मिन्यागदिनेदिवोद्युलोकादागत्य कूष्ठः व्यत्ययेनैकवचनं कौ भूमौ तिष्ठन्तौ सन्तौ तत्स्तोत्रं श्रवथः हेवृषण्वसू वर्षकधनौवां अत्रिरत्रेःपुत्रः आविवासति सर्वतःपरिचरति अथवा कुइत्यस्यनिपातस्यस्थइत्याख्यातेन सहेतियोगविभागात्समासः ऐकस्वर्यंचाध्येतृसमयप्राप्तं अराइवेत्यत्र यथाइवशब्दःकूचिज्जायते कूचित्सन्तमित्यादिवदत्रापिद्रष्टव्यं क्वस्थितौभवथः अत्रिर्युवांस्तौति तंश्रृणुथेत्यर्थः ॥१॥

अथद्वितीया—

कुहत्याकुहनुश्रुतादिविदेवानासत्या ।
कस्मिन्नायतथोजनेकोवांनदीनांसचा ॥ २ ॥

कुहं । त्या । कुहं । नु । श्रुता । दिवि । देवा । नासत्या । कस्मिन् ।
आ । यतथः । जने । कः । वाम् । नदीनाम् । सचा ॥ २ ॥

त्या तौ देवा देवौ नासत्या अश्विनौ कुह कुत्रतिष्ठथः नु अद्य कुहश्रुता कुत्रश्रुतौ दिवि द्युलोकेनिवसतइतिशेषः अथप्रत्यक्षकृतः हेदेवौ युवां कस्मिन् जने यजमाने आयतथः आगच्छथः कःस्तोता वांयुवयोर्नदीनांस्तुतीनां सचा सहायः स्यात् ॥ २ ॥

अथतृतीया—

कंयाथःकंहगच्छथःकमच्छायुञ्जाथेरथम् ।
कस्यब्रह्माणिरण्यथोवयंवामुश्मसीष्टये ॥ ३ ॥

कम् । याथः । कम् । ह । जग्मथः । कम् । अच्छ । युञ्जाथे इति ।
रथम् । कस्य । ब्रह्माणि । रण्यथः । वयम् । वाम् । उश्मसि । इष्टये ॥ ३ ॥

हेअश्विनौ युवां कं यजमानं यज्ञंवा प्रतियाथः अध्वानमुल्लंघ्ययाथः कंहकंच प्रतिगच्छथः गत्वाच केनसह संगतौभवथः कंचाच्छाभिप्राप्तुंयुंजाथे योजयथोरथमश्वैः कस्यब्रह्माणि परिवृढानि स्तोत्राणि रण्यथः रमेथे वयंच वांयुवां इष्टये गमनायएषणायवा उश्मसि कामयामहे तस्मात्कस्यचयागंप्रतिनगन्तव्यमित्यर्थः ॥ ३ ॥

अथचतुर्थी—

पौरंचिद्ध्युदप्रुतंपौरपौरायजिन्वथः ।
यदींगृभीततातयेसिंहमिवद्रुहस्पदे ॥ ४ ॥

पौरम् । चित् । हि । उदऽप्रुतम् । पौरं । पौराय । जिन्वथः ।
यत् । ईम् । गृभीतऽतातये । सिंहम्ऽइव । द्रुहः । पदे ॥ ४ ॥

हेपौर इदमश्विनोःसंबोधनं पौरेणस्तुत्यत्वेनसंबन्धादश्विनावपिपौरौ उभयोश्छा-न्दसमेकवचनं हेपौरसंबन्धिनावश्विनौ युवांपौरं चिदितिपूरणः पौरेणवृष्ट्यर्थंप्रार्थ्यमान-त्वेनसंबन्धान्मेघोपिपौरः तं उदप्रुतं उदकप्लावकंमेघं पौरायऋषयेमह्यं जिन्वथः प्रेरयथः यद्यौयुवां ईमितिपूरणः गृभीततातये गृहीतयज्ञसन्तानाय पौराय ईमेनंमेघं प्रतिग-च्छथः द्रुहः द्रोहस्य पदे स्थाने अरण्यदेशे सिंहमिवगर्जन्तं प्रबलंसिंहंयथाबलात्च्या-वयन्तिशूराःतद्वज्जिन्वथइति ॥ ४ ॥

अथपंचमी—

प्रच्यवा॑नाज्जुजुरुषो॑व॒व्रिमत्कं॒नमु॑ञ्चथः ।
यु॒वा॒यदी॑कृ॒थःपु॒नराका॒मम॑ृण्वेव॒ध्वं॑ः ॥ ५ ॥ १३ ॥

प्र । च्यवा॑नात् । जु॒जु॒रुषः॑ । व॒व्रिम् । अत्क॑म् । न । मु॒ञ्च॒थः॒ । युवा॑ । यदि॑ । कृ॒थः । पुन॑ः । आ । काम॑म् । ऋ॒ण्वे॒ । व॒ध्वं॑ः ॥ ५ ॥ १३ ॥

च्यवानादृषेः जुजुरुषोजरसाजीर्णात्सकाशाद्वव्रिं हेयं पुराणं रूपं अत्कंन कवचमिव प्र-मुंचथः प्रमुंचतं प्रामुंचतं द्रापिमिवच्यवानादित्यादिमंत्रान्तरं । यदि यदा पुनःयुवाकृथः युवानं कुरुथइत्यर्थः तदावध्वः सुरूपायाःस्त्रियः कामं कमनीयंरूपमाऋण्वे प्राप्तवान् ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेत्रयोदशोवर्गः ॥ १३ ॥

अथषष्ठी—

अस्ति॒हिवा॑मि॒हस्तो॒तास्मसि॑वां॒संदृशि॑श्रि॒ये ।
नू॒श्रु॒तंम॒आग॑त॒मवो॑भिर्वाजिनीवसू ॥ ६ ॥

अस्ति॑ । हि । वा॒म् । इ॒ह । स्तो॒ता । स्मसि॑ । वा॒म् । स॒म्ऽदृशि॑ । श्रि॒ये । नु । श्रु॒तम् । मे॒ । आ । ग॒तम् । अव॑ःऽभिः । वा॒जि॒नी॒व॒सू॒इतिवा॒जिनी॑ऽवसू ॥ ६ ॥

हेअश्विनौ वांस्तोता पौरोस्तिहि वर्ततेखलु हेदेवौ वांसंदृशि संदर्शने संनिधाने स्मसि स्मः भवेम किमर्थं श्रिये नु अद्य मदीयमाह्वानं श्रुतं शृणुतं श्रुत्वा आगतं आगच्छतं किंतूष्णीं नेत्याह अवोभीरक्षणैःसह वाजिनीवसू अन्नवसू ॥ ६ ॥

---

१ ऋ० सं० १. ८. ९.।

अथसप्तमी–

कोवामद्यपुरूणामावव्ने मर्त्यानाम् ।
कोविप्रोविप्रवाहसाकोयज्ञैर्वाजिनीवसू ॥ ७॥

कः । वाम् । अद्य । पुरूणाम् । आ । वव्ने । मर्त्यानाम् । कः । विप्रः ।
विप्रऽवाहसा । कः । यज्ञैः । वाजिनीवसूइतिवाजिनीऽवसू ॥ ७ ॥

हेवाजिनीवसू अन्नवसू वांयुवां अद्यास्मिनदिने पुरूणां मर्त्यानांमध्ये कआवव्ने सर्वतो-भजति हेविप्रवाहसा विप्रैर्मेधाविभिर्वहनीयौ कोविप्रोमेधावीवव्ने कोयजमानोयज्ञैर्वव्ने अत्यन्त-विलंबमसहमानःसन् पुनःपुनर्ब्रूते ॥ ७ ॥

अथाष्टमी–

आवांरथोरथानांयेष्ठोयात्वश्विना ।
पुरूचिदस्मयुस्तिरआङ्गूषोमर्त्येष्वा ॥ ८ ॥

आ । वाम् । रथः । रथानाम् । येष्ठः । यातु । अश्विना ।
पुरु । चित् । अस्मऽयुः । तिरः । आङ्गूषः । मर्त्येषु । आ ॥ ८ ॥

हेअश्विना अश्विनौ वांयुवयोरथःएकोरथः रथानांयेष्ठः इतरदेवरथानांमध्येतिश-येनगन्तासन् आयातु कीदृशःसन् पुरूचिद्बहून्यपि अस्मद्विरोधिनस्तिरोहिंसकस्तिरस्क-र्तावा अस्मयुः अस्मान्कामयमानः मर्त्येषु सर्वेषुयजमानेषु मध्येआंगूषः स्तुत्यः आका-रःपूरणः अथवा आंगूषःस्तोमःस्तवः अस्मयुः अस्मान् बलैर्योक्तुंकामयमानः मर्त्येषुम-र्त्यैरस्मदीयैर्ऋत्विग्भिःप्रेरितःसन् उक्तलक्षणाश्विनोरथस्यवास्तुतिरासर्वतः पुरूचित् पुरू-ण्यपिशत्रुबलानितिरस्तिरस्करोति ॥ ८ ॥

अथनवमी–

शमूषुवांमधूयुवास्माकमस्तुचर्कृतिः ।
अर्वाचीनाविचेतसाविभिःश्येनेवदीयतम् ॥ ९ ॥

शम् । ऊँ इति । सु । वाम् । मधुऽयुवा । अस्माकम् । अस्तु । चर्कृतिः ।
अर्वाचीना । विऽचेतसा । विऽभिः । श्येनाऽइव । दीयतम् ॥ ९ ॥

हेमधूयुवा मधुमन्तौ वांयुवाभ्यां चर्कृतिः पुनःपुनःकरणं युवाभ्यां अर्थाय पुनः पुनः क्रियमाणंस्तोत्रं युवयोरागमनस्याभ्यासोवा अस्माकं सु सुष्ठु शमु सुखकरमेव अस्तु भवतु हेअर्वाचीना अर्वागस्मदभिमुखांचनौ हेविचेतसा विशिष्टमज्ञौ श्येनेव श्येनाविव विभिर्गन्तृभिरभीशुभिर्दीयतं गच्छतं ॥ ९ ॥

अथदशमी—

अश्विनायद्धकर्हिचिच्छुश्रूयातमिमंहवम् ।
वस्वीरूषुवांभुजःपृञ्चन्तिसुवांपृचः ॥ १० ॥ १४ ॥

अश्विना । यत् । ह । कर्हि । चित् । शुश्रुयातम् । इमम् । हवम् । वस्वीः । ऊँ इति । सु । वाम् । भुजः । पृञ्चन्ति । सु । वाम् । पृचः ॥१०॥ १४॥

हेअश्विना युवां यद्ध यत्र कर्हिचित्स्थितवन्तौभवथः तत्र मे हवं आह्वानं शुश्रुयातं शृणुतं श्रुत्वागच्छतमित्यर्थः किमर्थमिति उच्यते वस्वीः मशस्याः भुजोधनानि हविर्लक्षणानि सु सुष्ठु वांयुवांपृंचन्ति मिश्रयन्तिप्राप्नुवन्ति उइतिपूरणः कीदृश्योभुजः वां युवां सु सुष्ठु पृचः संपर्चनाः युवांप्राप्तुं कामयमानाइत्यर्थः अथवा सुपृचः सुसंपर्चनाः स्तोतारोवस्वीर्भुजोवां सुष्ठुपृंचन्ति संपर्चयन्ति ॥ १० ॥

॥ इतिचतुर्थस्यचतुर्थेचतुर्दशोवर्गः ॥ १४ ॥

प्रतिप्रियतममितिनवर्चंतृतीयंसूक्तं अवस्युर्नामात्रेयऋषिः पंक्तिश्छन्दः अश्विनौदेवता अनुक्रान्तंच—प्रतिनवावस्युःपांक्तमिति । प्रातरनुवाकेआश्विनेक्रतौपांक्तेछन्दसि आश्विनशस्त्रेचेदंसूक्तं प्रतिप्रियतममितिपांक्तमितिहिसूत्रितम् ।

तत्रप्रथमा—

प्रतिप्रियतमंरथंवृषणंवसुवाहनम् ।
स्तोतावामश्विनावृषिःस्तोमेनप्रतिभूषतिमाध्वीममश्रुतंहवम् ॥ १ ॥

प्रति । प्रियऽतमम् । रथम् । वृषणम् । वसुऽवाहनम् । स्तोता । वाम् । अश्विनौ । ऋषिः । स्तोमेन । प्रति । भूषति । माध्वी इति । मम । श्रुतम् । हवम् ॥ १ ॥

हेअश्विनौ एकःप्रतिशब्दोनुवादः वां युवयोः प्रियतमंरथं स्तोताऋषिरवस्युः स्तोमेनप्रतिभूषति अलंकरोति कीदृशंरथं वृषणं वर्षितारंफलानां वसुवाहनं धनानांवाहकं ईदृशंरथं आगमनायस्तौतीत्यर्थः तस्मात् हेमाध्वी मधुविद्यावेदितारौ मम हवमाह्वानं श्रुतं शृणुतं ॥ १ ॥

अथद्वितीया–

अत्यायांतमश्विनातिरोविश्वांअहंसनां ।
दस्राहिरंण्यवर्तनीसुषुंम्रासिन्धुंवाहसामाध्वीममंश्रुतंहवंम् ॥२॥

अतिऽआयांतम् । अश्विना । तिरः । विश्वाः । अहम् । सनां ।
दस्रां । हिरंण्यवर्तनीइति हिरंण्यऽवर्तनी । सुऽसुंम्ना । सिन्धुंऽवाहसा ।
माध्वीइति । ममं । श्रुतम् । हवंम् ॥ २ ॥

हेअश्विना अत्यायातं सर्वान्यजमानानतिक्रम्यागच्छतं यथाअहमृषिर्विश्वाः सर्वाः अस्मद्विरोधिप्रजाः सना सदातिरस्करोमि अथवा अहं तिरः तिरःसतइतिप्राप्तस्येतिनिरुक्तं । प्राप्ताःसर्वाःविश्वाःक्रियाःयुष्मदीयाअनुतिष्ठेयमित्यर्थः सना सनातनौ दस्रा शत्रूणामुपक्षपयितारौ हिरण्यवर्तनी हिरण्यरथौ सुषुम्ना सुधनौ सिन्धुवाहसा नदीनांप्रवाहयितारौ वृष्टिप्रेरणेन तादृशौयुवां अत्यायातं ॥ २ ॥

अथतृतीया–

आनोरत्नांनिबिभ्रंतावश्विनागच्छंतंयुवम् ।
रुद्राहिरंण्यवर्तनीजुषाणावाजिनीवसूमाध्वीममंश्रुतंहवंम् ॥३॥

आ । नः । रत्नांनि । बिभ्रंतौ । अश्विना । गच्छंतम् । युवम् ।
रुद्रां । हिरंण्यवर्तनीइतिहिरंण्यऽवर्तनी । जुषाणा । वाजिनीवसूइतिवाजिनीऽवसू । माध्वीइति । ममं । श्रुतम् । हवंम् ॥ ३ ॥

हेअश्विना नोस्मभ्यं रत्नानि रमणीयानिधनानि बिभ्रतौ धारयन्तौ युवं युवां नोस्मान् वा आगच्छतं हेरुद्रा रुद्रपुत्रौ स्तुत्यौवा हेवाजिनीवसू वाजिनधनौ युवां हिरण्यवर्तनी हिरण्यरथौ जुषाणा यज्ञंसेवमानौसन्तावागच्छतमिति माध्वीत्यादिगतं ॥ ३ ॥

---

१ नि० ३. २०.।

अथचतुर्थी—

सुष्टुभोवांवृषण्वसूरथेवाणीच्याहिता ।
उतवांककुहोमृगःपृक्षःकृणोतिवापुषोमाध्वीममश्रुतंहवम् ॥ ४ ॥

सुऽस्तुभः । वाम् । वृषण्वसू इति वृषण्ऽवसू । रथे । वाणीची । आऽहिता । उत । वाम् । ककुहः । मृगः । पृक्षः । कृणोति । वापुषः । माध्वी इति । मम । श्रुतम् । हवम् ॥ ४ ॥

हेवृषण्वसू वर्षधनौ वर्षितारौवा वसूनां हेअश्विनौ सुष्टुभः सुस्तोतुर्मम वाणीची वाग्रूपास्तुतिः वांयुवयोः रथेआहिता स्थापिता अस्माभिःकृतेत्यर्थः उतापिच वांयुवाभ्यां ककुहो-महान् मृगः मृगयितः वापुषोवपुष्मान् यजमानः पृक्षोन्नंहविः कृणोति करोति तस्मान्ममहवं श्रुतमिति ॥ ४ ॥

अथपंचमी—

बोधिन्मनसारथ्येषिराहवनश्रुता ।
विभिश्च्यवानमश्विनानियाथोअद्वयाविनंमाध्वीममश्रुतंहवम् ॥ ५ ॥ १५ ॥

बोधित्ऽमनसा । रथ्या । इषिरा । हवनऽश्रुता । विऽभिः । च्यवानम् । अश्विना । नि । याथः । अद्वयाविनम् । माध्वी इति । मम । श्रुतम् । हवम् ॥ ५ ॥ १५ ॥

हेअश्विना बोधिन्मनसा बुध्यमानमनस्कौ रथ्या रथस्वामिनौ इषिरा शीघ्रग-न्तारौ सर्वैर्गन्तव्यौवा हवनश्रुता हवनस्यस्तुतेः श्रोतारौयुवां विभिरश्वैः च्यवानमृषिं अद्वयाविनं मायारहितं नियाथः यथातमृषिंप्राप्तवन्तौ तद्वन्मांप्रति पथिनियाथः नित-रामागच्छतं मच्यवानाज्जुजुरुषोवव्रिमितिर्युक्तम् ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेपंचदशोवर्गः ॥ १५ ॥

१ ऋ० सं० ४. ४. ११.।

अथषष्ठी—

आवांनरामनोयुजोश्वांसःप्रुषितप्सवः ।
वयोवहन्तुपीतयेसहसुम्नेभिरश्विनामाध्वीममश्रुतंहवम् ॥ ६ ॥

आ । वाम् । नरा । मनःऽयुजः । अश्वांसः । प्रुषितऽप्सवः । वयः । वहन्तु । पीतये । सह । सुम्नेभिः । अश्विना । माध्वी इति । मम । श्रुतम् । हवम् ॥ ६ ॥

हेनरा कर्मणांनेतारौ हेअश्विना अश्विनौ वां युवां मनोयुजोमनोमात्रेणयुज्यमानाः सुशिक्षिताइत्यर्थः प्रुषितप्सवः विचित्ररूपाः वयः शीघ्रगन्तारः अश्वासोश्वाः आवहन्तु पीतये सोमपानाय सुम्नेभिःसह अस्मभ्यंदेयैः सुखैस्तत्साधनैर्धनादिभिर्वासह वहन्तु ॥ ६ ॥

अथसप्तमी—

अश्विनावेहगच्छतंनासत्यामाविवेनतम् ।
तिरश्चिदर्यायापरिवर्तिर्यातमदाभ्यामाध्वीममश्रुतंहवम् ॥ ७ ॥

अश्विनौ । आ । इह । गच्छतम् । नासत्या । मा । वि । वेनतम् ।
तिरः । चित् । अर्यऽया । परि । वर्तिः । यातम् । अदाभ्या ।
माध्वीइति । मम । श्रुतम् । हवम् ॥ ७ ॥

हेअश्विना अश्विनौ इहास्मिन्यज्ञे आगच्छतं हेनासत्या माविवेनतं विगतकामौमाभवतं वेनतिःकान्तिकर्मा हेअदाभ्या अहिंस्यौपूज्यौ अर्यया अर्यौस्वामिनौयुवां(सुपांसुलुगित्यादिना सुपोयाजादेशः) तिरश्चित् अन्तर्हितादूरदेशादपि युवांवर्तिरस्मद्यज्ञगृहं परियातं आगच्छतं ॥ ७ ॥

अथाष्टमी—

अस्मिन्यज्ञेअदाभ्याजरितारंशुभस्पती ।
अवस्युमश्विनायुवंगृणन्तमुपभूषथोमाध्वीममश्रुतंहवम् ॥८॥

अस्मिन् । यज्ञे । अदाभ्या । जरितारम् । शुभः । पती इति ।
अवस्युम् । अश्विना । युवम् । गृणन्तम् । उप । भूषथः ।
माध्वी इति । मम । श्रुतम् । हवम् ॥ ८ ॥

हेअदाभ्या अहिंस्यौ हेशुभस्पती उदकस्यस्वामिनौ अश्विना युवं युवां अस्मिन्यज्ञे जरितारं स्तोतारं अवस्युं गृणन्तंस्तुवन्तंमां उपभूषथः उपप्रामुतम् ॥ ८ ॥

अथनवमी—

अभूदुषारुशत्पशुराग्निरधाय्यृत्वियः ।
अयोजिवांवृषण्वसूरथोदस्रावमर्त्योमाध्वीममश्रुतंहवम् ॥ ९॥१६॥

अभूत् । उषाः । रुशत्ऽपशुः । आ । अग्निः । अधायि ।
ऋत्वियः । अयोजि । वाम् । वृषण्वसू इति वृषण्ऽवसू । रथः ।
दस्रौ । अमर्त्यः । माध्वी इति । मम । श्रुतम् । हवम् ॥ ९ ॥ १६ ॥

उषाः व्युष्टिरभूत् अग्निश्च रुशत्पशुः दीप्तपशुमान् प्रकाशितहविरित्यर्थः अथवा पशवः किरणाः रुशद्रश्मिःसन् अधायि वेद्यामधीयत हेवृषण्वसू प्रदत्तधनौ हेदस्रौ वांयुवयोः अमर्त्यःअमरणधर्मा ध्रुवोरथोयोजि अश्वैर्युक्तोभवत्वित्यर्थः छन्दसिलुङ्लङ्लिटइतिअनेकेष्वर्थेषुलुङ्भवति इहप्रार्थनायां)माध्वीत्यादिगतं ॥ ९ ॥

॥ इतिचतुर्थस्यचतुर्थेषोडशोवर्गः॥ १६॥

आभात्यग्निरितिपंचर्चंचतुर्थसूक्तं भौमस्यात्रेरार्षं त्रैष्टुभमाश्विनं अत्रानुक्रमणिका—आभातिपंचात्रिरिति । प्रवर्ग्येअभिष्टवार्थमिदंसूक्तं सूत्रितंच—आभात्यग्निर्ग्रावाणेवेति । प्रातरनुवाके आश्विनेक्रतौ त्रैष्टुभेछन्दसि आश्विनशस्त्रेच इदमादिकेद्वेसूक्ते सूत्र्यतेहि—आभात्यग्निरितिसूक्तेइति । अप्तोर्यामेहोतुरतिरिक्तोक्थ्येइदंसूक्तं सूत्रितंच—आभात्यग्निःक्षेत्रस्यपतिनावयमितिपरिधानीयेति ।

तत्रप्रथमा—

आभात्यग्निरुषसामनीकमुद्विप्राणांदेवयावाचोअस्थुः ।
अर्वाञ्चानूनंरथ्येहयातंपीपिवांसमश्विनाघर्ममच्छ ॥ १ ॥

आ । भाति । अग्निः । उषसाम् । अनीकम् । उत् । विप्राणाम् ।
देवऽयाः । वाचः । अस्थुः । अर्वाञ्चा । नूनम् । रथ्या । इह ।
यातम् । पीपिऽवांसम् । अश्विना । घर्मम् । अच्छ ॥ १ ॥

उषसामनीकं अनीकभूतः अनीकं सुखं उषसिप्रबुध्यमानइत्यर्थः तादृशोग्निराभातिदी-
प्यते यद्वा उषसांमुखमाभातिदीपयति उषःकालेह्यग्नयःप्रतिबोध्यन्ते किंच विप्राणां मेधावि-
नां स्तोतॄणां देवयाः देवकामाः वाचः स्तोत्राणि उदस्थुः उत्तिष्ठन्ति यस्मादेवंतस्माद् हेर-
थ्या रथस्वामिनौ अश्विना अश्विनौ अर्वांचा अस्मदभिमुखांचनौ नूनं अद्यास्मिन्यागदिने
इहायातं कंप्रति पीपिवांसं स्वांगैःपरिवृढं घर्मं प्रदीप्तंयज्ञं यद्वा पीपिवांसं आप्यायितं वसती-
वरीभिः क्षरद्रूपंसोमरसं अथवा घृतादिनापीपिवांसंघर्मंप्रवर्ग्यं अच्छ अभिलक्ष्य इहयागे
आयातं प्रवर्ग्येऽस्यसूक्तस्यविनियोगः ॥ १ ॥

अथद्वितीया—

नसंस्कृतंप्रमिमीतोगमिष्ठान्तिनूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेवसागमिष्ठाप्रत्यवर्तिंदाशुषेशंभविष्ठा ॥ २ ॥

न । संस्कृतम् । प्र । मिमीतः । गमिष्ठा । अन्ति । नूनम् ।
अश्विना । उपऽस्तुता । इह । दिवा । अभिऽपित्वे । अवसा ।
आऽगमिष्ठा । प्रति । अवर्तिम् । दाशुषे । शम्ऽभविष्ठा ॥ २ ॥

हेअश्विनौ संस्कृतंघर्मं नप्रमिमीतः नहिंस्तां किंतु अन्ति अन्तिके घर्मसमीपे नूनमिदानीं
इहयज्ञे गमिष्ठा गन्तृतमौअश्विना अश्विनौ उपस्तुता उपस्तुतौभवतः दिवाभिपित्वे दिवसस्या-
भिपतनेप्रातःकाले अवसा रक्षणेनसहागमिष्ठा आगन्तृतमौ अवर्तिंप्रतिद्वंद्वभूतौ वर्तिर्जीवनं तद-
भावोवर्तिः तद्रहितमन्नंयथाभवति तथा आगन्तृतमौ आगत्यच दाशुषे हविर्दत्तवतेयजमाना-
य शंभविष्ठा सुखस्यभावयितारौभवतं ॥ २ ॥

अथतृतीया—

उतायातंसङ्गवेप्रातरह्नोमध्यन्दिनउदितासूर्यस्य ।
दिवानक्तमवसाशंतमेननेदानींपीतिरश्विनाततान ॥ ३ ॥

उत । आ । यातम् । सम्ऽगवे । प्रातः । अह्नः । मध्यन्दिने ।
उत्ऽइता । सूर्यस्य । दिवा । नक्तम् । अवसा । शम्ऽतमेन ।
न । इदानीम् । पीतिः । अश्विना । आ । ततान ॥ ३ ॥

अह्नोद्वेधा त्रेधा पंचदशधेतिसमानाविभागाःसन्ति इहपंचधाविभागआत्तः उतापिचायात-मागच्छतं कदा संगवे संगवकाले संगच्छते गावोदोहनभूमिंयस्मिन्कालेससंगवःरात्र्यपरकाले-हिगावोवनेहिमतृणानिभक्षयित्वा पुनर्दोहाय संगवे प्रतिनिवर्तन्ते तथा प्रातः प्रातःकालेपि तथामध्यंदिने अह्नोमध्यकाले सूर्यस्यउदिताउदितौ अभ्युदये अत्यन्तप्रवृद्धसमये अपराह्ण-इत्यर्थः एतत्सायाह्नस्यापिउपलक्षणं नकेवलमुक्तेष्वेवकालेषु किंतर्हि दिवा नक्तं सर्वदा शंतमेनसुखतमेनअवसारक्षणेन हविषावानिमित्तेनायातं किमर्थं आगम्यते पूर्वमेवान्यैर्देवैः स्वीकृतत्वात् नेत्याह इदानीमपि पीतिरितरदेवानांपानं नाततान नतनोति अश्विना अश्विनौ विहायेतिशेषः ॥ ३ ॥

अथचतुर्थी–

इदंहिवांप्रदिविस्थानमोकइमेगृहाअश्विनेदंदुरोणम् ।
आनोदिवोबृहतःपर्वतादाद्भ्योयातमिषमूर्जंवहन्ता ॥ ४ ॥

इदम् । हि । वाम् । प्रऽदिवि । स्थानम् । ओकः । इमे । गृहाः ।
अश्विना । इदम् । दुरोणम् । आ । नः । दिवः । बृहतः । पर्वतात् ।
आ । अत्ऽभ्यः । यातम् । इषम् । ऊर्जम् । वहन्ता ॥ ४ ॥

हेअश्विना वांयुवयोः प्रदिविपुराणमिदंह्योकोनिवासयोग्यंस्थानं उत्तरवेद्याख्यं अथ सौमिकवेद्यभिप्रायेणाह इमेगृहाः प्राचीनवंशादयः इदंदुरोणं देवयजनगृहं नोस्मदर्थं दि-वोद्युलोकात् बृहतः पर्वतात् पर्ववतोमेघादद्भ्योपांकारणात् ,अन्तरिक्षादायातं आगच्छतं किंतूष्णीं न इषमूर्जंच अन्नं बलंच बलसाधनमन्नंसारभूतमित्यर्थः तादृशंवहन्ता वहन्तौ ॥४॥

अथपंचमी–

समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम ।
आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ॥५॥१७॥

सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती ।
गमेम । आ । नः । रयिम् । वहतम् । आ । उत । वीरान् । आ ।
विश्वानि । अमृता । सौभगानि ॥ ५ ॥ १७ ॥

वयं संगमेम संगच्छेम अश्विनोर्नूतनेनावसा अनन्यकृतेनरक्षणेन मयोभुवा सुखस्यभावयित्र्या सुप्रणीती सुप्रणीत्या सुष्ठु आगमनेनच अपिवा एते उभेअवसोर्विशेषणे उक्तलक्षणेन संगमेम नोस्मभ्यं रयिंआवहतं उत वीरान् पुत्रादीनावहतं हेअमृता अमरणधर्माणौ विश्वा विश्वानिसौभगानिसुभगत्वानि आवहतं ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेसप्तदशोवर्गः ॥ १७ ॥

प्रातर्यावाणेतिपंचर्चंपंचमंसूक्तं आत्रेयं त्रैष्टुभमाश्विनं प्रातर्यावाणेतिह्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोःपूर्वसूक्तेनसहोक्तोविनियोगः अप्तोर्यामैमैत्रावरुणातिरिक्तोक्थ्येइदमेवशस्यं तथाचसूत्रितं—प्रातर्यावाणाक्षेत्रस्यपतेमधुमन्तमूर्मिमिति ।

तत्रप्रथमा—

प्रातर्यावाणाप्रथमायजध्वंपुरागृध्रादररुषःपिबातः ।
प्रातर्हियज्ञमश्विनादधातेप्रशंसन्तिकवयःपूर्वभाजः ॥ १ ॥

प्रातःऽयावाना । प्रथमा । यजध्वम् । पुरा । गृध्रात् । अररुषः । पिबातः । प्रातः । हि । यज्ञम् । अश्विना । दधातेइति । प्र । शंसन्ति । कवयः । पूर्वऽभाजः ॥ १ ॥

हेमदीयाऋत्विजः प्रातर्यावाणा प्रातरेवयज्ञगन्तारौ प्रथमा अतएवेतरेभ्योदेवेभ्यःपूर्वभाविनौ प्रकृष्टतमौवा अश्विनौ यजध्वं किमर्थंप्रथमयागनियोगउच्यते गृध्रात् अभिकांक्षतःअररुषःअदातुः रक्षःप्रभृतेः पुरा पूर्वं पिबतः पिबतां अनागतौ कथंयष्टुंशक्यावित्यतआह अश्विना अश्विनौ प्रातर्हि यज्ञं दधाते धारयतः संभजतः पूर्वभाजः पूर्वकालीनाः कवयः अनूचानाऋषयः प्रातरेवैतौ प्रशंसन्ति येवाअनूचानास्तेकवयइतिहिनिगमः ॥ १ ॥

अथद्वितीया—

प्रातर्यजध्वमश्विनाहिनोतनसायमस्तिदेवयाअजुष्टम् ।
उतान्योअस्मद्यजतेविचावःपूर्वःपूर्वोयजमानोवनीयान् ॥ २ ॥

---

१ ऐ० ब्रा० २. २. ।

प्रातः । यजध्वम् । अश्विना । हिनोत । न । सायम् । अस्ति ।
देवऽयाः । अजुष्टम् । उत । अन्यः । अस्मत् । यजते । वि ।
च । आवः । पूर्वःऽपूर्वः । यजमानः । वनीयान् ॥ २ ॥

हेमदीयाःपुरुषाः अश्विना अश्विनौ प्रातः प्रातरेव यजध्वं पूजयध्वं स्तुध्वं हिनोत प्रहि-णुत हवींषि सायं सायंकाले हविर्देवयाःदेवगामि नास्ति नविद्यते देवानस्वीकुर्वन्तीत्यर्थः अ-जुष्टं असेव्यं तद्भवति पूर्वाह्णोवैदेवानामितिहिश्रुतिः । उत अस्मदस्मत्तोन्यःकोपियजते यजेत सोमेन विचावः वितर्पयेच्चहविषा अतोस्मास्वन्येषुचमध्ये पूर्वः पूर्वोयजमानः यःपूर्वःपूर्वोयष्टा भवति सवनीयान् देवानांसंभजनीयः संभाव्योभवति ॥ २ ॥

हिरण्यत्वगित्येषाआश्विनेपशौहविषोयाज्या हिरण्यत्वङ्मधुवर्णोघृतस्नुरभिक्रत्वेन्द्रभूर-धज्मन्नितिहिसूत्रितं ।

सैषातृतीया—

हिरण्यत्वङ्मधुवर्णोघृतस्नुःपृक्षोवहन्नारथोवर्ततेवाम् ।
मनोजवाअश्विनावातरंहायेनातियाथोदुरितानिविश्वा ॥ ३ ॥

हिरण्यऽत्वक् । मधुऽवर्णः । घृतऽस्नुः । पृक्षः । वहन् । आ ।
रथः । वर्तते । वाम् । मनःऽजवाः । अश्विना । वातऽरंहाः ।
येन । अतिऽयाथः । दुःऽइतानि । विश्वा ॥ ३ ॥

वांयुवयोरथः पृक्षोन्नमन्नं वहन्नावर्ततेस्मदभिमुखंआगच्छति कीदृशोरथः हि-रण्यत्वक् हिरण्याच्छादितरूपःहिरण्यावृतः मधुवर्णः मनोहरवर्णः घृतस्नुः उदकस्य प्रस्रवनः मनोजवाः मनोवेगः वातरंहाः वातसदृशवेगः हेअश्विना येनरथेन विश्वा सर्वाणि दुरितानि पापानि दुर्गमनान्मार्गान्वा अतियाथः अतिक्रम्यगच्छथः ॥ ३ ॥

अथचतुर्थी—

योभूयिष्ठंनासत्याभ्यांविवेषचनिष्ठंपित्वोररतेविभागे ।
सतोकमस्यपीपरच्छमीभिरनूर्ध्वभासःसदमित्तुतुर्यात् ॥ ४ ॥

यः । भूयिष्ठम् । नासत्याभ्याम् । विवेष । चनिष्ठम् । पित्वः ।
ररते । विऽभागे । सः । तोकम् । अस्य । पीपरत् । शमीभिः ।
अनूर्ध्वऽभासः । सदम् । इत् । तुतुर्यात् ॥ ४ ॥

योयजमानोविभागेहविर्विभागवतियागे नासत्याभ्यामश्विभ्यां भूयिष्ठं चनिष्ठं चनइत्यन्ननाम बह्वन्नकर्म विवेष करोति पित्वः कर्मणिषष्ठी अन्नंच ररते ददाति सयजमानोस्यात्मनएवतोकंपुत्रं पीपरत् पालयेत् शमीभिः कर्मभिः अनूर्ध्वभासः अनुन्नतेजस्कान् यद्वोर्ध्वभासःअग्नयः अग्निरहितानयष्टॄन् सदमित् सदैव तुतुर्यात् हिंस्यात् ॥ ४ ॥

अथपञ्चमी—

समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम ।
आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि ॥ ५ ॥ १८॥

सम् । अश्विनोः । अवसा । नूतनेन । मयःऽभुवा । सुऽप्रनीती । गमेम ।
आ । नः । रयिम् । वहतम् । आ । उत । वीरान् । आ । विश्वानि ।
अमृता । सौभगानि ॥ ५ ॥ १८ ॥

व्याख्यातेयम् ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेष्टादशोवर्गः ॥ १८ ॥

अश्विनावेहेतिनवर्चंषष्ठंसूक्तं अत्रानुक्रमणिका—अश्विनौनवसप्तवध्रिरुष्णिगादिचतुर्थीत्रिष्टुप्पंचानुष्टुभइति । सप्तवध्रिर्नामात्रेयऋषिः आदितस्तिस्रउष्णिहः चतुर्थीत्रिष्टुप् शिष्टाः पंचानुष्टुभः प्रातरनुवाकेआश्विनेक्रतावौष्णिहेछन्दसिआश्विनशस्त्रेचाद्यस्तृचोविनियुक्तः सूत्रितंच—अश्विनावर्तिरस्मदाश्विनावेहगच्छतमितितृचाविति । दशरात्रेतृतीयेहनिप्रउगशस्त्रेयमाश्विनस्तृचः सूत्रितंच—अश्विनावेहगच्छतमायाह्यद्रिभिःसुतमिति ।

॥ तत्रप्रथमा—

अश्विनावेहगच्छतंनासत्यामाविवेनतम् । हंसाविवपततमासुताँउप ॥ १ ॥

अश्विनौ । आ । इह । गच्छतम् । नासत्या । मा । वि । वेनतम् ।
हंसौऽइव । पततम् । आ । सुतान् । उप ॥ १ ॥

हेअश्विनौ इहास्मिन्यागे आगच्छतं हेनासत्या माविवेनतं वेनतिःकान्तिकर्मा माविकामौभवतं निस्पृहावकामौ भवतमित्यर्थः हंसाविव तौयथानिर्मलोदकं आगच्छतस्तद्वत् सुतानभिषुतान् सोमान् उपापततं उपागच्छतं ॥ १ ॥

अथद्वितीया—

अश्विनाहरिणाविवगौराविवानुयवंसम् । हंसाविवपततमासुताँउप ॥२॥

अश्विना । हरिणौऽइव । गौरौऽइव । अनु । यवंसम् ।
हंसौऽइव । पततम् । आ । सुतान् । उप ॥ २ ॥

हेअश्विनौ हरिणाविव गौराविव गौरमृगाविवच तौयथा यवसं घासं अनुधावतः ताविव हंसाविवच सोममागच्छतं ॥ २ ॥

अथतृतीया—

अश्विनावाजिनीवसूजुषेथांयज्ञमिष्टये । हंसाविवपततमासुताँउप ॥३॥

अश्विना । वाजिनीवसूइतिवाजिनीऽवसू । जुषेथाम् । यज्ञम् ।
इष्टये । हंसौऽइव । पततम् । आ । सुतान् । उप ॥ ३ ॥

हेवाजिनीवसू अन्नार्थवासयितारौ अश्विना यज्ञमस्मदीयं इष्टये अभीष्टाय एषणायवा जुषेथां सेवेथां ॥ ३ ॥

अथचतुर्थी—

अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेवयोषा ।
श्येनस्यचिज्जवसानूतनेनागच्छतमश्विनाशंतमेन ॥ ४ ॥ १९ ॥

अत्रिः । यत् । वाम् । अवऽरोहन् । ऋबीसम् । अजोहवीत् ।
नाधमानाऽइव । योषा । श्येनस्य । चित् । जवसा । नूतनेन । आ ।
अगच्छतम् । अश्विना । शमऽतमेन ॥ ४ ॥ १९ ॥

अत्रिरस्मत्पिता यद्यदा वां युवां अजोहवीत् अस्तौषीत् नाधमाना याचमाना योषा योषिदिव सायथा पतिंप्रीणयति तद्वत्कुर्वन् ऋबीसं तुषाग्निं अग्निकुंडेक्षिप्तःसन् अवरोहन् विमुंचन् अजोहवीत् श्येनस्यचित् जवसा श्येनस्य गरुत्मतइववेगेन चिदित्युपमार्थे अथवा श्ये-

नस्यजवसा वेगेन नूतनेन प्रथमोत्पन्नेन सततंगच्छतः श्येनस्यप्रथमजवेन शंतमेनास्माकं सुखतमेनचरथेन तं रक्षितुमागच्छतं हेअश्विना ॥ ४ ॥

॥ इतिचतुर्थस्यचतुर्थेएकोनविंशोवर्गः ॥१९॥

अत्रब्रुवन्तीतिहासंसप्तवध्रेःपुराविदः ॥ भ्रातृव्याःपेटिकायांतमृषिंप्रक्षिप्ययत्नतः ॥ १ ॥ मुद्रांकृत्वागृहेस्वीयेरक्षयित्वान्यवेशयन् ॥ नसंगच्छेतभार्यांस्वांयथारात्रौतथाकृतम् ॥ २ ॥ प्रातःप्रातःसमुद्घाटयचनिर्मथिष्यन्तितंमुनिं ॥ एवंस्थित्वाचिरंकालंपेटायांदुःखितःकृशः ॥ ३ ॥ उपायंचिंतयामासनिर्गमस्यचिरंमुनिः ॥ हृदिनिश्चित्यनासत्यावस्तौषीद्धृष्टमानसः ॥ ४ ॥ तमश्विनौसमागत्यसमुद्घाट्यचपेटिकां ॥ उद्धृत्यतमृषिंशीघ्रंतावदृष्टौबभूवतुः ॥ ५ ॥ सऋषिर्भार्ययासार्धंरमित्वाथपुनर्भयात् ॥ प्रातरेत्यपुनःपेटांप्रविश्यप्रागिवस्थितः ॥ ६ ॥ पेटानिवाससमयेदृष्टवानृग्द्वयंतदा ॥

तत्रद्वृचेप्रथमासूक्तेपंचमी—

विजिहीष्ववनस्पतेयोनिःसूष्यंन्त्याइव ।
श्रुतंमेंअश्विनाहवंसप्तवध्रिंचमुञ्चतम् ॥ ५ ॥

वि । जिहीष्व । वनस्पते । योनिः । सूष्यंत्याःऽइव ।
श्रुतम् । मे । अश्विना । हवम् । सप्तऽवध्रिम् । च । मुञ्चतम् ॥ ५ ॥

हेवनस्पते वनस्पतिविकाररूपेपेटिके विजिहीष्व विगच्छ विवृताभव सूष्यंत्याइव प्रसोष्यमाणायाःस्त्रियाःयोनिरिव (षूङ्प्राणिप्रसवे लृटिशतरिरूपं संज्ञापूर्वस्यविधेरनित्यत्वाद्गुणाभावः) प्रसवोन्मुख्याःस्त्रियाःयोनिरिव भगः यथाविव्रियते तथात्वमपि विवृताभव तदर्थं हेअश्विना अश्विनौ मेहवं आह्वानं श्रुतं शृणुतं श्रुत्वाच सप्तवध्रिंच मामृषिंमुंचतं मोचयतं ॥ ५ ॥

अथषष्ठी—

भीतायनाधमानायऋषयेसप्तवध्रये ।
मायाभिरश्विनायुवंवृक्षंसंचविचाचथः ॥ ६ ॥

भीताय । नाधमानाय । ऋषये । सप्तऽवध्रये । मायाभिः ।
अश्विना । युवम् । वृक्षम् । सम् । च । वि । च । अचथः ॥ ६ ॥

भीताय निर्गमाद्बिभ्युषे नाधमानाय विमोक्षंयाचमानाय सप्तवध्रयेऋषये हेअश्विना अश्विनौ युवं युवां मायाभिः वृक्षं वृक्षविकारांपेटिकां संचाचथः ममनिर्गमार्थं संगच्छथः विचाचथः विभक्तंकुरुथः ॥ ६ ॥ अथसप्तमी—

यथावातःपुष्करिणींसमिङ्गयतिसर्वतः ।
एवातेगर्भएजतुनिरैतुदशमास्यः ॥ ७ ॥

यथा । वातः । पुष्करिणीम् । सम्ऽइङ्गयति । सर्वतः ।
एव । ते । गर्भः । एजतु । निःऽऐतु । दशऽमास्यः ॥ ७ ॥

एतदाद्यृक्त्रयंगर्भस्राविण्युपनिषत् एतदाद्यृक्त्रयेणासौसप्तवध्रिःस्वयोषितः ॥ गर्भिण्याःप्रसवायाशुस्तुतवानश्विनावृषिः ॥ १ ॥ यथावातःपुष्करिणीं सरआदिकं सर्वतःसमिंगयति सम्यक्चालति एवएवं तेतव गर्भएजतु कंपतां इतस्ततःसंचरतु दशमास्यः दशमासान्गर्भे स्थितोनिरैतु निर्गच्छतु ॥ ७ ॥ अथाष्टमी—

यथावातोयथावनंयथासमुद्रएजति ।
एवात्वंदशमास्यसहावेहिजरायुणा ॥ ८ ॥

यथा । वातः । यथा । वनम् । यथा । समुद्रः । एजति । एव ।
त्वम् । दशऽमास्य । सह । अव । इहि । जरायुणा ॥ ८ ॥

वातोयथाकंपमानोवनंकंपयतिस्वयं ॥ यथासमुद्रश्चलतिचाल्यतेवाथवायुना ॥ १ ॥ स्थित्वादशैवमासांस्त्वंगर्भोल्बेनसुवेष्टितः ॥ निर्गच्छजठरान्मातुर्जरायुयुजआपत ॥ २ ॥ ८ ॥

अथनवमी—

दशमासाञ्छशयानःकुमारोअधिमातरि ।
निरैतुजीवोअक्षतोजीवोजीवन्त्याअधि ॥ ९ ॥ २० ॥

दश । मासान् । शशयानः । कुमारः । अधि । मातरि ।
निःऽऐतु । जीवः । अक्षतः । जीवः । जीवन्त्याः । अधि ॥ ९ ॥ २० ॥

दशमासानुषित्वासौजननीजठरेसुखं ॥ निर्गच्छतुसुखंजीवोजननीचापिजीवतु ॥ १ ॥ ९ ॥

॥ इतिचतुर्थस्यचतुर्थेविंशोवर्गः ॥ २० ॥

महेनोअद्येतिदशर्चंसप्तमंसूक्तं आत्रेयस्यसत्यश्रवसस्यार्षं पांक्तमुषस्यं अनुक्रम्यतेच—महे-दशसत्यश्रवाउषस्यंतुपांक्तमिति । प्रातरनुवाकेउषस्येक्रतौपांक्तेछन्दसिआश्विनशस्त्रेचेदंसूक्तं सूत्र्यतेहि—महेनोअद्येतिपांक्तमिति ।

तत्रप्रथमा—

महेनोअद्यबोधयोषोरायेदिवित्मती ।
यथाचिन्नोअबोधयःसत्यश्रवसिवाय्येसुजातेअश्वसूनृते ॥१॥

महे । नः । अद्य । बोधय । उषः । राये । दिवित्मती ।
यथा । चित् । नः । अबोधयः । सत्यऽश्रवसि । वाय्ये ।
सुऽजाते । अश्वऽसूनृते ॥ १ ॥

अद्यास्मिन्यागदिने हेउषः उषोदेवि दिवित्मती दीप्तिमती त्वंनोस्मान् महे महते राये धनप्राप्तये बोधय प्रज्ञापय प्रकाशयेत्यर्थः सतिप्रकाशे क्रतुद्वाराद्द्रव्यस्योपार्जयितुंशक्यत्वात् यथाचित् यथैवपूर्वंनोस्मानबोधयः अतीतेषुदिवसेषुयथाबोधितवती तद्वत्अद्यापीत्यर्थः हेसुजाते शोभनप्रादुर्भूते अश्वसूनृते अश्वार्थाप्रियसत्यात्मिकास्तुतिर्वाग्यस्याःसा हेतादृशिदेवि वाय्ये वय्यपुत्रे सत्यश्रवसिमयि अनुगृहाणेत्यर्थः ॥ १ ॥

अथद्वितीया—

यासुनीथेशौचद्रथेव्यौच्छोदुहितर्दिवः ।
साव्युच्छसहीयसिसत्यश्रवसिवाय्येसुजातेअश्वसूनृते ॥ २ ॥

या । सुऽनीथे । शौचत्ऽरथे । वि । औच्छः । दुहितः । दिवः ।
सा । वि । उच्छ । सहीयसि । सत्यऽश्रवसि । वाय्ये । सुऽजाते ।
अश्वऽसूनृते ॥ २ ॥

हेदिवोदुहितः दिवःसूर्यस्यपुत्रीउषः यात्वं सुनीथे एतन्नामके शौचद्रथे शुचद्रथस्यापत्ये पूर्वंव्यौच्छः व्यवासयस्तमांसि सात्वं सहीयसि अतिशयेनबलवति वाय्ये वय्यपुत्रे सत्यश्रवसि मयि व्युच्छ तमोविवासय उच्छीविवासे विवासोवर्जनं शिष्टमुक्तम् ॥ २ ॥

अथतृतीया—

सानोअद्याभरद्वसुर्व्युच्छादुहितर्दिवः ।
योव्यौच्छःसहीयसिसत्यश्रवसिवाय्येसुजातेअश्वसूनृते ॥ ३ ॥

सा । नः । अद्य । भरत्ऽवसुः । वि । उच्छ । दुहितः । दिवः ।
यो इति । वि । औच्छः । सहीयसि । सत्यऽश्रवसि । वाय्ये ।
सुऽजाते । अश्वऽसूनृते ॥ ३ ॥

हेदुहितर्दिवःउषः आभरद्वसुः आहृतधना सा प्रसिद्धात्वं नोस्माकं अद्यास्मिन्दिने व्युच्छ तमोविवासय हेसहीयसि यो या उकारोनर्थकः यात्वं पूर्वं व्यौच्छः साद्यापीति ॥ ३ ॥

अथचतुर्थी—

अभियेत्वाविभावरिस्तोमैर्गृणन्तिवह्नयः ।
मघैर्मघोनिसुश्रियोदामन्वन्तःसुरातयःसुजातेअश्वसूनृते ॥४॥

अभि । ये । त्वा । विभाऽवरि । स्तोमैः । गृणन्ति । वह्नयः । मघैः ।
मघोनि । सुऽश्रियः । दामन्ऽवन्तः । सुऽरातयः । सुऽजाते ।
अश्वऽसूनृते ॥ ४ ॥

हेविभावरि प्रकाशोपेते(विभाशब्दाच्छन्दसीवनिपावितिवनिप् भातेर्वाकर्तरिवनिप्) उषः त्वा त्वां अभिमति येवह्नयोवोढारऋत्विजः स्तोतारः स्तोमैः स्तोत्रैः गृणन्ति स्तुवन्ति तेस्तोतारोमघैः हेमघोनि धनैर्धनवति त्वदनुग्रहात् सुश्रियोभवन्ति सुष्ठुअर्थिभिराश्रयणीयाभवन्ति दामन्वन्तोदानवन्तोभवन्ति सुरातयः रातिर्दानं सुदानाश्चभवन्ति ॥ ४ ॥

अथपंचमी—

यच्चिद्धितेगणाइमेछदयन्तिमघत्तये ।
परिचिद्वष्टयोदधुर्ददतोराधोअह्रयंसुजातेअश्वसूनृते ॥५॥२१॥

यत् । चित् । हि । ते । गणाः । इमे । छदयन्ति । मघत्तये ।
परि । चित् । वष्टयः । दधुः । ददतः । राधः । अह्रयम् । सुऽजाते ।
अश्वऽसूनृते ॥ ५ ॥ २१ ॥

हेउषः यच्चिद्धीतिपूरणः यत् येकेचन तेतव स्वभूताइमे पुरतोवर्तमानागणाः संघभूताः मघत्तये धनदातये धनदानाय धनवत्त्वायवा छदयन्ति उपच्छन्दयन्ति तेसर्वेपि अस्मान् परिदधुः परितोधारयन्ति वष्टयश्चिदस्मानेव कामयमानाः किंकुर्वन्तः अह्रयं अह्रियमाणं अक्षोणं अलज्जावहंवा राधोधनं हविर्लक्षणं ददतोयजन्तइत्यर्थः अर्थिभ्योक्षीणंददतोवा ये त्वां हविर्ददतः स्तुवन्ति तेसर्वेप्यस्मदर्थमेवबलंधारयन्ति स्तुवन्तीत्यर्थः अथवा यद्धीत्यत्र यद्यपीतिव्याख्येयं तस्मिन्पक्षे उत्तरवाक्ये तथापीत्यध्याहार्यं अवशिष्टंसमानम्॥ ५॥

॥ इतिचतुर्थस्यचतुर्थेएकविंशोवर्गः॥ २१ ॥

अथषष्ठी–

ऐषुधावीरवद्यशउषोमघोनिसूरिषु ।
येनोराधांस्यह्नयामघवानोअरासतसुजातेअश्वसूनृते ॥ ६ ॥

आ । एषु । धाः । वीरऽवत् । यशः । उषः । मघोनि । सूरिषु ।
ये । नः । राधांसि । अह्रया । मघऽवानः । अरासत । सुऽजाते ।
अश्वऽसूनृते ॥ ६ ॥

हेउषोदेवि मघोनि मघवति त्वं सूरिषुयागप्रेरकेषुयजमानेषु स्तोतृषुवा वीरवद्यशः वीरैःपुत्रादिभिरुपेतं अन्नंयशोवा आधाः आधेहिआदेहि आनय येमघवानोधनवन्तः सूरयोनोस्मभ्यं तवस्तोतृभ्योराधांसि धनानि अह्रया अक्षीणानि अरासत ददुस्तेष्वित्यर्थः॥ ६॥

अथसप्तमी–

तेभ्योद्युम्नंबृहद्यशउषोमघोन्यावह ।
येनोराधांस्यश्व्यागव्याभजन्तसूरयःसुजातेअश्वसूनृते ॥ ७॥

तेभ्यः । द्युम्नम् । बृहत् । यशः । उषः । मघोनि । आ । वह ।
ये । नः । राधांसि । अश्व्या । गव्या । भजन्त । सूरयः ।
सुऽजाते । अश्वऽसूनृते ॥ ७ ॥

हेउषोमघोनि त्वं तेभ्योद्युम्नं द्योतमानं हिरण्यादिरूपंधनं बृहद्यशोमहदन्नं महतींकीर्तिं वा तेभ्योयजमानेभ्यआवह ये आढ्यानोस्मभ्यं राधांसि धनानि अश्व्या अश्वैर्युक्तानि गव्या गोभिर्युक्तानि गोसमूहानश्वसमूहांश्च भजन्त भजेरन्ददुः सूरयोदातारः ॥ ७ ॥

अथाष्टमी—

उतनोगोमतीरिषआवहादुहितर्दिवः ।
साकंसूर्यस्यरश्मिभिःशुक्रैःशोचद्भिरर्चिभिःसुजातेअश्वसूनृते॥८॥

उत । नः । गोऽमतीः । इषः । आ । वह । दुहितः । दिवः ।
साकम् । सूर्यस्य । रश्मिऽभिः । शुक्रैः । शोचत्ऽभिः । अर्चिऽभिः ।
सुऽजाते । अश्वऽसूनृते ॥ ८ ॥

उतापिच नोस्मभ्यं गोमतीर्गोभिरुपेतानि इषोन्नानि आवह आनय हेदिवोदुहितरुषः कदा सूर्यस्यरश्मिभिःसाकं शोचद्भिर्दीपयद्भिःशुक्रैर्निर्मलैरर्चिभिः अग्नेस्तेजोभिश्चसाकं सूर्योदयकाले अग्नीन्धनकालेचेत्यर्थः ॥ ८ ॥

अथनवमी—

व्युच्छादुहितर्दिवोमाचिरंतनुथाअपः ।
नेत्त्वास्तेनंयथारिपुंतपातिसूरोअर्चिषासुजातेअश्वसूनृते ॥९॥

वि । उच्छ । दुहितः । दिवः । मा । चिरम् । तनुथाः । अपः ।
न । इत् । त्वा । स्तेनम् । यथा । रिपुम् । तपाति । सूरः । अर्चिषा ।
सुऽजाते । अश्वऽसूनृते ॥ ९ ॥

हेदिवोदुहितरुषः त्वं व्युच्छ विभातंकुरु अपोस्मदीयंकर्म प्रतिचिरं विलंबमातनुथाः त्वा त्वां रिपुं स्तेनं यथासंतापयतिराजादिः तद्वत् सूरः सूर्यः अर्चिषा तेजसा नेत् नैवतपाति तप्यात् शीघ्रंनोदेत्वित्यर्थः ॥ ९ ॥

अथदशमी—

एतावद्वेदुषस्त्वंभूयोवादातुमर्हसि ।
यास्तोतृभ्योविभावर्युच्छन्तीनप्रमीयसेसुजातेअश्वसूनृते॥१०॥२२॥

एतावत् । वा । इत् । उषः । त्वम् । भूयः । वा । दातुम् । अर्हसि ।
या । स्तोतृऽभ्यः । विभाऽवरि । उच्छन्ती । न । प्रऽमीयसे ।
सुऽजाते । अश्वऽसूनृते ॥ १० ॥ २२ ॥

हेउषः त्वं अस्मभ्यं वा अथवा दित्सितं किमेतावदेव इच्छब्दएवकारार्थः अस्मिन्त्सूक्ते प्रार्थितमेवेत्यर्थः अथवा भूयोदातुमर्हसि अप्रार्थितमपियद्दातव्यमस्तितत्सर्वंदेहीत्यर्थः हे विभावरिउषः यात्वं स्तोतृभ्यस्तेषांलौकिकवैदिकव्यवहारार्थं व्युच्छन्तीतमोविवासयन्ती नप्रमीयसे नहन्ति नक्रुध्यसीत्यर्थः सात्वंदातुमर्हसीति)मीञ्हिंसायामित्यस्माद्धश्चास्थानेव्यत्ययेनश्यन् ॥ १० ॥

॥ इतिचतुर्थस्यचतुर्थेद्वाविंशोवर्गः ॥ २२ ॥

द्युतद्यामानमितिषळृचमष्टमंसूक्तं अत्रानुक्रमणिका—द्युतद्यामानंषळिति । सत्यश्रवाऋषिः अनुक्तत्वात्त्रिष्टुप् उषस्यंत्वित्युक्तत्वादुषोदेवता प्रातरनुवाकेउषस्येक्रतौत्रैष्टुभेछन्दसिआश्विनशस्त्रेचेदंसूक्तं सूत्रितंच—द्युतद्यामानमुषोवाजेनेति ।

तत्रप्रथमा—

द्युतद्यामानंबृहतीमृतेनऋतावरीमरुणप्सुंविभातीम् ।
देवीमुषसंस्वरावहन्तींप्रतिविप्रासोमतिभिर्जरन्ते ॥ ॥ १ ॥

द्युतत्ऽयामानम् । बृहतीम् । ऋतेन । ऋतऽवरीम् । अरुणऽप्सुम् ।
विऽभातीम् । देवीम् । उषसम् । स्वः । आऽवहन्तीम् । प्रति ।
विप्रासः । मतिऽभिः । जरन्ते ॥ १ ॥

द्युतद्यामानं दीप्तरथं बृहतीं महतीं ऋतेन सत्येन यज्ञेनवा ऋतावरीं ऋतवतीं अरुणप्सुं अरुणरूपां विभातीं व्युच्छन्तीं देवीं द्योतमानामुषसं स्वरावहन्तीं सूर्यंगच्छन्तीं एवंमहानुभावामुषसंप्रति विप्रासोमेधाविनः ऋत्विजोमतिभिःस्तुतिभिर्जरन्ते स्तुवन्ति ॥ १ ॥

अथद्वितीया—

एषाजनंदर्शताबोधयन्तीसुगान्पथःकृण्वतीयात्यग्रे ।
बृहद्रथाबृहतीविश्वमिन्वोषाज्योतिर्यच्छत्यग्रेअह्नाम् ॥ २ ॥

एषा । जनम् । दर्शता । बोधयन्ती । सुऽगान् । पथः । कृण्वती ।
याति । अग्रे । बृहत्ऽरथा । बृहती । विश्वम्ऽइन्वा । उषाः ।
ज्योतिः । यच्छति । अग्रे । अह्नाम् ॥ २ ॥

दर्शता दर्शनीया एषोषा बोधयन्तीकंजनं प्रसुप्तमित्यर्थः पथः सुगान् सुगमनान् कृण्वती अग्रे सूर्यस्यपुरस्तात् याति गच्छति कीदृश्युषाः बृहद्रथा प्रभूतरथा बृहती महती विश्वमिन्वा विश्वंव्याप्नुवाना विश्वतर्पणावा ईदृश्युषाः अह्नामग्रे ज्योतिस्तेजोयच्छति ॥ २ ॥

अथतृतीया–

एषागोभिररुणेभिर्युजानास्रेधन्तीरयिमप्रायुचक्रे ।
पथोरदन्तीसुवितायदेवीपुरुष्टुताविश्ववाराविभाति ॥ ३ ॥

एषा । गोभिः । अरुणेभिः । युजाना । अस्रेधन्ती । रयिम् ।
अप्रऽआयु । चक्रे । पथः । रदन्ती । सुवितार्य । देवी । पुरुऽस्तुता ।
विश्वऽवारा । वि । भाति ॥ ३ ॥

एषोषाः अरुणेभिररुणवर्णैर्गोभिर्बलीवर्दैः रथंयुजाना योजयन्ती अस्रेधन्ती अशुष्यन्ती अक्षीणावा किं रयिं धनं अप्रायु अप्रगन्तृ अविचलितं चक्रे करोति किंकुर्वती पथोमार्गान् रदन्ती प्रकाशयन्ती किमर्थं सुविताय सुष्ठुगमनाय देवी द्योतमाना पुरुष्टुता बहुभिः स्तुता विश्ववारा सर्वैर्वरणीया विभाति प्रकाशंकरोति ॥ ३ ॥

अथचतुर्थी–

एषाव्येनीभवतिद्विबर्हाआविष्कृण्वानातन्वंपुरस्तात् ।
ऋतस्यपन्थामन्वेतिसाधुप्रजानतीवनदिशोमिनाति ॥ ४ ॥

एषा । विऽएनी । भवति । द्विऽबर्हाः । आविःऽकृण्वाना । तन्वम् ।
पुरस्तात् । ऋतस्य । पन्थाम् । अनु । एति । साधु । प्रजानतीऽइव ।
न । दिशः । मिनाति ॥ ४ ॥

एषोषाः व्येनीभवति विशेषेणश्वेताभवति द्विबर्हाः द्वयोःप्रथममध्यमयोःस्थानयोः परिवृढाउषाः पश्चात्तन्वं स्वीयांतनुमाविष्कृण्वाना प्रकटीकुर्वती कुत्र पुरस्तात्पूर्वस्यांदिशि किं

च ऋतस्यादित्यस्य पन्थां पंथानं साधु सम्यगन्वेति किंच प्रजानतीव विश्वंप्रज्ञापयन्ती इवे-तिसंप्रत्यर्थे नदिशोमिनाति नहिनस्ति प्रत्युत दिशःप्रकाशयति अथवा प्रजानतीव अनुगन्त-व्यमितिप्रकर्षेण अवगच्छन्तीच ऋतस्यपंथामन्वेति ॥ ४ ॥

अथपंचमी–

एषाशुभ्रानतन्वोविदानोर्ध्वेवस्नातीदृशयेनोअस्थात् ।
अपद्वेषोबाधमानातमांस्युषादिवोदुहिताज्योतिषागात् ॥ ५ ॥

एषा । शुभ्रा । न । तन्वः । विदाना । ऊर्ध्वाऽइव । स्नाती । दृशये ।
नः । अस्थात् । अप । द्वेषः । बाधमाना । तमांसि । उषाः ।
दिवः । दुहिता । ज्योतिषा । आ । अगात् ॥ ५ ॥

एषोषाः शुभ्रान शुभ्रवर्णानिर्मलास्वलंकृतायोषिदिव तन्वोगानि विदाना प्रज्ञापयन्ती स्नाती स्नानंकुर्वाणा ऊर्ध्वेव उन्नतेव स्नानादुत्तिष्ठन्तीव नोस्मदर्थं अस्माकंपुरतोवा दृशये सर्वेषांदर्श-नायउदस्थात् पूर्वस्यांदिश्युत्तिष्ठति किंकुर्वन्ती द्वेषोद्वेष्याणि तमांस्यपबाधमाना दिवोदुहितोषाः ति ज्योतिषा तेजसा सहागादागच्छति ॥ ५ ॥

अथषष्ठी–

एषाप्रतीचीदुहितादिवोनॄन्योषेवभद्रानिरिणीतेअप्सः ।
व्यूर्ण्वतीदाशुषेवार्याणिपुनर्ज्योतिर्युवतिःपूर्वथाकः ॥ ६ ॥२३॥

एषा । प्रतीची । दुहिता । दिवः । नॄन् । योषाऽइव । भद्रा ।
नि । रिणीते । अप्सः । विऽऊर्ण्वती । दाशुषे । वार्याणि ।
पुनः । ज्योतिः । युवतिः । पूर्वऽथा । अकरित्यकः ॥ ६ ॥ २३ ॥

एषोषाः प्रतीची अभिमुखासती दिवोदुहिता नॄन् सर्वान्प्राणिनः प्रतिभद्रा योषेव क-ल्याणवेषायोषिदिवाप्सोरूपंनिरिणीते प्रेरयति किंच दाशुषे हविर्दात्रेयजमानाय वार्याणि वर-णीयानि धनानि व्यूर्ण्वती प्रयच्छन्ती युवतिर्नित्ययौवना सर्वत्रमिश्रयन्तीवा पुनरद्यापि पूर्वथा पूर्वमिवज्योतिस्तेजोअकःकरोति ॥ ६ ॥

॥ इतिचतुर्थस्यचतुर्थेत्रयोविंशोवर्गः ॥ २३ ॥

युंजतेमनइतिपंचर्चंनवमंसूक्तं अत्रेयमनुक्रमणिका—युंजतेपंचश्यावाश्वःसावित्रंतुजागतमिति। श्यावाश्वोनामात्रेयऋषिः जगतीछन्दः सवितादेवता पृष्ठ्याभिप्लवषडहयोःप्रथमेहनिवैश्वदेवशस्त्रे सावित्रनिविद्धानमिदं सूत्रितंच—युंजतेमनइहेहवइतिचतस्रइति। आद्याग्रावस्तोत्रेपि सूत्रितंच—युंजतेमनउतयुंजतेधियआतूनइन्द्रक्षुमन्तमिति।

तत्रप्रथमा—

युञ्जतेमनंउतयुंञ्जतेधियोविप्राविप्रंस्यबृहतोविंपश्चितंः।
विहोत्रांदधेवयुनाविदेकइन्महीदेवस्यंसवितुःपरिंष्टुतिः॥ १॥

युञ्जतें। मनंः। उत। युञ्जते। धियंः। विप्राः। विप्रंस्य।
बृहतः। विपःऽचितंः। वि। होत्राः। दधे। वयुनऽवित्। एकंः।
इत्। मही। देवस्यं। सवितुः। परिंऽस्तुतिः॥ १॥

विप्रामेधाविनऋत्विग्यजमानाः मनः स्वीयं सर्वेषुकर्मसु युंजते योजयन्ति सवित्रनुग्रहाय संकल्पंकुर्वंतिइत्यर्थः उतापिच धियः कर्माण्यपि युंजते प्राप्नुवंति कस्यानुज्ञयेति उच्यते विप्रस्यमेधाविनः बृहतोमहतः विपश्चितः स्तुत्यस्यज्ञानवतोवा सवितुःअनुज्ञयेति सवितावैप्रसवानामीशइतिश्रुतिः[1]। सएवसविता होत्राः सप्तहोत्रकाणामुचिताः क्रियाः वयुनावित् वयुनमितिप्रज्ञानाम तत्तदनुष्ठानविषयप्रज्ञावेत्ता एकइत् एकएव विदधे करोति पृथक्पृथगवधारयति किंच तस्यसवितुर्देवस्य परिष्टुतिः स्तुतिः मही महती अतिप्रभूता स्तुत्यगोचरेत्यर्थः॥ १॥

हविर्धानप्रवर्तनेरराट्यामवनद्धायांविश्वारूपाणीत्येषानुवचनीया सूत्रितंच—विश्वारूपाणिप्रतिमुंचतेकविरितिव्यवस्तायामिति।

सैषाद्वितीया—

विश्वारूपाणिप्रतिंमुञ्चतेकविःप्रासांवीद्भद्रंद्विपदेचतुंष्पदे।
विनाकंमख्यत्सवितावरेण्योनुंप्रयाणंमुषसोविरांजति॥ २॥

विश्वां। रूपाणिं। प्रतिं। मुञ्चते। कविः। प्र। असावीत्।
भद्रम्। द्विऽपदें। चतुंःऽपदे। वि। नाकंम्। अख्यत्। सविता।
वरेण्यः। अनुं। प्रऽयानंम्। उषसंः। वि। राजति॥ २॥

---

१ ऐ० ब्रा० ७. १६.।

कविः मेधावी सविता विश्वा सर्वाणिरूपाणि आत्मनि प्रतिमुंचते बध्नातिधारयति किं च भद्रं कल्याणं गमनादिविषयं प्रासावीत् अनुजानाति कस्मै द्विपदे मनुष्याय चतुष्पदे गवाश्वादिकाय किंच सविता सर्वस्यप्रेरकोदेवोवरेण्योवरणीयःसन् व्यख्यत् ख्यापयति प्रकाशयति किं नाकं नास्मिन्नकंदुःखमस्तीतिनाकः स्वर्गः यजमानार्थं स्वर्गंप्रकाशयतीत्यर्थः सदेवः उषसं प्रयाणमुदयमनु विराजति प्रकाशते सवितुरुदयात्पूर्वंह्युषाउदेति ॥ २ ॥

अथतृतीया—

यस्यंप्रयाणमन्वन्यइद्ययुर्देवादेवस्यंमहिमानमोजंसा ।
यःपार्थिवानिविममेसएतंशोरजांसिदेवःसंवितामंहित्वना ॥ ३ ॥

यस्यं । प्रऽयानंम् । अनु । अन्ये । इत् । ययुः । देवाः । देवस्यं । महिमानंम् । ओजंसा । यः । पार्थिवानि । विऽममे । सः । एतंशः । रजांसि । देवः । सविता । महिऽत्वना ॥ ३ ॥

अन्यइत् देवाअन्येप्यग्न्यादयोदेवाः देवस्यद्योतमानस्य सवितुः प्रयाणमनु ययुर्गच्छन्ति प्राप्नुवन्ति किं महिमानं महत्त्वं सवितुरुदयाभावेग्निहोत्रादिअनिष्पत्तेस्तेषांहविःस्तुत्याद्यभावात् ओजसा बलेनच युक्ताभवन्ति यःसविता पार्थिवानिरजांसि पृथिव्यादिलोकान् महित्वना स्वमहत्त्वेन विममे परिच्छिनत्ति सदेवः एतशः एतवर्णः शुभ्रः शोभमानःसन् राजतइतिशेषः युवशाता कृणोतनेत्यादिवदेतशइत्यादिशकारोपजनश्छान्दसः ॥ ३ ॥

अथचतुर्थी—

उतयांसिसवितस्त्रीणिरोचनोतसूर्यंस्यरश्मिभिःसमुंच्यसि ।
उतरात्रीमुभयतःपरींयसउतमित्रोभंवसिदेवधर्मंभिः ॥ ४ ॥

उत । यासि । सवितरिति । त्रीणि । रोचना । उत । सूर्यस्य । रश्मिऽभिः । सम् । उच्यसि । उत । रात्रीम् । उभयतः । परि । ईयसे । उत । मित्रः । भवसि । देव । धर्मऽभिः ॥ ४ ॥

हेसवितर्देव उतापिच त्रीणिरोचना रोचमानान्द्युलोकान् यासि गच्छसि तिस्रोदिवःपृथिवीरित्युक्तं उतापिच सूर्यस्यरश्मिभिः समुच्यसि संगच्छसि(उचसमवायइत्यस्येदंरूपं)उदयात्पूर्वभावीसविता उदयास्तमयवर्तीसूर्यइति उतापिच रात्रीमुभयतउभयपार्श्वे परीयसे परिगच्छसि उतापिच हेदेव सवितस्त्वं धर्मभिर्जगद्धारकैः कर्मभिः मित्रोभवसिमित्राख्योदेवोभवसि अथवा प्रकाशादिप्रदानेनसखाभवसि सर्वजगताम् ॥ ४ ॥

अथपञ्चमी—

उ॒तेशि॑षेप्रस॒वस्य॒त्वमेक॒इदु॒तपू॒षाभ॑वसिदेव॒याम॑भिः ।
उ॒तेदंविश्वं॒भुव॑नं॒विरा॑जसिश्या॒वाश्व॑स्तेसवि॒तः स्तोम॑मानशे ॥५॥२४॥

उ॒त । ई॒शि॒षे॒ । प्र॒ऽस॒वस्य॑ । त्वम् । एकः॑ । इत् । उ॒त । पू॒षा । भ॒व॒सि॒ ।
दे॒व॒ । याम॑ऽभिः । उ॒त । इ॒दम् । विश्व॑म् । भुव॑नम् । वि । रा॒ज॒सि॒ ।
श्या॒वऽअ॑श्वः । ते॒ । स॒वि॒त॒रिति॑ । स्तोम॑म् । आ॒न॒शे॒ ॥ ५ ॥ २४ ॥

हेसवितस्त्वं एकइव एकएव प्रसवस्य सर्वकर्मानुज्ञाकरणस्य ईशिषे समर्थोभवसि ये लौकिकंगमनादिरूपं वैदिकमग्निहोत्रादिरूपंकर्म अनुतिष्ठन्ते तेषांसर्वेषां अनुज्ञातुमेकएवप्रभवसि उतापिच पूषा पोषकोभवसि हेदेव यामभिर्गमनैः उतापिचेदंविश्वंभुवनं भूतजातं विराजसि ईशिषेधारयितुं यस्मादेवंमहानुभावः तस्माद्धेसवितस्तेतुभ्यं श्यावाश्वऋषिः स्तोत्रमानशे व्याप्नोति करोतीत्येवमात्मानं परोक्षतयानिर्दिशन्नाह ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेचतुर्विंशोवर्गः ॥ २४ ॥

तत्सवितुरितिनवर्चंदशमंसूक्तं श्यावाश्वस्यार्षं अत्रेयमनुक्रमणिका—तत्सवितुर्नवगायत्रमाद्यानुष्टुबिति । प्रथमानुष्टुप् शिष्टागायत्र्यः सावित्रंत्वित्युक्तत्वात्सावित्रं अग्निष्टोमेवैश्वदेवशस्त्स्याद्यस्तृचः प्रतिपत् अद्यानोदेवेत्यनुचरः सूत्रितंच—तत्सवितुर्वृणीमहेद्यानोदेवसवितरिति वैश्वदेवस्यप्रतिपदनुचराविति ।

तत्रप्रथमा—

तत्स॑वि॒तुर्वृ॑णीमहेव॒यंदे॒वस्य॒भोज॑नम् ।
श्रेष्ठं॑सर्व॒धात॑मं॒तुरं॒भग॑स्यधीमहि ॥ १ ॥

१ ऋ० सं० ३. ८. ४.

तत् । सवितुः । वृणीमहे । वयम् । देवस्य । भोजनम् । श्रेष्ठम् ।
सर्वऽधातमम् । तुरम् । भगस्य । धीमहि ॥ १ ॥

तत्प्राप्यत्वेनप्रसिद्धं भोजनं भोग्यंधनं वयंस्तोतारोवृणीमहे प्रार्थयामः कस्यधनं सवितुः प्रेरकस्यदेवस्य स्वभूतं लब्ध्वाच श्रेष्ठं प्रशस्यं सर्वधातमं सर्वधातृतमं सर्वभोग्यप्रदमित्यर्थः तुरं शत्रूणांहिंसकं धनेनशत्रून्हन्तुंशक्यत्वात् तादृशंधनं भगस्य भजनीयस्य सवितुरनुग्रहात् धीमहि धारयाम उपभोगंकरवामेत्यर्थः अथवा धनंवृणीमहे अर्थित्वाच्च लभेमहीति ॥ १ ॥

अथद्वितीया—

अस्यहिस्वयंशस्तरंसवितुःकच्चनप्रियम् । नमिनन्तिस्वराज्यम् ॥ २ ॥

अस्य । हि । स्वयंशःऽतरम् । सवितुः । कत् । चन ।
प्रियम् । न । मिनन्ति । स्वऽराज्यम् ॥ २ ॥

अस्य सवितुः स्वयशस्तरं स्वयमसाधारणं यशोयस्यातिशयेनभवतितत् तादृशं प्रियं सर्वेषांप्रियभूतं स्वराज्यं स्वयमेवराजमानत्वमैश्वर्यं कच्चन केचिदपिअसुरादयोनमिनन्ति नहिंसन्ति ॥ २ ॥

अथतृतीया—

सहिरत्नानिदाशुषेसुवातिसविताभगः । तंभागंचित्रमीमहे ॥ ३ ॥

सः । हि । रत्नानि । दाशुषे । सुवाति । सविता । भगः ।
तम् । भागम् । चित्रम् । ईमहे ॥ ३ ॥

सहि सखलु सविता भगोभजनीयोदेवोदाशुषे हविर्दात्रेमह्यं रत्नानि रमणीयानिधनानि सुवाति प्रेरयतिप्रयच्छति तंदेवं भागं भजनीयं चित्रं चायनीयंधनं ईमहे याचामहे ॥ ३ ॥

अद्यानइतिचतुर्थीपंचमीभ्याममनोज्ञस्वप्नदर्शनेप्रत्यृचंजुहुयात् अद्यानोदेवसवितरितिद्वाभ्यामितिहिसूत्रितम् ।

अथचतुर्थी—

अद्यानोदेवसवितःप्रजावत्सावीःसौभगम् । परादुष्वप्न्यंसुव ॥ ४ ॥

अद्य । नः । देव । सवितरिति । प्रजाऽवत् । सावीः । सौभगम् ।
परा । दुःऽस्वप्न्यम् । सुव ॥ ४ ॥

हेसवितर्देव नोस्मभ्यमद्यास्मिन्यागदिने प्रजावत्पुत्राद्युपेतं सौभगं धनं सावीः प्रेरय दुः-स्वप्न्यं दुःस्वप्नंदुःस्वप्नवद्दुःखकरंदारिद्र्यं परासुव दूरेप्रेरय ॥ ४ ॥

अथपंचमी–

विश्वानिदेवसवितर्दुरितानिपरासुव । यद्भद्रंतन्नआसुव ॥ ५ ॥२५॥

विश्वानि । देव । सवितः । दुःऽइतानि । परा । सुव ।
यत् । भद्रम् । तत् । नः । आ । सुव ॥ ५ ॥ २५ ॥

हेसवितर्देव त्वं विश्वानि दुरितानि परासुव यद्भद्रं प्रजापशुगृहादिकं तन्नोस्मभ्यमासुव अस्मदभिमुखंप्रेरय प्रजावैभद्रंपशवोभद्रंगृहंभद्रमितिहिश्रुतिः ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेपंचविंशोवर्गः ॥ २५ ॥

अथषष्ठी–

अनागसोअदितयेदेवस्यसवितुःसवे । विश्वावामानिधीमहि ॥ ६ ॥

अनागसः । अदितये । देवस्य । सवितुः । सवे । विश्वा ।
वामानि । धीमहि ॥ ६ ॥

वयमनुष्ठातारः सवितुः प्रेरकस्य देवस्य सवे अनुज्ञायांसत्यां अदितये अखंडनीयायै देव्यैभूम्यै अनागसःस्याम अनपराधिनोभवेम भूम्यांहिपापाःसंभवन्ति अपगतेष्वागःसुविश्वा सर्वाणि वामानि वननीयानि धनानि धीमहिधारयाम ॥ ६ ॥

चातुर्मास्येषुवैश्वदेवेपर्वणिसावित्रस्यद्वादशकपालस्याविश्वदेवमित्यनुवाक्या सूत्रितंच–आविश्वदेवंसत्पतिंवाममद्यसवितरिति। प्रायणीयएषैवसवितुरनुवाक्या सूत्रितंच–आविश्वदेवं सत्पतिंयइमाविश्वाजातानीति । देवसुवांहविष्ष्वेषैवसवितुरनुवाक्या सूत्रितंच–आविश्वदेवंसत्प-तिंममियेसवितुर्दैव्यस्यतदिति ।

सैषासप्तमी–

आविश्वदेवंसत्पतिंसूक्तैरद्यावृणीमहे । सत्यसवंसवितारम् ॥ ७ ॥

आ । विश्वऽदेवम् । सत्ऽपतिम् । सुऽउक्तैः । अद्य । वृणीमहे ।
सत्यऽसवम् । सवितारम् ॥ ७ ॥

विश्वदेवं विश्वेदेवायस्यवशेभवन्ति तंतादृशं तंहिसर्वात्मत्वादिन्द्रंमित्रंवरुणमग्निमाहुरित्यादिश्रुतेरितरेषांतद्विभूतित्वात् सत्पतिं सतामनुष्ठातॄणांपालकं सत्यसवं सत्यानुज्ञं सवितारंदेवं अद्यास्मिन्यागदिने सूक्तैरावृणीमहे संभजामहे ॥ ७ ॥

अथाष्टमी–

यइमेउभेअहनीपुरएत्यप्रयुच्छन् । स्वाधीर्देवःसविता ॥ ८ ॥

यः । इमे इति । उभे इति । अहनी इति । पुरः । एति ।
अप्रऽयुच्छन् । सुऽआधीः । देवः । सविता ॥ ८ ॥

यःसवितादेवः स्वाधीः शोभनाध्यानः सुकर्मावासन् इमे अहनी रात्र्यहनी तयोःपुरः पुरस्तादप्रयुच्छन् अप्रमाद्यन्नेति गच्छति तमावृणीमहइतिसंबन्धः ॥ ८ ॥

प्रायणीयेयइमाविश्वेतिसवितुर्याज्यासूत्रितंच–यइमाविश्वाजातानिसुत्रामाणंपृथिवींद्यामनेहसमिति । अश्वमेधेश्वमुत्सृज्यानुसवनंसावित्रीष्टिःकार्यातस्यामेषामाध्यन्दिनसवनेनुवाक्या सूत्रितंच–यइमाविश्वाजातान्यादेवोयातुसवितासुरत्नइति ।

सैषानवमी–

यइमाविश्वाजातान्याश्रावयतिश्लोकेन । प्रचसुवातिसविता ॥ ९ ॥ २८ ॥

यः । इमा । विश्वा । जातानि । आऽश्रवयति । श्लोकेन ।
प्र । च । सुवाति । सविता ॥ ९ ॥

---

१ ऋ० सं० २. ३. २२. ।

योदेवइमा इमानि विश्वा सर्वाणि जातानि उत्पन्नान्प्राणिनः जंगमानित्यर्थः तान् श्लो- केन यशसा आश्रावयति सर्वेप्यस्यस्तुतिंश्रृण्वन्तीत्यर्थः अथवा गर्जनशब्देन सर्वाणीमान्यु- त्पन्नानि आश्रावयति वृष्ट्युन्मुखःसन् किंच सविता प्रसुवातिचप्रेरयति तंवृणीमहइत्यर्थः॥ ९ ॥

॥ इतिचतुर्थस्यचतुर्थेषड्विंशोवर्गः ॥ २६ ॥

अच्छावदेतिदशर्चमेकादशंसूक्तं भौमस्यात्रेरार्षं अत्रेयमनुक्रमणिका—अच्छदशात्रिः पार्जन्यमुपाद्यास्तिस्रोजगत्यः उपान्त्यानुष्टुबिति यत्पर्जन्येत्येषानवम्यनुष्टुप् विवृक्षानित्याद्या- स्तिस्रोजगत्यः शिष्टाःषट्त्रिष्टुभः पर्जन्योदेवता बृहद्दग्विधानेशौनकः अच्छावदेतिसूक्तंतुवृष्टि- कामःप्रयोजयेत् ॥ निराहारःक्लिन्नवासाअचिरेणप्रवर्षति ॥ १ ॥ हुत्वायुतंवैतसीनांक्षीराक्तानां हुताशने ॥ महद्वर्षमवाप्नोतिसूक्तेनाच्छावदेनहि ॥ २ ॥ अनेनसूक्तेनप्रत्यृचंवादिशउपस्थेयाः सूत्रितंच—संस्थितायांसर्वादिशउपतिष्ठेत अच्छावदतवसंगीर्भिराभिरितिचतसृभिः प्रत्यृचं सूक्तेनवेति ।

तत्रप्रथमा—

अच्छा॑वदत॒वसं॑गी॒र्भिरा॒भिः स्तु॒हिप॒र्जन्यं॒नम॒सावि॑वास ।
कनि॑क्रदद्वृष॒भोजी॒रदा॑नू॒रेतो॑दधा॒त्योष॑धीषु॒गर्भ॑म् ॥ १ ॥

अच्छ॑ । व॒द॒ । त॒वस॑म् । गी॒ःऽभिः॑ । आ॒भिः । स्तु॒हि । प॒र्जन्य॑म् । नम॑सा । आ । वि॒वा॒स॒ । कनि॑क्रदत् । वृ॒ष॒भः । जी॒रऽदा॑नुः । रेतः॑ । द॒धा॒ति॒ । ओष॑धीषु । गर्भ॑म् ॥ १ ॥

हेस्तोतस्तवसं बलवन्तं पर्जन्यं अच्छाभिप्राप्य वद प्रार्थय पर्जन्यशब्दोयास्केनबहु- धानिरुक्तः पर्जन्यस्तृपेराद्यन्तविपरीतस्यतर्पयिताजन्यःपरोजेतावाजनयितावाप्रार्जयितावारसा- नामिति आभिर्गीर्भिःस्तुतिवाग्भिः स्तुहि नमसान्नेन हविर्लक्षणेनाविवास सर्वतःपरिचर यः पर्जन्योवृषभोपांवर्षिता जीरदानुः क्षिप्रदानः कनिक्रदत् गर्जनशब्दंकुर्वन्नोषधीषुगर्भं गर्भ- स्थानीयंरेतउदकं दधाति स्थापयति तंस्तुहि ॥ १ ॥

नि० १०. ९. ।

अथद्वितीया—

विवृक्षान्हन्त्युतहन्तिरक्षसोविश्वंबिभायभुवनंमहावधात्।
उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यःस्तनयन्हन्तिदुष्कृतः ॥ २ ॥

वि। वृक्षान्। हन्ति। उत। हन्ति। रक्षसः। विश्वम्। बिभाय।
भुवनम्। महाऽवधात्। उत। अनागाः। ईषते। वृष्ण्यऽवतः।
यत्। पर्जन्यः। स्तनयन्। हन्ति। दुःऽकृतः ॥ २ ॥

अयंमंत्रोनिरुक्तेस्पष्टव्याख्याततत्वात्तदेवात्रलिख्यते पर्जन्यःविहन्ति वृक्षान्विहन्तिच रक्षांसि सर्वाणिचास्माद्भूतानिबिभ्यति महावधान्महान्ह्यस्यवधोप्यनपराधोभीतः पलायते वर्षकर्मवतोयत्पर्जन्यस्तनयन्हन्ति दुष्कृतः पापकृतइति ॥ २ ॥

अथतृतीया—

रथीवकशयाश्वाँअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्याँ३अह।
दूरात्सिंहस्यस्तनथाउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यं१नभः ॥ ३ ॥

रथीऽइव। कशया। अश्वान्। अभिऽक्षिपन्। आविः। दूतान्।
कृणुते। वर्ष्यान्। अह। दूरात्। सिंहस्य। स्तनथाः। उत्।
ईरते। यत्। पर्जन्यः। कृणुते। वर्ष्यम्। नभः ॥ ३ ॥

रथीव रथस्वामीव सयथा· कशयाश्वानभिक्षिपन् दूतान्भटानाविष्करोतितद्वदसौपर्जन्योपि कशयाश्वान्मेघान् अभिक्षिपन् अभिप्रेरयन् वर्ष्यान् वर्षकान्दूतान् दूतवद्वृष्टिप्रेरकान् मेघान् मरुतोवा आविष्कृणुते प्रकटयति अहइतिपूरणः एवंसति सिंहस्य सहतेर्हिंसतेर्वाशब्दकर्मणःसिंहशब्दः अवर्षणेनाभिभवितुः शब्दयितुर्वामेघस्य स्तनथाः गर्जनशब्दाः दूरादुदीरते उद्गच्छन्ति कदा यद्यदापर्जन्योनभोन्तरिक्षं वर्ष्यं वर्षोपेतं कृणुते करोति तदा ॥ ३ ॥

प्रवातावान्तीतिचतुर्थीपर्जन्यस्यचरोर्याज्या सूत्रितंच—प्रवातावान्तिपतयन्तिविद्युतइत्यग्न्याधेयप्रभृतीनितितत्पाठस्तु ।

---

1 नि० १०. ११. १

अथचतुर्थी—

प्रवातावान्तिपतयन्तिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः ।
इराविश्वस्मैभुवनायजायतेयत्पर्जन्यःपृथिवींरेतसावति ॥ ४ ॥

प्र । वाताः । वान्ति । पतयन्ति । विऽद्युतः । उत् । ओषधीः ।
जिहते । पिन्वते । स्व१रितिस्वः । इरा । विश्वस्मै । भुवनाय ।
जायते । यत् । पर्जन्यः । पृथिवीम् । रेतसा । अवति ॥ ४ ॥

वाताःप्रवान्ति वातावृष्ट्यर्थंपतयन्ति गच्छन्ति समन्तात्संचरन्ति विद्युतओषधीरोषधय-उज्जिहते उद्गच्छन्ति प्रवर्धन्ते स्वरन्तरिक्षंपिन्वते क्षरति इराभूमिर्विश्वस्मैसर्वस्मै भुवनाय सर्व-जगद्धिताय जायते समर्थाभवति कदैवमिति यद्यदापर्जन्योदेवः पृथिवीं रेतसोदकेनावतिरक्षति अभिगच्छतिवा तदैवंभवति ॥ ४ ॥

अथपंचमी—

यस्यव्रतेपृथिवीनन्नमीतियस्यव्रतेशफवज्जर्भुरीति ।
यस्यव्रतओषधीर्विश्वरूपाःसनःपर्जन्यमहिशर्मयच्छ ॥ ५ ॥

यस्य । व्रते । पृथिवी । नन्नमीति । यस्य । व्रते । शफऽवत् ।
जर्भुरीति । यस्य । व्रते । ओषधीः । विश्वऽरूपाः । सः । नः ।
पर्जन्य । महि । शर्म । यच्छ ॥ ५ ॥ २७ ॥

यस्यपर्जन्यस्य व्रते कर्मणि पृथिवीनन्नमीति अत्यर्थंनमति सर्वेषामधोभवति यस्यव्रते शफवत् पादोपेतंगवादिकं जर्भुरीति भ्रियते पूर्यते गच्छतीतिवा यस्यव्रते कर्मण्योषधीरोष-ध्योविश्वरूपानानारूपाभवन्ति हेपर्जन्य समहांस्त्वं नोस्मभ्यं महिशर्म महत्सुखं यच्छ प्रयच्छ ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेसप्तविंशोवर्गः ॥ २७ ॥

अथषष्ठी—

दिवोनोवृष्टिंमरुतोररीध्वंप्रपिन्वतवृष्णोअश्वस्यधाराः ।
अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिञ्चन्नसुरःपितानः ॥ ६ ॥

दिवः । नः । वृष्टिम् । मरुतः । ररीध्वम् । प्र । पिन्वत । वृष्णः ।
अश्वस्य । धाराः । अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि ।
अपः । निऽसिञ्चन् । असुरः । पिता । नः ॥ ६ ॥

हेमरुतोयूयं दिवोन्तरिक्षसकाशात् नोस्मदर्थं वृष्टिं ररीध्वं दत्त वृष्णोवर्षकस्याश्वस्य व्यापकस्यमेघस्य संबन्धिन्योधाराउदकधाराः प्रपिन्वत प्रक्षरत हेपर्जन्य त्वमेतेन स्तनयित्नु-ना गर्जतामेघेन सहार्वागस्मदभिमुखमेहि आगच्छ किंकुर्वन् अपोंभांसिनिषिंचन् सदेवोसुरः उदकानांनिरसितापिसन् नोस्माकं पितापालकश्च ॥ ६ ॥

अथसप्तमी—

अभिक्रन्दस्तनयगर्भमाधाउदन्वतापरिदीयारथेन ।
दृतिंसुकर्षविषितन्यंञ्चंसमाभवन्तूद्वतोनिपादाः ॥ ७ ॥

अभि । क्रन्द । स्तनय । गर्भम् । आ । धाः । उदन्ऽवता ।
परिऽदीय । रथेन । दृतिम् । सु । कर्ष । विऽसितम् । न्यञ्चम् ।
समाः । भवन्तु । उत्ऽवतः । निऽपादाः ॥ ७ ॥

अभिभूम्यभिमुखं क्रन्द शब्दय तदेवपुनरुच्यतेदाढर्याय स्तनय गर्ज गर्भं गर्भस्थानीय-मुदकमोषधीष्वाधाः आधेहि तदर्थमुदन्वता उदकवतारथेन परिदीय परितोगच्छ दृतिं दृतिव-दुदकधारकं मेघं विषितं सु सुष्ठु कर्ष आकर्षवृष्ट्यर्थं यद्वा विषितं विमुक्तबंधनं एवंकर्षएवं शेषेण तंबद्धं न्यंचं न्यक्अधोमुखं विकुरु उद्वतः ऊर्ध्ववन्तः उन्नतप्रदेशाः निपादाः न्यग्भूत-पादाः निकृष्टपादावा निम्नोन्नतप्रदेशाः समाएकरस्थाभवन्तु उदकपूर्णाभवंत्वित्यर्थः ॥ ७ ॥

अथाष्टमी—

महान्तंकोशमुदचानिषिञ्चस्यन्दन्तांकुल्याविषिताःपुरस्तात् ।
घृतेनद्यावापृथिवीव्युन्धिसुप्रपाणंभवत्वघ्न्याभ्यः ॥ ८ ॥

महान्तम् । कोशम् । उत् । अच । नि । सिञ्च । स्यन्दन्ताम् ।
कुल्याः । विऽसिताः । पुरस्तात् । घृतेन । द्यावापृथिवी इति । वि ।
उन्धि । सुऽप्रपानम् । भवतु । अघ्न्याभ्यः ॥ ८ ॥

हेपर्जन्य त्वं महान्तं प्रवृद्धं कोशं कोशस्थानीयंमेघं उत्कृष्टमुदच उदच्छ उद्गमयवा तथाकृत्वा निषिंच नीचैःक्षारय कुल्यानद्योविषिताविष्यूताःसत्यः स्यन्दन्तां प्रवहन्तु पुरस्तात्पूर्वाभिमुखं प्रायेण नद्यः प्राच्यः स्यन्दन्ते घृतेनोदकेन द्यावापृथिवी दिवंचपृथिवींच व्युन्धि क्लेदयात्यधिकं अघ्न्याभ्योगोभ्यः सुप्रपानं सुष्ठु प्रकर्षेण पातव्यमुदकं भवतु ॥ ८ ॥

अथनवमी—

यत्पर्जन्यकनिक्रदत्स्तनयन्हंसिदुष्कृतः।
प्रतीदंविश्वंमोदतेयत्किंचपृथिव्यामधि ॥ ९ ॥

यत्। पर्जन्य। कनिक्रदत्। स्तनयन्। हंसि। दुःऽकृतः। प्रति।
इदम्। विश्वम्। मोदते। यत्। किम्। च। पृथिव्याम्। अधि ॥९॥

हेपर्जन्य यद्यदा त्वं कनिक्रददत्यर्थंशब्दयन् स्तनयन् दुष्कृतः पापकृतोमेघान्हंसि विदारयसि तदानीमिदं विश्वं जगत्प्रतिमोदते विश्वंविशेष्यते यत्किंच पृथिव्यामधिभूम्यामधिष्ठितं यच्चराचरात्मकं तदिदंविश्वं मोदते हृष्यति वृष्टेःसर्वजगत्प्रीतिकारणत्वंप्रसिद्धम् ॥ ९ ॥

अथदशमी—

अवर्षीर्वर्षमुदुषूगृभायाकर्धन्वान्यत्येतवाउ।
अजीजनओषधीर्भोजनायकमुतप्रजाभ्योविदोमनीषाम् ॥१०॥२८॥

अवर्षीः। वर्षम्। उत्। ऊँ इति। सु। गृभाय। अकः। धन्वानि।
अतिऽएतवै। ऊँ इति। अजीजनः। ओषधीः। भोजनाय। कम्।
उत। प्रऽजाभ्यः। अविदः। मनीषाम् ॥ १० ॥ २८ ॥

इयमतिवृष्टिविमोचनी हेपर्जन्यत्वमवर्षीर्वृष्टवानसि वर्षमुदुषूगृभाय उदुत्कृष्टं सु सुष्ठुगृभाय गृहाण परिहरेत्यर्थः धन्वानि निरुदकप्रदेशानकःजलवतःकृतवानसि किमर्थं अत्येतवाउ अतिक्रम्यगन्तुं ओषधीरजीजनः उदपादयः किमर्थं भोजनाय धनाय भोगायवा कमित्ययंशिशिरंजीवनायकंमितिवत्पादपूरणः उतापिच प्रजाभ्यःसकाशात् मनीषां स्तुतिमविदःप्राप्तवानसि॥१०॥

॥ इतिचतुर्थस्यचतुर्थेष्टाविंशोवर्गः ॥ २८ ॥

---

१ नि० १. १०.।

बळित्थेतितृचात्मकंद्वादशंसूक्तं भौमस्यात्रेरार्षं पृथिवीदेवताकं आनुष्टुभं अनुक्रान्तंच— बळित्थातृचंपार्थिवमानुष्टुभमिति सूक्तविनियोगोलैंगिकः आद्यादेवानांहविःषुपृथिव्याअनुवाक्याबळित्थापर्वतानांदृह्ळाचिद्यावनस्पतीनितिहिसूत्रितं । भूमिस्तोमेत्येषामरुत्वतीयशस्त्रेसूक्तमुखीया ।

सैषाप्रथमा—

बळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि ।
प्रयाभूमिंप्रवत्वतिमह्नाजिनोषिमहिनि ॥ १ ॥

बट् । इत्था । पर्वतानाम् । खिद्रम् । बिभर्षि । पृथिवि । प्र । या ।
भूमिम् । प्रवत्वति । मह्ना । जिनोषि । महिनि ॥ १ ॥

द्विरूपापृथिवीचैषा प्रत्यक्षादेवतापिच । मध्यस्थानादेवतोक्ता सात्र संबोध्यवर्ण्यते ॥ हेपृथिवि विप्रथनवति मध्यस्थानदेवतेत्वं इत्थाइत्थं अत्र अमुत्रान्तरिक्षेवा बट् सत्यं पर्वतानां मेघानांवाखिद्रं खेदनं भेदनं बिभर्षि धारयसि हेमहिनि महति हेप्रवत्वति प्रकर्षवति प्रवणोदकवतिवायात्वं भूमिं प्रत्यक्षांपृथिवीं मह्ना महत्वेन महतोदकेनवा प्रजिनोषि प्रकर्षेणप्रीणयसि ॥१॥

अथद्वितीया—

स्तोमासस्त्वाविचारिणिप्रतिष्टोभन्त्यक्तुभिः ।
प्रयावाजंनहेषन्तंपेरुमस्यस्यर्जुनि ॥ २ ॥

स्तोमासः । त्वा । विऽचारिणि । प्रति । स्तोभन्ति । अक्तुऽभिः ।
प्र । या । वाजम् । न । हेषन्तम् । पेरुम् । अस्यसि । अर्जुनि ॥ २ ॥

हेविचारिणि विविधंचरणशीले पृथिविदेवि त्वां स्तोमासः स्तोतारः अक्तुभिर्गमनशीलैः स्तोत्रैः प्रतिष्टोभन्ति अभिष्टुवन्ति किंच यात्वं हेषंतं शब्दयन्तं वाजंन अश्वमिव उद्धृत्तं पेरुं पूरकं मेघं प्रास्यसि प्रक्षिपसि हेअर्जुनि शुभ्रवर्णे गमनशीलेवा ॥ २ ॥

देवानांहविःषुदृह्ळाचिदितिपृथिव्यायाज्या एषैवभूमिः स्तोमेनिष्केवल्येसूक्तमुखीया सूत्रंतु पूर्वमेवोदाहृतं ।

सैषातृतीया—

दृह्ळाचिद्यावनस्पतीन्क्ष्मयादर्धर्ष्योजसा ॥
यत्तेअभ्रस्यविद्युतोदिवोवर्षन्तिवृष्टयः ॥ ३ ॥ १९ ॥

दृह्ळा । चित् । या । वनस्पतीन् । क्ष्मया । दर्धर्षि । ओजसा ।
यत् । ते । अभ्रस्य । विऽद्युतः । दिवः । वर्षन्ति । वृष्टयः ॥३॥२९ ॥

हेपृथिवि यात्वं दृह्ळाचित् सुपांसुलुगितितृतीयायाआकारः दृढया क्ष्मया भूम्या सहवनस्पतीन् वृक्षान् ओजसा बलेन दर्धर्षि धारयसि अथवा दृह्ळेतिविधेयविशेषणं वनस्पतीन् दृह्ळान्कृत्वा धारयसीत्यर्थः यत् अस्यास्ते तवसंबंधिनोवृष्टयोवर्षकामेघाः विद्युतोविद्योतमानात् अभ्रस्य पंचम्यर्थेषष्ठी अभ्रादपांहर्त्तुः दिवोन्तरिक्षादादित्याद्वावर्षन्ति अथवा यद्यस्यास्ते तवाभ्रस्यमेघस्य वृष्टयः उदकसंघाताः विद्युतोविद्योतमानायादिवःसकाशाद्वर्षन्ति पतन्ति ॥३॥

॥ इतिचतुर्थस्यचतुर्थेएकोनत्रिंशोवर्गः ॥ २९ ॥

प्रसंम्राजइत्यष्टर्चंत्रयोदशंसूक्तं आत्रेयं त्रैष्टुभं वारुणं अनुक्रम्यतेच—प्रसंम्राजेष्टौवारुणमिति । विनियोगोलैंगिकः ।

तत्रप्रथमा—

प्रसम्राजेबृहदर्चागभीरंब्रह्मप्रियंवरुणायश्रुताय ।
वियोजघानशमितेवचर्मोपस्तिरेपृथिवींसूर्याय ॥ १ ॥

प्र । सम्ऽराजे । बृहत् । अर्च । गभीरम् । ब्रह्म । प्रियम् । वरुणाय ।
श्रुताय । वि । यः । जघान । शमिताऽइव । चर्म ।
उपऽस्तिरे । पृथिवीम् । सूर्याय ॥ १ ॥

अत्रिः स्वात्मानंसंबोध्य ब्रवीति हेअत्रे त्वं सम्राजे सम्यग्राजमानायईश्वराय श्रुताय सर्वत्रश्रूयमाणाय वरुणाय उपद्रवस्यनिवारकाय जनानामावरकाय एतन्नामकायदेवाय बृहत्मभूतं गभीरं दुरवगाहं बह्वर्थोपेतं प्रियं प्रियभूतं ब्रह्म स्तोत्ररूपंकर्म प्रार्च प्रार्चय प्रोच्चारयेत्यर्थः योवरुणः शमितेवचर्म शमितापशुविशसनकर्ता यथोपस्तरणाय चर्म हन्ति

तद्वत्पृथिवीं विस्तीर्णमन्तरिक्षं तृतीयस्यांपृथिव्यामितिश्रुतेरन्तरिक्षस्यापिपृथिवीशब्दवाच्यत्वं सूर्याय सूर्यस्य उपस्तिरे आस्तरणाय विजघान विस्तारयामास विस्तृतंहि व्यवहारयोग्यं भवति तस्माद्व्यवहारायान्तरिक्षं विस्तारितवान् उरुंहिराजावरुणश्चकारेतिह्युक्तम् ॥ १ ॥

अथद्वितीया—

वनेषुव्य१न्तरिक्षंततानवाजमर्वत्सुपयउस्रियासु ।
हृत्सुक्रतुंवरुणोअप्स्व१ग्निंदिविसूर्यमदधात्सोममद्रौ ॥ २ ॥

वनेषु । वि । अन्तरिक्षम् । ततान । वाजम् । अर्वत्ऽसु । पयः ।
उस्रियासु । हृत्ऽसु । क्रतुम् । वरुणः । अप्ऽसु । अग्निम् । दिवि ।
सूर्यम् । अदधात् । सोमम् । अद्रौ ॥ २ ॥

अयंवरुणोवनेषुवृक्षाग्रेषु अन्तरिक्षंविततान विस्तारितवान् तथावाजसनेयकं वनेषुहीदं एषु वृक्षाग्रेष्वन्तरिक्षंविततं तस्मादाहवनेषु व्यन्तरिक्षंततानेति वाजं बलमर्वत्सु अश्वेषु ततान पयःक्षीरमुस्रियासु गोषु उस्रियेति गोनाम उस्राविणोस्यांभोगाइतितद्व्युत्पत्तिः हृत्सु हृदयेषु क्रतुं कर्मसंकल्पं यद्धि मनसाध्यायति तत्कर्मणाकरोति अप्सूदकेषुअग्निं वैद्युतं और्वंवा सर्वत्र विततानेतिसंबन्धः किंच दिवि द्युलोके सूर्यमदधात् स्थापितवान्सोमंचाद्रौपर्वते अदधात्॥२॥

अथतृतीया—

नीचीनबारंवरुणःकवन्धंप्रससर्जरोदसीअन्तरिक्षम् ।
तेनविश्वस्यभुवनस्यराजायवंनवृष्टिर्व्युनत्तिभूम ॥ ३ ॥

नीचीनऽबारम् । वरुणः । कवन्धम् । प्र । ससर्ज । रोदसी इति ।
अन्तरिक्षम् । तेन । विश्वस्य । भुवनस्य । राजा । यवम् । न ।
वृष्टिः । वि । उनत्ति । भूम ॥ ३ ॥

नीचीनबारं अधोमुखंबिलं प्रससर्ज कृतवान् कं कवंधं कवनमुदकं तद्धीयतेअत्रेति-कवन्धोमेघः तंतथाकरोत् अथवा कवन्धमुदकं तदुदकं नीचीनबारं नीचीननिर्गमनबिलंचकार

१ तै० सं० १. २. १२. । २ ऋ० सं० १. २. १४. ।

मेघं विदार्योदकमधोमुखं चकारेत्यर्थः किंप्रतीतीत्युच्यते रोदसी द्यावापृथिव्यौ अन्तरिक्षंच प्रति लोकत्रयहितायेत्यर्थः तेनोदकेन विश्वस्यसर्वस्यभुवनस्य भूतजातस्य राजा स्वामीवरुणोभूम भूमिं व्युनत्तिक्लेदयतिवृष्टिः सेक्ता पुमान् यवंन यवमिवयवान्यथाप्ररोहायसर्वत्रप्रसारयतितद्वत् भूमिं सर्वत्रोनत्ति अथवावृष्टिर्वरुणइतिसंबन्धः वर्षकःपर्जन्यइत्यर्थः अस्मिन्पक्षेयवंपुरुषइवेतिपुरुषशब्दोध्याहार्यः अत्रनीचीनबारंवरुणःकबन्धमित्यादि[1]निरुक्तंद्रष्टव्यम् ॥ ३ ॥

अथचतुर्थी—

उनत्तिभूमिंपृथिवीमुतद्यांयदादुग्धंवरुणोवष्ट्यादित् ।
समभ्रेणवसतपर्वतासस्तविषीयन्तःश्रथयन्तवीराः ॥ ४ ॥

उनत्ति । भूमिम् । पृथिवीम् । उत । द्याम् । यदा । दुग्धम् ।
वरुणः । वष्टि । आत् । इत् । सम् । अभ्रेण । वसत । पर्वतासः ।
तविषीऽयन्तः । श्रथयन्त । वीराः ॥ ४ ॥

वरुणोभूमिंपृथिवीं प्रथितमन्तरिक्षं अन्तरिक्षस्यापिपृथिवीशब्दवाच्यत्वं पूर्वमुक्तं उतापिच द्यां द्युलोकं उनत्ति क्लेदयति यदायंदुग्धं उदकपूरणं वष्टि कामयते अथवा दुग्धमुदकं तेनतत्कार्यमोषध्यादिकंलक्ष्यते ओषध्यादयः प्रवर्धन्तामितियदाकामयते आदित्अनन्तरमेव संवसत समाच्छादयन्ति केपर्वतासः पर्ववन्तोद्रयः केन अभ्रेणमेघेन किंच विषीयन्तोबलमिछन्तोवीराविशेषेणवृष्टेःप्रेरयितारोमरुतः श्रथयन्त श्रथयन्तिमेघान् ॥ ४ ॥

अथपंचमी—

इमामूष्वासुरस्यश्रुतस्यमहीमायांवरुणस्यप्रवोचम् ।
मानेनेवतस्थिवाँअन्तरिक्षेवियोममेपृथिवींसूर्येण ॥ ५ ॥ ३० ॥

इमां । ऊँ इति । सु । आसुरस्यं । श्रुतस्यं । महीम् । मायाम् ।
वरुणस्य । प्र । वोचम् । मानेनऽइव । तस्थिऽवान् । अन्तरिक्षे । वि ।
यः । ममे । पृथिवीम् । सूर्येण ॥ ५ ॥ ३० ॥

---

1 नि० १०. ४. ।

आसुरस्य असुरसंबन्धिनः असुराणामस्यचवध्यघातकभावःसंबन्धः असुरहन्तुरित्यर्थः अथवा असुरोमेघः प्राणदानात्तत्संबन्धिनः श्रुतस्य विश्रुतस्य महीं महतीं इमां मायां प्रज्ञां प्रवोचं प्रब्रवीमि कैषामायेतिसोच्यते योवरुणोन्तरिक्षेतस्थिवान् तिष्ठन् मानेनेव दंडेनेव सूर्येण पृथिवीमन्तरिक्षं विममे परिच्छिनत्ति तस्यैषामाया ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेत्रिंशोवर्गः ॥ ३० ॥

अथषष्ठी—

इमामूनुकवितंमस्यमायांमहींदेवस्यनकिरादधर्ष ।
एकंयदुद्गानपृणन्त्येनीरासिञ्चन्तीरवनंयःसमुद्रम् ॥ ६ ॥

इमाम् । ऊँ इति । नु । कविऽतंमस्य । मायाम् । महीम् । देवस्यं । नकिः । आ । दधर्ष । एकंम् । यत् । उद्गा । न । पृणन्ति । एनीः । आऽसिञ्चन्तीः । अवनंयः । समुद्रम् ॥ ६ ॥

कवितमस्य प्रकृष्टप्रज्ञस्य देवस्य द्योतमानस्य स्तुत्यस्य वा वरुणस्येमांसर्वप्रसिद्धां महीं महतीं मायां प्रज्ञां नकिर्नैवआदधर्ष नहिनस्तिकश्चिदपि ऊन्वितिपूरणौ यद्यस्मादेकं समुद्रं उद्गा उदकेन नपृणन्ति नपूरयन्ति काः एनीः एन्यः शुभ्राः गमनशीलावा आसिंचन्ती उदकमासिंचयंत्यः अवनयोनद्यः बह्व्योनद्यः सर्वदोदकेनपूरयंत्योपि नैकमपिसमुद्रंपूरयन्तीति इदंवरुणस्य महत्कर्मेति अत्रान्तरिक्षविस्तारादिसमुद्रापूरणपर्यन्तंकर्म परमेश्वरस्यैवोचितं नवरुणस्येतिनवाच्यं तस्यवरुणादिरूपावस्थानात् एषब्रह्मेत्यादिश्रुतिः ॥ ६ ॥

अथसप्तमी—

अर्यम्यंवरुणमित्र्यंवासखायंवासदमिद्भ्रातंरंवा ।
वेशंवानित्यंवरुणारंणंवायत्सीमागश्चकृमाशिश्रथस्तत् ॥ ७ ॥

अर्यम्यंम् । वरुण । मित्र्यंम् । वा । सखायम् । वा । सदंम् । इत् । भ्रातंरम् । वा । वेशम् । वा । नित्यंम् । वरुण । अरंणम् । वा । यत् । सीम् । आगंः । चकृम । शिश्रथंः । तत् ॥ ७ ॥

हेवरुणअर्यम्यं अर्यमैवार्यम्यः स्वार्थिकोयत् अर्तेरिदंरूपं प्रदातारमित्यर्थः अथवा इरणान्मननाच्चशास्तीतिअर्यमा गुरुः तंवा अथवा मित्र्यं ञिमिदास्नेहनइत्यस्मात्स्वार्थिकोयत्

अनुरक्तमित्यर्थः वाअथवा सखायं समानख्यानं सदमित् सर्वदैव भ्रातरंवा नित्यं निरन्तरं वेशं निकटनिकेतनवर्तिनंवा अरणंवा अशब्दमित्यर्थः अथवा रणमदातारंवा नित्यंनिरन्तरं एतान्प्रतियत्सीं यदेतदागोपराधं चकृम तच्छिश्रथोस्मत्तोविनाशय ॥ ७ ॥

अथाष्टमी—

कितवासोयद्रिरिपुर्नदीवियद्वांघासत्यमुतयंनविद्म ।
सर्वातानिष्यंशिथिरेवदेवाधातेस्यामवरुणप्रियासः ॥ ८ ॥ ३१ ॥

कितवासः । यत् । रिरिपुः । न । दीवि । यत् । वा । घ । सत्यम् ।
उत । यत् । न । विद्म । सर्वा । ता । वि । स्य । शिथिराऽइंव ।
देव । अर्ध । ते । स्याम । वरुण । प्रियासः ॥ ८ ॥ ३१ ॥

कितवासः कितवाद्यूतकृतः किंतवास्ति सर्वं मयाजितमितिवदतीतिकितवः नदीवि नदेवने द्यूते यथायद्रिरिपुः लेपयन्ति पापमारोपयन्ति यदस्मासु द्वेष्टारोमयि त्वमेतत्पापमकरोरित्याक्षिपन्ति अत्र पुरस्तादुपचारोपिनकारउपमार्थीयः वा अथवा घेतिपूरणः यत्पापंसत्यं आरोपमन्तरेणकृतवन्तःस्म उत अपिच यत्कृतंपापं नविद्म नजानीमः ता तानि सर्वा सर्वाणि शिथिरेव शिथिलानीव शिथिलबन्धनानिफलानीव विष्य मोचय स्यतिरुपसृष्टोविमोचने हेदेव अध अनन्तरं ते तव प्रियासः प्रियाः स्याम भवेम ॥ ८ ॥

॥ इतिचतुर्थस्यचतुर्थेएकत्रिंशोवर्गः ॥ ३१ ॥

इन्द्राग्नीयमितिषळृचंचतुर्दशंसूक्तं अत्रेरार्षमानुष्टुभमैन्द्राग्नं षष्ठीविराट्पूर्वा आद्यौदशकावष्टकास्त्रयइतिपरिभाषितत्वात् तथाचानुक्रान्तम्—इन्द्राग्नीषळैन्द्राग्नमानुष्टुभंविराट्पूर्वान्तमिति विनियोगोलैंगिकः ।

तत्रप्रथमा—

इन्द्राग्नीयमवंथउभावाजेषुमर्त्यम् ।
दृळ्हाचित्सप्रभेदतिद्युम्नावाणीरिवत्रितः ॥ १ ॥

इन्द्राग्नी इति । यम् । अवंथः । उभा । वाजेषु । मर्त्यम् । दृळ्हा ।
चित् । सः । प्र । भेदति । द्युम्ना । वाणीःऽइव । त्रितः ॥ १ ॥

हेइन्द्राग्नी उभा उभौ परस्परावियुक्तौ युवां यंमर्त्यमवथः रक्षथः वाजेषु संग्रामेषु समर्त्योदृह्लाचिद् दृढान्यपिद्युम्ना द्योतमानानि धनानिशत्रुसंबन्धीनि प्रभेदति प्रकर्षेणभिनत्ति त्रितऋषिर्वाणीरिव प्रतिवादिवाक्यानीव अथवा त्रिषुस्थानेषु वर्तमानोग्निः शत्रूणां वाक्यानीव ॥ १ ॥

अथद्वितीया–

यापृतनासुदुष्टरायावाजेषुश्रवाय्या ।
यापञ्चचर्षणीरभीन्द्राग्नीताहवामहे ॥ २ ॥

या । पृतनासु । दुस्तरा । या । वाजेषु । श्रवाय्या । या । पञ्च ।
चर्षणीः । अभि । इन्द्राग्नी इति । ता । हवामहे ॥ २ ॥

या याविन्द्राग्नी पृतनासु संग्रामेषु दुष्टरा दुष्टरौ अनभिभाव्यौ या यौच वाजेषु संग्रामेषु अन्नेषुवा श्रवाय्या श्रवाय्यौ स्तुत्यौ या यौ पंचचर्षणीः चर्षणयोमनुष्याः तानभिरक्षतइतिशेषः ता तौ महानुभावौहवामहे स्तुमः ॥ २ ॥

अथतृतीया–

तयोरिदमवच्छवस्तिग्मादिद्युन्मघोनोः ।
प्रतिद्रुणागभस्त्योर्गवांवृत्रघ्नएषते ॥ ३ ॥

तयोः । इत् । अमऽवत् । शवः । तिग्मा । दिद्युत् । मघोनोः । प्रति ।
द्रुणा । गभस्त्योः । गवाम् । वृत्रऽघ्ने । आ । ईषते ॥ ३ ॥

अमवत् अभिभावुकं शवोबलं तयोरित् तयोरेव मघोनोर्मघवतोरन्नवतोर्धनवतोर्वा तयोर्दिद्युत् वज्रं तिग्मा तीक्ष्णं वर्तते गभस्त्योर्हस्तयोः एवंभूतौदेवौ गवामुदकानां पणिभिरपहृतानांवागवांलाभाय द्रुणा द्रुविकारेण गमनशीलेनवैकेनरथेन वृत्रघ्ने आवरकमेघहननाय तथाविधवृत्रासुरवधायवा प्रतिईषते प्रतिगच्छतः ॥ ३ ॥

अथचतुर्थी—

तावामेषेरथानामिन्द्राग्नीहवामहे ।
पतींतुरस्यराधसोविद्वांसागिर्वणस्तमा ॥ ४ ॥

ता । वाम् । एषे । रथानाम् । इन्द्राग्नी इति । हवामहे । पती इति ।
तुरस्य । राधसः । विद्वांसा । गिर्वणःऽतमा ॥ ४ ॥

हेदेवौ ता तौ वक्ष्यमाणगुणौ वां युवां हवामहे स्तुमः किमर्थं रथानामेषेयुद्धे रथानांप्रेरणाय कीदृशौयुवां इन्द्राग्नीइंद्रमग्निंचपरस्परयुग्मभूतौ तुरस्य जंगमरूपस्य राधसोधनादिलक्षणस्य धनस्य पती स्वामिनौ विद्वांसा सर्वज्ञौ गिर्वणस्तमा गीर्भिर्वननीयतमौ ईदृशौयुवां हवामहे॥४॥

अथपंचमी—

तावृधन्तावनुद्यून्मर्तायदेवावदभा ।
अर्हन्ताचित्पुरोदधेंशेवदेवावर्वते ॥ ५ ॥

ता । वृधन्तौ । अनु । द्यून् । मर्ताय । देवौ । अदभा । अर्हन्ता ।
चित् । पुरः । दधे । अंशाऽइव । देवौ । अर्वते ॥ ५ ॥

ता तौ अनुद्यून् प्रतिदिनं वृधन्तौ वर्धमानौ सर्वदाप्रवृद्धावित्यर्थः वर्धनेदृष्टान्तः मर्तेव मनुष्याविव तौयथाप्रतिदिनंवर्धेते देवौ द्योतमानौ अदभा अहिंस्यौ अर्हताचित् प्रकर्षेणपूज्यौ चिदितिपूजायां तादृशौमहानुभावौदेवावर्वतेश्वलाभाय पुरोदधे पुरस्कुर्वे अंशेव अंशोनामद्वादशादित्यमध्यवर्तीदेवः सभगस्याप्युपलक्षकः अंशाविव आदित्याविवदीप्तावित्यर्थः ॥ ५ ॥

अथषष्ठी—

एवेन्द्राग्निभ्यामहाविहव्यंशूष्यंघृतंनपूतमद्रिभिः ।
तासूरिषुश्रवोबृहद्रयिंगृणत्सुदिधृतमिषंगृणत्सुदिधृतम् ॥६॥३२॥

एव । इन्द्राग्निऽभ्याम् । अहावि । हव्यम् । शूष्यम् । घृतम् ।
न । पूतम् । अद्रिऽभिः । ता । सूरिषु । श्रवः । बृहत् । रयिम् ।
गृणत्ऽसु । दिधृतम् । इषम् । गृणत्ऽसु । दिधृतम् ॥ ६ ॥ ३२ ॥

एव एवं इदानींक्रियमाणप्रकारेणस्तुतिसाहित्येनेत्यर्थः इन्द्राग्निभ्यां हव्यं हविः अहावि परित्यक्तमासीव् कीदृशंतव् शूष्यं बलकरं किमिव अद्रिभिर्ग्रावभिः पूतमभिषुतं घृतंन सोमरसमिव तद्यथायुवाभ्यांप्रदीयते तद्वच्चरुपुरोडाशादिकमपि ता तौदेवौ सूरिषु मेधाविष्वस्मासु बृहत्प्रभूतं श्रवोन्नं यशोवा रयिंधनंच दिधृतं धारयतं इषमन्नं गृणत्सु स्तुवत्सु दिधृतंपुनरुक्तिरादरार्था ॥ ६ ॥

॥ इतिचतुर्थस्यचतुर्थेद्वात्रिंशोवर्गः ॥ ३२ ॥

प्रवोमहइतिनवर्चंपंचदशंसूक्तं एवयामरुदाख्यस्यात्रेयस्यमुनेरार्षं मरुद्देवताकमतिजगतीछन्दस्कं तथाचानुक्रमणिका—प्रवोनवैवयामरुन्मारुतमतिजागतमिति। दशरात्रेषष्ठेहनितृतीयसवनेच्छावाकशस्त्रे इदंसूक्तं सूत्रितंच—एवयामरुदुक्थोवृषाकपिनेति ।

तत्रप्रथमा—

प्रवोमहेमतयोयन्तुविष्णवेमरुत्वतेगिरिजाएवयामरुत् ।
प्रशर्धायप्रयंज्यवेसुखादयेतवसेभन्ददिष्टयेधुनिव्रतायशवसे ॥ १ ॥

प्र । वः । महे । मतयः । यन्तु । विष्णवे । मरुत्वते । गिरिऽजाः ।
एवयामरुत् । प्र । शर्धाय । प्रऽयज्यवे । सुऽखादये । तवसे ।
भन्दत्ऽइष्टये । धुनिऽव्रताय । शवसे ॥ १ ॥

प्रयन्तु प्रगच्छन्तु गिरिजाः वाचिनिष्पन्नामतयस्तुतयः कस्मै वस्तुभ्यं वचनव्यत्ययः विष्णवेव्याप्तायेन्द्राय विष्णवेवा मरुत्वते मरुद्भिस्तद्वते कस्यस्तुतयइत्युच्यते एवयामरुत् एतन्नामकस्यऋषेः षष्ठ्यालुक् अथवा यमृषिर्गिरिजाः स्तुतेर्जनयिताभवति उत्तरार्धेमरुत्स्तुतिः किंच प्रयन्तुस्तुतयः कस्मै शर्धाय बलाय मारुताय इतरत्सर्वंबलविशेषणं प्रयज्यवे प्रकर्षेणयष्टव्याय सुखादयेशोभनाभरणाय खादिराभरणविशेषः हस्तेषुखादिश्चपत्सुखादयइतिचश्रुतेः तवसे बलवते भंददिष्टये स्तुतिरूपाइष्टिर्यस्यतव्भन्ददिष्टि तस्मै धुनिव्रताय मेघानांचालनं कर्मयस्य तादृशाय शवसे गमनवते ॥ १ ॥

---

१ ऋ०सं० २. ४. ६. । २ ऋ० सं० ४. ३. १६. ।

अथद्वितीया–

प्रयेजातामहिनायेचनुस्वयंप्रविद्मनाब्रुवतंएवयामरुत्।
क्रत्वातद्वोमरुतोनाधृषेशवोदानामह्नातदेषामधृष्टासोनाद्रयः ॥२॥

प्र। ये। जाताः। महिना। ये। च। नु। स्वयम्। प्र। विद्मना।
ब्रुवते। एवयामरुत्। क्रत्वा। तत्। वः। मरुतः। न। आऽधृषे।
शवः। दाना। मह्ना। तत्। एषाम्। अधृष्टासः। न। अद्रयः॥ २ ॥

ये महिना महता विष्णुनेन्द्रेणवासह प्रजाताः प्रादुर्भूताः तान्ब्रुवते येच नु क्षिप्रं स्वयमेव विद्मना यज्ञगमनविषयज्ञानेनसहप्रजाताः प्रादुर्भूताः तान् मरुतःएवयामरुत् ब्रुवते स्तौति प्रेत्ययमाख्यातेनवा संबन्धनीयः(ब्रुवतइतिव्यत्ययेनबहुवचनं एकवचनेवाछान्दसःशः निघाताभावश्छान्दसः)अथप्रत्यक्षवादः हेमरुतोवोयुष्माकं तत्प्रसिद्धं शवोबलं क्रत्वाचालनादिरूपेण कर्मणायुक्तं नाधृषे कैश्चिदप्याधर्षणीयंनभवति अन्येषामसुरादीनां क्रत्वा कर्मणावानभिभाव्यंभवति कृत्यार्थेकेन् किंचैषांवः तद्बलं दाना अभिमतदानेन मह्ना महत्त्वेनचोपेतं यूयं प्रबलाः अधृष्टासः अधर्षणीयाः तत्रदृष्टान्तः अद्रयोन तेयथाअधृष्याः तद्वद्यूयमपि ॥ २ ॥

अथतृतीया–

प्रयेदिवोबृहतःशृण्विरेगिरासुशुक्वानःसुभ्वएवयामरुत्।
नयेषामिरीसधस्थईष्टआँअग्नयोनस्वविद्युतःप्रस्पन्द्रासोधुनीनाम् ॥३॥

प्र। ये। दिवः। बृहतः। शृण्विरे। गिरा। सुऽशुक्वानः। सुऽभ्वः।
एवयामरुत्। न। येषाम्। इरी। सधऽस्थे। ईष्टे। आ। अग्नयः।
न। स्वऽविद्युतः। प्र। स्पन्द्रासः। धुनीनाम्॥ ३ ॥

येमरुतोबृहतोदिवोद्युलोकादागच्छन्तः प्रशृण्विरे शृण्वन्ति तान्मरुतोगिरा एवयामरुत्स्तुतवान् कीदृशास्ते शुशुक्वानोदीप्ताः सुभ्वः सुष्ठुभवन्तः येषांमरुतां सधस्थे सहस्थाने स्वकीयेनिवासे तिष्ठतां इरी ईरिता प्रेरिता नेष्टे आनेशतेच चालयितुं आइतिचार्थे अग्नयोन अग्नयइव स्वविद्युतःस्वयमेवविद्योतमानाः धुनीनां नदीनां स्पंद्रासः वर्षणेनचालयितारश्च ॥ ३ ॥

अथचतुर्थी–

सचंक्रमेमहतोनिरुरुक्रमःसमानस्मात्सदसएवयामरुत् ।
यदायुक्तत्मनास्वादधिष्णुभिर्विष्पर्धसोविमहसोजिगातिशेवृधोनृभिः॥४॥

सः । चक्रमे । महतः । निः । उरुऽक्रमः । समानस्मात् । सदसः ।
एवयामरुत् । यदा । अयुक्त । त्मना । स्वात् । अधि । स्नुऽभिः ।
विऽस्पर्धसः । विऽमहसः । जिगाति । शेऽवृधः । नृऽभिः ॥ ४ ॥

समरुद्गणोमहतः प्रवृद्धात् समानस्मात् सर्वेषांसाधारणात् सदसःस्थानादन्तरिक्षात् उरुक्रमोविस्तीर्णक्रमणःसन् निश्चक्रमे निरगच्छत् कदेत्युच्यते एवयामरुदृषिः यदा स्वात्स्वकीयस्थानात् अधीतिपंचम्यर्थानुवादी त्मना आत्मनैव स्नुभिर्गन्तृभिर्नृभिः स्वनेतृभिरश्वैरयुक्त युक्तोभवदागमनप्रार्थनाय अथ बहुवदुच्यते तदानीं विस्पर्धसःविविधस्पर्धाः अहंपुरतोगच्छाम्यहं पुरतोगच्छामीति तेषांस्पर्धा अथवा विगतस्पर्धानह्येषांसार्धस्पर्धकाःसन्ति विमहसोविशिष्टबलाः शेवृधःशेवस्यसुखस्यवर्धयितारः जिगाति निर्गच्छन्ति व्यत्ययेनैकवचनम् ॥ ४ ॥

अथपंचमी–

स्वनोनवोमवान्रेजयद्वृषात्वेषोययिस्तविषएवयामरुत् । येनासहन्तऋञ्जतस्वरोचिषःस्थारश्मानोहिरण्ययाःस्वायुधासइष्मिणः॥५॥२३॥

स्वनः । न । वः । अमऽवान् । रेजयत् । वृषा । त्वेषः । ययिः ।
तविषः । एवयामरुत् । येन । सहन्तः । ऋञ्जत । स्वऽरोचिषः ।
स्थाःऽरश्मानः । हिरण्ययाः । सुऽआयुधासः । इष्मिणः ॥ ५ ॥२३॥

हेमरुतोवोयुष्माकं स्वनोवेगजनितःशब्दोनरेजयत् नकंपयतु एवयामरुतंमां सुपांसुलुगितिद्वितीयायालुक् स्वनोविशेष्यते अमवान् बलवान् वृषा वर्षितावृष्टेः त्वेषोदीप्तः ययिर्गन्ता तविषः प्रवृद्धः येनस्वनेनसहन्तः शत्रूनभिभवन्तोयूयं ऋंजत प्रसाधयथ लडर्थेलोट् कीदृशायू-

यं स्वरोचिषः स्वायत्तरश्मयः स्थारश्मानः स्थिररश्मयोहिरण्मयाः हिरण्याभरणाः स्वायुधासः स्वायत्तायुधाः इष्मिणोन्नवन्तोगमनवन्तोवा ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेत्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथषष्ठी—

अपारोवोमहिमावृद्धशवसस्त्वेषंशवोवत्वेवयामरुत् ।
स्थातारोहिप्रसितौसंदृशिस्थनतेनउरुष्यतानिदःशुशुक्वांसोनाग्नयः ॥ ६ ॥

अपारः । वः । महिमा । वृद्धऽशवसः । त्वेषम् । शवः । अवतु । एवयामरुत् । स्थातारः । हि । प्रऽसितौ । सम्ऽदृशि । स्थन । ते । नः । उरुष्यत । निदः । शुशुक्वांसः । न । अग्नयः ॥ ६ ॥

हेमरुतोवोयुष्माकं महिमा अपारोनवधिकः हेवृद्धशवसः प्रवृद्धबलाः त्वेषं दीप्तं शवो- युष्माकंबलमवतुरक्षतु एवयामरुतंमां द्वितीयैकवचनस्यलुक् यूयंप्रसितौ प्रबलबन्धने नियमन- वतियज्ञे संदृशि संदर्शनेनिमित्ते स्थातारोहि स्थाननियमेनतिष्ठन्तोस्थन भवथखलु तेनोस्मा- न्निदोनिन्दकाच्छत्रोःसकाशादुरुष्यतरक्षत अग्नयइवशुशुक्वांसोदीप्ताःयूयमिति ॥ ६ ॥

अथसप्तमी—

तेरुद्रासःसुमखाअग्नयोयथातुविद्युम्नाअवन्त्वेवयामरुत् ।
दीर्घंपृथुपप्रथेसद्मपार्थिवंयेषामज्मेष्वामहःशर्धांस्यद्भुतैनसाम् ॥ ७ ॥

ते । रुद्रासः । सुऽमखाः । अग्नयः । यथा । तुविऽद्युम्नाः । अवन्तु । एवयामरुत् । दीर्घम् । पृथु । पप्रथे । सद्म । पार्थिवम् । येषाम् । अज्मेषु । आ । महः । शर्धांसि । अद्भुतऽएनसाम् ॥ ७ ॥

तेमरुतोरुद्रासोरुद्रपुत्राः सुमखाः शोभनयज्ञाः अग्नयोयथाग्नयइव तुविद्युम्नाः प्रभूतदी- प्तयः अथवाग्निसदृशाः तुविद्युम्नाः प्रभूतधनाः अवन्तु रक्षन्तु एवयामरुत् एतन्नामानमृषिंमां-

पार्थिवं पृथिव्यत्रान्तरिक्षं तत्संबन्धि दीर्घं आयतं पृथु विस्तीर्णं सद्म सदनं पप्रथे मरुद्भिःप्रथितमभूत् अद्धुवैनसां अपापानांयेषां अज्मेषु गमनेषु महोमहान्ति शर्धांसिच बलानि आगच्छन्तीतिशेषः ॥ ७ ॥

अथाष्टमी—

अद्वेषोनोमरुतोगातुमेतनश्रोताहवंजरितुरेवयामरुत् ।
विष्णोर्महःसमन्यवोयुयोतनस्मद्रथ्यो३ंनदंसनापद्वेषांसिसनुतः॥८॥

अद्वेषः । नः । मरुतः । गातुम् । आ । इतन । श्रोत । हवम् ।
जरितुः । एवयामरुत् । विष्णोः । महः । सऽमन्यवः । युयोतन ।
स्मत् । रथ्यः । न । दंसना । अप । द्वेषांसि । सनुतरिति ॥ ८ ॥

हेमरुतः अद्वेषः अद्वेषसोयूयं नोस्माकं गातुं गमनस्वभावंस्तोत्रंप्रति आइतन आगच्छत तदर्थं जरितुः स्तोतुरेवयामरुत् एवयामरुतोममहवं श्रोत शृणुत विष्णोर्व्यापकस्येन्द्रस्य महोमहतो हेसमन्यवः समानयज्ञाः यूयं स्मत् अयंप्रशस्तनाम प्रशस्तारथ्योन रथिनोयोद्धारइव तेयथाशत्रूनपाकुर्वन्ति तद्वदस्माकं दंसना कर्मणा सनुतः अन्तर्हितनामैतत् अन्तर्हितान् द्वेषांसि द्वेष्टॄन् अपयुयोतन दूरेवियोजयत पृथक्कुरुत ॥ ८ ॥

एषाअध्यायोपाकरणोत्सर्जनयोर्विनियुक्ता ।

अथनवमी—

गन्तानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षएवयामरुत् ।
ज्येष्ठासोनपर्वतासोव्योमनियूयंतस्यप्रचेतसःस्यातदुर्धर्तवोनिदः ॥ ९ ॥ ३४ ॥

गन्त । नः । यज्ञम् । यज्ञियाः । सुऽशमि । श्रोत । हवम् । अरक्षः ।
एवयामरुत् । ज्येष्ठासः । न । पर्वतासः । विऽओमनि । यूयम् ।
तस्य । प्रऽचेतसः । स्यात । दुःऽधर्तवः । निदः ॥ ९ ॥ ३४ ॥

हेयज्ञियाः मरुतोयूयं नोस्माकंयज्ञं गन्त आगच्छत सुशमि शोभनकर्मयथाभवतित-था सुकर्मत्वायेत्यर्थः तदर्थं नोहवं अस्मदीयमाह्वानं श्रोत शृणुत अरक्षः रक्षोवर्जितायूयं लिंगवचनयोर्व्यत्ययः ज्येष्ठासोन ज्येष्ठाइव पर्वतासः विन्ध्यादयइव अतिप्रवृद्धाव्योमनिअन्त-रिक्षेवर्तमानाः प्रचेतसः प्रवृद्धज्ञानाः यूयं तस्यनिदोनिन्दकस्य दुर्धर्तवोदुर्धराः स्यात भवत ॥९॥

॥ इतिचतुर्थस्यचतुर्थेचतुस्त्रिंशोवर्गः ॥३४॥

॥ इतिपंचमेमंडलेषष्ठोनुवाकः ॥ ६ ॥

॥ समाप्तंचात्रेयंपंचमंमंडलम् ॥ ५ ॥

भारद्वाजेषष्ठेमंडले षडनुवाकाः तत्र प्रथमेनुवाकेपंचदशसूक्तानि तत्रत्वंह्यग्नइतित्रयोदशर्चंप्रथमंसूक्तं त्वंह्यग्नेसप्तोनेतिबार्हस्पत्योभरद्वाजः षष्ठंमंडलमपश्यदित्यनुक्रान्तत्वात् मंडलद्रष्टासएवभरद्वाजऋषिः अनादेशपरिभाषयात्रिष्टुप् मंडलादिपरिभाषयाग्निर्देवता पशोर्हविष्यवदीयमानेमैत्रावरुणेनानुवचनीयमिदंमनोतासूक्तं सूत्रितंच—त्वंह्यग्नेप्रथमइत्यन्वाहेति । प्रातरनुवाके आग्नेयेक्रतौत्रैष्टुभेछन्दस्येतदादिसूक्तषट्कं द्वितीयवर्जं सूत्रितंच—त्वंह्यग्नेप्रथमइतिषण्णांद्वितीयमुद्धरेदिति आद्योपाकरणेविनियुक्ता सूत्रंतुपूर्वमंत्रेउक्तम् ।

तत्रप्रथमा—

त्वंह्य॑ग्ने प्रथ॒मो म॒नोता॒स्या धि॒यो अभ॑वो दस्म॒ होता॑ ।
त्वं सीं॑ वृषन्नकृणोर्दु॒ष्टरी॑तु॒ सहो॒ विश्व॑स्मै॒ सह॑से॒ सह॑ध्यै ॥ १ ॥

त्वम् । हि । अ॒ग्ने॒ । प्र॒थ॒मः । म॒नोता॑ । अ॒स्याः । धि॒यः । अभ॑वः । द॒स्म॒ । होता॑ । त्वम् । सी॒म् । वृ॒ष॒न् । अ॒कृ॒णोः॒ । दु॒स्तरी॑तु । सह॑ः । विश्व॑स्मै । सह॑से । सह॑ध्यै ॥ १ ॥

हेअग्ने प्रथमोदेवानांमध्येप्रथमः प्रतमः प्रकृष्टतमः पूर्वभावीवात्वं मनोताहि देवानांमनोयत्रऊतंसंबद्धंभवतितादृशोभवसि हिशब्दोग्निःसर्वमनोता अग्नौमनोताःसंगच्छन्तेइत्यादिब्राह्मणप्रसिद्धिद्योतनार्थः हेदस्म दर्शनीय अस्याधियः अस्यकर्मणोहोता देवानामाह्वाता अभवः भवसि हेवृषन् कामानांवर्षितः त्वंसीं सर्वतःदुष्टरीतु दुर्हिंस्यमहिंस्यं सहोबलं अकृणोः अकरोः किमर्थं विश्वस्मैसहसे सर्वस्यापिबलवतःशत्रोः सहध्यै अभिभवनाय ॥ १ ॥

अथद्वितीया—

अधा॒ होता॒ न्य॑सीदो॒ यजी॑यानि॒ळस्प॒द इ॒षय॒न्नीड्यः॒ सन् ।
तं त्वा॒ नरः॑ प्रथ॒मं दे॑व॒यन्तो॑ म॒हो रा॒ये चि॒तय॑न्तो॒ अनु॑ग्मन् ॥ २ ॥

---

१ ऐ० ब्रा० २.१०.।

अर्ध । होता । नि । असीदः । यजीयान् । इळः । पदे । इषयन् । ईड्यः । सन् । तम् । त्वा । नरः । प्रथमम् । देवऽयन्तः । महः । राये । चितयन्तः । अनु । ग्मन् ॥ २ ॥

अथ अधुना हेअग्ने यजीयान् अतिशयेनयष्टात्वं होता होमनिष्पादकःसन् इळः भूम्याःवेदिलक्षणायाः पदे स्थाने न्यसीदोनिषण्णवानसि किंकुर्वन् इषयन् पशुपुरोडाशादिलक्षणमन्नमिच्छन् ईड्यः स्तुत्यःसन् तं तादृशं त्वा त्वां प्रथमं इतरदेवताभ्यःपूर्वं देवयन्तोदेवंत्वामात्मनइच्छन्तोनरोनेतारोमनुष्याऋत्विग्यजमानाः महोमहते रायेधनाय चितयन्तोजानन्तः स्तुत्याज्ञापयन्तोवा अनुग्मन् अन्वगच्छन्पूर्वम् ॥ २ ॥

अथतृतीया—

वृतेवयन्तंबहुभिर्वसव्यैस्त्वेरयिंजागृवांसोअनुग्मन् ।
रुशन्तमग्निंदर्शतंबृहन्तंवपावन्तंविश्वहादीदिवांसम् ॥ ३ ॥

वृताऽइव । यन्तम् । बहुऽभिः । वसव्यैः । त्वे इति । रयिम् । जागृऽवांसः । अनु । ग्मन् । रुशन्तम् । अग्निम् । दर्शतम् । बृहन्तम् । वपाऽवन्तम् । विश्वहा । दीदिऽवांसम् ॥ ३ ॥

वृतेव मार्गेणेवेति संप्रत्यर्थेलोकद्वयमध्यगतेनमार्गेण बहुभिरनेकैर्वसव्यैः वसुभिः स्वार्थिकस्तद्धितप्रत्ययः यजमानानांनिवासयोग्यैर्वासार्धं यन्तं गच्छन्तंत्वां अनुग्मन्अनुगच्छन्ति संभजन्तेयजमानाः कीदृशास्ते त्वे त्वयिदेवे रयिं धनं जागृवांसः प्रयच्छन्तइत्यर्थः कीदृशंत्वामित्युच्यते रुशन्तं दीप्तवर्णं अग्निं अंगनादिगुणविशिष्टं दर्शतं दर्शनीयं बृहन्तं महान्तं वपावन्तं विश्वहा सर्वेषुकालेषु दीदिवांसंदीप्यमानं ॥ ३ ॥

अथचतुर्थी—

पदंदेवस्यनमसाव्यन्तःश्रवस्यवःश्रवआपन्नमृक्तम् ।
नामानिचिद्दधिरेयज्ञियानिभद्रायान्तेरणयन्तसंदृष्टौ ॥ ४ ॥

पदम् । देवस्य । नमसा । व्यन्तः । श्रवस्यवः । श्रवः । आपन् ।
अमृक्तम् । नामानि । चित् । दधिरे । यज्ञियानि । भद्रायाम् ।
ते । रणयन्त । समऽदृष्टौ ॥ ४ ॥

देवस्य द्योतमानस्याग्नेः पदं आहवनीयस्थानं नमसा हविषा स्तोत्रेणवा व्यन्तोगच्छन्तः श्रवस्यवोन्नमिच्छन्तः पूर्वेयजमानाः श्रवः सर्वत्रश्रूयमाणमन्नं अमृक्तं अन्यैरपरिबाध्यं आपन् आप्नुवन्ति हेअग्नेतेतव भद्रायां स्तुत्यायां सन्दृष्टौ निमित्तायां रणयन्त रमयन्तित्वां किंच यज्ञियानि यज्ञयोग्यानि नामानि नमनीयानि वैश्वानरोजातवेदाइत्यादीनि दधिरे धारयन्ति अथवानमनसाधनानिस्तोत्राणिदधिरे चिदितिपूरणः ॥ ४ ॥

अथपंचमी—

त्वांवर्धन्तिक्षितयःपृथिव्यान्त्वांरायउभयासोजनानाम् ।
त्वंत्रातातरणेचेत्योभूःपितामातासदमिन्मानुषाणाम् ॥ ५ ॥३५॥

त्वाम् । वर्धन्ति । क्षितयः । पृथिव्याम् । त्वाम् । रायः ।
उभयासः । जनानाम् । त्वम् । त्राता । तरणे । चेत्यः । भूः । पिता ।
माता । सदम् । इत् । मानुषाणाम् ॥ ५ ॥ ३५ ॥

हेअग्ने त्वां क्षितयोमनुष्याऋत्विजः पृथिव्यां वेदिलक्षणायां वर्धन्ति वर्धयन्ति उभयासोउभयविधानिपश्वपशुरूपाणि जनानां यजमानानांसंबन्धीनि रायोधनानि ऋत्विजोध्वर्य्वादयः त्वांत्वामुद्दिश्यवर्धन्ति अथवा उभयविधानिधनानि गवादीनि जनानां जायमानानां पुत्रादीनामर्थाय प्राप्तुंत्वांवर्धन्ति हेतरणे दुःखात्तारकाग्ने त्वंचेत्योज्ञातव्यःस्तुत्यःसन् त्राता रक्षिता भूर्भवसि किंच मानुषाणां मनुष्याणांस्तोतृणामस्माकं सदमित्सर्वदा पितामाताच माता पितृस्थानीयोभूर्भवसि ॥ ५ ॥

॥ इतिचतुर्थस्यचतुर्थेपचत्रिंशोवर्गः ॥ ३५॥

अथषष्ठी–

सपर्येण्यःसप्रियोविक्ष्व१ग्निर्होतामन्द्रोनिषसादायजीयान् ।
तंत्वावयंदमआदीदिवांसमुपज्ञुबाधोनमसासदेम ॥ ६ ॥

सपर्येण्यः । सः । प्रियः । विक्षु । अग्निः । होता । मन्द्रः । नि । ससाद । यजीयान् । तम् । त्वा । वयम् । दमे । आ । दीदिऽवांसम् । उप । ज्ञुऽबाधः । नमसा । सदेम ॥ ६ ॥

सोग्निः सपर्येण्यः पूज्यः प्रियः कामानांपूरकः विक्षुप्रजासु होता होमनिष्पादकः मन्द्रो-मदनीयः यजीयानतिशयेनेतरदेवानांयष्टायजनीयोवा एवं महानुभावोग्निः निषसाद निषण्णो-भूत् अथप्रत्यक्षकृतः तंत्वा तादृशंत्वां वयं यजमानादमेगृहे दीदिवांसं दीप्यमानं ज्ञुबाधः जानुनीबाधयन्तः अवनतजानवः प्रणताःसन्तोनमसास्तोत्रेणोपासदेम आसादयेम अथवा उप-सीदेमेत्येवमाशास्ते ॥ ६ ॥

अथसप्तमी–

तंत्वावयंसुध्यो३नव्यमग्नेसुम्नायवईमहेदेवयन्तः ।
त्वंविशोअनयोदीद्यानोदिवोअग्नेबृहतारोचनेन ॥ ७ ॥

तम् । त्वा । वयम् । सुऽध्यः । नव्यम् । अग्ने । सुम्नऽयवः । ईमहे । देवऽयन्तः । त्वम् । विशः । अनयः । दीद्यानः । दिवः । अग्ने । बृहता । रोचनेन ॥ ७ ॥

हेअग्ने तं तादृशं महानुभावं नव्यं स्तुत्यं त्वा त्वां सुध्यः शोभनबुद्धयः सुम्नायवः सु-खमिच्छन्तोदेवयन्तोदेवंत्वामिच्छन्तोवयं ईमहे याचामहे स्तुमइत्यर्थः हेअग्ने त्वं दीद्यानोदी-प्यमानःसन् केन बृहता महता रोचनेन रोचमानेन तेजसा दीद्यानः विशः प्रजाः स्तोतॄनस्मान् दिवः स्वर्गं अनयः अगमयः रोचनेनादित्येन दिवंअगमयइतिवासंबन्धः आदित्यमार्गेणेत्यर्थः ॥ ७ ॥

अथाष्टमी—

विशांकविंविश्पतिंशश्वंतीनांनितोशनंवृषभंचर्षणीनाम् ।
प्रेतींषणिमिषयन्तंपावकंराजन्तमग्निंयजतंरयीणाम् ॥ ८ ॥

विशाम् । कविम् । विश्पतिम् । शश्वंतीनाम् । निऽतोशनम् । वृषभम् ।
चर्षणीनाम् । प्रेतिऽइषणिम् । इषयन्तम् । पावकम् । राजन्तम् ।
अग्निम् । यजतम् । रयीणाम् ॥ ८ ॥

शश्वतीनां नित्यानां विशां ऋत्विग्यजमानलक्षणानां विश्पतिं स्वामिनं कविं क्रान्तद-
र्शिनं नितोशनं शत्रूणांहिंसकं वृषभं कामानांवर्षकं चर्षणीनां स्तोतृणां मनुष्याणां प्रेतीष-
णिं प्राप्तगमनं इषयन्तं अन्नंकुर्वन्तं पावकं शोधकं राजन्तं दीप्यमानं दीपयन्तंवा रयीणांला-
भाय यजतं यष्टव्यं अग्निंस्तुमइतिशेषः ॥ ८ ॥

अथनवमी—

सोअग्नईजेशशमेचमर्तोयस्तआनट्समिधाहव्यदातिम् ।
यआहुतिंपरिवेदानमोभिर्विश्वेत्सवामादधतेत्वोतः ॥ ९ ॥

सः । अग्ने । ईजे । शशमे । च । मर्तः । यः । ते । आनट् । सम्ऽइधा ।
हव्यऽदातिम् । यः । आऽहुतिम् । परि । वेद । नमःऽभिः ।
विश्वा । इत् । सः । वामा । दधते । त्वाऽऊतः ॥ ९ ॥

हेअग्ने त्वां समर्तः सयजमानईजे यजते शशमेच स्तौति शशमानइतिस्तुति-
कर्मसुपाठात् इदमपिस्तुतिकर्म योयजमानस्तेतव समिधासह हव्यदातिं हविषांदानं
आनट् करोति किंच योयजमानोनमोभिःस्तुभिराहुतिमाज्यादिलक्षणां परिवेद परितोवेत्ति
ददातीत्यर्थः सयजमानस्त्वोतः त्वयारक्षितःसन् विश्वेत् सर्वाणि वामा वमनीयानि धनानि
दधतेधारयति ॥ ९ ॥

अथदशमी–

अस्माउतेमहिमहेविधेमनमोभिरग्नेसमिधोतहव्यैः ।
वेदीसूनोसहसोगीर्भिरुक्थैरातेभद्रायांसुमतौयतेम ॥ १० ॥

अस्मै । ऊँ इति । ते । महि । महे । विधेम । नमःऽभिः । अग्ने ।
सम्ऽइधा । उत । हव्यैः । वेदी । सूनो इति । सहसः । गीःऽभिः ।
उक्थैः । आ । ते । भद्रायाम् । सुऽमतौ । यतेम ॥ १० ॥

हेअग्ने महे महते अस्मै तेतुभ्यं महि महत् अत्यधिकंविधेम परिचरेम कैरितिउच्यते नमोभिःनमस्कारैः समिधावा उतापिच हव्यैर्हविर्भिः हेसहसःसूनो बलस्यपुत्र वेदी वेद्यां गीर्भिः स्तोत्रैरुक्थैः शस्त्रैश्च विधेमेतिसंबन्धः किंच ते तव भद्रायां स्तुत्यायां सुमतौ शोभनानुग्रहबुद्धौ आयतेम आगच्छेमभवेमेत्यर्थः ॥ १० ॥

अथैकादशी–

आयस्ततन्थरोदसीविभासाश्रवोभिश्चश्रवस्यस्तरुत्रः ।
बृहद्भिर्वाजैःस्थविरेभिरस्मेरेवद्भिरग्नेवितरंविभाहि ॥ ११ ॥

आ । यः । ततन्थ । रोदसी इति । वि । भासा । श्रवःऽभिः । च ।
श्रवस्यः । तरुत्रः । बृहत्ऽभिः । वाजैः । स्थविरेभिः । अस्मे इति ।
रेवत्ऽभिः । अग्ने । विऽतरम् । वि । भाहि ॥ ११ ॥

हेअग्ने यस्त्वं रोदसी द्यावापृथिव्यौ भासा दीप्त्या व्याततंथ व्यतनोः किंच तरुत्रः तारकस्त्वं श्रवोभिः स्तुतिभिः श्रवस्यश्चभवसि हेतादृशाग्ने बृहद्भिर्महद्भिर्वाजैरन्नैः स्थविरेभिः स्थविरैः स्थूलैः रेवद्भिःरयिमद्भिः अस्मदर्थं वितरं विशिष्टतरं विभाहि विशेषेणदीप्यस्व ॥ ११ ॥

अथद्वादशी—

नृवद्वसोसदमिद्धेह्यस्मेभूरितोकायतनयायपश्वः ।
पूर्वीरिषोबृहतीरारेअघाअस्मेभद्रासौश्रवसानिसन्तु ॥ १२ ॥

नृऽवत् । वसो इति । सदम् । इत् । धेहि । अस्मे इति । भूरि ।
तोकाय । तनयाय । पश्वः । पूर्वीः । इषः । बृहतीः । आरेऽअघाः ।
अस्मे इति । भद्रा । सौश्रवसानि । सन्तु ॥ १२ ॥

हेवसो वासक धनवन्वाग्ने नृवत् मनुष्यैरुपेतंधनं सदमित् सर्वदास्मेअस्मासु धेहि स्थापय किंच भूरि प्रभूतान् पश्वः पशूंश्च धेहि किमर्थं तोकायास्मत्पुत्राय तनयाय तत्पुत्राय किंच पूर्वीः पूरयित्र्यःकामानांबह्व्योवा महतीर्महत्यः आरेअघाः आरे दूरे अघानि यासु तास्तादृश्यइषःउक्तलक्षणान्यन्नानि भद्रा भद्राणि सौश्रवसानि सुश्रवस्त्वानि अस्मे अस्मासु सन्तुभवन्तु ॥ १२ ॥

पुरूण्यग्नइतित्रयोदशी उखासंभरणीयेष्टौ अग्नेःक्षत्रवतोनुवाक्या सूत्रितंच—पुरूण्यग्नेपुरुधात्वायासचित्रचित्रंचितयन्तमस्मेइति तत्पाठस्तु ।

अथत्रयोदशी—

पुरूण्यग्नेपुरुधात्वायावसूनिराजन्वसुतातेअश्याम् ।
पुरूणिहित्वेपुरुवारसन्त्यग्नेवसुविधतेराजनित्वे ॥ १३ ॥ ३६ ।

पुरूणि । अग्ने । पुरुधा । त्वाऽया । वसूनि । राजन् । वसुता । ते ।
अश्याम् । पुरूणि । हि । त्वे इति । पुरुऽवार । सन्ति । अग्ने ।
वसु । विधते । राजनि । त्वे इति ॥ १३ ॥ ३६ ॥

हेअग्ने राजन् ते तव पुरूणि बहूनि पुरुधा गवाश्वादिरूपेणबहुप्रकाराणि वसूनि धनानि वसुता वसुतायै वसुमत्त्वाय त्वायाहि त्वयाहेतुभूतेन अश्यां व्याप्नुयां भुंजीयवा अत्रभरतस्वामी वसुतेत्येतत्पदंसप्तम्यन्तंचकार भट्टभास्करमिश्रोपि एकपदंसंबुध्यन्तंचकार हेपुरुवार बहुभिर्वरणीयाग्ने राजनि राजमाने त्वे त्वयि पुरूणि बहूनि वसु वसूनि विधते परिचरते मह्यं दातव्यानिसन्ति ॥ १३ ॥

॥ इतिचतुर्थस्यचतुर्थेषट्त्रिंशोवर्गः ॥ ३६ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेचतुर्थोध्यायःसमाप्तः ॥४॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

॥ अथपञ्चमाध्यायआरभ्यते ॥

षष्ठमण्डलस्यषडनुवाकात्मकस्य प्रथमेनुवाकेपञ्चदशसूक्तानि तत्रत्वंहीत्येकादशर्चंद्वितीयंसूक्तम् भरद्वाजस्यार्षमाग्नेयम् अन्त्याषट्पञ्चाशदक्षराशक्करी आदितोदशानुष्टुभः अनुक्रम्यतेहि—त्वंह्येकादशानुष्टुभंशक्कर्यंतमिति प्रातरनुवाके आग्नेयेक्रतौ आनुष्टुभेछन्दसीदंसूक्तम् उत्तमावर्जंविनियुक्तम् सूत्र्यतेहि— त्वंहिक्षैतवदग्नायोहोताजनिष्टेति आश्विनशस्त्रेचैतच्छंसनीयं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् अङ्गिरसांद्विरात्रेद्वितीयेहनीदमेवसूक्तमाज्यशस्त्रं सूत्रितं च—त्वंहिक्षैतवदितिचाज्यमिति ।

तत्रप्रथमा—

त्वंहिक्षैतवद्यशोग्नेमित्रोनपत्यसे ।
त्वंविचर्षणेश्रवोवसोपुष्टिंनपुष्यसि ॥ १ ॥

त्वम् । हि । क्षैतऽवत् । यशः । अग्ने । मित्रः । न । पत्यसे ।
त्वम् । विऽचर्षणे । श्रवः । वसो इति । पुष्टिम् । न । पुष्यसि ॥ १ ॥

हेअग्ने त्वंहि त्वंखलुक्षैतवत्क्षितिःक्षयोपचयस्तत्संबन्धिक्षैतं शुष्ककाष्ठं तद्युक्तंयशोन्नंहविर्लक्षणंपत्यसे अभिपतसिगच्छसि तत्रदृष्टान्तः मित्रोन अहरभिमानीदेवोमित्रः सइव यद्वा यशइतिगृहनाम क्षैतवत् क्षैतं निवासकंहविर्लक्षणमन्नंतद्युक्तंयजमानगृहं मित्रभूतःपुरुषइवाभिपतसि यद्वा पत्यतिरैश्वर्यकर्मा ईदृशमन्नं पत्यसे ईशिषे अतःकारणात् हेविश्वचर्षणेविशेषेणसर्वस्यद्रष्टः वसो वासकाग्नेत्वं श्रवःश्रवणीयमन्नं यजमानगृहस्थंन अयंनशब्दश्चार्थे अन्नकार्यभूतांपुष्टिंच पुष्यसि वर्द्धयसि ॥ १ ॥

अथद्वितीया—

त्वांहिष्मांचर्षणयोयज्ञेभिर्गीर्भिरीळते ।
त्वांवाजीयात्यवृकोरजस्तूर्विश्वचर्षणिः ॥ २ ॥

त्वाम् । हि । स्म । चर्षणयः । यज्ञेभिः । गीःऽभिः । ईळते ।
त्वाम् । वाजी । याति । अवृकः । रजःऽतूः । विश्वऽचर्षणिः ॥ २ ॥

हेअग्ने त्वांहिस्म त्वामेवखलु चर्षणयोमनुष्यायज्ञेभिर्यज्ञसाधनैर्हविर्भिर्गीर्भिःस्तुतिभिरीळतेस्तुवन्ति अपिच वाजी वाजोगमनं तद्वान्सूर्यस्त्वां याति गच्छति प्रविशतीत्यर्थः तथा चश्रूयते—अग्निंवावादित्यःसायंप्रविशतितस्मादग्निर्दूरान्नक्तंददृशेइति वाजिशब्दश्चसूर्यवाचकत्वेनक्वचिछ्रूयते अग्निर्वायुःसूर्यः तेवैवाजिनइति वायुःसप्तिःआदित्योवाजीतिच कीदृशोवाजीअवृकोहिंसकरहितः रजस्तूः उदकमत्ररजउच्यते तस्यवृष्टिलक्षणस्यप्रेरयिता यद्वा रजसां लोकानां तरिता गन्ता विश्वचर्षणिः सर्वस्यद्रष्टा ॥ २ ॥

अथतृतीया—

सजोषस्त्वादिवोनरोयज्ञस्यकेतुमिन्धते ।
यद्धस्यमानुषोजनःसुम्नायुर्जुह्वेअध्वरे ॥ ३ ॥

सऽजोषसः । त्वा । दिवः । नरः । यज्ञस्य । केतुम् । इन्धते ।
यत् । ह । स्यः । मानुषः । जनः । सुम्नऽयुः । जुह्वे । अध्वरे ॥ ३ ॥

हेअग्ने सजोषः सजोषसः सहप्रीयमाणादिवःस्तुतेर्नरोनेतारऋत्विजः यज्ञस्यकेतुं प्रज्ञापकं त्वा त्वां इन्धते समिद्धंकुर्वन्ति कदेतिचेदुच्यते यद्ध यदाखलु स्यः समानुषोमनोरपत्यभूतोजनोजातोयजमानोहोतावा सुम्नयुः सुम्नंसुखमात्मनइच्छन् अध्वरे हिंसाप्रत्यवायरहितेयज्ञे जुह्वे त्वामाह्वयति तदेत्यर्थः ॥ ३ ॥

अथचतुर्थी—

ऋधद्यस्तेसुदानवेधियामर्तःशशमते ॥
ऊतीषबृहतोदिवोद्विषोअंहोनतरति ॥ ४ ॥

ऋधत् । यः । ते । सुऽदानवे । धिया । मर्तः । शशमते । ऊती ।
सः । बृहतः । दिवः । द्विषः । अंहः । न । तरति ॥ ४ ॥

---

१ तै० ब्रा० २.१.२. । २ तै० ब्रा० १.६.३. । ३ तै० ब्रा० १.७.८. ।

ऋधत् सयजमानः ऋध्नुयात् हेअग्ने सुदानवे शोभनदानाय तुभ्यं षष्ठ्यर्थेचतुर्थी तवसं-बन्धिन्या धिया कर्मणा योमर्तोमरणधर्मायजमानः शशमते शाम्यति यद्वा शमतिःस्तुतिकर्मा त्वदर्थकर्मणायुक्तःसन् स्तौतिसयजमानः बृहतोमहतः दिवोदीप्तस्यतव संबन्धिन्या ऊती ऊत्या रक्षया द्विषोद्वेष्टॄन् अंहोन आहननशीलंपापमिवतरत्यतिक्रामति ॥ ४ ॥

अथपञ्चमी—

समिधायस्तआहुतिंनिशितिंमर्त्योनशत् ।
वयावन्तंसपुष्यतिक्षयमग्नेशतायुषम् ॥ ५ ॥ १ ॥

सम्ऽइधा । यः । ते । आऽहुतिम् । निऽशितिम् । मर्त्यः । नशत् ।
वयाऽवन्तम् । सः । पुष्यति । क्षयम् । अग्ने । शतऽआयुषम् ॥ ५ ॥ १ ॥

हेअग्ने समिधासमिन्धनहेतुभूतेनेध्मेनसह ते त्वदीयां निशितिं निशितां तनूकृतां म-न्त्रसंस्कृतामाहुतिं योमर्त्योमनुष्यः नशत् व्याप्नुयात् नशतिर्व्याप्तिकर्मा समनुष्योयजमानः व-यावन्तं वयाः शाखाः पुत्रपौत्रादिलक्षणास्तद्युक्तं शतायुषं बहुविधान्नं चिरकालजीवनंवा क्षयंगृहं पुष्यति पोषयति वर्द्धयति तत्रचिरकालमवतिष्ठतइत्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यपञ्चमेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी—

त्वेषस्तेधूमऋण्वतिदिविषञ्छुक्रआततः ।
सूरोनहिद्युतात्वंकृपापावकरोचसे ॥ ६ ॥

त्वेषः । ते । धूमः । ऋण्वति । दिवि । सन् । शुक्रः । आऽततः ।
सूरः । न । हि । द्युता । त्वम् । कृपा । पावक । रोचसे ॥ ६ ॥

हेअग्ने त्वेषःदीप्तस्य तेतव शुक्रः निर्मलः शुभ्रवर्णोवाधूमः दिव्यन्तरिक्षे आ-ततोविस्तीर्णःसन् ऋण्वति मेघात्मनापरिणतोगच्छति अपिच हेपावक शोधकाग्ने सूरोन सूर्यइव कृपाअभिमुखीकरणसमर्थयास्तुत्या स्तूयमानस्त्वं द्युतादीप्त्या रोचसेहि दीप्यसे-खलु ॥ ६ ॥

अथसप्तमी–

अधाहिविक्ष्वीड्योसिप्रियोनोअतिथिः ।
रण्वःपुरीवजूर्यःसूनुर्नत्रय्याय्यः ॥ ७ ॥

अध । हि । विक्षु । ईड्यः । असि । प्रियः । नः । अतिथिः ।
रण्वः । पुरिऽइव । जूर्यः । सूनुः । न । त्रययाय्यः ॥ ७ ॥

अधापिच विक्षु प्रजासु हेअग्ने त्वमीड्यः स्तुत्योसि भवसि हियस्मादर्थे यस्मादेवं तस्मान्नोस्माकमतिथिः लुप्तोपममेतत् अतिथिरिवप्रियोसि यद्वा हविर्वहनाय सततगामीभूत्वास्माकंप्रियोसि तथा पुरीव नगर्यां जूर्यः जीर्णोवृद्धोहितोपदेष्टा राजेव रण्वोरमणीयोगन्तव्योवा भवसि तथा सूनुर्न पुत्रइव त्रययाय्यः यजमानैस्त्रातव्यः पालयितव्योभवसि त्रायतेरेतद्रूपं यद्वैतत्सूनोर्विशेषणं विद्यातपःकर्मलक्षणं त्रयंयातीतित्रययाय्यः यातेरौणादिकआय्यप्रत्ययः स्पृहयाय्यइतियथा अथवा त्रययाय्योजन्मत्रयंप्राप्तः जन्मत्रयंस्मर्यते मातुरग्रेधिजननंद्वितीयंमौंजिबन्धनात् । तृतीयंयज्ञदीक्षायाइतिजन्मत्रयंस्मृतमिति ॥ तादृशःपुत्रइतिरण्वोरमणीयोसि ॥ ७ ॥

अथाष्टमी–

क्रत्वाहिद्रोणेअज्यसेग्नेवाजीनकृत्व्यः ।
परिज्मेवस्वधागयोत्योनह्वार्यःशिशुः ॥ ८ ॥

क्रत्वा । हि । द्रोणे । अज्यसे । अग्ने । वाजी । न । कृत्व्यः ।
परिज्माऽइव । स्वधा । गयः । अत्यः । न । ह्वार्यः । शिशुः ॥ ८ ॥

हेअग्ने क्रत्वा कर्मणामन्थनरूपेण द्रोणे द्रुमेकाष्ठे अरण्यांविद्यमानस्त्वं अज्यसेहि यज्यसेखलु तथा वाजीन वेजनवानश्वइव कृत्व्यः कृत्वीतिकर्मनाम हविर्वहनादीनांकर्मणांकर्ता सयथा पुरुषंवहति तद्वद्धविर्वहनमग्नेरश्वसादृश्यं तथा परिज्मेव परितः सर्वत्रगन्तावायुरिव दावानलादिरूपेणसर्वत्रगन्तात्वं स्वधा अन्ननामैतत् अन्नं गयः गृहंच भवसि उभयोर्दातेत्यर्थः अपिच शिशुर्जातमात्रोबालोपि त्वमत्योन सततगामीजात्यश्वइव ह्वार्यः कुटिलमितस्ततोगन्तासि ह्वृकौटिल्ये इत्यस्यैतद्रूपम् ॥ ८ ॥

कारीर्यामग्नेर्धामच्छदोवैकल्पिक्यनुवाक्यात्वंत्येति सूत्रितंच–त्वन्त्याचिदच्युताधामन्नोविश्वमिति ।

सैषानवमी—

त्वंत्याचिदच्युताग्नेपशुर्नयवंसे ।
धामांहयत्तेंअजरवनांवृश्चन्तिशिक्वंसः ॥ ९ ॥

त्वम् । त्या । चित् । अच्युंता । अग्ने । पशुः । न । यवंसे ।
धामं । ह । यत् । ते । अजर । वनां । वृश्चन्ति । शिक्वंसः ॥ ९ ॥

हेअग्ने त्वन्त्या तानिकाष्ठानि चिच्छब्दोपिशब्दसमानार्थोभिन्नक्रमः अच्युताअच्युतानि च्यावयितुमशक्यान्यपि अत्सीतिशेषः तत्रदृष्टान्तः यवसे घासेविसृष्टः पशुरिव सयथा सर्वंभक्षयति तथा त्वं प्रौढकाष्ठादीनि क्षणमात्रेणदहसीत्यर्थः हेअजर जरारहिताग्ने यद्यस्य सुपांसुलुगितिषष्ठ्याअलुक् शिक्वसोदीप्तस्य ते तव धाम धामानि तेजांसि वना वननीयानिसंभजनीयान्यरण्यानि वृश्चन्ति छिन्दन्ति तक्षन्ति सत्वमितिपूर्वत्रान्वयः हेत्येतत्पादपूरणम् ॥ ९ ॥

अथदशमी—

वेषिह्यंध्वरीयतामग्नेहोतादमेंविशाम् ॥
समृधोंविश्पतेकृणुजुषस्वंहव्यमंङ्गिरः ॥ १० ॥

वेषिं । हि । अध्वरिऽयताम् । अग्नें । होतां । दमें । विशाम् ।
सम्ऽऋधंः । विश्पते । कृणु । जुषस्वं । हव्यम् । अङ्गिरः ॥ १० ॥

हेअग्ने अध्वरीयतां अध्वरंयज्ञमात्मनइच्छतां विशांयजमानानां दमे गृहे त्वंहोता देवानामाह्वातासन् वेषिहि स्तुतिंहवींषिवा यतःकामयसे अतःकारणात् विश्पते विशांपालकाग्ने समृधः समृद्धान् अस्मान्यजमानान् कृणु कुरु कृत्वाच हेअङ्गिरः अङ्गनादिगुणयुक्तः अङ्गाररूपवाग्ने हव्यं अस्मदीयंहविः जुषस्व सेवस्व ॥ १० ॥

अथैकादशी—

अच्छांनोमित्रमहोदेवदेवानग्नेवोचंःसुमतिंरोदंस्योः । वीहिस्वस्तिंसुक्षितिंदिवोनॄन्द्विषोअंहांसिदुरितातंरेमतातंरेमतवावंसातंरेम ॥ ११ ॥ २ ॥

अच्छ । नः । मित्रऽमहः । देव । देवान् । अग्ने । वोचः । सुऽमतिम् । रोदस्योः । वीहि । स्वस्तिम् । सुऽक्षितिम् । दिवः । नॄन् । द्विषः । अंहांसि । दुःऽइता । तरेम । ता । तरेम । तव । अवसा । तरेम ॥ ११ ॥ २ ॥

हेमित्रमहः अनुकूलदीप्ते देवदानादिगुणयुक्ताग्ने रोदस्योः द्यावापृथिव्योर्वर्तमानस्त्वं देवान्यष्टव्यानिन्द्रादीनच्छाभिमुख्येन नोस्माकंसुमतिं स्तुतिं वोचः ब्रूहि दिवःस्तुतेर्नॄन्नेतॄनस्मान् सुक्षितिं शोभननिवासयुक्तं स्वस्तिं अविनाशं वीहि गमय वेतिरत्रान्तर्भावितण्यर्थोद्रष्टव्यः वयंच द्विषोद्वेष्टॄन् शत्रूनंहांसिपापानि दुरिता तत्फलरूपाणि दुर्गमनानितरेम अतिक्रामेम तथा ता तानि व्यवहितानि जन्मान्तरकृतानिच पापादीनि तरेम उक्तएवार्थोदाढर्च्यायपुनरुच्यते हेअग्ने तवावसा रक्षणेन द्वेष्टॄप्रभृतीनत्यन्तंतरेम ॥ ११ ॥

॥ इतिचतुर्थस्यपञ्चमेद्वितीयोवर्गः ॥ २ ॥

अग्नेसक्षेषदित्यष्टर्चंतृतीयंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं अनुक्रान्तंच—अग्नेष्टौइति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रप्रथमा—

अग्नेसक्षेषदृतपाऋतेजाउरुज्योतिर्नशतेदेवयुष्टे ।
यंत्वंमित्रेणवरुणःसजोषादेवपासित्यजसामर्तमंहः ॥ १ ॥

अग्ने । सः । क्षेषत् । ऋतऽपाः । ऋतेऽजाः । उरु । ज्योतिः । नशते । देवऽयुः । ते । यम् । त्वम् । मित्रेण । वरुणः । सऽजोषाः । देव । पासि । त्यजसा । मर्तम् । अंहः ॥ १ ॥

हेअग्ने सयजमानः क्षेषत् क्षयति निवसति चिरकालंजीवेदित्यर्थः कीदृशोयजमानः ऋतपाः ऋतस्ययज्ञस्य पालकः ऋतेजाः यज्ञनिमित्तंजातः उषित्वाच तेत्वदियं देवयुर्देवानात्मनइच्छन् सयजमानः उरुविस्तीर्णं ज्योतिःसूर्याख्यं नशते प्राप्नोति हेदेव द्योतमानाग्ने यं मर्तं मनुष्यंयजमानं मित्रेण वरुणः तृतीयार्थेप्रथमा वरुणेनच सजोषाः सहप्रीयमाणस्त्वं त्यजसा त्याजनसाधनेनायुधेनांहःअंहसःपापात् पासि रक्षसि सयजमानइतिपूर्वत्रसंबन्धः ॥ १ ॥

अथद्वितीया–

ईजेयज्ञेभिःशशमेशमीभिर्ऋधद्वारायाग्नयेददाश ।
एवाचनतंयशसामजुष्टिर्नांहोमर्तंनशतेनप्रदृप्तिः ॥ २ ॥

ईजे । यज्ञेभिः । शशमे । शमीभिः । ऋधत्ऽवाराय । अग्नये ।
ददाश । एव । चन । तम् । यशसाम् । अजुष्टिः । न । अंहः ।
मर्तम् । नशते । न । प्रऽदृप्तिः ॥ २ ॥

योयजमानः ऋधद्वाराय ऋधत् समृद्धं वारं वरणीयं धनं यस्य तादृशायाग्नये ददृशे हवींषिददाति सयजमामः यज्ञेभिः सर्वैर्यज्ञैः ईजे इष्टवान्भवति तथाशमीभिः कर्मभिः कृच्छ्र-चान्द्रायणादिभिः शशमे शान्तश्चभवति आग्नेयेनयोगेनसर्वफलंलभतइत्यर्थः अपिच तंयज-मानं यशसां यशस्विनां पुत्राणां अजुष्टिरप्राप्तिर्नैव नशते नैवप्रामोति पुत्रवान्भवत्येवेत्यर्थः तथा मर्तं मनुष्यंतं अंहः पापं न नशते तथा प्रदृप्तिः अनर्थहेतुः प्रदर्पश्च तंनप्रामोति ॥ २ ॥

अथतृतीया–

सूरोनयस्यंदृशतिररेपाभीमायदेतिशुचतस्तआधीः ।
हेषस्वतःशुरुधोनायमक्तोःकुत्राचिद्रण्वोवसतिर्वनेजाः ॥ ३ ॥

सूरः । न । यस्य । दृशतिः । अरेपाः । भीमा । यत् । एति ।
शुचतः । ते । आ । धीः । हेषस्वतः । शुरुधः । न । अयम् ।
अक्तोः । कुत्र । चित् । रण्वः । वसतिः । वनेऽजाः ॥ ३ ॥

सूरोन सूर्यस्येवयस्याग्नेः दृशतिः दर्शनं अरेपाः पापरहितं हेअग्ने यत् यस्य ते तव शुचतोज्वलतः धीः धारयित्रीज्वाला भीमा भयङ्करासती आसमन्तादेति गच्छति योयमग्निः हेषस्वतः शब्दयुक्ताः शुरुधोन शुचः शोकस्यरोधयित्रीगाश्च अक्तोः अकु-रिविरात्रिनाम तेनच तत्रसञ्चारीराक्षसादिर्लक्ष्यते राक्षसादेःस्वभूतादददातीतिशेषः सोयंवसतिः सर्वेषामावासभूतः वनेजाः अरण्येजायमानः कुत्राचित् क्वचिदेवस्थाने पर्वताग्रादौ रण्वो रमणीयोभवति ॥ ३ ॥

अथचतुर्थी–

तिग्मंचिदेममहिवर्पोअस्यभसदश्वोनयमसानआसा।
विजेहमानःपरशुर्नजिह्वांद्रविर्नद्रावयतिदारुधक्षत् ॥ ४ ॥

तिग्मम्। चित्। एमं। महिं। वर्पः। अस्य। भसत्। अश्वः। न। यमसानः। आसा। विऽजेहमानः। परशुः। न। जिह्वाम्। द्रविः। न। द्रवयति। दारुं। धक्षत् ॥ ४ ॥

अस्याग्नेः एम गमनभूतोमार्गः तिग्मं तीक्ष्णं स्प्रष्टुमशक्यत्वात् अस्यचवर्पोरूपं म महत् प्रभूतं भसत् दीप्यते भसभर्त्सनदीप्त्योरितिधातुः कीदृशोग्निः अश्वोन अश्वइव आ आस्येन यमसानः तृणादिकंनियच्छन् तथापरशुर्न यथापरशुःस्वकीयांधारांकाष्ठेप्रक्षिप तथास्वकीयांजिह्वांज्वालांविजेहमानःतरुगुल्मादौप्रक्षिपन् तथा दारु काष्ठं धक्षत् दहन् द्रवि द्रविर्द्रावयिता स्वर्णकारः सयथा स्वर्णादिकंद्रावयति तथा सर्ववनंद्रावयति मूर्तभूतंसर्वंभस सात्करोतीत्यर्थः ॥ ४ ॥

अथपंचमी–

सइदस्तेवप्रतिधादसिष्यञ्छिशीततेजोयसोनधाराम्।
चित्रध्रजतिररतिर्योअक्तोर्वेर्नद्रुषद्वारघुपत्मजंहाः ॥ ५ ॥ ३ ॥

सः। इत्। अस्ताऽइव। प्रति। धात्। असिष्यन्। शिशीत। तेजः। अयसः। न। धाराम्। चित्रऽध्रजतिः। अरतिः। यः। अक्तोः। वेः। न। द्रुऽसद्वा। रघुपत्मऽजंहाः ॥ ५ ॥ ३ ॥

सइत् सखल्वग्निः अस्तेव बाणादेःक्षेप्तेव प्रतिधात् स्वकीयज्वालांप्रतिधत्ते यथाधन्व लक्ष्याभिमुख्येनबाणंसन्धत्ते तथा ज्वालांसन्धत्तइत्यर्थः प्रतिधायच असिष्यन् ज्वालांप्रक्षे प्स्यन् तेजःस्वकीयं शिशीत निश्यति तीक्ष्णीकरोति अत्रदृष्टांतः अयसोनधारां यथा अ योमयस्यपरश्वादेर्धारां प्रक्षेप्तुकामस्तीक्ष्णोकरोतितद्वत् तीक्ष्णीकृत्यच चित्रध्रजतिः विचि त्रगतिः अक्तोरात्रेः अरतिरभिगन्ता वेर्न पक्षीव द्रुषद्वा वृक्षेषुसीदन् रघुपत्मजंहाः लघुपतनस मर्थपादः एवंभूतःसन् योग्निर्वर्तते सइतिपूर्वत्रान्वयः ॥ ५ ॥

॥ इतिचतुर्थस्यपञ्चमेतृतीयोवर्गः ॥ ३ ॥

अथषष्ठी—

सईंरेभोनप्रतिंवस्तउस्राःशोचिषांरारपीतिमित्रमंहाः ।
नक्तंयईमरुषोयोदिवानॄनमंर्त्योअरुषोयोदिवानॄन् ॥ ६ ॥

सः । ईम् । रेभः । न । प्रति । वस्ते । उस्राः । शोचिषा । रारपीति ।
मित्रऽमंहाः । नक्तम् । यः । ईम् । अरुषः । यः । दिवा । नॄन् ।
अमर्त्यः । अरुषः । यः । दिवा । नॄन् ॥ ६ ॥

सईं सोयमग्निः रेभोन स्तुत्यः सूर्यइव उस्राः दीप्ताः ज्वालाः प्रतिवस्ते आच्छादयति तथा मित्रमहाः सर्वेषामनुकूलप्रकाशःसन् शोचिषा तेजसा रारपीति भृशंशब्दंकरोति यईम-यमग्निः नक्तं रात्रौ अरुषः आरोचमानःसन् दिवा अहनीव नॄन् मनुष्यान् स्वस्वकार्येप्रेरयति पुनर्यच्छब्दःपूरकः तथाऽमर्त्योऽमरणधर्मा अरुषआरोचमानोरोषरहितोवा योऽग्निः दिवा द्यो-तमानेनतेजसा नॄन्नेतॄन् आत्मीयान्रश्मीन् प्रेरयति सइतिपूर्वेणसंबन्धः यद्वा नक्तं रात्रौ योय-मग्निररुषः आरोचमानः यश्चमरणरहितोग्निः सः दिवा अह्नि नॄन्नेतॄन् देवान् हविर्भिः संयोजयति योदिवानॄनितिपुनरुक्तिरादरार्था ॥ ६ ॥

अथसप्तमी—

दिवोनयस्यंविधतोनवींनोद्वृषारुक्षओषंधीषुनूनोत् ।
घृणानयोध्रजंसापत्मंनायन्नारोदंसीवसुंनादंसुपत्नी ॥ ७ ॥

दिवः । न । यस्य । विधतः । नवीनोत् । वृषा । रुक्षः । ओषंधीषु ।
नूनोत् । घृणा । न । यः । ध्रजसा । पत्मंना । यन् । आ ।
रोदंसी इति । वसुंना । दम् । सुपत्नी इति सुऽपत्नी ॥ ७ ॥

दिवोन दीप्तस्यसूर्यस्येव विधतोविधातुः रश्मीकुर्वतोयस्याग्नेर्नवीनोत् भृशंशब्दोभूत् ए-तदेवव्याचष्टे वृषा कामानांवर्षिता रुक्षः दीप्तः सोग्निरोषधीषु दह्यमानासु नूनोत् भृशंशब्दम-करोत् यश्चघृणान सञ्चलनशीलेनदीप्तेनेव ध्रजसा गमनशीलेनतेजसा पत्मना इतस्ततउत्पत-ता यन् गच्छन् वर्तते सोग्निः दं अस्मच्छत्रून्दमयन् सुपत्नी शोभनपतिके रोदसी द्यावापृ-थिव्यौवसुना धनेन आपूरयति ॥ ७ ॥

अथाष्टमी—

धायोभिर्वायोयुज्येभिरर्कैर्विद्युन्नदविद्योत्स्वेभिःशुष्मैः।
शर्धोवायोमरुतांततक्षऋभुर्नत्वेषोरभसानोअद्यौत् ॥ ८ ॥ ४ ॥

धायःऽभिः। वा। यः। युज्येभिः। अर्कैः। विऽद्युत्। न।
दविद्योत्। स्वेभिः। शुष्मैः। शर्धः। वा। यः। मरुताम्। ततक्ष।
ऋभुः। न। त्वेषः। रभसानः। अद्यौत् ॥ ८ ॥ ४ ॥

योग्निः धायोभिर्वा धारकैरश्वैरिव युज्येभिः युज्यैः स्वयमेवयुज्यमानैरर्कैरर्चनीयैर्दीप्तिभिर्गच्छति सोग्निः विद्युन्न विद्युदिव स्वेभिः स्वकीयैः शुष्मैः शोषकैस्तेजोभिर्दविद्योत् विद्योतते यश्च मरुतां एतत्संज्ञकानांदेवानां शर्द्धोवा बलमिव ततक्ष तनूकरोति सर्वंतीक्ष्णीकरोतिशोषयतीतियावत् सोयं ऋभुर्न उरुभासमानःसूर्यइवत्वेषोदीप्तः रभसानोवेगंकुर्वन्अद्यौत् विद्योतते प्रकाशते ॥ ८ ॥

॥ इतिचतुर्थस्यपञ्चमेचतुर्थोवर्गः ॥ ४ ॥

यथाहोतरित्यष्टर्चंचतुर्थसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं यथाहोतरित्यनुक्रान्तं—प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

तत्रप्रथमा—

यथाहोतर्मनुषोदेवतातायज्ञेभिःसूनोसहसोयजासि।
एवानोअद्यसमनासमानानुशन्नग्नउशतोयक्षिदेवान् ॥ १ ॥

यथा। होतः। मनुषः। देवऽताता। यज्ञेभिः। सूनो इति। सहसः।
यजासि। एव। नः। अद्य। समना। समानान्। उशन्। अग्ने।
उशतः। यक्षि। देवान् ॥ १ ॥

हेहोतः देवानामाह्वातः सहसःसूनो बलस्यपुत्राग्ने यथा येनप्रकारेण मनुषः मनोः प्रजापतेः यजमानस्य देवताता यज्ञनामैतत् देवतातौ यज्ञे यज्ञेभिर्यजमानसाधनैर्हविर्भिः यजासि देवान्यजसि एव एवं हेअग्ने नोस्माकं अद्यास्मिन्यज्ञे समानान् त्वत्सदृशानिन्द्रादीनुशन्कामयमानस्त्वं उशतः कामयमानान्यष्टव्यान्देवान् समना क्षिप्रं यक्षि यज यद्वा समानंमन्यन्तेस्मिन्देवानितिसमनोयज्ञस्तस्मिन्नितियोज्यम् ॥ १ ॥

अथद्वितीया–

सनोविभावाचक्षणिर्नवस्तोरग्निर्वन्दारुवेद्यश्चनोधात् ।
विश्वायुर्योअमृतोमर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥ २ ॥

सः । नः । विभाऽवा । चक्षणिः । न । वस्तोः । अग्निः । वन्दारु ।
वेद्यः । चनः । धात् । विश्वऽआयुः । यः । अमृतः । मर्त्येषु ।
उषःऽभुत् । भूत् । अतिथिः । जातऽवेदाः ॥ २ ॥

वस्तोरहनि चक्षणिर्न प्रकाशकःसूर्यइव विभावा विशेषेणदीप्यमानः वेद्यः सर्वैर्ज्ञातव्यो-ऽम्भनीयोवा सोग्निः नोस्मभ्यं वन्दारु वन्दनीयं स्तुत्यं चनः अन्नं धात् दधातु प्रयच्छत्वित्य-र्थः विश्वायुः सर्वान्नः सर्वेषांजीवनहेतुर्वा अमृतोमरणरहितः अतिथिर्हविर्वहनाय सततगा-मी जातवेदाः जातानांवेदिता जातधनोवा एवंभूतोयोग्निः मर्त्येषु मनुष्येषु यजमानेषूषर्भुद्भू-दुषःकालेअग्निहोमार्थंप्रबुद्धोभवति सइतिपूर्वत्रान्वयः ॥ २ ॥

अथतृतीया–

द्यावोनयस्यंपनयन्त्यभ्वंभासांसिवस्तेसूर्योनशुक्रः ॥
वियइनोत्यजरःपावकोश्नस्यचिच्छिश्नथत्पूर्व्याणि ॥ ३ ॥

द्यावः । न । यस्य । पनयन्ति । अभ्वम् । भासांसि । वस्ते । सूर्यः ।
न । शुक्रः । वि । यः । इनोति । अजरः । पावकः । अश्नस्य ।
चित् । शिश्नथत् । पूर्व्याणि ॥ ३ ॥

नेतिसंप्रत्यर्थे उक्तंच अस्त्युपमार्थस्यसंप्रत्यर्थेप्रयोगइति द्यावः स्तोतारः सम्प्रतीदानीं यस्याग्नेरभ्वंमहत्कर्म पनयन्ति स्तुवन्ति सोग्निः सूर्योन सूर्यइव शुक्रः शुक्रवर्णःसन् भासांसि तेजांसि वस्ते आच्छादयति यश्चाजरोजरारहितः पावकः सर्वस्यशोधकोग्निः विइनोति भासा सर्वंव्याप्नोति सोयं अश्नस्यचित् व्यापनशीलस्यापिराक्षसादेः पूर्व्याणि चिरन्तनानि पुराणि शिश्नथत् हिनस्ति, श्नथक्रथहिंसायांइतिधातुः ॥ ३ ॥

अथचतुर्थी–

वद्माहिसूनोअस्यद्मसद्वांचक्रेअग्निर्जनुषाज्मान्नम् ।
सत्वंनऊर्जसनऊर्जंधाराजेवजेरवृकेक्षेष्यन्तः ॥ ४ ॥

वन्द्या । हि । सूनो इति । असि । अद्मऽसद्वा । चक्रे । अग्निः । जनुषा । अज्म । अन्नम् । सः । त्वम् । नः । ऊर्जऽसने । ऊर्जम् । धाः । राजाऽइव । जेः । अवृके । क्षेषि । अन्तः । इति ॥ ४ ॥

हेसूनो सहसस्पुत्र यद्वा षूप्रेरणे सर्वस्यप्रेरकाग्ने वन्द्या वदनीयः स्तुत्योसिहि परःपादः परोक्षकृतः अद्म सद्वा अद्मस्वदनीयेषु हविष्षुसीदन् हविःस्वीकरणायोपविशन्नग्निः जनुषा जन्मना स्वभावतएव अज्म गृहनामैतत् गृहमन्नंच यजमानानां चक्रे करोति हेऊर्जसने ऊर्ज-स्यान्नस्यदातरग्ने नोस्मभ्यं सतादृशस्त्वं ऊर्जमन्नं धाः धेहि तथा राजेवज्रेः अस्मच्छत्रून्जय एतत्सर्वार्थमवृकेराक्षसादिभिर्बाधकैर्वियुक्तेस्मदीयाग्न्यगारेन्तर्मध्ये क्षेषि निवससि ॥ ४ ॥

अथपंचमी—

नितिक्तियोवारणमन्नमत्तिवायुर्नराष्ट्र्यत्येत्यक्तून् । तुर्यामयस्तआदिशामरातीरत्योनह्रुतःपततःपरिह्रुत् ॥ ५ ॥ ५ ॥

निऽतिक्ति । यः । वारणम् । अन्नम् । अत्ति । वायुः । न । राष्ट्री । अति । एति । अक्तून् । तुर्याम । यः । ते । आऽदिशाम् । अरातीः । अत्यः । न । ह्रुतः । पततः । परिऽह्रुत् ॥ ५ ॥ ५ ॥

योग्निर्वारणं तमसांनिवारकं स्वकीयंतेजः नितिक्ति निश्यतितीक्ष्णीकरोति तिजनिशा-नेइतिधातुः यश्चान्नं यष्टृभिर्दीयमानं हविर्लक्षणमत्ति भक्षयति तथाचश्रूयते अन्नादोवाएषो न्नपतिःयदग्निरिति[1] सोग्निः वायुर्न वायुरिवराष्ट्रीईश्वरनाभैतत् राष्ट्रं राज्यं तद्वान्वायुर्यथा स्व-माहात्म्येनसर्वमीष्टे तद्वत्सर्वस्येश्वरइत्यर्थः तादृशःसन् अक्तून्रात्रीः अत्येति अतिक्रामति तद्ग-तमन्धकारंतिरस्करोतीत्यर्थः वयंच त्वत्प्रसादात् तुर्याम तं हिंस्याम योजनः ते तुभ्यं आदि-शामादिश्यमानानां दीयमानानांहविषां अरातीः अरातिरदाता छान्दसोदीर्घः यद्वा अरातीर्ध-नस्यादातॄन् ते त्वांप्रति आदिशामादेष्टृणामाचक्षाणानामस्माकं योजनोविरोधी तंहिंस्याम त्वंच अत्योन शीघ्रगामीआत्यश्वइव ह्रुतोहिंसकान्पततःआभिमुख्येनगच्छतःशत्रून्परिह्रुत् परिगत्य हन्ताभव ह्वरयतेर्हिंसार्थस्यैतद्रूपम् ॥ ५ ॥

॥ इतिचतुर्थस्यपञ्चमेपंचमोवर्गः ॥ ५ ॥

---

1 ऐ० ब्रा० १. ८.

अथषष्ठी–

आसूर्योनभानुमद्भिरर्कैरग्नेततन्थरोदसीविभासा ।
चित्रोनयत्परितमांस्यक्तःशोचिषापत्मन्नौशिजोनदीयन् ॥ ६ ॥

आ । सूर्यः । न । भानुमत्ऽभिः । अर्कैः । अग्ने । ततन्थ ।
रोदसी इति । वि । भासा । चित्रः । नयत् । परि । तमांसि ।
अक्तः । शोचिषा । पत्मन् । औशिजः । न । दीयन् ॥ ६ ॥

हेअग्ने रोदसी द्यावापृथिव्यौ भासा दीप्त्या व्याततन्थ विशेषेणाच्छादयसि तत्रदृष्टान्तः भानुमद्भिः प्रभावद्भिरर्कैरर्चनीयैः किरणैः सूर्योन यथासूर्यः आतनोति तद्वत् परोर्द्धर्चः परोक्षकृतः पत्मन् पतत्यस्मिन्निति पत्ममार्गः तस्मिन्नौशिजोन उशिजस्तोतारःस्तुत्यतयातत्संबन्धीऔशिजःसूर्यः सइव दीयन् गच्छन् शोचिषा तेजसा अक्तः संश्लिष्टःअतएव चित्रश्चायनीयोग्निः तमांसि नैशान्यन्धकाराणि परिणयत् परिनयति परितोगमयति सर्वस्मादपिदिग्भागान्निवर्तयतीत्यर्थः ॥ ६ ॥

अथसप्तमी–

त्वांहिमन्द्रतममर्कशोकैर्ववृमहेमहिनःश्रोष्यग्ने ।
इन्द्रंनत्वाशवसादेवतावायुंपृणन्तिराधसानृतमाः ॥ ७ ॥

त्वाम् । हि । मन्द्रऽतमम् । अर्कऽशोकैः । ववृमहे । महि । नः ।
श्रोषि । अग्ने । इन्द्रम् । न । त्वा । शवसा । देवता । वायुम् ।
पृणन्ति । राधसा । नृऽतमाः ॥ ७ ॥

हेअग्ने मन्द्रतमं स्तुत्यतमं त्वां अर्कशोकैरर्चनीयैः पूजनीयैः शोकैर्दीप्तिभिर्युक्तं हियस्माद्ववृमहे वृणीमहे सम्भजामहे यद्वार्कशोकैःअर्चनीयैःप्रशस्यैःदीप्तिकरणैः स्तोत्रैः साधनभूतैस्त्वां संभजामहे तस्मान्महिमहत् नोस्मदीयंस्तोत्रं श्रोषि शृणुहेअग्ने नृतमाः स्तुतीनांनेतृतमाःऋत्विजः शवसा बलेन वायुं गन्तारं अथवा वायुमिव शवसाबलेनयुक्तमिन्द्रंन इन्द्रमिव देवतात्मानंत्वां राधसा हविर्लक्षणेनधनेन पृणन्ति प्रीणयन्ति देवताशब्दात् द्वितीयायाःसुपांसुलुगितिलुक् ॥ ७ ॥

अथाष्टमी—

नूनोअग्नेऽवृकेभिःस्वस्तिवेषिरायःपथिभिःपर्ष्यंहः।
तासूरिभ्योगृणतेरासिसुम्नंमदेमशतहिमाःसुवीराः ॥ ८ ॥ ६ ॥

नु। नः। अग्ने। अवृकेभिः। स्वस्ति। वेषि। रायः। पथिऽभिः। पर्षि। अंहः। ता। सूरिऽभ्यः। गृणते। रासि। सुम्नम्। मदेम। शतऽहिमाः। सुऽवीराः ॥ ८ ॥ ६ ॥

हेअग्ने नोस्मान्अवृकेभिः वृकास्तेनास्तद्रहितैः पथिभिर्मार्गैः रायोधनानि नु क्षिप्रं स्वस्ति क्षेमेण वेषि गमयप्रापय अंहः अंहसः पापात् पर्षि उक्तलक्षणैर्मार्गैःपारयचास्मान् यानि त्वया सूरिभ्यः स्तोतृभ्योदेयानि सुम्नानि ता तानि सुम्नं सुम्नानि सुखानि गृणते स्तुवते मह्यं रासि देहि वयंच शतहिमाः शतंहेमंतान् संवत्सरान् सुवीराः वीर्याज्जायन्तइतिवीराःपुत्रादयः शोभनपुत्रादिसहिताः सन्तोमदेम हृष्याम ॥ ८ ॥

॥ इतिचतुर्थस्यपञ्चमेषष्ठोवर्गः ॥ ६ ॥

हुवेवइतिसप्तर्चंपञ्चमंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं तथाचानुक्रम्यते—हुवेवःसप्तेति प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

तत्रप्रथमा—

हुवेवःसूनुंसहसोयुवानमद्रोघवाचंमतिभिर्यविष्ठम्।
यइन्वतिद्रविणानिप्रचेताविश्ववाराणिपुरुवारोअध्रुक् ॥ १ ॥

हुवे। वः। सूनुम्। सहसः। युवानम्। अद्रोघऽवाचम्। मतिऽभिः। यविष्ठम्। यः। इन्वति। द्रविणानि। प्रऽचेताः। विश्वऽवाराणि। पुरुऽवारः। अध्रुक् ॥ १ ॥

हेअग्ने वः व्यत्ययेनबहुवचनं त्वां मतिभिर्मननीयैस्तोत्रैः हुवे आह्वयामि कीदृशं सहसोबलस्य सूनुं पुत्रं अग्निर्हिबलेनमथ्यमानोजायते युवानं नित्यतरुणं फलस्यमिश्रयितारंवा अद्रोघवाचं अद्रोग्ध्र्या प्रशस्ता स्तुतिरूपावाक् यस्मिन्प्रयुज्यते तादृशं यविष्ठं अतिशयेनयुवानं प्रचेताः प्रकृष्टज्ञानाः पुरुवारः पुरुभिर्बहुभिर्वरणीयःसम्भजनीयः अध्रुक् अद्रोग्धा यजमानानां एवंभूतोयोग्निः विश्ववाराणि सर्वैर्वरणीयानि संभजनीयानि प्रशस्यानि द्रविणानि धनानि इन्वति प्रेरयति स्तोतृभ्योददातीतियावत् तं त्वां हुवेइतिपूर्वत्रसंबन्धः ॥ १ ॥

अथद्वितीया—

त्वेवसूंनिपुर्वणीकहोतर्दोषावस्तोरेरिरेयज्ञियासः।
क्षामेवविश्वाभुवनानियस्मिन्त्संसौभगानिदधिरेपावके ॥ २ ॥

त्वे इति। वसूंनि। पुरुऽअनीक। होतः। दोषा। वस्तोः। आ।
ईरिरे। यज्ञियासः। क्षामऽइव। विश्वा। भुवनानि। यस्मिन्।
सम्। सौभगानि। दधिरे। पावके ॥ २ ॥

हे पूर्वणीक बहुज्वालहोतर्देवानामाह्वातरग्ने त्वे त्वयि दोषा रात्रौ वस्तोरहनिच यज्ञियासोयज्ञार्हायजमानाः वसूनि हविर्लक्षणानिधनानि एरिरे आभिमुख्येनप्रेरयन्ति प्रापयन्ति जुह्वतीत्यर्थः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि क्षामेव क्षमायां भूम्यामिव यस्मिन्पावकेशोधकेग्नौ सौभगानि धनानि सन्दधिरे देवाःसम्यङ्निहितवन्तः अग्नौ वामं वसु संन्यदधतेतिब्राह्मणं तस्मिंस्त्वयीतिपूर्वत्रयोज्यम् ॥ २ ॥

अथतृतीया—

त्वंविक्षुप्रदिवःसीदआसुक्रत्वारथीरभवोवार्याणाम्।
अतंइनोषिविधतेचिकित्वोव्यानुषग्जातवेदोवसूंनि ॥ ३ ॥

त्वम्। विक्षु। प्रऽदिवः। सीदः। आसु। क्रत्वा। रथीः। अभवः।
वार्याणाम्। अतः। इनोषि। विधते। चिकित्वः। वि। आनुषक्।
जातऽवेदः। वसूंनि ॥ ३ ॥

हेअग्ने त्वं प्रदिवः पुराणनामैतत् पुरातनकालीनासु विक्षु प्रजासु आसु परिदृश्यमानासुच सीदः सीदसिविश्वान्तरात्मनावर्तसे तथाकृत्वा आत्मीयेनकर्मणा वार्याणां वरणीयानांधनानांरथीरभवः रंहयितायजमानेभ्यः प्रापयिताभूः अतःकारणात् हेचिकित्वोविद्वन् जातवेदः जातानांप्राणिनांवेदितरग्ने विधते परिचरतेयजमानाय वसूनि धनानि आनुषगनुषक्तंसततंयथाभवतितथा वीनोषि विविधंप्रेरयसि ॥ ३ ॥

---

१ तै० सं० १. ५. १.।

प्रवर्ग्येभिष्टवेयोनःसनुत्यइतिद्वचः सूत्रितंच—योनःसनुत्योअभिदासदग्नेभवानोअग्नेसुम-नाउपेतौइतिद्वचाइति।

तयोःप्रथमासूक्तेचतुर्थी—

योनःसनुत्योअभिदासदग्नेयोअन्तरोमित्रमहोवनुष्यात्। तमजरेभिर्वृषभिस्तवस्वैस्तपातपिष्ठतपसातपस्वान् ॥ ४ ॥

यः। नः। सनुत्यः। अभिऽदासत्। अग्ने। यः। अन्तरः। मित्रऽमहः। वनुष्यात्। तम्। अजरेभिः। वृषऽभिः। तवं। स्वैः। तपं। तपिष्ठ। तपसा। तपस्वान्॥ ४ ॥

हेअग्ने यःशत्रुः सनुत्यः सनुतरित्यन्तर्हितनाम अन्तर्हितेदेशेवर्तमानःसन् नोस्मानभिदा-सदुपक्षयतिबाधते यश्च अन्तरः आभ्यन्तरवर्तीसन् हे मित्रमहः अनुकूलदीप्ते मित्राणां मह-यितर्वा अग्ने वनुष्यात् हिंस्यात् तमुभयविधं हेतपिष्ठतृप्ततमाग्ने तपसा तेजसा तपस्वान् तेज-स्वी त्वं अजरेभिः जरारहितैर्वृषभिर्वर्षितृभिर्वृष्टिहेतुभूतैः तवस्वैः स्वभूतैःअसाधारणैस्तेजोभि-स्तपदह ॥ ४ ॥

अथपंचमी—

यस्तेयज्ञेनसमिधायउक्थैरर्केभिःसूनोसहसोददाशत्। समर्त्येष्वमृतप्रचेताराया द्युम्नेनश्रवसाविभाति ॥ ५ ॥

यः। ते। यज्ञेन। सम्ऽइधा। यः। उक्थैः। अर्केभिः। सूनो इति। सहसः। ददाशत्। सः। मर्त्येषु। अमृत। प्रऽचेताः। राया। द्युम्नेन। श्रवसा। वि। भाति॥ ५ ॥

हेसहसःसूनो बलस्यपुत्राग्ने ते त्वां योयजमानः यज्ञेन ददाशत्परिचरति यश्च समिधा स-मिन्धनसाधनेनेध्मेन यश्च उक्थैःशस्त्रैः अर्केभिरर्चनीयैःस्तोत्रैश्चपरिचरति हेअमृत मरणधर्मर-हिताग्ने सयजमानः मर्त्येषु मनुष्येषु प्रचेताः प्रकृष्टज्ञानःसन् राया धनेन द्युम्नेन द्योतमानेन श्रवसा श्रवणीयेनान्नेन यशसावा विभाति विशेषेणप्रकाशते ॥ ५ ॥

अथषष्ठी—

सतत्कृधीषितस्तूयंमग्नेस्पृधोबाधस्वसहसासहस्वान् ।
यच्छस्यसेद्युभिरक्तोवचोभिस्तज्जुषस्वजरितुर्घोषिमन्म ॥ ६ ॥

सः । तत् । कृधि । इषितः । तूयम् । अग्ने । स्पृधः । बाधस्व । सहसा । सहस्वान् । यत् । शस्यसे । द्युऽभिः । अक्तः । वचःऽभिः तत् । जुषस्व । जरितुः । घोषि । मन्म ॥ ६ ॥

हेअग्ने सत्वं इषितः प्रेषितःसन् तूयं क्षिप्रं तत् कृधिकुरु किंतदित्यतआह सहस्वान् बलवांस्त्वंस्पृधः स्पर्धमानान् सहसा बलेन परेषामभिभवसमर्थेनतेजसावा बाधस्व विनाशय द्युभिः द्योतमानैस्तेजोभिरक्तःसंसिक्तःत्वं वचोभिःस्तुतिरूपैर्वाक्यैर्यच्छस्यसे यत् स्तूयसे त्वामुद्दिश्ययत् स्तोत्रंस्तोतृभिःक्रियतइत्यर्थः तत् मन्म मननीयं घोषि घोषणीयं जरितुःस्तोत्रं जुषस्व सेवस्व॥६॥

अग्नयेकामायपुरोडाशमष्टाकपालमित्यस्य अश्यामेत्येषायाज्या सूत्रितंच—अश्यामतंकाममग्नेतवोतीतिकामायेति ।

सैषासप्तमी—

अश्यामतंकाममग्नेतवोतीअश्यामरयिंरयिवःसुवीरम् ।
अश्यामवाजमभिवाजयन्तोश्यामद्युम्नमजराजरन्ते ॥ ७ ॥७॥

अश्याम । तम् । कामम् । अग्ने । तव । ऊती । अश्याम । रयिम् । रयिऽवः । सुऽवीरम् । अश्याम । वाजम् । अभि । वाजयन्तः । अश्याम । द्युम्नम् । अजर । अजरम् । ते ॥ ७ ॥ ७ ॥

हेअग्ने ते तव संबन्धिन्यऊती ऊत्या रक्षया तं कामं अश्याम प्राप्नुयाम तमेवकामंविवृणोति हेरयिवोधनवन्नग्ने सुवीरं शोभनपुत्रादियुक्तं रयिं धनं अश्याम प्राप्नुयाम तथा वाजयन्तः वाजमन्नमात्मनइच्छन्तोवयं वाजं त्वयादत्तमन्नं अभि आभिमुख्येनाश्याम प्राप्नुयाम हेअजरजरारहिताग्ने ते त्वदीयमजरंजरारहितं द्युम्नं द्योतमानं यशश्च अश्याम प्राप्नुयाम ॥ ७ ॥

॥ इतिचतुर्थस्यपञ्चमेसप्तमोवर्गः ॥ ७ ॥

प्रनव्यसेतिसप्तर्चंषष्ठंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं प्रनव्यसेत्यनुक्रान्तम् । प्रातरनु-वाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रप्रथमा—

प्रनव्यंसासहंसःसूनुमच्छांयज्ञेनंगातुमवंइच्छमानः ।
वृश्चद्वंनंकृष्णयामंरुशन्तंवीतीहोतांरंदिव्यंजिगाति ॥ १ ॥

प्र । नव्यंसा । सहंसः । सूनुम् । अच्छं । यज्ञेनं । गातुम् । अवंः ।
इच्छमानः । वृश्चत्ऽवंनम् । कृष्णऽयामम् । रुशन्तम् । वीती ।
होतारम् । दिव्यम् । जिगाति ॥ १ ॥

गातुमुपगन्तव्यं स्तोतव्यंवा सहसःसूनुं बलस्यपुत्रमग्निमवः अन्नं रक्षणंवाइच्छमानः इच्छन् स्तोता नव्यसा नवतरेणयज्ञेनयुक्तःसन् अच्छाभिमुख्येन प्रजिगाति प्रकर्षेणगच्छति कीदृशमग्निं वृश्चद्वनं वृक्णं छिन्नंदग्धंवनंयेनतादृशं कृष्णयामं कृष्णवर्त्मानं रुशन्तं श्वेतव-र्णं वीती वीत्या कान्तेन यज्ञेन होतारं यष्टारं दिव्यं दिविभवम् ॥ १ ॥

अथद्वितीया—

सःश्वितानस्तंन्यतूरोचनस्थाअजरेंभिर्नानंदद्भिर्यविष्ठः ।
यःपांवकःपुरुतमंःपुरूणिपृथून्यग्निरंनुयातिभर्वंन् ॥ २ ॥

सः । श्वितानः । तन्यतुः । रोचनऽस्थाः । अजरेंभिः । नानंदत्ऽभिः ।
यविष्ठः । यः । पावकः । पुरुऽतमः । पुरूणि । पृथूनि । अग्निः ।
अनुऽयाति । भर्वंन् ॥ २ ॥

सोग्निःश्वितानः श्वेतमानः श्वेतवर्णोवर्तते तन्यतुः शब्दकारी रोचनस्थाः रोचन्तेस्मि-न्ग्रहनक्षत्रादीनिइतिरोचनमन्तरिक्षं तत्रस्थितः अजरेभिः जरारहितैर्नानदद्भिरत्यर्थंशब्दंकुर्व-द्भिर्मरुद्भिर्युक्तोरश्मिभिर्वा यविष्ठोयुवतमः यः पावकः शोधकोग्निः पुरुतमः अतिशयेनप्रभूतः सन् पुरूणि बहूनि पृथूनि स्थूलानि काष्ठानि भर्वन् भक्षयन् अनुयाति अनुगच्छति सइत्थ-मित्थंवर्तते इतिपूर्वत्रसंबन्धः ॥ २ ॥

गार्हपत्यादीनांमिथःसंसर्गेअग्नयेविविचयेइष्टिःकर्तव्या तत्रविवइत्येषानुवाक्या ।

सैषा तृतीया—

वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥ ३ ॥

वि । ते । विष्वंक् । वात॑ऽजूतासः । अग्ने । भामासः । शुचे । शुचयः । चरन्ति । तुवि॑ऽम्रक्षास॑ः । दिव्याः । नव॑ऽग्वाः । वना॑ । वनन्ति । धृषता । रुजन्त॑ः ॥ ३ ॥

हे शुचे शुद्धदीप्तवाग्ने ते त्वदीयाः वातजूतासो वातेन प्रेरिताः शुचयो निर्मलाः भामासो दीप्तयः विष्वक् सर्वतो विचरन्ति विविधं गच्छन्ति तुविम्रक्षासः बहुकाष्ठानि स्पृशन्तः दिव्याः दिवि द्योतमानेग्नौ भवाः नवग्वा नूतनगमनास्ते रश्मयः वना वनानि वनन्ति सम्भजन्ते दहन्तीत्यर्थः किंकुर्वन्तः धृषता धर्षकेण तेजसा रुजन्तः वनानि भंजयन्तः ॥ ३ ॥

अथ चतुर्थी—

ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥ ४ ॥

ये । ते । शुक्रास॑ः । शुच॑यः । शुचिष्मः । क्षाम् । वप॑न्ति । विऽसि॑तासः । अश्वा॑ः । अध॑ । भ्रमः । ते । उर्विया । वि । भाति । यातय॑मानः । अधि । सानु॑ । पृश्ने॑ः ॥ ४ ॥

हे शुचिष्मः दीप्तिमन्नग्ने ते तव शुक्रासः शुक्लाः ये शुचयो दीप्तयः क्षां पृथिवीं भूमिं वपन्ति मुण्डयन्ति केशस्थानीयानोषधिवनस्पतीन्दहन्तीत्यर्थः अग्निर्हदातिरोमापृथिव्याइति निगमान्तरम् । ते रश्मयः विषितासः विमुक्ता अश्वाइव इतस्ततो गच्छन्तीति शेषः अधास्मिन्काले त्वदीयः भ्रमो भ्रमणशीलो ज्वालासमूहः पृश्नेः नानारूपायाः भूमेः अधि उपरि सानु समुच्छ्रितं देशं पर्वताग्रादिकं प्रतियातयमानः स्वकीयमग्रं व्यापारयन् उर्विया उरु बहुलं विभाति विशेषेण प्रकाशते ॥ ४ ॥

---

१ ऋ० सं० १.५.९. ।

अथपञ्चमी—

अर्धंजिह्वापापतीतिप्रवृष्णोगोषुयुधोनाशनिःसृजाना ।
शूरस्येवप्रसितिःक्षातिरग्नेर्दुर्वर्तुर्भीमोदयतेवनानि ॥ ५ ॥

अधं । जिह्वा । पापतीति । प्र । वृष्णः । गोषुऽयुधः । न । अशनिः ।
सृजाना । शूरस्यऽइव । प्रऽसितिः । क्षातिः । अग्नेः । दुःऽवर्तुः ।
भीमः । दयते । वनानि ॥ ५ ॥

अधापिच वृष्णोवार्षितुरग्नेर्जिह्वा ज्वाला प्रपापतीति प्रकर्षेणपुनःपुनःपततिगच्छति तत्रदृष्टान्तः-गोषुयुधोनाशनिःसृजाना असुरमहतासुगोषुयुध्यन्निन्द्रोगोषुयुत् तस्मात्सृज्यमाना अशनिर्वज्र-इव तथाशूरस्येव शौर्योपेतस्यनरस्य प्रसितिः प्रबन्धनंयथान्यैःदुःसहमेवमग्नेः क्षातिर्ज्वालासो-ढुमशक्येत्यर्थः क्षीयन्ते दह्यन्तेस्यामोषधिवनस्पतयइति क्षायतेःअधिकरणेक्तिन् अपिचदुर्वर्तुर्दु-र्वारःअन्यैर्वारयितुमशक्योभीमोभयङ्करोग्निः वनानि दयते दहति दयतिरत्रदहतिकर्मा ॥ ५॥

अथषष्ठी—

आभानुनापार्थिवानिज्रयांसिमहस्तोदस्यधृषताततन्थ ।
सबाधस्वापभयासहोभिःस्पृधोवनुष्यन्वनुषोनिजूर्व ॥ ६ ॥

आ । भानुना । पार्थिवानि । ज्रयांसि । महः । तोदस्य । धृषता ।
ततन्थ । सः । बाधस्व । अप । भया । सहःऽभिः । स्पृधः । वनुष्यन् ।
वनुषः । नि । जूर्व ॥ ६॥

हेअग्ने भानुना दीप्त्या पार्थिवानि पृथिव्यांभवानि ज्रयांसि ज्रयतिर्गतिकर्मा गन्तव्या-निस्थानानि महः महतः तोदस्य प्रेरकस्य धृषता धर्षकेण रश्मिनासह आततंथ आस्तृणा-सि आच्छादयसि सत्वं भया भयकरणानि अपबाधस्व तथा सहोभिः अभिभवनसमर्थैर्बलै-स्तेजोभिर्वा स्पृधः स्पर्धमानान् वनुष्यन् हिंसन् वनुषोहिंसकान्शत्रून् निजूर्व निजहि जूर्व-तिर्हिंसतिकर्मा ॥ ६ ॥

उखासम्भरणीयेष्टावग्नेःक्षत्रवतःसचित्रेत्येषायाज्या सूत्रितंच—सचित्रचित्रंचितयन्तम-स्मेअग्निरीशेबृहतःक्षत्रियस्येति ।

सैषासप्तमी—

सचित्रचित्रंचितयन्तमस्मेचित्रक्षत्रचित्रतमंवयोधाम् ।
चन्द्रंरयिंपुरुवीरंबृहन्तंचन्द्रचन्द्राभिर्गृणतेयुवस्व ॥ ७ ॥ ८ ।

सः । चित्र । चित्रम् । चितयन्तम् । अस्मे इति । चित्रऽक्षत्र ।
चित्रऽतमम् । वयःऽधाम् । चन्द्रम् । रयिम् । पुरुऽवीरम् । बृहन्तम् ।
चन्द्र । चन्द्राभिः । गृणते । युवस्व ॥ ७ ॥ ८ ॥

हेचित्र चायनीय हेचित्रक्षत्र विचित्रबलचायनीयधनवा हेचन्द्र आह्लादकाग्ने सतादृशस्त्वं चन्द्राभिः आह्लादयित्रीभिः स्तुतिभिः गृणते स्तुवते वचनव्यत्ययः स्तुवद्भ्यः अस्मे अस्मभ्यं दातुं रयिं धनं युवस्व पृथक्कुरु कीदृशंरयिं चित्रं चायनीयं चितयन्तं ज्ञापयन्तं धनेनहिपुरुषःप्रख्यायते चित्रतमं अतिशयेनाश्चर्यभूतं वयोधां वयसोन्नस्यधातारं प्रदातारं चन्द्रं आह्लादकं पुरुवीरं पुरुभिर्बहुभिर्वीरैःपुत्रपौत्रादिभिर्युक्तं बृहन्तं महान्तं ईदृशंधनमस्मभ्यंप्रयच्छेत्यर्थः ॥ ७ ॥

॥ इतिचतुर्थस्यपञ्चमेऽष्टमोवर्गः ॥ ८ ॥

मूर्धानमितिसप्तर्चंसप्तमंसूक्तम् भरद्वाजस्यार्षं वैश्वानराग्निदेवताकं षष्ठीसप्तम्यौजगत्यौ शिष्टाःपञ्चत्रिष्टुभः तथाचानुक्रान्तम्—मूर्धानंवैश्वानरीयंहिद्विजगत्यन्तमिति । गतःसूक्तविनियोगः विषुवत्याग्निमारुतेआद्यस्तृचोवैकल्पिकःस्तोत्रियः तथैवसूत्रितं—मूर्धानंदिवोअरतिंपृथिव्या-मूर्धादिवोनाभिरग्निःपृथिव्याइतिवेति ।

तत्रप्रथमा—

मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निम् ।
कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः ॥ १ ॥

मूर्धानम् । दिवः । अरतिम् । पृथिव्याः । वैश्वानरम् । ऋते ।
आ । जातम् । अग्निम् । कविम् । सम्ऽराजम् । अतिथिम् ।
जनानाम् । आसन् । आ । पात्रम् । जनयन्त । देवाः ॥ १ ॥

मूर्धानं शिरोभूतं कस्य दिवोद्युलोकस्य पृथिव्याः प्रथितायाभूमेः अरतिं गन्तारं बन्धिनं यद्वा गन्तव्यंस्वामिनं वैश्वानरंविश्वेषांनराणांसंबन्धिनं ऋते ऋतमितिसत्यस्ययज्ञस्यवानाम निमित्तसप्तम्येषा ऋतनिमित्तं आ आभिमुख्येन जातं सृष्ट्यादावुत्पन्नं कविं क्रान्तदर्शिनं सम्राजं सम्यग्राजमानं जनानां यजमानानामतिथिंहविर्वहनायसततंगन्तारं यद्वा अतिथिवत्पूज्यंआसन्आसनि आस्ये द्वितीयार्थेसप्तमी आस्यभूतअग्निलक्षणेनास्येनहिदेवाहवींषिभुञ्जते पात्रं पातारंरक्षकं यद्वा आस्येनधारकमेवंगुणविशिष्टंवैश्वानराग्निं देवाः स्तोतारऋत्विजः देवाएववाआजनयन्त यज्ञाभिमुख्येनाजीजनन् अरण्योःसकाशादुदपादयन् ॥ १ ॥

अथद्वितीया—

नाभिंयज्ञानांसदनंरयीणांमहामाहावमभिसंनवन्त ।
वैश्वानरंरथ्यमध्वराणांयज्ञस्यकेतुंजनयन्तदेवाः ॥ २ ॥

नाभिम् । यज्ञानाम् । सदनम् । रयीणाम् । महाम् । आऽहावम् । अभि । सम् । नवन्त । वैश्वानरम् । रथ्यम् । अध्वराणाम् । यज्ञस्य । केतुम् । जनयन्त । देवाः ॥ २ ॥

यज्ञानां ज्योतिष्टोमादियागानां नाभिं नहनं बन्धकं तथा रयीणांधनानां सदनं स्थानमेकनिलयं महां महान्तमाहावंआहूयन्तेस्मिन्नाहुतयइत्याहावः तादृशं यद्वा वृष्ट्युदकधारणं आहावं निपानस्थानीयमेवंभूतमग्निं अभि अभितः सन्नवन्तः स्तोतारःसम्यक्स्तुवन्ति तथावैश्वानरं विश्वेषांनराणांसंबन्धिनं अध्वराणां यज्ञानां रथ्यं रथिनं यथारथीस्वरथंनयति तद्वन्नेतारं प्रापयितारं गमयितारं यज्ञस्यकेतुं प्रज्ञापकं एवंविधमग्निं देवाः स्तोतारऋत्विजोदेवाएववा जनयन्त जनयन्ति मन्थनेनोत्पादयन्ति ॥ २ ॥

अथतृतीया—

त्वद्विप्रोजायतेवाज्यग्नेत्वद्वीरासोअभिमातिषाहः ।
वैश्वानरत्वमस्मासुधेहिवसूनिराजन्स्पृहयाय्याणि ॥ ३ ॥

त्वत् । विप्रः । जायते । वाजी । अग्ने । त्वत् । वीरासः । अभिमातिऽसहः । वैश्वानर । त्वम् । अस्मासु । धेहि । वसूनि । राजन् । स्पृहयाय्याणि ॥ ३ ॥

हेअग्ने वाजी हविर्लक्षणान्नवान्पुरुषः त्वत् त्वत्तःसकाशात् विप्रोमेधावीजायते तुभ्यंह-विर्दानेनमेधावीभवति तथा वीरासोवीराः त्वत् त्वत्तः अभिमातिषाहः अभिमातीनांशत्रूणांअ-भिभवितारोजायन्ते यस्मादेवंतस्मात् हेवैश्वानर राजन् राजमानाग्ने त्वमस्मासु त्वद्भक्तेषु स्पृहयाय्याणि स्पृहणीयानि वसूनि धनानि धेहि निधेहि ॥ ३ ॥

अथचतुर्थी–

त्वांविश्वेअमृतजायमानंशिशुंनदेवाअभिसंनवन्ते ।
तवक्रतुभिरमृतत्वमायन्वैश्वानरयत्पित्रोरदीदेः ॥ ४ ॥

त्वाम् । विश्वे । अमृत । जायमानम् । शिशुम् । न । देवाः । अभि । सम् । नवन्ते । तव । क्रतुऽभिः । अमृतऽत्वम् । आयन् । वैश्वानर । यत् । पित्रोः । अदीदेः ॥ ४ ॥

हेअमृत मरणधर्मरहिताग्ने विश्वेसर्वेदेवाः स्तोतारः जायमानं अरण्योः सकाशादुत्पद्य-मानं त्वां शिशुंन पुत्रमिव अभिसन्नवन्तेअभिसंस्तुवन्ति यद्वा दीव्यन्तीतिदेवारश्मयः तेसर्वे जायमानंत्वांअभिसन्नवन्ते अभि संगच्छन्ते यथापितरः पुत्रमभिगच्छन्ति अपिच हेवैश्वानराग्ने यद्यदा पित्रोः पालयित्र्योर्द्यावापृथिव्योर्मध्ये अदीदेः दीप्यसे तदानीं तव त्वदीयैः क्रतुभिः कर्मभिः ज्योतिष्टोमादिभिर्यागैः अमृतत्वं देवत्वं आयन् यजमानाःप्राप्नुवन्ति ॥ ४ ॥

अथपञ्चमी–

वैश्वानरतवतानिव्रतानिमहान्यग्नेनकिरादधर्ष ।
यज्जायमानःपित्रोरुपस्थेविन्दःकेतुंवयुनेष्वह्नाम् ॥ ५ ॥

वैश्वानर । तव । तानि । व्रतानि । महानि । अग्ने । नकिः । आ । दधर्ष । यत् । जायमानः । पित्रोः । उपऽस्थे । अविन्दः । केतुम् । वयुनेषु । अह्नाम् ॥ ५ ॥

हेवैश्वानर विश्वेषांनराणांसंबन्धिन्नग्ने तव त्वदीयानि तानि प्रसिद्धानि व्रतानि कर्माणि महानि महान्ति नकिरादधर्ष नकश्चनान्योधर्षयति बाधते यद्यदा त्वं पित्रोर्द्यावापृथिव्योरुपस्थे

उपस्थानेन्तरिक्षे वयुनेषु गन्तव्येषुमार्गेषु जायमानःसन् अह्नांकेतुं प्रज्ञापकंसूर्यं स्वर्भानुनावृतं अविन्दः अलम्भयः तमोरूपमसुरं स्वतेजसानिवारयन् अस्थापयइत्यर्थः तदा तानिव्रतानीति पूर्वत्रान्वयः ॥ ५ ॥

अथषष्ठी–

वैश्वानरस्यविमितानिचक्षसासानूनिदिवोअमृतस्यकेतुना ।
तस्येदुविश्वाभुवनाधिमूर्धनिवयाइवरुरुहुःसप्तविस्रुहः ॥ ६ ॥

वैश्वानरस्य । विऽमितानि । चक्षसा । सानूनि । दिवः । अमृतस्य । केतुना । तस्य । इत् । ऊँम् इति । विश्वा । भुवना । अधि । मूर्धनि । वयाःऽइव । रुरुहुः । सप्त । विऽस्रुहः ॥ ६ ॥

वैश्वानरस्य विश्वनरहितस्याग्नेः चक्षसा तेजसा अमृतस्योदकस्य केतुना प्रज्ञापकेन दिवोद्युलोकस्य सानूनि समुच्छ्रितस्थलानि नक्षत्ररूपाणि विमितानि निर्मितानि यद्वा दिवोन्तरिक्षस्यसानूनि समुच्छ्रितप्रदेशाःमेघात्मकाः विमितानि निर्मिताः धूमविकारत्वात्तेषां तस्येदु तस्यैववैश्वानरस्य मूर्धनि मूर्धस्थानीयेउपरिवर्तमानेधूमे मेघात्मना परिणते विश्वा विश्वानि व्याप्तानि भुवना भुवनान्युदकानि अधिवसन्ति यद्वा वैश्वानरात्मकस्यपरब्रह्मणोमूर्धनि उपरिप्रदेशे सर्वाणिभूतजातान्यधिवसन्ति तथावयाः शाखाइव सप्तसर्पणशीलाः सप्तसंख्यावा विस्रुहोनद्यश्च गङ्गाद्यारुरुहुः रोहन्ति अस्मादेववैश्वानरात्प्रादुर्भवन्ति आहुतिद्वारासकलंजगत् अग्नेःसकाशादुत्पद्यतेइत्यर्थः ॥ ६ ॥

अथसप्तमी–

वियोरजांस्यमिमीतसुक्रतुर्वैश्वानरोविदिवोरोचनाकविः ।
परियोविश्वाभुवनानिपप्रथेदब्धोगोपाअमृतस्यरक्षिता ॥७॥९॥

वि । यः । रजांसि । अमिमीत । सुऽक्रतुः । वैश्वानरः । वि । दिवः । रोचना । कविः । परि । यः । विश्वा । भुवनानि । पप्रथे । अदब्धः । गोपाः । अमृतस्य । रक्षिता ॥ ७ ॥ ९ ॥

सुक्रतुः सुकर्मा वैश्वानरः विश्वेषांनराणांहितोयोग्निः रजांस्युदकानि लोकावा व्यमिमीत निर्मितवान् तथा दिवोद्युलोकस्यसंबन्धीनि रोचना रोचमानानि दीप्यमानानि नक्षत्रादीनि कविः क्रान्तदर्शीसन् योग्निर्व्यमिमीत यश्च विश्वा सर्वाणि भुवनानि भूतजातानि व्याप्तान्युदकानिवा परिपप्रथे परितोप्रथयत् सोयमदब्धः केनाप्यहिंसितः गोपाः सर्वस्यगोपायितारक्षिता अमृतस्य अमरणहेतोरुदकस्यरक्षिता पालयितासन् वर्ततइतिशेषः ॥ ७ ॥

॥ इतिचतुर्थस्यपञ्चमेनवमोवर्गः ॥ ९ ॥

पृक्षस्येतिसप्तर्चमष्टमंसूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकं आद्याःषड्जगत्यः सप्तमीत्रिष्टुप् तथाचानुक्रान्तम्—पृक्षस्यान्त्यात्रिष्टुबिति । चातुर्विंशिकेहन्याग्निमारुतेइदंसूक्तं वैश्वानरीयनिविद्धानं सूत्रितंच—पृक्षस्यवृष्णोवृष्णेशर्धायेति । आभिप्लविकेपृष्ठ्याभिप्लवषडहयोः पञ्चमेहनिइदमेवसूक्तंवैश्वानरनिविद्धानं सूत्रितंच—पृक्षस्यवृष्णोवृष्णेशर्धायनूचित्सहोजाइत्याग्निमारुतमिति । विषुवत्याग्निमारुते आद्यौतृचौस्तोत्रियानुरूपौ सूत्रितंच—पृक्षस्यवृष्णोअरुषस्यनूसहइतिस्तोत्रियानुरूपाविति ।

तत्रप्रथमा—

पृक्षस्यवृष्णोअरुषस्यनूसहःप्रनुवोचंविदथाजातवेदसः ।
वैश्वानरायमतिर्नव्यसीशुचिःसोमइवपवतेचारुरग्नये ॥ १ ॥

पृक्षस्य । वृष्णः । अरुषस्य । नु । सहः । प्र । नु । वोचम् ।
विदथा । जातऽवेदसः । वैश्वानराय । मतिः । नव्यसी । शुचिः ।
सोमःऽइव । पवते । चारुः । अग्नये ॥ १ ॥

पृक्षस्य संपृक्तस्य व्याप्तस्य यद्वा पृक्षंहविर्लक्षणमन्नंतद्वतः वृष्णः वर्षितुःअरुषस्य आरोचमानस्य जातवेदसः जातानांवेदितुर्वैश्वानराग्नेः सहोबलं अभिभवनसमर्थं विदथा विदथेयज्ञे नु क्षिप्रं प्रवोचं प्रब्रवीमि प्रकर्षेणस्तौमीत्यर्थः एकोनुशब्दःपूरकः नव्यसी नवतराशुचिर्निर्मला यद्वा स्तोतॄणां शोधयित्री चारुः शोभना मतिर्मननीयास्तुतिश्च अस्मैवैश्वानरायाग्नये पवते मत्सकाशात्स्रवति स्वयमेवनिर्गच्छतीत्यर्थः सोमइव यथासोमोदशापवित्रात्स्रवति तद्वत् ॥ १ ॥

अथद्वितीया–

सजायमानःपरमेव्योमनिव्रतान्यग्निर्व्रतपाअरक्षत ॥
व्य१न्तरिक्षममिमीतसुक्रतुर्वैश्वानरोमहिनानाकमस्पृशत् ॥ २ ॥

सः । जायमानः । परमे । विऽओमनि । व्रतानि । अग्निः ।
व्रतऽपाः । अरक्षत । वि । अन्तरिक्षम् । अमिमीत । सुऽक्रतुः ।
वैश्वानरः । महिना । नाकम् । अस्पृशत् ॥ २ ॥

सवैश्वानरोग्निः व्रतपाः व्रतस्यपालकः परमे उत्कृष्टे व्योमनि व्योम्न्याकाशे जायमानः सूर्यात्मना प्रादुर्भवन् व्रतानि कर्माणि लौकिकानि वैदिकानिच अरक्षत रक्षति अंतरिक्षंच व्यमिमीत एतदुपलक्षितान् त्रीँल्लोकान्निर्मितवान् तथा सुक्रतुः शोभनकर्मा वैश्वानरोग्निः महिना स्वमहिम्ना तेजसा नाकं द्युलोकं अस्पृशत् स्पृशतिस्म ॥ २ ॥

अथतृतीया–

व्यस्तभ्नाद्रोदसीमित्रोअद्भुतोन्तर्वावदकृणोज्ज्योतिषातमः ।
विचर्मणीवधिषणेअवर्तयद्वैश्वानरोविश्वमधत्तवृष्ण्यम् ॥ ३ ॥

वि । अस्तभ्नात् । रोदसी इति । मित्रः । अद्भुतः । अन्तःऽवावत् ।
अकृणोत् । ज्योतिषा । तमः । वि । चर्मणी इवेति चर्मणीऽइव ।
धिषणे इति । अवर्तयत् । वैश्वानरः । विश्वम् । अधत्त । वृष्ण्यम् ॥ ३

मित्रोमित्रभूतः सर्वेषांअद्भुतोमहानाश्चर्यभूतोवा वैश्वानरोग्निः रोदसी द्यावापृथिव्यौ व्यस्तभ्नात् विशेषेणस्तम्भितवान् यथा अधोनपततः तथा स्वकीयदेशेस्थापितवानित्यर्थः तथा ज्योतिषा तेजसा तमःअंधकारंच अंतर्वावत् अन्तर्हितं तिरोहितमकृणोदकरोत् (वावदिति वातेर्गतिकर्मणोयङ्लुगन्तस्यरूपं) अपिच धिषणे धारयित्र्यौ द्यावापृथिव्यौ चर्मणीइव यथा पशोर्विशसिताद्वेचर्मणीशोषणार्थमसारयतितथाव्यावर्तयत् विवृते विस्तृते अकरोत् किंबहुना वैश्वानरोयमग्निः विश्वं सर्वं वृष्ण्यंवीर्यमधत्त धत्ते धारयति ॥ ३ ॥

अथचतुर्थी—

अपामुपस्थेमहिषाअगृभ्णतविशोराजानमुपतस्थुर्ऋग्मियम् ।
आदूतोअग्निमभरद्विवस्वतोवैश्वानरंमातरिश्वापरावतः ॥ ४ ॥

अपाम् । उपऽस्थे । महिषाः । अगृभ्णत । विशः । राजानम् ।
उप । तस्थुः । ऋग्मियम् । आ । दूतः । अग्निम् । अभरत् ।
विवस्वतः । वैश्वानरम् । मातरिश्वा । पराऽवतः ॥ ४ ॥

अपइत्यन्तरिक्षनाम अपामन्तरिक्षस्य उपस्थे उपस्थाने मध्ये महिषाः महन्नामैतत् महान्तोमरुतः अगृभ्णत अगृह्णन् इमंवैश्वानरंवैद्युतात्मनावर्तमानमजानन्नित्यर्थः गृहीत्वाच विशः प्रजाः राजानं स्वामिनं ऋग्मियमर्चनीयं उपतस्थुरस्तुवन् अपिचेमंवैश्वानरं अग्निं पुरा सूर्यसमीपे विद्यमानं दूतः वेगवान् देवानांदूतोवा मातरिश्वा वायुः परावतोदूरदेशात् विवस्वत-आदित्यात् आभरत् इमंलोकंप्रत्याजहार ॥ ४ ॥

अथपञ्चमी—

युगेयुगेविदथ्यंगृणद्भ्योग्नेरयिंयशसंधेहिनव्यसीम् ।
पव्येवराजन्नघशंसमजरनीचानिवृश्चवनिनंनतेजसा ॥ ५ ॥

युगेऽयुगे । विदथ्यम् । गृणत्ऽभ्यः । अग्ने । रयिम् । यशसम् । धेहि ।
नव्यसीम् । पव्याऽइव । राजन् । अघऽशंसम् । अजर । नीचा ।
नि । वृश्च । वनिनम् । न । तेजसा ॥ ५ ॥

हेअग्ने युगेयुगे कालेकाले विदथ्यं विदथोयज्ञः तदर्हंत्वामुद्दिश्य नव्यसीं नवतरांस्तुतिं गृणद्भ्यः उच्चारयितृभ्योस्मभ्यं रयिं धनं यशसं यशस्विनं पुत्रंच धेहि विधेहि कुरु किंच हेराजन् राजमान अजर जरारहिताग्ने पव्येव वज्रेणेव आत्मीयेनतेजसा वनिनंन वृक्षमिव अघशंसं अघस्यानर्थस्यशंसितारं शत्रुं नीचा नीचीनः न्यग्भूतोयथाभवतितथा निवृश्च निजहि ॥ ५ ॥

अथषष्ठी–

अस्माकमग्नेमघवत्सुधारयानामिक्षत्रमजरंसुवीर्यम् ।
वयंजयेमशतिनंसहस्रिणंवैश्वानरवाजमग्नेतवोतिभिः ॥ ६ ॥

अस्माकम् । अग्ने । मघवत्ऽसु । धारय । अनामि । क्षत्रम् ।
अजरम् । सुऽवीर्यम् । वयम् । जयेम । शतिनम् । सहस्रिणम् ।
वैश्वानर । वाजम् । अग्ने । तव । ऊतिऽभिः ॥ ६ ॥

हेअग्ने अस्माकं सप्तम्यर्थेषष्ठी अस्मासु मघवत्सु हविर्लक्षणेनधनेनयुक्तेषु क्षत्रं धनं धारय स्थापय कीदृशं अनामि अनमनीयमनपहार्यमजरंजरारहितमनश्वरं सुवीर्यं शोभनवीर्योपेतं किंच हेवैश्वानराग्ने तवोतिभिः त्वत्संबन्धिभीरक्षणैः वयं शतिनं शतसंख्यायुक्तं शतपुरुषयुक्तंवा तथा सहस्रिणं वाजमन्नं जयेम लभेमहि ॥ ६ ॥

अथसप्तमी–

अदब्धेभिस्तवगोपाभिरिष्टेस्माकंपाहित्रिषधस्थसूरीन् ।
रक्षाचनोददुषांशर्धोअग्नेवैश्वानरप्रचतारीःस्तवानः ॥ ७ ॥ १०

अदब्धेभिः । तव । गोपाभिः । इष्टे । अस्माकम् । पाहि ।
त्रिऽसधस्थ । सूरीन् । रक्ष । च । नः । ददुषाम् । शर्धः । अग्ने ।
वैश्वानर । प्र । च । तारीः । स्तवानः ॥ ७ ॥ १० ॥

हेइष्टे यष्टव्य एषणीयवा त्रिषधस्थ त्रिषुलोकेषुसहावस्थायिन् यद्वा आहवनीयादिषुत्रिष्वायतनेषुयष्टव्यैर्देवैःसहावतिष्ठमानाग्ने अदब्धेभिः केनाप्यहिंसितैः तवत्वदीयैर्गोपाभिःगोपकैः रक्षकैस्तेजोभिः अस्माकं सूरीन् अस्मदीयानस्तोतॄन्पाहि रक्ष हेवैश्वानराग्ने ददुषां हवींषिदत्तवतां नोस्माकं शर्धोबलं रक्षच स्तवान स्तूयमानस्त्वं प्रचतारीः प्रवर्धयच ॥ ७ ॥

॥ इतिचतुर्थस्यपञ्चमेदशमोवर्गः ॥ १० ॥

अहश्चेतिसप्तर्चंनवमंसूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकं अनुक्रान्तंच अहश्चेति व्यूळ्हेदशरात्रेषष्ठेहनिआग्निमारुतशस्त्रेवैश्वानरनिविद्धानमिदं सूत्र्यतेहि–अहश्चकृष्णमध्वो वोनामेति ।

तत्रप्रथमा—

अहंश्चकृष्णमहरर्जुनंचविवर्तेतेरजंसीवेद्याभिः ।
वैश्वानरोजायमानोनराजावातिरज्ज्योतिषाग्निस्तमांसि ॥ १ ॥

अहः । च । कृष्णम् । अहः । अर्जुनम् । च । वि । वर्तेते इति ।
रजंसी इति । वेद्याभिः । वैश्वानरः । जायमानः । न । राजा ।
अव । अतिरत् । ज्योतिषा । अग्निः । तमांसि ॥ १ ॥

आहरतिपुरुषोस्मिन्कर्माणीत्यहः कृष्णं कृष्णवर्णं एतत्सामानाधिकरण्यादहःशब्दोरात्रिवचनः तमसाकृष्णवर्णारात्रिश्च अर्जुनंच सौरेणतेजसा शुक्लवर्णमहोदिवसश्चरजसी स्वस्वभासा सर्वंजगद्रंजयन्तौ वेद्याभिः वेदितव्याभिः अनुकूलतयाज्ञातव्याभिः स्वप्रवृत्तिभिःविवर्तेते विविधंपर्यावर्तेते यद्वा रजसी द्यावापृथिव्यौ उपलक्षणमेतत् लोकत्रयं प्रत्यावर्तेते एतच्चवैश्वानराग्नेराज्ञयेतिशेषः सहिदेवतात्वेनात्रप्रतिपाद्यः सचवैश्वानरोग्निः जायमानोनराजा प्रादुर्भवन् प्रवर्धमानोराजेव ज्योतिषा तेजसा तमांसि अवातिरत् अवतिरतिर्वधकर्मा अवतिरति विनाशयति॥१॥

अथद्वितीया—

नाहंतन्तुंनविजानाम्योतुंनयंवयन्तिसमरेतमानाः ।
कस्यंस्वित्पुत्रइहवक्त्वानिपरोवंदात्यवरेणपित्रा ॥ २ ॥

न । अहम् । तन्तुम् । न । वि । जानामि । ओतुम् । न । यम् ।
वयन्ति । सम्ऽअरे । अतमानाः । कस्य । स्वित् । पुत्रः । इह ।
वक्त्वानि । परः । वदाति । अवरेण । पित्रा ॥ २ ॥

वैश्वानरस्यमहत्वमाख्यास्यन् ऋषिस्तदर्थंयज्ञं वस्त्रात्मकतयारूपयन् तस्यदुर्ज्ञानत्वमनयाप्रतिपादयतीतियज्ञवादिनोमन्यन्ते तन्तुं तन्तवः पटस्य प्रागायतानि सूत्राणि तानिच यज्ञात्मकस्यवस्त्रस्य गायत्र्यादीनिछन्दांसि स्तुतशस्त्राणिच तान्यहं नविजानामि तथा ओतुं ओतवस्तिरश्चीनानिसूत्राणि तानिचात्रयजूंषि आध्वर्यवाणिकर्माणिच तान्यहं नविजानामि अपिच एतदुभयसाध्यंतंपटं यज्ञलक्षणं नविजानामि यंपटंयज्ञलक्षणंसमरे संगमनेदेवयजने अतमानाः सततंचेष्टमानाऋत्विजः वयन्ति तंतूनोतूंश्चसंतन्वन्ति वस्त्ररूपेणनिष्पादयन्तीत्यर्थः इहा-

स्मिन्लोके कस्यस्वित् स्विदितिवितर्के कस्यखलु पुत्रोमनुष्यः वक्त्वानि वक्तव्यानितानिइमानि परः परस्तादमुष्मिन्लोके वर्तमानोयःसूर्यः तस्यपित्राअवरेण अवस्तादस्मिंल्लोकेवर्तमानेनवैश्वानराग्निना अनुशिष्टःसन् वदाति वदेत् नकश्चिदपिप्रवदितुंशक्नोतीत्यर्थः एतच्चसंप्रदायविद्भिरुक्तं वैश्वानरस्यपुत्रोसौपरस्ताद्दिवियःस्थितः। छन्दांस्यध्वरवस्त्रस्यस्तुतशस्त्राणितन्तवः॥ यजूंषिचेष्टाश्चोतुःस्याद्वस्त्रंवातव्यमध्वरः । परःपरस्थितःसूर्यःपिताग्निःपार्थिवोमतइति ॥ रूपकतयाजगत्सृष्टेर्दुर्ज्ञानत्वमनयाप्रतिपादयतीत्यात्मविदोमन्यन्ते तन्तुं तन्तून् तन्तुस्थानानि सूक्ष्माणि वियदादीन्यपञ्चीकृतानि भूतानि नविजानामि ओतुं ओतून् पञ्चीकृतानि स्थूलानि ओतुस्थानीयान्यपि वियदादीनि नविजानामि नच तत्कार्यं पटस्थानीयं प्रपंचं विजानामि यं प्रपंचं समरे तंतूनामोतूनांच संगमने अतमानाः सततंचेष्टमानाः संसारिणः वयन्ति उत्पादयन्ति तेषां भोगार्थमीश्वरः सृजतीतिकर्तृत्वमुपचर्यते इहास्मिन्विषये परः परस्ताद्बुद्धेरविषये वर्तमानानि वक्त्वानि वक्तव्यानि इमानि अवरेण अर्वाचीनेन सृष्ट्युत्तरकालमुत्पन्नेन पित्रा स्वजनकेन अनुशिष्टःसन्कस्यखलुपुत्रः वदाति वदेत् स्वोत्पत्तेःप्राचीनंवृत्तान्तंअजानानः कश्चिदपिनवदेदित्यर्थः ॥ २ ॥

अथतृतीया—

सइत्तन्तुंसविजानात्योतुंसवक्त्वान्यृतुथावदाति ।
यईंचिकेतदमृतस्यगोपाअवश्चरन्परोअन्येनपश्यन् ॥ ३ ॥

सः । इत् । तन्तुम् । सः । वि । जानाति । ओतुम् । सः । वक्त्वानि ।
ऋतुऽथा । वदाति । यः । ईम् । चिकेतत् । अमृतस्य । गोपाः ।
अवः । चरन् । परः । अन्येन । पश्यन् ॥ ३ ॥

यद्यप्युक्तप्रकारेणदुर्ज्ञानानि तथाप्येतानि वैश्वानरोग्निर्जानाति वदतिचेत्यनयाप्रतिपादयति सइत् सएववैश्वानरोग्निःतन्तुं तन्तुस्थानीयानि गायत्र्यादीनिछन्दांसि स्तुतशस्त्राणि विजानाति तथा सएव ओतुं ओतुस्थानीयानियजूंष्याध्वर्यवाणिचकर्माणि विजानाति ऋतुथा कालेकाले तत्तदनुष्ठानसमये वक्त्वानि वक्तव्यानिच तानि वदाति वदति वदेत् योयंवैश्वानरः अमृतस्य गोपाः उदकस्यगोपायितारक्षिता अवः अवस्ताद्भूलोकेचरन् पार्थिवाग्निरूपेणसंचरन् परः परस्ताद्दिवि अन्येनसूर्यात्मनापश्यन् सर्वंजगत्प्रकाशयन् ईं इमानि परिदृश्यमानानि सर्वाणिभूतानि चिकेतत् जानाति सएवेविपूर्वत्रसंबन्धः यद्वा सइत् सएव तन्तुं तन्तुस्थानीयानि सूक्ष्म-

भूतानि विजानाति नान्यःकश्चित् तथाओतुं ओतुस्थानीयानिस्थूलभूतानिच सएवविजानाति सएववक्त्वानि वक्तव्यान्युपदेष्टव्यानि इमानि ऋतुथा कालेकाले यदायदाविद्यासंप्रदायोच्छेदः तदातदा वदातिवदेत् कोसौ योविजानीयात् वदेच्चेत्यतआह योवैश्वानरः विश्वनरात्मकः परमात्मा अमृतस्य अमृतत्वस्य विमोक्षणस्य गोपाः रक्षिता अवः अवस्तात् संसारदशायांचरन् अन्तःकरणोपेतोजीवात्मभावेनसंचरन् परः परस्तादविद्यायाःऊर्ध्वं वर्तमानेनान्येनउक्तविलक्षणेन निरुपाधिकेन सच्चिदादिलक्षणेनरूपेण पश्यन् सर्वंजगत्प्रकाशयन् ईं इमानि चिकेतज्जानाति तथाच परमात्मानंप्रकृत्यश्रूयते—तमेवभान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति ॥ ३ ॥

अथचतुर्थी—

अयंहोताप्रथमःपश्यतेममिदंज्योतिरमृतंमर्त्येषु ।
अयंसजज्ञेध्रुवआनिषत्तोमर्त्यस्तन्वा३वर्धमानः ॥ ४ ॥

अयम् । होता । प्रथमः । पश्यत । इमम् । इदम् । ज्योतिः । अमृतम् । मर्त्येषु । अयम् । सः । जज्ञे । ध्रुवः । आ । निऽसत्तः । अमर्त्यः । तन्वा । वर्धमानः ॥ ४ ॥

अयंवैश्वानरोग्निः प्रथमआद्योहोता मानुषोहिहोताद्वितीयः हेमनुष्याः तं इमं पश्यत भजतेत्यर्थः मर्त्येषु मरणस्वभावेषुशरीरेषु अमृतं मरणरहितं इदं वैश्वानराख्यंज्योतिः जाठररूपेणवर्ततइत्यर्थः अपिच सोयमग्निः ध्रुवोनिश्चलः आसमन्तान्निषत्तोनिषण्णः सर्वव्यापी अतएवामर्त्यः मरणरहितोपि तन्वा शरीरेण संबन्धात् जज्ञे जायते वर्धमानश्चभवतीत्युपचर्यते ॥४॥

अथपञ्चमी—

ध्रुवंज्योतिर्निहितंदृशयेकंमनोजविष्ठंपतयत्स्वन्तः ।
विश्वेदेवाःसमनसःसकेताएकंक्रतुमभिवियन्तिसाधु ॥ ५ ॥

ध्रुवम् । ज्योतिः । निऽहितम् । दृशये । कम् । मनः । जविष्ठम् । पतयत्ऽसु । अन्तरिति । विश्वे । देवाः । सऽमनसः । सऽकेताः । एकम् । क्रतुम् । अभि । वि । यन्ति । साधु ॥ ५ ॥

१ तै० उपनिषत्

ध्रुवं निश्चलं मनः मनसः तस्मादपि जविष्ठं अतिशयेनवेगवत् ईदृशंवैश्वानराख्यंज्योतिः पतयत्सु गच्छत्सु जंगमेषुप्राणिषु अन्तर्मध्ये निहितं प्रजापतिनास्थापितं किमर्थं दृशये कंदर्शनार्थं किंच विश्वेसर्वेदेवाश्च समनसः समानमनस्काः सकेताः समानप्रज्ञाश्चसन्तः एकं मुख्यं गन्तारंवा क्रतुं कर्मणांकर्तारं वैश्वानरं साधु सम्यक् अभिवियन्ति आभिमुख्येनविविधंप्राप्नुवन्ति सेवन्तइत्यर्थः यद्वा पतयत्सु गच्छत्सु प्राणिष्वन्तर्मध्ये हृदये मनोजविष्ठं मनसोप्यतिशयेनवेगयुक्तं ध्रुवं निश्चलं निर्विकल्पं तथाचवाजसनेयकं—अनेजदेकंमनोजवीयइति । ज्योतिः ब्रह्मचैतन्यं निहितं नकेनचित्स्थापितं योवेदनिहितंगुहायांपरमेव्योमन्निति[1]हि श्रूयते । किमर्थं दृशये दर्शनार्थं ज्ञानेनहिसर्वंजानन्ति अपिच दीव्यन्तीतिदेवाइन्द्रियाणि विश्वे सर्वेदेवाः सर्वाणींद्रियाणि चक्षुराद्याः समनसः मनसासहवर्तमानाः सकेताः सतेजस्काः सन्तः एकमद्वितीयं क्रतुं सृष्ट्यादीनांकर्मणांकर्तारं विश्वनरात्मकं परमात्मानं अभिलक्ष्य साधु सम्यक् वियन्ति विविधंगच्छन्ति देवाएववा इमं अभिवियन्ति आभिमुख्येन विविधमुपयन्ति उपासतइत्यर्थः तथाचश्रूयते—तद्देवाज्योतिषांज्योतिरायुर्होपासतेमृतमि[2]ति ॥ ५ ॥

अथषष्ठी—

विमेकर्णापतयतोविचक्षुर्वी३दंज्योतिर्हृदयआहितंयत् ।
विमेमनश्चरतिदूरआधीःकिंस्विद्वक्ष्यामिकिमुनूमनिष्ये ॥ ६ ॥

वि । मे । कर्णा । पतयतः । वि । चक्षुः । वि । इदम् । ज्योतिः ।
हृदये । आऽहितम् । यत् । वि । मे । मनः । चरति । दूरेऽआधीः ।
किम् । स्वित् । वक्ष्यामि । किम् । ऊँ इति । नु । मनिष्ये ॥ ६ ॥

वैश्वानरंश्रोतुकामस्य मे मम कर्णा कर्णौ विपतयतः विविधंगच्छतः श्रोतव्यानां तदीयगुणानांबहुत्वात् तथा वैश्वानरंदिदृक्षमाणस्य ममचक्षुरिन्द्रियं विपतयति विविधंगच्छति द्रष्टव्यानांतदीयरूपाणां बहुत्वात् तथा ज्योतिः प्रकाशकं हृदयेहृदयपुण्डरीके आहितं निहितं यद्बुद्ध्याख्यंतत्त्वं इदमपि विपतयति विविधंगच्छति वैश्वानरात्मानंज्ञातुं अपिच दूरे आधीःदूरे विप्रकृष्टेविषये आधीराध्यानंयस्यतादृशं छान्दसोलिङ्गव्यत्ययः मे मदीयं मनश्च विचरति विविधंप्रवर्तते एवमहमहमिकया सर्वेष्विंद्रियेषुप्रवृत्तेषु किंस्विदहं वैश्वानरस्यरूपमिति वक्ष्यामि। किमुनु किमुखलु सम्प्रतिममिष्ये मनसाप्रपत्स्येवैश्वानरस्यगुणानामनन्तत्वात् मन्दप्रज्ञेनमया ज्ञातुंनशक्यतइत्यर्थः ॥ ६ ॥

---

१ तै० आरण्यके । २ बृहदारण्यके ।

अथसप्तमी—

विश्वेदेवाअनमस्यन्भियानास्त्वामग्नेतमसितस्थिवांसम् ।
वैश्वानरोवतूतयेनोमर्त्योवतूतयेनः ॥ ७ ॥ ११ ॥

विश्वे । देवाः । अनमस्यन् । भियानाः । त्वाम् । अग्ने । तमसि ।
तस्थिऽवांसम् । वैश्वानरः । अवतु । ऊतये । नः । अमर्त्यः ।
अवतु । ऊतये । नः ॥ ७ ॥ ११ ॥

हेवैश्वानर तमस्यन्धकारे तस्थिवांसं स्थितवन्तंत्वां विश्वे सर्वेदेवाः अनमस्यन नमस्कुर्वंति कुतोहेतोः भियानाः अन्धकाराद्भीताः तादृशोऽमर्त्योमरणरहितोवैश्वानरोग्निः नोस्मान् ऊतयेऊत्या रक्षणेनावतु रक्षतु पुनरुक्तिरादरार्था ॥ ७ ॥

॥ इतिचतुर्थस्यपञ्चमेएकादशोवर्गः ॥ ११ ॥

पुरोवइतिसप्तचैंदशमंसूक्तं भरद्वाजस्यार्षमाग्नेयं सप्तमीविंशिकाद्विपदाविराट् शिष्टास्त्रिष्टुभः तथाचानुक्रान्तं—पुरोवोद्विपदान्तं । प्रातरनुवाकेआग्नेयेक्रतौ त्रैष्टुभेछन्दसीदमादीनिचत्वारिसूक्तानि सूत्रितंच—पुरोवोमन्द्रमितिचत्वारितंसुमतीकमितिषळिति ।

तत्रप्रथमा—

पुरोवोमन्द्रंदिव्यंसुवृक्तिंप्रयतियज्ञेअग्निमध्वरेदधिध्वम् ।
पुरउक्थेभिःसहिनोविभावास्वध्वराकरतिजातवेदाः ॥ १ ॥

पुरः । वः । मन्द्रम् । दिव्यम् । सुऽवृक्तिम् । प्रऽयति । यज्ञे ।
अग्निम् । अध्वरे । दधिध्वम् । पुरः । उक्थेभिः । सः । हि । नः ।
विभाऽवा । सुऽअध्वरा । करति । जातऽवेदाः ॥ १ ॥

हेऋत्विग्यजमानावोयूयं मन्द्रं मोदनं स्तुत्यंवा दिव्यं दिविभवं सुवृक्तिं सुष्ठु दोषैर्वर्जितं सुखेनावर्जनीयंवा एवंगुणमग्निं प्रयति प्रगच्छति प्रवर्तमानेध्वरे रक्षःप्रभृतिभिरहिंस्ये हिंसाप्रत्यवायरहितेवास्मिन्यज्ञे पुरोदधिध्वं पुरस्तादाहवनीयरूपेणधारयत यद्वा पुरोधसंकुरुत उ-

कथेभिः स्तुतशस्त्रैश्च पुरोदधिध्वं विभावा विशेषेणदीप्यमानः जातवेदाः जातानांवेदितासोग्निः हियस्माद् नोस्मान् स्वध्वरा शोभनयागान् करति करोति तस्मात्पुरोदधिध्वमित्यन्वयः ॥ १ ॥

अथद्वितीया–

तमुंद्युमःपुर्वणीकहोतरग्नेअग्निभिर्मनुंषइधानः ।
स्तोमंयमस्मैममतेवशूषंघृतंनशुचिमतयंःपवन्ते ॥ २ ॥

तम् । ऊँ इति । द्युऽमः । पुरुऽअनीक । होतः । अग्ने । अग्निऽभिः ।
मनुंषः । इधानः । स्तोमम् । यम् । अस्मै । ममताऽइव । शूषम् ।
घृतम् । न । शुचि । मतयः । पवन्ते ॥ २ ॥

हेद्युमः दीप्तिमन् पुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने अग्निभिस्तवावयवभूतैरन्यैरग्निभिःसार्धं इधानः समिध्यमानःदीप्तःसन्मनुषः मनुष्यस्यस्तोतुः तमु तंस्तोमंशृणुविति शेषः उइतिपादपूरणं यंस्तोमंस्तोत्रं शूषं सुखकरं घृतंन पवित्राभ्यामुत्पूतं घृतमिव शुचि शुद्धं अस्माअग्नये मतयोमन्तारःस्तोतारः ममतेव ममतानामब्रह्मवादिनीदीर्घतमसोमाता सेव पवन्ते पुनन्ति संस्कुर्वन्ति दोषवार्जितमुच्चारयन्तीत्यर्थः तंस्तोममित्यन्वयः ॥ २ ॥

अथतृतीया–

पीपायसःश्रवसामर्त्येषुयोअग्नयेददाशविप्रउक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्यंसातागोमंतोदधाति ॥ ३ ॥

पीपाय । सः । श्रवसा । मर्त्येषु । यः । अग्नये । ददाश । विप्रः ।
उक्थैः । चित्राभिः । तम् । ऊतिऽभिः । चित्रऽशोचिः । व्रजस्य ।
साता । गोऽमंतः दधाति ॥ ३ ॥

सयजमानः मर्त्येषुमनुष्येषु श्रवसान्नेन पीपाय वर्धति विप्रोमेधावी योयजमानः उक्थैः स्तुतिभिःसार्धं हवींषि ददाश प्रयच्छति तंयजमानं चित्रशोचिर्विचित्रदीप्तिरग्निः चित्राभिराश्चर्यभूताभिःऊतिभीरक्षाभिर्गोमतोगोभिर्युक्तस्यव्रजस्य गोष्ठस्य साता सातौ संभजने दधाति धारयति ॥ ३ ॥

अथचतुर्थी—

आयःपप्रौजायमानउर्वीदूरेदृशाभासाकृष्णाध्वा।
अधंबहुचित्तमऊर्म्यायास्तिरःशोचिषाददृशेपावकः॥ ४॥

आ। यः। पप्रौ। जायमानः। उर्वी इति। दूरेऽदृशा। भासा।
कृष्णऽअध्वा। अध। बहु। चित्। तमः। ऊर्म्यायाः। तिरः।
शोचिषा। ददृशे। पावकः॥ ४॥

कृष्णाध्वा कृष्णवर्त्मायोग्निः जायमानः प्रादुर्भवन् उर्वीविस्तीर्णे द्यावापृथिव्यौ दूरे-दृशा दूरेदृश्यमानया भासा दीप्त्या आपप्रौ आपूरयति सपावकोग्निरधानन्तरं ऊर्म्यायाः रात्रिनामैतत् रात्रेःसंबन्धि बहुचित् बह्वपितमः अन्धकारं शोचिषा दीप्त्या तिरस्कुर्वन् ददृशे दृश्यते॥ ४॥

अथपंचमी—

नूनश्चित्रंपुरुवाजाभिरूतीअग्नेरयिंमघवद्भ्यश्चधेहि।
येराधसाश्रवसाचात्यन्यान्त्सुवीर्येभिश्चाभिसन्तिजनान्॥ ५॥

नु। नः। चित्रम्। पुरुऽवाजाभिः। ऊती। अग्ने। रयिम्।
मघवत्ऽभ्यः। च। धेहि। ये। राधसा। श्रवसा। च। अति।
अन्यान्। सुऽवीर्येभिः। च। अभि। सन्ति। जनान्॥ ५॥

हेअग्ने मघवद्भ्योहविर्लक्षणधनयुक्तेभ्योनोस्मभ्यं पुरुवाजाभिर्बह्वन्नैः ऊती ऊतिभीरक्षणैः सह चित्रं चायनीयंरयिं धनं नु क्षिप्रं धेहि देहि प्रयच्छ चशब्दोवक्ष्यमाणेनसमुच्चयार्थः ये राधसाधनेन श्रवसान्नेनच सुवीर्येभिः शोभनैर्वीर्यैश्च अन्यान् जनान् मनुष्यानति अतिशयेनाभिसंति अभिभवन्ति तादृशान्पुत्रांश्चास्मभ्यंदेहीत्यर्थः॥५॥

अथषष्ठी—

इमंयज्ञंचनोधाअग्नउशन्यन्तआसानोजुहुतेहविष्मान्।
भरद्वाजेषुदधिषेसुवृक्तिमवीर्वाजस्यगध्यस्यसातौ॥ ६॥

इमम् । यज्ञम् । चनः । धाः । अग्ने । उशन् । यम् । ते । आसानः ।
जुहुते । हविष्मान् । भरत्ऽवाजेषु । दधिषे । सुऽवृक्तिम् ।
अवीः । वाजस्य । गध्यस्य । सातौ ॥ ६ ॥

हेअग्ने उशन् कामयमानस्त्वं इमं पुरोवर्तियज्ञं यागसाधनं नोहविर्लक्षणमन्नं धाः धेहि स्वात्मनिधारय यंच पुरोडाशादिकं आसानः आसीनः उपविशन् हविष्मान् हविर्युक्तोयजमानस्तेतुभ्यं त्वदर्थं जुहुते जुहोति तमिममित्यन्वयः अपिच भरद्वाजेष्वृषिषु सुवृक्तिं सुष्टुदोषैर्वर्जितांस्तुतिं दधिषे धारय गध्यस्य गध्यतिर्मिश्रीभावकर्मा मिश्रणीयस्य माप्यस्य वाजस्यान्नस्य सातौ संभजनेनिमित्तभूते अवीस्तानृषीन्रक्षच ॥ ६ ॥

अथसप्तमी—

विद्वेषांसीनुहिवर्धयेळांमदेमशतहिमाःसुवीराः ॥ ७ ॥ १२ ॥

वि । द्वेषांसि । इनुहि । वर्धय । इळाम् । मदेम । शतऽहिमाः ।
सुऽवीराः ॥ ७ ॥ १२ ॥

हेअग्ने द्वेषांसि द्वेष्टॄन्शत्रून् विइनुहि विविधंगमय इळामन्नंचास्मदीयंवर्धय वयंच सुवीराः शोभनैःवीरैःपुत्रपौत्रादिभिरुपेताःसन्तः शतहिमाः शतंहेमंतान्संवत्सरान् मदेम मोदेम तृप्ताभूयास्म ॥ ७ ॥

॥ इतिचतुर्थस्यपञ्चमेद्वादशोवर्गः ॥ १२ ॥

यजस्वहोतरितिषळृचमेकादशंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं अनुक्रम्यतेच—यजस्वषळिति प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रप्रथमा—

यजस्वहोतरिषितोयजीयानग्नेबाधोमरुतांनप्रयुक्ति ।
आनोमित्रावरुणानासत्याद्यावाहोत्रायपृथिवीववृत्याः ॥ १ ॥

यजस्व । होतः । इषितः । यजीयान् । अग्ने । बाधः । मरुताम् ।
न । प्रऽयुक्ति । आ । नः । मित्रावरुणा । नासत्या । द्यावा ।
होत्राय । पृथिवी इति । ववृत्याः ॥ १ ॥

हेहोतर्देवानामाह्वातरग्ने यजीयान् यष्टृतमस्त्वं इषितः प्रेषितः अस्माभिःप्रार्थितःसन् नेतिसंमत्यर्थे संप्रतिप्रयुक्ति प्रयुक्तौ प्रयुज्यमानेयज्ञे मरुतां देवानां बाधः शत्रूणांबाधकंगणं यजस्व यद्वैतद्वाक्यद्वयं हेहोतरग्ने यजस्व देवानित्येकंवाक्यं प्रयुज्यतइतिप्रयुक्ति बलं मरुतांनप्रयुक्ति मरुतांबलमिव अस्मच्छत्रून्बाधोबाधस्वेतिद्वितीयंवाक्यं अपिच मित्रावरुणा अहरभिमानीदेवोमित्रः वरुणोरात्र्यभिमानी तौच नासत्या सत्यस्यनेतारौ सत्यस्वभावावेववा नासिकाप्रभवौवा अश्विनौ द्यावापृथिवीदिवंचपृथिवींच एतांश्चदेवान् होत्राय अस्मद्यज्ञाय तदर्थं आववृत्याः आवर्तय आवहेत्यर्थः ॥ १ ॥

अथद्वितीया—

त्वंहोतामन्द्रतमोनोअध्रुगन्तर्देवोविदथामर्त्येषु ।
पावकयाजुह्वा३वह्निरासाग्नेयजस्वतन्वं१तवस्वाम् ॥ २ ॥

त्वम् । होता । मन्द्रऽतमः । नः । अध्रुक् । अन्तः । देवः । विदथा । मर्त्येषु । पावकया । जुह्वा । वह्निः । आसा । अग्ने । यजस्व । तन्वम् । तव । स्वाम् ॥ २ ॥

हेअग्ने त्वं मर्त्येषु मनुष्येषु अन्तर्मध्ये वर्तमाने विदथा विदथेयज्ञे होता देवानामाह्वाता भवसि कीदृशस्त्वं मन्द्रतमःस्तुत्यतमः नोस्माकमध्रुकूअद्रोग्धा अस्मदर्थंद्रोहरहितोवा सर्वदामित्रभूतइत्यर्थः देवोदानादिगुणयुक्तः अपिच हेअग्ने जिह्वा हूयन्तेस्यामाहुतयइति जुहूर्ज्वाला तया पावकयाशोधयित्र्या आसा आस्येन देवानामास्यभूतया वह्निर्हविषांवोढात्वं तव स्वां स्वभूतां स्विष्टकृदाख्यां तन्वं तनूं यजस्व ॥ २ ॥

अथतृतीया—

धन्याचिद्धित्वेधिषणावष्टिप्रदेवाञ्जन्मगृणतेयजध्यै ।
वेपिष्ठोअङ्गिरसांयद्धविप्रोमधुच्छन्दोभनतिरेभइष्टौ ॥ ३ ॥

धन्या । चित् । हि । त्वे इति । धिषणा । वष्टि । प्र । देवान् । जन्म । गृणते । यजध्यै । वेपिष्ठः । अङ्गिरसाम् । यत् । ह । विप्रः । मधु । छन्दः । भनति । रेभः । इष्टौ ॥ ३ ॥

धन्या धनमिच्छन्ती धनहेतुभूताधिषणास्तुतिः हेअग्ने तेत्वां वष्टि कामयते चिद्धीत्येतत्पा-दपूरणं किमर्थं देवान्यष्टव्यानिन्द्रादीन् प्रयजध्यै प्रकर्षेणयष्टुं त्वदीयंजन्मप्रादुर्भावं गृणते स्तुवतेयजमानाय ईदृग्भूतयजमानार्थं यद्ध यदाखलु अङ्गिरसामृषीणांमध्ये वेपिष्ठः अतिशयेन स्तुतेःप्रेरयिता विप्रोमेधावी रेभः स्तोताभरद्वाजः इष्टौ यज्ञे मधु मधुवन्मदकरं छन्दः स्तोत्रं भनति उच्चारयति तदाधिषणावष्टीत्यन्वयः॥ ३ ॥

अथचतुर्थी—

अदि॑द्युत॒त्स्वपा॑को॒ वि॒भावाग्ने॒ यज॑स्व॒ रोद॑सी उरू॒ची ॥
आ॒युं न यं नम॑सा रा॒तह॑व्या अ॒ञ्जन्ति॑ सुप्र॒यसं॒ पञ्च॒ जनाः॑ ॥ ४ ॥

अदि॑द्युतत् । सु । अपा॑कः । वि॒ऽभावा॑ । अग्ने॑ । यज॑स्व । रोद॑सी॒ इति॑ । उ॒रू॒ची इति॑ । आ॒युम् । न । यम् । नम॑सा । रा॒तऽह॑व्याः । अ॒ञ्जन्ति॑ । सु॒ऽप्र॒यस॑म् । पञ्च॑ । जनाः॑ ॥ ४ ॥

अयमग्निः सुअदिद्युतत् सुष्ठुद्योतते दीप्यते कथंभूतः अपाकः पाकःपक्तव्यप्रज्ञोमूर्खः त-द्विलक्षणोऽपाकः विभावा दीप्तिमान् शेषः प्रत्यक्षकृतः हेअग्ने सत्वं उरूची उरुविस्तीर्णंअञ्च-त्यौ विस्तृते रोदसी द्यावापृथिव्यौ यजस्व हविषापूजय आयुंन मनुष्यमतिथिमिव यं पञ्च-जनाःमनुष्याः ऋत्विग्यजमानलक्षणाः रातहव्याः दत्तहविष्काःसन्तःसुप्रयसं शोभनहविर्लक्षणं यमग्निं नमसान्नेनहविर्लक्षणेन अञ्जन्ति सिञ्चन्तितर्पयन्ति सत्वं यजस्वेत्यन्वयः ॥ ४ ॥

अथपञ्चमी—

वृ॒ञ्जे ह॒ यन्नम॑सा ब॒र्हिर॒ग्नावया॑मि॒ स्रुग्घृ॒तव॑ती सुवृ॒क्तिः ।
अम्य॑क्षि॒ सद्म॒ सद॑ने पृथि॒व्या अश्रा॑यि य॒ज्ञः सूर्ये॒ न चक्षुः॑ ॥ ५ ॥

वृ॒ञ्जे । ह॒ । यत् । नम॑सा । ब॒र्हिः । अ॒ग्नौ । अया॑मि । स्रुक् । घृ॒तऽव॑ती । सु॒ऽवृ॒क्तिः । अम्य॑क्षि । सद्म॑ । सद॑ने । पृ॒थि॒व्याः । अश्रा॑यि । य॒ज्ञः । सूर्ये॑ । न । चक्षुः॑ ॥ ५ ॥

यद्ध यदाखलु नमसा हविषासह अग्नौ अग्निसमीपे बर्हिर्वृञ्जे वृजिश्छेदनार्थः छिद्यते आह्रियतइत्यर्थः सुवृक्तिः सुष्ठुदोषैर्वर्जिता घृतवती घृतपूर्णास्रुक् अयामि नियम्यते बर्हिष्यासाद्यते तथा पृथिव्याभूमेः सदने स्थाने सद्महविरासादनार्थावेदिः अम्यक्षि म्यक्षतिर्गतिकर्मा गम्यते परिगृह्यते तदानींयज्ञः अश्रायि यजमानेआश्रितोभवति तत्रदृष्टान्तः—सूर्येनचक्षुः यथा सूर्येसर्वस्यप्रेरकेआदित्येप्रकाशकंतेजःसमवैतितद्वत् ॥ ५ ॥

अथषष्ठी—

दशस्यानःपुर्वणीकहोतर्देवेभिरग्नेअग्निभिरिधानः ।
रायःसूनोसहसोवावसानाअतिस्रसेमवृजनंनांहः ॥ ६ ॥ १३ ॥

दशस्य । नः । पुरुऽअनीक । होतः । देवेभिः । अग्ने । अग्निऽभिः ।
इधानः । रायः । सूनो इति । सहसः । ववसानाः । अति । स्रसेम ।
वृजनंम् । न । अंहः ॥ ६ ॥ १३ ॥

हेपुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने देवेभिर्देवैर्द्योतमानैः अन्यैरग्निभिःत्वद्विभूतिभूतैःसार्धं इधानः इध्यमानोदीप्यमानःसन् नोस्मभ्यं रायोधनानि दशस्य प्रयच्छ हेसहसः सूनो बलस्यपुत्राग्ने वावसानाः हविषात्वामाच्छादयन्तोवयं वृजनंन शत्रुमिव अंहः पापं अतिस्रसेम अतिगच्छेम अतिक्रामेमेत्यर्थः ॥ ६ ॥

॥ इतिचतुर्थस्यपञ्चमेत्रयोदशोवर्गः ॥ १३ ॥

मध्येहोतेतिषळृचंद्वादशंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं मध्यइत्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रप्रथमा—

मध्येहोतादुरोणेबर्हिषोराळग्निस्तोदस्यरोदसीयजध्यै ।
अयंससूनुःसहसऋतावादूरात्सूर्योनशोचिषाततान ॥ १ ॥

मध्ये । होता । दुरोणे । बर्हिषः । राट् । अग्निः । तोदस्य ।
रोदसी इति । यजध्यै । अयम् । सः । सूनुः । सहसः । ऋतऽवा ।
दूरात् । सूर्यः । न । शोचिषा । ततान ॥ १ ॥

होता देवानामाह्वाता बर्हिषोयज्ञस्य राट् राजाग्निः तोदस्य तुद्यतेतपसापीड्यतेइतितोदो-यजमानः तस्यदुरोणेगृहे मध्येनिषीदतीतिशेषः किमर्थं रोदसी द्यावापृथिव्यौ यजध्यै यष्टुं सत्राद्दशोर्य सहसःसूनुः सहसस्पुत्रः ऋतावा सत्यवान् यज्ञवान्वाग्निः सूर्योन सूर्यइव दूरात् दूरतएव शोचिषा तेजसा ततान आतनोति विस्तारयति दूरदेशेवर्तमानोपि सूर्यइवसर्वंजग-द्भासयतीत्यर्थः ॥ १ ॥

अथद्वितीया—

आयस्मिन्त्वेस्वपाकेयजत्रयक्षद्राजन्त्सर्वतातेवनुद्यौः ।
त्रिषधस्थस्ततरुषोनजंहोहव्यामघानिमानुषायजध्यै ॥ २ ॥

आ । यस्मिन् । त्वे इति । सु । अपाके । यजत्र । यक्षत् । राजन् । सर्वतांताऽइव । नु । द्यौः । त्रिऽसधस्थः । ततरुषः । न । जंहः । हव्या । मघानि । मानुषा । यजध्यै ॥ २ ॥

द्यौःस्तोता सर्वतातेव इवशब्दःपूरकः यज्ञनामैतत् सर्वतातौ सर्वैस्तायमानेयज्ञे यद्वा सर्व-शब्दात्स्वार्थिकस्तातिल्प्रत्ययः सर्वस्तोता हेयजत्र यष्टव्य राजन् राजमानाग्ने अपाके प्राज्ञे त्वे यस्मिंस्त्वेत्वयि सु अत्यन्तं नु क्षिप्रं आयक्षत् आयजति हवींषिजुहोति त्रिषधस्थः त्रिषुलोके-षुसहस्थितः यद्वा गार्हपत्यादिरूपेणत्रिधावस्थितः तादृशस्त्वं ततरुषोन तरितासूर्यइव जंहः शीघ्रं-गन्ताभव जंहइतिहन्तेर्गतिकर्मणोरूपं यद्वा तॄप्लवनतरणयोरित्यस्मात्क्वसौरूपंततर्वानिति तस्य षष्ठ्यारूपमेतत् ततरुषइति तरितुःसूर्यस्येवजंहोवेगस्तवभवत्वित्यर्थः किमर्थं मघानि मंहनीयानि प्रशस्यानि मानुषा मनुष्याणांसंबंधीनि हव्या हव्यानि हवींषि यजध्यै यष्टुं देवेभ्योदातुम ॥२॥

अथतृतीया—

तेजिष्ठायस्यारतिर्वनेराट्तोदोअध्वन्नवृधसानोअद्यौत् ।
अद्रोघोनद्रविताचेततित्मन्नमर्त्योवर्त्रओषधीषु ॥ ३ ॥

तेजिष्ठा । यस्यं । अरतिः । वनेऽराट् । तोदः । अध्वंन् । न । वृधसानः । अद्यौत् । अद्रोघः । न । द्रविता । चेतति । त्मन् । अमर्त्यः । अवर्त्रः । ओषधीषु ॥ ३ ॥

यस्याग्नेः अरतिर्गन्त्रीज्वाला तेजिष्ठा अतिशयेनतेजस्विनीसती वनेराट् दावरूपेणअ-रण्येराजमानावर्तते वृधसानोवर्धमानः सोग्निः तोदोअध्वंन तोदः सर्वस्यप्रेरकःसूर्यः सइव अध्वनि स्वमार्गेन्तरिक्षे अद्यौत् द्योततेप्रकाशते अपिच अद्रोघोन अद्रोग्धव्योयद्वा प्राणरूपेणसर्वेषामद्रोग्धावायुरिव तादृशः अमर्त्योमरणरहितः सोग्निः ओषधीषु ओषः पाकः एषुधीयतेइत्योषधयोवनानि तेषु द्रविता शीघ्रगामीसन् अवर्त्रः केनाप्यवारणीयश्चभवन् त्मन् आत्मना स्वप्रकाशेनैवचेतति चेतयति सर्वंजगत् ज्ञापयति ॥ ३ ॥

अथचतुर्थी—

सास्माकेभिरेतरीनशूषैरग्निःष्टवेदमआजातवेदाः ।
द्र्वन्नोवन्वन्क्रत्वानार्वोस्रःपितेवजारयायियज्ञैः ॥ ४ ॥

सः । अस्माकेभिः । एतरि । न । शूषैः । अग्निः । स्तवे । दमे । आ । जातऽवेदाः । द्रुऽअन्नः । वन्वन् । क्रत्वा । न । अर्वा । उस्रः । पिताऽइव । जारयायि । यज्ञैः ॥ ४ ॥

जातवेदाः जातधनोजातप्रज्ञोवा सोग्निः अस्माकेभिरस्मदीयैः स्तोतृभिः एतरीन एतरि गन्तरि याचमानेपुरुषे विद्यमानानिस्तोत्राणियथात्यन्तं सुखकराणि तथा शूषैः सुखकरैःस्तोत्रैः दमेस्मदीययज्ञगृहे आ आभिमुख्येन स्तवे स्तूयते अपिच द्रुन्नः द्रुः द्रुमः सएवअन्नंयस्यस-तथोक्तः अतएव वन्वन् वनानि संभजन् क्रत्वान क्रतुना आत्मीयेनकर्मणाच अर्वा गन्ताभ-वति तत्रदृष्टान्तः—उस्रः पितेव पितापालयितावत्सानांजनकोवा उस्रोवृषभइव सयथा मैथुना-र्थंशीघ्रंगच्छतितद्वत् यज्ञैर्यज्ञवद्भिर्यजमानैश्च जारयायि स्तूयते जरतेःस्तुतिकर्मणएतद्रूपम् ॥४॥

अथपञ्चमी—

अधस्मास्यपनयन्तिभासोवृथायत्तक्षदनुयातिपृथ्वीम् ।
सद्योयःस्पन्द्रोविषितोधवीयानृणोनतायुरतिधन्वाराट् ॥ ५ ॥

अध । स्म । अस्य । पनयन्ति । भासः । वृथा । यत् । तक्षत् । अनुऽयाति । पृथ्वीम् । सद्यः । यः । स्पन्द्रः । विऽसितः । धवीयान् । ऋणः । न । तायुः । अति । धन्व । राट् ॥ ५ ॥

अथास्मिन् लोके स्मेतिपूरकः अस्याग्नेर्भासोरश्मीन् पनयन्ति स्तोतारःस्तुवन्ति यद्यदा वृथा अनायासेन तक्षत् तक्षन् तनूकुर्वन् वनानि सम्यक्दहन् पृथ्वीं विस्तीर्णामरण्यभुव-मनुयात्यनुगच्छति तदानींपनयन्तीत्यन्वयः योग्निः स्पन्द्रः स्पन्दनवान् विषितोविमुक्तःप्रति-बन्धरहितः अतएव सद्यः शीघ्रंधवीयान् गन्तृतमोभवति कइव ऋणोनतायुः ऋणोतिर्गतिक्-र्मा तायुरितिस्तेननाम यथास्तेनःशीघ्रंगन्ताभवति तद्वत् सोयमग्निःधन्वमरुभूमिमतिक्रम्य राट् राजते यद्वा धन्वन्त्यस्मादापइतिधन्वान्तरिक्षं अतिशयेनान्तरिक्षमाक्रम्यराजते ॥ ५ ॥

अथषष्ठी—

सत्वंनोअर्वन्निदायाविश्वेभिरग्नेअग्निभिरिधानः ॥
वेषिरायोवियासिदुच्छुनामदेमशतहिमाःसुवीराः ॥ ६ ॥ १४ ।

सः । त्वम् । नः । अर्वन् । निदायाः । विश्वेभिः । अग्ने । अग्निऽभिः । इधानः । वेषि । रायः । वि । यासि । दुच्छुनाः । मदेम । शतऽहिमाः । सुऽवीराः ॥ ६ ॥ १४ ॥

हेअर्वन् गन्तरग्ने सतादृशस्त्वं निदायाः निन्दित्र्याः प्रजायाः निन्दायाएववापाहीतिशेषः कथं-भूतः सन् विश्वेभिः सर्वैरग्निभिः स्वच्छाखाभूतैः इधानः इध्यमानःसन् रायोधनानिच अस्मा-न्वेषि गमय यद्वा हविर्लक्षणानि धनानि वेषि कामयसे दुच्छुनाः दुःखकारिणीः शत्रुसेनाः वियासिच विविधंगमयसिच वयंच सुवीराः शोभनपुत्रपौत्राःसन्तः शतहिमाः शतसंवत्सरान् म-देम मोदेम ॥६॥ ॥ इतिचतुर्थस्यपञ्चमेचतुर्दशोवर्गः ॥ १४ ॥

त्वद्विश्वेतिषळृचंत्रयोदशंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं त्वद्विश्वेत्यनुक्रान्तं प्रातरनु-वाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रप्रथमा—

त्वद्विश्वासुभगसौभगान्यग्नेवियन्तिवनिनोनवयाः ।
श्रुष्टीरयिर्वाजोवृत्रतूर्येदिवोवृष्टिरीड्योरीतिरपाम् ॥ १ ॥

त्वत् । विश्वा । सुऽभग । सौभगानि । अग्ने । वि । यन्ति । वनिनः । न । वयाः । श्रुष्टी । रयिः । वाजः । वृत्रऽतूर्ये । दिवः । वृष्टिः । ईड्यः । रीतिः । अपाम् ॥ १ ॥

हेसुभग शोभनधनाग्ने विश्वा विश्वानिसर्वाणि सौभगानि धनानि त्वत् त्वत्तः वियन्ति विविधंनिर्गच्छन्ति हिरण्यमूलत्वात्सर्वेषांधनानां हिरण्यंचाग्नेःसकाशादुत्पन्नं तस्यरेतःपरापतत् तद्धिरण्यमभवदितिश्रुतेः[1]। निर्गमनेदृष्टान्तः—वनिनोनवयाः यथावृक्षात्शाखाविविधंनिर्गच्छन्ति तद्वत् तथा रयिः पशुसंघश्च त्वत्सकाशादेव श्रुष्टीक्षिप्रं व्येति निर्गच्छति पशवोवैरयिःपशूनेवावरुन्धइतितैत्तिरीयकम्। वृत्रतूर्ये वृत्राणांशत्रूणांहिंसकेसंग्रामे शत्रून्जेतुं वाजोबलंच त्वत्तोव्येति दिवोन्तरिक्षाद्यावृष्टिः सापि त्वत्तएवव्येति अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते। आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मरणात्॥ अतस्त्वमीड्यः सर्वैःस्तुत्यःसन् अपामुदकानां रीतिर्गमयिताभवसि॥ १॥

अथद्वितीया—

त्वंभगो॑न॒आहि॒रत्न॑मि॒षेपरि॑ज्मेवक्षय॒सिद॒स्मव॑र्चाः।
अग्ने॑मि॒त्रोनबृ॑ह॒तऋ॒तस्या॑सिक्ष॒त्तावा॒मस्य॑दे॒वभूरेः॥ २॥

त्वम्। भगः। न॒ः। आ। हि। रत्न॑म्। इ॒षे। परि॑ज्माऽइव।
क्ष॒य॒सि॒। द॒स्मऽव॑र्चाः। अग्ने॑। मि॒त्रः। न। बृ॒ह॒तः। ऋ॒तस्य॑।
असि॑। क्ष॒त्ता। वा॒मस्य॑। दे॒व॒। भूरे॑ः॥ २॥

हेअग्ने भगोभजनीयस्त्वं नोस्मभ्यं रत्नं रमणीयंधनं आइषे आगमय प्रयच्छ इणूगतावित्यस्यैतद्रूपं हीतिपूरकः दस्मवर्चाः दर्शनीयदीप्तिस्त्वं परिज्मेवपरितोगन्तावायुरिव क्षयसि सर्वत्रनिवससि यद्वा क्षयतिरैश्वर्यकर्मा सर्वस्येशिषे हेअग्ने मित्रोन प्रमीतेस्त्रायकोदेवइव बृहतोमहतःऋतस्योदकस्य यज्ञस्यवा क्षत्तासि क्षदतिरत्रदानकर्मा दाताभवसि तथा हेदेव द्योतमानाग्ने भूरेर्बहुलस्य वामस्य वननीयस्य धनस्यच दाताभवसीत्यनुषङ्गः[2]॥ २॥

अथतृतीया—

ससत्पतिः॒शव॑सा॒हन्ति॑वृ॒त्रमग्ने॒विप्रो॒विप॒णेर्भर्ति॒वाज॑म्।
यंत्वंप्र॑चेतऋ॒तजातरा॒यास॒जोषा॒नप्त्रा॒पांहि॒नोषि॑॥ ३॥

---

१ तै० ब्रा० १. १. ३.। २ तै० सं० १. ५. ८.।

व्याख्यातेयं अक्षरार्थस्तु अनुकूलदीप्ते दानादिगुणयुक्ताग्ने द्यावापृथिव्योरभिगतरुचं अस्मदीयांसुष्टुतिं यष्टव्यान्देवान्प्रति वोचः प्रब्रूहि स्तुतेर्नेतृनस्मांश्च सुनिवासं अविनाशंगमय वयंच त्वत्प्रसादात्द्वेष्टॄन् पापानि तत्फलानि दुर्गमनानिचातिक्रामेम व्यवहितानि जन्मान्तरकृतानिच तान्यतिक्रामेम त्वदीयेनरक्षणेन अत्यन्तमतिक्रामेमेति ॥ ६ ॥

॥ इतिचतुर्थस्यपंचमेषोडशोवर्गः ॥ १६ ॥

इममूषुवइत्येकोनविंशत्यृचंपञ्चदशंसूक्तं आंगिरसस्यवीतहव्यस्यभरद्वाजस्यवार्षं आग्नेयं आद्यैनवजगत्यः तृतीयाषष्ठ्यौतुशक्कर्यतिशक्कर्यौ पञ्चदशीशक्करी सप्तदश्यनुष्टुप् अष्टादशीबृहती दशम्याद्याःपञ्च षोळश्येकोनविंशीचेतिसप्तत्रिष्टुभः तथाचानुक्रान्तं—इममूष्वेकोनावीतहव्यऋषिर्वा जागतंप्राग्दशम्याः तृतीयापञ्चदश्यौशक्कर्यौषष्ठ्यतिशक्कर्यनुष्टुब्बृहत्याउपान्त्येइति प्रातरनुवाकेआग्नेयेक्रतौआश्विनशस्त्रेचआदितोनवर्चः सूत्रितंच—इममूषुवोअतिथिमुषर्बुधमिति दशरात्रेपञ्चमेहनिनवर्चमाज्यशस्त्रंच सूत्रितंच—इममूषुवोअतिथिमुषर्बुधमितिनवाज्यमिति ।

तत्रप्रथमा—

इममूषुवोअतिथिमुषर्बुधंविश्वासांविशांपतिमृञ्जसेगिरा ।
वेतीद्दिवोजनुषाकच्चिदाशुचिर्ज्योक्चिदत्तिगर्भोयदच्युतम् ॥ १ ॥

इमम् । ऊँ इति । सु । वः । अतिथिम् । उषःऽबुधम् । विश्वासाम् । विशाम् । पतिम् । ऋञ्जसे । गिरा । वेति । इत् । दिवः । जनुषा । कत् । चित् । आ । शुचिः । ज्योक् । चित् । अत्ति । गर्भः । यत् । अच्युतम् ॥ १ ॥

हेवीतहव्यऋषे भरद्वाजवा वः त्वं विभक्तिवचनयोर्व्यत्ययः इममु इममेवाग्निं गिरा स्तुत्या सुऋंजसे सुष्ठुप्रसाधय ऋंजतिःप्रसाधनकर्मेतियास्कः[1] । कीदृशमतिथिं सततंगन्तारं यद्वा अतिथिवत्पूज्यं उषर्बुधं उषसिप्रबुद्धं विश्वासां सर्वासां विशां प्रजानां पतिं पालयितारं जनुषा जन्मना स्वतएवशुचिः शुद्धोनिर्मलोवाग्निः कच्चित् कदाचित् कस्मिंश्चित् यागकाले दिवो- द्युलोकात् आवेति आगच्छति तदानींप्रसाधयेत्यन्वयः एवंप्रसाधितोग्निः गर्भः अरण्योर्मध्ये गर्भवद्वर्तमानः यद्वा द्यावापृथिव्योर्गर्भभूतःसन् यद्धविः अच्युतं च्युतिरहितं नित्यं अग्निहोत्रादिसाधनभूतं पयःप्रभृतिकं तत्ज्योक्चित् चिरकालं अत्ति भक्षयति ॥ १ ॥

---

१ नि० ६. २१. ।

अथद्वितीया—

मित्रंनयंसुधितंभृगवोदधुर्वनस्पतावीड्यमूर्ध्वशोचिषम् ।
सत्वंसुप्रीतोवीतहव्येअद्भुतप्रशस्तिभिर्महयसेदिवेदिवे ॥ २ ॥

मित्रम् । न । यम् । सुऽधितम् । भृगवः । दधुः । वनस्पतौ । ईड्यम् । ऊर्ध्वऽशोचिषम् । सः । त्वम् । सुऽप्रीतः । वीतऽहव्ये । अद्भुत । प्रशस्तिऽभिः । महयसे । दिवेऽदिवे ॥ २ ॥

वनस्पतावरण्यां सुधितं सुष्ठुनिहितं ईड्यं स्तुत्यं ऊर्ध्वशोचिषं उच्छ्रिततेजस्कं यमग्निंत्वां मित्रंनमित्रमिव सखिभूतमिव भृगवोमहर्षयः दधुरादधुः गृहेस्थापितवन्तः हेअद्भुत महन्नग्ने सताद्दशस्त्वं वीतहव्ये एतत्संज्ञेऋषौ सुप्रीतः सुष्ठुप्रीयमाणोभव यतः दिवेदिवे प्रतिदिनं प्रशस्तिभिः प्रकृष्टैःस्तोत्रैः महयसे पूज्यसे भरद्वाजऋषिश्चेत् वीतहव्येदत्तहविष्के भरद्वाजइतियोजनीयम् ॥ २ ॥

अथतृतीया—

सत्वंदक्षस्यावृकोवृधोभूरर्यःपरस्यान्तरस्यतरुषः । रायःसूनोसहसो
मर्त्येष्वाछर्दिर्यच्छवीतहव्यायसप्रथोभरद्वाजायसप्रथः ॥ ३ ॥

सः । त्वम् । दक्षस्य । अवृकः । वृधः । भूः । अर्यः । परस्य । अन्तरस्य । तरुषः । रायः । सूनो इति । सहसः । मर्त्येषु । आ । छर्दिः । यच्छ । वीतऽहव्याय । सऽप्रथः । भरत्ऽवाजाय । सऽप्रथः ॥ ३ ॥

हेअग्ने सताद्दशः अवृकोबाधकरहितस्त्वं दक्षस्यानुष्ठानसमर्थस्य वृधोवर्धयिता भूः भवसि तथा परस्य विप्रकृष्टस्य अर्यः अरेः शत्रोः अन्तरस्यान्तिकतरस्यसन्निकृष्टस्यशत्रोः तरुषः तरिताभवसि अतःकारणात् हेसहसःसूनो सप्रथः सर्वतःपृथुस्त्वं मर्त्येषु मनुष्येषुमध्ये भरद्वाजायसंभृतहविर्लक्षणान्नाय वीतहव्याय वीतं गमितंहव्यंहविर्येनताद्दशाय भरद्वाजायेतिवायोज्यं रायोधनानि छर्दिर्गृहमायच्छ प्रयच्छ सप्रथइतिपुनरुक्तिरादरार्था ॥ ३ ॥

अथचतुर्थी—

घृतानंवोअतिथिंस्वर्णरमग्निंहोतारंमनुषःस्वध्वरम् ।
विप्रंनद्युक्षवंचसंसुवृक्तिभिर्हव्यवाहमरतिंदेवमृंजसे ॥ ४ ॥

घृतानम् । वः । अतिथिम् । स्वःऽनरम् । अग्निम् । होतारम् ।
मनुषः । सुऽअध्वरम् । विप्रम् । न । द्युक्षऽवंचसम् । सुवृक्तिऽभिः ।
हव्यऽवाहम् । अरतिम् । देवम् । ऋञ्जसे ॥ ४ ॥

हेवीतहव्य त्वं सुवृक्तिभिः शोभनाभिःस्तुतिभिः हव्यवाहं हविषांवोढारं देवमग्निं ऋंजसे प्रसाधय कीदृशं घृतानं दीप्यमानं वोयुष्माकं अतिथिमतिथिवत्पूज्यं स्वर्णरं स्वर्गस्यनेतारं मनुषोमनोःप्रजापतेर्यज्ञे होतारं देवानामाह्वातारं स्वध्वरं शोभनयज्ञं विप्रंन मेधाविनंविपश्चित-मिव द्युक्षवचसं दीप्तेर्निवासभूतंद्युक्षं तादृशवाक्योपेतं अरतिमर्यस्वामिनं ॥ ४ ॥

अथपञ्चमी—

पावकयायश्चितयंन्त्याकृपाक्षामंन्रुरुचउषसोनभानुना ।
तूर्वन्नयामन्नेतंशस्यनूरणआयोघृणेनततृषाणोअजरंः॥५॥१७॥

पावकया । यः । चितयंन्त्या । कृपा । क्षामंन् । रुरुचे । उषसंः ।
न । भानुना । तूर्वन् । न । यामंन् । एतंशस्य । नु । रणे । आ । यः ।
घृणे । न । ततृषाणः । अजरंः ॥ ५ ॥ १७ ॥

योग्निः पावकया शोधयित्र्या चितयन्त्या चेतयन्त्या प्रज्ञापयन्त्या कृपा दीप्त्या क्षामन् भूम्यां रुरुचे दीप्यते उषसोनभानुना यथाउषसः प्रकाशेनभासन्तेतद्वत् अपिच यामन् या-मनि सङ्ग्रामे तुर्वन्न शत्रून् हिंसनपुरुषइव एतशस्य एतत्संज्ञकस्यऋषेरणे सूर्येणसहसंग्रामे सहा-यार्थं योग्निर्नुक्षिप्रंआघृणे आदीप्यते प्रैतशंसूर्येपस्पृधानमितिनिगमान्तरं । नूनं सर्वेदेवास्तस्य साहाय्यमकार्षुः यश्च ततृषाणस्तृषितः प्रभावेनसर्वभक्षणशीलः अजरः जरारहितश्चभवति तं देवमृंजसइतिपूर्वस्यामृचिसंबन्धः ॥ ५ ॥

॥ इतिचतुर्थस्यपञ्चमेसप्तदशोवर्गः ॥ १७ ॥

---

१ ऋ० सं० १. ४. २९. ।

अथषष्ठी—

अ॒ग्निम॑ग्निंवः स॒मिधा॑दुवस्यतप्रि॒यंप्रि॑यंवो॒अति॑थिंगृणी॒षणि॑ ।
उप॑वोगी॒र्भिर॒मृतं॑विवासतदे॒वोदे॒वेषु॒वन॑ते॒हिवार्यं॑दे॒वोदे॒वेषु॒वन॑ते॒हिनो॒दुवः॑॥६

अ॒ग्निम्ऽअ॑ग्निम् । वः॒ । सम्ऽइधा॑ । दु॒व॒स्य॒त॒ । प्रि॒यम्ऽप्रि॑यम् । व॒ः ।
अति॑थिम् । गृ॒णी॒षणि॑ । उप॑ । व॒ः । गीः॒ऽभिः॑ । अ॒मृत॑म् । वि॒वा॒स॒त॒ । दे॒वः ।
दे॒वेषु॑ । वन॑ते । हि । वार्य॑म् । दे॒वः । दे॒वेषु॑ । वन॑ते । हि । नः॒ । दुवः॑ ॥ ६ ॥

हेऽस्मदीयाःस्तोतारोवोयूयं प्रियंप्रियंअत्यंतंप्रियं वोयुष्माकमतिथिं अतिथिवत्पूज्यं गृणी॰षणि शब्दनीयं स्तुत्यं अग्निमग्निं अग्निमेव नान्यंदेवमित्यर्थः समिधा समिन्धनेन समिद्भिर्वा दुवस्यत परिचरत यद्वा गृणीषणीतिसप्तम्यन्तं गृणीषणि स्तोत्रे विषयतयावर्तमानं अपिच वोयूयं अमृतममरणं अग्निं गीर्भिःस्तुतिभिः उपेत्य विवासत परिचरत हियस्मात् देवेषुमध्ये देवोदानादिगुणयुक्तोग्निः वार्यं वरणीयं समिदादिकं वनते संभजते हियस्माच्च देवेषुमध्ये देवोग्निः नोस्माकं दुवः परिचरणं वनते संभजते तस्माद्दुवस्यतेत्यन्वयः ॥ ६ ॥

दशमेहन्याग्निमारुतेसमिद्धमितितृचोजातवेदस्यनिविद्धानार्थः सूत्रितंच—समिद्धमग्निं-समिधागिरागृणइतितृचश्चेति ।

तत्रप्रथमासूक्तेसप्तमी—

स॒मिद्ध॑म॒ग्निंस॒मिधा॑गि॒रागृ॑णे॒शुचिं॑पाव॒कंपु॒रोअ॑ध्व॒रेध्रु॒वम् ।
विप्रं॒होता॑रंपुरु॒वार॑म॒द्रुहं॑क॒विंसु॒म्नैरी॑महेजा॒तवे॑दसम् ॥ ७ ॥

सम्ऽइ॑द्धम् । अ॒ग्निम् । स॒म्ऽइधा॑ । गि॒रा । गृ॒णे॒ । शुचि॑म् । पा॒व॒कम् ।
पु॒रः । अ॒ध्व॒रे । ध्रु॒वम् । विप्र॑म् । होता॑रम् । पु॒रु॒ऽवार॑म् । अ॒द्रुह॑म् ।
क॒विम् । सु॒म्नैः । ई॒म॒हे॒ । जा॒त॒ऽवे॑दसम् ॥ ७ ॥

समिद्धं सम्यग्दीप्तमग्निं समिधा समिंधनहेतुभूतया गिरा स्तुत्या गृणे स्तौमि यद्वा स-मिधा समिद्भिर्दारुभिः समिद्धं सम्यगिद्धं अपिच शुचिं स्वयंशुद्धं पावकं सर्वेषांशोधकं ध्रुवं निश्चलं तमग्निं अध्वरे यज्ञे पुरस्करोमीतिशेषः तथाविप्रं मेधाविनं होतारं देवानामाह्वातारं पु-रुवारं बहुभिर्वरणीयं अद्रुहं अद्रोग्धारंसर्वेषामनुकूलं कविं क्रान्तदर्शिनं जातवेदसं जातानां

वेदितारमग्निं सुम्नैः सुखकरैःस्तोत्रैः ईमहे संभजामहे यद्वा द्वितीयार्थेतृतीया सुम्नानि धः ईमहे याचामहे ॥ ७ ॥

अथाष्टमी—

त्वांदूतमग्नेअमृतंयुगेयुगेहव्यवाहंदधिरेपायुमीड्यम् ।
देवासंश्चमर्तासश्चजागृविंविभुंविश्पतिंनमसानिषेदिरे ॥ ८ ॥

त्वाम् । दूतम् । अग्ने । अमृतम् । युगेऽयुगे । हव्यऽवाहम् । दधिरे पायुम् । ईड्यम् । देवासः । च । मर्तासः । च । जागृविम् । विऽभुम् विश्पतिम् । नमसा । नि । सेदिरे ॥ ८ ॥

हेअग्ने त्वां देवासोदेवाश्च मर्तासोमनुष्याश्च दूतं दधिरे विदधिरेकृतवन्तः कीदृशं अमृतममरणं युगेयुगे कालेकाले तत्तद्यागानुष्ठानसमये हव्यवाहं हव्यानांहविषांवोढारं प पालयितारमीड्यंस्तुत्यं अपिच ते उभयविधाः जागृविं जागरणशीलं विभुं व्याप्तं विश्प विशांप्रजानांपालयितारं तमग्निं नमसानमस्कारेण हविर्लक्षणान्नेनवा निषेदिरे उपसेदिरे ॥ ८

अथनवमी—

विभूषन्नग्नउभयाँअनुव्रतादूतोदेवानांरजसीसमीयसे ।
यत्तेधीतिंसुमतिमावृणीमहेधस्मानस्त्रिवरूथःशिवोभव ॥ ९ ॥

विऽभूषन् । अग्ने । उभयान् । अनु । व्रता । दूतः । देवानाम् । रजसी इति । सम् । ईयसे । यत् । ते । धीतिम् । सुऽमतिम् । आऽवृणीमहे । अध । स्म । नः । त्रिऽवरूथः । शिवः । भव ॥ ९

हेअग्ने उभयानुभयविधान् देवान् मनुष्यांश्च विभूषन् विशेषेणभूषयन् अलंकुर्वन् त्व अनुव्रता व्रतान्यनु व्रतेषु कर्मसु यागेषु देवानांदूतःसन् रजसी द्यावापृथिव्यौ समीयसे संचरसि देवैर्दत्तानेतुंद्युलोकंगच्छसि हवींषिचनेतुमिमंलोकं किंच यद्यस्मात्तेतुभ्यं त्वदर्थं धीतिं कर्म सुमतिं शोभनांस्तुतिंच आवृणीमहे वयंसंभजामहे अध अतःकारणात् त्रिवरूथस्त्रिस्थानस्त्वं नोस्मा कं शिवःसुखकरोभव स्मेत्येतत्पादपूरणम् ॥ ९ ॥

प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौत्रैष्टुभेछन्दसि तंसुप्रतीकमित्याद्याः षळृचः सूत्रितंच— तंसुप्रतीकमितिषळिति ।

तत्रप्रथमासूक्तेदशमी—

तंसुप्रतीकंसुदृशंस्वञ्चमविद्वांसोविदुष्टरंसपेम ।
सयंक्षद्विश्वांवयुनांनिविद्वान्प्रहव्यमग्निरमृतेषुवोचत् ॥ १० ॥ १८ ॥

तम् । सुऽप्रतीकम् । सुऽदृशम् । सुऽअञ्चम् । अविद्वांसः । विदुःऽतरम् । सपेम । सः । यक्षत् । विश्वा । वयुनानि । विद्वान् । प्र । हव्यम् । अग्निः । अमृतेषु । वोचत् ॥ १० ॥ १८ ॥

अविद्वांसोवैदुष्यरहिताअल्पमतयोवयं विदुष्टरं विद्वत्तरं सर्वज्ञंतमग्निं सपेम परिचरेम कीदृशं सुप्रतीकं शोभनांगं सुदृशं शोभनद्रष्टारं स्वंचं सुष्ठुअञ्चन्तं गच्छन्तं किंच सताद्दशोग्निः यक्षत् देवान्यजतु विश्वा सर्वाणि वयुनानि ज्ञाननामैतत इहतुज्ञातव्येवर्तते ज्ञातव्यान्यर्थजातानि वेद्वान् जानन्नग्निः अमृतेषु मरणरहितेषुदेवेषु हव्यमस्मदीयं हविः प्रवोचत् प्रब्रवीतु युष्मदर्थं हविःकल्पितं तदर्थंयूयमागच्छतेत्येवंकथयतु ॥ १० ॥

॥ इतिचतुर्थस्यपञ्चमेऽष्टादशोवर्गः ॥ १८ ॥

अथैकादशी—

तमंग्नेपास्युततंपिंपर्षियस्तआनंट्कवयेंशूरधीतिम् ।
यज्ञस्यंवानिशितिंवोदितिंवातमित्पृणक्षिशवंसोतराया ॥ ११ ॥

तम् । अग्ने । पासि । उत । तम् । पिपर्षि । यः । ते । आनट् । कवये । शूर । धीतिम् । यज्ञस्य । वा । निःऽशितिम् । वा । उत्ऽइतिम् । वा । तम् । इत् । पृणक्षि । शवसा । उत । राया ॥ ११ ॥

हेअग्ने तंपुरुषं पासि रक्षसि उतापिच तंपिपार्षि कामैःपूरयसि यःपुरुषः हेशूर शौर्यवन्नग्ने कवये क्रान्तदर्शनाय ते तुभ्यं त्वदर्थं धीतिंकर्म स्तुतिंवा आनट् प्राप्नोति यद्वा क्रियाग्रहणंकर्तव्यमिति कर्मणःसंप्रदानत्वाच्चतुर्थी कविंत्वांधीतिंआनट् प्रापयतितंपासीत्यन्वयः अपिच

यज्ञस्य यागस्य वा तत्साधनभूतस्यहविषोवा निशितिं वा निशितिःसंस्कारःतंवाउदितिं उद्गमनंवा आनट् प्रापयति तमित् तमेव शवसा बलेन पृणक्षि पूरयसि उतापिच राया धनेन पूरयसि ॥ ११ ॥

अथद्वादशी—

त्वमंग्नेवनुष्यतोनिपाहित्वमुंनःसहसावन्नवद्यात् ।
संत्वांध्वस्मन्वदभ्येतुपाथःसंरयिःस्पृहयाय्यःसहस्री ॥ १२ ॥

त्वम् । अग्ने । वनुष्यतः । नि । पाहि । त्वम् । ऊँ इति । नः ।
सहसाऽवन् । अवद्यात् । सम् । त्वा । ध्वस्मन्ऽवत् । अभि ।
एतु । पाथः । सम् । रयिः । स्पृहयाय्यः । सहस्री ॥ १२ ॥

हेअग्ने त्वं वनुष्यतोहिंसकाच्छत्रोः निपाहि नितरामस्मान्रक्ष हेसहसावन्बलवन्नग्ने त्वमु त्वमेव नोस्मानवद्यात् पापात् निपाहि त्वात्वां ध्वस्मन्वत् ध्वंसनवत् ध्वस्तदोषं पाथोहविर्लक्षणं अस्माभिर्दत्तमन्नं समभ्येतु सम्यगभिगच्छतु स्पृहयाय्यः स्पृहणीयः सहस्री सहस्रसंख्यायुक्तः रयिः त्वयादत्तंधनं सम्यगभिगच्छतु ॥ १२ ॥

व्यूळ्हेदशरात्रेपंचमेहन्याग्निमारुतेअग्निर्होतेतितृचोजातवेदसनिविद्धानीयः सूत्रितंच—अग्निर्होतागृहपतिःसराजेतितिस्रइति। पत्नीसंयाजेषुग्रहपतेरायानुवाक्या सूत्रितंच—अग्निर्होतागृहपतिःसराजाहव्यवाळग्निरजरःपितानइतिपत्नीसंयाजाइति । आश्विनशस्त्रस्यैषैवप्रतिपत् सूत्रितंच—अग्निर्होतागृहपतिःसराजेति । प्रतिपदेकपातिनीपच्छइति ।

सैषासूक्तेत्रयोदशी—

अग्निर्होतागृहपंतिःसराजाविश्वांवेदजनिमाजातवेदाः ।
देवानांमुतयोमर्त्यानांयजिष्ठःसप्रयंजतामृतावां ॥ १३ ॥

अग्निः । होतां । गृहऽपंतिः । सः । राजां । विश्वां । वेद ।
जनिम । जातऽवेदाः । देवानांम् । उत । यः । मर्त्यानाम् ।
यजिष्ठः । सः । प्र । यजताम् । ऋतऽवां ॥ १३ ॥

होता देवानामाह्वाता राजा राजमानः सोग्निः गृहपतिः गृहाणांपतिरधिपतिर्भवति तथा विश्वा विश्वानिसर्वाणि जनिम जन्मानि जन्मवन्ति भूतजातानि जातवेदाः जातप्रज्ञःसन् वेद वेत्तिजानाति योग्निःदेवानामिन्द्रादीनां उतापिच मर्त्यानांमनुष्याणांचमध्ये यजिष्ठः अतिशयेनयष्टाभवति ऋतावा ऋतंसत्यंयज्ञोवातद्वान्सोग्निः प्रयजतां प्रकर्षेणदेवान्यजतु ॥ १३ ॥

अग्नेयदद्येतिदर्शपूर्णमासयोःस्विष्टकृतोयाज्या सूत्रितंच—अग्नेयदद्यविशोअध्वरस्यहोतरित्यनवानंयजतीति ।

सैषासूक्तेचतुर्दशी—

अग्ने॒यद॒द्यवि॒शोअ॑ध्वरस्यहोत॒ःपाव॑कशोचे॒वेष्ट्वंहियज्वा॑ ।
ऋ॒तायं॑जासिमहि॒नावियद्भूर्ह॒व्यावह॑यविष्ठ॒याते॑अ॒द्य ॥ १४ ॥

अग्ने॑ । यत् । अ॒द्य । वि॒शः । अ॒ध्व॒रस्य॑ । हो॒त॒रिति॑ । पाव॑कऽशोचे ।
वेः । त्वम् । हि । यज्वा॑ । ऋ॒ता । य॒जा॒सि॒ । म॒हि॒ना । वि ।
यत् । भूः । ह॒व्या । व॒ह॒ । य॒वि॒ष्ठ॒ । या । ते॒ । अ॒द्य ॥ १४ ॥

हेअध्वरस्यहोतः यज्ञस्यनिष्पादक पावकशोचे शोधकदीप्ते एवंभूतहेअग्ने अद्यास्मिन्काले विशोमनुष्यस्य यजमानस्य यत्कर्तव्यं तत् वेः कामयस्व • हियस्मात् त्वंयज्वा देवानांयष्टाभवसि तस्मात् त्वंऋता ऋते यज्ञे यजासि देवान्यज अपिच महिना महिम्ना स्वमाहात्म्येन यद्यस्मात् विभूःविभवसि व्याप्तोभवसि अतःकारणात् हेयविष्ठ युवतमाग्ने तेतुभ्यं त्वदर्थं अद्येदानीं या यानि हव्यानि जुहुमः तानि हव्या हव्यानि हवींषि वह स्वकीयांस्विष्टकृदाख्यांतनुं प्रापय ॥ १४ ॥

अथपंचदशी—

अ॒भिप्रयां॑सि॒सुधि॑ताNि॒हिख्यो॒नित्वा॑दधीत॒रोद॑सी॒यज॑ध्यै ।
अवा॑नोमघव॒न्वाज॑साता॒वग्ने॒विश्वा॑निदुरि॒ताते॑रेम॒ताते॑रेम॒तवाव॑
सातरेम ॥ १५ ॥ १९ ॥

अ॒भि । प्रयां॑सि । सुऽधि॑तानि । हि । ख्यः । नि । त्वा॒ । द॒धी॒त॒ ।
रोद॑सी॒ इति॑ । यज॑ध्यै । अव॑ । न॒ः । म॒घ॒ऽव॒न् । वाज॑ऽसातौ । अग्ने॑ ।
विश्वा॑नि । दु॒ःऽइ॒ता । त॒रे॒म॒ । ता । त॒रे॒म॒ । तव॑ । अव॑सा । त॒रे॒म॒॥१५॥१९॥

हेअग्ने सुधितानि सुनिहितानि वेद्यामासादितानि प्रयांस्यन्नानि हविर्लक्षाणान्यभिख्यः अभिपश्यसि हिपूरकः तादृशंत्वां रोदसी द्यावापृथिव्यौ एतदुपलक्षितान्सर्वान्देवान्यजध्यै यष्टुंनिदधीत अयंयजमानोनिहितवान् हेमघवन्नग्ने नोस्मान्वाजसातौ संग्रामे अन्नस्यसंभजनेवा निमित्तभूते अव रक्ष वयंच विश्वानि सर्वाणि दुरिता दुरितानि दुःखानि तरेमातिक्रमेम अन्यद्गतम् ॥ १५ ॥

॥ इतिचतुर्थस्यपञ्चमेएकोनविंशोवर्गः ॥ १९ ॥

अग्निप्रणयनेअग्नेविश्वेभिरित्येषानुवक्तव्या सूत्रितंच—अग्नेविश्वेभिःस्वनीकदेवैरित्यर्धर्चेआरमेदिति । सैषासूक्तेषोडशी—

अग्ने॒विश्वे॑भिःस्वनीकदे॒वैरूर्णा॑वन्तंप्रथ॒मःसी॑द॒योनि॑म् ।
कु॒ला॒यिनं॑घृ॒तवं॑न्तंसवि॒त्रेय॒ज्ञंन॑य॒यज॑मानायसा॒धु ॥ १६ ॥

अग्ने॑ । विश्वे॑भिः । सु॒ऽअ॒नी॒क॒ । दे॒वैः । ऊर्णा॑ऽवन्तम् । प्र॒थ॒मः । सी॒द॒ । योनि॑म् । कु॒ला॒यिन॑म् । घृ॒तऽवं॑न्तम् । स॒वि॒त्रे । य॒ज्ञम् । न॒य॒ । यज॑मानाय । सा॒धु ॥ १६ ॥

हेस्वनीक सुज्वालाग्ने विश्वेभिः विश्वैःसर्वैर्देवैःसह ऊर्णावन्तं ऊर्णास्तुकावन्तं योनिं उत्तरवेदिलक्षणंस्थानं प्रथमः सर्वेषुदेवेषुमुख्यस्त्वं सीद उपविश कीदृशंयोनिं कुलायिनं कुलायोनीडं तत्सदृशं गुग्गुल्वादिसंभरणोपतं तथाचश्रूयते—कुलायमिवह्येतद्यज्ञेक्रियतेयत्पैतुदारवाः परिधयोगुग्गुलूर्णास्तुकाःसुगन्धितेजनानीति । घृतवन्तं व्याघारणाज्ययुक्तं एवमुत्तरवेद्यांनिषण्णस्त्वं सवित्रे हविषांप्रेरयित्रेयजमानाय षष्ठ्यर्थेचतुर्थ्येषा ईदृशस्यथयजमानस्य यज्ञं साधु आर्जवेननय देवान्प्रापय ॥ १६ ॥

अथसप्तदशी—

इ॒मम॒त्यमथर्व॒वद॒ग्निंम॑न्थन्ति॒वे॒धसः॑ ।
यम॑ङ्कू॒यन्त॒मान॑य॒न्नमू॑रंश्या॒व्या॑भ्यः ॥ १७ ॥

इ॒मम् । ऊँ इति॑ । त्यम् । अ॒थ॒र्व॒ऽवत् । अ॒ग्निम् । म॒न्थ॒न्ति॒ । वे॒धसः॑ । यम् । अ॒ङ्कु॒ऽयन्त॑म् । आ । अन॑यन् । अमू॑रम् । श्या॒व्या॑भ्यः ॥ १७ ॥

१ ऐ० ब्रा० १.२८.।

वेधसःकर्मणांविधातारऋत्विजः इमंदृश्यमानं त्यं तंपूर्वोक्तगुणमग्निं अथर्ववत् यथाअथर्वाख्यऋषिःपुराअमथ्नात् तथामन्थन्ति मथ्नन्ति अरण्योःसकाशात्जनयन्ति अंकूयन्तं कुत्सितमंचनंगमनंअंकु तदात्मनइच्छन्तं देवेभ्योनिर्गत्य इतस्ततःपलायमानं अमूरं अमूढं यमग्निं श्याव्याभ्यः श्यावीतिरात्रिनाम तत्रभवास्तमसःसंहतयःश्याव्याः ताभ्यःसकाशादानयन् आगमयन तंमंथन्तीत्यन्वयः ॥ १७ ॥

अथाष्टादशी—

जनिष्वादेववीतयेसर्वतातास्वस्तये।
आदेवान्वक्ष्यमृताँऋतावृधोयज्ञंदेवेषुपिस्पृशः ॥ १८ ॥

जनिष्व। देवऽवीतये। सर्वऽताता। स्वस्तये। आ। देवान्।
वक्षि। अमृतान्। ऋतऽवृधः। यज्ञम्। देवेषु। पिस्पृशः ॥ १८ ॥

हेअग्ने सर्वताता सर्वैस्तायमानेयज्ञे मथ्यमानस्त्वं जनिष्व प्रादुर्भव किमर्थं देववीतये देवकामाययजमानाय षष्ठ्यर्थेचतुर्थ्येषा ईदृशस्ययजमानस्य स्वस्तये अविनाशार्थं जनित्वा च अमृतान् मरणरहितान् ऋतावृधोयज्ञस्यवर्धयितॄन् देवानावक्षि आवह तदनन्तरं तेषुदेवेषु अस्मदीयंयज्ञंपिस्पृशः स्पर्शय प्रापयेत्यर्थः ॥ १८ ॥

अथैकोनविंशी—

वयमुंत्वागृहपतेजनानामग्नेअकर्मसमिधाबृहन्तम्।
अस्थूरिनोगार्हपत्यानिसन्तुतिग्मेननस्तेजसासंशिशाधि ॥१९॥२०॥

वयम्। ऊँ इति। त्वा। गृहऽपते। जनानाम्। अग्ने।
अकर्म। समऽइधा। बृहन्तम्। अस्थूरि। नः। गार्हऽपत्यानि।
सन्तु। तिग्मेन। नः। तेजसा। सम्। शिशाधि ॥ १९ ॥ २० ॥

हेगृहपते यज्ञानांपालकाग्ने जनानां प्राणिनांमध्ये वयमु वयमेव त्वा त्वांसमिधा समिन्धनेन बृहन्तं महान्तं अकर्म कृतवन्तःस्मः अतःकारणात् नोस्माकं गार्हपत्यानिगृहपतित्वानि अस्थूरि अस्थूरिणि एकाश्वयुक्तःशकटःस्थूरिरित्युच्यते तद्विपरीतोबहुभिरश्वैरुपेतःशकटोऽ-

स्थूरिः तेनचसंपूर्णतालक्ष्यते अस्थूरीणि पुत्रपशुधनादिभिःसंपूर्णानिभवन्तु अपिच नोस्मान् तिग्मेन तीक्ष्णेनतेजसा संशिशाधि सम्यक्शिश्य सम्यक्तीक्ष्णीकुरु संयोजयेत्यर्थः ॥ १९ ॥

॥ इतिचतुर्थस्यपञ्चमेविंशोवर्गः ॥ २० ॥

॥ इतिषष्ठेमण्डलेप्रथमोनुवाकः ॥ १ ॥

द्वितीयेनुवाके अष्टसूक्तानि तत्रत्वमग्नेयज्ञानामितिअष्टाचत्वारिंशदृचंप्रथमंसूक्तं भरद्वाजस्यार्षमाग्नेयं आद्याषष्ठीचवर्धमानागायत्रीषट्कसप्तकाष्टकाःसावर्धमानेत्युक्तलक्षणोपेतत्वात् सप्तविंश्यनुष्टुप् आतेअग्नेअग्निंदेवासइत्येतेऋचावनुष्टुभौ तयोःपूर्वावीतीयोदेवमितित्रिष्टुप् शिष्टाद्वाचत्वारिंशदृचोगायत्र्यः तथाचानुक्रम्यते—त्वमग्नेष्टाचत्वारिंशद्गायत्रं वर्धमानाद्याषष्ठीचसप्तविंश्यनुष्टुप्त्रिष्टुपपूर्वेचांत्येइति प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौगायत्रेछन्दसीदंसूक्तमुच्यते तत्रान्त्यास्तिस्रऋचउद्धर्तव्याः सूत्र्यतेहि—त्वमग्नेयज्ञानामितितिस्रउत्तमामुद्धरेदिति । विश्वजितिआग्निमारुते बृहत्सामयद्यग्निष्टोमसामस्यात् तदानीं आद्याःषळृचःस्तोत्रियानुरूपार्थाः सूत्रितं हि—त्वमग्नेयज्ञानामितिस्तोत्रियानुरूपाविति ।

तत्रप्रथमा—

त्वम॑ग्नेय॒ज्ञानां॒होता॒विश्वे॑षांहि॒तः । दे॒वेभि॒र्मानु॑षे॒जने॑ ॥ १ ॥

त्वम् । अ॒ग्ने॒ । य॒ज्ञाना॑म् । होता॑ । विश्वे॑षाम् । हि॒तः ।
दे॒वेभिः॑ । मानु॑षे । जने॑ ॥ १ ॥

हेअग्ने त्वं विश्वेषां सर्वेषां सप्तसंस्थारूपेणभिन्नानांयज्ञानांहोता होमनिष्पादकोसि यद्वा यज्ञानांसंबन्धीदेवानामाह्वाताभवसि कुतइत्यतआह यस्मात्त्वं मानुषे मनोःसंबन्धिनिमनुष्ये जने यजमाने देवेभिर्देवैः हितः होतृत्वेननिहितोसि तस्मादित्यर्थः ॥ १ ॥

अथद्वितीया—

सनो॑म॒न्द्राभि॑रध्व॒रेजि॒ह्वाभि॑र्यजाम॒हः । आदे॒वान्व॑क्षि॒यक्षि॑च ॥२॥

सः । नः॒ । म॒न्द्राभिः॑ । अ॒ध्व॒रे । जि॒ह्वाभिः॑ । य॒ज॒ । म॒हः ।
आ । दे॒वान् । व॒क्षि॒ । यक्षि॑ । च॒ ॥ २ ॥

हेअग्ने सत्वं नोस्माकमध्वरेयज्ञे मन्द्राभिर्मदकरीभिः स्तुत्याभिर्वा जिह्वाभिः ज्वालाभिः महोमहतोदेवान्यज हविर्भिस्तर्पय कथंतदिति उच्यते देवान्यष्टव्यानिन्द्रादीन् आवक्षि आवह ततोयक्षिच यजच हवींषितेभ्योदेहीत्यर्थः ॥ २ ॥

पाथिकृत्यामग्नेः पथिकृतोनुवाक्या वेत्थेत्येषा सूत्रितंच—वेत्थाहिवेधोअध्वनआदेवानामपि पन्थामगन्मेति ।

सैषातृतीया—

वेत्थाहिवेधोअध्वनःपथश्चदेवाअंसा । अग्नेयज्ञेषुसुक्रतो ॥३॥

वेत्थ । हि । वेधः । अध्वनः । पथः । च । देव । अञ्जसा ।
अग्ने । यज्ञेषु । सुक्रतो इति सुऽक्रतो ॥ ३ ॥

हेवेधः विधातः सुक्रतो शोभनकर्मन् देव दानादिगुणयुक्ताग्ने त्वं यज्ञेषु दर्शपूर्णमासादियागेषु अध्वनोमहामार्गान् पथश्चक्षुद्रमार्गांश्च अंजसा जवेन वेत्थ जानासि हियस्मादेवं तस्मात् कारणात् यज्ञमार्गाद्भ्रष्टंयजमानं पुनस्तंमार्गंप्रापयेत्यर्थः ॥ ३ ॥

अथचतुर्थी—

त्वामीळेअधद्विताभरतोवाजिभिःशुनम् । ईजेयज्ञेषुयज्ञियम् ॥४॥

त्वाम् । ईळे । अध । द्विता । भरतः । वाजिऽभिः । शुनम् ।
ईजे । यज्ञेषु । यज्ञियम् ॥ ४ ॥

हेअग्ने त्वांभरतः दौष्यंतिः एतत्संज्ञोराजा वाजिभिः वाजोहविर्लक्षणमन्नंतद्वद्भिर्ऋत्विग्भिःसह द्विता द्विविधं इष्टप्राप्त्यनिष्टपरिहाररूपेणद्विधाभिन्नं शुनं सुखमुद्दिश्य ईळे स्तुतवान् स्तुत्वाच यज्ञियं यज्ञार्हं त्वां यज्ञेषु तृतीयार्थेसप्तमी यज्ञैः ईजे इष्टवान् तस्मैत्वमुभयविधंसुखंप्रादाइत्यर्थः ॥ ४ ॥

अथपञ्चमी—

त्वमिमावार्यापुरुदिवोदासायसुन्वते । भरद्वाजायदाशुषे ॥५॥२१॥

त्वम् । इमा । वार्या । पुरु । दिवःऽदासाय । सुन्वते ।
भरत्ऽवाजाय । दाशुषे ॥ ५ ॥ २१ ॥

हेअग्ने त्वं इमा इमानि दृश्यमानानि पुरु पुरूणि बहूनि वार्या वार्याणिवरणीयानिसंभजनीयानिधनानि दिवोदासाय सुन्वते लुप्तोपममेतत् यथासोमाभिषवंकुर्वतेदिवोदासाख्यायराज्ञे प्रादाः तथा दाशुषे हवींषिदत्तवतेभरद्वाजायऋषये देहीतिशेषः ॥ ५ ॥

॥ इतिचतुर्थस्यपञ्चमेएकविंशोवर्गः ॥ २१ ॥

अथषष्ठी—

त्वंदूतोअमर्त्यआवहादैव्यंजनम् । शृण्वन्विप्रस्यसुष्टुतिम् ॥ ६ ॥

त्वम् । दूतः । अमर्त्यः । आ । वह । दैव्यम् । जनम् ।
शृण्वन् । विप्रस्य । सुऽस्तुतिम् ॥ ६ ॥

अमर्त्योमरणधर्मस्त्वं दूतोभूत्वा दैव्यं देवसंबन्धिनंजनमावह अस्मद्यज्ञे आनय किंकुर्वन् विप्रस्य मेधाविनोभरद्वाजस्य सुष्टुतिं शोभनांस्तुतिंशृण्वन् ॥ ६ ॥

अथसप्तमी—

त्वामग्नेस्वाध्योऽमर्तासोदेववीतये । यज्ञेषुदेवमीळते ॥ ७ ॥

त्वाम् । अग्ने । सुऽआध्यः । मर्तासः । देवऽवीतये ।
यज्ञेषु । देवम् । ईळते ॥ ७ ॥

हेअग्ने देवं द्योतमानं त्वां स्वाध्यः शोभनाध्यानाः मर्तासोमनुष्याः देववीतये देवानांतर्पणार्थं यज्ञेषु ईळते स्तुवंति याचन्तेवा ॥ ७ ॥

अथाष्टमी—

तवप्रयंक्षिसंदृशमुतक्रतुंसुदानवः । विश्वेजुषन्तकामिनः ॥ ८ ॥

तव । प्र । यक्षि । सम्ऽदृशम् । उत । क्रतुम् । सुऽदानवः ।
विश्वे । जुषन्त । कामिनः ॥ ८ ॥

हेअग्ने तव संदृशं सम्यक्दर्शनीयं यद्वा सम्यग्द्रष्टारं सर्वस्यभासकंतेजः प्रयक्षि प्रयक्षे प्रकर्षेणपूजयामि उतापिच सुदानवः सुदानोः शोभनदानस्य तव क्रतुं कर्म प्रज्ञानंवा पूजयामि न केवलमहमेव किंतु अन्येविश्वेसर्वेपि यजमानाः कामिनः त्वदनुग्रहात्तैस्तैःकामैरुपेताःसन्तः जुषन्त त्वदीयंसंदृशंक्रतुंचसेवन्ते ॥ ८ ॥

अथनवमी–

त्वंहोतामनुर्हितोवह्निरासाविदुष्टरः । अग्नेयक्षिदिवोविशः॥ ९ ॥

त्वम् । होता । मनुःऽहितः । वह्निः । आसा । विदुःऽतरः ।
अग्ने । यक्षि । दिवः । विशः ॥ ९ ॥

हेअग्ने त्वंहोता होतृत्वेन मनुर्हितः मनुनाआहितोसि आसा आस्येन आस्यभूतयाज्वालया वह्निर्हविषांवोढा विदुष्टरः अतिशयेनविद्वान् अतःकारणात् त्वं दिवः द्युलोकसंबन्धिनीः विशः दैवीःप्रजाः यक्षि यज ॥ ९ ॥

दर्शपूर्णमासयोःसामिधेनीषु अग्नआयाहीत्याद्यास्तिस्रः सूत्रितंच–अग्नआयाहिवीतयेगृणानईळेन्योनमस्यस्तिरइति । गार्हपत्याहवनीययोर्मिथःसंसर्गे अग्नयेवीतयेष्टाकपालःपुरोडाशः तस्यअग्नआयाहीत्येषानुवाक्या सूत्रितंच–अग्नआयाहिवीतयेयोअग्निंदेववीतयइति ।

सैषासूक्तेदशमी–

अग्नआयाहिवीतयेगृणानोहव्यदातये। निहोतासत्सिबर्हिषि॥ १०॥ २२

अग्ने । आ । याहि । वीतये । गृणानः । हव्यऽदातये । नि ।
होता । सत्सि । बर्हिषि ॥ १० ॥ २२ ॥

हेअग्ने त्वमायाहि आगच्छ किमर्थं वीतये हविषांभक्षणार्थं किंच हव्यदातये हव्यानि हवींषिदेवेभ्योदातुं गृणानः स्तूयमानस्त्वं बर्हिषि आस्तीर्णेदर्भे होतासन् निषत्सि निषीद उपविश ॥ १० ॥

॥ इतिचतुर्थस्यपञ्चमेद्वाविंशोवर्गः ॥ २२ ॥

अथैकादशी–

तंत्वासमिद्भिरङ्गिरोघृतेनवर्धयामसि। बृहच्छोचायविष्ठ्य॥ ११॥

तम् । त्वा । सुमित्ऽभिः । अङ्गिरः । घृतेन॑ । वर्धयामसि ।
बृहत् । शोच । यविष्ठ्य ॥ ११ ॥

हेअङ्गिरः अङ्गनादिगुणयुक्त अङ्गाररूपवा अङ्गिरसःपुत्रवाग्ने तं पूर्वोक्तगुणं त्वा त्वां समिद्भिः समिन्धनहेतुभिर्दारुभिः घृतेनाज्येनच वर्धयामसि वर्धयामः अतोहेयविष्ठ्य युवतमाग्ने बृहत् महत् अत्यन्तं शोच दीप्यस्व ॥ ११ ॥

अथद्वादशी—

सनः॑पृथुश्रवाय्य॒मच्छा॑देवविवाससि । बृहद॑ग्नेसुवीर्य॑म् ॥ १२ ॥

सः । नः । पृथु । श्रवाय्य॑म् । अच्छ॑ । देव । विवाससि ।
बृहत् । अग्ने । सुऽवीर्य॑म् ॥ १२ ॥

हेदेव द्योतमानाग्ने सपूर्वोक्तगुणस्त्वं पृथु विस्तीर्णं श्रवाय्यं श्रवणीयं प्रशस्यं बृहन्महत् सुवीर्यं शोभनवीर्योपेतं धनं नोस्मानच्छविवाससि अभिगमय अत्रवाजसनेयकं—अच्छादेवविवाससीति तन्नोगमयेत्येवैतदाहेति ॥ १२ ॥

अग्निमंथनेत्वामग्नेपुष्करादधीत्याद्यास्तिस्रऋचोनूच्याः सूत्रितंच—त्वामग्नेपुष्करादधीतितिसृणामर्धर्चंशिष्ट्वारमेदिति ।

तत्रप्रथमासूक्तेत्रयोदशी—

त्वाम॑ग्नेपुष्क॑रा॒दध्यथ॑र्वा॒निर॑मन्थत । मूर्ध्नोविश्व॑स्यवा॒घतः॑ ॥ १३ ॥

त्वाम् । अग्ने । पुष्क॑रात् । अधि । अथ॑र्वा । निः । अमन्थत ।
मूर्ध्नः । विश्व॑स्य । वाघतः॑ ॥ १३ ॥

हेअग्ने अथर्वा एतत्संज्ञऋषिः त्वां पुष्करादधि पुष्करपर्णेनिरमन्थत अरण्योः सकाशादजनयत् कीदृशात् पुष्करात् मूर्ध्नः मूर्धवद्धारकात् विश्वस्य सर्वस्यजगतः वाघतोवाहकात् पुष्करपर्णेहिप्रजापतिःभूमिमप्रथयत् तत्पुष्करपर्णेप्रथयदितिश्रुतेः। भूमिश्चसर्वजगतआधारभूतेति पुष्करपर्णस्यसर्वजगद्धारकत्वं अत्र पुष्करशब्देनपुष्करपर्णमभिधीयते इत्येतच्चतैत्तिरीयकेविस्पष्टमाम्नातं—त्वामग्नेपुष्करादधीत्याह पुष्करपर्णेह्येनमुपश्रुतमविन्ददिति ॥ १३ ॥

---

१ तै० ब्रा० १. १. ३. ।

अथचतुर्दशी–

तमुंत्वादध्यङ्ङृषिःपुत्रईधेअथर्वणः । वृत्रहणंपुरंदरम् ॥१४॥

तम् । ऊँ इति । त्वा । दध्यङ् । ऋषिः । पुत्रः । ईधे । अथर्वणः । वृत्रऽहनंम् । पुरम्ऽदरम् ॥ १४ ॥

हेअग्ने यउक्तगुणः तमु तमेव त्वामथर्वणःपुत्रोदध्यङ्एतत्संज्ञऋषिः ईधेदीपितवान् कीदृशं वृत्रहणं आवरकाणांशत्रूणांहन्तारं पुरंदरं असुरपुराणांदारयितारम् ॥ १४ ॥

अथपञ्चदशी–

तमुंत्वापाथ्योवृषासमींधेदस्युहन्तंमम् । धनंजयंरणेरणे ॥१५॥२३॥

तम् । ऊँ इति । त्वा । पाथ्यः । वृषा । सम् । ईधे । दस्युहन्ऽतंमम् । धनम्ऽजयम् । रणेऽरणे ॥ १५ ॥ २३ ॥

पाथ्योवृषानामकश्चिदृषिः तमु तमेव त्वा त्वां हेअग्ने समीधे समैंध समदीपयत् कीदृशं दस्युहन्तमं अतिशयेन दस्यूनां उपक्षपयितॄणां शत्रूणां हन्तारं रणेरणे युद्धेयुद्धे धनंजयं धनानांजेतारम् ॥ १५ ॥

॥ इतिचतुर्थस्यपञ्चमेत्रयोविंशोवर्गः ॥ २३ ॥

उक्थ्येक्रतौ तृतीयसवने मैत्रावरुणस्य एह्यूष्वित्यादिकौतृचौस्तोत्रियानुरूपौ आभिप्लविकेषुउक्थ्येषुतु एतौवैकल्पिकौस्तोत्रियानुरूपौ आभिप्लविकेषुउक्थ्येषु सूत्रितंच–एह्यूषुब्रवाणितआग्निरगामिभारतइति पौनराधेयिक्यामिष्टौ उत्तराज्यभागस्य एह्यूष्वित्यनुवाक्या सूत्रितंच–एह्यूषुब्रवाणितइत्याग्नेयावाज्यभागाविति ।

सैषासूक्तेषोडशी–

एह्यूषुब्रवाणितेऽग्नंइत्थेतंरागिरंः ॥ एभिर्वर्धासइन्दुभिः ॥ १६ ॥

आ । इहि । ऊँ इति । सु । ब्रवाणि । ते । अग्ने । इत्था । इतराः । गिरः । एभिः । वर्धासे । इन्दुऽभिः ॥ १६ ॥

हेअग्ने एहि आगच्छ ते तुभ्यं त्वदर्थं गिरःस्तुतीः इत्था इत्थमनेनप्रकारेण सु सुष्ठु ब्रवाणीत्याशास्यते ताःस्तुतीः शृणिवत्यर्थः उइत्येतत्पूरकं इतराः असुरैः कृताःस्तुतीः शृण्वि-

तिशेषः तथा चब्राह्मणं—अग्निरित्थेतरागिरइत्यसुर्याह्वाइतरागिरइति । अपिचआगतस्त्वं ए-भिरेतैः इन्दुभिः सोमैः वर्धसे वर्धस्व ॥ १६ ॥

अथसप्तदशी—

यत्रक्कंचतेमनोदक्षंदधसउत्तरम् । तत्रासदःकृणवसे ॥ १७ ॥

यत्र । क्क । च । ते । मनः । दक्षम् । दधसे । उत्ऽतरम् । तत्र । सदः । कृणवसे ॥ १७ ॥

हेअग्ने ते तव मनः अनुग्रहात्मकमन्तःकरणं यत्र यस्मिन्देशे क्कच कस्मिंश्चिद्यजमानेव-र्तते तत्र तस्मिन्यजमाने उत्तरमुद्धततरं श्रेष्ठं दक्षं बलं बलकरमन्नंवा दधसे धारयसि तथा सदः स्थानंच कृणवसे तस्मिन्यजमानेकरोषि ॥ १७ ॥

अथाष्टादशी—

नहितेपूर्तमक्षिपद्भुवन्नेमानांवसो । अथादुवोवनवसे ॥ १८ ॥

नहि । ते । पूर्तम् । अक्षिऽपत् । भुवत् । नेमानाम् । वसो इति । अथ । दुवः । वनवसे ॥ १८ ॥

हेअग्ने तेत्वदीयं पूर्तं पूरकं तेजः अक्षिपत् अक्ष्णोःपातकं विनाशकं नहिभुवत् नभवतु सर्वदास्माकं दर्शनसामर्थ्यंकरोतु हेनेमानांवसो नेमशब्दःअल्पवाची मनुष्याणांमध्येकतिपयानां यजमानानांवासक अथ अतःकारणात् दुवः अस्माभिर्यजमानैःकृतंपरिचरणं वनवसे सं-भजस्व ॥ १८ ॥

अथैकोनविंशी—

आग्निरगामिभारतोवृत्रहापुरुचेतनः । दिवोदासस्यसत्पतिः ॥ १९ ॥

आ । अग्निः । अगामि । भारतः । वृत्रऽहा । पुरुऽचेतनः । दिवःऽदासस्य । सत्ऽपतिः ॥ १९ ॥

---

१ ऐ० ब्रा० ३. ४९. ।

अयमग्निः आ अगामि अस्माभिःस्तुतिभिरभ्यगम्यत कीदृशःभारतः हविषांभर्ता दिवोदासस्य एतत्संज्ञस्यराज्ञः वृत्रहा वृत्राणांशत्रूणांहन्ता पुरुचेतनः पुरूणांबहूनांचैवधिताज्ञाता सर्वज्ञइत्यर्थः सत्पतिः सतांयजमानानांपालयिता ॥ १९ ॥

अथविंशी—

सहिविश्वातिपार्थिवारयिंदाशन्महित्वना ।
वन्वन्नवातोअस्तृतः ॥ २० ॥ २४ ॥

सः । हि । विश्वा । अति । पार्थिवा । रयिम् । दाशत् । महिऽत्वना ।
वन्वन् । अवातः । अस्तृतः ॥ २० ॥ २४ ॥

सहि सखल्वग्निः विश्वा विश्वानिसर्वाणि पार्थिवा पृथिव्यांभवानिभूतजातानि महित्वना महत्त्वेनस्वमहिम्ना अतिक्रामन् रयिं धनं दाशत् अस्मभ्यंददातु यद्वा विश्वं सर्वं पार्थिवं पृथिव्यां विद्यमानंधनं अतिशयेन दाशद्ददातु कीदृशोग्निः महित्वना महत्त्वेनतेजसा वन्वन् काष्ठानिशत्रून्वाहिंसन् अवातः अन्यैःशत्रुभिरप्रतिगतः अस्तृतः केनाप्यहिंसितः ॥ २० ॥

॥ इतिचतुर्थस्यपञ्चमेचतुर्विंशोवर्गः ॥ २४ ॥

अथैकविंशी—

सप्रत्नवन्नवीयसाग्नेद्युम्नेनसंयता । बृहत्ततन्थभानुना ॥ २१ ॥

सः । प्रत्नऽवत् । नवीयसा । अग्ने । द्युम्नेन । समऽयता । बृहत् ।
ततन्थ । भानुना ॥ २१ ॥

हेअग्ने यःपूर्वोक्तगुणविशिष्टः सतादृशस्त्वं प्रत्नवत् प्रत्नेनपुराणेन नवीयसा नवतरेण द्युम्नेनद्योतमानेन संयता संगच्छता सम्यग्व्याप्नुवता भानुना तेजसा बृहन्महदन्तरिक्षं ततन्थ विस्तारयसि ॥ २१ ॥

अथद्वाविंशी—

प्रवःसखायोअग्नयेस्तोमंयज्ञंचधृष्णुया । अर्चगायचवेधसे ॥ २२ ॥

प्र । वः । सखायः । अग्नये । स्तोमम् । यज्ञम् । च । धृष्णुऽया ।
अर्च । गाय । च । वेधसे ॥ २२ ॥

हेसखायः समानख्यानाः ऋत्विजः वोयूयं धृष्णुया शत्रूणांधर्षकाय वेधसे विधात्रे अ-ग्नये स्तोमं स्तोत्रं गाय गायत तथा यज्ञं यजनसाधनं हविश्च प्रार्च प्रयच्छ ॥ २२ ॥

अथत्रयोविंशी—

सहियोमानुषायुगासीदद्धोताकविक्रतुः ।
दूतश्चहव्यवाहनः ॥ २३ ॥

सः । हि । यः । मानुषा । युगा । सीदत् । होता । कविऽक्रतुः ।
दूतः । च । हव्यऽवाहनः ॥ २३ ॥

सहि सखल्वग्निः सीदद् सीदतु अस्मदीयेयज्ञे बर्हिष्युपविशतु योग्निःहोता देवानामाह्वाता कविक्रतुः क्रान्तप्रज्ञः मानुषायुगा मानुषाणियुगानिमनुष्यसंबन्धिनोयज्ञार्हानकालविशेषान् ये-षुयागाअनुष्ठीयन्ते अत्यन्तसंयोगेद्वितीया एतावन्तंकालं देवानांदूतः सहव्यवाहनोहविषांवो-ढाचभवति ॥ २३ ॥

अथचतुर्विंशी—

ताराजानाशुचिव्रतादित्यान्मारुतंगणम् ।
वसोयक्षीहरोदसी ॥ २४ ॥

ता । राजाना । शुचिऽव्रता । आदित्यान् । मारुतम् । गणम् ।
वसो इति । यक्षि । इह । रोदसी इति ॥ २४ ॥

ता तौ प्रसिद्धौ राजाना राजमानौ शुचिव्रता शुचिकर्माणौ मित्रावरुणौ आदित्यानदि-तेःपुत्रान् धात्रादीन् मारुतंगणं मरुतांसंघंच रोदसी द्यावापृथिव्यौच एतान्देवान् हेवसो वा-सकाग्ने इहास्मिन्यज्ञे यक्षि यज ॥ २४ ॥

अथपञ्चविंशी—

वस्वींतेअग्नेसंदृष्टिरिषयतेमर्त्याय । ऊर्जोनपादमृतस्य ॥२५॥२५॥

वस्वी । ते । अग्ने । सम्ऽदृष्टिः । इषऽयते । मर्त्याय । ऊर्जः । नपात् । अमृतस्य ॥ २५ ॥ २५ ॥

हेऊर्जोनपात् बलस्यपुत्राग्ने अमृतस्य मरणरहितस्य ते तव संदृष्टिः दीप्तिः वस्वीवासयित्री प्रशस्येत्यर्थः सा मर्त्याय मनुष्याय यजमानाय इषयते इषमन्नमिच्छति ददातीत्यर्थः ॥२५ ॥

॥ इतिचतुर्थस्यपञ्चमेपञ्चविंशोवर्गः ॥ २५ ॥

अथषड्विंशी–

क्रत्वादाअस्तुश्रेष्ठोद्यत्वावन्वन्त्सुरेक्णाः । मर्तआनाशसुवृक्तिम् ॥ २६ ॥

क्रत्वा । दाः । अस्तु । श्रेष्ठः । अद्य । त्वा । वन्वन् । सुऽरेक्णाः । मर्तः । आनाश । सुऽवृक्तिम् ॥ २६ ॥

हेअग्ने अद्येदानीं क्रत्वा कर्मणा परिचरणात्मना त्वा त्वां वन्वन् संभजन् दाः हविंषि दातायजमानः श्रेष्ठोतिशयेनप्रशस्योस्तु सुरेक्णाः शोभनधनश्चास्तु तथा समर्तोमनुष्यः सुवृक्तिं त्वद्विषयां सुष्टुतिंच आनाश व्याप्नोतु तव सर्वदास्तोताभवत्वित्यर्थः ॥ २६ ॥

अथसप्तविंशी–

तेतेअग्नेत्वोताइषयन्तोविश्वमायुः ।
तरन्तोअर्योअरातीर्वन्वन्तोअर्योअरातीः ॥ २७ ॥

ते । ते । अग्ने । त्वाऽऊताः । इषयन्तः । विश्वम् । आयुः । तरन्तः । अर्यः । अरातीः । वन्वन्तः । अर्यः । अरातीः ॥ २७ ॥

हेअग्ने ते त्वदीयाः ये त्वांस्तुवन्ति ते स्तोतारः त्वोतास्त्वयाऊतारक्षिताः अतएव इषयन्तः इषमात्मनइच्छन्तःसन्तः विश्वं सर्वं आयुरन्नं लभन्तइतिशेषः आयुरेववाशतवर्षलक्षणमिषयन्तः इच्छन्तः प्राप्नुवन्तीतिशेषः तथाअर्यः अरातीरभिगन्त्रीःअरातीः काश्चिच्छत्रुसेनाः तरन्तः अतिक्रामन्तः अर्योभिगन्त्रीः अरातीः काश्चनशत्रुसेनाः वन्वन्तोहिंसंतश्च भवन्तीतिशेषः ॥ २७ ॥

अथाष्टाविंशी—

अग्निस्तिग्मेनशोचिषायासद्विश्वन्य१त्रिणम्।
अग्निर्नोवनतेरयिम्॥ २८॥

अग्निः। तिग्मेन। शोचिषा। यासत्। विश्वम्। नि। अत्रिणम्।
अग्निः। नः। वनते। रयिम्॥ २८॥

अयमग्निः तिग्मेन तीक्ष्णेन शोचिषा तेजसा विश्वं सर्वं अत्रिणमत्तारं राक्षसादिकं नियासन्निहन्तु अपिच नोस्मभ्यमग्निः रयिं धनं वनते ददातु॥ २८॥

अथैकोनत्रिंशी—

सुवीरंरयिमाभरजातवेदोविचर्षणे। जहिरक्षांसिसुक्रतो॥ २९॥

सुऽवीरम्। रयिम्। आ। भर। जातऽवेदः। विऽचर्षणे। जहि।
रक्षांसि। सुक्रतो इति सुऽक्रतो॥ २९॥

हेजातवेदः जातप्रज्ञान जातधनवा विचर्षणे विशेषेणद्रष्टरग्ने सुवीरं शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतं रयिं धनं आभर आहर तथा हेसुक्रतो सुकर्मन्नग्ने रक्षांसिच जहि विनाशय॥ २९॥

अथत्रिंशी—

त्वंनःपाह्यंहसोजातवेदोअघायतः। रक्षाणोब्रह्मणस्कवे॥ ३०॥२६॥

त्वम्। नः। पाहि। अंहसः। जातऽवेदः। अघऽयतः। रक्ष।
नः। ब्रह्मणः। कवे॥ ३०॥ २६॥

हेजातवेदस्त्वन्नोस्मान् अंहसः पापात् पाहि रक्ष तथा हेब्रह्मणस्कवे स्तुतिरूपस्यमंत्रस्यकवे कावयितः शब्दयितरग्ने अग्निर्हिशब्दमुत्पादयति तथाच स्मर्यते—मनःकायाग्निमाहन्ति-समेरयतिमारुतं। मारुतस्तूरसिचरन्मन्द्रंजनयतिस्वरमिति। तादृशाग्ने अघायतः अघमनर्थं अस्माकमिच्छतः शत्रोश्च नोस्मान्रक्ष॥ ३०॥

॥ इतिचतुर्थस्यपञ्चमेषाड्विंशोवर्गः॥ २६॥

अथैकत्रिंशी–

योनोअग्नेदुरेवआमर्तोवधायदाशति । तस्मान्नःपाह्यंहसः ॥ ३१ ॥

यः । नः । अग्ने । दुःऽएवः । आ । मर्तः । वधाय । दाशति ।
तस्मात् । नः । पाहि । अंहसः ॥ ३१ ॥

हेअग्ने दुरेवोदुष्टाभिप्रायोयोमर्तोमनुष्यः वधाय स्वस्यायुधाय नोस्मान् आदाशति अभिप्रयच्छति आयुधेनास्मान्हन्तीत्यर्थः तस्मान्मनुष्यात् अंहसः पापाच्च नोस्मान्पाहिरक्ष॥३१॥

अथद्वात्रिंशी–

त्वंतंदेवजिह्वयापरिबाधस्वदुष्कृतम् । मर्तोयोनोजिघांसति ॥ ३२ ॥

त्वम् । तम् । देव । जिह्वया । परि । बाधस्व । दुःऽकृतम् ।
मर्तः । यः । नः । जिघांसति ॥ ३२ ॥

हेदेव द्योतमानाग्ने त्वं तं वक्ष्यमाणं दुष्कृतं दुष्कर्मकारिणंमनुष्यं जिह्वया ज्वालया परिबाधस्व सर्वतोजहि योमर्तोमनुष्यः नोस्मान् जिघांसति हन्तुमिच्छति ॥ ३२ ॥

अथत्रयस्त्रिंशी–

भरद्वाजायसप्रथःशर्मयच्छसहन्त्य । अग्नेवरेण्यंवसु ॥ ३३ ॥

भरत्ऽवाजाय । सऽप्रथः । शर्म । यच्छ । सहन्त्य ।
अग्ने । वरेण्यम् । वसु ॥ ३३ ॥

हेसहन्त्य शत्रूणामभिभवितरग्ने भरद्वाजायमह्यमृषये सप्रथः सर्वतःपृथुविस्तीर्णं शर्म सुखं गृहंवा यच्छ देहि तथावरेण्यं वरणीयं वसु धनंच देहि ॥ ३३ ॥

पौर्णमास्यामाग्नेयाज्यभागस्यानुवाक्याअग्निर्वृत्राणीत्येषा सूत्रितंच–अग्निर्वृत्राणिजंघनदितिपूर्वस्याज्यभागस्यानुवाक्येइति । इष्टिपशुसोमेषुच यत्र वृधन्वन्तौ पुष्टिमन्तावित्यादिविशेषविधिर्नदृश्यते तत्र सर्वत्र एषैवप्रथमाज्यभागानुवाक्या उपसद्याग्नेयस्यैषानुवाक्या सायंकालीनस्यतु एषैवयाज्या सूत्रितंच–अग्निर्वृत्राणिजंघनद्यउग्रइवशर्यहेति विपर्यासोयाज्यानुवाक्यानामिति ।

सैषाचतुर्स्त्रिंशी—

अग्निर्वृत्राणिजङ्घनद्द्रविणस्युर्विपन्यया । समिद्धःशुक्रआहुतः॥३४॥

अग्निः । वृत्राणि । जङ्घनत् । द्रविणस्युः । विपन्यया ।
सम्ऽइद्धः । शुक्रः । आऽहुतः ॥ ३४ ॥

विपन्यया स्तुत्या स्तूयमानः द्रविणस्युर्द्रविणंधनंस्तोतॄणांइच्छन् यद्वा हविर्लक्षणं धनमात्मनइच्छन् अग्निर्वृत्राण्यावरकाणि रक्षःप्रभृतीनि तमांसिवाजंघनत् भृशंहन्तु कीदृशोग्निः समिद्धः सम्यग्दीप्तः अतएव शुक्रः शुक्लवर्णः आहुतः हविर्भिरभिहुतः ॥ ३४ ॥

अथपञ्चत्रिंशी—

गर्भेमातुःपितुष्पिताविदिद्युतानोअक्षरे ।
सीदन्नृतस्ययोनिमा ॥ ३५ ॥ २७ ॥

गर्भे । मातुः । पितुः । पिता । विऽदिद्युतानः । अक्षरे । सीदन् ।
ऋतस्य । योनिम् । आ ॥ ३५ ॥ २७ ॥

अत्रमातृपितृशब्दाभ्यां भूद्यौश्चाभिधीयेते द्यौः पिता पृथिवीमातेतिश्रुतेः मातुर्भूम्याः गर्भे गर्भस्थाने मध्ये अक्षरेक्षरणरहिते वेद्याख्येस्थानेविदिद्युतानः विशेषेणदीप्यमानः पितुः पिताद्युलोकस्य पालयिता हविषांप्रदानेन एवंभूतोग्निः ऋतस्य यज्ञस्य योनिं उत्तरवेद्याख्यधिष्ण्यं सप्तम्यर्थेद्वितीया आसीदन् उत्तरवेद्यामुपविशन् अग्निर्वृत्राणि जंघनदित्यन्वयः॥ ३५॥

॥ इतिचतुर्थस्यपञ्चमेसप्तविंशोवर्गः ॥ २७ ॥

अथषट्त्रिंशी—

ब्रह्मप्रजावदाभरजातवेदोविचर्षणे । अग्नेयद्दीदयद्दिवि ॥ ३६ ॥

ब्रह्म । प्रजाऽवत् । आ । भर । जातऽवेदः । विऽचर्षणे ।
अग्ने । यत् । दीदयत् । दिवि ॥ ३६ ॥

---

१ तै० ब्रा० ३. ७. ५.

हेजातवेदःजातानांवेदितः विचर्षणे विशेषेणद्रष्टरग्ने प्रजावत् पुत्रपौत्रसहितंब्रह्मान्नमाभर आहर यद्ब्रह्म दिविद्युलोके दीदयद्दीप्यते देवेषुमध्येयत्प्रशस्तमन्नं राजते तदाहरेत्यर्थः॥ ३६ ॥

अथसप्तत्रिंशी–

उपत्वारण्वसंदृशंप्रयस्वन्तःसहस्कृत । अग्नेससृज्महेगिरः ॥ ३७ ॥

उप । त्वा । रण्वऽसन्दृशम् । प्रयस्वन्तः । सहःऽकृत ।
अग्ने । ससृज्महे । गिरः ॥ ३७ ॥

हेसहस्कृत सहसा बलेनोत्पन्नाग्ने प्रयस्वन्तःहविर्लक्षणान्नवन्तोवयं रण्वसन्दृशं रमणीयसंदर्शनंस्तोतव्यसंदर्शनंवात्वा त्वां उप प्रति गिरः स्तुतीः ससृज्महे विसृजामः उच्चारयामइत्यर्थः ॥ ३७ ॥

अथाष्टत्रिंशी–

उपच्छायामिवघृणेरगन्मशर्मतेवयम् । अग्नेहिरण्यसन्दृशः ॥ ३८ ॥

उप । छायाम्ऽइव । घृणेः । अगन्म । शर्म । ते । वयम् ।
अग्ने । हिरण्यऽसंदृशः ॥ ३८ ॥

हेअग्ने हिरण्यसंदृशः हितरमणीयतेजसः हिरण्यवद्रोचमानतेजसोवा घृणेर्दीप्तस्य ते तव शर्म शरणं आश्रयणं उपागन्म उपगच्छाम तत्रदृष्टान्तः छायामिव यथाघर्मार्ताः संतप्ताः छायामुपगच्छन्ति तद्वत् ॥ ३८ ॥

उपसदिप्रातःकालस्याग्नेयस्ययउग्रइवेतियाज्या सायंकालीनस्यत्वेषैवानुवाक्या सूत्रितं च–अग्निर्वृत्राणिजंघनद्यउग्रइवशर्यहेति ।

सैषात्रैकोनचत्वारिंशी–

यउग्रइवशर्यहातिग्मशृङ्गोनवंसगः । अग्नेपुरोरुरोजिथ ॥ ३९ ॥

यः । उग्रःऽइव । शर्यऽहा । तिग्मऽशृङ्गः । न । वंसगः ।
अग्ने । पुरः । रुरोजिथ ॥ ३९ ॥

योग्निः उग्रइव उद्गीर्णबलोधन्वीव शर्यहा शर्यैर्बाणैः शत्रूणांहन्ता तिग्मशृंगोनवंसगः ती-क्ष्णशृंगोवननीयगतिर्वृषभइव हेअग्ने सत्वं पुरः आसुरीस्तिस्रःपुरीः रुरोजिथ भग्नवानसि रु-द्रोवाएषयदग्निरितिश्रुतेः। रुद्रकृतमपित्रिपुरदहनं अग्निकृतमेवेत्यग्निःस्तूयते यद्वा त्रिपुरदहनसाध-नभूतेबाणे अग्नेरनीकत्वेनावस्थानात् अग्निःपुराणिभग्नवानित्युच्यते देवासुरावाएषुलोकेषुसम-यततेत्यादिकंब्राह्मणमनुसन्धेयं ॥ ३९ ॥

अग्निमन्थनेजायमानेग्नौआयंहस्तइत्येषानुवाक्या सूत्रितंच—आयंहस्तेनखादिनमित्यर्ध-र्चआरमेदिति ।

अथचत्वारिंशी—

आयंहस्तेनखादिनंशिशुंजातंनबिभ्रति।विशामग्निंस्वध्वरम्॥४०॥२८।

आ । यम् । हस्ते । न । खादिनम् । शिशुम् । जातम् । न ।
बिभ्रति । विशाम् । अग्निम् । सुऽअध्वरम् ॥ ४० ॥ २८ ॥

मन्थनोत्पन्नंयमग्निं शिशुंजातंन जातंपुत्रमिव हस्तेआ बिभ्रति हस्तेष्वभिमुखंधारय-न्त्यध्वर्यवः पूर्वोनशब्दःपुरस्तादुपचारोप्युपमार्थीयः खादिनंन भक्षकंव्याघ्रादिमिव यथा तंबि-भ्रतःपुरुषाअवहिताः तथाभूताइत्यर्थः यद्वा नेतिसंप्रत्यर्थे संप्रतीदानीं खादिनं हविषांभक्ष-कं यमग्निंहस्तेधारयन्ति विशां जनानां स्वध्वरं शोभनयागस्यनिष्पादकं तमग्निं हेऋत्विजः परिचरतेतिशेषः ॥ ४० ॥

॥ इतिचतुर्थस्यपञ्चमेष्टाविंशोवर्गः ॥ २८ ॥

अग्निमन्थनेजातस्याग्नेआहवनीयेप्रहरणसमयेप्रदेवंदेववीतयइतिद्वृचोनुवक्तव्यः सूत्रितं-च—प्रदेवंदेववीतयइतिद्वेअग्निनाग्निःसमिध्यतइति ।

तत्रप्रथमासूक्तेएकचत्वारिंशी—

प्रदेवंदेववीतयेभरतावसुवित्तमम् । आस्वेयोनौनिषीदतु ॥ ४१ ॥

प्र । देवम् । देवऽवीतये । भरत । वसुवित्ऽतमम् । आ ।
स्वे । योनौ । नि । सीदतु ॥ ४१ ॥

---

१ तै० सं० ५. ४. ३. । २ ऐ० ब्रा० १. २३. ।

हेअध्वर्यवः देवं द्योतमानं वसुवित्तमं वसूनां धनानां वेदयितारं लंभयितारमग्निं प्रभरत प्रहरत आहवनीयेग्नौ प्रक्षिपत किमर्थं देववीतये देवानांभक्षणार्थं तथाचब्राह्मणं-प्रदेवंदेववी-तयेभरतावसुवित्तममितिप्रह्रियमाणायाभिरूपायद्यज्ञेभिरूपंतत्समृद्धमास्वेयोनौनिषीदत्वित्येष-हवाअस्यस्वोयोनिर्यदग्निरग्नेरिति । सचाग्निः स्वेयोनौ कारणे स्थाने आहवनीयेआनिसीदतु अभिनिषण्णोभवतु ब्राह्मणंचभवति—एषवाअस्यस्वोयोनिर्यदग्निरग्नेरिति ॥ ४१ ॥

अथद्विचत्वारिंशी—

आजातंजातवेदसिप्रियंशिशीतातिथिम् । स्योनआगृहपतिम् ॥४२॥

आ । जातम् । जातऽवेदसि । प्रियम् । शिशीत । अतिथिम् ।
स्योने । आ । गृहऽपतिम् ॥ ४२ ॥

हेअध्वर्यवः जातं प्रादुर्भूतमतिथिं लुप्तोपममेतत् अतिथिमिवप्रियं अतएव गृहपतिं गृहा-णांस्वामिनमग्निं जातवेदसि जातप्रज्ञे स्योने सुखकरे आहवनीयेग्नौ आशिशीत अन्तर्णीतण्य-र्थस्यशीङएतद्रूपं शाययत स्थापयत यद्वा श्यैङ्गतावित्यस्यछान्दसंरूपं गमयत प्रापयतेत्यर्थः शोतनूकरणेइत्यस्यवारूपं श्यत तीक्ष्णीकुरुतसंस्कुरुत प्रहरतेतियावत् द्वीतीयआकारःपूरकः जातइतरोजातवेदाइतरइत्यादिकंब्राह्मणमत्रानुसन्धेयम् ॥ ४२ ॥

अथत्रिचत्वारिंशी—

अग्नेयुक्ष्वाहियेतवाश्वासोदेवसाधवः । अरंवहन्तिमन्यवे ॥ ४३ ॥

अग्ने । युक्ष्व । हि । ये । तव । अश्वासः । देव । साधवः ।
अरम् । वहन्ति । मन्यवे ॥ ४३ ॥

हेदेव द्योतमानाग्ने तानश्वान् युक्ष्व आत्मीयेरथेयोजय ये तव त्वदीयाः साधवः सा-धकाः सुशीलावा अश्वासोश्वाः अरं अलंपर्याप्तं वहन्ति किमर्थं मन्यवे मन्यतेयष्टव्यत्वेनदे-वानत्रेतिमन्युर्यागस्तदर्थं तानश्वानरथेयुक्ष्वेत्यर्थः हिखलु ॥ ४३ ॥

---

१ ऐ० ब्रा० १. १६. । २ ऐ० ब्रा० १. १६. । ३ ऐ० ब्रा० १. १६. ।

अथचतुश्चत्वारिंशी–

अच्छानोयाह्यावहाभिप्रयांसिवीतये । आदेवान्त्सोमपीतये ॥ ४४॥

अच्छ । नः । याहि । आ । वह । अभि । प्रयांसि ।
वीतये । आ । देवान् । सोमऽपीतये ॥ ४४ ॥

हेअग्ने नोस्मान् अच्छाभिमुख्येनायाहि आगच्छ तथा प्रयांसि हविर्लक्षणान्यन्नान्यभिलक्ष्य देवानावह किमर्थं वीतये तेषांहविषांस्वादनार्थं तथा सोमपीतये सोमपानार्थंच तान्देवानावह ॥ ४४ ॥

अथपञ्चचत्वारिंशी–

उदग्नेभारतद्युमदजस्रेणदविद्युतत् । शोचाविभाह्यजर ॥ ४५॥२९॥

उत् । अग्ने । भारत । द्युऽमत् । अजस्रेण । दविद्युतत् ।
शोचं । वि । भाहि । अजर ॥ ४५ ॥ २९ ॥

हेभारत हविषांभर्तरग्ने उच्छोच उद्गततरंदीप्यस्व तदेवविवृणोति हेअजर जरारहिताग्ने दविद्युतत् भृशंद्योतमानस्त्वं द्युमत् द्युमतादीप्तिमता सुपांसुलुगितितृतीयायालुक् अजस्रेणाविच्छेदेनतेजसा विभाहि विशेषणप्रकाशयस्व यद्वा भातिरत्रांतर्णीतण्यर्थः त्वं प्रथममुद्दीप्यस्व पश्चादात्मीयेनतेजसा सर्वंजगत्प्रकाशयेतियोजनीयम् ॥ ४५ ॥

॥ इतिचतुर्थस्यपञ्चमेएकोनत्रिंशोवर्गः ॥२९ ॥

अथषट्चत्वारिंशी–

वीतीयोदेवंमर्तोदुवस्येदग्निमीळीताध्वरेहविष्मान् ।
होतारंसत्ययजंरोदस्योरुत्तानहस्तोनमसाविवासेत् ॥ ४६ ॥

वीती । यः । देवम् । मर्तः । दुवस्येत् । अग्निम् । ईळीत । अध्वरे ।
हविष्मान् । होतारम् । सत्यऽयजम् । रोदस्योः । उत्तानऽहस्तः ।
नमसा । आ । विवासेत् ॥ ४६ ॥

योमर्तोमनुष्योहविष्मान् हविर्भिर्युक्तोयजमानोवीती वीत्याकान्तेन हविर्लक्षणेनान्नेन यंकंचनदेवं दुवस्येत् परिचरेत्तस्मिन्नध्वरे यज्ञे अग्निमीळीत स्तुवीत सर्वेषुयागेष्वग्निःपूज्यतइत्यर्थः कीदृशमग्निं रोदस्योर्द्यावापृथिव्योर्लोकद्वये वर्तमानानांहोतारमाह्वातारं सत्ययजं सत्येन अवितथेनहविषा यष्टारं किंचार्यंयजमानः ईदृशमग्निं उत्तानहस्तः कृतांजलिपुटःसन् नमसा नमस्कारेण हविषावा आविवासेत् परिचरेत् ॥ ४६ ॥

अथसप्तचत्वारिंशी—

आतेंअग्नऋचाहविर्हृदातष्टंभरामसि ।
तेतेंभवन्तूक्षणऋषभासोवशाउत ॥ ४७ ॥

आ । ते । अग्ने । ऋचा । हविः । हृदा । तष्टम् । भरामसि ।
ते । ते । भवन्तु । उक्षणः । ऋषभासः । वशाः । उत ॥ ४७ ॥

अनयाध्ययनंप्रशस्यतइत्याश्वलायनोमन्यते हेअग्ने तेतुभ्यंहृदा हृदयेन तष्टं संस्कृतं ऋचा ऋग्रूपेणवर्तमानं हविः ऋचमेवहविःकृत्वा आभरामसि आहरामः तेइतितच्छब्देन प्रकृतमृग्रूपंहविःपरामृश्यते प्रतिनिर्दिश्यमानापेक्षयापुंस्त्वबहुत्वे ऋग्रूपंतद्धविः ते तुभ्यं उक्षणः उक्षाणः सेचनसमर्थाः ऋषभासः ऋषभाः उतापिच वशाश्चभवन्तु ऋषभवशारूपेणपरिणतंसत् त्वद्भक्षणाय भवत्विविशेषः ॥ ४७ ॥

अथाष्टाचत्वारिंशी—

अग्निंदेवासोअग्रियमिन्धतेवृत्रहन्तमम् ।
येनावसून्याभृतातृळ्हारक्षांसिवाजिनां ॥ ४८ ॥ ३० ॥

अग्निम् । देवासः । अग्रियम् । इन्धते । वृत्रहन्ऽतमम् । येन ।
वसूनि । आऽभृता । तृळ्हा । रक्षांसि । वाजिनां ॥ ४८ ॥ ३० ॥

अग्रियं मुख्यं वृत्रहन्तमं अतिशयेनवृत्रस्यहन्तारं इममग्निं देवासोदेवाः इन्धते दीपयन्ति येनाग्निना वसूनि असुरैरपहृतानिधनानि हविर्लक्षणान्यन्नानिवा आभृताअसुरसकाशा-

यजमानाद्वा आहृतानि येनच वाजिना बलवताग्निना रक्षांसि यज्ञविरोधीनि दृह्ला दृढानि हिंसितानि तमग्निमिन्धतइत्यन्वयः ॥ ४८ ॥

॥ इतिचतुर्थस्यपञ्चमेत्रिंशोवर्गः ॥ ३० ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् ।

पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेपञ्चमोध्यायःसमाप्तः ॥५॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥
चतुर्थाष्टकेषष्ठोध्यायआरभ्यते षष्ठेमंडलेद्वितीयेनुवाकेप्रथमंसूक्तंव्याख्यातं तत्रपिबासोममितिपं-चदशर्चंद्वितीयंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रमंत्याद्विपदात्रिष्टुप् तथाचानुक्रान्तं-पिबपंचोनैन्द्रं त्रैष्टुभंद्विपदान्तमिति। अभिजितिमरुत्वतीयशस्त्रे एतन्निविद्धानं सूत्रितंच-पिबासोमंतमुष्टुही-तिमध्यंदिनइति। समूळ्हेदशरात्रेष्टमेहनिमरुत्वतीयशस्त्रेएतत्सूक्तं सूत्रितंच-पिबासोममभितम-स्यद्यावापृथिवीइति। सूर्यस्तुन्नाम्न्येकाहेमरुत्वतीयेएतत्सूक्तंनिविद्धानं सूत्र्यतेहि-सूर्यस्तुता-यशस्कामःपिबासोममभीति। महाव्रतेपिमरुत्वतीयेएतत्सूक्तं तथैवपंचमारण्यकेसूत्रितंच-पि-बासोममभियमुग्रतर्दःकयाशुभासवयसःसनीळाइति माध्यन्दिनसवनेआद्यास्तिस्रोहोतृमैत्राव-रुणब्राह्मणाच्छंसिनांप्रस्थितयाज्याः सूत्रितंच-पिबासोममभियमुग्रतर्दइति। तिस्रोवाङ्गेहिसो-मकामंत्वाहुरिति।

तत्रप्रथमा-

ॐम् पिबासोमंमभियमुंग्रतर्दंऊर्वंगव्यंमहिंगृणानइन्द्र।
वियोधृष्णोवधिषोवज्रहस्तविश्वांवृत्रमंमित्रियाशवोंभिः॥ १॥

पिब। सोमम्। अभि। यम्। उग्र। तर्दः। ऊर्वम्। गव्यम्।
महि। गृणानः। इन्द्र। वि। यः। धृष्णो इति। वधिषः।
वज्रऽहस्त। विश्वा। वृत्रम्। अमित्रिया। शवःऽभिः॥ १॥

हेउग्र उद्गूर्णबलेन्द्र गृणानः अंगिरोभिःस्तूयमानस्त्वं यंसोममभिउद्दिश्य पातुमित्यर्थः महि महत् गव्यं गोसंबन्धि ऊर्वं पणिभिराहृतंसमूहं तर्दः प्रकाशितवानसितृदिर्हिंसाकर्मा अ-त्रप्रकाशनार्थः तंसोमंपिब पानंकुरु हेधृष्णोशत्रूणांधर्षक वज्रहस्त वज्रपाणे हेइन्द्र यस्त्वंशवो-भिर्बलैःसहितः सन् विश्वा विश्वं वृत्रं आवरकं अमित्रिया अमित्रियंशत्रुं अमित्रशब्दात्द्विती-यैकवचनस्येयादेशः विवधिषः व्यवधीः सत्वं सोमंपिबेतिसंबन्धः॥ १॥

अथद्वितीया–

सईंपाहियऋजीषीतरुत्रोयःशिप्रवान्वृषभोयोमतीनाम् ।
योगोत्रभिद्वज्रभृद्योहरिष्ठाःसइन्द्रचित्राँअभितृन्धिवाजान् ॥२॥

सः । ईम् । पाहि । यः । ऋजीषी । तरुत्रः । यः । शिप्रऽवान् ।
वृषभः । यः । मतीनाम् । यः । गोत्रऽभित् । वज्रऽभृत् । यः ।
अरिऽस्थाः । सः । इन्द्र । चित्रान् । अभि । तृन्धि । वाजान् ॥ २ ॥

हेइन्द्र ऋजीषी ऋजीषशब्देनगतरसःसोमोभिधीयते तद्वान् यस्त्वं तरुत्रः शत्रूणांतारकोसि यस्त्वं शिप्रवान् शोभनहनुरसि यस्त्वं मतीनां स्तोतॄणां मन्यतेःस्तुतिकर्मणःकर्तरिक्तिच् वृषभः कामानांवर्षितासि सत्वं ईं एनं सोमं पाहि पिब हेइन्द्र यस्त्वं वज्रभृत् वज्रधरोयस्त्वंगोत्रभित्गोत्राणांपर्वतानांमेघानांवाभेत्तासि यस्त्वं हरिष्ठाः हर्योःस्थातासि हेइन्द्र सत्वं चित्रान् विचित्रान् वाजानन्नानि अभितृन्धि अस्मभ्यंप्रकाशय ॥ २ ॥

अथतृतीया–

एवापाहिप्रत्नथामन्दतुत्वाश्रुधिब्रह्मवावृधस्वोतगीर्भिः ।
आविःसूर्यंकृणुहिपीपिहीषोजहिशत्रूँरभिगाइन्द्रतृन्धि ॥ ३ ॥

एव । पाहि । प्रत्नऽथा । मन्दतु । त्वा । श्रुधि । ब्रह्म ।
वृवृधस्व । उत । गीःऽभिः । आविः । सूर्यम् । कृणुहि । पीपिहि ।
इषः । जहि । शत्रून् । अभि । गाः । इन्द्र । तृन्धि ॥ ३ ॥

हेइन्द्रत्वं प्रत्नथा प्रत्नान्पुराणान्सोमान् यथाअपिबः तथा एवएवमिममस्मदीयंसोमं पाहि पिब सच सोमस्त्वयापीतःसन् त्वा त्वां मन्दतु मदयतु ब्रह्म अस्माभिःकृतं स्तोत्रं श्रुधि शृणु उतापिच गीर्भिः स्तुतिरूपाभिर्वाग्भिर्ववृधस्व त्वंवर्धस्व अपिच सूर्यं सर्वस्यप्रेरकं देवं आविष्कृणुहि आविष्कुरु वयंसूर्यंयथापश्येम तथाकुर्वित्यर्थः इषः अन्नानिच पीपिहि अस्मभ्यंप्यायय शत्रूनस्मत्सपत्नान् जहि नाशय हेइन्द्र त्वंपणिभिरपहृतागाः अभितृन्धि प्रकाशय ॥ ३ ॥

अथचतुर्थी—

तेत्वामदाबृहदिन्द्रस्वधावइमेपीताउक्षयन्तद्युमन्तंम् ।
महामनूनंतवसंविभूतिंमत्सरासोजर्हषन्तप्रसाहम् ॥ ४ ॥

ते । त्वा । मदाः । बृहत् । इन्द्र । स्वधाऽवः । इमे । पीताः ।
उक्षयन्त । द्युऽमन्तंम् । महाम् । अनूनम् । तवसंम् । विऽभूतिम् ।
मत्सरासः । जर्हषन्त । प्रऽसहम् ॥ ४ ॥

हेस्वधावः अन्नवन्निन्द्र मदाः मदकराः तइमेपीताःसोमाः द्युमन्तं दीप्तिमन्तं त्वा त्वां बृहदत्यन्तं उक्षयन्त सिंचयन्तु अपिच हेइन्द्र त्वां मत्सरासोमदकराः सोमाः जर्हषन्त भृशंहर्षयन्तु कीदृशं महां महान्तं प्रभूतं अनूनं सर्वगुणैर्न्यूनतारहितं संपूर्णमित्यर्थः तवसं प्रवृद्धं विभूतिं विभवन्तं प्रसाहं शत्रूणामभिभवितारं ॥ ४ ॥

अथपञ्चमी—

येभिःसूर्यमुषसंमन्दसानोवासयोपदृळ्हानिदर्द्रत् ।
महामद्रिंपरिगाइन्द्रसन्तंनुत्थाअच्युतंसदसःपरिस्वात् ॥५॥१॥

येभिः । सूर्यम् । उषसंम् । मन्दसानः । अवासयः । अपं ।
दृळ्हानि । दर्द्रत् । महाम् । अद्रिम् । परि । गाः । इन्द्र । सन्तंम् ।
नुत्थाः । अच्युतम् । सदसः । परि । स्वात् ॥ ५ ॥ १ ॥

हेइन्द्र येभिः यैः सोमैः मन्दसानोमोदमानस्त्वं सूर्यं सर्वस्यप्रेरकं देवं उषसमुषोदेवतांच अवासयः स्वस्थानेन्यवासयः अथवा सूर्योषसौ यथा तमांसिविवासयतस्तथाकार्षीः किंकुर्वन् दृळ्हानि दृढानि तमांसि अपदर्द्रदपदारयन् किंच हेइन्द्र त्वं पणिभिरपहृतागाः परिसंतं परितोविद्यमानं महां महान्तं अद्रिं पर्वतं नुत्थाः अनुदः कीदृशं स्वात् स्वकीयात् सदसः स्थानात् परि परितः अच्युतं अविचालितं विनाशरहितं स्थिरमित्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेप्रथमोवर्गः ॥ १॥

अथषष्ठी—

तवक्रत्वातवतद्दंसनाभिरामासुपक्कंशच्यानिदीधः ।
और्णोर्दुरउस्रियाभ्योविदृह्ळोदूर्वाद्गाअसृजोअङ्गिरस्वान् ॥६॥

तव । क्रत्वा । तव । तत् । दंसनाभिः । आमासु । पक्कम् । शच्या । नि । दीधरितिदीधः । और्णोः । दुरः । उस्रियाभ्यः । वि । दृह्ळा । उत् । ऊर्वात् । गाः । असृजः । अङ्गिरस्वान् ॥ ६ ॥

हेइन्द्र तवक्रत्वा त्वदीययामज्ञया तवदंसनाभिः त्वदीयैःकर्मभिः शच्या सामर्थ्येन आमासु अपक्कासुगोषु पक्कं परिणतं तत्प्रसिद्धंपयः निदीधः नितरांधारयसिअपिच हेइन्द्र त्वं उस्रियाभ्योगोभ्यः गानिर्गमयितुमित्यर्थः दृह्ळा दृढानि बलेनपाषाणादिभिर्दृढीकृतानीत्यर्थः दुरोद्वाराणि व्यौर्णोः उद्घाटितवानसि अंगिरस्वान्अंगिरोभिर्युक्तस्त्वं ऊर्वात् समूहात् गोष्ठादित्यर्थः गाः उदसृजः उदगमयः ॥ ६ ॥

अथसप्तमी—

पप्राथक्षांमहिदंसोव्युर्वीमुपद्यामृष्वोबृहदिन्द्रस्तभायः ।
अधारयोरोदसीदेवपुत्रेप्रत्नेमातरायह्वीऋतस्य ॥ ७ ॥

पप्राथ । क्षाम् । महि । दंसः । वि । उर्वीम् । उप । द्याम् । ऋष्वः । बृहत् । इन्द्र । स्तभायः । अधारयः । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । प्रत्ने इति । मातरा । यह्वी इति । ऋतस्य ॥ ७ ॥

हेइन्द्र त्वं महि महता दंसः दंससा कर्मणा उर्वी विस्तीर्णां क्षां भूमिं विपप्राथविशेषेण पूरितवानसि प्रापूरणेइतिधातुः हेइन्द्र ऋष्वोमहांस्त्वं बृहत् बृहतीं द्यां दिवं उपस्तभायः उपस्तभ्नासि निरालंबं वितिष्ठन्तीद्यौः यथानपतति इन्द्रस्तथाकरोतीत्यर्थः अपिच त्वं रोदसी द्यावापृथिव्यौ अधारयः पोषणैर्धारयसि कीदृश्यौ देवपुत्रे देवाःपुत्राययोस्ते प्रत्ने पुराणे मातरा मातरौनिर्मात्र्यौ ऋतस्योदकस्य यज्ञस्यवा यह्वी यह्वयौमहत्यौ यद्वा विश्वस्यमातरौ ऋतस्य ब्रह्मणः यह्वी पुत्र्यौ यह्वुरित्यपत्यनामैतत् ॥ ७ ॥

अथाष्टमी–

अर्धत्वाविश्वेपुरइन्द्रदेवाएकंतवसंदधिरेभराय।
अदेवोयदभ्यौहिष्टदेवान्त्स्वर्षातावृणतइन्द्रमत्र ॥ ८ ॥

अर्ध। त्वा। विश्वे। पुरः। इन्द्र। देवाः। एकम्। तवसम्।
दधिरे। भराय। अदेवः। यत्। अभि। औहिष्ट। देवान्।
स्वःऽसाता। वृणते। इन्द्रम्। अत्र ॥ ८ ॥

अधाधुनास्मिन्काले विश्वेदेवाः सर्वेवह्न्यादयः हेइन्द्र एकं मुख्यं तवसं प्रवृद्धं बलवन्तं त्वा त्वां भराय संग्रामाय पुरोदधिरे पुरस्ताच्चक्रिरे यद्यदा अदेवोवृत्रासुरः देवान् अभ्यौहिष्ट संग्रामार्थंअभिगतवान् ओहतिर्गतिकर्मा किंच अत्रास्मिन्काले स्वर्षाता स्वर्षातौ संग्रामेदेवामरुतइतिशेषः इन्द्रं वृणते संभजन्ते स्म मरुतोहीन्द्रंदेवेषुपलायितेषुसमभजन्नित्यर्थः अधुना पुरोदधिरेइतिसंबन्धः ॥ ८ ॥

अथनवमी–

अधद्यौश्चित्तेअपसानुवज्राद्द्वितानमद्भियसास्वस्यमन्योः।
अहिंयदिन्द्रोअभ्योहसानंनिचिद्विश्वायुःशयथेजघान ॥ ९ ॥

अर्ध। द्यौः। चित्। ते। अर्प। सा। नु। वज्रात्। द्विता।
अनमत्। भियसा। स्वस्य। मन्योः। अहिम्। यत्। इन्द्रः। अभि।
ओहसानम्। नि। चित्। विश्वऽआयुः। शयथे। जघान ॥ ९ ॥

सापप्रसिद्धा देवानामाश्रयत्वेन द्यौश्चित् द्युलोकोपि हेइन्द्र अधाधुनास्मिनकाले द्विता द्विधा द्विप्रकारात् तेत्वदीयाद्वज्रात् स्वस्यात्मीयात् मन्योः क्रोधाच्च भियसा भयेन अपानमत् अपननाम नुइतिपूरणः विश्वयुर्बह्वन्नइन्द्रः यद्यदा अभ्योहसानमभिगच्छन्तं अहिं वृत्रं शयथे शयननिमित्ते मरणायेत्यर्थः जघान न्यवधीत् चिदितिपूरणः यदा वृत्रंजघान अस्मिन्कालेद्यौर्नेनामेतिसंबन्धः ॥ ९ ॥

अथदशमी—

**अधत्वष्टांतेमहउंग्रवज्रंसहस्रंभृष्टिंववृतच्छताश्रिम् ।
निकाममरमंणसंयेननवंन्तमहिंसंपिणगृजीषिन् ॥ १० ॥ २ ॥**

**अधं । त्वष्टां । ते । महः । उग्र । वज्रंम् । सहस्रंऽभृष्टिम् । ववृतत् ।
शतऽअंश्रिम् । निऽकामम् । अरऽमंनसम् । येनं । नवंन्तम् ।
अहिंम् । सम् । पिणक् । ऋजीषिन् ॥ १० ॥ २ ॥**

अधाधुना हेउग्र उद्गूर्णबलेन्द्र महोमहतस्तव त्वष्टा देवशिल्पी वज्रं ववृतत् न्यवर्तयत् निष्पन्नंकृतवान् कीदृशं सहस्रभृष्टिं सहस्रधारं शताश्रिं शतपर्वाणं हेऋजीषिन् गतरससोमवन्निन्द्र येनवज्रेण निकामं नियतःकामोयस्यतं अरमनसं शत्रूणामरमभिगन्तृमनोयस्यतं नवन्तं शब्दायमानं अहिं वृत्रमसुरं संपिणक् संपिष्टवानसि तंवज्रंकृतवानित्यर्थः ॥ १० ॥

॥ इतिचतुर्थस्यषष्ठेद्वितीयोवर्गः ॥ २ ॥

अथैकादशी—

**वर्धान्यंविश्वेमरुतःसजोषाःपचच्छतंमहिषाँइन्द्रतुभ्यंम् ।
पूषाविष्णुस्त्रीणिसरांसिधावन्वृत्रहणंमदिरमंशुमंस्मै ॥ ११ ॥**

**वर्धान् । यम् । विश्वें । मरुतः । सऽजोषाः । पचंत् । शतम् ।
महिषान् । इन्द्र । तुभ्यंम् । पूषा । विष्णुः । त्रीणि । सरांसि ।
धावन् । वृत्रऽहनंम् । मदिरम् । अंशुम् । अस्मै ॥ ११ ॥**

सजोषाः सहप्रीयमाणाः विश्वे मरुतः सर्वेदेवाः हेइन्द्र यंत्वां वर्धान् स्तोत्रैर्वर्धयन्ति हेइन्द्र तस्मैतुभ्यं पूषा एतन्नामकोदेवः विष्णुरेतन्नामकश्च शतं शतसंख्याकान् महिषान् पुंपशून् पचत् पचेत् अपिच अस्मै तुभ्यं सरांसि द्रोणकलशपूतभृदाहवनीयाख्यानित्रीणिपात्राणिपूरयितुं अंशुं सोमं धावन्गच्छन्भवति पूषाविष्णुश्च सोमैः पात्राणि पूर्यंतइत्यर्थः कीदृशं सोमं मदिरं मदकरं वृत्रहणं वृत्राणांशत्रूणांहन्तारं अत्र वृत्रहन्शब्देन सोमोभिधीयते पीतेहिसतिसोमे वृत्राणिहन्तुमिन्द्रःसमर्थोभवतीतियावत् ॥ ११ ॥

अथद्वादशी–

आक्षोदोमहिवृतंनदीनांपरिष्ठितमसृजऊर्मिमपाम् ।
तासामनुप्रवतइन्द्रपन्थांप्रार्दयोनीचीरपसःसमुद्रम् ॥ १२ ॥

आ । क्षोदः । महि । वृतम् । नदीनाम् । परिऽस्थितम् । असृजः ।
ऊर्मिम् । अपाम् । तासाम् । अनु । प्रऽवतः । इन्द्र । पन्थाम् ।
प्र । आर्दयः । नीचीः । अपसः । समुद्रम् ॥ १२ ॥

हेइन्द्र त्वं महि महत् वृतं वृत्रेण परिवृतमाच्छादितं परिष्ठितं परितःस्थितं नदीनां सिन्धूनां संबन्धि क्षोदः उदकं आअसृजः आसमन्तात्सृष्टवानसि येननद्यःपूर्णाःप्रवहेयुःतदित्यर्थः अपामुदकानामूर्मिं समूहं सृष्टवानसि पुनर्वचनमादरार्थं हेइन्द्र तासांनदीनां संबन्धिनः पंथां पथोमार्गान्प्रवतःप्रवणानन्वकार्षीरितिशेषः अन्वित्युपसर्गयोग्यक्रियाध्याहारः किंच नीचीः प्रवणाभिमुखीर्वेगयुक्ताइत्यर्थः अपसोपउदकानिअपसइत्यपएवार्थेवर्तते समुद्रमुदधिं प्रार्दयः प्रागमयः अत्रार्दयतिर्नयनकर्मा ॥ १२ ॥

अथत्रयोदशी–

एवाताविश्वांचकृवांसमिन्द्रंमहामुग्रमजुर्यंसहोदाम् ।
सुवीरंत्वास्वायुधंसुवज्रमाब्रह्मनव्यमवसेववृत्यात् ॥ १३ ॥

एव । ता । विश्वा । चकृऽवांसम् । इन्द्रम् । महाम् । उग्रम् ।
अजुर्यम् । सहःऽदाम् । सुऽवीरम् । त्वा । सुऽआयुधम् । सुऽवज्रम् ।
आ । ब्रह्म । नव्यम् । अवसे । ववृत्यात् ॥ १३ ॥

हेइन्द्र त्वा त्वां नव्यं नूतनमन्यैरकृतपूर्वं ब्रह्म अस्माभिःकृतंस्तोत्रं अवसेअस्माकंरक्षणाय आववृत्यात् आवर्तयतु कीदृशंत्वां एव एवमुक्तप्रकारेण ता तानिप्रसिद्धानि विश्वा विश्वानिसर्वाणिकर्माणि चकृवांसं कृतवन्तमिन्द्रमीश्वरं महां महान्तं उग्रमोजस्विनं अजुर्यमजरं सहोदां सहसोबलस्यदातारं सुवीरं शोभनवीरामरुतोयस्यतं स्वायुधंशोभनायुधं सुवज्रं शोभनवज्रोपेतं ॥ १३ ॥

अथचतुर्दशी–

सनोवाजायश्रवसइषेचरायेधेहिद्युमतइन्द्रविप्रान् ।
भरद्वाजेनृवतइन्द्रसूरीन्दिविचस्मैधिपार्येनइन्द्र ॥ १४ ॥

सः । नः । वाजाय । श्रवसे । इषे । च । राये । धेहि । द्युऽमतः । इन्द्र । विप्रान् । भरत्ऽवाजे । नृऽवतः । इन्द्र । सूरीन् । दिवि । च । स्म । एधि । पार्ये । नः । इन्द्र ॥ १४ ॥

हेइन्द्र सत्वं द्युमतोदीप्तिमतः विप्रान्मेधाविनोस्मान् वाजाय बलाय श्रवसे यशसे इषेचान्नायच राये धनाय धेहिधारय अपिच हेइन्द्र भरद्वाजेमयि नृवतोमनुष्यवतः परिचारकयुक्तानित्यर्थः सूरीन् तवस्तोतॄन् पुत्रपौत्रान्कुर्वितिशेषः हेइन्द्र त्वं पार्ये पारणीये आगामिनिच दिविदिवसे एधिस्म नोस्माकंरक्षिताखलुभवेत्यर्थः ॥ १४ ॥

षष्ठेहनितृतीयसवनेब्राह्मणाच्छंसिशस्त्रे अनुरूपतृचस्य अयावाजमितितृतीया सूत्रितंच–अयावाजंदेवहितंसनेमेतिस्तोत्रियानुरूपाविति ।

सैषापंचदशी–

अयावाजंदेवहितंसनेममदेमशतहिमाःसुवीराः ॥ १५ ॥ ३ ॥

अया । वाजम् । देवऽहितम् । सनेम । मदेम । शतऽहिमाः । सुऽवीराः ॥ १५ ॥ ३ ॥

अया अनयास्तुत्या देवहितं देवेनद्योतमानेनेन्द्रेणदत्तं वाजमन्नं सनेम वयंसंभजेम अपिच सुवीराःशोभनपुत्रोपेतावयं शतहिमाः शतसंवत्सरान् मदेम हृष्याम ॥ १५ ॥

॥ इतिचतुर्थस्यषष्ठेतृतीयोवर्गः ॥ ३ ॥

तमुष्टुहीति पंचदशर्चंतृतीयंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रम्यते–तमुष्टुहीति । अभिजितिनिष्केवल्येएतन्निविद्धानं सूत्रितंच–तमुष्टुहीतिमध्यन्दिनइति । इन्द्राग्न्योःकुलायनाम्न्येकाहेपि निष्केवल्येएतन्निविद्धानं सूत्रितंच–तिष्ठाहरीतमुष्टुहीतिमध्यंदिनइति । महाव्रतेपि निष्केवल्ये तथैवपंचमारण्यकेसूत्रितं–तमुष्टुहियोअभिभूत्योजाःसुतइत्त्वंनिमिश्लइन्द्रसोमइतित्रीणीति ।

तत्रप्रथमा—

तमुंष्टुहियोअभिभूंत्योजावन्वन्नवांतःपुरुहूतइन्द्रंः ।
अषांह्ळमुग्रंसहंमानमाभिर्गीर्भिर्वर्धवृषभंचर्षणीनाम् ॥ १ ॥

तम् । ऊँ इति । स्तुहि । यः । अभिभूंतिऽओजाः । वन्वन् । अवांतः । पुरुऽहूतः । इन्द्रंः । अषांह्ळम् । उग्रम् । सहंमानम् । आभिः । गीःऽभिः । वर्ध । वृषभम् । चर्षणीनाम् ॥ १ ॥

अभिभूत्योजाः अभिभावुकतेजाः वन्वन् शत्रून्हिंसन् अवातः शत्रुभिरहिंसितः वनोतेर्निष्ठान्तस्यनञ्पूर्वस्यरूपं यद्वा वातेर्वातं अनभिगतः पुरुहूतः बहुभिराहूतः यइन्द्रोस्तीतिशेषः हेभरद्वाज तमुष्टुहि तमेवेन्द्रंस्तुहि अपिच आभिर्वक्ष्यमाणाभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिः तमिन्द्रं वर्ध वर्धय कीदृशं अषाह्ळमनभिभूतं उग्रमुद्गूर्णमोजस्विनंवा सहमानं शत्रूनभिभवन्तं चर्षणीनां प्रजानांसंबन्धिनं वृषभं वर्षितारं ॥ १ ॥

अथद्वितीया—

सयुध्मःसत्वांखजकृत्समद्वांतुविम्रक्षोनंदनुमाँऋंजीषी ।
बृहद्रेंणुश्च्यवंनोमानुंषीणामेकंःकृष्टीनामंभवत्सहावां ॥ २ ॥

सः । युध्मः । सत्वां । खजऽकृत् । समत्ऽवां । तुविऽम्रक्षः । नदनुऽमान् । ऋजींषी । बृहत्ऽरेंणुः । च्यवंनः । मानुंषीणाम् । एकंः । कृष्टीनाम् । अभवत् । सहऽवां ॥ २ ॥

बृहद्रेणुः बृहतोमहतोरेणोःपांसोरुत्थापकःसंग्रामेष्वितियावत् एकोमुख्यः सहावा बलवान् सइन्द्रः मानुषीणां मनोःसंबन्धिनीनां कृष्टीनां प्रजानांयजमानानां च्यवनः अभिगन्ता अभवत् आसीत् कीदृशः युध्मोयोद्धा सत्वादाता सनोतेर्भेदनार्थस्येदंरूपं खजकृत् खजानांसंग्रामाणांकर्ता खजइतिसंग्रामनामैतत् समद्वा यजमानैःसहमदःसमत्तद्वान् तुविम्रक्षः म्रक्षतिःसंस्नेहकर्मा तुवीनां बहूनां वर्षणेन संस्नेहनकर्ता नदनुमान् शब्दवान् ऋजीषी ऋजीषशब्देनसवनद्याभिषुतः पुनस्तृतीयसवनेप्यभिषुतः सोमउच्यते तद्वत् ॥ २ ॥

अथतृतीया—

त्वंहनुत्यदंदमायोदस्यूँरेकंःकृष्टीरंवनोरार्याय ।
अस्तिस्विन्नुवीर्यं१तत्तंइन्द्रनस्विदस्तितदृतुथाविवोचः ॥ ३ ॥

त्वम् । ह । नु । त्यत् । अदमयः । दस्यून् । एकः । कृष्टीः । अवनोः । आर्याय । अस्ति । स्वित् । नु । वीर्यम् । तत् । ते । इन्द्र । न । स्वित् । अस्ति । तत् । ऋतुऽथा । वि । वोचः ॥ ३ ॥

हेइन्द्र त्यत् सः सत्वं त्यदितितच्छब्दपर्यायोत्रलिंगव्यत्ययः दस्यून् कर्महीनान्जनान् नु क्षिप्रं अदमयः दान्तानकरोः हशब्दःपूरणार्थः अपिच एकोमुख्यः त्वंकृष्टीः पुत्रदासादीन् आर्याय कर्मकृतेजनाय अवनोरददाः एवंस्तुवन्नप्यृषिरिन्द्रंयदानाद्राक्षीत् तदा तस्यवीर्यसद्भावेविचिकित्समानः परार्धर्चमाह हेइन्द्रते तव यत्पूर्वमुक्तं तद्वीर्यं सामर्थ्यं स्विन्वस्ति किंस्विद्भवति किंस्विन्विति विचिकित्सायां नस्विदस्ति यद्वा नास्तितद्बलं ऋतुथा कालेकाले विवोचः विशेषेणब्रूहि ॥ ३ ॥

अथचतुर्थी—

सदिद्धितेतुविजातस्यमन्येसहंःसहिष्ठतुरतस्तुरस्यं ।
उग्रमुग्रस्यंतवसस्तवीयोरंध्रस्यरध्रतुरोंबभूव ॥ ४ ॥

सत् । इत् । हि । ते । तुविऽजातस्य । मन्ये । सहः । सहिष्ठ । तुरतः । तुरस्य । उग्रम् । उग्रस्य । तवसः । तवीयः । अरध्रस्य । रध्रऽतुरः । बभूव ॥ ४ ॥

पूर्वमंत्रे इन्द्रस्यबलसदसद्भावं सन्दिह्यानयाबलमस्त्येवेत्यवधारयन्नाह हियस्मादर्थे यस्मात्कारणात् हेसहिष्ठ बलवत्तमेन्द्र तुविजातस्य बहुयज्ञेषुप्रादुर्भूतस्य तुरतः अस्मान्हिंसतः तुरस्यशत्रूणांहिंसितुःबलवतोवा तेतव सहोबलं सदित् विद्यमानमेवाहंमन्ये उग्रस्य ओजस्विनः तवसः प्रवृद्धस्य अरध्रस्य शत्रुभिर्वशीकर्तुमशक्यस्य रधेर्वशीकरणार्थस्यरूपं रध्रतुरः वशीकरणीयानांसपत्नानांहिंसकस्यतव बलं बभूव भवत्येव कीदृशं उग्रं उद्गूर्णं तवीयः प्रवृद्धतरं यतस्त्वंवृत्रादीनशत्रून्हंसि अतस्तेबलंविद्यतएवेत्यर्थः ॥ ४ ॥

अथपञ्चमी—

तन्नः प्रत्नंसख्यमस्तुयुष्मेइत्थावदद्भिर्वलमङ्गिरोभिः ।
हन्नच्युतच्युद्दस्मेषयन्तमृणोःपुरोविदुरोअस्यविश्वाः ॥५॥४॥

तत् । नः । प्रत्नम् । सख्यम् । अस्तु । युष्मे इति । इत्था । वदत्ऽभिः ।
वलम् । अङ्गिरःऽभिः । हन् । अच्युतऽच्युत् । दस्म । इषयन्तम् ।
ऋणोः । पुरः । वि । दुरः । अस्य । विश्वाः ॥ ५ ॥ ४ ॥

प्रत्नं पुराणं चिरकालानुवर्तीत्यर्थः तत्प्रसिद्धं नोस्मदीयं सख्यं स्तुत्यस्तोतृलक्षणं सखित्वं हेइन्द्र युष्मे युष्मास्वस्तु पूजार्थबहुवचनं हेअच्युतच्युत् अच्युतानां अविचलितानांच्यावक हेदस्म दर्शनीयेन्द्रत्वं इषयन्तं आयुधानिप्रेरयन्तं बलमेतन्नामानमसुरं इत्था सत्यमेव वदद्भिस्त्वांस्तुवद्भिरंगिरोभिःसह हन् हतवानसि अपिच अस्यबलस्य पुरः नगराणि व्यृणोः व्यगमयः वियुक्तान्यकार्षीरित्यर्थः विश्वाः सर्वाः दुरः पुरीणांद्वारश्चव्यृणोः ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेचतुर्थोवर्गः ॥ ४ ॥

अथषष्ठी—

सहिधीभिर्हव्योअस्त्युग्रईशानकृन्महतिवृत्रतूर्ये ।
सतोकसातातनयेसवज्रीवितन्तसाय्योअभवत्समत्सु ॥ ६ ॥

सः । हि । धीभिः । हव्यः । अस्ति । उग्रः । ईशानऽकृत् । महति ।
वृत्रऽतूर्ये । सः । तोकऽसाता । तनये । सः । वज्री । वितन्तसाय्यः ।
अभवत् । समत्ऽसु ॥ ६ ॥

उग्रः ओजस्वी ईशानकृत् स्तोतॄनीशानान्समर्थान्करोतीतीशानकृत् सइन्द्रः महति प्रभूते वृत्रतूर्ये संग्रामे वृत्रतूर्यइतिसंग्रामनामैतत् धीभिः स्तोतृभिः स्तुतिभिर्वा हव्योजयार्थिभिराह्वातव्यः अस्ति भवति हिशब्दःपादपूरणः तोकसाता तोकस्यपुत्रस्यसातौलाभेनिमित्ते तनये तत्पुत्रे निमित्तेसति सइन्द्रआह्वातव्योस्ति वज्री वज्रवान् सइन्द्रः समत्सु संग्रामेषु वितंतसाय्यः विशेषेणविस्तार्यः स्तोत्रैर्वन्दनीयोभवत् भवति यद्वा तन्तसाय्यः शत्रूणांहिंसकः तंतसइतिधातुर्हिंसाकर्मा तस्यकर्तरिरूपम् ॥ ६ ॥

अथसप्तमी–

समज्मनाजनिममानुषाणाममर्त्येननाम्नातिप्रसर्स्रे ।
सद्युम्नेनसशवसोतरायासवीर्येणनृतमःसमोकाः ॥ ७ ॥

सः । मज्मना । जनिम । मानुषाणाम् । अमर्त्येन । नाम्ना । अति । प्र । सर्स्रे । सः । द्युम्नेन । सः । शवसा । उत । राया । सः । वीर्येण । नृऽतमः । समऽओकाः ॥ ७ ॥

सइन्द्रः अमर्त्येन विनाशरहितेन नाम्ना शत्रूणांनमयित्रा मज्मना बलेन मज्मनेतिबलनामैतत् मानुषाणां मनुष्याणां जनिम जन्मसंघमित्यर्थः अतिप्रसर्स्रे अतिप्रपेदे सइन्द्रः द्युम्नेन यशसा समोकाः समानस्थानोभवति किंच सइन्द्रः शवसा बलेन समोकाभवति उतापिच नृतमोनेतृतमः सइन्द्रः राया धनेन वीर्येण सामर्थ्येनच समोकाभवति ॥ ७ ॥

अथाष्टमी–

सयोनमुहेनमिथूजनोभूत्सुमन्तुनामाचुमुरिंधुनिंच ।
वृणक्पिप्रुंशम्बरंशुष्णमिन्द्रःपुरांच्यौत्नायशयथायनूचित् ॥८॥

सः । यः । न । मुहे । न । मिथु । जनः । भूत् । सुमन्तुऽनामा । चुमुरिम् । धुनिम् । च । वृणक् । पिप्रुम् । शम्बरम् । शुष्णम् । इन्द्रः । पुराम् । च्यौत्नाय । शयथाय । नु । चित् ॥ ८ ॥

यइन्द्रः न मुहे संग्रामेकदापिनमुह्यति यश्च मिथु मिथ्यावृथा जनोजनयितानभून्नभवति किंतु सुमन्तुनामा प्रज्ञाननामा प्रख्यातनामेत्यर्थः सइन्द्रः पुरां शत्रुसंबन्धिनीनांपुरीणां च्यौत्नाय च्यवनाय नाशाय शयथाय शत्रूणांमरणायच नूचित् शीघ्रमेवकर्मकुरुतइतिशेषः तथा चुमुरिंधुनिंच एतन्नामकावसुरौ वृणगवृणक् हिंसितवानसि वृणक्तिर्हिंसाकर्मा अपिच पिप्रुं शंबरं शुष्णं एतन्नामकान्त्रीनसुरान् हिंसितवानसि ॥ ८ ॥

अथनवमी–

उदावतात्वक्षसापन्यसाचवृत्रहत्यायरथमिन्द्रतिष्ठ ।
धिष्ववज्रंहस्तआदक्षिणत्राभिप्रमन्दपुरुदत्रमायाः ॥ ९ ॥

उत्ऽअवता । त्वक्षसा । पन्यसा । च । वृत्रऽहत्याय । रथम् । इन्द्र । तिष्ठ । धिष्व । वज्रम् । हस्ते । आ । दक्षिणऽत्रा । अभि । प्र । मन्द । पुरुऽदत्र । मायाः ॥ ९ ॥

हेइन्द्र उदवतोद्गच्छता अवतिरत्रगतिकर्मा त्वक्षसा शत्रूणांतनूकर्त्रा पन्यसा स्तुत्यतरेणबलेनयुक्तस्त्वं वृत्रहत्याय शत्रुहननाय स्वकीयंरथंच तिष्ठ आरोह तथा दक्षिणत्रा दक्षिणहस्तेपाणौ वज्रं स्वकीयमायुधं आधिष्व आधत्स्व तदनंतरं हेपुरुदत्र बहुधनेन्द्र त्वं आसुरीर्मायाः अभि अभिगम्य प्रमन्द प्रकर्षेण जहि अत्रमन्दतिर्वधकर्मा ॥ ९ ॥

अथदशमी—

अग्निर्नशुष्कंवनमिन्द्रहेतीरक्षोनिधक्ष्यशनिर्नभीमा ।
गम्भीरयंऋष्वयायोरुरोजाध्वानयद्दुरितादम्भयंच ॥ १० ॥ ५ ॥

अग्निः । न । शुष्कम् । वनम् । इन्द्र । हेतिः । रक्षः । नि । धक्षि । अशनिः । न । भीमा । गंभीरया । ऋष्वया । यः । रुरोज । अध्वनयत् । दुःऽइता । दंभयत् । च ॥ १० ॥ ५ ॥

अग्निर्न अग्निरिव नशब्दउपमार्थीयः यथाअग्निःशुष्कंनीरसंवनंवृक्षसमूहंदहति हेइन्द्र हेतिस्त्वदीयंवज्रं तद्वच्छत्रून्नाशयति तदेवाह अशनिर्नभीमा यथाअशनिर्भीमाभवति तद्वद्भयंकरस्त्वं रक्षोराक्षसं निधक्षि वज्रेण नितरांदह यइन्द्रः गंभीरया शत्रुभिरधर्षणीयया ऋष्वया महत्या ऋष्वइतिमहन्नामैतत् हेत्या रुरोज शत्रून्बभंज अध्वनयत् युद्धेगर्जनलक्षणंशब्दंकरोति तथाच दुरिता दुरितानि दंभयच्चभिनत्तिच सत्वंरक्षोनिधक्षीतिपूर्वेणान्वयः ॥ १० ॥

॥ इतिचतुर्थस्यषष्ठेपंचमोवर्गः ॥ ५ ॥

अथैकादशी—

आसहस्रंपथिभिरिन्द्ररायातुविद्युम्नतुविवाजेभिरर्वाक् ।
याहिसूनोसहसोयस्यनूचिददेवईशेपुरुहूतयोतोः ॥ ११ ॥

आ । स॒हस्र॑म् । प॒थि॒ऽभिः॑ । इ॒न्द्र॒ । रा॒या । तुवि॑ऽद्युम्न ।
तु॒वि॒ऽवा॒जे॑भिः । अ॒र्वाक् । या॒हि॒ । सू॒नो॒ इति॑ । स॒ह॒सः॒ । यस्य॑ ।
नु । चि॒त् । अदे॑वः । ईशे॑ । पु॒रु॒ऽहू॒त॒ । योतोः॑ ॥ ११ ॥

हेतुविद्युम्न बहुधन हेसहसःसूनो बलस्यपुत्रेन्द्र ओजसोजातमुतमन्यएनमितिनिगमान्तरे बलपुत्रत्वंप्रसिद्धं राया धनेन युक्तस्त्वं सहस्रं सहस्रेण बहुभिरित्यर्थः तुविवाजेभिः बहुबलैः पथिभिः पतन्ति गच्छंत्यमीभिरितिपंथानोवाहाः तैअर्वाक् मदभिमुखःसन् आयाह्यागच्छ हे-पुरुहूत बहुभिराहूतेन्द्र यस्यतव योतोः बलादिभिःपृथक्कर्तुं अदेवः कश्चिदसुरः नूचिदीशे नेष्टे अत्रनूचिदितिनिषेधार्थेवर्तते ॥ ११ ॥

अथद्वादशी–

प्रतु॑विद्यु॒म्नस्य॒स्थवि॑रस्य॒घृष्वे॑र्दि॒वोर॑रप्शेमहि॒मापृ॑थि॒व्याः ।
नास्य॒शत्रु॒र्नप्र॑ति॒मान॑मस्ति॒नप्र॑ति॒ष्ठिःपु॑रु॒माय॒स्य॒सह्योः॑ ॥ १२ ॥

प्र । तु॒वि॒ऽद्यु॒म्नस्य॑ । स्थवि॑रस्य । घृष्वेः॑ । दि॒वः । र॒र॒प्शे॒ । म॒हि॒मा ।
पृ॒थि॒व्याः । न । अ॒स्य॒ । शत्रुः॑ । न । प्र॒ति॒ऽमान॑म् । अस्ति॑ । न ।
प्र॒ति॒ऽस्थिः । पु॒रु॒ऽमा॒यस्य॑ । सह्योः॑ ॥ १२ ॥

तुविद्युम्नस्य बहुयशसोबहुधनस्यवा स्थविरस्य प्रवृद्धस्य घृष्वेः शत्रूणांघर्षकस्येन्द्रस्य महिमामहत्त्वं दिवोद्युलोकात् पृथिव्याः भूमेश्च प्ररप्शे प्ररिरिचे विरप्शीतिमहन्नामसुपाठात् नाम्नांचप्रायेणधातुजत्वात्रप्शतिरत्रातिशयवाची पुरुमायस्य बहुप्रज्ञस्य सह्योः शत्रूणामभिभ-वितुरस्येन्द्रस्य शत्रुःशातयितानास्ति प्रतिमानं प्रतिनिधिर्नास्ति अस्यप्रतिष्ठिःप्रतिष्ठा आश्रयो-नास्ति सएव सर्वस्यप्रतिष्ठेत्यर्थः ॥ १२ ॥

अथत्रयोदशी–

प्रतत्ते॑अ॒द्याकर॑णंकृ॒तंभू॒त्कुत्सं॒यदा॒युम॑तिथि॒ग्वम॑स्मै ।
पु॒रू॒स॒हस्रा॒निशि॑शाअ॒भिक्षा॒मुत्तू॒र्व॑याणंधृ॒ष॒ता॒निनेथ ॥ १३ ॥

---

१ ऋ० सं० ८. ३. ४.।

प्र । तत् । ते । अद्य । करणम् । कृतम् । भूत् । कुत्सम् । यत् ।
आयुम् । अतिथिऽग्वम् । अस्मै । पुरु । सहस्रा । नि । शिशाः ।
अभि । क्षाम् । उत् । तूर्वयाणम् । धृषता । निनेथ ॥ १३ ॥

अद्येदानीमपि हेइन्द्र ते त्वया कृतंकरणं तत्कर्म प्रभूत् प्रभवति प्रकाशते किंतदिति उच्यते कुत्सं शुष्णाद्राक्षसादेतन्नामानमृषिंच आयुं शत्रुभ्यःसकाशादेतत्संज्ञकं पौरूरवसं अतिथिग्वं अतिथीनामभिगन्तारं दिवोदासंच शंबराद्ररक्षिथेतियत्करणंतत्प्रभवतीतिपूर्वेणसंबन्धः ररक्षिथेतिद्वितीयाश्रुतेरुचितक्रियाध्याहारः अपिचास्मै अनंतरोक्तायातिथिग्वाय पुरु पुरूणि बहूनि सहस्रासहस्राणि शंबरस्यधनानि निशिशाः अददाः इन्द्रःशंबरंहत्वा तस्यधनानिदिवोदासायददावित्यर्थः तथा हेइन्द्र धृषता धर्षणेन त्वदीयेनवज्रेण शंबरं हत्वा क्षां पृथिवीं अभि अभिलक्ष्य पृथिव्यांवर्तमानं तूर्वयाणं त्वरितगमनं दिवोदासंउन्निनेथ आपद्भ्यःउदगमयः॥१३॥

अनुक्रीनाह्येकाहेमरुत्वतीयशस्त्रे अनुत्वाहिघ्नइतिसूक्तमुखीया सूत्रितंच—अनुत्वाहिघ्ने-अधदेवदेवाअनुतेदायिमहइन्द्रियायेति ।

सैषासूक्तेचतुर्दशी—

अनुत्वाहिघ्नेअधदेवदेवामदन्विश्वेकवितमंकवीनाम् ।
करोयत्रवरिवोबाधितायदिवेजनायतन्वेगृणानः ॥ १४ ॥

अनु । त्वा । अहिऽघ्ने । अध । देव । देवाः । मदन् । विश्वे ।
कविऽतमम् । कवीनाम् । करः । यत्र । वरिवः । बाधिताय ।
दिवे । जनाय । तन्वे । गृणानः ॥ १४ ॥

हेदेव द्योतमानेन्द्र त्वा त्वां अधास्मिन्काले विश्वे सर्वेदेवाःस्तोतारः अहिघ्ने मेघहननाय वृष्टिप्रदानायेत्यर्थः अनुमदन्ननुमदन्ति अनुस्तुवन्ति कीदृशंत्वां कवीनां मेधाविनांमध्ये कवितमं अत्यंतंकविं यत्र यस्मिन्काले गृणानः स्तोतृभिःस्तूयमानः त्वं बाधिताय दारिद्र्यादिभिःपीडिताय दिवे स्तोत्रेजनाय तन्वे स्तोतॄणांतनयायच वरिवोधनं करः अकरोः अददाः अथवा हेदेवेन्द्र अथास्मिन्काले विश्वे सर्वेदेवाः सुराः अहिर्वृत्रएवोच्यते तस्यहननाय कवीनांकवितमंत्वां अनुमदन्ति यत्र यस्मिंस्तोत्रेसति बाधितायासुरैःपीडिताय दिवे द्युलोकनिवासायजनाय तन्वे शोभायै वृत्रहननेन तवशोभार्थं वरिवश्चकर्थ ॥ १४ ॥

अथपंचदशी—

अनुद्यावापृथिवीतत्तओजोमर्त्याजिहतइन्द्रदेवाः ।
कृष्वाकृत्नोअकृतंयत्तेअस्त्युक्थंनवीयोजनयस्वयज्ञैः ॥१५॥ ६ ॥

अनु । द्यावापृथिवी इति । तत् । ते । ओजः । अमर्त्याः । जिहते । इन्द्र । देवाः । कृष्व । कृत्नो इति । अकृतम् । यत् । ते । अस्ति । उक्थम् । नवीयः । जनयस्व । यज्ञैः ॥ १५ ॥ ६ ॥

हेइन्द्र ते त्वदीयं तत्प्रसिद्धमोजोबलं द्यावापृथिवी अनुजिहते अनुजिहाते अमर्त्याअमरणधर्माणोदेवास्त्वदीयंबलं अनुजिहाते अनुगच्छन्ति हेकृत्नो बहूनांकर्मणांकर्तः तेत्वदीयं अकृतं यत्कर्मास्ति तत्कृष्व कुरुष्व तदनन्तरं यज्ञैर्यज्ञेषु नवीयोनवतरं उक्थं स्तोत्रं जनयस्व ॥ १५ ॥

॥ इतिचतुर्थस्यषष्ठेषष्ठोवर्गः ॥ ६ ॥

महाँइन्द्रइतित्रयोदशर्चंचतुर्थसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं अनुक्रान्तंच महान्सप्तोनेति माध्यंदिनसवनेसोमातिरेकेएकंशस्त्रंभवति तत्रेदंसूक्तं सूत्रितंच—महाँइन्द्रोनृवद्विष्णोर्नुकमिति समूळ्हेद्वितीयेछन्दोमेमरुत्वतीयशस्त्रेएतत्सूक्तं सूत्रितंच महाँइद्रोनृवदितिमरुत्वतीयमिति ।

तत्रप्रथमा—

महाँइन्द्रोनृवदाचर्षणिप्राउतद्विबर्हाअमिनःसहोभिः ।
अस्मद्र्यग्वावृधेवीर्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत् ॥ १ ॥

महान् । इन्द्रः । नृऽवत् । आ । चर्षणिऽप्राः । उत । द्विऽबर्हाः । अमिनः । सहःऽभिः । अस्मद्र्यक् । ववृधे । वीर्याय । उरुः । पृथुः । सुऽकृतः । कर्तृऽभिः । भूत् ॥ १ ॥

नृवत् यथा नेताराजाभृत्यादीनांकामानांपूरयितातद्वत् चर्षणिप्राः चर्षणीनां स्तोतृजनानांकामानांपूरकः महान् प्रभूतइन्द्रआगच्छतु आइत्युपसर्गदर्शनाद्गच्छत्वित्याख्यातस्याध्याहारः उतापिच द्विबर्हाः द्वयोर्लोकयोःपरिवृढः सहोभिः शत्रुबलैः अमिनः अहिंसनीयइन्द्रः अस्मद्र्यक् अस्मदभिमुखंयथाभवतितथा वीर्याय वीरकर्मकरणाय ववृधे वर्धते उरुः शरीरेणविस्तीर्णः पृथुगुणैः प्रथितः कर्तृभिर्यजमानैः सुकृतोभूत् सुष्ठुपरिचरितोभवति ॥ १ ॥

अथद्वितीया—

इन्द्रमेवधिषणासातयेधाद्बृहन्तमृष्वमजरंयुवानम् ।
अषाह्ळेनशवसाशूशुवांसंसद्यश्चिद्योवावृधेअसामि ॥ २ ॥

इन्द्रम् । एव । धिषणा । सातये । धात् । बृहन्तम् । ऋष्वम् । अजरम् । युवानम् । अषाह्ळेन । शवसा । शूशुऽवांसम् । सद्यः । चित् । यः । ववृधे । असामि ॥ २ ॥

धिषणा अस्मदीयास्तुतिः सातये दानाय इन्द्रमेवधात् धारयति कीदृशं बृहन्तं महान्तं ऋष्वं गन्तारं अजरं जरारहितं युवानं नित्यतरुणं अषाह्ळेन शत्रुभिरनभिभूतेन शवसा बलेन शूशुवांसं प्रवृद्धं श्वयतेरिदंरूपं यइन्द्रः सद्यश्चित् सद्यएवजातमात्रःसन् असामि अनल्पं अधिकंयथाभवतितथा ववृधे वर्धते ॥ २ ॥

अथतृतीया—

पृथूकरस्नाबहुलागभस्तीअस्मद्र्य१क्संमिमीहिश्रवांसि ।
यूथेवपश्वःपशुपादमूनाअस्माँइन्द्राभ्यावर्वृत्स्वाजौ ॥ ३ ॥

पृथू इति । करस्ना । बहुला । गभस्ती इति । अस्मद्र्यक् । सम् । मिमीहि । श्रवांसि । यूथाऽइव । पश्वः । पशुऽपाः । दमूनाः । अस्मान् । इन्द्र । अभि । आ । ववृत्स्व । आजौ ॥ ३ ॥

हेइन्द्र त्वं पृथूविस्तीर्णौ करस्ना कर्मणांकर्तारौ बहुला बहुप्रदौ गभस्ती त्वदीयौबाहू श्रवांस्यन्नानि दातुमितिशेषः अस्मद्र्यक् अस्मदभिमुखं संमिमीहि कुरु किंच हेइन्द्र दमूनाः दान्तमनास्त्वं आजौ संग्रामे अस्मानभ्याववृत्स्व अभ्यावर्तस्व तत्रदृष्टान्तः—पशुपाः पशूनांपालकः पश्वः पशूनांयूथेव यूथानियथावर्तयतितद्वत् ॥ ३ ॥

अथचतुर्थी—

तंवइन्द्रंचतिनमस्यशाकैरिहनूनंवाजयन्तोहुवेम ।
यथाचित्पूर्वेजरितारआसुरनेद्याअनवद्याअरिष्टाः ॥ ४ ॥

तम् । वः । इन्द्रम् । चतिनम् । अस्य । शाकैः । इह । नूनम् ।
वाजऽयन्तः । हुवेम । यथा । चित् । पूर्वे । जरितारः । आसुः ।
अनेद्याः । अनवद्याः । अरिष्टाः ॥ ४ ॥

नूनमद्य इहास्मिन्यज्ञे वाजयन्तः अन्नमिच्छन्तोवयं स्तोतारः शाकैः शक्तैः समर्थैः अस्य तवसहायैर्मरुद्भिःसहितं चतिनं शत्रूणांघातकं नाशकमित्यर्थः हेइन्द्र परमेश्वरं तं वः प्रसिद्धंत्वां हुवेम स्तुमः यथाचिद्यथैव पूर्वे पुरातनाः जरितारः स्तोतारः अनेद्याः अनिंद्याः अनवद्याः पापरहिताः अरिष्टाः अहिंसिताश्च आसुः बभूवुः हेइन्द्र त्वत्प्रसादाद्वयमपि तथैवभवेमेत्यर्थः॥४॥

अथपञ्चमी–

धृतव्रतोधनदाःसोमवृद्धःसहिवामस्यवसुनःपुरुक्षुः ।
संजग्मिरेपथ्याउरायोअस्मिन्त्समुद्रेनसिन्धवोयादमानाः॥५॥७॥

धृतऽव्रतः । धनऽदाः । सोमऽवृद्धः । सः । हि । वामस्य । वसुनः ।
पुरुऽक्षुः । सम् । जग्मिरे । पथ्याः । रायः । अस्मिन् । समुद्रे ।
न । सिन्धवः । यादमानाः ॥ ५ ॥ ७ ॥

सहि सखल्विन्द्रः धृतव्रतोधनकर्मा धनदाः सएवधनप्रदः कीदृशस्यधनस्येत्याकांक्षायां उपसर्जनीभूतस्यापिधनस्यविशेषणे वामस्य वसुनइति वामस्य वननीयस्य वसुनः श्रेष्ठस्य यद्वा वसुनोधनस्यस्वामीतिशेषः सोमवृद्धः सएवसोमेप्रवृद्धः पुरुक्षुः बह्वन्नः सएव अस्मिन्निन्द्रएव पथ्याः स्तोतॄणांहितानि रायोधनानि संजग्मिरे संगच्छन्ते तत्रदृष्टान्तः–सिन्धवोनद्यः समुद्रेन यथासमुद्रे यादमानाअभिगच्छन्तः तद्वत् ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेसप्तमोवर्गः ॥ ७ ॥

अथषष्ठी–

शविष्ठंनआभरशूरशवओजिष्ठमोजोअभिभूतमुग्रम् ।
विश्वाद्युम्नावृष्ण्यामानुषाणामस्मभ्यंदाहरिवोमादयध्यै ॥६॥

शविष्ठम् । नः । आ । भर । शूर । शवः । ओजिष्ठम् । ओजः ।
अभिऽभूते । उग्रम् । विश्वा । द्युम्ना । वृष्ण्या । मानुषाणाम् ।
अस्मभ्यम् । दाः । हरिऽवः । मादयध्यै ॥ ६ ॥

हेशूर विक्रान्तेन्द्र शविष्ठं बलवत्तमं शवोबलं नोस्मभ्यं आभराहर हेअभिभूते शत्रूणामभिभावुकेन्द्र उग्रमप्रसह्यं ओजिष्ठमोजस्वितमं ओजोदीप्तिमस्मभ्यंआभर विश्वा विश्वानि सर्वाणि वृष्ण्या वृष्ण्यानि सेचनसमर्थानि द्युम्ना द्युम्नानिद्योतमानानि यानिधनानि मानुषाणां मनुष्याणां भोग्यतयाकल्पितानि हेहरिवः हरिवन्निन्द्र तानिधनानि मादयध्यै अस्मान्मादितुं अस्मभ्यंदाः प्रयच्छ ॥ ६ ॥

अथसप्तमी–

यस्तेमदःपृतनाषाळमृध्रइन्द्रतंनआभरशूशुवांसम् ।
येनतोकस्यतनयस्यसातौमंसीमहिजिगीवांसस्त्वोताः ॥ ७ ॥

यः । ते । मदः । पृतनाषाट् अमृध्रः । इन्द्र । तम् । नः । आ । भर । शूशुऽवांसम् । येन । तोकस्य । तनयस्य । सातौ । मंसीमहि । जिगीवांसः । त्वाऽऊताः ॥ ७ ॥

पृतनाषाट् शत्रुसेनानामभिभविता अमृध्रः अहिंसितः योमदोहर्षः हेइन्द्र ते त्वयादेयः शूशुवांसं प्रवृद्धं तं मदं नोस्मभ्यमाभराहर त्वोतास्त्वयारक्षिताः जिगीवांसोजितवन्तोवयं तोकस्य पुत्रस्य तनयस्य तत्पुत्रस्यच सातौ लाभेनिमित्तभूतेसति येनहर्षेण मंसीमहि त्वांस्तुवीमहि तमाभरेतिपूर्वेणान्वयः ॥ ७ ॥

अथाष्टमी–

आनोभरवृषणंशुष्ममिन्द्रधनस्पृतंशूशुवांसंसुदक्षम् ।
येनवंसामपृतनासुशत्रून्तवोतिभिरुतजामीँरजामीन् ॥ ८ ॥

आ । नः । भर । वृषणम् । शुष्मम् । इन्द्र । धनऽस्पृतम् । शूशुऽवांसम् । सुऽदक्षम् । येन । वंसाम । पृतनासु । शत्रून् । तव । ऊतिऽभिः । उत । जामीन् । अजामीन् ॥ ८ ॥

हेइन्द्र त्वं वृषणं वर्षितारं शुष्मं सेनालक्षणंबलं नोस्मभ्यं आभराहर कीदृशं धनस्पृतं धनस्यपालकं शूशुवांसं प्रवृद्धं सुदक्षं शोभनबलं हेइन्द्र तवोतिभिः त्वदीयाभीरक्षाभिः पृतनासु संग्रामेषु पृतनाइतिसंग्रामनाम येनबलेन शत्रून्वंसाम हनाम उतेत्यत्रभिन्नक्रमः जामीन् बन्धून् उतापिच अजामीन् शत्रूंश्च येनशुष्मेण वंसाम तंशुष्ममाभरेतिपूर्वेणसंबन्धः ॥ ८ ॥

अथनवमी—

आतेशुष्मोंवृषभएंतुपश्चादोत्तरादधरादापुरस्तात् ।
आविश्वतोअभिसमेंत्वर्वाङिन्द्रंद्युम्नंस्वंर्वद्धेह्यस्मे ॥ ९ ॥

आ । ते । शुष्मः । वृषभः । एतु । पश्चात् । आ । उत्तरात् ।
अधरात् । आ । पुरस्तात् । आ । विश्वतः । अभि । सम् । एतु ।
अर्वाङ् । इन्द्र । द्युम्नम् । स्वः॑ऽवत् । धेहि । अस्मे इति ॥ ९ ॥

हेइन्द्र वृषभः वर्षिता ते त्वदीयं शुष्मोबलं अर्वाङस्मदभिमुखःसन् पश्चात् पश्चिमभागात् एतु आगच्छतु उत्तरादुत्तरभागादागच्छतु अधरा दक्षिणाच्चएतु पुरस्तात् पूर्वभागाच्चगच्छतु विश्वतः सर्वस्माद्दिग्भागात् अभि अस्मानभिलक्ष्यआसमेतु सम्यगागच्छतु हेइन्द्र त्वं स्वर्वं-व् सुखयुक्तं द्युम्नं धनं अस्मे अस्मभ्यं धेहि प्रयच्छ ॥ ९ ॥

अथदशमी—

नृवत्तंइन्द्रनृतंमाभिरूतीवंसीमहिवामंश्रोमंतेभिः ।
ईक्षेहिवस्वंउभयंस्यराजन्धारत्नंमहिस्थूरंबृहन्तंम् ॥ १० ॥

नृऽवत् । ते । इन्द्र । नृऽतंमाभिः । ऊती । वंसीमहि । वामम् ।
श्रोमंतेभिः । ईक्षे । हि । वस्वंः । उभयंस्य । राजन् । धाः ।
रत्नंम् । महि । स्थूरम् । बृहन्तंम् ॥ १० ॥

नृवत् मनुष्यैःपरिचारकजनैर्युक्तं श्रोमतेभिः श्रोतव्यैर्यशोभिः सहितं वामं वननीयंधनं हेइन्द्र ते त्वत्तः नृतमाभिः नेतृतमाभिः ऊतीऊतिभीरक्षाभिः वंसीमहि वयंसं भजेमहि हियस्मात्कारणात् हेराजन् राजमानेन्द्र त्वं उभयस्य पार्थिवस्यदिव्यस्यच वस्वो धनस्य ईक्षे ईशिषे तस्मात्कारणात् महि महान्तं स्थूरं विपुलं बृहन्तं गुणैःपरिवृढं रत्नं रमणीयं धनं अत्ररत्नशब्दःपुल्लिंगः धाः धेहि ॥ १० ॥

अथैकादशी—

मरुत्वंन्तंवृषभंवावृधानमकंवारिंदिव्यंशासमिन्द्रम् ।
विश्वासाहमवंसेनूतंनायोग्रंसंहोदामिहतंहुंवेम ॥ ११ ॥

मरुत्वन्तम् । वृषभम् । ववृधानम् । अकवऽअरिम् । दिव्यम् ।
शासम् । इन्द्रम् । विश्वऽसहम् । अवसे । नूतनाय । उग्रम् ।
सहःऽदाम् । इह । तम् । हुवेम ॥ ११ ॥

इहास्मिन्यज्ञे नूतनाय अभिनवाय अवसे रक्षणाय तं प्रसिद्धं इन्द्रं हुवेम स्तुमः आह्वयामोवा कीदृशं मरुत्वंतं मरुद्भिर्युक्तं वृषभं कामानांवर्षितारं ववृधानं प्रवृद्धं अकवारिं अकुत्सितशत्रुंदिव्यं द्योतमानं शासं शासितारं विश्वसहं विश्वस्यलोकस्याभिभवितारं उग्रमोजस्विनं सहोदां बलप्रदं ॥ ११ ॥

अथद्वादशी—

जनंवज्रिन्महिचिन्मन्यमानमेभ्योनृभ्योरन्धयायेष्वस्मि ।
अधाहित्वापृथिव्यांशूरसातौहवामहेतनयेगोष्वप्सु ॥ १२ ॥

जनम् । वज्रिन् । महि । चित् । मन्यमानम् । एभ्यः । नृऽभ्यः ।
रन्धय । येषु । अस्मि । अध । हि । त्वा । पृथिव्याम् । शूरऽसातौ ।
हवामहे । तनये । गोषु । अप्ऽसु ॥ १२ ॥

येषु येषांनृणांमध्ये अहमस्मि एकोभवामि हेवज्रिन् वज्रवन्निन्द्र त्वं एभ्योनृभ्योमनुष्येभ्यः महि महदत्यन्तमात्मानंमन्यमानंजनं बहुमन्यमानमित्यर्थः रन्धय वशीकुरु चिदिति पादपूरणः अधाधुना पृथिव्यां भूम्यां शूरसातौ युद्धे प्रवृत्तेसति तनये पुत्रेनिमित्तेच गोषु पशुषु अप्सु उदकेषुचनिमित्तेषु हेइन्द्र त्वा द्युलोकेस्थितं त्वां हवामहे वयमाह्वयामः ॥ १२ ॥

अथत्रयोदशी—

वयन्तएभिःपुरुहूतसख्यैःशत्रोःशत्रोरुत्तरइत्स्याम ।
घ्नन्तोवृत्राण्युभयानिशूररायामदेमबृहतात्वोताः ॥ १३ ॥ ८ ॥

वयम् । ते । एभिः । पुरुऽहूत । सख्यैः । शत्रोःऽशत्रोः । उत्ऽतरे ।
इत् । स्याम । घ्नन्तः । वृत्राणि । उभयानि । शूर । राया । मदेम ।
बृहता । त्वाऽऊताः ॥ १३ ॥ ८ ॥

हेपुरुहूत बहुभिराहूतेन्द्र एभिः सिद्धैः सख्यैः स्तोत्रलक्षणैः सखिकर्मभिः ते त्वयासहवयं उभयानि जामिरूपाण्यजामिरूपाणि वृत्राण्यमित्राणि घ्नन्तः हिंसन्तः शत्रोःशत्रोः सर्वस्माच्छत्रोउत्तरइत्स्याम अधिकाएवभवेम हेशूर विक्रान्तेन्द्र त्वोताः वयं त्वयारक्षिताःसन्तः बृहता महता राया धनेन मदेम हृष्याम ॥ १३ ॥

॥ इतिचतुर्थस्यषष्ठेऽष्टमोवर्गः ॥ ८ ॥

द्यौर्नयइन्द्रेतित्रयोदशर्चंपंचमंसूक्तं भरद्वाजस्यार्षमैन्द्रं त्रैष्टुभं विपिप्रोरित्येषासप्तमी दशाक्षरचतुष्टययुक्ताविराट् अनुक्रम्यतेच—द्यौर्नविपिप्रोर्विराडिति पृष्ठ्यषडहस्यषष्ठेहनितृतीयसवने उक्थ्यस्तोत्राणि यदिद्विपदासुस्तुवीरन् यदिवाग्निष्टोमसंस्थः स्यात् तदानीं माध्यंदिनसवने अच्छावाकः स्वशस्त्रे आरंभणीयाभ्यऊर्ध्वमेतत्सूक्तंशंसेत् सूत्रितंच—द्यौर्नयइन्द्रेत्यच्छावाकइति इदमेवसूक्तमिन्द्राविष्णोरुत्क्रान्तिनाग्येकाहेनिष्केवल्यनिविद्धानं द्यौर्नयइन्द्रेतिमाध्यंदिनइति ।

तत्रप्रथमा—

द्यौर्नयइन्द्राभिभूमार्यस्तस्थौरयिःशवसापृत्सुजनान् ।
तंनःसहस्रंभरमुर्वरासांदद्धिसूनोसहसोवृत्रतुरम् ॥ १ ॥

द्यौः । न । यः । इन्द्र । अभि । भूम । अर्यः । तस्थौ । रयिः । शवसा । पृत्ऽसु । जनान् । तम् । नः । सहस्रऽभरम् । उर्वराऽसाम् । दद्धि । सूनो इति । सहसः । वृत्रऽतुरम् ॥ १ ॥

योरयिः पुत्ररूपंधनं शवसा बलेन पृत्सु संग्रामेषु अर्यः अरीन् शत्रूनजनान् अभितस्थौ आक्रामेत् तत्रदृष्टान्तः-द्यौर्न द्योतमानःसूर्योयथा भूम भूतानि आक्रामति तद्वत् हेसहसःसूनो बलस्यपुत्रेन्द्र त्वं तंपुत्रं नोस्मभ्यंदद्धि देहि कीदृशं सहस्रभरं सहस्रस्यधनस्यभर्तारं उर्वरासां सस्याढ्यानांभूमीनां सवितारं संभक्तारं वृत्रतुरं वृत्राणांशत्रूणां तरितारं तुर्वितारंवा ॥ १ ॥

अथद्वितीया—

दिवोनतुभ्यमन्विन्द्रसत्रासुर्यंदेवेभिर्धायिविश्वम् ।
अहिंयद्वृत्रमपोवव्रिवांसंहन्नृजीषिन्विष्णुनासचानः ॥ २ ॥

दिवः । न । तुभ्यम् । अनु । इन्द्र । सत्रा । असुर्यम् । देवेभिः । धायि । विश्वम् । अहिम् । यत् । वृत्रम् । अपः । वव्रिऽवांसम् । हन् । ऋजीषिन् । विष्णुना । सचानः ॥ २ ॥

दिवोन सूर्यायेव हेइन्द्र तुभ्यं सत्रासत्यमेव विश्वं व्याप्तं असुर्यमसुरत्वं बलं देवेभिः देवैःस्तोतृभिः अनुधायि व्यधायि अकारि स्तोत्रैःस्तूयमानोदवताबलवतीभवतीत्यर्थः हेऋजीषिन् विगतरससोमेन्द्र विष्णुनासचानः संगच्छमानस्त्वं षचसमवायेइतिधातोरूपं यद्येनासुर्येण अपः उदकानि वव्रिवांसं परिवृण्वन्तं अहिमागत्यहन्तारं वृत्रमसुरं हन् अहन् अवधीः तद्बलं व्यधायीतिपूर्वेणसंबन्धः ॥ २ ॥

अथतृतीया—

तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेन्द्रोवृद्धमहाः ।
राजाभवन्मधुनःसोम्यस्यविश्वासांयत्पुरांदर्त्नुमावत् ॥ ३ ॥

तूर्वन् । ओजीयान् । तवसः । तवीयान् । कृतऽब्रह्मा । इन्द्रः । वृद्धऽमहाः । राजा । अभवत् । मधुनः । सोम्यस्य । विश्वासाम् । यत् । पुराम् । दर्त्नुम् । आवत् ॥ ३ ॥

यद्यदा इन्द्रोविश्वासांसर्वासां पुरां असुरपुरीणां दर्त्नुं दारकंवज्रं आवत् प्रापत् तदा सोम्यस्य सोममयस्य मधुनः मधुररसस्य राजाभवत् स्वाम्यासीत् कीदृशः तूर्वन् हिंसकान्हिंसन् ओजीयान् अतिशयेनओजस्वी तवसोबलवतः तवीयान् बलवत्तरः कृतब्रह्मा कृतंब्रह्म स्तोत्रंयस्मैस्तोतृभिः सः अथवा कृतंदत्तंब्रह्मान्नंयेनस्तोतृभ्यःसः वृद्धमहाः वृद्धतेजाः एवंभूतइन्द्रोराजाभवदिति ॥ ३ ॥

अथचतुर्थी—

शतैरपद्रन्पणयइन्द्रात्रदशोणयेकवयेर्कसातौ ।
वधैःशुष्णस्याशुषस्यमायाःपित्वोनारिरेचीत्किंचनप्र ॥ ४ ॥

शतैः । अपद्रन् । पणयः । इन्द्र । अत्र । दशऽओणये । कवये । अर्कऽसातौ । वधैः । शुष्णस्य । अशुषस्य । मायाः । पित्वः । न । अरिरेचीत् । किम् । चन । प्र ॥ ४ ॥

अत्रास्मिन्नर्कसातौ अर्कोन्नंप्राप्यतेस्मिन्नित्यर्कसातिः युद्धं तस्मिन् दशोणये बहुहविष्के कवये मेधाविनः पंचम्यर्थेचतुर्थी हेइन्द्र त्वत्सहायात्कुत्सात् बिभ्यतः पणयएतन्नामकासुराः शतैः शतसंख्याकैर्बलैः सार्धमपद्रन्नपाद्रवन् अपलायन्त अपिचेन्द्रः अशुषस्याशुष्कस्य संपूर्णबलस्येत्यर्थः शुष्णस्यैतन्नामकासुरस्य शत्रोर्मायाः कपटान्वधैर्हननसाधनैरायुधैः नप्रारिरेचीत् परिक्तानतिरिक्तान्नाकरोत् पित्वोन्नस्य पितुरित्यन्ननामैतत् किंच नकिंचिदपि नप्रारिरेचीत् तदीयमन्नंसर्वमप्यपाहारयत् ॥ ४ ॥

अथपंचमी—

महोद्रुहोअपविश्वायुधायिवज्रस्ययत्पतनेपादिशुष्णः ।
उरुषसरथंसारथयेकरिन्द्रःकुत्सायसूर्यस्यसातौ ॥ ५ ॥ ९ ॥

महः । द्रुहः । अप । विश्वऽआयु । धायि । वज्रस्य । यत् । पतने । पादि । शुष्णः । उरु । सः । सऽरथम् । सारथये । करः । इन्द्रः कुत्साय । सूर्यस्य । सातौ ॥ ५ ॥ ९ ॥

यद्यदा शुष्णोसुरः वज्रस्यपतने पाते पादि अगच्छत् अम्रियतेत्यर्थः तदा महोमहतः द्रुहोद्रोग्धुः शुष्णस्य संबन्धि विश्वायु सर्वगतंबलमितिशेषः अपधायि अपहितमकारि तिरस्कृतमित्यर्थः सइन्द्रः सारथये सारथिभूतायकुत्साय सरथं समानरथं सूर्यस्यसातौ भजने निमित्तभूते उरुविस्तीर्णंयथाभवतितथा कः अकरोत् तथाचोक्तं—कुत्सायेन्द्रोसुरंशुष्णंजिघांसुः कुत्समात्मनः । सारथिंकल्पयित्वास्यशत्रुशुष्णमहंस्ततः ॥ कुत्सस्यरक्षांबहुलांचकारेत्यनयोच्यतेइति ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेनवमोवर्गः ॥ ९ ॥

अथषष्ठी—

प्रश्येनोनमदिरमंशुमस्मैशिरोदासस्यनमुचेर्मथायन् ।
प्रावन्नमींसाप्यंससन्तंपृणग्रायासमिषासंस्वस्ति ॥ ६ ॥

प्र । श्येनः । न । मदिरम् । अंशुम् । अस्मै । शिरः । दासस्य । नमुचेः । मथायन् । प्र । आवत् । नमीम् । साप्यम् । ससन्तम् । पृणक् । राया । सम् । इषा । सम् । स्वस्ति ॥ ६ ॥

श्येनः सुपर्णश्चनेत्ययंशब्दःसमुच्चयेवर्तते अस्माइन्द्राय मदिरं मदकरंअंशुं सोमं प्रेति आइत्यस्यार्थेवर्तते आहरत् उपसर्गदर्शनाचाख्यातमध्याह्रियते किंचायमिन्द्रोपि दासस्य प्राणिनामुपक्षपयितुर्नमुचेरेतन्नामासुरस्य शिरःशीर्षं मथायन् मंथनंकुर्वन् साप्यं सपस्यपुत्रं ससन्तं स्वपन्तं नमीं एतत्संज्ञकमृषिं प्रावत् प्रारक्षत् स्वस्त्यविनाशेन राया पश्वादिधनेन इषान्नेन च तमृषिं संपृणक् समयोजयत् ॥ ६ ॥

अथसप्तमी—

विपिप्रोरहिमायस्यदृह्ळाःपुरोवज्रिञ्छवसानदर्दः ।
सुदामन्तद्रेक्णोअप्रमृष्यमृजिश्वनेदात्रंदाशुषेदाः ॥ ७ ॥

वि । पिप्रोः । अहिऽमायस्य । दृह्ळाः । पुरः । वज्रिन् । शवसा । न । दर्दरितिदर्दः । सुऽदामन् । तत् । रेक्णः । अप्रऽमृष्यम् । ऋजिश्वने । दात्रम् । दाशुषे । दाः ॥ ७ ॥

हेवज्रिन् वज्रवन्निन्द्र त्वं अहिमायस्य अहंत्र्योमायायस्य पिप्रोरेतन्नाम्नोसुरस्यसंबन्धिनीः दृह्ळाः दृढानि पुरः प्राकारादीनिदुर्गाणि शवसा बलेन विदर्दः विदारितवानसि नेतिपादपूरणः त्वंपिप्रोर्नृमणःप्रारुजःपुरः । शतंपूर्भिरायसीभिर्निपाहीतिदर्शनात् । अपिच हेसुदामन् शोभनदानेन्द्र त्वं दात्रं हविर्लक्षणं धनं दाशुषे दत्तवते ऋजिश्वने एतन्नामकायराजर्षये अप्रमृष्यं केनाप्यबाध्यं तत्तस्यस्वभूतंरेक्णोधनं दाः अदाः दत्तवानसि ॥ ७ ॥

अथाष्टमी—

सवेतसुंदशमायंदशोणिंतूतुजिमिन्द्रःस्वभिष्टिसुम्नः ।
आतुग्रंशश्वदिभंद्योतनायमातुर्नसीमुपसृजाइयध्यै ॥ ८ ॥

---

१ ऋ० सं० १. ४. ९. । २ ऋ० सं० ५. २. ४. ।

सः । वेतसुम् । दर्शऽमायम् । दर्शऽओणिम् । तूतुजिम् । इन्द्रः ।
स्वभिष्टिऽसुम्नः । आ । तुग्रम् । शश्वत् । इभम् । द्योतनाय ।
मातुः । न । सीम् । उप । सृज । इयध्यै ॥ ८ ॥

स्वभिष्टिसुम्नः सुष्ठुअभ्येषणीयान्यभिगम्यानिसुम्नानिसुखानियेनदेयानिसइन्द्रः दशमायं बहुवंचनं वेतसुं वेतसुनामकमसुरं दशोणिं एतन्नामकंच तूतुजिं तूतुजिनामकंच आ अपिच तुग्रं तुग्रनामकमसुरं तथा इभमेतन्नामकमसुरंच इयध्यै एतुं द्योतनाय एतत्संज्ञायराज्ञे शश्वदुपसृजउपासृजत् वशीचकार तत्रदृष्टान्तः— मातुर्न मातुर्जनन्याइव पुत्रं यथामात्रेपुत्रावशीभवन्तितद्वद्वशंचकारेत्यर्थः सीमितिपादपूरणः ॥ ८ ॥

अथनवमी—

सईंस्पृधोवनतेअप्रतीतोबिभ्रद्वज्रंवृत्रहणंगभस्तौ ।
तिष्ठद्धरीअध्यस्तेवगर्तेवचोयुजावहतइन्द्रमृष्वम् ॥ ९ ॥

सः । ईम् । स्पृधः । वनते । अप्रतिऽइतः । बिभ्रत् । वज्रम् ।
वृत्रऽहनम् । गभस्तौ । तिष्ठत् । हरी इति । अधि । अस्ताऽइव ।
गर्ते । वचःऽयुजा । वहतः । इन्द्रम् । ऋष्वम् ॥ ९ ॥

गभस्तौ हस्ते वृत्रहणं वृत्राणांशत्रूणांहन्तारं वज्रं स्वकीयमायुधं बिभ्रद्धारयन् अप्रतीतः शत्रुभिरप्रतिगतः सइन्द्रः स्पृधः स्पर्धमानान् ईं इमान् वृत्रप्रभृतीन् शत्रून् वनते हन्ति हरी स्वकीयावश्वौ अधितिष्ठत् आरोहति तत्रदृष्टान्तः— अस्तेव गर्तेयथाक्षेप्ताशूरः रथेअधितिष्ठत्तद्वत् तथावचोयुजा वचोमात्रेणयुज्यमानौ यद्वा स्तोतॄणां स्तुतिभिः युज्यमानौ तौ हरीच ऋष्वं महान्तं इन्द्रं वहतः ॥ ९ ॥

अथदशमी—

सनेमतेवसानव्यंइन्द्रप्रपूरवःस्तवन्तएनायज्ञैः ।
सप्तयत्पुरःशर्मशारदीर्दर्धन्दासीःपुरुकुत्सायशिक्षन् ॥ १० ॥

सनेम । ते । अवसा । नव्यः । इन्द्र । प्र । पूरवः । स्तवन्ते ।
एना । यज्ञैः । सप्त । यत् । पुरः । शर्म । शारदीः । दर्त् । हन् ।
दासीः । पुरुऽकुत्साय । शिक्षन् ॥ १० ॥

हेइन्द्र ते त्वदीयेन अवसा रक्षणेन नव्योनवीयोनवतरं त्वयादीयमानंधनं सनेम वयंस्तोतारो-भजेमहि पूरवोमनुष्याः स्तोतारः एना अनेनस्तोत्रेण युक्तैर्यज्ञैः प्रस्तवन्ते त्वांस्तुवन्ति यद्यस्मा-त्कारणात् दासीः कर्मणामुपक्षपयित्रीः शत्रुप्रजाः हन् घ्नन् हिंसन् पुरुकुत्साय एतन्नामकायराज्ञे शिक्षन् धनानिप्रयच्छन् हेइन्द्र त्वं शारदीः शरन्नाम्नोसुरस्यसंबन्धिनीः सप्त सप्तसंख्याकाः पुरः पुरी शर्म शर्मणावज्रेण दर्त् विदारितवानसि तस्मात्कारणात्त्वांस्तोतारः स्तुवन्तीत्यर्थः ॥१०॥

अथैकादशी—

त्वंवृधइन्द्रपूर्व्योभूर्वरिवस्यन्नुशनेकाव्याय ।
परानववास्त्वमनुदेयंमहेपित्रेददाथस्वंनपातम् ॥ ११ ॥

त्वम् । वृधः । इन्द्र । पूर्व्यः । भूः । वरिवस्यन् । उशने । काव्याय । परा । नवऽवास्त्वम् । अनुऽदेयम् । महे । पित्रे । ददाथ । स्वम् । नपातम् ॥ ११ ॥

हेइन्द्र पूर्व्यः पुरातनस्त्वं काव्याय कविपुत्राय उशने उशनसे भार्गवाय वरिवस्यन् धन-मिच्छन् वृधोभूः स्तोतॄणांवर्धकोभवसि अनुदेयमनुदातव्यंधनं नववास्त्वं एतन्नामकंअसुरं प-राहत्य स्वंस्वकीयमौशनसं नपातं युद्धेशत्रुभिर्गृहीतंपुत्रं महे महते पित्रे पालयितव्यायोशनसे परादद्राथ तस्यशत्रुंहत्वा प्रकर्षेणदत्तवानसि ॥ ११ ॥

अथद्वादशी—

त्वंधुनिरिन्द्रधुनिमतीर्ऋणोरपःसीरानस्रवन्तीः ।
प्रयत्समुद्रमतिशूरपर्षिपारयातुर्वशंयदुंस्वस्ति ॥ १२ ॥

त्वम् । धुनिः । इन्द्र । धुनिऽमतीः । ऋणोः । अपः । सीराः । न । स्रवन्तीः । प्र । यत् । समुद्रम् । अति । शूर । पर्षि । पारय । तुर्वशम् । यदुम् । स्वस्ति ॥ १२ ॥

हेइन्द्र धुनिः शत्रूणांकंपयितात्वं धुनिमतीः धुनिर्नामासुरोयासुनिरोधकतयाविद्यते ताः अपः उदकानि सीरान नदीरिव स्रवन्तीः प्रवहन्तीः ऋणोः अगमयः धुनिंहत्वा तेननिरोधिता-न्युदकानिप्रवाहयतीत्यर्थः हेशूर वीरेन्द्र यद्यदा समुद्रमति अतिक्रम्यप्रपर्षि प्रतीर्णोभवसि तदा समुद्रपारेतिष्ठन्तौ तुर्वशंयदुंच पारय पारयः समुद्रमतारयः ॥ १२ ॥

अथत्रयोदशी–

तवत्यदिन्द्रविश्वंमाजौसस्तोधुनीचुमुरीयाहसिष्वप् ।
दीदयदित्तुभ्यंसोमेभिःसुन्वन्दभीतिरिध्मभृतिःपक्थ्य१र्कैः॥१३॥१०॥

तवं । ह । त्यत् । इन्द्र । विश्वंम् । आजौ । सस्तः ।
धुनी चुमुरीइति । या । ह । सिस्वंप् । दीदयंत् । इत् । तुभ्यम् ।
सोमेभिः । सुन्वन् । दभीतिः । इध्मऽभृतिः । पक्थी । अर्कैः ॥१३॥१०॥

हेइन्द्र आजौ संग्रामे तवह तवैव विश्वं व्याप्तं त्यत्तादृशंकर्म भवति कीदृशमिति तदुच्यते या यौ धुनीचुमुरी धुनिश्चचुमुरिश्चेत्येतन्नामकावसुरौ सिष्वप् अस्वापयः तावसुरौ सस्तः संग्रामेसुप्तवन्तौ मृतावित्यर्थः भूतार्थेव्यत्ययेनलट् द्वितीयोहशब्दःपादपूरणः तदनन्तरं हेइन्द्र तुभ्यंत्वदर्थंसुन्वन् सोमानभिषुण्वन् पक्थी पक्थवान् हवींषिपक्ववान् इध्मभृतिः इध्मानांभर्ता हर्तावा दभीतिर्नामराजर्षिः सोमेभिः सोमैःअर्कैर्हविर्लक्षणैरन्नैः दीदयदित् दीप्यतएव धुनिं चुमुरिं तस्मै जंघथेत्यर्थः त्वंनिदस्युंचुमुरिंधुनिंचेतिदर्शनात् ॥ १३ ॥

॥ इतिचतुर्थस्यषष्ठेदशमोवर्गः ॥ १० ॥

इमाउत्वेतिद्वादशर्चंषष्ठंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं नवमीएकादशीचवैश्वदेव्यौ तथाचानुक्रम्यते–इमाउद्वादशनवम्येकादश्यौवैश्वदेव्याविति । उपहव्यनाम्न्येकाहे इदंसूक्तं मरुत्वतीयनिविद्धानं सूत्रितंच–इमाउत्वायएकइदितिमध्यंदिनइति इन्द्राविष्णोरुत्क्रान्तिनाम्न्येकाहेपीदंमरुत्वतीयंनिविद्धानं सूत्रितंच–इमाउत्वायोनिर्नयइन्द्रेतिमध्यंदिनइति । तृतीयेछन्दोमेपिमरुत्वतीयेइदंसूक्तं सूत्रितंच–प्रमन्दिनइमाउत्वेतिमरुत्वतीयमिति ।

तत्रप्रथमा–

इमाउंत्वापुरुतमस्यकारोर्हव्यंवीरहव्याहवन्ते ।
धियोरथेष्ठामजरंनवीयोरयिर्विभूतिरीयतेवचस्या ॥ १ ॥

इमाः । ऊँ इति । त्वा । पुरुऽतमस्य । कारोः । हव्यंम् । वीर ।
हव्याः । हवन्ते । धियंः । रथेऽस्थाम् । अजरंम् । नवीयः ।
रयिः । विऽभूतिः । ईयते । वचस्या ॥ १ ॥

---

१ ऋ० सं० ५. २. २९. ।

पुरुतमस्य बहुलंकामंकांक्षतः तमुअभिकांक्षायामितिधातुः कारोः स्तोतुर्भरद्वाजस्यसं-बन्धिन्यः हव्याः स्तुत्याः प्रशस्याः इमाधियः स्तुतयः हेवीर शूरेन्द्र हव्यं त्वा त्वां हवंते ह्व-यन्ति कीदृशं रथेस्थां रथेस्थितं अजरं जरारहितं नवीयोनवीयांसं नवतरं उइतिपूरणः अपिच वचस्या स्तुत्या श्रेष्ठाविभूतिः जगतोविभवहेतुः रयिर्हविर्लक्षणंधनं ईयते त्वामभिगच्छति ॥१॥

अथद्वितीया—

तमुंस्तुषइन्द्रंयोविदानोगिर्वाहसंगीर्भिर्यज्ञवृद्धम् ।
यस्यदिवमतिमह्नापृथिव्याःपुरुमायस्यंरिरिचेमंहित्वम् ॥ २ ॥

तम् । ऊँ इति । स्तुषे । इन्द्रंम् । यः । विदानः । गिर्वाहसम् ।
गीःऽभिः । यज्ञऽवृद्धम् । यस्यं । दिवंम् । अति । मह्ना । पृथिव्याः ।
पुरुऽमायस्यं । रिरिचे । महिऽत्वम् ॥ २ ॥

यइन्द्रः विदानः सर्वविद्वान् सर्वैर्ज्ञायमानोवा गिर्वाहसं गीर्भिर्वहनीयं यज्ञवृद्धं यज्ञैः प्रवृद्धं तमु तमेवेन्द्रं स्तुषे स्तुवे पुरुमायस्य बहुप्रज्ञस्य बहुवचनस्यवा यस्येन्द्रस्य महित्वं मा-हात्म्यं दिवं दिवोद्युलोकात् पंचम्यर्थेद्वितीया पृथिव्याः भूलोकात् मह्ना महिम्ना अतिरिरिचे अतिरिच्यते तंस्तुवइतिसंबन्धः ॥ २ ॥

अथतृतीया—

सइत्तमोवयुनंततन्वत्सूर्येणवयुनंवच्चकार ।
कदातेमर्ताअमृतस्यधामेयंक्षन्तोनामिनन्तिस्वधावः ॥ ३ ॥

सः । इत् । तमंः । अवयुनम् । ततन्वत् । सूर्येण । वयुनंऽवत् ।
चकार । कदा । ते । मर्ताः । अमृतस्य । धाम । इयंक्षन्तः ।
न । मिनन्ति । स्वधाऽवः ॥ ३ ॥

सइत् सएवेन्द्रः अवयुनं अप्रज्ञानं प्रज्ञाननाशनमित्यर्थः ततन्वत् वृत्रेणविस्तीर्यमाणंतमो-न्धकारं दिविसूर्येण दिव्यारोपितेनदेवेन वयुनवत् प्रकाशवत् चकार कृतवान् परोक्षेःप्रत्यक्ष-कृतः हेस्वधावः बलवन्निन्द्र मर्ताः मनुष्याः अमृतस्य नित्यस्य तेत्वदीयंधामस्वर्गाख्यंस्थानं त-

न्नस्थानदेवानित्यर्थः इयक्षंतः यष्टुमिच्छन्तः कदा कदाचित् सर्वदेत्यर्थः नमिनन्ति किमपिप्राणिजातंनहिंसन्ति ॥ ३ ॥

अथचतुर्थी–

यस्ताचकारसकुहस्विदिन्द्रःकमाजनंचरतिकासुविक्षु ।
कस्तेयज्ञोमनसेशंवरायकोअर्कइन्द्रकतमःसहोता ॥ ४ ॥

यः । ता । चकार । सः । कुह । स्वित् । इन्द्रः । कम् । आ ।
जनम् । चरति । कासु । विक्षु । कः । ते । यज्ञः । मनसे । शम् ।
वराय । कः । अर्कः । इन्द्र । कतमः । सः । होता ॥ ४ ॥

यइन्द्रः ता तान्युक्तप्रसिद्धानि वृत्रवधादीनिकर्माणि चकार अकरोत् सइन्द्रोयकुहस्वित् क्वस्विद्वर्तते कंजनं कमपिदेशमाचरति कासु विक्षु प्रजासु वर्तते इतीन्द्रस्य विभूतिमहत्त्वान्ननिश्चेतुंशक्यं अथप्रत्यक्षस्तुतिः हेइन्द्र कः कीदृशोयज्ञः ते तव मनसे चेतसे शं सुखकरोभवति वराय तववरणाय कः कीदृशोर्कोमंत्रः समर्थोभवति होता आह्वाता तववरणाय यःसमर्थोभवति सहोता कतमश्च भवति ॥ ४ ॥

अथपंचमी–

इदाहितेवेविषतःपुराजाःप्रत्नासआसुःपुरुकृत्सखायः ।
येमध्यमासउतनूतनासउतावमस्यपुरुहूतबोधि ॥ ५ ॥ ११ ॥

इदा । हि । ते । वेविषतः । पुराऽजाः । प्रत्नासः । आसुः ।
पुरुऽकृत् । सखायः । ये । मध्यमासः । उत । नूतनासः ।
उत । अवमस्य । पुरुऽहूत । बोधि ॥ ५ ॥ ११ ॥

पुराजाः पूर्वस्मिन्कालेजाताः प्रत्नासः पुराणाः अंगिरःप्रभृतयः इदाहि इदानीमिव हिशब्दउपमार्थेवर्तते वेविषतः कर्माणिप्राप्नुवन्तः हेपुरुकृत बहूनांकर्मणांकर्तरिन्द्र ते तव सखायः स्तोतारः आसुः बभूवुः येमध्यमासोमध्यमकालजाः उतापिच येनूतनासोद्यतनाः यतस्तेपिसर्वे तेस्तोतारोबभूवुः अतःकारणात् उतापिच अवमस्यार्वाचीनस्य ममापिस्तोत्रं हेपुरुहूत बहुभिराहूतेन्द्र त्वंबोधि बुध्यस्व ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेएकादशोवर्गः ॥ ११ ॥

अथषष्ठी—

तंपृच्छन्तोवरासःपराणिप्रत्नातइन्द्रश्रुत्यानुयेमुः ।
अर्चामसिवीरब्रह्मवाहोयादेवविद्मतात्त्वामहान्तम् ॥ ६ ॥

तम् । पृच्छन्तः । अवरासः । पराणि । प्रत्ना । ते । इन्द्र । श्रुत्या ।
अनु । येमुः । अर्चामसि । वीर । ब्रह्मऽवाहः । यात् । एव ।
विद्म । तात् । त्वा । महान्तम् ॥ ६ ॥

हेवीर शूर ब्रह्मवाहः ब्रह्मभिर्मंत्रैर्वहनीयेन्द्र अवरासोर्वाचीनामनुष्याः तंउक्तगुणोपेतं त्वां पृच्छंतोर्चन्तः पृच्छतिरर्चतिकर्मा पराणि प्रकृष्टानि प्रत्ना प्रत्नानि पुराणानि श्रुत्या श्रुत्यानिश्रोतव्यानि ते त्वदीयानिकर्माणि अनुयेमुः अनुयमनंनिबन्धनंस्तुतिरूपाभिर्वाग्भिर्निबबन्धुः तथा वयमपि महान्तं प्रभूतं त्वा त्वां अर्चामसि अर्चामःस्तुमः यादेव यान्येवकर्माणि विद्मजानीमःतव तैःकर्मभिः स्तुमइतिसंबन्धः ॥ ६ ॥

अथसप्तमी—

अभित्वापाजोरक्षसोवितस्थेमहिजज्ञानमभितत्सुतिष्ठ ।
तवप्रत्नेनयुज्येनसख्यावज्रेणधृष्णोअपतानुदस्व ॥ ७ ॥

अभि । त्वा । पाजः । रक्षसः । वि । तस्थे । महि । जज्ञानम् ।
अभि । तत् । सु । तिष्ठ । तव । प्रत्नेन । युज्येन । सख्या । वज्रेण ।
धृष्णो इति । अप । ता । नुदस्व ॥ ७ ॥

रक्षसोरक्षसांसंबन्धिपाजः सेनालक्षणंबलं हेइन्द्र त्वाअभि त्वांअभिमुखं वितस्थे प्रतिष्ठते तथात्वमपि महि महत् जज्ञानं प्रादुर्भवत् तद्बलं अभि अभिमुखःसन् सु सुष्ठु तिष्ठ स्थिरोभव स्थित्वाच हेधृष्णो शत्रूणांधर्षकेन्द्र तव त्वदीयेनवज्रेण ता तद्बलं अपनुदस्व अपगतं प्रेरय छिन्धीत्यर्थः कीदृशेनप्रत्नेन पुराणेन युज्येन योज्येन सख्या नित्यसहायेन ॥ ७ ॥

अथाष्टमी—

सतुश्रुधीन्द्रनूतनस्यब्रह्मण्यतोवीरकारुधायः ।
त्वंह्या३पिःप्रदिविपितॄणांशश्वद्बभूथसुहवएष्टौ ॥ ८ ॥

सः । तु । श्रुधि । इन्द्र । नूतनस्य । ब्रह्मण्यतः । वीर । कारुऽधाय

त्वम् । हि । आपिः । प्रऽदिवि । पितॄणाम् । शश्वत् । बभूथ ।

सुऽहवः । आऽइष्टौ ॥ ८ ॥

हेकारुधायः कारूणांस्तोतॄणांधारकः हेवीरेन्द्र सः प्रसिद्धस्त्वं नूतनस्येदानींतनस्य ब्रह्मण्यतः ब्रह्मस्तोत्रंकर्तुमिच्छतोमम स्तोत्रं नु क्षिप्रं श्रुधिशृणु हियस्मात्कारणात् हेइन्द्र त्वं आइष्टौ आयजने अभिकामनेवासति सुहवः शोभनाह्वानःसन् प्रदिवि पूर्वस्मिन्काले पितॄणां अंगिरसां आपिर्बन्धुः शश्वच्चिरकालं बभूथाभूः तस्मात्कारणात् मदीयंस्तोत्रं श्रुधीतिसंबन्धः ॥ ८ ॥

अथनवमी—

प्रोतयेवरुणंमित्रमिन्द्रंमरुतःकृष्वावसेनोअद्य ।
प्रपूषणंविष्णुमग्निंपुरंधिंसवितारमोषधीःपर्वतांश्च ॥ ९ ॥

प्र । ऊतये । वरुणम् । मित्रम् । इन्द्रम् । मरुतः । कृष्व । अवसे ।

नः । अद्य । प्र । पूषणम् । विष्णुम् । अग्निम् । पुरम्ऽधिम् ।

सवितारम् । ओषधीः । पर्वतान् । च ॥ ९ ॥

अस्यामृचिविश्वेदेवाःस्तूयन्ते हेभरद्वाज अद्येदानीं वरुणं रात्र्यभिमानिनंच मित्रमहरभिमानिनंच इन्द्रंच प्रसिद्धं मरुतोमरुद्गणांश्च नोस्माकं ऊतये तर्पणाय अवसे रक्षणायच प्रकृष्वाभिमुखीकुरुष्व किंच पूषणं एतत्संज्ञकंचविष्णुं सर्वव्यापिनंदेवंच पुरंधिं पुरुधियं पुरुकर्माणं अग्निंच सवितारं सर्वस्यप्रेरकं देवं ओषधीः ओषध्यभिमानिनोदेवान् पर्वतांश्चाद्रीन् इत्येतान्देवान् अस्माकंतर्पणाय रक्षणायच प्रकृष्व स्तुत्याभिमुखीकुरु ॥ ९ ॥

अथदशमी—

इमउत्वापुरुशाकप्रयज्योजरितारोअभ्यर्चन्त्यर्कैः ।
श्रुधीहवमाहुवतोहुवानोनत्वावाँअन्योअमृतत्वदस्ति ॥ १० ॥

इमे । ॐ इति । त्वा । पुरुऽशाक । प्रयज्यो इति प्रऽयज्यो । जरितारः । अभि । अर्चन्ति । अर्कैः । श्रुधि । हवम् । आ । हुवतः । हुवानः । न । त्वाऽवान् । अन्यः । अमृत । त्वत् । अस्ति ॥ १० ॥

हेपुरुशाक बहुशके हेप्रयज्यो प्रकृष्टेनयजनीयेन्द्र त्वा त्वां इमे जरितारः स्तोतारः अर्कैरर्चनीयैःस्तोत्रैः अभ्यर्चन्ति अभिष्टुवन्ति तथा हेअमृत अमरणशीलेन्द्र हुवानः स्तूयमानस्त्वं आहुवतोभिष्टुवतोमम हवं स्तोत्रं श्रुधि शृणु किंच त्वावान् त्वत्सदृशोदेवः त्वदन्योनास्ति ॥ १० ॥

अथैकादशी—

नूमआवाचमुपयाहिविद्वान्विश्वेभिःसूनोसहसोयजत्रैः ।
येअग्निजिह्वाऋतसापआसुर्येमनुंचक्रुरुपरंदसाय ॥ ११ ॥

नु । मे । आ । वाचम् । उप । याहि । विद्वान् । विश्वेभिः । सूनो इति । सहसः । यजत्रैः । ये । अग्निऽजिह्वाः । ऋतऽसापः । आसुः । ये । मनुम् । चक्रुः । उपरम् । दसाय ॥ ११ ॥

इयंचवैश्वदेवीत्युक्तं हेसहसःसूनो बलस्यपुत्रेन्द्र विद्वान् सर्वज्ञस्त्वं यजत्रैर्यजनीयैर्विश्वेभिःसर्वैर्देवैःसह नु क्षिप्रं मे मदीयाः वाचः स्तुतिरूपाणिवचांसि उप अभिआयाहि आगच्छ एवंभूतमिन्द्रंप्रार्थयते ऐन्द्रत्वात्सूक्तस्य येदेवाः अग्निजिह्वाः अग्निर्जिह्वास्थानीयोयेषां ते ऋतसापः ऋतंयज्ञंस्पृशन्तःआसुर्भवन्ति येच देवाः दसायशत्रूणामुपक्षेपणाय मनुं राजर्षिं उपरं दस्यूनामुपरिभवं चक्रुः कृतवन्तः तैः सहागच्छेतिपूर्वेणसंबन्धः ॥ ११ ॥

अथद्वादशी—

सनोबोधिपुरएतासुगेषूतदुर्गेषुपथिकृद्विदानः ।
येअश्रमासउरवोवहिष्ठास्तेभिर्नइन्द्राभिवक्षिवाजम् ॥ १२ ॥ १२ ॥

सः । नः । बोधि । पुरःऽएता । सुऽगेषु । उत । दुःऽगेषु । पथिऽकृत् । विदानः । ये । अश्रमासः । उरवः । वहिष्ठाः । तेभिः । नः । इन्द्र । अभि । वक्षि । वाजम् ॥ १२ ॥ १२ ॥

हेइन्द्र पथिकृद्वर्त्मनांकर्ता विदानः सर्वविद्वान् सत्वं सुगेषु सुखेनगन्तव्येषु उतापिच दुर्गेषु दुःखेनगन्तव्येषुचमार्गेषु नोस्माकं पुरएता पुरोगन्ता बोधि भव बोधीतिभवतेर्लोण्मध्यमपुरुषैकवचनस्यछान्दसंरूपं अश्रमासः श्रमरहिताः उरवो महान्तः वहिष्ठाः वोढृतमाः तव येअश्वाः सन्ति हेइन्द्र तेभिः तैरश्वैः नोस्मभ्यं वाजमन्नंअभिवक्षि अभिवह ॥१२॥

॥ इतिचतुर्थस्यषष्ठेद्वादशोवर्गः ॥ १२ ॥

यएकइदित्येकादशर्चंसप्तमंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रान्तं—यएकइदेकादशेति आभिप्लविकेप्रथमेहनिदशरात्रस्यप्रथमेहनिच माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे अहीनसूक्तस्यस्थाने त्रीणिसंपातसूक्तानि तेष्विदंद्वितीयंसूक्तं सूत्रितंच—यएकइद्यस्तिग्मशृंगइति उपहव्यनाम्न्येकाहेपीदं निष्केवल्यनिविद्धानं सूत्रितंच—यएकइदिति मध्यंदिनइति ।

तत्रप्रथमा—

यएकइद्धव्यश्चर्षणीनामिन्द्रंतंगीर्भिरभ्यर्चआभिः ।
यःपत्यतेवृषभोवृष्ण्यावान्त्सत्यःसत्वापुरुमायःसहस्वान् ॥ १ ॥

यः । एकः । इत् । हव्यः । चर्षणीनाम् । इन्द्रम् । तम् । गीःऽभिः ।
अभि । अर्चे । आभिः । यः । पत्यते । वृषभः । वृष्ण्यऽवान् ।
सत्यः । सत्वा । पुरुऽमायः । सहस्वान् ॥ १ ॥

यइन्द्रश्चर्षणीनां प्रजानां आपत्सु एकइत् एकएव हव्योह्वातव्यः आभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिः तमिन्द्रं अभ्यर्चे अभिष्टौमि यइन्द्रःपत्यते स्तोतॄनभिगच्छति यद्वा पत्यतेलोकानामीष्टे कीदृशः वृषभः कामानांवर्षिता वृष्ण्यावान् बलवान् सत्यः अविसंवादी सत्वा शत्रूणां सादयिता कामानांदातावा सदेर्वासनोतेर्वेदंरूपं पुरुमायोबहुप्रज्ञः सहस्वानभिभवनवान् तमिन्द्रमभिष्टौमीतिसंबन्धः ॥ १ ॥

अथद्वितीया—

तमुनःपूर्वेपितरोनवग्वाःसप्तविप्रासोअभिवाजयन्तः ।
नक्षद्दाभंततुरिंपर्वतेष्ठामद्रोघवाचंमतिभिःशविष्ठम् ॥ २ ॥

तम् । ऊँ इति । नः । पूर्वे । पितरः । नवऽग्वाः । सप्त । विप्रासः ।
अभि । वाजयन्तः । नक्षत्ऽदाभम् । ततुरिम् । पर्वतेऽस्थाम् ।
अद्रोघऽवाचम् । मतिऽभिः । शविष्ठम् ॥ २ ॥

पूर्वेमत्ताः नवग्वाः नवभिर्मासैः सत्रमनुष्ठितवन्तः सप्तसप्तसंख्याकाः विप्रासः विप्रामेधाविनः वाजयन्तः वाजमन्नंहविर्लक्षणमिन्द्रस्यकुर्वन्तः इन्द्रंवा वाजिनंबलिनंकुर्वन्तः तत्करोतीतिणिच् एवंभूतानोस्माकं पितरोंगिरसः तमु तमेवेन्द्रं मतिभिः स्तुतिभिरभितुष्टुवुरितिशेषः कीदृशं नक्षद्दाभं नक्षतिर्गतिकर्मा अभिगच्छतां शत्रूणां दंभितारं हिंसितारं ततुरिं तरितारं पर्वतेष्ठां पर्वतेष्ववस्थितं अद्रोघवाचं अद्रोग्धव्याअनतिक्रमणीयावागाज्ञारूपायस्यतंशविष्ठं बलवत्तमं ॥ २ ॥

अथतृतीया—

तमीमहइन्द्रमस्यरायःपुरुवीरस्यनृवतःपुरुक्षोः ।
योअस्कृधोयुरजरःस्वर्वान्तमाभरहरिवोमादयध्यै ॥ ३ ॥

तम् । ईमहे । इन्द्रम् । अस्य । रायः । पुरुऽवीरस्य । नृऽवतः ।
पुरुऽक्षोः । यः । अस्कृधोयुः । अजरः । स्वःऽवान् । तम् । आ ।
भर । हरिऽवः । मादयध्यै ॥ ३ ॥

पुरुवीरस्य बहुपुत्रपौत्रयुक्तस्य नृवतः परिचारकजनसहितस्य पुरुक्षोर्बह्वन्नस्य बहुपशोर्वा अस्यरायः इदंधनं द्वितीयार्थेषष्ठी तमिन्द्रं ईमहे याचामहे योरयिः अस्कृधोयुः अविच्छिन्नः अजरोजराहानिरहितः स्ववान् सुखयुक्तः हेहरिवः हरिवन् स्वकीयाश्वोपेतेन्द्र त्वं तं रयिं मादयध्यै अस्मान्मादयितुं आभराहर ॥ ३ ॥

अथचतुर्थी—

तन्नोविवोचोयदितेपुराचिज्जरितारआनशुःसुम्नमिन्द्र ।
कस्तेभागःकिंवयोदुध्रखिद्वःपुरुहूतपुरूवसोसुरघ्नः ॥४ ॥

तत् । नः । वि । वोचः । यदि । ते । पुरा । चित् । जरितारः ।
आनशुः । सुम्नम् । इन्द्र । कः । ते । भागः । किम् । वयः ।
दुध्र । खिद्वः । पुरुऽहूत । पुरुवसो इति पुरुऽवसो । असुरऽघ्नः ॥४॥

हेइन्द्र यदि यत् ते तव पुराचित् पूर्वस्मिन्काले जरितारः स्तोतारः सुम्नं सुखंआनशुः प्रापुः तत् तत्सुखं नोस्माकं विवोचः विब्रूहि हेदुध्र दुर्धर हेखिद्वःशत्रूणांखेदयितः हेपुरुहूत हे- पुरुवसोइन्द्र असुरघ्न असुराणांहन्तुस्तेतवयज्ञेषु कोभागःकृप्तः वयः हविर्लक्षणमन्नंकिंकृप्तं य- दि केचिच्चिरंतनाः पूर्वकालेपि त्वत्तःसकाशात् सुखं लेभिरे तर्हहमपि तत्सुखंलप्स्यइतिविचा- र्यसुखप्राप्तिविलंबोममासोढव्योभवेदित्यर्थः ॥ ४ ॥

अथपञ्चमी—

तंपृच्छन्तीवज्रंहस्तंरथेष्ठामिन्द्रंवेपीवक्करीयस्यनूगीः ।
तुविग्राभंतुविकूर्मिरंभोदांगातुमिषेनक्षतेतुम्रमच्छ ॥ ५ ॥ १३ ॥

तम् । पृच्छन्ती । वज्रंऽहस्तम् । रथेऽस्थाम् । इन्द्रम् । वेपी । वक्करी । यस्य । नु । गीः । तुविऽग्राभम् । तुविऽकूर्मिम् । रभःऽदाम् । गातुम् । इषे । नक्षते । तुम्रम् । अच्छ ॥ ५ ॥ १३ ॥

पूर्वयोपालब्धइन्द्र ऋषये कामान्प्रायच्छत् ततःसकामपूर्णऋषिराह वज्रहस्तं वज्रपाणिं रथेष्ठां रथेस्थितं तमिन्द्रं पृच्छन्ती अर्चयन्ती पृच्छतिरर्चतिकर्मा वेपी वेपोयागादिलक्षणंकर्म तद्वती वक्करीगुणानांवक्त्रीगीः ईदृशीस्तुतिर्यस्ययजमानस्यभवति कीदृशमिन्द्रं पृच्छन्ती तुवि- ग्राभं तुवीनांबहूनांग्रहीतारं तुविकूर्मिं बहुकर्माणं रभोदां रभसोबलस्यदातारं नुइतिपूरणः स- यजमानः गातुं सुखं इषेगच्छति किंच तुम्रं ग्लापयितारं शत्रुं अच्छाभिमुखं नक्षते गच्छति॥५॥

॥ इतिचतुर्थस्यषष्ठेत्रयोदशोवर्गः ॥ १३ ॥

अथषष्ठी—

अयाह्त्यंमाययावावृधानंमनोजुवास्वतवःपर्वतेन ।
अच्युताचिद्वीळितास्वोजोरुजोविदृळ्हाधृषताविरप्शिन् ॥ ६ ॥

अया । ह । त्यम् । मायया । वृधानम् । मनःऽजुवा । स्वऽतवः । पर्वतेन । अच्युता । चित् । वीळिता । सुऽओजः । रुजः । वि । दृळ्हा । धृषता । विऽरप्शिन् ॥ ६ ॥

हेस्वतवसः स्वभूतबलेन्द्र त्वंमनोजुवा मनोवद्गच्छता अया अनेनपर्वतेन बहुपर्वणा स्वकीयेनायुधेन वज्रेणशतपर्वणेतिदर्शनात् माययावव्रुधानं वर्धमानं त्यं तं प्रसिद्धं वृत्रं व्यरुजः विशेषेणभांक्षीः तथा हे स्वोजः शोभनतेजः हेविरप्शिन् हेमहन् इन्द्र त्वं अच्युता अच्युतानि चिद्धि नाशरहितान्यपि वीळिता वीळितानि अशिथिलीकृतानि दृळ्हा दृढानि पुराणि धृषता धर्षकेणवज्रेण व्यरुजोभग्नवानसि ॥ ६ ॥

-अथसप्तमी-

तंवोधियानव्यंस्याशविष्ठंप्रत्नंप्रत्नवत्परितंसयध्यै ।
सनोवक्षदनिमानःसुवह्मेन्द्रोविश्वान्यतिदुर्गहाणि ॥ ७ ॥

तम् । वः । धिया । नव्यंस्या । शविष्ठम् । प्रत्नम् । प्रत्नऽवत् । परिऽतंसयध्यै । सः । नः । वक्षत् । अनिऽमानः । सुऽवह्मा । इन्द्रः । विश्वानि । अति । दुःऽगहानि ॥ ७ ॥

नव्यस्या नवतरया धिया स्तुत्या शविष्ठं बलवत्तमं प्रत्नं पुराणं हेइन्द्र तंवस्त्वां प्रत्नवत् चिरंतनाऋषयइव परितंसयध्यै परितोविस्तारयितुं अहंप्रवृत्तोस्मीतिशेषः अनिमानः अपरिमाणः सुवह्मा शोभनवहनः सइन्द्रः विश्वानि समस्तानि दुर्गहाणि दुर्गाणि नोस्मभ्यं अतिवक्षदतिवहतु ॥ ७ ॥

अथाष्टमी-

आजनायद्रुह्वणेपार्थिवानिदिव्यानिदीपयोन्तरिक्षा ।
तपावृषन्विश्वतःशोचिषातान्ब्रह्मद्विषेशोचयक्षामपश्च ॥ ८ ॥

आ । जनाय । द्रुह्वणे । पार्थिवानि । दिव्यानि । दीपयः । अन्तरिक्षा । तप । वृषन् । विश्वतः । शोचिषा । तान् । ब्रह्मऽद्विषे । शोचय । क्षाम् । अपः । च ॥ ८ ॥

हेइन्द्र त्वं द्रुह्वणे साधुजनानांद्रोग्धुर्जनायजनस्यराक्षसादेः षष्ठयर्थेचतुर्थी पार्थिवानि पृथिव्यांभवानि दिव्यानि दिविभवानि अन्तरिक्षा अन्तरिक्षेभवानि च स्थानानि आदीपयः

१ ऋ० सं० १.५.३०. ।

आसमंतात्तापय हेवृषन् कामानांवर्षितरिन्द्र त्वं विश्वतः सर्वतोविद्यमानान् तान् राक्षसादीन् शोचिषा त्वदीययादीप्त्या तप दह किंच ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे राक्षसादये ब्रह्मद्विषंदग्धुमित्यर्थः क्षां पृथिवीं अपश्चान्तरिक्षं शोचय दीपय आपइत्यन्तरिक्षनामैतत् ॥ ८ ॥

अथनवमी—

भुवोजनस्यदिव्यस्यराजापार्थिवस्यजगतस्त्वेषसंदृक् ।
धिष्ववज्रन्दक्षिणइन्द्रहस्तेविश्वाअजुर्यदयसेविमायाः ॥ ९ ॥

भुवः । जनस्य । दिव्यस्य । राजा । पार्थिवस्य । जगतः ।
त्वेषऽसंदृक् । धिष्व । वज्रम् । दक्षिणे । इन्द्र । हस्ते । विश्वाः ।
अजुर्य । दयसे । वि । मायाः ॥ ९ ॥

हेत्वेषसंदृक् दीप्तदर्शनेन्द्र दिव्यस्य दिविभवस्य जनस्य राजा ईश्वरोभुवोभवसि जगतोजंगमस्य पार्थिवस्यच राजा भवसि दक्षिणे हस्ते वज्रं धिष्व निधेहि तेनवज्रेण विश्वाः सर्वाआसुरीर्मायाः विदयसे विबाधसे दयदानगतिहिंसारक्षणेष्विति धातुः हेइन्द्र अजुर्य जरयितुमशक्येन्द्र त्वमिति ॥ ९ ॥

अथदशमी—

आसंयतमिन्द्रणःस्वस्तिंशत्रुतूर्यायबृहतीममृध्राम् ।
ययादासान्यार्याणिवृत्राकरोवज्रिन्त्सुतुकानाहुषाणि ॥ १० ॥

आ । सम्ऽयतम् । इन्द्र । नः । स्वस्तिम् । शत्रुऽतूर्याय ।
बृहतीम् । अमृध्राम् । यया । दासानि । आर्याणि । वृत्रा ।
करः । वज्रिन् । सुऽतुका । नाहुषाणि ॥ १० ॥

हेइन्द्र शत्रुतूर्याय शत्रूणांतारणाय बृहतीं महतीं अमृध्रां अहिंसितां संयतं संयतीं संगच्छमानां स्वस्तिं क्षेमलक्षणां संपदं हेइन्द्र नोस्मभ्यमाभर हेवज्रिन् वज्रवन्निंद्र ययास्वस्त्या दासानि कर्महीनानिमनुष्यजातानि आर्याणि कर्मयुक्तानि करः अकरोः नाहुषाणि मनुष्यसंबन्धीनि नहुषाइतिमनुष्यनामैतत् वृत्रा वृत्राणि शत्रून् सुतुका सुतुकानि शोभनहिंसोपेतान्यकरोः ॥ १० ॥

अथैकादशी–

सनोंनियुद्भिःपुरुहूतवेधोविश्ववाराभिरागहिप्रयज्यो ।
नयाअदेवोवरतेनदेवआभिर्याहितूयमामद्र्यद्रिक् ॥ ११ ॥१४॥

सः । नः । नियुत्ऽभिः । पुरुऽहूत । वेधः । विश्वऽवाराभिः ।
आ । गहि । प्रयज्यो इति प्रऽयज्यो । न । याः । अदेवः । वरते ।
न । देवः । आ । आभिः । याहि । तूयम् । आ । मद्र्यद्रिक् ॥११॥१४॥

हेपुरुहूत हेवेधोविधातः हेप्रयज्यो प्रकृष्टेनयजनीयेन्द्र सत्वं विश्ववाराभिः विश्वैर्वरणीयाभिः संभजनीयाभिः नियुद्भिरश्वैर्नोस्मानागह्यागच्छ अदेवोसुरः यानियुतःयानश्वान्नवरते नवारयति देवश्च नवरते आभिर्नियुद्भिः तूयमाक्षिप्रमेव मद्र्यद्रिक् मदभिमुखःसन् आयाह्यागच्छ अद्र्यागमस्यद्विर्वचनंछान्दसं ॥ ११ ॥

॥ इतिचतुर्थस्यषष्ठेचतुर्दशोवर्गः॥ १४ ॥

सुतइदितिदशर्चमष्टमंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं सुतइद्दशेत्यनुक्रान्तं विषुवतिनिष्केवल्येइदंसूक्तं सूत्रितंच–सुतइत्त्वमेषप्रपूर्वीरिति । महाव्रतेपिनिष्केवल्येइदमादीनित्रीणिसूक्तानि तथैवपंचमारण्यकेसूत्रितं–सुतइत्त्वंनिमिश्लइन्द्रसोमइतित्रीणीति ।

तत्रप्रथमा–

सुतइत्त्वंनिमिश्लइन्द्रसोमेस्तोमेब्रह्मणिशस्यमानउक्थे ।
यद्वायुक्ताभ्यांमघवन्हरिभ्यांबिभ्रद्वज्रंबाह्वोरिन्द्रयासि ॥ १ ॥

सुते । इत् । त्वम् । निऽमिश्लः । इन्द्र । सोमे । स्तोमे । ब्रह्मणि ।
शस्यमाने । उक्थे । यत् । वा । युक्ताभ्याम् । मघऽवन् ।
हरिऽभ्याम् । बिभ्रत् । वज्रम् । बाह्वोः । इन्द्र । यासि ॥ १ ॥

सोमेसुतेइव अभिषुतएव सति ब्रह्मणि बृहति महति स्तोमे स्तोत्रे उच्चार्यमाणेसति उक्थेशस्त्रे शस्यमानेसति हेइन्द्र त्वं निमिश्लः निमिश्लःसन् हरी संयोजयन् हेमघवन् धनवन्निन्द्र त्वं बाह्वोर्हस्तयोर्वज्रंस्वकीयमायुधं बिभ्रत धारयन् युक्ताभ्यां रथेनियुक्ताभ्यां हरिभ्यामश्वाभ्यां यासि यद्वा आगच्छसीति यच्च तत्सोमेभिषुतइतिसंबन्धः ॥ १ ॥

अथद्वितीया—

यद्वादिविपार्येसुष्विमिन्द्रवृत्रहत्येवसिशूरसातौ।
यद्वादक्षस्यबिभ्युषोअबिभ्यदरन्धयःशर्धतइन्द्रदस्यून् ॥ २ ॥

यत्। वा। दिवि। पार्ये। सुस्विम्। इन्द्र। वृत्रऽहत्ये। अवसि।
शूरऽसातौ। यत्। वा। दक्षस्य। बिभ्युषः। अबिभ्यत्। अरन्धयः।
शर्धतः। इन्द्र। दस्यून् ॥ २ ॥

हेइन्द्र त्वं दिवि द्युलोके शूरसातौ शूरैर्भटैःसंभजनीये वृत्रहत्ये युद्धेच पार्ये प्राप्तव्ये सति सुष्विमभिषोतारं यजमानं अवसि यद्वा रक्षसीति यच्चवेतिसमुच्चये दक्षस्य यज्ञादिषुसमर्थस्य बिभ्युषः शत्रुभ्योबिभ्यतोजनस्य शर्धतः संग्रामेउत्सहमानान् दस्यूनुपक्षपयितॄनशत्रून् हेइन्द्र त्वं अबिभ्यद्भीतिरहितःसन् अरन्धयः यद्वा वशीकरोषीति यच्चतत्सर्वं सोमेभिषुतइतिपूर्वेणसंबन्धः तथाचोक्तं यद्वाह्वोधारयन्वज्रंहरिभ्यांयासिवृत्रहन्॥ यच्चरक्षतिसंग्रामेनूनंसोममभिषुण्वतः॥ यच्चकर्मसुदक्षस्ययजमानस्यापारयः ॥ वशीकरोषितांतस्मैबिभ्यतेभीतिवर्जितः ॥ तत्सोमेभिषुतेस्तोत्रशस्त्रयोश्चप्रवृत्तयोः॥ इतिद्व्चोयमेकार्थःसुतइत्त्वमितिद्वयंइति ॥ २ ॥

अथतृतीया—

पातासुतमिन्द्रोअस्तुसोमंप्रणेनीरुग्रोजरितारमूती।
कर्तावीरायसुष्वयउलोकंदातावसुस्तुवतेकीरयेचित् ॥ ३ ॥

पाता। सुतम्। इन्द्रः। अस्तु। सोमम्। प्रऽनेनीः। उग्रः।
जरितारम्। ऊती। कर्ता। वीराय। सुस्वये। ऊँ इति।
लोकम्। दाता। वसु। स्तुवते। कीरये। चित् ॥ ३ ॥

इन्द्रः सुतमभिषुतंसोमं पातास्तु पानशीलोभवतु तृन्नन्तत्वान्नलोकाव्ययनिष्ठेतिषष्ठीप्रतिषेधार्थः कीदृशः ऊती ऊत्यामार्गेण जरितारं स्तोतारं प्रणेनीः प्रकर्षेणनेता उग्रः उद्गूर्णः वीराय यज्ञादिकर्मसुदक्षाय सुस्वये सोमाभिषवंकुर्वतेयजमानाय लोकं स्थानं कर्तादातेत्यर्थः उइतिपादपूरणः स्तुवेत स्तोत्रंकुर्वते कीरयेचित् चिदितिचार्थेस्तोत्रेच कीरिरितिस्तोतृनामैतत् वसु धनंदातास्तु ॥ ३ ॥

अथचतुर्थी—

गन्तेयान्तिसवनाहरिभ्यांबभ्रिर्वज्रंपपिःसोमंददिर्गाः।
कर्तावीरंनर्यंसर्ववीरंश्रोताहवंगृणतःस्तोमवाहाः॥ ४॥

गन्ता। इयन्ति। सवना। हरिऽभ्याम्। बभ्रिः। वज्रम्। पपिः।
सोमम्। ददिः। गाः। कर्ता। वीरम्। नर्यम्। सर्वऽवीरम्।
श्रोता। हवम्। गृणतः। स्तोमऽवाहाः॥ ४॥

इन्द्रः हरिभ्यां स्वकीयाभ्यां इयन्ति हृदयस्थानानि त्रीणि सवना सवनानि गन्ता गमनशीलोभवतु कीदृशः वज्रं स्वकीयमायुधं बभ्रिर्भर्ता धारकः सोमममिषुतं पपिः पाता गाः ददिर्दाता नर्यं मनुष्यहितं सर्ववीरं बहुपुत्रोपेतं वीरं पुत्रं कर्ता यजमानाय दाता गृणतः स्तुवतः स्तोतुः संबन्धि हवं स्तोत्रं श्रोताश्रावकः स्तोमवाहाः स्तोमैः स्तोत्रैर्वहनीयः॥ ४॥

अथपंचमी—

अस्मैवयंयद्वावानतद्विविष्मइन्द्राययोनःप्रदिवोअपस्कः।
सुतेसोमेस्तुमसिशंसदुक्थेन्द्रायब्रह्मवर्धनंयथासत्॥ ५॥ १५॥

अस्मै। वयम्। यत्। ववान। तत्। विविष्मः। इन्द्राय।
यः। नः। प्रऽदिवः। अपः। करिति कः। सुते। सोमे। स्तुमसि।
शंसत्। उक्था। इन्द्राय। ब्रह्म। वर्धनम्। यथा। असत्॥५॥१५॥

प्रदिवः पुराणोयइन्द्रः नोस्मदर्थं अपः पोषणादिकंकर्म कः करोति अयमिन्द्रः यत्स्तोत्रादिकं ववान कामयते अस्माइन्द्राय वयं तद्विविष्मः व्यामुमः कुर्मइत्यर्थः सोमेसुतेभिषुते सति स्तुमसि स्तुमः इन्द्रायस्तोत्राणिकुर्मः उक्था उक्थानि शस्त्राणि शंसत् शंसंतः प्रथमाबहुवचनस्यलुक् ब्रह्म हविर्लक्षणमन्नं इन्द्रायेन्द्रार्थंवर्धनंयथावृद्धिकरं असत् स्यात् तथाकुर्मइत्यर्थः॥ ५॥

॥ इतिचतुर्थस्यषष्ठेपंचदशोवर्गः॥ १५॥

अथषष्ठी–

ब्रह्माणिहिचकृषेवर्धनानितावत्तइन्द्रमतिभिर्विविष्मः ।
सुतेसोमेसुतपाःशंतमानिरान्द्र्याक्रियास्मवक्षणानियज्ञैः ॥ ६ ॥

ब्रह्माणि । हि । चकृषे । वर्धनानि । तावत् । ते । इन्द्र ।
मतिऽभिः । विविष्मः । सुते । सोमे । सुतऽपाः । शम्ऽतमानि ।
रान्द्र्या । क्रियास्म । वक्षणानि । यज्ञैः ॥ ६ ॥

हेइन्द्र त्वं हियस्मात्कारणात् ब्रह्माणि स्तोत्राणि वर्धनानि स्वयमेववृद्धिकराणि चकृषे कृतवानसि तस्मात्कारणात् तावत् तावन्ति तादृशानि स्तोत्राणि ते तुभ्यं मतिभिर्बुद्धिभिः वयं विविष्मः व्याप्नुमः वर्धनानि स्तोत्राणि मम यथा भवेयुः त्वं तादृशानि कल्पितवानसीत्यर्थः अपिच हेसुतपाः अभिषुतसोमस्यपातः त्वामुद्दिश्य सुतेसोमेअभिषुतेसति शंतमानि सुखकृत्तमानि रान्द्र्या रान्द्र्याणि रमणीयानि यज्ञैर्हविर्भिर्युक्तानि वक्षणानि वाहकानि स्तोत्राणि क्रियास्म करवाम ॥ ६ ॥

अथसप्तमी–

सनोबोधिपुरोळाशंरराणःपिबातुसोमंगोऋजीकमिन्द्र ।
एदंबर्हिर्यजमानस्यसीदोरुंकृधित्वायतउलोकम् ॥ ७ ॥

सः । नः । बोधि । पुरोळाशम् । रराणः । पिब । तु । सोमम् ।
गोऽऋजीकम् । इन्द्र । आ । इदम् । बर्हिः । यजमानस्य ।
सीद । उरुम् । कृधि । त्वाऽयतः । उँ इति । लोकम् ॥ ७ ॥

हेइन्द्र रराणोरममाणः सत्वं नोस्मदीयं पुरोडाशं एतल्लक्षणंहविर्बोधि बुध्यस्व किंच गोऋजीकं गोविकारदध्यादिभिःसंस्कृतं अभिषुतंसोमंनुक्षिप्रं पिब पिबेः तदर्थंच यजमानस्य संबन्धीदं बर्हिरासीदाभिविश तदनंतरं त्वायतस्त्वामिच्छन्तोयजमानस्य लोकं स्थानं उरु विस्तीर्णं कृधि कुरु उइतिपूरणः ॥ ७ ॥

अथाष्टमी–

समन्दस्वाह्यनुजोषमुग्रप्रत्वायज्ञासइमेअश्नुवन्तु ।
प्रेमेहवासःपुरुहूतमस्मेआत्वेयंधीरवसइन्द्रयम्याः ॥ ८ ॥

सः । मन्दस्व । हि । अनु । जोषम् । उग्र । प्र । त्वा । यज्ञासः ॥
इमे । अश्नुवन्तु । प्र । इमे । हवासः । पुरुऽहूतम् । अस्मे इति ।
आ । त्वा । इयम् । धीः । अवसे । इन्द्र । यम्याः ॥ ८ ॥

हेउग्र उद्गूर्णबलेन्द्र सत्वं अनुजोषं कामानुगुणं यथाभवतितथा मन्दस्व मोदस्व हिश-ब्दःपादपूरणः हियोगेमन्दस्वेत्याख्यातस्यव्यत्ययात्सर्वानुदात्तत्वं इमेयज्ञासोयज्ञाः सोमाः त्वा त्वां प्राश्नुवन्तु प्राप्नुवन्तु हेपुरुहूत बहुभिराहूतेन्द्र त्वां अस्मे अस्मदीयानि इमे हवासोहवाःस्तोत्राणि प्राप्नुवन्तु इयंधीः स्तुतिः त्वां अवसे अस्माकं रक्षणाय आयम्याः आयच्छतु नियच्छतु ॥८॥

अथनवमी—

तंवःसखायःसंयथासुतेषुसोमेभिरींपृणताभोजमिन्द्रम् ।
कुवित्तस्माअसतिनोभरायनसुष्विमिन्द्रोवसेमृधाति ॥ ९ ॥
तम् । वः । सखायः । सम् । यथा । सुतेषु । सोमेभिः । ईम् ।
पृणत । भोजम् । इन्द्रम् । कुवित् । तस्मै । असति । नः ।
भराय । न । सुस्विम् । इन्द्रः । अवसे । मृधाति ॥ ९ ॥

हेसखायः स्तोतारोवोयूयं सोमेषु सुतेषु अभिषुतेषुसत्सु भोजं दातारं तमीं एतमिन्द्रं सोमेभिः सोमैः यथाकामं संपृणत संपूरयत तस्माइन्द्राय कुविद्बहूपकरणं कुविदितिबहुनामै-तत् असति अस्तु किमर्थं नोस्माकं भराय भरणाय पोषणाय इन्द्रः सुष्विमभिषवणशीलं यज-मानं अवसे तर्पणाय नमृधाति नबाधते ॥ ९ ॥

अथदशमी—

एवेदिन्द्रःसुतेअस्ताविसोमेभरद्वाजेषुक्षयदिन्मघोनः ।
असद्यथाजरित्रउतसूरिरिन्द्रोरायोविश्ववारस्यदाता ॥१०॥१६॥
एव । इत् । इन्द्रः । सुते । अस्तावि । सोमे । भरत्ऽवाजेषु ।
क्षयत् । इत् । मघोनः । असत् । यथा । जरित्रे । उत । सूरिः ।
इन्द्रः । रायः । विश्वऽवारस्य । दाता ॥ १० ॥ १६ ॥

मघोनोधनवतोहविष्मतोयजमानस्य क्षयत् ईश्वरः इन्द्रः सोमेसुते अभिषुतेसति भरद्वाजेषु भरद्वाजेमयि एव एवं अस्तावि स्तुतोभूत् इन्द्रः जरित्रे स्तोत्रे सूरिः सन्मार्गे प्रेरकोयथासत् भवत् उतापिच विश्ववारस्य विश्वैर्वरणीयस्य रायोधनस्य दाता यथाभवेत् तथा स्तावीतिसंबन्धः इदितिद्वयंपूरणम् ॥१०॥

॥ इतिचतुर्थस्यषष्ठेषोडशोवर्गः ॥ १६ ॥

॥ इतिषष्ठेमंडलेद्वितीयोनुवाकः ॥ २ ॥

तृतीयेनुवाकेविंशतिसूक्तानि तत्रवृषामदइतिदशर्चंप्रथमंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं वृषेत्यनुक्रान्तं विषुवतिनिष्केवल्येएतत्सूक्तं सूत्रितंच—वृषामदःप्रमंहिष्ठायेति ।

तत्रप्रथमा—

वृषामदइन्द्रेश्लोकउक्थासचासोमेषुसुतपाऋजीषी ।
अर्चत्र्योमघवानृभ्यउक्थैर्द्युक्षोराजागिरामक्षितोतिः ॥ १ ॥

वृषा । मदः । इन्द्रे । श्लोकः । उक्था । सचा । सोमेषु । सुतऽपाः । ऋजीषी । अर्चत्र्यः । मघऽवा । नृऽभ्यः । उक्थैः । द्युक्षः । राजा । गिराम् । अक्षितऽऊतिः ॥ १ ॥

सोमेषु सोमवत्सुयागेषु इन्द्रे सोमपानजनितोमदः वृषा भजमानस्यकामानां वर्षकोभवति यद्वा सर्वजनाह्लादकस्य वर्षणस्य कर्ता भवति उक्था उक्थेनशस्त्रेण सचा सह श्लोकस्तोत्ररूपः शब्दोवृषाभवति सुतपाः अभिषुतस्य सोमस्य पाता ऋजीषी ऋजीषं गतरसमपि सोमं नपरित्यजन् मघवा धनवान् सचेन्द्रोनृभ्यःस्तुतोनांनेतृभ्यः उक्थैः स्तोत्रैः अर्चत्र्योर्चनीयोभवति द्युक्षोद्युलोकनिवासः गिरां स्तुतीनां राजेश्वरइन्द्रः अक्षितोतिरक्षिणरक्षश्चभवति ॥ १ ॥

अथद्वितीया—

ततुरिर्वीरोनर्योविचेताःश्रोताहवंगृणतउर्व्यूतिः ।
वसुःशंसोनरांकारुधायावाजीस्तुतोविदथेदातिवाजम् ॥ २ ॥

ततुरिः । वीरः । नर्यः । विऽचेताः । श्रोता । हवम् । गृणतः ।
उर्विऽऊतिः । वसुः । शंसः । नराम् । कारुऽधायाः । वाजी ।
स्तुतः । विदथे । दाति । वाजम् ॥ २ ॥

वाजी अन्नवानिन्द्रः विदथे यज्ञे अस्माभिःस्तुतःसन् वाजमन्नंदाति अस्मभ्यंददाति कीदृशइन्द्रः ततुरिः शत्रूणांहिंसकः वीरोविक्रान्तः नर्योनरहितः विचेताः विविक्तज्ञानः हवमस्मदीयंस्तोत्रं श्रोता गृणतः स्तुवतः स्तोतृजनस्य उर्व्यूतिः विस्तृतरक्षः वसुर्वासयिता नरां नृणां स्तोतृजनानां शंसः शंसनीयः कारुधायाः कारूणांस्तोतॄणांधारयिता एवंभूतइन्द्रो-वाजंददातीतिसंबन्धः ॥ २ ॥

अथतृतीया—

अक्षोनचक्र्योःशूरबृहन्प्रतेमह्नारिरिचेरोदस्योः ।
वृक्षस्यनुतेपुरुहूतवयाव्यू३तयोरुरुहुरिन्द्रपूर्वीः ॥ ३ ॥

अक्षः । न । चक्र्योः । शूर । बृहन् । प्र । ते । मह्ना । रिरिचे ।
रोदस्योः । वृक्षस्य । नु । ते । पुरुऽहूत । वयाः । वि । ऊतयः ।
रुरुहुः । इन्द्र । पूर्वीः ॥ ३ ॥

हेशूर विक्रान्तेन्द्र बृहन् महान् तेत्वदीयोमह्ना महिमा रोदस्योर्द्यावापृथिव्योः प्ररिरिचे अतिरिच्यते द्यावापृथिवीभ्यामित्यर्थः अत्रदृष्टान्तः—चक्र्योःचक्रयोः अक्षोन रथसंबन्धी अ-क्षोयथाचक्राभ्यांबहिर्गतः तद्वत् हेपुरुहूत बहुभिराहूतेन्द्र त्वदीयाः पूर्वीर्बह्व्यः ऊतयोरक्षाः विरुरुहुःविशेषेणरोहन्ति तत्रदृष्टान्तः—वृक्षस्यनु यथावृक्षस्य वयाः शाखाः विरोहन्तितद्वत् ॥३॥

अथचतुर्थी—

शचीवतस्तेपुरुशाकशाकागवामिवस्रुतयःसंचरणीः ।
वत्सानांनतंतयस्तइन्द्रदामन्वन्तोअदामानःसुदामन् ॥ ४ ॥

शचीऽवतः । ते । पुरुऽशाक । शाकाः । गवाम्ऽइव । स्रुतयः ।
सम्ऽचरणीः । वत्सानाम् । न । तन्तयः । ते । इन्द्र । दामन्ऽवन्तः ।
अदामानः । सुऽदामन् ॥ ४ ॥

हेपुरुशाक बहुकर्मन्निन्द्र शचीवतः प्रज्ञावतस्तेत्वदीयाः शाकाः शक्तयःकर्माणिवा सर्वत संचरन्तीतिशेषः तत्रदृष्टान्तः—गवामिव धेनूनांस्रुतयोमार्गाः यथा संचरणीः सर्वत्रसंचारिणोभवन्तितद्वत् अपिच वत्सानां न तंतयः तंतिर्नामदीर्घप्रसारितारज्जुः तत्रनियतैर्विशाखदामभिबहवोवत्साबध्यन्ते यथा तन्तयोबहुनांवत्सानांबन्धकाः हेसुदामन् शोभनदामेन्द्र तथा तेत्वदीयाः शाकाः दामन्वन्तः बंधनवन्तः बहूनांशत्रूणांबंधकाः अदामानः स्वयमन्यैरबद्धाः ॥ ४ ॥

अथपंचमी—

अन्यदद्यकर्वरमन्यदुश्वोसच्चसन्मुहुराचक्रिरिन्द्रः ।
मित्रोनोअत्रवरुणश्चपूषार्योवशस्यपर्येतास्ति ॥ ५ ॥ १७ ॥

अन्यत् । अद्य । कर्वरम् । अन्यत् । ऊँ इति । श्वः । असत् ।
च । सत् । मुहुः । आऽचक्रिः । इन्द्रः । मित्रः । नः । अत्र ।
वरुणः । च । पूषा । अर्यः । वशस्य । परिऽएता । अस्ति ॥५॥१

अयमिन्द्रः अद्यास्मिन्दिवसे अन्यत् कर्वरं कर्मनामैतत् कर्मकरोति अन्यदु अन्य उक्तविलक्षणमेवकर्म श्वः परस्मिन्दिने करोति एतदेव विव्रियते असच्च अशुभमशनिपातन दिकं सत् वर्षणादिकं शोभनंकर्मच यद्वा त्रिशिरसोविश्वरूपस्य वधादिकमसत् कर्मलोपोपद्र कारिणोवृत्रादेरसुरस्य वधादिरूपं सत्कर्मच मुहुः पुनःपुनः असाविन्द्रः आचक्रिः कर्ताभव एवं परस्परविलक्षणंकर्म स्वमहिम्ना पुनःपुनरावर्तयन् प्रतिदिवसमन्यदेव परेषामसाधारणं व करोतीत्यर्थः एवंविधइन्द्रः अत्रास्मिन्यज्ञेनोस्माकं वशस्य कामयितव्यस्यफलस्य स्वर्गादेः र्येतास्ति परिगमयिताभवतु अस्तेर्लेटिरूपं मित्रोहरभिमानीदेवः वरुणोरात्र्यभिमानी पूषा षकोदेवः अर्यः प्रेरकः सविता एतेचेन्द्रेणनियम्यमानाअस्मदीयस्यकामस्य परिगमयित सन्तु यद्वा मित्रादयोप्यत्रस्वप्राधान्येन अभिधीयन्ते मित्रादयइन्द्रः प्रत्येकं अस्मदीयस्य मस्यपर्येतास्तु तथाच बृहद्देवतायामुक्तं प्रोतयेन्यदितित्वेतेवैश्वदेव्यावृचौस्मृतेइति ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेसप्तदशोवर्गः ॥ १७ ॥

अथषष्ठी–

वित्वदापोनपर्वतस्यपृष्ठादुक्थेभिरिन्द्रानयन्तयज्ञैः।
तंत्वाभिःसुष्टुतिभिर्वाजयन्तआजिनजग्मुर्गिर्वाहोअश्वाः ॥६॥

वि। त्वत्। आपः। न। पर्वतस्य। पृष्ठात्। उक्थेभिः। इन्द्र।
अनयन्त। यज्ञैः। तम्। त्वा। आभिः। सुस्तुतिऽभिः। वाजयन्तः।
आजिम्। न। जग्मुः। गिर्वाहः। अश्वाः ॥ ६ ॥

हेइन्द्र त्वत् त्वत्सकाशात् उक्थेभिरुक्थैःशस्त्रैः यज्ञैर्हविर्भिश्च स्तोतारः कामान् आत्मनो-व्यनयन्त विविधंप्रापयन्ति तत्रदृष्टान्तः—पर्वतस्याद्रेःपृष्ठादुपरिभागात्आपोन अपः उदकानियथातद्वत् अपिचहेगिर्वाहः गीर्भिःस्तुतिरूपाभिर्वाग्भिः वहनीयेन्द्र तंप्रसिद्धं त्वा त्वां वाजयन्तो-बलिनंकुर्वन्तः यद्वा वाजमन्नमिच्छन्तः भरद्वाजाःस्तोतारः आभिः पूर्वोक्ताभिःसुष्टुतिभिःशोभना-भिःस्तुतिभिः जग्मुः प्रापुः क्षिप्रगमनेदृष्टान्तः—अश्ववाहाः आजिंन संग्रामंयथाशीघ्रंप्रापुः तद्वत् ॥ ६ ॥

अथसप्तमी–

नयंजरन्तिशरदोनमासानद्यावइन्द्रमवकर्शयन्ति।
वृद्धस्यचिद्वर्धतामस्यतनूःस्तोमेभिरुक्थैश्चशस्यमाना ॥ ७ ॥

न। यम्। जरन्ति। शरदः। न। मासाः। न। द्यावः। इन्द्रम्।
अवऽकर्शयन्ति। वृद्धस्य। चित्। वर्धताम्। अस्य। तनूः।
स्तोमेभिः। उक्थैः। च। शस्यमाना ॥ ७ ॥

शरदः संवत्सराः यमिन्द्रं नजरन्ति नजरयन्ति नापक्षीणयन्ति तथा मासाश्च नापक्षी-णयन्ति तथा द्यावोदिवसाश्चयमिन्द्रंनावकर्शयन्ति नाल्पीभावयन्ति वृद्धस्यचित् प्रवृद्धस्यापि अस्येन्द्रस्य तनूः शरीरं स्तोमेभिरस्मदीयैःस्तोत्रैःउक्थैश्चशस्त्रैश्च शस्यमाना स्तूयमाना सती वर्धतां प्रवृद्धाभवतु ॥ ७ ॥

अथाष्टमी—

नवीळवेनमंतेनस्थिरायनशर्धतेदस्युंजूतायस्तवान् ।
अज्राइन्द्रस्यगिरयश्चिदृष्वागंभीरेचिद्भवतिगाधमस्मै ॥ ८ ॥

न । वीळवे । नमंते । न । स्थिराय । न । शर्धते । दस्युऽजूताय ।
स्तवान् । अज्राः । इन्द्रस्य । गिरयः । चित् । ऋष्वाः । गंभीरे ।
चित् । भवति । गाधम् । अस्मै ॥ ८ ॥

स्तवान् अस्माभिःस्तूयमानइन्द्रः वीळवे दृढगात्राय यजमानाय ननमते नवशीभवति स्थिराय युद्धेअविचलितायच ननमते शर्धतेउत्सहमानाय दस्युजूताय कर्मवर्जितैःप्रेरिताययजमानाय नवशीभवति यद्यपि स्तोतारोबहुगुणाःसन्ति तथापीन्द्रस्तेभ्योदस्युसहितेभ्योनवशीभवतीत्यर्थः अपिचऋष्वाः महान्तः गिरयश्चित्पर्वताअपिइन्द्रस्यअज्राः असुगमनाः क्षेपणीयाभवन्ति गंभीरेचिदगाधेपिस्थाने अस्माइन्द्राय गाधमेवस्थानं विषयोभवति ॥ ८ ॥

अथनवमी—

गंभीरेणनउरुणामत्रिन्प्रेषोयन्धिसुतपावन्वाजान् ।
स्थाऊषुऊर्ध्वऊतीअरिषण्यन्नक्तोर्व्युष्टौपरितक्म्यायाम् ॥ ९ ॥

गंभीरेण । नः । उरुणा । अमत्रिन् । प्र । इषः । यन्धि ।
सुतऽपावन् । वाजान् । स्थाः । ऊँ इति । सु । ऊर्ध्वः । ऊती ।
अरिषण्यन् । अक्तोः । विऽउष्टौ । परिऽतक्म्यायाम् ॥ ९ ॥

हेअमत्रिन् अमत्रं बलं तद्वन् हेसुतपावन् सुतस्यसोमस्यपातरिन्द्र गंभीरेणकेनापिदुरवगाहेन उरुणा विस्तीर्णेन मनसा नोस्मभ्यं इषोन्नानि वाजान्बलानिच प्रयन्धि प्रयच्छ किंच अक्तोरात्रेः व्युष्टौ विवासे अह्नि परितक्म्यायां रात्रौ हेइन्द्र त्वं ऊती अस्माकंरक्षायै अरिषण्यन्नहिंसंस्त्वं ऊर्ध्वउद्युक्तः स्थाः ऊषु सुष्टुतिष्ठैव ॥ ९ ॥

अथदशमी—

सचस्वनायमवसेअभीकइतोवातमिन्द्रपाहिरिषः ।
अमाचैनमरण्येपाहिरिषोमदेमशतहिमाःसुवीराः ॥ १० ॥ १८ ॥

सचस्व । नायम् । अवसे । अभीके । इतः । वा । तम् । इन्द्र ।
पाहि । रिषः । अमा । च । एनम् । अरण्ये । पाहि । रिषः ।
मदेम । शतऽहिमाः । सुऽवीराः ॥ १० ॥ १८ ॥

हेइन्द्र त्वं नायं कर्मणांस्तुतीनांचनेतारं अभीके संग्रामे अवसेरक्षणाय सचस्व सेवस्व इतोवाअस्मात् सन्निकृष्टाच्चरिषः शत्रोः अमुतोविप्रकृष्टाच्छत्रोश्च वाशब्दः अनुक्तेनविवक्षितेनसमुच्चयार्थः हेइन्द्र तंस्तोतारं पाहि रक्ष तथा अमाच गृहेच अमेतिगृहनाम अरण्ये काननेच रिषः शत्रोः पाहि तंरक्ष तदनन्तरं सुवीराः शोभनपुत्रावयं शतहिमाः शतसंवत्सरान्मदेम हृष्याम ॥ १० ॥

॥ इतिचतुर्थस्यषष्ठेष्टादशोवर्गः ॥ १८ ॥

यातऊतिरितिनवर्चंद्वितीयंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रांतं—यातेनवेति । पृष्ठ्याभिप्लवषडहयोः द्वितीयेहनिइदंसूक्तं निष्केवल्यनिविद्धानं सूत्रितंच—यातऊतिरवमेति-मध्यंदिनइति ।

तत्रप्रथमा—

यातंऊतिरंवमायापंरमायामंध्यमेन्द्रंशुष्मिन्नस्ति ।
ताभिरूषुवृंत्रहत्येंवीर्नएभिश्चवाजैर्महान्नंउग्र ॥ १ ॥

या । ते । ऊतिः । अवमा । या । परमा । या । मध्यमा । इन्द्र ।
शुष्मिन् । अस्ति । ताभिः । ऊँ इति । सु । वृत्रऽहत्ये ।
अवीः । नः । एभिः । च । वाजैः । महान् । नः । उग्र ॥ १ ॥

हेशुष्मिन् बलवन्निन्द्र तेत्वदीया या ऊतिर्यारक्षा अवमा अधमास्ति यापरमा उत्कृष्टास्ति यामध्यमास्ति ताभिरूतिभिः वृत्रहत्ये युद्धेनोस्मान् सु अत्यन्तं अवीः पालय किंचहेउग्रउद्गूर्णेन्द्र महांस्त्वं एभिर्भोज्यसाधनैर्वाजैरन्नैश्च नोस्मान्संयोजयेतिशेषः ॥ १ ॥

अथद्वितीया—

आभिःस्पृधोमिथतीररिषण्यन्नमित्रंस्यव्यथयामन्युमिन्द्र ।
आभिर्विश्वांअभियुजोविषूचीरार्यायविशोवंतारीर्दासीः ॥ २ ॥

आभिः । स्पृधः । मिथतीः । अरिषण्यन् । अमित्रस्य । व्यथय ।
मन्युम् । इन्द्र । आभिः । विश्वाः । अभिऽयुजः । विषूचीः ।
आर्याय । विशः । अव । तारीः । दासीः ॥ २ ॥

हेइन्द्र आभिरस्मदीयाभिः स्तुतिभिः मिथतीः शत्रुसैन्यानिहिंसतीः स्पृधोस्मदीयाःसेनाः अरिषण्यन् अहिंसन् पालयन्नित्यर्थः अमित्रस्यशत्रोः मन्युं संग्रामादिषुविद्यमानंकोपंव्यथय नाशय अपिच आभिःस्तुतिभिरेव अभियुजोभियोक्त्रीःविषूचीः सर्वतोविद्यमानाः दासीः कर्मणामुपक्षपयित्रीः विश्वाः सर्वाः विशः प्रजाः आर्याय यज्ञादिकर्मकृतेयजमानाय अवतारीः विनाशय ॥ २ ॥

अथतृतीया—

इन्द्रजामयउतयेजामयोर्वाचीनासोवनुषोयुयुज्रे ।
त्वमेषांविथुराशवांसिजहिवृष्ण्यानिकृणुहीपराचः ॥ ३ ॥

इन्द्र । जामयः । उत । ये । अजामयः । अर्वाचीनासः । वनुषः ।
युयुज्रे । त्वम् । एषाम् । विथुरा । शवांसि । जहि । वृष्ण्यानि ।
कृणुहि । पराचः ॥ ३ ॥

हेइन्द्र जामयः ज्ञातिरूपाः संनिकृष्टायेशत्रवः उतापिच अजामयोदूरदेशेस्थिताः येशत्रवः अर्वाचीनासः अस्मदभिमुखाः वनुषोहिंसन्तः युयुज्रे उद्युक्ताभवन्ति एषामुभयविधानां शत्रूणां संबन्धीनि शवांसि बलानि विथुरा विथुराणिहीनानि त्वं कुर्वितिशेषः तथा वृष्ण्यानि एषांवीर्याणि जहि नाशय किंच पराचः उभयविधान्शत्रून् पराचः पराङ्मुखान् कृणुहि कुरु॥३॥

अथचतुर्थी—

शूरोवाशूरंवनतेशरीरैस्तनूरुचातरुषियत्कृण्वैते ।
तोकेवागोषुतनयेयदप्सुविक्रन्दसीउर्वरासुब्रवैते ॥ ४ ॥

शूरः । वा । शूरम् । वनते । शरीरैः । तनूऽरुचा । तरुषि । यत् ।
कृण्वैते इति । तोके । वा । गोषु । तनये । यत् । अप्ऽसु । वि ।
क्रन्दसी इति । उर्वरासु । ब्रवैते इति ॥ ४ ॥

हेइन्द्र शूरः त्वदनुगृहीतोवीरः शरीरैरंगैः शूरंवा वीरमपि वनते हन्ति वेत्ययमंपीत्यस्यार्थेवर्तते यद्वा वेत्यनेनविकल्पाभिधायकेनाशूरोवात्वदनुगृहीतःसन् शूरंवनते कदावनतइति एतदाह—तनूरुचा शरीरेण शोभमानौ परस्परविरोधिनौ तरुषे शुद्धे यद्यदा कृण्वैते संग्रामंकुर्वाते यद्यदाच तोकेवा पुत्रनिमित्तेवा गोषुनिमित्तभूतासुवा तनये पौत्रनिमित्तभूतेवा अप्सु उदकेषुनिमित्तेषुवा उर्वरासु सर्वसस्याढ्यासुभूमिषुनिमित्तासु क्रन्दसी क्रन्दमानावा क्रोशन्तौ विब्रवैते विवदेते हेइन्द्र पुत्रादिलाभजयस्त्वदनुगृहीतस्यभवतीत्यर्थः ॥ ४ ॥

अथपंचमी—

नहित्वाशूरोनतुरोनधृष्णुर्नत्वांयोधोमन्यमानोयुयोध ।
इन्द्रनकिष्ट्वाप्रत्यंस्त्येषांविश्वांजातान्यभ्यंसितानि ॥ ५ ॥ १९ ॥

नहि । त्वा । शूरः । न । तुरः । न । धृष्णुः । न । त्वा । योधः । मन्यमानः । युयोध । इन्द्र । नकिः । त्वा । प्रति । अस्ति । एषाम् । विश्वा । जातानि । अभि । असि । तानि ॥ ५ ॥ १९ ॥

हेइन्द्र त्वा त्वयासह शूरोविक्रान्तजनोनहियुयोध नयुध्यते तथातुरः अन्येषांशत्रूणांहिंसकः अतः त्वयानयुयोध धृष्णुर्धर्षकोनयुयोध मन्यमानः युद्धेक्रुध्यन् योधोभटः त्वा त्वयान युयोध हेइन्द्र एषांशूरादीनांमध्ये कश्चनत्वा तवनकिः प्रत्यस्ति प्रतिनिधिर्नास्ति विश्वा विश्वानि जातानि प्रादुर्भूतानि तानि शूरादीनि त्वं अभ्यसि अभिभवसि ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेएकोनविंशोवर्गः ॥ १९ ॥

अथषष्ठी—

सपत्यतउभयोर्नृम्णमयोर्यदीवेधसःसमिथेहवन्ते ।
वृत्रेवांमहोनृवतिक्षयेवाव्यचस्वन्तायदिवितन्तसैते ॥ ६ ॥

सः । पत्यते । उभयोः । नृम्णम् । अयोः । यदि । वेधसः । सम्ऽइथे । हवन्ते । वृत्रे । वा । महः । नृऽवति । क्षये । वा । व्यचस्वन्ता । यदि । वितन्तसैते इति ॥ ६ ॥

अयोरनयोरुभयोर्मध्ये सजनः नृम्णं धनं पत्यते ईष्टे कयोर्मध्ये कईष्टइति एतदुभयमाह यदि यस्यजनस्य यदीतिनिपातोयस्यार्थेवर्तते समिथे यज्ञेवेधसः कर्मणांविधातारऋत्विजः हवन्ते इन्द्रंस्तुवन्ति सईष्टइतिसंबन्धः महोमहतिप्रभूते वृत्रेवा निरोधेनिमित्तेवा नृवतिपरिचारकमनुष्ययुक्तेक्षयेवा गृहनिमित्तेवा व्यचस्वन्तौ यदि यदीयौजनौ तियावित्यर्थेवर्तते तितंतंसैते वियुध्येते तयोर्मध्येइतिसंबन्धःतसेरुपक्षयकर्मणोविपूर्वाद्धितंतसैतेइतिभवति यद्वाततंसइतिधातुः कंड्वादिषुपठ्यते तस्मादिदंरूपमिति ॥ ६ ॥

अथसप्तमी—

अधस्मातेचर्षणयोयदेजानिन्द्रत्रातोतभवावरूता ।
अस्माकासोयेनृतमासोअर्यइन्द्रसूरयोदधिरेपुरोनः ॥ ७ ॥

अर्ध । स्म । ते । चर्षणयः । यत् । एजान् । इन्द्र । त्राता ।
उत । भव । वरूता । अस्माकासः । ये । नृऽतमासः । अर्यः ।
इन्द्र । सूरयः । दधिरे । पुरः । नः ॥ ७ ॥

अधस्मापिच हेइन्द्र तेत्वदीयाश्चर्षणयः पुरुषाः यद्यदा एजान् एजेयुर्भीत्याकंपेयुः तदा त्वं तेषां त्राता पालकोभव उतापिच वरूता संभक्ताभव अस्माकासोस्मदीयाः नृतमासोनेतृतमाः येमनुष्याः हेइन्द्र त्वां अर्योरयः प्रापयितारइत्यर्थः तेषां त्राताभव हेइन्द्रसूरयोयेस्तोतारःनोस्मान्पुरोदधिरे पुरश्चक्रिरे तेषांच त्राताभवेति ॥ ७ ॥

साकमेधेषुमाहेन्द्र्यामिष्टौइन्द्रस्यवृत्रघ्नोयाज्या सूत्रितंच—अनुतेदायिमहइन्द्रियायविश्वकर्मन्हविषावावृधानइति । अनुक्रीनाम्येकाहेनिष्केवल्येएषैवसूक्तमुखीया सूत्रितंच—अनुतेदायिमहइन्द्रियायकथोनुतेपरिचराणिविद्वानितिद्वेइति ।

सैषासूक्तेष्टमी—

अनुतेदायिमहइन्द्रियायसत्रातेविश्वमनुवृत्रहत्ये ।
अनुक्षत्रमनुसहोयजत्रेन्द्रदेवेभिरनुतेनृषह्ये ॥ ८ ॥

अनु । ते । दायि । महे । इन्द्रियाय । सत्रा । ते । विश्वम् ।
अनु । वृत्रऽहत्ये । अनु । क्षत्रम् । अनु । सहः । यजत्र ।
इन्द्र । देवेभिः । अनु । ते । नृऽसह्ये ॥ ८ ॥

हेइन्द्र महे महते ते तुभ्यमिन्द्रियाय ऐश्वर्यार्थं अनुदायि अन्वदायि अनुदीयतेस्म वृत्रहत्ये वृत्रवधेनिमित्ते ते तुभ्यं विश्वं समस्तं सत्रा सत्यमनुदायि कैःकिमनुदीयतइतितदुभयमाह येनविश्वंबिभर्ति तत्क्षत्रं बलमनुदायि येनशत्रूनभिभवति तद्गुणविशिष्टं सहोबलमनुदायि हे यजत्र यजनीयेन्द्र ते तुभ्यं नृसह्ये युद्धे देवेभिः सर्वैःदेवैः एतत्सर्वमनुदायि ॥ ८ ॥

अथनवमी—

एवानःस्पृधःसमजासमत्स्विन्द्ररारन्धिमिथतीरदेवीः ।
विद्यामवस्तोरवसागृणन्तोभरद्वाजाउततइन्द्रनूनम् ॥ ९ ॥ २० ॥

एव । नः । स्पृधः । सम् । अज । समत्ऽसु । इन्द्र ।
ररन्धि । मिथतीः । अदेवीः । विद्याम । वस्तोः । अवसा ।
गृणन्तः । भरत्ऽवाजाः । उत । ते । इन्द्र । नूनम् ॥ ९ ॥ २० ॥

हेइन्द्र एव एवंस्तुतस्त्वं नोस्मदीयाःस्पृधः स्पर्धमानाः शत्रुसेनाः समत्सुसंग्रामेषु समज शत्रुवधार्थंप्रेरय किंच मिथतीर्हिंसतीःअदेवीरासुरीःसेनाररन्धि अस्मदर्थंवशीकुरु उतापिच हेइन्द्र तेगृणन्तः त्वां स्तुवन्तोभरद्वाजावयं अवसा अन्नेन सहवस्तोर्ग्रासस्यनिवासमित्यर्थः नूनमवश्यं विद्याम लभेमहि ॥ ९ ॥

॥ इतिचतुर्थस्यषष्ठेविंशोवर्गः ॥ २० ॥

श्रुधीनइन्द्रेत्यष्टर्चंतृतीयंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रम्यते—श्रुधीनोष्टाविति। विनियोगोलैंगिकः ।

तत्रप्रथमा—

श्रुधीनइन्द्रह्वयामसित्वामहोवाजस्यसातौवावृषाणाः ।
संयद्विशोयन्तशूरसाताउग्रंनोवःपार्येअहन्दाः ॥ १ ॥

श्रुधि । नः । इन्द्र । ह्वयामसि । त्वा । महः । वाजस्य ।
सातौ । ववृषाणाः । सम् । यत् । विशः । अयन्त । शूरऽसातौ ।
उग्रम् । नः । अवः । पार्ये । । अहन् । दाः ॥ १ ॥

हेइन्द्र ववृषाणाः सोमैस्त्वांसिंचन्तोवयंस्तोतारः महोमहतोवाजस्यान्नस्य सातौ लाभार्थं त्वा त्वां ह्वयामसि आह्वयामः हेइन्द्र त्वं नोस्माकं तदाह्वानं श्रुधि शृणु यद्यदा विशोजनाः शूरसाताशूरसातौ युद्धे समयन्त संगच्छन्ते तदा पार्ये अन्तिमे अहन्नहनि दिवसे नोस्मभ्यं उग्रमुद्गूर्णमवोरक्षणं दाः अदाः प्रयच्छ ॥ १ ॥

अथद्वितीया—

त्वांवाजीहवतेवाजिनेयोमहोवाजस्यगध्यंस्यसातौ ।
त्वांवृत्रेष्विन्द्रसत्पतिंतरुत्रंत्वांचष्टेमुष्टिहागोषुयुध्यन् ॥ २ ॥

त्वाम् । वाजी । हवते । वाजिनेयः । महः । वाजस्य । गध्यस्य ।
सातौ । त्वाम् । वृत्रेषु । इन्द्र । सत्ऽपतिम् । तरुत्रम् ।
त्वाम् । चष्टे । मुष्टिऽहा । गोषु । युध्यन् ॥ २ ॥

वाजी हविर्लक्षणान्नवान् वाजिनेयोवाजिन्याःपुत्रोभरद्वाजः हेइन्द्र त्वां गध्यस्य सर्वैः प्राप्यस्य महोमहतोवाजस्यान्नस्य सातौ लाभेनिमित्ते हवते स्तौति अपिच हेइन्द्र सत्पतिं सज्जनानांपालकं तरुत्रं दुर्जनानांतारकं त्वां वृत्रेषूपद्रवेषुनिमित्तेषु भरद्वाजोहवते मुष्टिहा मुष्टिबलेनशत्रूणांहन्ता गोषुनिमित्तभूतासु युध्यन् शत्रुभिःसहयुद्धंकुर्वन् भरद्वाजस्त्वां चष्टे पश्यति प्रतिभालयते ॥ २ ॥

अथतृतीया—

त्वंकविंचोदयोर्कसातौत्वंकुत्सायशुष्णंदाशुषेवर्क् ।
त्वंशिरोअमर्मणःपराहन्नतिथिग्वायशंस्यंकरिष्यन् ॥ ३ ॥

त्वम् । कविम् । चोदयः । अर्कऽसातौ । त्वम् । कुत्साय ।
शुष्णम् । दाशुषे । वर्क् । त्वम् । शिरः । अमर्मणः । परा ।
अहन् । अतिथिऽग्वाय । शंस्यम् । करिष्यन् ॥ ३ ॥

हेइन्द्र त्वं अर्कसातौ अन्नलाभार्थं कविं भार्गवमृषिं चोदयः अचोदयः प्रेरय किंच हे इन्द्र त्वं दाशुषे हविर्दत्तवतेकुत्साय शुष्णमसुरं वर्क् छेदितवानसि वर्गितिवृणक्तेःछेदनार्थस्य लुङिरूपं तथा त्वं अतिथिग्वाय अतिथीनामभिगंत्रे दिवोदासाय शंस्यं स्तुत्यंसुखंकरिष्यन् अमर्मणः मर्महीनमात्मानं मन्यमानस्यशंबरस्य शिरः शीर्षं पराहन्नवधीः ॥ ३ ॥

अथचतुर्थी—

त्वंरथंप्रभंरोयोधमृष्वमावोयुध्यन्तंवृषभंदशंद्युम् ।
त्वंतुग्रंवेतसवेसचाहन्त्वंतुजिंगृणन्तमिन्द्रतूतोः ॥ ४ ॥

त्वम् । रथम् । प्र । भरः । योधम् । ऋष्वम् । आवः । युध्यन्तम् ।
वृषभम् । दशऽद्युम् । त्वम् । तुग्रम् । वेतसवे । सचा । अहन् ।
त्वम् । तुजिम् । गृणन्तम् । इन्द्र । तूतोरिति तूतोः ॥ ४ ॥

हेइन्द्र त्वं वृषभसंज्ञकायराज्ञे योधं युद्धसाधनं ऋष्वं महान्तंरथं प्रभरः प्रापयः अपिच युध्यन्तं शत्रुभिःसहयुद्धंकुर्वन्तं दशद्युं दशदिवसायुध्यतोयस्यगताःतं वृषभमेतदाख्यंराजानमावःयुद्धादपीपलः किंच त्वं वेतसवे एतन्नाम्नेराज्ञे सचा सहायभूतःसन् तुग्रमसुरं हन् हतवानसि वेतसुर्नामकश्चिदसुरः अत्रतस्मादन्योसावुच्यते यद्वा वेतसवइतितृतीयार्थेचतुर्थी वेतसुनासुरेण सहितं तुग्रं हतवानसि तथाचमंत्रान्तरंश्रूयते—अहंपितेववेतसूँरभिष्टयेतुग्रंकुत्सायस्मदिभंचरन्धयमिति । हेइन्द्र त्वं गृणन्तं त्वांस्तुवन्तं तुजिमेतदाख्यंराजानं तूतोरवर्धयः ॥ ४ ॥

अथपंचमी—

त्वंतदुक्थमिन्द्रबर्हणाकःप्रयच्छतासहस्राशूरदर्षि ।
अवगिरेर्दासंशम्बरंहन्प्रावोदिवोदासंचित्राभिरूती ॥ ५ ॥ २१ ॥

त्वम् । तत् । उक्थम् । इन्द्र । बर्हणा । करिति कः । प्र । यत् ।
शता । सहस्रा । शूर । दर्षि । अव । गिरेः । दासम् । शंबरम् । हन् ।
प्र । आवः । दिवःऽदासम् । चित्राभिः । ऊती ॥ ५ ॥ २१ ॥

हेइन्द्र बर्हणा बर्हणःशत्रूणांहिंसकस्त्वं उक्थं प्रशस्यं तत्कर्म कः अकरोः किंतत्कर्मेति उच्यते हेशूरवीरेन्द्र त्वं शता शतानि सहस्रा सहस्राणिच शंबरस्यानुचरान्भटान्प्रदर्षि विदारितवानसि तथानिगमान्तरे अध्वर्यवोयःशतंशंबरस्येति ।तथा त्वं दासं यज्ञादिकर्मणामुपक्षपयितारं गिरेः पर्वतान्निर्गतंशंबरमसुरं अवहन् अवावधीः तथापिश्रूयते यःशंबरंपर्वतेषु-

---

१ ऋ० सं० ८. १. ७. ।   २ ऋ० सं० २. ६. १३. ।

क्षियन्तमिति । किंच चित्राभिर्विचित्रादिभिः ऊती ऊतिभीरक्षाभिः दिवोदासंराजानं प्रावः प्रकर्षेणपालयसिस्म ॥ ५ ॥

॥ इतिचतुर्थस्यषष्ठेएकविंशोवर्गः ॥ २१ ॥

अथषष्ठी–

त्वंश्रद्धाभिर्मन्दसानःसोमैर्दभीतयेचुमुरिमिन्द्रसिष्वप् ।
त्वंरजिंपिठीनसेदशस्यन्षष्टिंसहस्राशच्यासचाहन् ॥ ६ ॥

त्वम् । श्रद्धाभिः । मन्दसानः । सोमैः । दभीतये । चुमुरिम् ।
इन्द्र । सिस्वप् । त्वम् । रजिम् । पिठीनसे । दशस्यन् । षष्टिम् ।
सहस्रा । शच्या । सचा । अहन् ॥ ६ ॥

हेइन्द्र श्रद्धाभिः श्रद्धापुरःसरमादरातिशयेनानुष्ठितैःकर्मभिः मन्दसानोमोदमानः यच्छ्रद्धयायुक्तंकर्मतत्सारवद्भवति तथाचश्रूयते–यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यवत्तरंभवतीति । सोमैश्चमन्दसानस्त्वं दभीतये एतन्नामकायराजर्षये चुमुरिं एतदाख्यमसुरं सिष्वप् अस्वापयः अवधीरित्यर्थः किंच हेइन्द्र त्वं पिठीनसे एतन्नामकाय रजिं एतदाख्यांकन्यांवाराज्यंवा दशस्यन् प्रयच्छन् शच्या प्रज्ञया षष्टिं षष्टिसंख्याकानि सहस्रा भटानांसहस्राणि सचा सहयुगपदेवाहन्नवधीः ॥ ६ ॥

अथसप्तमी–

अहंचनतत्सूरिभिरानश्यांतवज्यायइन्द्रसुम्नमोजः ।
त्वयायत्स्तवन्तेसधवीरवीरास्त्रिवरूथेननहुषाशविष्ठ ॥ ७ ॥

अहम् । चन । तत् । सूरिऽभिः । आनश्याम् । तव । ज्यायः ।
इन्द्र । सुम्नम् । ओजः । त्वया । यत् । स्तवन्ते । सधऽवीर ।
वीराः । त्रिऽवरूथेन । नहुषा । शविष्ठ ॥ ७ ॥

---

१ ऋ० सं० २. ६. ९. । २ बृहदारण्यकोपनिषत्.

हेसधवीर वीरैःसहित शविष्ठ बलवत्तमेन्द्र वीराःस्तोतारः त्रिवरूथेन त्रीणिवरूथान्या-वरकाणिभुवनानियस्यतेन नहुषा शत्रूणांबन्धकेन त्वयादत्तं यत्सुम्नंसुखंओजोबलंच रतवन्ते स्तुवन्ति हेइन्द्र तत्र त्वयादत्तं ज्यायः अतिशयेनप्रशस्यं तत्सुम्नमोजः अहंचन अहमपिभर-द्वाजः सूरिभिर्मदीयैःस्तोतृभिःसह आनश्यां प्राप्नुयां ॥ ७ ॥

अथाष्टमी–

वयंतेअस्यामिन्द्रद्युम्नहूतौसखायःस्याममहिनप्रेष्ठाः ।
प्रातर्दनिःक्षत्रश्रीरस्तुश्रेष्ठोघनेवृत्राणांसनयेधनानाम् ॥८॥२२॥

वयम् । ते । अस्याम् । इन्द्र । द्युम्नऽहूतौ । सखायः । स्याम । महिन । प्रेष्ठाः । प्रातर्दनिः । क्षत्रऽश्रीः । अस्तु । श्रेष्ठः । घने । वृत्राणाम् । सनये । धनानाम् ॥ ८ ॥ २२ ॥

हेमहिन पूजनीयेन्द्र ते त्वदर्थं सखायःस्तोतारोवयं अस्यांद्युम्नहूतौ अस्मिन्धननिमि-त्तेस्तोत्रे प्रेष्ठाः अतिशयेनप्रियाः स्याम भवेम प्रातर्दनिः प्रतर्दनोनामराजातस्यपुत्रःक्षत्रश्रीः ए-तन्नामकोममयाज्योराजा श्रेष्ठोस्तु सर्वेषामुत्कृष्टोभवतु किमर्थं वृत्राणां शत्रूणांघनेवधायच धनानां वसूनां सनये संभजनायच श्रेष्ठोस्त्वितिसंबन्धः ॥ ८ ॥

॥ इतिचतुर्थस्यषष्ठेद्वाविंशोवर्गः ॥ २२ ॥

किमस्यमदेत्यष्टर्चंचतुर्थंसूक्तं भरद्वाजस्यार्षं अनुक्रान्तंच–किमस्यान्त्याचायमानस्या-भ्यावर्तिनोदानस्तुतिः भरद्वाजऋषिः त्रिष्टुप्छन्दः अंत्यायास्तुदानस्तुतिरूपत्वात् यातेनोच्यत-इतिन्यायेनदानमेवदेवता विनियोगोलैंगिकः ।

तत्रप्रथमा–

किमस्यमदेकिम्वस्यपीताविन्द्रःकिमस्यसख्येचकार ।
रणावायेनिषदिकिन्तेअस्यपुराविविद्रेकिमुनूतनासः ॥ १ ॥

किम् । अस्य । मदे । किम् । ऊँ इति । अस्य । पीतौ । इन्द्रः । किम् । अस्य । सख्ये । चकार । रणाः । वा । ये । निऽसदि । किम् । ते । अस्य । पुरा । विविद्रे । किम् । ऊँ इति । नूतनासः ॥१॥

भरद्वाजऋषिः फलविलंबनासहिष्णुःसन् अनयेन्द्रमाक्षिपति अस्यसोमस्य मदेसति इन्द्रः किंचकार कृतवान् किमु किंच अस्यसोमस्य पीतौ पानेसति किंचकार अस्यसोमस्य सख्ये सखित्वे किंचकार पानात्पूर्वं इन्द्रः सोमेनसहवसतीत्यर्थः अस्यसोमस्य निषदि गृहे रणावाये स्तोतारःसंति तेस्तोतारः पुरा पूर्वं हेइन्द्र ते त्वत्तः किंविविद्रे किंलेभिरे नूतनासः नूतनाइदानींतनाः स्तोतारश्च किमुलेभिरे ॥ १ ॥

अथद्वितीया—

सदस्यमदेसद्वस्यपीताविन्द्रःसदस्यसख्येचकार ।
रणावायेनिषदिसत्तेअस्यपुराविविद्रेसदुनूतनासः ॥ २ ॥

सत् । अस्य । मदे । सत् । ऊँ इति । अस्य । पीतौ । इन्द्रः ।
सत् । अस्य । सख्ये । चकार । रणाः । वा । ये । निऽसदि ।
सत् । ते । अस्य । पुरा । विविद्रे । सत् । ऊँ इति । नूतनासः ॥ २ ॥

एवमाक्षिप्तइन्द्रः तस्मै ऋषये ईप्सितं धनं प्रददौ तदनंतरमृषिः इन्द्रसकाशात् संपूर्णकामःसन् पुरा यान्युपालंभप्रतिपादकानिवाक्यान्युवोच इदानीं तानि निराकरोति इन्द्रः अस्यसोमस्य मदेसत् शुभंकर्मचकार अस्यसोमस्य पीतौ पाने सत् शुभं कर्म चकार अस्य सख्ये सत् शुभंचकार येरणावास्तोतारश्च ते निषदिगृहे यज्ञगृहइत्यर्थः पुरा पूर्वं हेइन्द्र ते त्वत्तः सत् शुभं कर्म विविद्रे लेभिरे नूतनासः इदानींतनाःस्तोतारः सदु शुभमेवकर्म लेभिरे॥२॥

अथतृतीया—

नहिनुतेमहिमनःसमस्यनमघवन्मघवत्त्वस्यविद्म ।
नराधसोराधसोनूतनस्येन्द्रनकिर्ददृशइन्द्रियंते ॥ ३ ॥

नहि । नु । ते । महिमनः । समस्य । न । मघऽवन् । मघवत्ऽत्वस्य ।
विद्म । न । राधसःऽराधसः । नूतनस्य । इन्द्र । नकिः । ददृशे ।
इन्द्रियम् । ते ॥ ३ ॥

हेमघवन्धनवन्निन्द्र ते त्वदीयस्य समस्य समस्तस्य महिमनोमहिम्नोमहिमानं नहि विद्म वयंनजानीमः नुशब्दःपूरणः तथा मघवत्त्वस्य त्वदीयस्यधनिकत्त्वस्यच वयं नजानीमः

नूतनस्य स्तुत्यस्य राधसोराधसः त्वदीयं सर्वंधनंच नजानीमः सर्वत्रद्वितीयार्थेषष्ठी हेइन्द्र ते त्वदीयं इन्द्रियंसामर्थ्यं नकिर्ददृशे केनापिनदृश्यते ॥ ३ ॥

अथचतुर्थी–

एतत्त्यत्तंइन्द्रियमचेतियेनावधीर्वरशिखस्यशेषः।
वज्रस्ययत्तेनिहतस्यशुष्मात्स्वनाच्चिदिन्द्रपरमोददार ॥ ४ ॥

एतत्। त्यत्। ते। इन्द्रियम्। अचेति। येन। अवधीः।
वरऽशिखस्य। शेषः। वज्रस्य। यत्। ते। निऽहतस्य।
शुष्मात्। स्वनात्। चित्। इन्द्र। परमः। ददार ॥ ४ ॥

हेइन्द्र येनवीर्येण वरशिखस्य वरशिखोनामकश्चिदसुरः शेषः शेषांसिपुत्रान् शेषइत्यपत्यनामैतत् अवधीरहिंसीः ते त्वदीयमेतत्त्यत् तदिदमिन्द्रियंवीर्यं अचेति अस्माभिरज्ञायि हेइन्द्र यद्यस्मात् शुष्माद्बलात् निहतस्य प्रेरितस्य त्वदीयवज्रस्य स्वनाच्चित् ध्वनेरेवपरमः वरशिखस्यपुत्राणांमध्ये बलाद्याधिक्येनोत्कृष्टःकश्चित्पुत्रः ददार अदीर्यत ॥ ४ ॥

अथपञ्चमी–

वधीदिन्द्रोवरशिखस्यशेषोभ्यावर्तिनेचायमानायशिक्षन्।
वृचीवतोयद्धरियूपीयायांहन्पूर्वेअर्धेभियसापरोदर्त् ॥ ५ ॥ २३ ॥

वधीत्। इन्द्रः। वरऽशिखस्य। शेषः। अभिऽआवर्तिने।
चायमानाय। शिक्षन्। वृचीवतः। यत्। हरिऽयूपीयायाम्।
हन्। पूर्वे। अर्धे। भियसा। अपरः। दर्त् ॥ ५ ॥ २३ ॥

पूर्वोक्तमेवार्थमनयाविवृणोति अयमिन्द्रः चायमानाय चयमानस्यराज्ञःपुत्राय अभ्यावर्तिने एतन्नामकायराज्ञे शिक्षन् ईप्सितानि वसूनि प्रयच्छन् वरशिखस्यासुरस्य शेषः पुत्रानवधीदवधीदहिंसीत् वरशिखस्यपुत्रान् कथमवधीदित्युच्यते यद्यदा अयमिन्द्रः हरियूपीयायां हरियूपीयानामकाचिन्नदी काचिन्नगरीवा तस्यां पूर्वेअर्धे प्राग्भागेस्थिताम् वृचीवतःवृचीवान्नामवरशिखस्यकुलोत्पन्नःपूर्वः तद्गोत्रजान् वरशिखस्यपुत्रान् हन्नवधीत् तदा अपरोपरभागेस्थितोवरशिखस्यश्रेष्ठःपुत्रः भियसा भीत्या दर्त् दीर्णोभूत् ॥ ५ ॥

॥ इतिचतुर्थस्यपष्ठेत्रयोविंशोवर्गः ॥ २३ ॥

अथषष्ठी—

त्रिंशच्छतंवर्मिणइन्द्रसाकंयव्यावत्यांपुरुहूतश्रवस्या ।
वृचीवन्तःशरवेपत्यमानाःपात्राभिन्दानान्यर्थान्यायन् ॥ ६ ॥

त्रिंशत्ऽशतम् । वर्मिणः । इन्द्र । साकम् । यव्याऽवत्याम् ।
पुरुऽहूत । श्रवस्या । वृचीवन्तः । शरवे । पत्यमानाः । पात्रा ।
भिन्दानाः । निऽअर्थानि । आयन् ॥ ६ ॥

इदानीमुक्तमेवार्थंविवृणोति हेपुरुहूत बहुभिराहूतेन्द्र श्रवस्या श्रवस्यया श्रवोन्नंयशोवा तद्वांछया युद्धेत्वां जित्वा अन्नंप्राप्नुयाम यशोवाप्राप्नुयामेतिकामयमानाः शरवे हिंसायैत्वां हिंसितुमित्यर्थः पत्यमानाअभिपतन्तोभिगच्छन्तः पात्रा पात्राणियज्ञसाधनानि भिन्दाना भिन्दन्तः वर्मिणः कवचभृतः त्रिंशच्छतं त्रिंशदधिकशतसंख्याकाः वृचीवन्तोवरशिखस्यपुत्राः साकंयुगपदेवयव्यावत्यां पूर्वोक्तायां हरियूपीयायां न्यर्थानि अर्थशून्यानि आयन्नगच्छन् विनाशंप्रापुरित्यर्थः ॥ ६ ॥

अथसप्तमी—

यस्यगावावरुषासूयवस्यूअन्तरूषुचरतोरेरिहाणा ।
ससृंजयायतुर्वशंपरादाद्वृचीवतोदैववातायशिक्षन् ॥ ७ ॥

यस्य । गावौ । अरुषा । सुयवस्यू इति सुऽयवस्यू । अन्तः ।
ऊँ इति । सु । चरतः । रेरिहाणा । सः । सृंजयाय । तुर्वशम् ।
परा । अदात् । वृचीवतः । दैवऽवाताय । शिक्षन् ॥ ७ ॥

अरुषा अरुषौरोचमानौ सुयवस्यू शोभनतृणानीच्छन्तौ रेरिहाणा लेलिहानौ पुनःपुनर्घासमास्वादयन्तौ यद्वा गतिविशेषंकुर्वन्तौ यस्येन्द्रस्यसंबन्धिनौ गावावश्वौ अन्तर्द्यावापृथिव्योर्मध्येन्तरिक्षे चरतोगच्छतः ऊ सु इतीमौपूरणौ सइन्द्रः सृंजयाय एतन्नामकायराज्ञे तुर्वशं राजानं परादात् प्रददौ किंकुर्वन् वृचीवतोवारशिखान् दैववाताय देववातवंशोत्पन्नायाभ्यावर्तिनेराज्ञे शिक्षन् वशीकुर्वन् तेषांधनानिप्रयच्छन्नितिवा ॥ ७ ॥

अथाष्टमी–

द्वयाँअग्नेरथिनोविंशतिंगावधूमंतोमघवामह्यंसम्राट् ।
अभ्यावर्तीचायमानोददातिदूणाशेयंदक्षिणापार्थवानाम् ॥८॥ २४॥

द्वयान् । अग्ने । रथिनः । विंशतिम् । गाः । वधूऽमंतः । मघऽवा ।
मह्यम् । सम्ऽराट् । अभिऽआवर्ती । चायमानः । ददाति । दुःऽनशा ।
इयम् । दक्षिणा । पार्थवानाम् ॥ ८ ॥ २४ ॥

अधुना भरद्वाजः स्वस्मै अभ्यावर्तिनादत्तंधनजातमग्नये प्रकथयति हेअग्ने मघवा धनवान् प्रभूतदानोवा सम्राट् राजसूययाजी चायमानश्चयमानस्यपुत्रः अभ्यावर्ती एतदाह्वयोराजा रथिनोरथसहितान् वधूमतः स्त्रीयुक्तान् द्वयान्मिथुनभूतान् विंशतिं विंशतिसंख्याकान् गाः पशून् मह्यं ददाति प्रायच्छत् पार्थवानां पृथोर्वंशजस्याभ्यावर्तिनोराज्ञःसंबन्धिनी पूजार्थे बहुवचनं इयंदक्षिणा दुर्नशा केनापिनाशयितुमशक्याभवति ॥ ८ ॥

॥ इतिचतुर्थस्यषष्ठेचतुर्विंशोवर्गः ॥ २४ ॥

आगावइत्यष्टर्चंपंचमंसूक्तंअत्रेयमनुक्रमणिका–आगावोगव्यंद्वितीयैन्द्रीवांत्यश्चपादौत्यानुष्टुप् जागतस्तृचोद्वितीयादिरिति । भरद्वाजऋषिः इन्द्रोयज्वनइत्याद्यस्तृचोजागतः उपेदमित्यंत्यानुष्टुप् शिष्टाश्चतस्त्रस्त्रिष्टुभः कृत्स्नस्यगौर्देवता द्वितीयायाः सूक्तांत्यपादस्यच विकल्पेनेन्द्रोदेवता गवामुपस्थानेएतत्सूक्तं सूत्रितंच–आगावीयमेकइति ।

तत्रप्रथमा–

आगावोअग्मन्नुतभद्रमक्रन्त्सीदन्तुगोष्ठेरणयन्त्वस्मे ।
प्रजावतीःपुरुरूपाइहस्युरिन्द्रायपूर्वीरुषसोदुहानाः ॥ १ ॥

आ । गावः । अग्मन् । उत । भद्रम् । अक्रन् । सीदन्तु । गोऽस्थे ।
रणयन्तु । अस्मे इति । प्रजाऽवतीः । पुरुऽरूपाः । इह । स्युः ।
इन्द्राय । पूर्वीः । उषसः । दुहानाः ॥ १ ॥

गावः आअग्मन् अस्मदीयंगृहंआगच्छन्तु उतापिच भद्रं भजनीयं शुभं अक्रन् कुर्वन्तु तथा गोष्ठे अस्मदीयेगवांस्थाने सीदन्तूपविशन्तु तदनन्तरं अस्मे अस्मासु रणयन्तु रमन्तां अ-

पिच इहास्मिन्गोष्ठे पुरुरूपानानावर्णागावःप्रजावतीः प्रजावत्यः सन्ततिसहिताः स्युर्भवेयुः इन्द्रायेन्द्रार्थं पूर्वीर्बह्वीः उषसोदिवसान् सर्वेषुदिवसेषुइत्यर्थः दुहानाः क्षीरंदोह्यमानाभवेयुः॥ १॥

अथद्वितीया–

इन्द्रोयज्वनेपृणतेचशिक्षत्युपेद्ददातिनस्वंमुषायति।
भूयोभूयोरयिमिदस्यवर्धयन्नभिन्नेखिल्येनिदधातिदेवयुम्॥ २॥

इन्द्रः। यज्वने। पृणते। च। शिक्षति। उप। इत्। ददाति। न। स्वम्। मुषायति। भूयःऽभूयः। रयिम्। इत्। अस्य। वर्धयन्। अभिन्ने। खिल्ये। नि। दधाति। देवऽयुम्॥ ३॥

इन्द्रः यज्वने यजनशीलाय पृणतेच स्तुतिभिःप्रीणयित्रेचस्तोत्रेशिक्षति अपेक्षितंधनंददाति नकेवलंसकृदेवदानं अपितु सर्वदैवेत्याह उपेद्ददाति उपेत्यसर्वदाददात्येव यज्वनःस्तोतुश्च स्वं स्वभूतंधनं नमुषायति कदाचिदपिनापहरति अपिच अस्योभयविधस्य रयिं धनमात्मनादत्तं भूयोभूयः पुनःपुनर्वर्धयन्निव वृद्धिंप्रापयन्नेव देवयुं देवमिन्द्रमात्मनइच्छन्तंतंजनं अभिन्नेशत्रुभिरभेद्येखिल्येखिलमप्रतिहतंस्थलंतदेवखिल्यंस्वार्थिकोयत् अन्यैर्गन्तुमशक्येस्थले निदधाति निक्षिपति निवासयतीत्यर्थः॥ २॥

देवीनांहविःषुनतानशंतिनताअर्वेतिगोदेवतायायाज्यापुरोनुवाक्ये गोस्तोमेपिमरुत्वतीयनिष्केवल्ययोरेतेसूक्तमुखीये सूत्रितंच–नताअर्वारेणुककाटोअश्नुतेनतानशन्तिनदभातितस्करइति।

सैषासूक्तेतृतीया

नतानशन्तिनदभातितस्करोनासामामित्रोव्यथिरादधर्षति।
देवाँश्चयाभिर्यजतेददातिचज्योगित्ताभिःसचतेगोपतिःसह॥३॥

न। ताः। नशन्ति। न। दभाति। तस्करः। न। आसाम्। आमित्रः। व्यथिः। आ। दधर्षति। देवान्। च। याभिः। यजते। ददाति। च। ज्योक्। इत्। ताभिः। सचते। गोऽपतिः। सह॥ ३॥

तागावोननशन्ति अस्मत्सकाशान्ननश्यन्तु किंच तस्करश्चौरोपि नदभाति अस्मदीया-गाः नहिंस्यात् तथा आमित्रः अमित्रस्यशत्रोःसंबन्धि व्यथिः शस्त्रं आसांइमागाः नादधर्षति नाक्रमतु गोपतिः एवंभूतानांगवांस्वामीयजमानः याभिर्गोभिः देवांश्चेन्द्रादीनुद्दिश्य यजते यज-नंकरोति योगाःइन्द्रार्थंददातिचप्रयच्छतिच ताभिस्तादृशीभिर्गोभिःसह ज्योगित् चिरकालमे-वसचते संगच्छतां ॥ ३ ॥

अथचतुर्थी–

नताअर्वारेणुकंकाटोअश्नुतेनसंस्कृतत्रमुपयन्तिताअभि ।
उरुगायमभंयंतस्यताअनुगावोमर्तस्यविचरन्तियज्वनः ॥ ४ ॥

न । ताः । अर्वा । रेणुऽकंकाटः । अश्नुते । न । संस्कृतऽत्रम् ।
उप । यन्ति । ताः । अभि । उरुऽगायम् । अभयम् । तस्य ।
ताः । अनु । गावः । मर्तस्य । वि । चरन्ति । यज्वनः ॥ ४ ॥

रेणुककाटः रेणोः पार्थिवस्यरजसउद्भेदकः कटिर्भेदनकर्मा अर्वायुद्धार्थमागतोश्वः ता-गाः नाश्नुते नप्राप्नुयात् तथा तागावः संस्कृतत्रं विशसनादिसंस्कारं नाभ्युपयन्ति नाभिगच्छ-न्तु अपिच तागावःयज्वनोयागशीलस्य तस्य मर्तस्य मनुष्यस्य उरुगायं विस्तीर्णगमनं अभयं भयवर्जितप्रदेशं अनूद्दिश्य विचरन्ति विशेषेणगच्छन्तु ॥ ४ ॥

अथपंचमी–

गावोभगोगावइन्द्रोमेअच्छान्गावःसोमस्यप्रथमस्यभक्षः ।
इमायागावःसजनासइन्द्रइच्छामीद्धृदामनसाचिदिन्द्रम् ॥ ५ ॥

गावः । भगः । गावः । इन्द्रः । मे । अच्छान् । गावः । सोमस्य ।
प्रथमस्य । भक्षः । इमाः । याः । गावः । सः । जनासः ।
इन्द्रः । इच्छामि । इत् । हृदा । मनसा । चित् । इन्द्रम् ॥ ५ ॥

गावएव मह्यं भगोधनं भवन्तु इन्द्रश्च मे मह्यं गावोगाः अच्छान् यच्छतु गावः प्रथमस्य हविषांश्रेष्ठस्यसोमस्य भक्षोभक्षणं भवतु अभिषुतस्यहिसोमस्य गव्येनाज्यादिनासंश्रयण-

त्वात् हेजनासोजनाः इमाएवंभूतायागावःसन्ति सः ताइत्यर्थः ताएवगावः इन्द्रोभवन्ति दधिघृतादिरूपेणेन्द्रस्याप्यायनत्वात् एवंभूतमिन्द्रं हृदा श्रद्धायुक्तेन मनसा चित् चिदित्यप्यर्थे इच्छामोत् कामयेएव साधनभूताभिर्गोभिरेवंभूतमिन्द्रंयष्टुमिच्छामीत्यर्थः ॥ ५॥

अथषष्ठी—

यूयंगावोमेदयथाकृशंचिदश्रीरंचित्कृणुथासुप्रतीकम् ।
भद्रंगृहंकृणुथभद्रवाचोबृहद्वोवयउच्यतेसभासु ॥ ६ ॥

यूयम् । गावः । मेदयथ । कृशम् । चित् । अश्रीरम् । चित् । कृणुथ । सुऽप्रतीकम् । भद्रम् । गृहम् । कृणुथ । भद्रऽवाचः । बृहत् । वः । वयः । उच्यते । सभासु ॥ ६ ॥

हेगावोयूयं मेदयथ आप्यायनंकुरुथेत्यर्थः तथा कृशंचित्क्षीणमपि अश्रीरंचिदमंगलमपि सुप्रतीकं शोभनांगं कृणुथ कुरुथ हेभद्रवाचः कल्याणध्वन्युपेतागावः अस्मदीयंगृहं भद्रं कल्याणंकृणुथ गोभिरुपेतंकुरुथ सभासु यागपरिषत्सु हेगावोयुष्माकं बृहत् महत् वयोन्नं उच्यते समवेतंक्रियते सर्वैर्दीयतइत्यर्थः ॥ ६ ॥

अथसप्तमी—

प्रजावतीःसूयवसंरिशन्तीःशुद्धाअपःसुप्रपाणेपिबन्तीः ।
मावःस्तेनईशतमाघशंसःपरिवोहेतीरुद्रस्यवृज्याः ॥ ७ ॥

प्रजाऽवतीः । सुऽयवसम् । रिशन्तीः । शुद्धाः । अपः । सुऽप्रपाने । पिबन्तीः । मा । वः । स्तेनः । ईशत । मा । अघऽशंसः । परि । वः । हेतिः । रुद्रस्य । वृज्याः ॥ ७ ॥

हेगावोयूयं प्रजावतीः प्रजावत्यः वत्साभिर्युक्ताभवतेतिशेषः सुयवसं शोभनतृणं रिशन्तीः रिशंत्यः भक्षणार्थंहिंसंत्योभवत सुप्रपाणे सुखेनपातव्येतटाकादौ शुद्धाः निर्मलाअपः उदकानि पिबन्तीः पिबंत्यश्चभवत वोयुष्मान् स्तेनः तस्करः माईशत माईशिष्ट ईश्वरोमाभूत् तथाप्यघशंसः व्याघ्रादिः शत्रुः माईशत अपिच वोयुष्मान् रुद्रस्य कालात्मकस्य परमेश्वरस्य हेतिरायुधंच परिवृज्याः परिवृणक्तु परिहरतु ॥ ७ ॥

अथाष्टमी–

उपेदमुपपर्चनमासु गोषूप पृच्यताम्।
उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥ ८ ॥ २५ ॥

उप। इदम्। उपऽपर्चनम्। आसु। गोषु। उप। पृच्यताम्।
उप। ऋषभस्य। रेतसि। उप। इन्द्र। तव। वीर्ये ॥ ८ ॥ २५ ॥

आसु गोषु इदमुपपर्चनं आप्यायनं उपपृच्यतां संपृच्यतां हेइन्द्र तववीर्ये त्वदीयवीर्यनिमित्ते ऋषभस्य गवांगर्भमादधानस्य वृषभस्य रेतसि इदमुपपर्चनं आप्यायनं गोषुह्याप्यायितासु सतीषु तत्संबन्धिक्षीरादिहविर्द्वारेणेन्द्रः आप्यायितोभवतीत्यर्थः उपेतिपुनर्वचनंपादभेदानां पूरणार्थमिति ॥ ८ ॥

॥ इतिचतुर्थस्यषष्ठेपंचविंशोवर्गः ॥ २५ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेषष्ठोध्यायःसमाप्तः ॥ ६ ॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरं ॥ १ ॥
अथसप्तमोध्यायआरभ्यते षष्ठस्यमंडलस्यतृतीयेनुवाकेपंचसूक्तानिव्याकृतानि इन्द्रंवइतिषळृचं षष्ठंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं अनुक्रम्यतेच-इन्द्रंषळिति। गतोविनियोगः।

तत्रप्रथमा–

ॐम् इन्द्रंवोनरःसख्यायसेपुर्महोयन्तःसुमतयेचकानाः।
महोहिदातावज्रहस्तोअस्तिमहामुरण्वमवसेयजध्वम्॥ १ ॥

इन्द्रम्। वः। नरः। सख्याय। सेपुः। महः। यन्तः। सुऽमतये।
चकानाः। महः। हि। दाता। वज्रऽहस्तः। अस्ति। महाम्।
ऊँ इति। रण्वम्। अवसे। यजध्वम्॥ १ ॥

हेयजमानाः वोयुष्माकंसंबन्धिनः नरोनेतारऋत्विजः सख्याय सखिभावार्थं इन्द्रं सेपुः परिचरन्ति स्पृशन्तिवा कथंभूताः महोमहान्तिस्तोत्राणि यन्तः उपयन्तः प्राप्नुवन्तः कुर्वन्तइ-त्यर्थः तथा सुमतये सुमतिः शोभनाअनुग्रहात्मिकातदीयाबुद्धिः तांचकानाः कामयमानाः क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानसंज्ञा चकानाइतिकामयतेश्छान्दसंरूपं यद्वा महोमहत्क-र्मयन्तः अनुतिष्ठन्तः सुमतये सुमतिं शोभनांस्तुतिं चकानाः शब्दयन्तः कैगैशब्देइत्यस्माल्लिटः कानचिरूपं हियस्मात् वज्रहस्तोवज्रपाणिरिन्द्रः महोमहतोधनस्य दातास्तिभवति तस्मात् रण्वं रमणीयं महामु महान्तमेव अवसे रक्षणाय यजध्वं हविर्भिःपूजयत ॥ १ ॥

अथद्वितीया–

आयस्मिन्हस्तेनर्यामिमिक्षुरारथेहिरण्ययेरथेष्ठाः।
आरश्मयोगभस्त्योःस्थूरयोराध्वन्नश्वासोवृषणोयुजानाः॥ २ ॥

आ। यस्मिन्। हस्ते। नर्याः। मिमिक्षुः। आ। रथे। हिरण्यये। रथेऽस्थाः। आ। रश्मयः। गर्भस्त्योः। स्थूरयोः। आ। अध्वन्। अश्वासः। वृषणः। युजानाः॥ २॥

यस्मिन्निन्द्रे नर्या नृभ्योहिता रायः आमिमिक्षुः आसिच्यन्ते आपूर्यन्ते व्यत्ययेनकर्मणिकर्तृप्रत्ययः इन्द्रे कुत्रेतिचेव् हस्ते तदीयेबाहौ यद्वैतवसमानाधिकरणमिन्द्रस्यविशेषणं हस्तेहन्तरियस्मिन्निन्द्रेइत्यर्थः उक्तंयास्केन—हस्तोहन्तेःप्राशुर्हननइति। यद्वा ईदृशेयस्मिन्निन्द्रे वर्तमानारायः आमिमिक्षुः आसिंचन्ति आपूरयन्तिस्तोतॄन् यश्चेन्द्रः रथेष्ठाः रथस्थाता तत्स्वभावःसन् हिरण्यये सुवर्णमये रथे आतिष्ठति यद्वा रथेष्ठाः रथेवस्थितारायोधनानि हिरण्मये रथेतिष्ठन् यइन्द्रआसिंचत्यभिवर्षति यस्यच स्थूरयोः स्थूलयोर्विस्तृतयोर्गभस्त्योःबाहुनामैतत् बाह्वोःरश्मयोभीशवः आसिच्यन्ते आयम्यन्ते यस्यचाश्वासोअश्वाः वृषणः सेक्तारोयुवानः युजानाः रथेयुज्यमानाः अध्वन् अध्वनिमार्गे आमिमिक्षुः आसिंचन्ति आपूरयन्ति आगच्छन्तीत्यर्थः तमिन्द्रंस्तुमइतिशेषः॥ २॥

अथतृतीया—

श्रियेतेपादादुवआमिमिक्षुर्धृष्णुर्वज्रीशवसादक्षिणावान्।
वसानोअत्कंसुरभिंदृशेकंस्व[1]र्णनृतविषिरोबभूथ॥ ३॥

श्रिये। ते। पादा। दुवः। आ। मिमिक्षुः। धृष्णुः। वज्री। शवसा। दक्षिणऽवान्। वसानः। अत्कम्। सुरभिम्। दृशे। कम्। स्वः। न। नृतो इति। इषिरः। बभूथ॥ ३॥

हेइन्द्र श्रिये ऐश्वर्यार्थं ते त्वदीययोः पादा पादयोः दुवः परिचरणं आमिमिक्षुः आसिंचन्ति समर्पयन्ति भरद्वाजःसमर्पयति व्यत्ययेनबहुवचनं यद्वा ते तव पादौ श्रिये श्रयितुं सेवितुं दुवः परिचरणमासिंचन्तिअनुतिष्ठन्ति यस्त्वं शवसा बलेन धृष्णुः शत्रूणांधर्षकः वज्री वज्रवान् दक्षिणावान् दक्षिणास्तोतृभ्योदातव्यंधनं तद्वान् हेनृतोनेतरिन्द्र सत्वं सुरभिं प्रशस्तं अत्कं सततगमनशीलमात्मीयंरूपं दृशे सर्वेषांदर्शनार्थं वसानः आच्छादयन् स्वर्ण सूर्यइव इषिरोगन्ता एषणीयोवा बभूथ भवसि कमितिपूरकः॥ ३॥

[1] नि० १. ७.।

अथचतुर्थी—

ससोमआमिश्लतमःसुतोभूद्यस्मिन्पक्तिःपच्यतेसन्तिधानाः ।
इन्द्रंनरःस्तुवन्तोब्रह्मकाराउक्थाशंसन्तोदेववाततमाः ॥ ४ ॥

सः । सोमः । आमिश्लऽतमः । सुतः । भूत् । यस्मिन् । पक्तिः ।
पच्यते । सन्ति । धानाः । इन्द्रम् । नरः । स्तुवन्तः । ब्रह्मऽकाराः ।
उक्था । शंसन्तः । देववातऽतमाः ॥ ४ ॥

यःसोमोवक्ष्यते ससोमः सुतोभिषुतःसन् आमिश्लतमः आभिमुख्येनमिश्रतमोभूत् इन्द्रे-णात्यर्थंसंगच्छते यस्मिन्सोमेभिषुते अतिपक्तिः पक्तव्यः पुरोडाशादिःपच्यते भृष्टयवाधाना-स्ताश्चसन्तिहविरर्थंसंस्कृताभवन्ति यस्मिँश्च सोमेभिषुते नरोनेतारः ब्रह्मकाराः ब्रह्मणोन्नस्यह-विर्लक्षणस्यकर्तारऋत्विजः इन्द्रं स्तोत्रैः स्तुवन्तः उक्था उक्थानिशस्त्राणिच शंसन्तः उच्चार-यन्तः देववाततमाः देवानतिशयेनोपगताभवन्ति ससोमइन्द्रेणसंमिश्रितोभूदित्यन्वयः ॥ ४ ॥

अथपञ्चमी—

नतेअन्तःशवसोधाय्यस्यवितुबाबधेरोदसीमहित्वा ।
आतासूरिःपृणतितूतुजानोयूथेवाप्सुसमीजमानऊती ॥ ५ ॥

न । ते । अन्तः । शवसः । धायि । अस्य । वि । तु । बाबधे ।
रोदसी इति । महिऽत्वा । आ । ता । सूरिः । पृणति । तूतुजानः ।
यूथाऽइव । अप्ऽसु । सम्ऽईजमानः । ऊती ॥ ५ ॥

हेइन्द्र ते तव अस्योक्तगुणस्य शवसोबलस्य अन्तः अवसानं नधायि अत्रकेवलोपि दधातिरवाट्पूर्वार्थोद्रष्टव्यः नावाधायि अस्माभिर्नाज्ञायीत्यर्थः यद्बलं रोदसीद्यावापृथिव्यौ महित्वा महत्त्वेन तु क्षिप्रं विबाबधे यस्माद्बलात् द्यावापृथिव्यौबिभीतइत्यर्थः ता तद्बलं सूरिः स्तोता तूतुजानस्त्वरितःसन् ऊती ऊत्यातर्पकेणहविषा समीजमानः सम्यग्यजन्आपृणत्यापू-रयति तत्रदृष्टान्तः—यूथेवाप्सुउदकेषुगवांयूथानीव यथा गोपालःअपःपाययन्अद्भिस्तर्पयति तद्वत् ॥ ५ ॥

अथषष्ठी—

एवेदिन्द्रःसुहवंऋष्वोअस्तूतीअनूतीहिरिशिप्रःसत्वा।
एवाहिजातोअसमात्योजाःपुरूचवृत्राहनतिनिदस्यून् ॥ ६ ॥१॥

एव। इत्। इन्द्रः। सुऽहवः। ऋष्वः। अस्तु। ऊती। अनूती।
हिरिऽशिप्रः। सत्वा। एव। हि। जातः। असमातिऽओजाः।
पुरु। च। वृत्रा। हनति। नि। दस्यून् ॥ ६ ॥ १ ॥

एव एवंउक्तेनप्रकारेण ऋष्वोमहानिन्द्रः सुहवोस्तु सुखेनाह्वातव्योभवतु इदितिपूरणः हिरिशिप्रः शिप्रेहनूनासिकेवा हरितवर्णेशिप्रेयस्यतादृशइन्द्रः ऊती ऊत्याआगमनेन अनूती अनूत्याअनागमनेनवा सत्वा गमयिताभवतिधनानां स्वयमागतोनागतोपिस्तोतृभ्योधनंप्रयच्छतीत्यर्थः एवाहि एवंहि जातः प्रादुर्भूतोयमिन्द्रः असमात्योजाः असमातिअसमानमनुपमंउत्कृष्टतरमोजोबलंयस्यतादृशःसन् पुरु पुरूणिबहूनिच वृत्रा वृत्राण्यावरकाणिरक्षःप्रभृतीनि हनति हिनस्तु तथा दस्यून् उपक्षपयितॄन् शत्रूंश्चनिहन्तु ॥ ६ ॥

॥ इतिचतुर्थस्यसप्तमेप्रथमोवर्गः ॥ १ ॥

भूयइदितिपंचर्चंसप्तमंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं भूयःपंचेत्यनुक्रान्तं अग्निष्टोमेमाध्यंदिनसवनेच्छावाकशस्त्रेएतत्सूक्तंशंसनीयं सूत्रितंच—उदिन्न्वस्यरिच्यतेभूयइति। महाव्रतेपिनिष्केवल्येएतत्सूक्तं तथैवपंचमारण्यकेसूत्रितं—भूयइद्वावृधेवीर्यायनृणामुत्वेति।

तत्रप्रथमा—

भूयइद्वावृधेवीर्यायँएकोअजुर्योदयतेवसूनि।
प्ररिरिचेदिवइन्द्रःपृथिव्याअर्धमिदस्यप्रतिरोदसीउभे ॥ १ ॥

भूयः। इत्। ववृधे। वीर्याय। एकः। अजुर्यः। दयते। वसूनि।
प्र। रिरिचे। दिवः। इन्द्रः। पृथिव्याः। अर्धम्। इत्। अस्य।
प्रति। रोदसी इति। उभे इति ॥ १ ॥

अयमिन्द्रः भूयइत् बहुतरमेव वावृधे प्रवृद्धोभूत् किमर्थं वीर्याय वीरकर्माणिवृत्रवधादीनि कर्तुं एकोमुख्यः अजुर्योजरयितुमशक्यः सचेन्द्रः वसूनि धनानि दयते स्तोतृभ्योददाति तथा दिवोद्युलोकात् पृथिव्याः भूमेश्च अयमिन्द्रः प्ररिरिचे अतिरिच्यते किंचास्येन्द्रस्य उभेरोदसी द्यावापृथिव्यौ अर्धमित् अर्धमेवप्रति अस्येन्द्रस्यार्धोभागः द्यावापृथिव्योः प्रतिनिधिर्भवतीत्यर्थः ॥ १ ॥

अथद्वितीया–

अधामन्येबृहदसुर्यमस्ययानिदाधारनकिरामिनाति ।
दिवेदिवेसूर्योदर्शतोभूद्विसद्मान्युर्वियासुक्रतुर्धात् ॥ २ ॥

अध । मन्ये । बृहत् । असुर्यम् । अस्य । यानि । दाधार । नकिः । आ । मिनाति । दिवेऽदिवे । सूर्यः । दर्शतः । भूत् । वि । सद्मानि । उर्विया । सुऽक्रतुः । धात् ॥ २ ॥

अध अधुना अस्येन्द्रस्य बृहत् महत् असुर्यं असुरहननकुशलं बलंमन्ये स्तौमि मन्यतिः स्तुतिकर्मा सचेन्द्रः यानिकर्माणि दाधार धारयति तानि नकिरामिनाति नकश्चिदपिहिनस्ति कानिपुनस्तानि उच्यते दिवेदिवे प्रतिदिनं वृत्रेणावृतः सूर्यः दर्शतोदर्शनीयः भूत् भवति आवरकस्यासुरस्यवधेन सूर्यंप्रकाशितवानित्येकंकर्म सुक्रतुः शोभनकर्मासइन्द्रः सद्मानि भुवनानि उर्विया उरूणिविस्तीर्णानि विधात् व्यधात् अकार्षीत् इदमपरंकर्म एतदादीनिबहूनिकर्माणिकृतवानित्यर्थः ॥ २ ॥

अथतृतीया–

अद्याचिन्नूचित्तदपोनदीनांयदाभ्योअरदोगातुमिन्द्र ।
निपर्वताअद्मसदोनसेदुस्त्वयादृळ्हानिसुक्रतोरजांसि ॥ ३ ॥

अद्य । चित् । नु । चित् । तत् । अपः । नदीनाम् । यत् । आभ्यः । अरदः । गातुम् । इन्द्र । नि । पर्वताः । अद्मऽसदः । न । सेदुः । त्वया । दृळ्हानि । सुक्रतो इति सुऽक्रतो । रजांसि ॥ ३ ॥

हेइन्द्र अद्याचित् अद्यापिनूचित् पुरापि तवनदीनांसंबन्धिकं तदपः कर्म वर्तते आभ्योनदीभ्यः गातुं मार्गं अरदः प्रवहनार्थं व्यलिखइतियत्कर्म तत्सर्वदानुपक्षीणंसद्वर्ततेइत्यर्थः अपि-

च त्वदाज्ञया पर्वतागिरयः निषेदुःनिषण्णाः उत्पतनंपरित्यज्यक्वचिद्देवस्थानेनैश्चल्येनोपविष्टाबभूवुः अद्मसदोन अद्मअदनीयमन्नंतदर्थंसीदन्तःपुरुषाइव यथा तेभोजनार्थंनैश्चल्येनासीदन्तितथेत्यर्थः अतःकारणात् हेसुक्रतो शोभनकर्मन्निन्द्र त्वया रजांसि सर्वेलोकाः दृह्लानिदृंहितानि स्थिरीकृताआसन्॥ ३॥

अथचतुर्थी—

सत्यमित्तन्नत्वावाँअन्योअस्तीन्द्रदेवोनमर्त्योज्यायान्।
अहन्नहिंपरिशयानमर्णोवासृजोअपोअच्छासमुद्रम्॥ ४॥

सत्यम्। इत्। तत्। न। त्वाऽवान्। अन्यः। अस्ति। इन्द्र। देवः। न। मर्त्यः। ज्यायान्। अहन्। अहिम्। परिऽशयानम्। अर्णः। अव। असृजः। अपः। अच्छ। समुद्रम्॥ ४॥

हेइन्द्र वक्ष्यमाणं तत् सत्यमित् सत्यमेव नानृतं त्वावान् त्वत्सदृशोन्योदेवोनास्ति त्वत्सदृशोन्योमर्त्योमनुष्योपिनैवविद्यते ज्यायान् अधिकोपिदेवोमनुष्योवानखल्वस्तिइतियद्गीयतेतत्सत्यमेवेत्यर्थः अपिच त्वं अर्णउदकं परिशयानं परिवृत्यशयानं अहिं मेघं अहनअवधीः हत्वाच समुद्रमन्तरिक्षंजलधिंवाच्छाभिमुख्येन अपउदकानि अवासृजः अवाङ्मुखतयाविसृष्टवानसीत्यर्थः॥ ४॥

अथपंचमी—

त्वमपोविदुरोविषूचीरिन्द्रदृह्ळमरुजःपर्वतस्य।
राजाभवोजगतश्चर्षणीनांसाकंसूर्यंजनयन्द्यामुषासम्॥ ५॥२॥

त्वम्। अपः। वि। दुरः। विषूचीः। इन्द्र। दृह्ळम्। अरुजः। पर्वतस्य। राजा। अभवः। जगतः। चर्षणीनाम्। साकम्। सूर्यम्। जनयन्। द्याम्। उषसम्॥ ५॥ २॥

हेइन्द्र त्वं दुरः वृत्रेणावृताअपः विषूचीः विविधमंचंत्यः यथा सर्वतः प्रसृताभवन्ति तथा व्यसृजः यतस्त्वं पर्वतस्य पर्ववतोमेघस्य दृह्ळं दृढं अपांबन्धकप्रदेशं अरुजः अभांक्षीः

अपिच त्वं जगतःसंबन्धिनीनांचर्षणीनांप्रजानां राजा भवः अधिपतिर्भवसि किंकुर्वन्सूर्यं द्यां द्युलोकं उषसंच तमसावृतमेतत्त्रितयं साकं युगपदेव जनयन् प्रादुर्भावयन् प्रकाशयन्नित्यर्थः॥५॥

॥ इतिचतुर्थस्यसप्तमेद्वितीयोवर्गः ॥ २ ॥

अभूरेकइतिपंचर्चमष्टमंसूक्तं भरद्वाजस्यसुहोत्रस्यार्षं उपांत्याशक्करी शिष्टाश्चतस्रस्त्रिष्टुभः इन्द्रोदेवता अनुक्रम्यतेच—अभूरेकःसुहोत्रस्तुचतुर्थीशक्करीति । महाव्रतस्यनिष्केवल्येइदमादी-न्यष्टसूक्तानिशंसनीयानि तथापंचमाण्यकं—अभूरेकोरयिपतेरयीणामित्यष्टौसूक्तानीति । पृष्ठ्य-षस्यषष्ठेहनिनिष्केवल्येइदंसूक्तंनिविद्धानं सूत्रितंच—ऐन्द्रयाह्युपनः प्रयान्वस्याभूरेकइतिनिष्केव-ल्यमिति । विश्वजितिमाध्यंदिनेच्छावाकशस्त्रेसामसूक्ताख्यमेतच्छंसनीयं सूत्रितंच—अभूरेको-रयिपतेरयीणामितिसामसूक्तानि ।

तत्रप्रथमा—

अभूरेकोरयिपतेरयीणामाहस्तयोरधिथाइन्द्रकृष्टीः ।
वितोकेअप्सुतनयेचसूरेवोचन्तचर्षणयोविवाचः ॥ १ ॥

अभूः । एकः । रयिऽपते । रयीणाम् । आ । हस्तयोः । अधिथाः ।
इन्द्र । कृष्टीः । वि । तोके । अप्ऽसु । तनये । च । सूरे ।
अवोचन्त चर्षणयः । विऽवाचः ॥ १ ॥

हेरयिपते धनस्यपालकेन्द्र एकः प्रधानभूतस्त्वं रयीणां धनानांस्वामी अभूर्भवसि यद्वा रयीणांरयिपतेइतिसंबन्धः एकोरयिशब्दोनुवादः यथा गवामसिगोपतिरेकइन्द्रेति तदानीं एको-मुख्यस्त्वंभवसीतियोजनीयं अपिच हेइंद्र त्वं हस्तयोरात्मीययोर्बाह्वोःकृष्टीः प्रजाः आअधिथाः अधत्से सर्वजगत्तवाज्ञायांवर्ततेइत्यर्थः किंच चर्षणयोमनुष्याः तोके पुत्रे अप्सूदकेषु सूरे शत्रूणांप्रेरके तनये पौत्रेषुच एतेषुनिमित्तभूतेषुसत्सु विवाचः विशिष्टाःस्तुतीःव्यवोचन्त विविधंब्रुवन्ति ॥ १ ॥

अथद्वितीया—

त्वद्भियेन्द्रपार्थिवानिविश्वाच्युताचिच्च्यावयन्तेरजांसि ।
द्यावाक्षामापर्वतासोवनानिविश्वंदृळ्हंभयतेअज्मन्नाते ॥ २ ॥

---

१ ऋ० सं० ५. ६. २३. ।

त्वत् । भिया । इन्द्र । पार्थिवानि । विश्वा । अच्युता । चित् । च्यवयन्ते । रजांसि । द्यावाक्षामा । पर्वतासः । वनानि । विश्वम् । दृळ्हम् । भयते । अज्मन् । आ । ते ॥ २ ॥

हेइन्द्र त्वत्त्वत्तोभियाभयेन विश्वा विश्वानिव्यापकानि पार्थिवानि पृथिव्यंतरिक्षनाम तत्रभवानि रजांस्युदकानि अच्युताचित् च्यावयितुमशक्यान्यपि च्यावयन्तेमेघाः मच्यावयन्ति वर्षन्तीत्यर्थः अपिच हेइन्द्र तेतव अज्मन् आगमनेसति द्यावाक्षामा द्यावापृथिव्यौ पर्वतासोगिरयोवनानिवृक्षाश्च भयते भयंप्राप्नुवन्ति किंबहुना विश्वं सर्वं दृळ्हं स्थिरं प्राणिजातं भयते बिभेति ॥ २ ॥

अथतृतीया—

त्वंकुत्सेनाभिशुष्णमिन्द्राशुषंयुध्यकुयवंगविष्टौ ।
दशप्रपित्वेअधसूर्यस्यमुषायश्चक्रमविवेरपांसि ॥ ३ ॥

त्वम् । कुत्सेन । अभि । शुष्णम् । इन्द्र । अशुषम् । युध्य । कुयवम् । गोऽइष्टौ । दश । प्रऽपित्वे । अध । सूर्यस्य । मुषायः । चक्रम् । अविवेः । रपांसि ॥ ३ ॥

हेइन्द्र त्वं कुत्सेनसह अशुषं शोषयितुमशक्यं प्रबलं शुष्णं सर्वस्यशोषकमेनत्संज्ञमसुरं अभियुध्य अभ्ययुध्यः कुत्सस्यसाहाय्यार्थं तेनासुरेणसहयुद्धंकृतवानसीत्यर्थः तथागविष्टौ गावोबाणाइष्यन्तिगच्छंतियत्रेतिगविष्टिःसंग्रामः तस्मिन् कुयवमेतत्संज्ञमसुरंच दश अदशः हिंसितवानसि दशदशनेइत्येतस्माच्छान्दसेलोटिरूपं अध अपिच प्रपित्वे प्रपतनेयुद्धे सूर्यस्यचक्रं रथावयवभूतं मुषायः अमुष्णाः तदाप्रभृतिसूर्यस्यरथएकचक्रोभूत् तथाचाम्नातं—सप्तयुंजन्तिरथमेकचक्रमिति । एतशाख्यस्यऋषेःसूर्येणसहयुद्धे तत्साहाय्यार्थआगतइन्द्रःसूर्यस्यचक्रमपहृतवानित्याख्यातं सूरश्चक्रंप्रवृहज्जातओजसेतिचनिगमान्तरं ।अपिचरपांसिपापकारीणि रक्षःप्रभृतीनि अविवेः अस्माल्लोकादगमयः अवधीरित्यर्थः ॥ ३ ॥

---

१ ऋ० सं० २. ३. १४. । २ ऋ० सं० २. १. १९. ।

अथचतुर्थी—

त्वंशतान्यवशम्बरस्यपुरोजघन्थाप्रतीनिदस्योः ।
अशिक्षोयत्रशच्याशचीवोदिवोदासायसुन्वतेसुतक्रेभर-
द्वाजायगृणतेवसूनि ॥ ४ ॥

त्वम् । शतानि । अव । शम्बरस्य । पुरः । जघन्थ । अप्रतीनि ।
दस्योः । अशिक्षः । यत्र । शच्या । शचीऽवः । दिवःऽदासाय ।
सुन्वते । सुतऽक्रे । भरत्ऽवाजाय । गृणते । वसूनि ॥ ४ ॥

हेइन्द्र त्वं शतानि शतसंख्यानि दस्योरुपक्षपयितुरसुरस्य शंबरस्य एतत्संज्ञस्य पुरः पुरीः अप्रतीनि लिंगव्यत्ययः केनाप्यप्रतिगताः अवजघंथ अवाहन् हेशचीवः प्रज्ञावन् हेसुतक्रे अभिषुतेनसोमेनक्रीतेन्द्र यत्र यस्मिन्काले सुन्वते सोमाभिषवंकुर्वते दिवोदासाय शच्या प्रज्ञ-या अशिक्षोधनानिप्रादाः गृणते स्तुवते भरद्वाजायच वसूनिप्रादाः तस्मिन्काले शांबरीः पुरो-वजघंथेत्यन्वयः ॥ ४ ॥

अथपंचमी—

ससत्यसत्वन्महतेरणायरथमातिष्ठतुविनृम्णभीमम् ।
याहिप्रपथिन्नवसोपमद्रिक्प्रचश्रुतश्रावयचर्षणिभ्यः ॥ ५ ॥ ३ ॥

सः । सत्यऽसत्वन् । महते । रणाय । रथम् । आ । तिष्ठ ।
तुविऽनृम्ण । भीमम् । याहि । प्रऽपथिन् । अवसा । उप ।
मद्रिक् । प्र । च । श्रुत । श्रवय । चर्षणिऽभ्यः ॥ ५ ॥ ३ ॥

हेसत्यसत्वन् सत्याः अबाध्याः सत्वानोभटाः यस्यसतथोक्तः हेतुविनृम्ण तुविबहुलंनृम्णं धनंयस्यसतथोक्तः हेतादृशेन्द्र सत्वं महते रणाय संग्रामाय तदर्थं भीमं भयंकरं आत्मीयंरथं आतिष्ठ हेप्रपथिन् प्रकृष्टमार्गेन्द्र अवसा रक्षणेनसह तेनचरथेनोपयाह्यागच्छ मद्रिक् मदभिमुखः तथा हेश्रुत विश्रुतेन्द्र चर्षणिभ्यः प्रजाभ्यः प्रश्रावयच अस्मान्प्रख्यापयच सर्वासुप्रजासुमध्येअस्मान्प्रख्यातान्कुर्वित्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेतृतीयोवर्गः ॥ ३ ॥

अपूर्व्येतिपंचर्चंनवमंसूक्तं त्रैष्टुभमैन्द्रं द्वितीयेछान्दोमिकेहनिनिष्केवल्येएतत्सूक्तं सूत्रितं च–अपूर्व्यापुरुतमानितांसुतेकीर्तिमिति । महाव्रतेपिनिष्केवल्येअस्यसूक्तस्यविनियोगउक्तः ।

तत्रप्रथमा–

अपूर्व्यापुरुतमान्यस्मैमहेवीरायतवसेतुराय ।
विरप्शिनेवज्रिणेशंतमानिवचांस्यासास्थविरायतक्षम् ॥ १ ॥

अपूर्व्या । पुरुऽतमानि । अस्मै । महे । वीराय । तवसे । तुराय ।
विऽरप्शिने । वज्रिणे । शम्ऽतमानि । वचांसि । आसा ।
स्थविराय । तक्षम् ॥ १ ॥

अपूर्व्या अपूर्व्याणि पूर्वैरकृतानि नूतनानि पुरुतमानि बहुतमानि शंतमानि सुखकृत्तमानि वचांसि स्तुतिरूपाणिवाक्यानि आसा आस्येन अस्मै इन्द्राय तक्षमतक्षंकरोमि कीदृशाय महे महते वीराय विविधशत्रूणांमारयित्रे तवसे तवस्विनेबलवते तुराय त्वरमाणाय विरप्शिने विशेषेणस्तुत्याय वज्रिणे वज्रवते स्थविराय प्रवृद्धाय ॥ १ ॥

अथद्वितीया–

समातरासूर्येणाकवीनामवासयद्रुजदद्रिंगृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशानउदुस्रियाणामसृजन्निदानम् ॥ २ ॥

सः । मातरा । सूर्येण । कवीनाम् । अवासयत् । रुजत् ।
अद्रिम् । गृणानः । सुऽआधीभिः । ऋक्वऽभिः । वावशानः ।
उत् । उस्रियाणाम् । असृजत् । निऽदानम् ॥ २ ॥

सइन्द्रः मातरा मातरौ दिवंचपृथिवींच कवीनां क्रान्तदर्शिनामंगिरसामर्थाय सूर्येण अवासयत् प्राकाशयत् किंकुर्वन् अद्रिं गवामदर्शनाय बलेनस्थापितंपर्वतं रुजद्भंजन् यद्वा कवीनामंगिरसामितितृतीयार्थेषष्ठी अंगिरोभिर्गृणानःस्तूयमानइतिसंबन्धः अपिच स्वाधीभिः शोभनध्यानैर्ऋक्वभिःस्तोतृभिः अंगिरोभिर्वावशानःपुनःपुनःकाम्यमानःसन् उस्रियाणां बलस्यभृत्यैःपणिभिरपहृतानांगवां निदानं बंधनं उदसृजत् अमोचयत् ॥ २ ॥

अथतृतीया—

सवह्निभिर्ऋक्वभिर्गोषुशश्वन्मितज्ञुभिःपुरुकृत्वाजिगाय ।
पुरःपुरोहासखिभिःसखीयन्दृह्लारुरोजकविभिःकविःसन् ॥ ३ ॥

सः । वह्निऽभिः । ऋक्वऽभिः । गोषु । शश्वत् । मितज्ञुऽभिः ।
पुरुऽकृत्वा । जिगाय । पुरः । पुरःऽहा । सखिऽभिः । सखिऽयन् ।
दृह्लाः । रुरोज । कविऽभिः । कविः । सन् ॥ ३ ॥

पुरुकृत्वा बहुकर्मकृत् सइन्द्रः वह्निभिः हविषांवोढृभिः ऋक्वभिः स्तोतृभिः शश्वत् सर्वदा मितज्ञुभिः संकुचितजानुभिः अंगिरोभिःसह गोषुनिमित्तभूतेषु जिगाय असुरान्जितवान् जित्वाच पुरोहा पुराणांहन्ता सइन्द्रः सखिभिः समानख्यानैः कविभिःक्रान्तप्रज्ञैरंगिरोभिःसह सखीयन् सखित्वमात्मनइच्छन् कविःसन् स्वयमपिक्रान्तप्रज्ञोभवन् दृह्ला स्थिरा पुरः आसुरीःपुरीरुरोजबभंज ॥ ३ ॥

अथचतुर्थी—

सनीव्याभिर्जरितारमच्छामहोवाजेभिर्महद्भिश्चशुष्मैः ।
पुरुवीराभिर्वृषभक्षितीनामागिर्वणःसुवितायप्रयाहि ॥ ४ ॥

सः । नीव्याभिः । जरितारम् । अच्छ । महः । वाजेभिः ।
महत्ऽभिः । च । शुष्मैः । पुरुऽवीराभिः । वृषभ । क्षितीनाम् ।
आ । गिर्वणः । सुवितार्य । प्र । याहि ॥ ४ ॥

हेवृषभ कामानांवर्षक हेगिर्वणः गिरास्तुत्यासंभजनीयेन्द्र सत्वं महोमहद्भिः वाजेभिर्वाजैरन्नैः महद्भिःशुष्मैर्बलैश्चसह क्षितीनां प्रजानांमध्ये जरितारं स्तोतारं अच्छाभिमुख्येन नीव्याभिः नव्याभिर्नवतराभिः पुरुवीराभिः पुरूणां बहूनांवीरयित्रीभिर्वडवाभिः आप्रयाहि आगच्छ किमर्थं सुविताय शोभनाय सुखप्राप्त्यर्थमित्यर्थः ॥ ४ ॥

अथपंचमी—

ससर्गेणशवसातक्तोअत्यैरपइन्द्रोदक्षिणतस्तुराषाट् ।
इत्थासृजानाअनपावृदर्थंदिवेदिवेविविषुरप्रमृष्यम् ॥ ५ ॥ ४ ॥

सः । सर्गेण । शवसा । तक्तः । अत्यैः । अपः । इन्द्रः । दक्षिणतः ।
तुराषाट् । इत्था । सृजानाः । अनपऽवृत् । अर्थम् । दिवेऽदिवे ।
विविषुः । अपऽमृष्यम् ॥ ५ ॥ ४ ॥

तुराषाट् तुराणांहिंसकानांसोढाअभिभविता सइन्द्रः सर्गेण सर्वदोद्युक्तेन शवसा बलेन अत्यैरश्वैः सततगामिभिस्तेजोभिर्वा तक्तः संगतःसन् दक्षिणतः दक्षिणायने अपउदकानि विसृजतीतिशेषः इत्था इत्थमनेनप्रकारेणसृजानाः सृज्यमानास्ताआपः अर्थं गंतव्यं अपमृष्यमन्यैरक्षोभ्यं समुद्रं दिवेदिवे प्रतिदिनं अनपावृत् अपावर्तनंपुनरागमनंयथानभवतितथाविविषुः व्याप्नुवन्ति अर्तेस्थन्प्रत्ययान्तस्यरूपमर्थमिति ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेचतुर्थोवर्गः ॥ ४ ॥

यओजिष्ठइतिपंचर्चंद्दशमंसूक्तं शुनहोत्रस्यार्षंत्रैष्टुभमैन्द्रं अनुक्रम्यतेच—यओजिष्ठःशुनहोत्रस्त्विति । महाव्रतेपिनिष्केवल्यउक्तोविनियोगः ।

तत्रप्रथमा—

यओजिष्ठइन्द्रतंसुनोदामदोवृषन्त्स्वभिष्टिर्दास्वान् ।
सौवश्व्यंयोवनवत्स्वश्वोवृत्रासमत्सुसासहदमित्रान् ॥ १ ॥

यः । ओजिष्ठः । इन्द्र । तम् । सु । नः । दाः । मदः । वृषन् ।
सुऽअभिष्टिः । दास्वान् । सौवश्व्यम् । यः । वनवत् । सुऽअश्वः ।
वृत्रा । समत्ऽसु । ससहत् । अमित्रान् ॥ १ ॥

हेवृषन् कामानां वर्षयितरिंद्र त्वंयःपुत्रः ओजिष्ठओजस्वितमोबलवत्तमः मदः तवमादयिता स्तुतिभिःस्तोतेत्यर्थः स्वभिष्टिः शोभनाभ्येषणः दास्वान् हविषांदानं दाः तद्वान् एवंगुणविशिष्टंतंपुत्रं नोस्मभ्यं सु सुष्ठु दाः देहि यःपुत्रः स्वश्वःसन्समत्सु संग्रामेषु सौवश्व्यं शोभनाश्वानांसमूहं वनवत् हिंस्यात् तथा वृत्रा वृत्रान् वारयितॄन् अमित्रान् शत्रूंश्च सासहत् अत्यर्थमभिभवेत् तंदाइत्यन्वयः ॥ १ ॥

अथद्वितीया—

त्वांहीऽइन्द्रावसेविवाचोहवन्तेचर्षणयःशूरसातौ ।
त्वंविप्रेभिर्विपणीँरशायस्त्वोतइत्सनितावाजमर्वा ॥ २ ॥

त्वाम् । हि । इन्द्र । अवसे । विऽवाचः । हवन्ते । चर्षणयः ।
शूरऽसातौ । त्वम् । विप्रेभिः । वि । पणीन् । अशायः । त्वाऽऊतः ।
इत् । सनिता । वाजम् । अर्वा ॥ २ ॥

हेइन्द्र त्वांहि त्वामेव विवाचः विविधाःस्तुतिरूपावाचोयेषांताहशाश्चर्षणयोमनुष्याः शूरसातौ शूरैःसंभजनीयेसंग्रामे अवसे रक्षणार्थं हवन्ते आह्वयन्ति किंच त्वं विप्रेभिः विप्रैर्मेधाविभिरंगिरोभिःसार्धं पणीन् बलस्यानुचराः असुराः पणयः तान्व्यशायः विशेषेणअशाययः हतवानित्यर्थः अतः त्वोतइव् त्वयाऊतोरक्षितएव सनिता संभक्ता पुरुषः वाजमन्नं अर्वा अभिगन्ता भवति ॥ २ ॥

अथतृतीया—

त्वंताँइन्द्रोभयाँअमित्रान्दासावृत्राण्यार्याचशूर ।
वधीर्वनेवसुधितेभिरत्कैरापृत्सुदर्षिनृणांनृतम ॥ ३ ॥

त्वम् । तान् । इन्द्र । उभयान् । अमित्रान् । दासा । वृत्राणि ।
आर्या । च । शूर । वधीः । वनाऽइव । सुऽधितेभिः । अत्कैः । आ ।
पृत्ऽसु । दर्षि । नृणाम् । नृऽतम ॥ ३ ॥

हेइन्द्र त्वं तानुभयान् उभयविधान् अमित्रान शत्रून वधीः अहिंसीः केते उभयविधाः दासाउपक्षपयितॄन्कर्मविरोधिनोबलप्रभृतीनसुरान् सुपांसुलुगितिशसआकारः आर्या आर्याणि कर्मानुष्ठातृत्वेनश्रेष्ठानि वृत्राणि आवरकाणि विश्वरूपादीनिच तानुभयविधान् हेशूर त्वं हतवानित्यर्थः नृणां नेतृणांमध्ये नृतमः अतिशयेननेतः हेइन्द्र पृत्सु संग्रामेषु सुधितेभिः सुष्ठुनिहितैः अत्कैः आत्मीयैरायुधैः आदर्षि अन्यानपिशत्रूनादृणासि विदारयसि तत्रदृष्टान्तः—वनेव वनानीव यथा वृक्षजातानि कुठारादिभिः छिनत्ति तद्वत् ॥ ३ ॥

अथचतुर्थी—

सत्वंनइन्द्राकवाभिरूतीसखाविश्वायुरविताट्टधेभूः।
स्वर्षातायद्ध्वयामसित्वायुध्यन्तोनेमधितापृत्सुशूर ॥ ४ ॥

सः। त्वम्। नः। इन्द्र। अकवाभिः। ऊती। सखा। विश्वऽआयुः। अविता। वृधे। भूः। स्वःऽसाता। यत्। ह्वयामसि। त्वा। युध्यन्तः। नेमऽधिता। पृत्ऽसु। शूर ॥ ४ ॥

हेइन्द्र सतादृशस्त्वं अकवाभिरकुत्सिताभिः ऊती ऊतिभिः रक्षाभिः नोस्माकं वृधे वर्धनाय अविता रक्षिताभूर्भव तथा विश्वायुः सर्वतोगन्तात्वं अस्माकं सखाचभव नेमधिता नेमशब्दोर्धवाची उक्तंच वानेमइत्यर्धस्येति नेमे अर्धाः कतिपयाःपुरुषाः धीयन्तेएष्विति नेमधितयःसंग्रामाः तादृशेषुपृत्सुपृतनासुसंग्रामेषु युध्यन्तोयुद्धंकुर्वन्तोवयं स्वर्षाता स्वः सुष्ठु अरणीयंधनंतस्यसंभजनार्थं हेशूर त्वां यद्यदाह्वयामसि आह्वयामः तदानीं त्वं अवितासखाचभवेत्यर्थः ॥ ४ ॥

अथपंचमी—

नूनंनइन्द्रापरायचस्याभवामृळीकउतनोअभिष्टौ।
इत्थागृणन्तोमहिनस्यशर्मन्दिविष्यामपार्येगोपतमाः ॥ ५ ॥ ५ ॥

नूनम्। नः। इन्द्र। अपराय। च। स्याः। भव। मृळीकः। उत। नः। अभिष्टौ। इत्था। गृणन्तः। महिनस्य। शर्मन्। दिवि। स्याम। पार्ये। गोसऽतमाः ॥ ५ ॥ ५ ॥

हेइन्द्र त्वं नूनं अद्य नोस्माकं स्याः अस्मदीयोभव अपरायच अपरस्मिन्नन्यस्मिन्नपि काले अस्मदीयोभव उत अपिच त्वं नोस्माकं अभिष्टावभिगमनेसति मृळीकः सुखयिताभव इत्था इत्थमनेनप्रकारेण गृणन्तःस्तुवन्तोवयं गोषतमाः गवांसंभक्तृतमाः सन्तः महिनस्य महतस्त्वत्संबन्धिनि दिवि द्योतमाने पार्येदुःखस्यपारके शर्मन् शर्मणि सुखे स्याम वर्तमानाभवेम ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेपंचमोवर्गः ॥ ५ ॥

संचत्वेजग्मुरितिपंचर्चमेकादशंसूक्तं शुनहोत्रस्यार्षमैन्द्रंत्रैष्टुभं संचत्वइत्यनुक्रान्तं । तृतीयेछान्दोमिकेहनिइदमादिकेद्वेसूक्ते सूत्रितंच—संचत्वेजग्मुरितिसूक्तेइति । महाव्रतेपिनिष्केवल्ये उक्तोविनियोगः ।

तत्रप्रथमा—

संचत्वेजग्मुर्गिरइन्द्रपूर्वीर्विचत्वद्यन्तिविभ्वोमनीषाः ।
पुरानूनंचस्तुतयऋषीणांपस्पृध्रइन्द्रेअध्युक्थार्का ॥ १ ॥

सम् । च । त्वे इति । जग्मुः । गिरः । इन्द्र । पूर्वीः । वि । च । त्वत् । यन्ति । विऽभ्वः । मनीषाः । पुरा । नूनम् । च । स्तुतयः । ऋषीणाम् । पस्पृध्रे । इन्द्रे । अधि । उक्थऽअर्का ॥ १ ॥

हेइन्द्र त्वे त्वयि पूर्वीर्बह्व्योगिरः स्तुतयश्च संजग्मुः संगच्छन्ते त्वत् त्वत्तः विभ्वोविभवोविस्तृताःमनीषाः स्तोतॄणांमतयश्च वियन्ति विविधंनिर्गच्छंति शेषःपरोक्षकृतः पुरा पूर्वस्मिन्काले नूनं अद्यच ऋषीणां अतीन्द्रियार्थदर्शिनांभरद्वाजादीनांस्तुतयः स्तोत्राणि इन्द्रे अधि अधिकंपस्पृध्रे अस्पर्धन्त अहमहमिकयाइन्द्रस्यस्तवनेत्वरिताबभूवुरित्यर्थः तथा उक्थार्का उक्थंशस्त्रंतद्रूपाण्यर्काणिअर्चनसाधनानिस्तोत्राणिच पस्पृध्रे अस्पर्धन्त ॥ १ ॥

अथद्वितीया—

पुरुहूतोयःपुरुगूर्तऋभ्वाँएकःपुरुप्रशस्तोअस्तियज्ञैः ।
रथोनमहेशवसेयुजानो३स्माभिरिन्द्रोअनुमाद्योभूत् ॥ २ ॥

पुरुऽहूतः । यः । पुरुऽगूर्तः । ऋभ्वा । एकः । पुरुऽप्रशस्तः । अस्ति । यज्ञैः । रथः । न । महे । शवसे । युजानः । अस्माभिः । इन्द्रः । अनुऽमाद्यः । भूत् ॥ २ ॥

पुरुहूतः बहुभिराहूतः पुरुगूर्तःबहुभिरुद्यमितः ऋभ्वा महान् एकः प्रधानभूतः एवंगुणविशिष्टोयइन्द्रः यज्ञैः यष्टृभिःपुरुषैः यजमानसाधनैःस्तोत्रैर्वा पुरुप्रशस्तोस्ति बहुधाप्रशस्त-

स्तुतोभवति सइन्द्रः रथोन रथइव महे महते शवसे बलायतदर्थं युजानोस्मत्स्तुतिभिःयुज्यमानःसन् अस्माभिःस्तोतृभिः अनुमाद्योभूत् सर्वदास्तुत्योभवतु ॥ २ ॥

अथतृतीया–

नयंहिंसन्तिधीतयोनवाणीरिन्द्रंनक्षन्तीदभिवर्धयन्तीः ।
यदिस्तोतारःशतंयत्सहस्रंगृणन्तिगिर्वणसंशंतदस्मै ॥ ३ ॥

न । यम् । हिंसन्ति । धीतयः । न । वाणीः । इन्द्रम् । नक्षन्ति ।
इत् । अभि । वर्धयन्तीः । यदि । स्तोतारः । शतम् । यत् । सहस्रम् ।
गृणन्ति । गिर्वणसम् । शम् । तत् । अस्मै ॥ ३ ॥

यंइन्द्रं धीतयः कर्माणि परिचरणानि नहिंसन्ति नबाधन्ते वाणीर्वाण्यः स्तुतयश्च यन्नबाधन्ते दातुमसमर्थःपुरुषः अन्यकृतैःपरिचरणैःस्तुतिभिश्च भृशंखिद्यते अस्यचेन्द्रस्य बहुधनत्वाद्दातृत्वाच्च तस्मिन्प्रयुज्यमानानिपरिचरणानिस्तोत्राणिच बाधहेतवोनाभूवन्नित्यर्थः किंतर्हीत्यतआह तमिन्द्रं वर्धयन्तीः वर्धयंत्यःअभिनक्षन्तिइत् अभिगच्छन्तिएव अपिच गिर्वणसंगिरांसंभक्तारमिन्द्रं शतं शतसंख्याकाःस्तोतारोयदि गृणन्ति स्तुवन्ति यत्र यदिच सहस्रं सहस्रसंख्याकाःस्तोतारः स्तुवन्ति तत्सर्वस्तोत्रं अस्माइन्द्राय शं सुखकरंभवति ॥ ३ ॥

अथचतुर्थी–

अस्माएतद्दिव्य१र्चेवमासामिमिक्षइन्द्रेन्ययामिसोमः ।
जनंनधन्वन्नभिसंयदापःसत्रावावृधुर्हवनानियज्ञैः ॥ ४ ॥

अस्मै । एतत् । दिवि । अर्चाऽइव । मासा । मिमिक्षः । इन्द्रे । नि ।
अयामि । सोमः । जनम् । न । धन्वन् । अभि । सम् । यत् । आपः ।
सत्रा । वावृधुः । हवनानि । यज्ञैः ॥ ४ ॥

एतत् एतस्मिन् दिवि दिवसे सौत्येहनि अर्चेव अर्चनसाधनेन स्तोत्रेणेव मासा मानेन इन्द्रायत्वावृत्रघ्नइत्यादिमंत्रसाध्येनयुक्तः मिमिक्षः वसतीवर्येकधनाख्याभिरद्भिरासिक्तःसोमः अस्मै विभक्तिव्यत्ययः अस्मिन्निन्द्रे न्ययामि नियतोभूत् यद्वा अस्मैइन्द्राय एतत्स्तोत्रंब्रवाणीतिशेषः दिविद्युलोके अर्चेव अर्कःसूर्यइव मासा लुप्तोपममेतत् भाति परिच्छिनत्तीतिमास-

श्चन्द्रमाः सइव मिमिक्षोः वृष्ट्युदकानांसेक्ता यइन्द्रोवर्तते यस्मिन्निन्द्रे अभिषुतः सोमेनियम्यतेस्म किंच तमिन्द्रं यज्ञैर्यजनसाधनैः पुरोडाशादिभिर्हविर्भिःसार्धं हवनानि स्तोत्राणि सत्रासह वावृधुरवर्धयन् तत्रदृष्टान्तः—धन्वन्धन्वनि मरुदेशे अभि अभिमुखं संयत्सम्यग्यत्योगच्छंत्यआपः जनंन प्राणिनमिव यथा मरुदेशे उपलभ्यमानाआपः प्राणिनंवर्धयन्तितद्वत्॥४॥

अथपंचमी—

अस्मा॑ए॒तन्म॒ह्यां॑ङ्गू॒षम॑स्मा॒इन्द्रा॑य॒स्तो॒त्रंम॒तिभि॑रवाचि ।
अस॒द्यथा॑मह॒ति॑र्वृत्र॒तूर्य॒इन्द्रो॑वि॒श्वायु॑रवि॒ता॒वृध॑श्च ॥ ५ ॥ ६ ॥

अस्मै॑ । ए॒तत् । मर्हि॑ । आ॒ङ्गू॒षम् । अ॒स्मै॑ । इन्द्रा॑य । स्तो॒त्रम् ।
म॒तिऽभिः॑ । अ॒वा॒चि॒ । अस॑त् । यथा॑ । म॒ह॒ति । वृ॒त्र॒ऽतूर्ये॑ ।
इन्द्रः॑ । वि॒श्वऽआ॑युः । अ॒वि॒ता । वृ॒धः । च॒ ॥ ५ ॥ ६ ॥

अस्मैइन्द्राय महि महत् एतत् आंगूषं स्तोत्रं मतिभिः स्तोतृभिरवाचि उक्तमभूत् अस्मैइंद्राय स्तोत्रमितिपुनरुक्तिरादरार्था विश्वायुः सर्वत्रगन्ता सइन्द्रः महति प्रभूते वृत्रतूर्ये संग्रामे यथा येनप्रकारेण अस्माकं अविता रक्षकः वृधोवर्धयिताच असद्भवेत् तथा अवाचीत्यन्वयः ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेषष्ठोवर्गः ॥ ६ ॥

कदाभुवन्नितिपंचर्चंद्वादशंसूक्तं नरस्यार्षंत्रैष्टुभमैन्द्रं तथाचानुक्रान्तं—कदानरस्त्विति । तृतीयेछन्दोमेमहाव्रतेचर्निष्केवल्येउक्तोविनियोगः ।

तत्रप्रथमा—

क॒दा भु॑वन्रथ॒क्षया॑णि॒ब्रह्म॑क॒दा स्तो॒त्रे स॑हस्रपो॒ष्यं॑दाः ।
क॒दा स्तोमं॑वासयो॒ऽस्य रा॒या क॒दा धियः॑ करसि॒ वाज॑रत्नाः ॥ १ ॥

क॒दा । भु॒व॒न् । र॒थ॒ऽक्षया॑णि । ब्रह्म॑ । क॒दा । स्तो॒त्रे । स॒ह॒स्र॒ऽपो॒ष्य॑म् ।
दाः॒ । क॒दा । स्तोम॑म् । वा॒स॒यः॒ । अ॒स्य । रा॒या । क॒दा । धियः॑ ।
क॒र॒सि॒ । वाज॑ऽरत्नाः ॥ १ ॥

हेइन्द्र ब्रह्मणि ब्रह्माणि स्तोत्राण्यस्मदीयानि रथक्षयाणि रथनिवासानि कदाकस्मिन काले भुवन् भवेयुः रथेवस्थितं त्वां कदाप्राप्नुवन्तीत्यर्थः कदा कस्मिनकाले स्तोत्रे स्तुवते मह्यं सहस्रपोष्यं सहस्रसंख्याकपुरुषपोषकं गोसमूहं पुत्रं वादाः दद्याः कदाच अस्यममस्तोतुः स्तोमं स्तोत्रं राया धनेन वासयः धियः कर्माणिचाग्निहोत्रादीनि वाजरत्नाः वाजैरन्नैः रमणीयाः कदाकस्मिन्काले करसि कुर्याः एवंस्तोता फलस्यविलंबमसहमानः इन्द्रमनयापृष्टवान् ॥ १ ॥

अथद्वितीया—

कर्हिंस्वित्तदिन्द्रयन्नृभिर्नॄन्वीरैर्वीरान्नीळयासेजयाजीन् ।
त्रिधातुगाअधिजयासिगोष्विन्द्रद्युम्नंस्वर्वद्धेह्यस्मे ॥ २ ॥

कर्हि । स्वित् । तत् । इन्द्र । यत् । नृऽभिः । नॄन् । वीरैः । वीरान् । नीळयासे । जय । आजीन् । त्रिऽधातु । गाः । अधि । जयासि । गोषु । इन्द्र । द्युम्नम् । स्वःऽवत् । धेहि । अस्मे इति ॥ २ ॥

फलस्यविलंबमसहमानऋषिः अनयापीन्द्रंपृच्छति हेइन्द्र कर्हिस्वित् कदाखलु तद्भवेत् नृभिरस्मदीयैःपुरुषैः नॄन् शत्रुपुरुषान् तथा वीरैरस्मदीयैःपुत्रैः वीरान्शत्रुपुत्रांश्च यन्नीलयासेत्वं संश्लेषयेः संयोजयेः नीलयतिःसंश्लेषणकर्मा ईदृशं युद्धयत्संश्लेषणंतत्कदाभवेदितिवितर्कः अपिचास्मदर्थं त्वं आजीन् संग्रामान् कदा जय जयेः कदाच गोष्वभिगन्तृषुशत्रुषु विद्यमानाः त्रिधातु त्रिधातूनां क्षीरदधिघृतानांत्रयाणां धारयित्रीर्गाः अधिजयासि अधिकंजयेः हेइन्द्र त्वं स्वर्वत् व्याप्तिमत् द्युम्नं धनं अस्मे अस्मासु कदा धेहि धारयेः ॥ २ ॥

अथतृतीया—

कर्हिंस्वित्तदिन्द्रयज्जरित्रेविश्वप्सुब्रह्मकृणवःशविष्ठ ।
कदाधियोननियुतोयुवासेकदागोमघाहवनानिगच्छाः ॥ ३ ॥

कर्हि । स्वित् । तत् । इन्द्र । यत् । जरित्रे । विश्वऽप्सु । ब्रह्म । कृणवः । शविष्ठ । कदा । धियः । न । निऽयुतः । युवासे । कदा । गोऽमघा । हवनानि । गच्छाः ॥ ३ ॥

अनयापिकतिचित्प्रश्नाःक्रियन्ते हेइन्द्र कर्हिस्वित् कदाखलु तन्नुएव हेशविष्ठ बलवत्त-मेन्द्र त्वं जरित्रे स्तोत्रे विश्वप्सु बहुविधरूपं ब्रह्मान्नं कृणवः करोषीतियत् तत्कदाभवेदितिवि-तर्कः कदाच धियः कर्माणि नेतिसमुच्चये नियुतः स्तुतीश्च युवासे आत्मनियोजयेः कदाच त्वं गोमघाः गोमघानि गवांदातॄणि मंहतेर्दानार्थस्यरूपमुत्तरपदं हवनानि स्तोत्राणि गच्छाः अ-भिगच्छेः ॥ ३ ॥

अथचतुर्थी—

सगोमंघाजरित्रेअश्वंश्चन्द्रावाजश्रवसोअधिधेहिपृक्षः ।
पीपिहीषःसुदुघामिन्द्रधेनुंभरद्वाजेषुसुरुचोरुरुच्याः ॥ ४ ॥

सः । गोऽमंघाः । जरित्रे । अश्वंऽचन्द्राः । वाजंऽश्रवसः । अधि । धेहि । पृक्षः । पीपिहि । इषः । सुऽदुघाम् । इन्द्र । धेनुम् । भरत्ऽवांजेषु । सुऽरुचः । रुरुच्याः ॥ ४ ॥

हेइन्द्र सत्वं जरित्रे स्तोत्रे गोमघाः गवांदात्रीः अश्वश्चन्द्राः अश्वैराह्लादयन्तीः वाजश्र-वसः वाजैर्बलैःप्रसिद्धाः एवंभूताः पृक्षोन्नानि भरद्वाजेषु भरद्वाजपुत्रेष्वस्मासु अधिधेहि धारय तथा इषस्तान्यन्नानि सुदुघां शोभनदोग्ध्रीं धेनुं गांच हेइन्द्र पीपिहि प्यायय अपिच ताइषो-गौश्च सुरुचः शोभनदीप्तयोयथाभवन्तितथा त्वं रुरुच्याः दीपयेः शोभनदीप्तियुक्ताश्चताःस-न्त्वित्यर्थः ॥ ४ ॥

अथपंचमी—

तमानूनंवृजनमन्यथाचिच्छूरोयच्छक्रविदुरोगृणीषे ।
मानिररंशुक्रदुघस्यधेनोराङ्गिरसान्ब्रह्मणाविप्रजिन्व ॥ ५ ॥ ७ ॥

तम् । आ । नूनम् । वृजनम् । अन्यथा । चित् । शूरः । यत् । शक्र । वि । दुरः । गृणीषे । मा । निः । अरम् । शुक्रऽदुघस्य । धेनोः । आङ्गिरसान् । ब्रह्मणा । विप्र । जिन्व ॥ ५ ॥ ७ ॥

हेइन्द्र त्वं नूनमद्यतनं वृजनं बाधकमस्मदीयंशत्रुं अन्यथाचित् अन्येनैवप्रकारेण योजय येनप्रकारेणसर्वेजीवन्तितद्विलक्षणंप्रकारंमरणाख्यंप्रापयेत्यर्थः आकारःपूरकः हेशक्र सर्वकार्येषुशक्तेन्द्र शूरः शौर्योपेतः विदुरः विशेषेणदारयिताशत्रूणां यद्वा दुरोद्वाराणिशत्रुसंबंधीनिविघटयंस्त्वं यत्यस्माद्गृणीषेस्माभिःस्तूयसे तस्मात्कारणात् शुक्रदुघस्य शुक्राणांनिर्मलानांदोग्धुरिन्द्रस्य धेनोर्वाचः स्तोत्रात् मानिररं मानिर्गच्छेयं यद्वा शुक्रस्य पयसोदोग्ध्याधेनोः त्वयाद्त्तायागोःसकाशात् मानिर्गच्छेयं अरमित्याख्यातंऋगतावित्यस्यरूपं सा सर्वदास्मासुनिवसत्वित्यर्थः हेविप्र प्राज्ञेन्द्र आंगिरसान् अंगिरोगोत्रजानस्मान् ब्रह्मणान्नेन जिन्व प्रीणय ॥५॥

॥ इतिचतुर्थस्यसप्तमेसप्तमोवर्गः ॥ ७ ॥

सत्रामदासइतिपंचर्चंत्रयोदशंसूक्तं नरस्यार्षं त्रैष्टुभमैन्द्रं सत्रेत्यनुक्रान्तं पृष्ठ्यस्यपंचमेहनिनिष्केवल्यएतत्सूक्तंशस्यं सूत्रितंच—प्रेदंब्रह्मइन्द्रोमदायसत्रामदासइतिनिष्केवल्यमिति । विश्वजितिमाध्यंदिनसवने प्रशास्तुःशस्त्रे इदं सामसूक्ताख्यंशंसनीयं सूत्रितंच—सत्रामदासोयोजातएवा भूरेकइतिसामसूक्तानीति । महाव्रतेपिनिष्केवल्येउक्तोविनियोगः ।

तत्रप्रथमा—

स॒त्रा मदा॑स॒स्तव॑ वि॒श्वज॑न्याः स॒त्रा रायो॒ऽध॒ ये पार्थि॑वासः ।
स॒त्रा वाजा॑नामभवो विभ॒क्ता यद्दे॒वेषु॑ धा॒रय॑था असु॒र्य॑म् ॥ १ ॥

स॒त्रा । मदा॑सः । तव॑ । वि॒श्वऽज॑न्याः । स॒त्रा । रायः॑ । अध॑ । ये । पार्थि॑वासः । स॒त्रा । वाजा॑नाम् । अ॒भ॒वः॒ । वि॒ऽभ॒क्ता । यत् । दे॒वेषु॑ । धा॒रय॑थाः । अ॒सु॒र्य॑म् ॥ १ ॥

हेइन्द्र तव त्वदीयामदासःसोमपानजनितामदाःसत्रा सत्यनामैतत् सत्यं विश्वजन्याः सर्वजनहिताभवन्ति यद्वा सत्रेतिमहन्नाम महान्तस्तवमदाइतियोज्यं अधापिच पार्थिवासः पृथिव्युपलक्षितेलोकत्रयेभवाःत्वदीयायेरायोधनसमूहाःसन्ति सत्रा तेसत्यं विश्वजनहिताभवन्तीत्यन्वयः किंच त्वं वाजानामन्नानां सत्रासत्यं विभक्ता दाता अभवोभवसि यद्वा सत्रा महतांवाजानामितियोज्यं यत् यस्मात् त्वं देवेषुमध्येअसुर्यंबलं धारयथाः अतःकारणात् त्वमेवंकरोषीत्यर्थः ॥ १ ॥

अथद्वितीया–

अनुप्रयेजेजनओजोअस्यसत्रादधिरेअनुवीर्याय।
स्यूमगृभेदुधयेर्वतेचक्रतुंवृञ्जन्त्यपिवृत्रहत्ये॥ २॥

अनु। प्र। येजे। जनः। ओजः। अस्य। सत्रा। दधिरे।
अनु। वीर्याय। स्यूमऽगृभे। दुधये। अर्वते। च। क्रतुम्।
वृञ्जन्ति। अपि। वृत्रऽहत्ये॥ २॥

अस्येन्द्रस्य ओजोबलं जनोयजमानः अनुप्रयेजे सन्ततंप्रकर्षेणयजतेपूजयति अपिच तमिन्द्रं वीर्याय वीरकर्मकर्तुं सत्रा सत्यं अनुदधिरे पुरोदधिरे यजमानाः यद्वा सत्रा महान्तमिन्द्रमितियोज्यं अपिच स्यूमगृभे स्यूमः स्यूतान् अविच्छेदेनवर्तमानान् शत्रून् गृह्णते दुधये दुधिर्हिंसाकर्मा तेषांहिंसकाय अर्वते शत्रूणामभिगंत्रेच तस्माइन्द्राय क्रतुं कर्मपरिचरणात्मकं वृंजन्ति निष्पादयन्ति किमर्थं वृत्रहत्ये वृत्रस्यवारकस्यशत्रोर्हनननिमित्तम्॥ २॥

अथतृतीया–

तंसध्रीचीरूतयोवृष्ण्यानिपौंस्यानिनियुतःसश्चुरिन्द्रम्।
समुद्रंनसिन्धवउक्थशुष्माउरुव्यचसंगिरआविशन्ति॥ ३॥

तम्। सध्रीचीः। ऊतयः। वृष्ण्यानि। पौंस्यानि। निऽयुतः।
सश्चुः। इन्द्रम्। समुद्रम्। न। सिन्धवः। उक्थऽशुष्माः।
उरुऽव्यचसम्। गिरः। आ। विशन्ति॥ ३॥

तंइंद्रं ऊतयोमरुतः सध्रीचीः सहांचंत्यः संगताभूत्वा सश्चुः सचन्ते सेवन्ते यद्वा ऊतयस्तर्पकाण्यन्नानिसहवर्तमानानिभूत्वा सेवन्ते तथा वृष्ण्यानि वीर्याणिपौंस्यानि बलानिच नियुतोरथेयुज्यमानादडवाश्च तमिन्द्रं सेवन्ते अपिच उक्थशुष्माः उक्थंशस्त्रं तदेवशुष्मबलं यासां तादृशागिरः स्तुतयश्च उरुव्यचसं विस्तीर्णव्याप्तिकं तमिन्द्रं आविशन्ति प्रविशन्ति तत्रदृष्टान्तः–समुद्रंनसिन्धवः यथास्यन्दनशीलानद्यः समुद्रमाविशंति आविश्यच विभक्ततयानदृश्यन्ते एवंसर्वाअपिस्तुतयः इन्द्रेणैकीभवन्तीत्यर्थः॥ ३॥

अथचतुर्थी—

सरायस्खामुपसृजागृणानःपुरुश्चन्द्रस्यत्वमिन्द्रवस्वः।
पतिर्बभूथासमोजनानामेकोविश्वस्यभुवनस्यराजा॥ ४॥

सः। रायः। खाम्। उप। सृज। गृणानः। पुरुऽचन्द्रस्य।
त्वम्। इन्द्र। वस्वः। पतिः। बभूथ। असमः। जनानाम्।
एकः। विश्वस्य। भुवनस्य। राजा॥ ४॥

हेइन्द्र गृणानः स्तूयमानः सत्वं रायोधनस्य खां नदीनामैतत् अत्रतत्संबद्धाधाराल-क्ष्यते धारां उपसृज विमुंच अस्माभिःसंयोजयेत्यर्थः कीदृशस्यधनस्य पुरुश्चन्द्रस्य बहूना-माह्लादकस्य वस्वः निवासकस्य अपिच असमोनुपमः सर्वोत्कृष्टस्त्वं जनानां सर्वेषांप्राणिनां पतिरधिपतिर्बभूथ बभूविथ तथा विश्वस्य सर्वस्य भुवनस्यभूतजातस्य एकःअसाधारणः राजा ईश्वरश्च बभूविथ॥ ४॥

अथपंचमी—

सनुश्रुधिश्रुत्यायोदुवोयुर्द्यौर्नभूमाभिरायोअर्यः।
असोयथानःशवसाचकानोयुगेयुगेवयसाचेकितानः॥ ५॥ ८॥

सः। नु। श्रुधि। श्रुत्या। यः। दुवःऽयुः। द्यौः। न। भूम।
अभि। रायः। अर्यः। असः। यथा। नः। शवसा। चकानः।
युगेऽयुगे। वयसा। चेकितानः॥ ५॥ ८॥

हेइन्द्र श्रुत्या श्रुत्यानि श्रोतव्यानि स्तोत्राणि नु क्षिप्रं श्रुधि शृणु यस्त्वं दुवोयुः अ-स्मदीयंपरिचरणमात्मनइच्छन् अर्यः अरेःसंबन्धीनि रायोधनानि भूम बहुतराणि द्यौर्न सू-र्यइवाभिभवसि सत्वं श्रुधीत्यन्वयः अपिच शवसा आत्मीयेनबलेन स्तोतव्येन युक्तश्चकानः स्तूयमानः युगेयुगे कालेकाले वयसा हविर्लक्षणेनान्नेन चेकितानः प्रज्ञायमानस्त्वं यथा येनप्रकारेणनोस्माकमसाधारणोसि तथा असः स्याः॥ ५॥

॥ इतिचतुर्थस्यसप्तमेष्टमोवर्गः॥ ८॥

अर्वाग्रथमितिपंचर्चंचतुर्दशंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं अर्वाग्रथमित्यनुक्रान्तं महाव्रतेनिष्केवल्येउक्तोविनियोगः ।

तत्रप्रथमा—

अर्वाग्रथंविश्ववारन्तउग्रेन्द्रंयुक्तासोहरयोवहन्तु ।
कीरिश्चिद्धित्वाहवतेस्वर्वान्नृधीमहिसधमादस्तेअद्य ॥ १ ॥

अर्वाक् । रथम् । विश्वऽवारम् । ते । उग्र । इन्द्र । युक्तासः ।
हरयः । वहन्तु । कीरिः । चित् । हि । त्वा । हवते ।
स्वःऽवान् । ऋधीमहि । सधऽमादः । ते । अद्य ॥ १ ॥

हेउग्र उद्गूर्णबलेन्द्र युक्तासोरथेनयुक्ताः हरयोश्वाः तेत्वदीयं विश्ववारं विश्वैर्वरणीयंरथं अर्वाक् अस्मदभिमुखं वहन्तु आनयन्तु हियस्मात् स्वर्वान् स्वः सुष्ठु वरणीयंगुणजातं तद्वान् कीरिश्चित् स्तोता भरद्वाजऋषिः त्वा त्वां हवते आह्वयति तस्मात्कारणात् त्वदीयंरथं अभिमुखं वहन्त्विइत्यर्थः वयंच अद्येदानीं ते त्वया सधमादः सहमाद्यन्तऋधीमहि समृद्धाभवेम ॥ १ ॥

तृतीयेपर्यायेच्छावाकस्यप्रोद्रोणइत्येषाशस्त्रयाज्या सूत्रितंच—प्रोद्रोणेहरयःकर्माग्मन्निति याज्येइति ।

सैषात्रद्वितीया—

प्रोद्रोणेहरयःकर्माग्मन्पुनानासऋज्यन्तोअभूवन् ।
इन्द्रोनोअस्यपूर्व्यःपपीयाद्युक्षोमदस्यसोम्यस्यराजा ॥ २ ॥

प्रो इति । द्रोणे । हरयः । कर्म । अग्मन् । पुनानासः ।
ऋज्यन्तः । अभूवन् । इन्द्रः । नः । अस्य । पूर्व्यः । पपीयात् ।
द्युक्षः । मदस्य । सोम्यस्य । राजा ॥ २ ॥

हरयोहरितवर्णाः सोमाः कर्म अस्मदीयंयज्ञं प्रोअग्मन् प्रकर्षेणगच्छन्ति प्राप्नुवन्ति प्राप्यच पुनानासः पूयमानाः द्रोणे द्रोणकलशे ऋज्यन्तःऋजुगच्छन्तःअभूवन्भवन्ति पूर्व्यः

पुरातनः द्युक्षोदीप्तेर्निवासभूतः द्युस्थानोवा मदस्य मदकरस्य सोम्यस्य सोमस्य राजा ईश्वरः एवंभूतइन्द्रश्च अस्य इमं स्तोमं पपीयात् पिबतु ॥ २ ॥

अथतृतीया—

आसस्राणासःशवसानमच्छेन्द्रंसुचक्रेरथ्यासोअश्वाः ।
अभिश्रवऋज्यन्तोवहेयुर्नूचिन्नुवायोरमृतंविदस्येत् ॥ ३ ॥

आऽसस्राणासः । शवसानम् । अच्छ । इन्द्रम् । सुऽचक्रे ।
रथ्यासः । अश्वाः । अभि । श्रवः । ऋज्यन्तः । वहेयुः । नु ।
चित् । नु । वायोः । अमृतम् । वि । दस्येत् ॥ ३ ॥

आसस्राणासः परितोगच्छन्तः रथ्यासोरथेयुक्ताःअश्वाः ऋज्यन्तः ऋजुगमनाःसन्तः सुचक्रे शोभनचक्रे रथेवस्थितं शवसानं बलमिवाचरन्तमिन्द्रं श्रवः श्रवणीयमस्मदीयंहविरच्छाभिमुख्येनअभिवहेयुरावहेयुः नूचिदितिनिपातोनिषेधेअत्रवर्तते अमृतं अमरणहेतुभूतं सोमलक्षणं हविः वायोर्हेतोः नु इदानीं नूचित् नैवविदस्येत् क्षयंनप्राप्नुयात् पात्रगृहीतः सोमोवायुनाशुष्यति ततःपूर्वंतत्पानार्थं अश्वाइन्द्रमभिवहेयुरित्यर्थः ॥ ३ ॥

अथचतुर्थी—

वरिष्ठोअस्यदक्षिणामियर्तीन्द्रोमघोनांतुविकूर्मितमः ।
ययावज्रिवःपरियास्यंहोमघाचधृष्णोदयसेविसूरीन् ॥ ४ ॥

वरिष्ठः । अस्य । दक्षिणाम् । इयर्ति । इन्द्रः । मघोनाम् ।
तुविकूर्मिऽतमः । यया । वज्रिऽवः । परिऽयासि । अंहः ।
मघा । च । धृष्णो इति । दयसे । वि । सूरीन् ॥ ४ ॥

वरिष्ठउरुतमः तुविकूर्मितमः अतिशयेनबहुविधकर्माइन्द्रः मघोनां मघवतां हविर्लक्षणधनोपेतानांमध्ये अस्ययजमानस्य दक्षिणां यज्ञेदातव्यां इयर्ति प्रेरयति यद्वा मघोनामिति अस्येत्यनेनसमानाधिकरणं वचनव्यत्ययः मघोनोहविष्मतोस्ययजमानस्येत्यर्थः शेषःप्रत्यक्षकृतः हेवज्रिवोवज्रवन्निन्द्र ययादक्षिणयादत्तया अंहः पापं यज्ञसंबन्धि परियासि

विनाशयसि हे धृष्णो धर्षक मघा मघानि धनानि सूरीन्स्तोतॄन्पुत्रांश्च यया च दक्षिणया विदयसे प्रयच्छसि तादृशीं दक्षिणां प्रेरयसीत्यर्थः ॥ ४ ॥

अथ पंचमी—

इन्द्रो॒ वाज॑स्य॒ स्थवि॑रस्य दा॒तेन्द्रो॑ गी॒र्भिर्व॑र्धतां वृ॒द्धम॑हाः ।
इन्द्रो॑ वृ॒त्रं हनि॑ष्ठो अस्तु॒ सत्वा ता सू॒रिः पृ॑णति॒ तूतु॑जानः ॥ ५ ॥ ९ ॥

इन्द्रः॑ । वाज॑स्य । स्थवि॑रस्य । दा॒ता । इन्द्रः॑ । गी॒ःऽभिः॑ । व॒र्ध॒ता॒म् । वृ॒द्धऽम॑हाः । इन्द्रः॑ । वृ॒त्रम् । हनि॑ष्ठः । अ॒स्तु॒ । सत्वा॑ । आ । ता । सू॒रिः । पृ॒ण॒ति॒ । तूतु॑जानः ॥ ५ ॥ ९ ॥

अयमिन्द्रः स्थविरस्य श्रेष्ठस्य वाजस्यान्नस्य बलस्य वा दाता भवतु स चेन्द्रो वृद्धमहाः प्रवृद्धतेजस्कः सन् गीर्भिरस्मदीयाभिः स्तुतिभिः वर्धतां सत्वा शत्रूणां शातयिता स इन्द्रः वृत्रं आवरकं शत्रुं हनिष्ठः हन्तृतमोस्तु भवतु अपि च सूरिः प्रेरकः स इन्द्रस्तूतुजानस्त्वरमाणः ता तानि धनानि आपृणति अस्मभ्यं प्रयच्छतु ॥ ५ ॥

॥ इति चतुर्थस्य सप्तमे नवमो वर्गः ॥ ९ ॥

अपादित इति पंचर्चं पंचदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं अपादित्यनुक्रान्तं महाव्रते निष्केवल्ये उक्तो विनियोगः ।

तत्र प्रथमा—

अपा॑दि॒त उदु॑ नश्चि॒त्रत॑मो म॒हीं भ॑र्षद्द्यु॒मती॒मिन्द्र॑हूतिम् ।
पन्य॑सीं धी॒तिं दैव्य॑स्य॒ याम॒ञ्जन॑स्य रा॒तिं व॑नते सु॒दानुः॑ ॥ १ ॥

अपा॑त् । इ॒तः । उत् । ऊँ इति॑ । नः॒ । चि॒त्रऽत॑मः । म॒हीम् । भ॒र्ष॒त् । द्यु॒ऽमती॑म् । इन्द्र॑ऽहूतिम् । पन्य॑सीम् । धी॒तिम् । दैव्य॑स्य । याम॑न् । जन॑स्य । रा॒तिम् । व॒न॒ते॒ । सु॒ऽदानुः॑ ॥ १ ॥

चित्रतमश्चायनीयतमः आश्चर्यतमो वा स इन्द्रः नोस्मदीयात् इतः अस्मात् ग्रहचमसादेः अपात् सोमं पिबतु यद्वा इतोस्माच्छत्रोः नोस्मानपात् पातु रक्षतु उदु इत्येतौ पूरणौ तथा महीं मह

तीं द्युमतीं दीप्तिमतीं इन्द्रहूतिं इन्द्रस्यस्तुतिं भर्षत् सइन्द्रोबिभर्तु धारयतु दैव्यस्य देवसंबन्धि भोजनस्य यामन् यामनि यज्ञेक्रियमाणां पन्यसीं स्तुत्यतमांधोतिं परिचरणरूपांक्रियां रार्तिं दातव्यंहविश्च सुदानुः शोभनदानइन्द्रः वनते संभजतु ॥ १ ॥

अथद्वितीया—

दूराच्चिदावसतोअस्यकर्णाघोषादिन्द्रस्यतन्यतिब्रुवाणः ।
एयमेनंदेवहूतिर्ववृत्यान्मद्र्य१गिन्द्रमियमृच्यमाना ॥ २ ॥

दूरात् । चित् । आ । वसतः । अस्य । कर्णा । घोषात् । इन्द्रस्य ।
तन्यति । ब्रुवाणः । आ । इयम् । एनम् । देवऽहूतिः । ववृत्यात् ।
मद्र्यक् । इन्द्रम् । इयम् । ऋच्यमाना ॥ २ ॥

अस्येन्द्रस्य कर्णा कर्णौ दूराच्चित् दूरदेशादपि आवसतः स्तोत्रश्रवणार्थमागच्छतः इन्द्रस्य घोषात् घोषणीयात्स्तोत्राद्धेतोः ब्रुवाणः स्तुवन् स्तोता तन्यति शब्दंकरोति यद्वा सर्वत्रविस्तारयति देवहूतिः देवस्येन्द्रस्यआह्वानरूपाइयंस्तुतिश्च ऋच्यमानास्वयंप्रेर्यमाणासतीएनमिन्द्रं मद्र्यक् मदभिमुखं आववृत्यात् आवर्तयतु पुनरियमितिपूरणः ॥ २ ॥

अथतृतीया—

तंवोधियापरमयापुराजामजरमिन्द्रमभ्यनूष्यर्कैः ।
ब्रह्माचगिरोदधिरेसमस्मिन्महांश्चस्तोमोअधिवर्धदिन्द्रे ॥ ३ ॥

तम् । वः । धिया । परमया । पुराऽजाम् । अजरम् । इन्द्रम् ।
अभि । अनूषि । अर्कैः । ब्रह्म । च । गिरः । दधिरे । सम् । अस्मिन् ।
महान् । च । स्तोमः । अधि । वर्धत् । इन्द्रे ॥ ३ ॥

हेइन्द्र तं तादृशमिन्द्रं वः त्वां व्यत्ययेनबहुवचनं परमया उत्कृष्टतमया धिया स्तुत्या अर्कैरर्चनसाधनैर्हविर्भिः सार्धं अभ्यनूषि अभिष्टौमि कीदृशं पुराजां पूर्वस्मिन्कालेजातं चिरन्तनं अजरं जरारहितं नित्यं अतःकारणात् अस्मिन्निन्द्रे ब्रह्म ब्रह्माणि हविर्लक्षणान्यन्नानि गिरः स्तुतयश्च संदधिरे संधीयन्ते संश्लिष्यन्ते महान्प्रवृद्धःस्तोमश्च अधिवर्धत् अधिकंवर्धते ॥ ३ ॥

अथचतुर्थी—

वर्धाद्यंयज्ञउतसोममिन्द्रंवर्धाद्ब्रह्मगिरंउक्थाचमन्म ।
वर्धाहैनमुषसोयामन्नक्तोर्वर्धान्मासाःशरदोद्यावइन्द्रम् ॥ ४ ॥

वर्धात् । यम् । यज्ञः । उत । सोमः । इन्द्रम् । वर्धात् । ब्रह्म । गिरः ।
उक्था । च । मन्म । वर्ध । अह । एनम् । उषसः । यामन् । अक्तोः ।
वर्धान् । मासाः । शरदः । द्यावः । इन्द्रम् ॥ ४ ॥

यमिन्द्रं यज्ञोयागः वर्धात् वर्धयति उतापिच तत्साधनभूतःसोमश्च यंइन्द्रं वर्धयति तथाब्रह्म हविर्लक्षणमन्नंचपुरोडाशादिकं यमिन्द्रं वर्धात् वर्धयतिगिरः स्तोत्राणि मन्म मननीयानि उक्था उक्थशस्त्राणिचयं वर्धयन्ति एनमिन्द्रं उषसश्च अक्तोः रात्रेः यामन् यामनि गमनेसति वर्धयन्ति मासाः शरदः संवत्सराश्च द्यावोदिवसाश्चएनमिन्द्रं वर्धान् वर्धयन्ति ॥ ४॥

अथपंचमी—

एवाजज्ञानंसहसेअसामिवावृधानंराधसेचश्रुताय ।
महामुग्रमवसेविप्रनूनमाविवासेमवृत्रतूर्येषु ॥ ५ ॥ १० ॥

एव । जज्ञानम् । सहसे । असामि । वावृधानम् । राधसे । च ।
श्रुताय । महाम् । उग्रम् । अवसे । विप्र । नूनम् । आ ।
विवासेम । वृत्रऽतूर्येषु ॥ ५ ॥ १० ॥

हेविप्र मेधाविन्निन्द्र एव एवंजज्ञानं प्रादुर्भवन्तं सहसे शत्रूणामभिभवार्थं असामि बहुलं वावृधानं वर्धमानं महां महान्तं उग्रमुद्गूर्णबलंत्वांनूनं अद्य वृत्रतूर्येषु संग्रामेषु श्रुताय विश्रुताय राधसे धनायच अवसे रक्षणायच आविवासेम परिचरेम ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेदशमोवर्गः ॥ १० ॥

मंद्रस्यकविरितिपंचर्चंषोळशंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं मन्द्रस्येत्यनुक्रान्तं गतोविनियोगः ।

तत्रप्रथमा—

मन्द्रस्यंकुवेर्दिव्यस्यवह्नेर्विप्रंमन्मनोवचुनस्युमध्वंः ।
अपांनस्तस्यंसचुनस्यंदेवेषोयुवस्वगृणतेगोअंग्राः ॥ १ ॥

मन्द्रस्यं । कुवेः । दिव्यस्यं । वह्नेः । विप्रंऽमन्मनः । वचनस्यं । मध्वंः ।
अपाः । नः । तस्यं । सचुनस्यं । देव । इषंः । युवस्व । गृणते । गोऽअंग्राः ॥ १ ॥

मन्द्रस्य मोदनस्य मदकरस्यवा कवेः विक्रान्तस्य दिव्यस्य दिविभवस्य वह्नेर्वोढुः विप्रमन्मनः विप्रामेधाविनोमन्मःस्तोतारोयस्यसःतथोक्तःतस्य वचनस्य वचनीयस्य स्तुत्यस्य तस्यसर्वत्रप्रसिद्धस्य सचनस्य सेव्यस्य एवंभूतस्य मध्वोमधुनः सोमस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी एवंभूतं नोस्मदीयंसोमं हेइन्द्र त्वं अपाःपिब अपिच हेदेव द्योतमानेन्द्र गृणते स्तुवते तृतीयार्थेचतुर्थी स्तुवतामयागोअग्राः गावः अग्रेप्रमुखेयासांतादृशाइषोन्नानि युवस्व संयोजय ॥ १ ॥

अथद्वितीया—

अयमुंशानःपर्यद्रिमुस्राऋतधीतिभिर्ऋतयुग्युंजानः ।
रुजदरुंग्णंविवलस्यसानुंपणींर्वचोंभिरभियोधदिन्द्रंः ॥ २ ॥

अयम् । उशानः । परि । अद्रिम् । उस्राः । ऋतधीतिऽभिः ।
ऋतऽयुक् । युजानः । रुजत् । अरुंग्णम् । वि । वलस्यं । सानुम् ।
पणीन् । वचंःऽभिः । अभि । योधत् । इन्द्रः ॥ २ ॥

अयमिन्द्रः अद्रिं बलेन गोपिधानाय निर्मितं शिलोच्चयं परि परितः पर्वतसमीपे विद्यमानाउस्रागाः उशानः कामयमानः ऋतधीतिभिः सत्यकर्मभिः अंगिरोभिः युजानः संगच्छमानः ऋतयुक् ऋतेनतत्कृतेनस्तोत्रेणयुक्तश्च भूत्वा बलस्यासुरस्य स्वभूतं सानुमुच्छ्रितंपर्वतं अरुग्णं अन्यैरभग्नं विरुजत् व्यभांक्षीत् किंच पणीन् बलानुचरानेतत्संज्ञानसुरांश्च वचोभिः स्तुत्यैरायुधैः संतर्जनरूपैर्वाक्यैरेवमायमिन्द्रः अभियोधत् अभ्ययुध्यत् ॥ २ ॥

अथतृतीया–

अयंद्योतयदद्युतोव्य१क्तून्दोषावस्तोःशरदइन्दुरिन्द्र ।
इमंकेतुमदधुर्नूचिदह्नांशुचिजन्मनउषसंश्चकार ॥ ३ ॥

अयम् । द्योतयत् । अद्युतः । वि । अक्तून् । दोषा । वस्तोः ।
शरदः । इन्दुः । इन्द्र । इमम् । केतुम् । अदधुः । नु । चित् । अह्नाम्
शुचिऽजन्मनः । उषसः । चकार ॥ ३ ॥

हेइन्द्र त्वयानियम्यमानः पीयमानोवा अयमिन्दुः सोमः अद्युतः अद्योतमानान् अक्तून् अक्तुरितिरात्रिनाम अत्रचतत्संबन्धात्पक्षमासादयोलक्ष्यन्ते पक्षमासादीन्तथादोषारात्रिं वस्तोः दिवसंशरदः संवत्सरांश्च विद्योतयत् व्यदीपयत् कुतइत्यतआह नूचित् पुरादेवा इमंसोमं चन्द्रात्मना नभसिवर्तमानं अह्नां दिवसानां केतुं प्रज्ञापकं यस्माददधुर्व्यदधुः अकुर्वन् तस्मादनेन पक्षमासादयःसर्वेप्रकाश्यन्ते चन्द्रगत्यधीनत्वात्तिथिविभागानां अपिचायंसोमः उषसः उषःकालान् शुचिजन्मनः आत्मीयेनतेजसा शुद्धोदयान् चकार करोति ॥ ३ ॥

अथचतुर्थी–

अयंरोचयदरुचोरुचानो३ऽयंवासयद्व्यृ१तेनपूर्वीः ।
अयमीयतऋतयुग्भिरश्वैःस्वर्विदानाभिनाचर्षणिप्राः ॥ ४ ॥

अयम् । रोचयत् । अरुचः । रुचानः । अयम् । वासयत् । वि ।
ऋतेन । पूर्वीः । अयम् । ईयते । ऋतयुक्ऽभिः । अश्वैः । स्वःऽविदा ।
नाभिना । चर्षणिऽप्राः ॥ ४ ॥

अयमिन्द्रः रुचानोरोचमानः सूर्यात्मनादीप्यमानः अरुचः प्रकाशरहितान् तमसामलीमसान्सर्वान्लोकान् रोचयत् प्रकाशयति तथा पूर्वीर्बह्वीरुषसश्च अयमिन्द्रः ऋतेन सत्यभूतेन सर्वत्रगमनशीलेनवा तेजसा विवासयत् व्यापयति तत्रत्यानितमांसिनिवर्तयतीत्यर्थः तथा ऋतयुग्भिः ऋतेनस्तोत्रेणयुज्यमानैरश्वैः नाभिना संनद्धेन स्वर्विदासुष्ठु अरणीयस्य धनस्य लंभकेनरथेन चर्षणिप्राः चर्षणीनांमनुष्याणांकामैःपूरयितासन् अयमेवेन्द्रः ईयते गच्छति ॥ ४ ॥

अथपंचमी—

नूर्गृणानोगृणतेप्रत्नराजन्निषःपिन्ववसुदेयायपूर्वीः ।
अपओषधीरविषावनानिगाअर्वतोनॄनृचसेरिरीहि ॥ ५ ॥ ११ ॥

नु । गृणानः । गृणते । प्रत्न । राजन् । इषः । पिन्व । वसुऽदेयाय ।
पूर्वीः । अपः । ओषधीः । अविषाः । वनानि । गाः । अर्वतः ।
नॄन् । ऋचसे । रिरीहि ॥ ५ ॥ ११ ॥

हेप्रत्न पुरातन राजन् राजमानेन्द्र गृणानः स्तूयमानस्त्वं वसुदेयाय वसूनिधनानित्वया देयानियस्मैतादृशाय गृणते स्तुवते पूर्वीर्बह्वीः इषोन्नानि नु क्षिप्रं पिन्व सिंच प्रयच्छेत्यर्थः किंच ऋचसे अर्चयित्रेस्तोत्रे अपः वृष्टिलक्षणान्युदकानि ओषधीः व्रीह्यादीन् अविषाविषरहिता निरक्षकाणिवा वनानि वृक्षजातानि चूतपनसादीनि गाः अर्वतोश्वान्नॄन्मनुष्यांश्च कर्मकरान् रिरीहि देहि ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेएकादशोवर्गः ॥ ११ ॥

इन्द्रपिबेतिपंचर्चसप्तदशंसूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रं इन्द्रपिबेत्यनुक्रान्तं। गतः सूक्तविनियोगःप्रथमेरात्रिपर्यायेअच्छावाकस्यआद्याशस्त्रयाज्या सूत्रितंच—इन्द्रपिबतुभ्यंसुतोमदायेति।

सैषाप्रथमा—

इन्द्रपिबतुभ्यंसुतोमदायावस्यहरीविमुचासखाया ।
उतप्रगायगणआनिषद्याथायज्ञायगृणतेवयोधाः ॥ १ ॥

इन्द्र । पिब । तुभ्यम् । सुतः । मदाय । अव । स्य । हरी इति ।
वि । मुच । सखाया । उत । प्र । गाय । गणे । आ । निऽसद्य ।
अथ । यज्ञाय । गृणते । वयः । धाः ॥ १ ॥

हेइन्द्र तं सोमं पिब यः सोमस्तुभ्यं मदाय मदार्थं सुतोभिषुतः यतस्त्वयासोमः पातव्यः अतःकारणात् सखाया समानख्यानौ मित्रभूतौवा हरी अश्वौ अवस्य अवस्थापय तदनन्तरं

विमुच रथाद्विमुंच उतापिचगणे अस्मत्स्तोतृसंघे आ आभिमुख्येन निषद्योपविश्य प्रगायअस्माभिःकृतंस्तोत्रमुपश्लोकय अथानन्तरं यज्ञाय यजमानाय गृणते स्तुवते वयोन्नंधाः देहि ॥१॥

द्वितीयेरात्रिपर्यायेच्छावाकस्यपिबेतिशस्त्रयाज्या सूत्रितंच—अस्यपिबेतियाज्येति।

सैषासूक्तेद्वितीया—

अस्यपिबयस्यंजज्ञानइन्द्रमदायक्रत्वेअपिबोविरप्शिन्।
तमुंतेगावोनरआपोअद्रिरिन्दुंसमह्यन्पीतयेसमस्मै ॥ २ ॥

अस्य । पिब । यस्य । जज्ञानः । इन्द्र । मदाय । क्रत्वे । अपिबः । विऽरप्शिन् । तम् । ऊँ इति । ते । गावः । नरः । आपः । अद्रिः । इन्दुम् । सम् । अह्यन् । पीतये । सम् । अस्मै ॥ २ ॥

हेइन्द्र अस्यइमंसोमंपिब हेविरप्शिन् महन्जज्ञानोजायमानएवत्वंयस्यथंसोमंअपिबःपूर्वंपीतवानसि किमर्थं मदायहर्षाय क्रत्वेकर्मणे वृत्रवधादिलक्षणंवीर्यकर्मकर्तुंच तमुतादृशमेवेन्दुंसोमंगावःगविभवाःश्रपणसाधनाःक्षीरादयः नरोनेतारोध्वर्यवः आपोवसतीवर्याख्याः अद्रिरभिषवार्थेग्रावाएतेसर्वे अस्मैअस्येन्द्रस्यतेतवपीतयेपानार्थं समह्यन्समगमयन् हिगताविस्यस्यैतद्रूपं पुनःसमितिपूरकः ॥ २ ॥

अथतृतीया—

समिद्धेअग्नौसुतइन्द्रसोमआत्वावहन्तुहरयोवहिष्ठाः।
त्वायतामनसाजोहवीमीन्द्रायाहिसुवितायमहेनः ॥ ३ ॥

सम्ऽइद्धे । अग्नौ । सुते । इन्द्र । सोमे । आ । त्वा । वहन्तु । हरयः । वहिष्ठाः । त्वाऽयता । मनसा । जोहवीमि । इन्द्र । आ । याहि । सुवितायं । महे । नः ॥ ३ ॥

अग्नौसमिद्धेसम्यगिन्धनैःदीप्ते सोमेसुते अभिषुतेसति हेइन्द्र त्वात्वांवहिष्ठाः वोढृतमाः हरयोश्वाःआवहन्तु इमंयज्ञंमत्यानयन्तु अहंचत्वायता त्वांकामयमानेनमनसाजोहवीमि पुनःपुनराह्वयामि हेइन्द्र त्वंनोस्माकंमहेमहते सुवितायकल्याणाय आयाहिआगच्छ ॥ ३ ॥

अथचतुर्थी—

आयाहिशश्वंदुशतायंयाथेन्द्रंमहामनंसासोमपेयंम् ।
उपब्रह्मांणिशृणवइमानोथांतेयज्ञस्तन्वेवयोधात् ॥ ४॥

आ । याहि । शश्वंत् । उशता । ययाथ । इन्द्रं । महा । मनंसा ।
सोमऽपेयंम् । उपं । ब्रह्मांणि । शृणवः । इमा । नः । अथं ।
ते । यज्ञः । तन्वें । वयः । धात् ॥ ४ ॥

हेइन्द्र पुराशश्वद्बहुकृत्वोययाथ सोमपानार्थंयज्ञंगतवानसि अतःकारणात् उशताअस्मान्कामयमानेन महामहतामनसासह सोमपेयंसोमःपीयतेयस्मिनतादृशमस्मदीयंयज्ञं आयाहिअभिगच्छ आगत्यच ब्रह्माणिस्तोत्राणि इमाइदानींप्रयुज्यमानानि नोस्मदीयानिउपशृणवःउपशृणु अथानन्तरं यज्ञोयजमानस्तेतवतन्वेशरीरायत्वच्छरीरपोषार्थं वयोन्नंसोमात्मकंधातद्दातु ॥४॥

अथपंचमी—

यदिन्द्रदिविपार्येयदृधग्यद्वास्वेसदंनेयत्रंवासि ।
अतोनोयज्ञमवंसेनियुत्वान्त्सजोषाःपाहिगिर्वणोमरुद्भिः ॥ ५॥१२॥

यत् । इन्द्र । दिवि । पार्ये । यत् । ऋधंक् । यत् । वा । स्वे ।
सदंने । यत्रं । वा । असि । अतंः । नः । यज्ञम् । अवंसे ।
नियुत्वान् । सऽजोषाः । पाहि । गिर्वणः । मरुत्ऽभिः ॥ ५ ॥ १२ ॥

हेइन्द्र पार्येपारगेदूरदेशे दिविद्युलोकाख्ये यद्यदित्वंवर्तसे यदिवा ऋधकृएतनपृथक्शब्देनसमानार्थं पृथगन्यस्मिन्देशेवर्तसे यद्वा स्वेस्वकीयेसदनेगृहे अथवा किमनेनविशेषणेन यत्रयस्मिन्देशेअसिभवसि अतोस्मात्स्थानादागत्यहेगिर्वणः गिरांसंभक्तरिन्द्र नियुत्वान्नियुतोश्वाःतद्वान् मरुद्भिःसजोषाःसहप्रीयमाणस्त्वं नोस्माकमवसेरक्षणाययज्ञमस्मदीयंयागंपाहिरक्ष यद्वा यज्ञंयजमानसाधनंअस्मदीयंसोमं अवसेतर्पणायपाहि पिब ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेद्वादशोवर्गः ॥ १२ ॥

अहेळमानइतिपंचर्चमष्टादशंसूक्तंभरद्वाजस्यार्षंत्रैष्टुभमैन्द्रं अनुक्रान्तंच—अहेळमानइति। गतोविनियोगः।

तत्रप्रथमा—

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः।
गावो न वज्रिन्त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥ १ ॥

अहेळमानः। उप। याहि। यज्ञम्। तुभ्यम्। पवन्ते। इन्दवः।
सुतासः। गावः। न। वज्रिन्। स्वम्। ओकः। अच्छ।
इन्द्र। आ। गहि। प्रथमः। यज्ञियानाम् ॥ १ ॥

हेइन्द्र अहेळमानोऽक्रुध्यंस्त्वं यज्ञमस्मदीयंउपयाहि उपगच्छ यतःकारणात्तुभ्यंत्वदर्थं सुतासःअभिषुताःइन्दवःसोमाःपवन्तेपूयन्ते दशापवित्रेणशोध्यन्ते हेवज्रिन् वज्रवन्निन्द्र गावोन गावःस्वकीयंगोष्ठमिव स्वंस्वकीयंओकःस्थानंद्रोणकलशादिलक्षणं अच्छाभिमुख्येनप्राप्नुवन्तीतिशेषः अतःकारणात् हेइन्द्र यज्ञियानांयज्ञार्हाणांदेवानांमध्येप्रथमोमुख्यस्त्वं आगहि आगच्छ ॥ १ ॥

अथद्वितीया—

या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिम्।
तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिन्द्र गव्युः ॥ २ ॥

या। ते। काकुत्। सुऽकृता। या। वरिष्ठा। यया। शश्वत्।
पिबसि। मध्वः। ऊर्मिम्। तया। पाहि। प्र। ते। अध्वर्युः।
अस्थात्। सम्। ते। वज्रः। वर्तताम्। इन्द्र। गव्युः ॥ २ ॥

हेइन्द्र या ते तवकाकुज्जिह्वा सुकृतासुष्टुधात्रानिर्मिता याच वरिष्ठाउरुतमाविस्तीर्णतमा ययाचमध्वोमधुनःसोमस्यऊर्मिरसंशश्वद्बहुकृत्वःपिबसि तयाजिह्वयास्मदीयंसोमंपाहिपिब तदर्थमध्वर्युरध्वरस्यनेताऋत्विग्गृहीतसोमःसन् प्रास्थात् हविर्धानादुत्तरवेदिदेशंप्रत्यगमत् अपिच हेइन्द्र गव्युःशत्रुसंबंधिनीर्गाःआत्मनइच्छन् तेत्वदीयोवज्रःसंवर्ततां शत्रुभिःसंगतोभवतु तान्हंत्वित्यर्थः ॥ २ ॥

अथतृतीया—

एषद्रप्सोवृषभोविश्वरूपइंद्रायवृष्णेसमकारिसोमः ।
एतंपिबहरिवःस्थातरुग्रयस्येशिषेप्रदिवियस्तेअन्नम् ॥ ३॥

एषः । द्रप्सः । वृषभः । विश्वऽरूपः । इन्द्राय । वृष्णे । सम् ।
अकारि । सोमः । एतम् । पिब । हरिऽवः । स्थातः । उग्र ।
यस्य । ईशिषे । प्रऽदिवि । यः । ते । अन्नम् ॥ ३ ॥

द्रप्सोद्रवणशीलोवृषभःकामानांवर्षिता विश्वरूपःबहुविधरूपोपेतः ईदृग्विधएषसोमः वृष्णेकामानांवर्षित्रेइंद्रायइन्द्रस्यपानार्थं समकारिअभिषवादिभिःसंस्कृतोभूत् हेहरिवः हरीअश्वौ तद्वन्हेस्थातः सर्वेषामधिष्ठातः उग्रउद्गूर्णबलेन्द्र एतमीदृशंसोमंपिब यस्यसोमस्यप्रदिवि जातावेकवचनं प्रभूतेषुदिवसेषु प्रगतेष्वहःसुवा ईशिषे त्वमेवेश्वरोभवसि यश्चसोमस्ते तवअन्नंअन्नत्वेनपरिकल्पितः एतंपिबेत्यन्वयः ॥ ३ ॥

अथचतुर्थी—

सुतःसोमोअसुतादिन्द्रवस्यानयंश्रेयांचिकितुषेरणाय ।
एतंतितिर्वउपयाहियज्ञंतेनविश्वास्तविषीरापृणस्व ॥ ४ ॥

सुतः । सोमः । असुतात् । इन्द्र । वस्यान् । अयम् । श्रेयान् ।
चिकितुषे । रणाय । एतम् । तितिर्वः । उप । याहि । यज्ञम् ।
तेन । विश्वाः । तविषीः । आ । पृणस्व ॥ ४ ॥

हेइन्द्र सुतोभिषुतोयंसोमः असुतातअकृताभिषवात्सोमादन्यदीयात्वस्यान्वसीयान् वसुमत्तरःप्रशस्यतरः तथा चिकितुषेविदुषेअभिज्ञायतुभ्यं रणायरमणीयाय तदर्थं श्रेयान्श्रेष्ठश्चभवति त्वामतिशयेनरमयितेत्यर्थः हेतितिर्वः शत्रूणांतरितरिन्द्र यज्ञंयजनसाधनमेनं सोमंउपयाहि उपगच्छ तेनचसोमेनविश्वास्तविषीः सर्वाणिबलानिआपृणस्व आपूरय ॥ ४ ॥

अथपंचमी—

ह्वयामसित्वेन्द्रयाह्यर्वाङरंतेसोमस्तन्वेभवाति ॥
शतक्रतोमादयस्वासुतेषुप्रास्माँअवपृतनासुप्रविक्षु ॥ ५ ॥ १३ ॥

ह्वयामसि । त्वा । आ । इन्द्र । याहि । अर्वाङ् । अरम् । ते ।
सोमः । तन्वे । भवाति । शतक्रतो इति शतऽक्रतो । मादयस्व ।
सुतेषु । प्र । अस्मान् । अव । पृतनासु । प्र । विक्षु ॥ ५ ॥ १३ ॥

हेइन्द्र त्वात्वांह्वयामसिआह्वयामः अतःकारणात्त्वंअर्वाङस्मदभिमुखःसन्आयाहिआगच्छ अस्मदीयःसोमश्च तेतन्वेतवशरीरायअरंपर्याप्तंभवातिभवतु त्वदीयंशरीरंयथाभिलाषं तर्पयत्वित्यर्थः हेशतक्रतो बहुविधकर्मन्निन्द्र त्वंचसुतेष्वभिषुतेष्वस्मदीयेषुसोमेषु मादयस्व तृप्यस्व मदतृप्तियोगे तदनन्तरं पृतनासुसंग्रामेषु अस्मानप्राव प्रकर्षेणरक्ष नकेवलंपृतनासु किन्तु विक्षुसर्वासुप्रजासु अस्मान्प्राव प्ररक्ष ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेत्रयोदशोवर्गः ॥ १३ ॥

प्रत्यस्माइतिचतुर्ऋचमेकोनविंशंसूक्तं भरद्वाजस्यार्षमैन्द्रं चतुर्थीबृहती शिष्टाअनुष्टुभः तथाचानुक्रान्तं—प्रत्यस्मैचतुष्कमानुष्टुभंबृहत्यन्तमिति । प्रातःसवनेच्छावाकस्यइदमुन्नीयमानसूक्तं सूत्रितंच—प्रत्यस्माइत्युन्नीयमानायानूच्येइति ।

तत्रप्रथमा—

प्रत्यस्मैपिपीषतेविश्वानिविदुषेभर ।
अरंगमायजग्मयेपश्चाद्दघ्वनेनरे ॥ १ ॥

प्रति । अस्मै । पिपीषते । विश्वानि । विदुषे । भर । अरम्ऽगमाय ।
जग्मये । अपश्चात्ऽदघ्वने । नरे ॥ १ ॥

हेअध्वर्यो अस्माइन्द्रायप्रतिभर अभिहर सोमंप्रयच्छेत्यर्थः कीदृशायेन्द्राय पिपीषतेपातुमिच्छते विश्वानिसर्वाणिवेद्यानिविदुषेजानते अरंगमाय पर्याप्तगमनाय जग्मयेयज्ञेषुगमनशीलाय अपश्चाद्दघ्वने दघिर्गतिकर्मा अपश्चाद्गमनाय सर्वेषामग्रगामिने नरेनेत्रेयज्ञानां ॥ १ ॥

तृतीयेस्वरसाम्नि निष्केवल्येएमेनमितिस्तोत्रियस्तृचः सूत्रितंच—एमेनंप्रत्येतनेत्याद्योवासवेषामिति ।

तत्रप्रथमासूक्तेद्वितीया—

एमेनंप्रत्येतनसोमेभिःसोमपातमम् ।
अमत्रेभिर्ऋजीषिणमिन्द्रंसुतेभिरिन्दुभिः ॥ २ ॥

आ । ईम् । एनम् । प्रतिऽएतन । सोमेभिः । सोमऽपातमम् ।
अमत्रेभिः । ऋजीषिणम् । इन्द्रम् । सुतेभिः । इन्दुऽभिः ॥ २ ॥

हेअध्वर्यवः सोमेभिःसोमैःकरणभूतैः सोमपातमंअतिशयेनसोमस्यपातारमेनमिन्द्रं आ-अभिमुखंप्रत्येतनप्रतिगच्छत ईमितिनिपातोनर्थकः कीदृशमिन्द्रं अमत्रेभिःअमत्रैः सोमपात्रैः ग्रहचमसादिभिः ऋजीषिणं ऋजीषंशत्रूणामुपार्जकंबलं तद्वन्तं यद्वा ऋजीषिणमित्युत्तरत्रसंब-न्धनीयं सुतेभिरभिषुतैरिन्दुभिः सोमैःऋजीषिणं गतसारःसोमऋजीषः तद्वन्तं अथवा अमत्रेभिः अमत्रैरमात्रैरपरिमितैःअभिषुतैःसोमैः ऋजीषिणं ऋजेर्गत्यर्थात् भावसाधनऋजीषशब्दः ततो-मत्वर्थीयइनिः संगतमित्यर्थः एवंविधमिन्द्रंप्रतिगच्छतेत्यन्वयः अन्यआह—अमत्रेभिः ग्रहच-मसादिगतैः अभिषुतैः सोमैः ऋजीषिणं बलवन्तमेनंइन्द्रंप्रतिगच्छतेति ॥ २ ॥

अथतृतीया—

यदींसुतेभिरिन्दुभिःसोमेभिःप्रतिभूषथ ।
वेदाविश्वस्यमेधिरोधृषत्तन्तमिदेषते ॥ ३ ॥

यदि । सुतेभिः । इन्दुऽभिः । सोमेभिः । प्रतिऽभूषथ । वेद ।
विश्वस्य । मेधिरः । धृषत् । तम्ऽतम् । इत् । आ । ईषते ॥ ३ ॥

हेअध्वर्यवः सुतेभिरभिषुतैः इंदुभिरुंदनशीलैः दीप्तैर्वासोमेभिःसोमैः यदिप्रतिभूषथ इ-न्द्रंप्रतियूयंप्रतिगच्छथ भूषप्राप्तावित्यस्यैतद्रूपं तदानींमेधिरोमेधावी मेधोयज्ञस्तद्वान्वासइन्द्रः विश्वस्य विश्वंसर्वंभवदीयंकामंवेद वेत्ति जानाति ज्ञात्वाच धृषत् शत्रूणांधर्षकःसन् तंतमि-त्तंतंकाममेव एषतेप्रापयति ॥ ३ ॥ अथचतुर्थी—

अस्माअस्माइदन्धसोध्वर्योप्रभरासुतम् ।
कुवित्समस्यजेन्यस्यशर्धतोभिशस्तेरवस्परत् ॥ ४ ॥ १४ ॥

अस्मैऽअस्मै । इत् । अन्धसः । अध्वर्यो इति । प्र । भर । सुतम् ।
कुवित् । समस्य । जेन्यस्य । शर्धतः । अभिऽशस्तेः । अवऽस्परत् ॥ ४॥१४॥

अस्मा अस्माइत् अस्माएवेन्द्राय नान्यस्मै हेअध्वर्यो त्वंअन्धसः सोमलक्षणस्यान्नस्य सुतमभिषुतंरसं प्रभर संप्रहर प्रयच्छेतियावत् सचेन्द्रः समस्यसर्वस्यजेन्यस्य जेतव्यस्य शर्धतः उत्सहमानस्यशत्रोः अभिशस्तेः अभिशंसनात् तत्कृताद्धिंसनात्कुविद्बहुशः अवस्परत् अस्मान्पालयतु ॥ ४ ॥

॥ इतिचतुर्थस्यसप्तमेचतुर्दशोवर्गः॥ १४ ॥

यस्यत्यदितिचतुर्ऋचंविंशंसूक्तं । भरद्वाजस्यार्षमौष्णिहमैन्द्रं अनुक्रम्यतेच—यस्यौष्णिहमिति । महाव्रतेपिनिष्केवल्येऔष्णिहतृचाशीतावेतत्सूक्तं तथैवपंचमारण्यकेसूत्रितं—यस्यत्यच्छंबरंमदइतित्रयस्तृचागायत्र्यइति ।

तत्रप्रथमा—

यस्यत्यच्छम्बरंमदेदिवोदासायरन्धयः । अयंससोमइन्द्रतेसुतःपिब ॥१॥

यस्य । त्यत् । शंबरम् । मदे । दिवःऽदासाय । रन्धयः । अयम् ।
सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ १ ॥

हेइन्द्र यस्यसोमस्यमदेपानेनजनितेहर्षेसति शंबरमसुरं दिवोदासायराज्ञेरंधयः अहिंसीः यद्वा वशीकृतवानसि रध्यतिर्वशगमनइतियास्कः । त्यदितिक्रियाविशेषणं त्यत्तत्प्रसिद्धं यथा भवतितथाअरन्धयइत्यर्थः हेइन्द्र सोयंसोमस्तेत्वदर्थंसुतोभिषुतः अतस्तंपिब ॥ १ ॥

अथद्वितीया—

यस्यतीव्रसुतंमदंमध्यमन्तंचरक्षसे । अयंससोमइन्द्रतेसुतःपिब ॥२॥

यस्य । तीव्रऽसुतम् । मदम् । मध्यम् । अन्तम् । च । रक्षसे ।
अयम् । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ २ ॥

हेइन्द्र त्वंयस्यसोमस्यअवयवभूतंतीव्रसुतंतीक्ष्णंसुतमभिषवोयस्यसतीव्रसुतः प्रातःसवनिकः तंमदंमदकरंसोमरसं मध्यं मध्यंदिनसवनगतं अंतं तृतीयसवनगतंचसोमरसं रक्षसे रक्षसि सोयंसोमस्त्वदर्थमभिषुतस्तंपिबेति ॥ २ ॥

अथतृतीया–

यस्यगाअन्तरश्मनोमदेदृह्ळाअवासृजः ।
अयंससोमइन्द्रतेसुतःपिब ॥ ३ ॥

यस्य । गाः । अन्तः । अश्मनः । मदे । दृह्ळाः । अवऽअसृजः ।
अयम् । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ ३ ॥

यस्यसोमस्यमदेमदकरेरसेपीतेसति अश्मनः बलासुरेणनिहितस्यपर्वतस्यअन्तर्मध्येविद्यमानाः दृह्ळाः दृढपिधानाश्चगाःपणिभिरपहृताः अवासृजः बलस्यबन्धनाद्व्यसृजः ससोमइत्यादिगतं ॥ ३ ॥

अथचतुर्थी–

यस्यमन्दानोअन्धसोमाघोनंदधिषेशवः ।
अयंससोमइन्द्रतेसुतःपिब ॥ ४ ॥ १५ ॥

यस्य । मन्दानः । अन्धसः । माघोनम् । दधिषे । शवः । अयम् ।
सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ ४ ॥ १५ ॥

हेइन्द्र त्वंयस्यअन्धसःसोमलक्षणस्यान्नस्यपानेनमन्दानोमदमानः हृष्टःसन् माघोनंऐन्द्रंशवः असाधारणंबलं दधिषे धारयसि येनसोमेन तवेन्द्रत्वंजातमित्यर्थः सोयंसोमः सुतोभिषुतस्तंपिब ॥ ४ ॥

॥ इतिचतुर्थस्यसप्तमेपंचदशोवर्गः ॥ १५ ॥

॥ इतिषष्ठेमंडलेतृतीयोनुवाकः ॥ ३ ॥

चतुर्थेनुवाकेषट्सूक्तानि तत्रयोरयिवइतिचतुर्विंशत्यृचंप्रथमंसूक्तं बृहस्पतिपुत्रस्यशंयोरार्षं ऐन्द्रं आदितःषळनुष्टुभः सप्तम्यष्टमीनवम्योविराजः अष्टम्येकववाविराट् शिष्टास्त्रिष्टुभः तथाचानुक्रान्तं–योरयिवश्चतुर्विंशतिःशंयुर्बार्हस्पत्योद्यादाषळनुष्टुभस्तिस्रश्वविराजोमध्यमैववासामिति। गतःसूक्तविनियोगः।

तत्रप्रथमा–

योरयिवोरयिन्तमोयोद्युम्नैर्द्युम्नवत्तमः ।
सोमःसुतःसइन्द्रतेस्तिस्वधापतेमदः ॥ १ ॥

यः । रयिऽवः । रयिम्ऽतमः । यः । द्युम्नैः । द्युम्नवत्ऽतमः ।
सोमः । सुतः । सः । इन्द्र । ते । अस्ति । स्वधाऽपते । मदः ॥ १ ।

हेरयिवोधनवन्निन्द्र यःसोमःरयिन्तमःअतिशयेनरयिमान् धनवान् यश्चद्युम्नैर्द्योतमानैर्यशोभिः द्युम्नवत्तमोतिशयेनयशस्वी हेस्वधापते स्वधायाःअन्नस्यसोमलक्षणस्यपालकेन्द्र ससोमोभिषुतः सन् तेतवमदःमदकरःअस्ति भवति ॥ १ ॥

अथद्वितीया—

यःशग्मस्तुविशग्मतेरायोदामामतीनाम् ।
सोमःसुतःसइन्द्रतेस्तिस्वधापतेमदः ॥ २ ॥

यः । शग्मः । तुविऽशग्म । ते । रायः । दामा । मतीनाम् ।
सोमः । सुतः । सः । इन्द्र । ते । अस्ति । स्वधाऽपते । मदः ॥ २ ॥

हेतुविशग्म बहुसुखेन्द्र यःशग्मःसुखकरः तेत्वदीयःसोमः मतीनांस्तोतॄणांरायोधनस्यदामा दाताभवति हेस्वधापतेइन्द्र ससोमोभिषुतस्तवमदकरोभवति ॥ २ ॥

अथतृतीया—

येनवृद्धोनशवसातुरोनस्वाभिरूतिभिः ।
सोमःसुतःसइन्द्रतेस्तिस्वधापतेमदः ॥ ३ ॥

येन । वृद्धः । न । शवसा । तुरः । न । स्वाभिः । ऊतिऽभिः ।
सोमः । सुतः । सः । इन्द्र । ते । अस्ति । स्वधाऽपते । मदः ॥ ३ ॥

इमौनशब्दौसमुच्चयार्थौ येनपीतेनसोमेनवृद्धोनप्रवृद्धश्चसनस्वाभिरूतिभिःआत्मीयैर्मरुद्भिः सार्धं शवसाबलेनतुरःशत्रूणांहिंसकश्चभवसि ससोमइत्यादिपूर्ववत् ॥ ३ ॥

पृष्ठ्यषळहस्यचतुर्थेहनिप्रउगशस्त्रेत्यमुवइत्यैन्द्रस्तृचः सूत्रितंच—त्यमुवोअप्रहणमपत्यंवृजिनरिपुमिति ।

तत्रप्रथमासूक्तेचतुर्थी—

त्यमुवोअप्रहणंगृणीषेशवसस्पतिम् ।
इन्द्रंविश्वासाहंनरंमंहिष्ठंविश्वचर्षणिम् ॥ ४ ॥

त्यम् । ऊँ इति । वः । अप्रऽहनम् । गृणीषे । शर्वसः । पतिम् ।
इन्द्रम् । विश्वऽसहम् । नरम् । मंहिष्ठम् । विश्वऽचर्षणिम् ॥ ४ ॥

हेऋत्विग्यजमानाः वोयुष्मदर्थं त्यमुतमेवेन्द्रंगृणीषे स्तौमि यद्वा वोयूयंगृणीषे गृणीत स्तुत वचनव्यत्ययः कीदृशमिन्द्रं अप्रहणं अप्रहन्तारंभक्तानामनुग्राहकं शवसोबलस्यपतिं पालकं विश्वासाहं विश्वस्यशत्रोरभिभवितारं नरंनेतारं मंहिष्ठंदातृतमं विश्वचर्षणिं सर्वस्यद्रष्टारं ॥ ४ ॥

अथपंचमी—

यंवर्धयन्तीद्गिरःपतिंतुरस्यराधसः ।
तमिन्न्वस्यरोदसीदेवीशुष्मंसपर्यतः ॥ ५ ॥ १६ ॥

यम् । वर्धयन्ति । इत् । गिरः । पतिम् । तुरस्य । राधसः । तम् ।
इत् । नु । अस्य । रोदसी इति । देवी इति । शुष्मम् । सपर्यतः ॥ ५॥१६॥

गिरःस्तुतयःइन्द्रसंबन्धिनंयमित् यमेवशुष्मंबलंवर्धयन्ति कीदृशंपतिं ईश्वरं कस्यतुरस्य हिंसकस्यशत्रोराधसोधनस्यशत्रुधनानामपहर्तारमित्यर्थः अस्येन्द्रस्यतमित् तमेवशुष्मंशोषकं बलं देवीदेवनशीलेरोदसी द्यावापृथिव्यौ नुक्षिप्रंसपर्यतः परिचरतः ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेषोडशोवर्गः ॥ १६ ॥

अथषष्ठी—

तद्वउक्थस्यबर्हणेन्द्रायोपस्तृणीषणि ।
विपोनयस्योतयोवियद्रोहन्तिसक्षितः ॥ ६ ॥

तत् । वः । उक्थस्य । बर्हणा । इन्द्राय । उपऽस्तृणीषणि ।
विपः । न । यस्य । ऊतयः । वि । यत् । रोहन्ति । सऽक्षितः ॥ ६ ॥

हेस्तोतारः वोयुष्मदीयस्योक्थस्यस्तोत्रस्यतद्बर्हणा बहुत्वंमाहात्म्यं इन्द्राय इन्द्रार्थं उपस्तृणीषणिउपस्तरणीयं उपेत्यविस्तरणीयं इन्द्रोयथास्तोत्रस्यमाहात्म्यंजानीयात् तथाविस्तारयतइत्यर्थः यस्येन्द्रस्य ऊतयोरक्षाःविपोनमेधाविनइवभवन्ति सर्वकार्यकुशलाइत्यर्थः यद्वाने-

तिपूरकः विपोविप्रस्यमेधाविनोयस्येन्द्रस्येतियोज्यं यत्यस्मिन्नचेन्द्रेसक्षितः समाननिवासाः संहताऊतयः विरोहन्ति प्रादुर्भवंति तस्माइन्द्रायेत्यर्थः ॥ ६ ॥

अथसप्तमी–

अविदद्दक्षंमित्रोनवीयान्पपानोदेवेभ्योवस्योअचैत् ।
ससवान्स्तौलाभिर्धौतरीभिरुरुष्यापायुरभवत्सखिभ्यः ॥७॥

अविदत् । दक्षम् । मित्रः । नवीयान् । पपानः । देवेभ्यः । वस्यः । अचैत् । ससऽवान् । स्तौलाभिः । धौतरीभिः । उरुष्या । पायुः । अभवत् । सखिऽभ्यः ॥ ७ ॥

सइन्द्रः दक्षंकर्मसुसमर्थं प्रवृद्धंवायष्टारं अविदत् जानाति कीदृशः मित्रोमित्रभूतः नवीयान्नवतरः कल्याणतरःस्तुत्यतरोवा सचपपानःसोमंपिबन् देवेभ्यःस्तोतृभ्यः वस्योवसीयः श्रेष्ठंधनंअचैत्चिनोति उपचितंकरोति ददातीतियावत् अपिच ससवान्ससमित्यन्ननाम हविर्लक्षणान्नोपेतःसइन्द्रः स्तौलाभिःस्थूलाभिःप्रवृद्धाभिः धौतरीभिःकंपनकारिणीभिर्वडवाभिः ईदृशैर्मरुद्भिर्वायुक्तःसन् सखिभ्यःस्तोतृभ्यःउरुष्यारक्षणेच्छयाआगत्यपायुरभवत् रक्षकोभवति यद्वा ससवानितिसनतेःक्वसौरूपं स्तौलाभिर्धौतरीभिःससवान्संभजमानइतिसंबंधः ॥ ७ ॥

अथाष्टमी–

ऋतस्यपथिवेधाअपायिश्रियेमनांसिदेवासोअक्रन् ।
दधानोनाममहोवचोभिर्वपुर्दृशयेवेन्योव्यावः ॥ ८ ॥

ऋतस्य । पथि । वेधाः । अपायि । श्रिये । मनांसि । देवासः । अक्रन् । दधानः । नाम । महः । वचःऽभिः । वपुः । दृशये । वेन्यः । वि । आवरित्यावः ॥ ८ ॥

ऋतस्ययज्ञस्यपथि मार्गे वेधाः विधाता सर्वस्यद्रष्टासोमः अपायि इन्द्रेणपीतोभूत् यद्वा वेधा विधाता इन्द्रःअपायि सोमंपिबतु व्यत्ययेनकर्तरिचिण् तस्मिन्सोमेइन्द्रस्यमनांसि श्रिये श्रयितुं देवाःस्तोतारऋत्विजः अक्रन् कर्माणिकुर्वन्ति सचेन्द्रःनाम शत्रूणांनामकं महोमहत्आत्मीयंवपुःशरीरंदधानोधारयन् वचोभिः स्तुतिभिः वेन्योवननीयःसंभजनीयश्चसन्दृशयेदर्शनार्थं

व्यावःविवृणोतु प्रकाशयतु अनुकूलंतेजइतिशेषः यद्वा वेन्यइतिवेनतेःकान्तिकर्मणोरूपं वपुरि-
तिचरूपनाम वेन्यःकमनीयः वपुःभास्वररूपं दर्शयेदर्शनार्थं व्यावः विवृणोतु वचोभिःस्तूयमानः
सन्॥ ८ ॥

अथनवमी—

द्युमत्तमंदक्षंधेह्यस्मेसेधाजनानांपूर्वीररातीः ।
वर्षीयोवयःकृणुहिशचीभिर्धनस्यसातावस्माँअविड्ढि ॥ ९ ॥

द्युमत्ऽतमम् । दक्षम् । धेहि । अस्मे इति । सेध । जनानाम् । पूर्वीः ।
अरातीः । वर्षीयः । वयः । कृणुहि । शचीभिः । धनस्य । सातौ ।
अस्मान् । अविड्ढि ॥ ९ ॥

हेइन्द्र द्युमत्तमं दीप्तिमत्तमं दक्षंबलंअस्मेअस्मासुधेहि धारय जनानांस्तोतॄणामस्माकं
पूर्वीर्बह्वीररातीः शत्रुसेनाः सेध निषेध निवारय अपिचास्माकं वर्षीयःवृद्धतरं वयोन्नं शचीभि-
रात्मीयाभिः प्रज्ञाभिः कृणुहिकुरु तथाधनस्यसातौसंभजनेअस्मानअविड्ढि गमय यद्वाधनस्य
संभजनार्थंअस्मानरक्ष ॥ ९ ॥

अथदशमी—

इन्द्रतुभ्यमिन्मघवन्नभूमवयंदात्रेहरिवोमाविवेनः ।
नकिरापिर्ददृशेमर्त्यत्राकिमङ्गरध्रचोदनंत्वाहुः ॥ १० ॥ १७ ॥

इन्द्र । तुभ्यम् । इत् । मघऽवन् । अभूम । वयम । दात्रे ।
हरिऽवः । मा । वि । वेनः । नकिः । आपिः । ददृशे । मर्त्यऽत्रा ।
किम् । अङ्ग । रध्रऽचोदनम् । त्वा । आहुः ॥ १० ॥ १७ ॥

हेमघवन् धनवन्निन्द्र दात्रकामानांदात्रे तुभ्यमित् तुभ्यमेव वयंशेषभूताअभूम यद्वा त्व-
दर्थमेवदात्रे हविषांदानेवर्तमानाः अभूम हेहरिवः हरिवन्निन्द्र अतःकारणात्माविवेनः माविग-
तकामोभूः अस्मान्सर्वदाकामयस्व वेनतिःकान्तिकर्मा मर्त्यत्रा मर्त्येषुमनुष्येषुमध्ये आपिर्बन्धुः
त्वत्तोन्यःकश्चिदपिनकिर्ददृशे नैवदृश्यते किमनेनविशेषकथनेन अंग हेइन्द्र त्वा त्वां रध्रचोदन
रध्रस्यराधकस्यसमृद्धस्यधनस्यचोदनं चोदयितारं आहुः कथयन्ति पुराजाः ॥ १० ॥

॥ इतिचतुर्थस्यसप्तमेसप्तदशोवर्गः ॥ १७ ॥

अथैकादशी—

माजस्वनेवृषभनोररीथामातेरेवतःसख्येरिषाम ।
पूर्वीष्टइन्द्रनिष्षिधोजनेषुजह्यसुष्वीन्प्रवृहापृणतः ॥ ११ ॥

मा । जस्वने । वृषभ । नः । ररीथाः । मा । ते । रेवतः । सख्ये ।
रिषाम । पूर्वीः । ते । इन्द्र । निःऽसिधः । जनेषु । जहि ।
असुस्वीन् । प्र । वृह । अपृणतः ॥ ११ ॥

हेवृषभ कामानांवर्षितरिन्द्र जस्वने जसिरुपक्षयकर्मा उपक्षयित्रे राक्षसादये नोस्मान् माररीथाः मादाः रेवतोधनवतस्तेतवसख्येसखित्वेवर्तमानावयंमारिषाम हिंसितामाभूम हेइन्द्र तेत्वदीयाःपूर्वीःबह्वीः निःषिधःनिःषेधाः निवारणानिजनेषुशत्रुषुनिहिताःसन्ति यद्वा निःषिधो-निषेधार्थारज्जवः ताःशत्रुजनेषुनवबद्धोविद्यन्ते अतःकारणात् असुस्वीनअनभिषोतॄनअयजमा-नानजहि मारय अपृणतः हवींष्यप्रयच्छतश्चप्रवृह उन्मूलय पृणदानेइतिधातुः ॥ ११ ॥

अथद्वादशी—

उदभ्राणीवस्तनयन्नियर्तीन्द्रोराधांस्यश्व्यानिगव्या ।
त्वमसिप्रदिवःकारुधायामात्वादामानआदभन्मघोनः ॥ १२ ॥

उत् । अभ्राणिऽइव । स्तनयन् । इयर्ति । इन्द्रः । राधांसि ।
अश्व्यानि । गव्या । त्वम् । असि । प्रऽदिवः । कारुऽधायाः ।
मा । त्वा । अदामानः । आ । दभन् । मघोनः ॥ १२ ॥

अभ्राणीवस्तनयनगर्जयनपर्जन्यः यथामेघानउद्गमयति एवमिन्द्रःअश्व्यानि अश्वसंबन्धीनि गव्यागव्यानिगोसंबन्धीनि एतत्समूहद्वयरूपाणि राधांसिधनानि उदियर्ति उदीरयति उद्गमयति स्तोतृभ्योदातुं उत्तरार्धःप्रत्यक्षकृतः हेइन्द्र प्रदिवःपुराणस्त्वं कारुधायाः कारूणांस्तोतॄणांधार-यितासि भवसि तादृशंत्वात्वांमघोनोधनवन्तःकृपणाः अदामानःहविषामदातारःमाआदभन् माहिंसिषुः यद्वावचनव्यत्ययः मघवानंधनवन्तंत्वामितिसंबंधः ॥ १२ ॥

अथत्रयोदशी–

अध्वर्योवीरप्रमहेसुतानामिन्द्रायभरसह्यस्यराजा।
यःपूर्व्याभिरुतनूतनाभिर्गीर्भिर्वावृधेगृणतामृषीणाम् ॥ १३ ॥

अध्वर्यो इति । वीर । प्र । महे । सुतानाम् । इन्द्राय । भर ।
सः । हि । अस्य । राजा । यः । पूर्व्याभिः । उत । नूतनाभिः ।
गीःऽभिः । ववृधे । गृणताम् । ऋषीणाम् ॥ १३ ॥

हेवीर हविषांविशेषेणप्रेरयितरध्वर्यो महेमहतेअस्मैइन्द्रायसुतानां कर्मणिषष्ठी सुतानभिषुतान्सोमान्प्रभर प्रहर प्रगमय सहिखल्विन्द्रःअस्यसोमस्यराजास्वामीभवति यइन्द्रः पूर्व्याभिः पूर्वकालकृताभिः उतापिच नूतनाभिःइदानींक्रियमाणाभिः गृणतांस्तुवतांऋषीणांसंबन्धिनीभिर्गीर्भिः उभयविधाभिःस्तुतिभिर्वावृधेवर्धते सइन्द्रः यस्मात्सोमस्यराजातस्मादस्मैसोमःप्रदेयइत्यर्थः ॥१३॥

प्रथमेरात्रिपर्यायेमैत्रावरुणस्यअस्यमदइतिशस्त्रयाज्या सूत्रितंच–अस्यमदेपुरुवर्पांसिविद्वानितियाज्येति ।

सैषात्रचतुर्दशी–

अस्यमदेपुरुवर्पांसिविद्वानिन्द्रोवृत्राण्यप्रतीजघान ।
तमुप्रहोषिमधुमन्तमस्मैसोमंवीरायशिप्रिणेपिबध्यै ॥ १४ ॥

अस्य । मदे । पुरु । वर्पांसि । विद्वान् । इन्द्रः । वृत्राणि ।
अप्रति । जघान । तम् । ऊं इति । प्र । होषि । मधुऽमन्तम् ।
अस्मै । सोमम् । वीराय । शिप्रिणे । पिबध्यै ॥ १४ ॥

अस्यसोमस्यपानेनमदेहर्षेसति विद्वानभिज्ञइन्द्रः पुरुपुरूणिबहूनिवर्पांसि आवरकाणिवृत्राणिशत्रून्अप्रतिस्वयमन्यैरप्रतिगतःसन् जघान हतवान् यद्वा वर्पइतिरूपनाम बहूनि वर्पांसिअसुरमाययानिर्मितानि रूपाणि विद्वान्जानन्निन्द्रः वृत्राण्यावरकाणिरक्षःप्रभृतीनि इतःपूर्वमन्यैरप्रतिगतानि जघानहतवान् मधुमन्तंमाधुर्यवन्तंतमुतमेवसोमंशिप्रिणेशोभनहनुकायअस्मैवीराय शत्रूणांवारयित्रेइन्द्राय पिबध्यैपातुंप्रहोषि हेअध्वर्योप्रजुहुधि ॥ १४ ॥

द्वितीयेरात्रिपर्यायेमैत्रावरुणस्यैवपातासुतमितिशस्त्रयाज्या सूत्रितंच-पातासुतमिन्द्रोअस्तुसोमंहन्तावृत्रमितियाज्येति ।

सैषात्रपंचदशी—

पातासुतमिन्द्रोअस्तुसोमंहन्तावृत्रंवज्रेणमन्दसानः ।
गंतायज्ञंपरावतश्चिदच्छावसुर्धीनामविताकारुधायाः ॥ १५ ॥

पाता । सुतम् । इन्द्रः । अस्तु । सोमम् । हन्ता । वृत्रम् । वज्रेण ।
मन्दसानः । गन्ता । यज्ञम् । पराऽवतः । चित् । अच्छ । वसुः ।
धीनाम् । अविता । कारुऽधायाः ॥ १५ ॥ १८ ॥

अयमिन्द्रः सुतमभिषुतंसोमंपातास्तु साधुपाताभवतु साधुकारिणितृन् अतएवनलोकाव्ययेतिषष्ठीषतिषेधाद्द्वितीया एवंहन्तेत्यादावपिद्रष्टव्यं तेनचसोमेनमन्दसानः माद्यन्वज्रेणायुधेनवृत्रमावरकंशत्रुंहन्तास्तु भवतु एतदुभयार्थंपरावतश्चित् दूरदेशादपियज्ञमच्छअस्मदीयंयज्ञमभिगन्ताभवतु दूरदेशस्थोपिशीघ्रमस्मद्यज्ञेसोमपानायागच्छत्वित्यर्थः कीदृशइन्द्रः वसुःसर्वेषांनिवासयिता धीनांध्यातॄणांस्तोतॄणांकर्मणांवाअवितारक्षिता कारुधायाःकारूणांकर्तॄणांयजमानानांधारयिता ॥ १५ ॥

॥ इतिचतुर्थस्यसप्तमेष्टादशोवर्गः ॥ १८ ॥

तृतीयेरात्रिपर्यायेप्रशास्तुरिदंत्यदितिशस्त्रयाज्या सूत्रितंच—इदंत्यत्पात्रमिन्द्रपानमितियाज्येति ।

सैषासूक्तेषोडशी—

इदंत्यत्पात्रमिन्द्रपानमिन्द्रस्यप्रियममृतमपायि ।
मत्सद्यथासौमनसायदेवंव्य१स्मद्द्वेषोयुयवद्व्यंहः ॥ १६ ॥

इदम् । त्यत् । पात्रम् । इन्द्रऽपानम् । इन्द्रस्य । प्रियम् ।
अमृतम् । अपायि । मत्सत् । यथा । सौमनसाय । देवम् ।
वि । अस्मत् । द्वेषः । युयवत् । वि । अंहः ॥ १६ ॥

पात्रंपातव्यंइन्द्रपानं इन्द्रस्यपानार्हं इन्द्रस्यप्रियंअनुकूलं त्यतत्तदिदंसोमात्मकममृतंअपायि इन्द्रःपिबतु व्यत्ययेनकर्तरिचिण् यद्वा एतदमृतंअपायि इन्द्रेणपीयतां यथायेनप्रकारेणपीतःसोमः सौमनसायसुमनस्त्वायदेवमिन्द्रं मत्सत्मादयेत् तथापीयतामित्यर्थः सपीतसोमइन्द्रः द्वेषोद्वेष्टृन्अस्मत्अस्मत्तःवियुयवत् वियोजयतु अंहःपापंचअस्मत्तोवियोजयतु ॥ १६ ॥

अथसप्तदशी–

एनामन्दानोजहिशूरशत्रूञ्जामिमजामिंमघवन्नमित्रान् ।
अभिषेणाँअभ्या३देदिशानान्पराचइन्द्रप्रमृणाजहीच ॥ १७॥

एना । मन्दानः । जहि । शूर । शत्रून् । जामिम् । अजामिम् ।
मघऽवन् । अमित्रान् । अभिऽसेनान् । अभि । आऽदेदिशानान् ।
पराचः । इन्द्र । प्र । मृण । जहि । च ॥ १७ ॥

हेमघवन् धनवन् शूर शौर्यवन्निन्द्र एनाएनेनप्रकृतेनानेनसोमेनमन्दानोमन्दमानोमाद्यन् जामिंज्ञातिंअजामिंतद्विलक्षणं एवमुभयविधानमित्रानअस्मत्प्रतिकूलाचरणपरान्शत्रून् जहि हिंसितानकुरु किंच अभिषेणानप्रत्यभिगताःसेनायेषांतादृशान् अस्मदभिमुखंआदेदिशानान् आयुधानिपुनःपुनःआदिशतोविसृजतःशत्रूंश्च हेइन्द्र पराचः प्रमृणतेयथापराङ्मुखाभवन्ति तथाबाधस्व तदनन्तरंतानजहिच ॥ १७ ॥

अथाष्टादशी–

आसुष्मांणोमघवन्निन्द्रपृत्स्व१स्मभ्यंमहिवरिवःसुगंकः ।
अपांतोकस्यतनयस्यजेषइन्द्रसूरीन्कृणुहिस्मांनोअर्धम् ॥ १८ ॥

आसु । स्म । नः । मघऽवन् । इन्द्र । पृत्ऽसु । अस्मभ्यम् ।
महि । वरिवः । सुऽगम् । करिति कः । अपाम् । तोकस्य । तनयस्य ।
जेषे । इन्द्र । सूरीन् । कृणुहि । स्म । नः । अर्धम् ॥ १८ ॥

हेमघवन् धनवन्निन्द्र नोस्मदीयासु आसुपृत्सुपृतनासुसंग्रामेषु अस्मभ्यंमहिमहत् सुगं सुखेनप्राप्यं वरिवोधनं कःकुरु स्मेतिपूरणः अपिच हेइन्द्र अपांआप्तव्यानांधनानांउदकानांवा

तोकस्यपुत्रस्यतनयस्यपौत्रस्यच जेषे जयार्थंसूरीन्स्तोतॄन्नोस्मान्अर्धअर्धानसमृद्धान्कृणुहि कुरु यद्वा अर्धकारिणः शत्रूणांखंडयितॄन् कुरु स्मेतिपूरकः ॥ १८ ॥

अथैकोनविंशी—

आत्वाहर॑योवृष॑णोयुजानावृष॑रथासोवृष॑रश्मयोत्याः ।
अस्मत्राञ्चोवृष॑णोवज्रवाहो॒वृष्णेमदा॑यसुयुजो॑वहन्तु ॥ १९॥

आ । त्वा । हर॑यः । वृष॑णः । युजानाः । वृष॑ऽरथासः । वृष॑ऽरश्मयः। अत्याः । अस्मऽत्राञ्चः । वृष॑णः । वज्रऽवाहः । वृष्णे । मदा॑य । सुऽयुज॑ः । वहन्तु ॥ १९ ॥

हेइन्द्र त्वात्वांहरयोश्वाः वृष्णेवर्षित्रेमदायमदकरायसोमायईदृशंसोमंपाययितुंआवहन्तु कीदृशाअश्वाः वृषणःकामानांवर्षितारः युजानाःस्वयमेवरथेयुज्यमानाः वृषरथासःवृषाकामाभिवर्षकोरथोयेषांतेतथोक्ताः वृषरश्मयः वर्षितारोरश्मयःप्रग्रहायेषांतादृशाः अत्याःसततगामिनःअस्मत्राञ्चःअस्मान्प्रत्यंचन्तोगच्छन्तःवृषणोनित्यतरुणाः वज्रवाहःवज्रादीन्यायुधानिवहन्तः सुयुजःशोभनयोजनाः ॥ १९ ॥

अथविंशी—

आतेवृषन्वृष॑णोद्रोण॑मस्थुर्घृतप्रुषोनोर्मयोमद॑न्तः ।
इन्द्रप्रतुभ्यंवृष॑भिःसुतानांवृष्णेभरन्तिवृषभायसोम॑म् ॥२०॥१९।

आ । ते । वृषन् । वृष॑णः । द्रोण॑म् । अस्थुः । घृतऽप्रुष॑ः । न । ऊर्मय॑ः । मद॑न्तः । इन्द्र । प्र । तुभ्य॑म् । वृष॑ऽभिः । सुतानाम् । वृष्णे । भरन्ति । वृषभाय॑ । सोम॑म् ॥ २० ॥ १९ ॥

हेवृषन् कामानांवर्षितरिन्द्र वृषणःसेक्तारोयुवानःत्वदीयाअश्वाःघृतप्रुषोनोर्मयः घृतमुदकंसिंचन्तः सामुद्राःतरंगाइवमदन्तः हृष्यन्तः मत्ताःसन्तःतेत्वदीयंद्रोणंद्रुममयंरथंआस्थुः आस्थितवन्तः अतस्त्वमागच्छेतिभावः कुतइत्यतआह हेइन्द्र वृष्णेयूनेनित्यतरुणायवृषभायकामानांवर्षयित्रेतुभ्यं वृषभिःकामाभिवर्षकैः ग्रावभिःसुतानामभिषुतानांसोमानांमध्येत्वद्भागरूपंसोमंयस्मादध्वर्यवः प्रभरन्ति प्रहरन्ति होमार्थंप्रणयन्ति तस्मादागच्छेत्यर्थः ॥ २० ॥

॥ इतिचतुर्थस्यसप्तमेएकोनविंशोवर्गः ॥ १९ ॥

अथैकविंशी–

वृषासिदिवोवृषभःपृथिव्यावृषासिन्धूनांवृषभस्तियानाम् ।
वृष्णेतइन्दुर्वृषभपीपायस्वादूरसोमधुपेयोवराय ॥ २१ ॥

वृषा । असि । दिवः । वृषभः । पृथिव्याः । वृषा । सिन्धूनाम् ।
वृषभः । स्तियानाम् । वृष्णे । ते । इन्दुः । वृषभ । पीपाय । स्वादुः ।
रसः । मधुऽपेयः । वराय ॥ २१ ॥

हेइन्द्र त्वंदिवोद्युलोकस्यवृषासि हविर्भिःसेक्ताभवसि पृथिव्याःभूमेश्चवृषभः कामानांवर्षिता सिंधूनांस्यन्दनशीलानांचनदीनांवृषा वर्षेणपूरयितासि तथास्तियानांसंघीभूतानां स्थावरजंगमात्मनांप्राणिनांवृषभः कामानांवर्षिताभवसि यद्वा स्तियाःसंघीभूताआपःतासांवर्षितासि वृषभकामाभिवर्षकेन्द्र वरायश्रेष्ठायवृष्णे सेक्त्रे तेतुभ्यं त्वदर्थंस्वादुर्मधुरःरसोरसनीयःप्रशस्योरसवान्वारसात्मकोवा मधुपेयोमधुवत्पातव्यः इन्दुःसोमः पीपायप्यायतेवर्धते अतस्त्वमागत्यतंसोमंपिबेतिभावः ॥ २१ ॥

अथद्वाविंशी–

अयंदेवःसहसाजायमानइन्द्रेणयुजापणिमस्तभायत् ।
अयंस्वस्यपितुरायुधानीन्दुरमुष्णादशिवस्यमायाः ॥ २२ ॥

अयम् । देवः । सहसा । जायमानः । इन्द्रेण । युजा । पणिम् ।
अस्तभायत् । अयम् । स्वस्य । पितुः । आयुधानि । इन्दुः ।
अमुष्णात् । अशिवस्य । मायाः ॥ २२ ॥

देवोद्योतमानःअयमिन्दुःसोमः इन्द्रेणयुजासख्यासहजायमानः प्रादुर्भवन् पणिंवणिजंगवामादातारं बलाख्यमसुरं यद्वा पणीनांस्वामित्वात्पणिरित्युच्यते तमसुरंसहसाबलेनअस्तभायत् अस्तभ्नात् न्यरुधत् अपिचअयंसोमःस्वस्यधनस्यगोरूपस्यपितुःपालयितुः अशिवस्यासुखकरस्यबलस्यायुधानि वज्रादीनिअमुष्णादपाहरत् तदीयामायाश्चामुष्णात् हेइन्द्र त्वत्सख्यबलात्एतत्सर्वंसोमःकृतवान् अतस्तवमहिमाकेनवर्णयितुंशक्यतइतीन्द्रस्तुतिः ॥ २२ ॥

अथत्रयोविंशी—

अयमंकृणोदुषसंःसुपत्नीरयंसूर्ये अदधाज्ज्योतिरन्तः ।
अयंत्रिधातुदिविरोचनेषुंत्रितेषुंविन्ददमृतंनिगूंह्ळम् ॥ २३ ॥

अयम् । अकृणोत् । उषसंः । सुऽपत्नीः । अयम् । सूर्ये । अदधात् । ज्योतिः । अन्तरिति । अयम् । त्रिऽधातु । दिवि । रोचनेषु । त्रितेषु । विन्दत् । अमृतम् । निऽगूंह्ळम् ॥ २३ ॥

अयंसोमः उषसःउषःकालान् सुपत्नीःशोभनःपतिःपालकःसूर्योयासामुषसांतादृशीरकृणोत् अकरोत् अयमेवसूर्येसूर्यमंडलेन्तर्मध्येज्योतिस्तेजःअदधात् निहितवान् त्रिधातुसवनत्रयरूपेणत्रिप्रकारं अयंलतारूपःसोमःदिविद्युलोके रोचनेषुरोचमानेषु त्रितेषुतृतीयेस्थाने ततेषुविस्तृतेषुदेवेषुनिगूह्ळं नितरांगूढंअदृश्यतयावर्तमानं अमृतंअमृतत्वकारणं पीयूषंविन्दत्अविन्दत्अलभत हेइन्द्रत्वत्साहाय्यादेवमेवंसोमःकृतवानितीन्द्रस्यस्तुतिरधिगंतव्या यद्वा इदंशब्देनइन्द्रएवपरामृश्यते अयमिन्द्रः उषसःशोभनपतिकाअकरोत् अयमेवसूर्येतज्ज्योतिरदधात्दिविद्युलोकेरोचमानेषुत्रिस्थानगतेषुदेवेषुमध्ये अयमेवेन्द्रः त्रिधातु सवनत्रयात्मनात्रिप्रकारंनिगूढं पात्रैःसंवृतं अमृतंअमरणहेतुभूतंसोमंअविन्ददलभत ॥ २३ ॥

अथचतुर्विंशी—

अयंद्यावापृथिवीविष्कंभायदयंरथमयुनक्सप्तरंश्मिम् ।
अयंगोषुशच्यांपक्कमन्तःसोमोंदाधारदशंयन्त्रमुत्संम् ॥२४॥२०॥

अयम् । द्यावापृथिवी इति । वि । स्कभायत् । अयम् । रथम् । अयुनक् । सप्तऽरंश्मिम् । अयम् । गोषु । शच्या । पक्कम् । अन्तरिति । सोमः । दाधार । दशऽयंन्त्रम् । उत्संम् ॥ २४ ॥ २० ॥

अयंसोमः द्यावापृथिवीदिवंचपृथिवींचविष्कभायत् विविधमस्थापयत् अपिचायंसोमः सूर्यस्यचरथंसप्तरश्मिंसप्तरश्मिभिःकिरणैरुपेतं सप्ताश्वंसप्तचक्रंवाअयुनक् अयोजयत् तथा-अयंसोमः गोष्वन्तर्मध्येपक्कंनिष्पन्नं शच्याप्रज्ञयासंकल्परूपयाउत्समुत्सरणशीलंपयःदाधार धारयति दशयंत्रं उत्सस्यहेतुगर्भविशेषणमेतत् उत्सरणहेतुभूतैर्दशभिःचक्षुःश्रोत्रादिभिःयंत्रैरुपा-

येर्युक्तं इदंचपदंखैलिकेनमंत्रान्तरेणव्याख्यायते—चक्षुश्चश्रोत्रंचमनश्चवाक्चप्राणापानौदेहइदंशरीरं। द्यौप्रत्यंचावनुलोमौविसर्गावेतंत्वंमन्येदशयंत्रमुत्समितिं। यद्वाअयमिन्द्रः द्यावापृथिवीविष्कभायत् स्वेस्वेस्थानेस्थितेअकरोत् अयमेवसप्तरश्मिं सूर्यस्यरथमयुनक् अयमेवेन्द्रोगोष्वन्तःशच्याआत्मीयेनकर्मणापक्वंपयोधारयति एवंभूतेन्द्रार्थंसोमःदशयंत्रं दशसंख्याकैरैन्द्रवायवादिभिःग्रहैर्यंत्रितैःगृहीतैरुपेतं उत्संउत्सरणशीलं रसं दाधारधारयति प्रातःसवनेऐन्द्रवायवादयोदशग्रहागृह्यंते तथाचब्राह्मणं—नवप्रातर्ग्रहागृह्यंतेनवभिर्बहिष्पवमानेस्तुवतेस्तुतेस्तोमेदशमंगृह्णातीति[1]। अन्यत्राम्नातं—दशैतानध्वर्युःप्रातःसवनेग्रहान्गृह्णातीति। तदभिप्रायेणेदंदशयंत्रमितिविशेषणं ॥ २४ ॥

॥ इतिचतुर्थस्यसप्तमेविंशोवर्गः ॥ २० ॥

यआनयदितित्रयस्त्रिंशत्यृचंद्वितीयंसूक्तं बृहस्पतिपुत्रस्यशंयोरार्षं पुरूतममित्येषातिनिचृत् अधिबृबुरित्येषापादनिचृत् त्रयःसप्तकाःपादनिचृत्मध्यमःषट्कश्चेदतिनिचृदित्युक्तलक्षणात्त्रयस्त्रिंश्यनुष्टुप् शिष्टागायत्र्यः अधिबृबुःपणीनामित्येस्मिन्नंत्येतृचेबृबुर्नामतक्षास्तूयते अतःसतृचःतद्देवताकः शिष्टास्त्रिंशदैन्द्र्यः तथाचानुक्रान्तं—यआनयत्त्रयस्त्रिंशद्गायत्रंपुरूतममितिनिचृदंत्यानुष्टुप्तृचेंत्येबृबुस्तक्षादैवतमिति। महाव्रतेपिनिष्केवल्येअंत्यस्तृचवर्जमेतत्सूक्तं तथैवपंचमारण्यकं यआनयत्परावतइतितिस्रउत्तमामुद्धरतीति।

तत्रप्रथमा—

यआनयत्परावतःसुनीतीतुर्वशंयदुम्। इन्द्रःसनोयुवासखा ॥ १ ॥

यः। आ। अनयत्। पराऽवतः। सुऽनीती। तुर्वशम्। यदुम्।

इन्द्रः। सः। नः। युवा। सखा ॥ १ ॥

यइन्द्रः तुर्वशंयदुंचएतत्संज्ञौराजानौशत्रुभिर्दूरदेशेप्रक्षिप्तौ सुनीतीसुनीत्याशोभनेननयनेनपरावतःतस्माद्दूरदेशात्आनयदानीतवान् युवातरुणःसइन्द्रःनोस्माकंसखाभवतु ॥ १ ॥

अथद्वितीया—

अविप्रेचिद्वयोदधदनाशुनाचिदर्वता। इन्द्रोजेताहितंधनम् ॥ २ ॥

1 ऐ० ब्रा० ३. १.

अविप्रे । चित् । वयः । दधत् । अनाशुना । चित् । अर्वता । इन्द्रः । जेता । हितम् । धनम् ॥ २ ॥

अविप्रेचित् विप्रःस्तोता तद्विलक्षणेपिपुरुषे वयोन्नंदधत्इन्द्रोधारयति किमुवक्तव्यंस्तोतरिधारयतीति सइन्द्रःअनाशुनाचित्अक्षिप्रगमनेनापिअर्वता अश्वेनहितं शत्रुषुनिहितंस्थापितं धनंजेता जयशीलोभवति जयतेस्ताच्छीलिकस्तृन् अतोनलोकाव्ययेतिषष्ठीप्रतिषेधः ॥ २ ॥

अथतृतीया—

महीरस्यप्रणीतयःपूर्वीरुतप्रशस्तयः । नास्यक्षीयन्तऊतयः ॥ ३ ॥

महीः । अस्य । प्रऽनीतयः । पूर्वीः । उत । प्रऽशस्तयः । न । अस्य । क्षीयन्ते । ऊतयः ॥ ३ ॥

अस्येन्द्रस्यप्रणीतयः प्रकृष्टानीतयः प्रापणानि महीःमह्योमहत्योभवन्ति उतापिचप्रशस्तयःप्रकृष्टाःस्तुतयःस्तोतृभिःक्रियमाणाःपूर्वीर्बह्व्योभवन्ति तथास्येन्द्रस्यऊतयोरक्षाःनक्षीयन्ते नापचीयन्ते किन्तुसर्वदावर्धन्तएव ॥ ३ ॥

अथचतुर्थी—

सखायोब्रह्मवाहसेर्चतप्रचगायत । सहिनःप्रमतिर्मही ॥ ४ ॥

सखायः । ब्रह्मऽवाहसे । अर्चत । प्र । च । गायत । सः । हि । नः । प्रऽमतिः । मही ॥ ४ ॥

हेसखायः समानख्यानाःस्तोतारः ब्रह्मवाहसे ब्रह्मभिर्मन्त्रैर्वहनीयायप्राप्तव्यायेन्द्रायअर्चत शस्त्राणिशंसत प्रगायतच स्तोत्राणि सहिसखल्विन्द्रःनोस्माकंमहीमहतीप्रमतिःप्रकृष्टाबुद्धिः ईदृश्याबुद्धेःप्रदातेत्यर्थः ॥ ४ ॥

अथपंचमी—

त्वमेकस्यवृत्रहन्नविताद्वयोरसि । उतेदृशेयथावयम् ॥ ५ ॥ २१ ॥

त्वम् । एकस्य । वृत्रऽहन् । अविता । द्वयोः । असि । उत । ईदृशे । यथा । वयम् ॥ ५ ॥ २१ ॥

हेवृत्रहन् वृत्राणांशत्रूणांहन्तरिन्द्र त्वंएकस्यस्तोतुःद्वयोश्चस्तोत्रोःअवितारक्षितासि सर्वेषां स्तोतृणांरक्षकोभवसीत्यर्थः उतअपिच ईदृशेजनेप्यविताभवसि यथायादृशावयंत्वयारक्षिताबहुविधपुत्रपौत्राअभूम ईदृशस्यापिजनस्यत्वमेवरक्षकोनान्यइत्यर्थः ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेएकविंशोवर्गः ॥ २१ ॥

अथषष्ठी—

नयसीद्वतिद्विषःकृणोष्युक्थशंसिनः । नृभिःसुवीरउच्यसे ॥ ६ ॥

नयसि । इत् । ऊँ इति । अति । द्विषः । कृणोषि । उक्थऽशंसिनः । नृऽभिः । सुऽवीरः । उच्यसे ॥ ६ ॥

हेइन्द्र इत्त्वमेवद्विषः द्वेष्टॄन् अतिनयसि अस्मान्नयसितारयसि उइतिपूरकः तथाउक्थशंसिनःउक्थानिशस्त्राणिशंसतःस्तोतॄनस्मान्कृणोषि समृद्धानकरोषि यस्मात्त्वंनृभिः स्तुतीनांनेतृभिः पुरुषैः सुवीरःशोभनैः वीरैःपुत्रपौत्रादिभिः स्तोतृभ्योदातव्यैरुपेतइत्युच्यसे स्तूयसेअतस्तानप्यस्मभ्यंप्रयच्छेतिशेषः ॥ ६ ॥

अथसप्तमी—

ब्रह्माणंब्रह्मवाहसंगीर्भिःसखायमृग्मियम् । गांनदोहसेहुवे ॥ ७ ॥

ब्रह्माणम् । ब्रह्मऽवाहसम् । गीःऽभिः । सखायम् । ऋग्मियम् । गाम् । न । दोहसे । हुवे ॥ ७ ॥

ब्रह्माणंपरिवृढं ब्रह्मवाहसं ब्रह्मभिःस्तुतिरूपैर्मन्त्रैर्वहनीयं सखायंअस्माकंसखिभूतंऋग्मियं ऋग्माऋचस्तदर्हं स्तुत्यर्हमित्यर्थः एवंभूतमिन्द्रं दोहसेदोग्धुं गांन गामिव गीर्भिः स्तुतिभिः हुवेआह्वयामि अस्मदीयान्कामान्दोग्धुम् ॥ ७ ॥

अथाष्टमी—

यस्यविश्वानिहस्तयोरूचुर्वसूनिनिद्विता । वीरस्यपृतनासहः ॥ ८ ॥

यस्य । विश्वानि । हस्तयोः । ऊचुः । वसूनि । नि । द्विता । वीरस्य । पृतनाऽसहः ॥ ८ ॥

वीरस्यवीर्यवतः पृतनाषहः पृतनाःशत्रुसेनाः तासामभिभवितुः यस्येन्द्रस्यहस्तयोः बाह्वोः विश्वानिसर्वाणिद्विता दिव्यपार्थिवरूपेणद्वैधं वर्तमानानिवसूनिविद्यन्तइतिन्यूचुः ऋषयोनितरांवदन्ति तमिन्द्रंहुवइतिपूर्वत्रसंबन्धः ॥ ८ ॥

अथनवमी—

विदृळ्हानिचिदद्रिवोजनानांशचीपते। वृहमायाअनानत ॥ ९ ॥

वि। दृळ्हानि। चित्। अद्रिऽवः। जनानाम्। शचीऽपते। वृह। मायाः। अनानत ॥ ९ ॥

हेअद्रिवः आदृणात्यनेनेत्यद्रिर्वज्रः तद्वन्शचीपते इन्द्र जनानांशत्रूणांदृळ्हानिचिदृढानिस्थिराण्यपि पुराणिबलानिवा विवृह विभिंधि विविधमुन्मूलयेत्यर्थः हेअनानत अप्रह्वीभूत सर्वोच्छ्रितेन्द्र मायाश्चशत्रुभिर्निर्मिताः विवृह विनाशय ॥ ९॥

अथदशमी—

तमुत्वासत्यसोमपाइन्द्रवाजानांपते। अहूमहिश्रवस्यवः ॥१०॥२२॥

तम्। ऊँ इति। त्वा। सत्य। सोमऽपाः। इन्द्र। वाजानाम्। पते। अहूमहि। श्रवस्यवः ॥ १० ॥ २२ ॥

हेसत्य अवितथस्वभाव सोमपाः सोमस्यपातः हेवाजानांपते अन्नानांपालयितः एवंभूतहेइन्द्र श्रवस्यवः श्रवोन्नंआत्मनइच्छन्तोवयं तमुत्वा तादृशंत्वामेवअहूमहि आह्वयामः स्तुमइत्यर्थः ॥ १० ॥

॥ इतिचतुर्थस्यसप्तमेद्वाविंशोवर्गः ॥ २२ ॥

अथैकादशी—

तमुत्वायःपुरासिथयोवानूनंहितेधने। हव्यःसश्रुधीहवम् ॥ ११ ॥

तम्। ऊँ इति। त्वा। यः। पुरा। आसिथ। यः। वा। नूनम्। हिते। धने। हव्यः। सः। श्रुधि। हवम् ॥ ११ ॥

हेइन्द्र तमुत्वा तमेवत्वां स्तुमइतिशेषः यस्त्वं पुरापूर्वस्मिन्काले हव्योह्वातव्यःआसिथ बभू-विथधनलाभार्थं योवायश्चत्वं हिते शत्रुषुनिहितेधनेनिमित्तभूतेसति नूनमद्यापिहव्योह्वातव्यो-बभूविथ सत्वमस्मदीयंहवंस्तोत्रंश्रुधि शृणु ॥ ११ ॥

अथद्वादशी–

धीभिरर्वद्भिरर्वतोवाजाँइन्द्रश्रवाय्यान् । त्वयाजेष्महितंधनम् ॥ १२॥

धीभिः । अर्वत्ऽभिः । अर्वतः । वाजान् । इन्द्र । श्रवाय्यान् ।
त्वया । जेष्म । हितम् । धनम् ॥ १२ ॥

हेइन्द्र धीभिः स्तुतिभिः त्वद्विषयाभिःप्रीतेनत्वयाअनुगृहीतावयंअर्वद्भिरस्मदीयैरश्वैः अर्वतः शत्रुसंबन्धिनोऽश्वान्श्रवाय्यान् श्रवणीयान् प्रशस्यान्वाजान् अन्नानिच हितंशत्रुषुनि-हितंधनंच जेष्म त्वदनुग्रहाज्जयेम ॥ १२ ॥

अथत्रयोदशी–

अभूरुवीरगिर्वणोमहाँइन्द्रधनेहिते । भरेवितन्तसाय्यः ॥ १३ ॥

अभूः । ऊँ इति । वीर । गिर्वणः । महान् । इन्द्र । धने । हिते ।
भरे । वितन्तसाय्यः ॥ १३ ॥

हेवीर विविधंईरयितःशत्रूणां हेगिर्वणोगीर्भिर्वननीयेन्द्र हितेशत्रुषुनिहितेधनेनिमित्तभू-तेसति महान्प्रवृद्धस्त्वं भरेसंग्रामेवितंतसाय्यः शत्रूणांजेताभूः तंतसइतिधातुःजयार्थःकंड्वादौ पठ्यते तस्माद्व्युपसृष्टादौणादिकःकर्तरिआय्यप्रत्ययः ॥ १३ ॥

अथचतुर्दशी–

यातऊतिरमित्रहन्मक्षूजवस्तमासति । तयानोहिनुहीरथम् ॥ १४ ॥

या । ते । ऊतिः । अमित्रऽहन् । मक्षुजवःऽतमा । असति । तया ।
नः । हिनुहि । रथम् ॥ १४ ॥

हेअमित्रहन् अमित्राणांशत्रूणांहन्तरिन्द्र तेत्वदीयामक्षुजवस्तमा अतिशयेनशीघ्रजवा याऊतिर्गतिःअसतिअस्ति तयागत्यानोस्माकंरथंहिनुहि प्रेरय शत्रुजयार्थंशीघ्रंगमय ॥ १४ ॥

अथपंचदशी–

सरथेनरथीतमोस्माकेनाभियुग्वना । जेषिजिष्णोहितंधनम् ॥ १५॥२३॥

सः । रथेन । रथिऽतमः । अस्माकेन । अभिऽयुग्वना । जेषि ।
जिष्णो इति । हितम् । धनम् ॥ १५ ॥ २३ ॥

हेजिष्णो जयशीलेन्द्र रथीतमः अतिशयेनरथीमहारथः सत्वंअस्माकेन अस्मदीयेन अभियुग्वना अभियोक्ताशत्रूणामभिभवित्रारथेन हितंशत्रुषुनिहितंधनंजेषि अस्मदर्थंजय ॥१५॥

॥ इतिचतुर्थस्यसप्तमेत्रयोविंशोवर्गः ॥ २३ ॥

अथषोडशी–

यएकइत्तमुंष्टुहिकृष्टीनांविचर्षणिः । पतिर्जज्ञेवृषक्रतुः ॥ १६ ॥

यः । एकः । इत् । तम् । ॐ इति । स्तुहि । कृष्टीनाम् ।
विऽचर्षणिः । पतिः । जज्ञे । वृषऽक्रतुः ॥ १६ ॥

विचर्षणिर्विशेषेणसर्वस्यद्रष्टा वृषक्रतुर्वर्षकर्मायइन्द्रः एकइव एकएव कृष्टीनांप्रजानांपतिरधिपतिर्जज्ञे अजायत नान्यःकश्चिव् तमुतमेवेन्द्रंहेस्तोतःस्तुहि ॥ १६॥

अथसप्तदशी–

योगृणतामिदासिथापिरूतीशिवःसखा । सत्वंनइन्द्रमृळय ॥ १७ ॥

यः । गृणताम् । इत् । आसिथ । आपिः । ऊती । शिवः ।
सखा । सः । त्वम् । नः । इन्द्र । मृळय ॥ १७ ॥

हेइन्द्र यस्त्वं ऊतीऊत्या रक्षयाशिवःसुखकरः अतएवसखामित्रभूतश्चसन् गृणतामिव् स्तुवतामस्माकमेवआपिर्बंधुरासिथ पुराबभूविथ संताद्दशस्त्वं नोस्मान्इदानींमृळय सुखय॥१७॥

अथाष्टादशी–

धिष्ववज्रंगभस्त्योरक्षोहत्यायवज्रिवः । सासहीष्ठाअभिस्पृधः ॥ १८ ॥

धिष्व । वज्रम् । गभस्त्योः । रक्षःऽहत्याय । वज्रिऽवः ।
ससहीष्ठाः । अभि । स्पृधः ॥ १८ ॥

हेवज्रिवः वज्रवन्निन्द्र गभस्त्योरात्मीययोर्हस्तयोर्वज्रंकुलिशंधिष्व धारय किमर्थं रक्षोहत्याय रक्षसांहननार्थं धृत्वाच स्पृधःस्पर्धमानाःअभि अभिगंत्रीरासुरीःसेनाः संसहीष्ठाः अत्यर्थमभिभव ॥ १८ ॥

अथैकोनविंशी—

प्रत्नंरयीणांयुजंसखायंकीरिचोदनम् । ब्रह्मवाहस्तमंहुवे ॥ १९ ॥

प्रत्नम् । रयीणाम् । युजम् । सखायम् । कीरिऽचोदनम् ।
ब्रह्मवाहःऽतमम् । हुवे ॥ १९ ॥

प्रत्नं चिरंतनं सर्वेषामाद्यं रयीणांधनानांयुजं योजयितारं दातारंसखायंमित्रभूतं कीरिचोदनं कीरीणांस्तोतॄणांचोदयितारं ब्रह्मवाहस्तमं अतिशयेनब्रह्मभिर्मंत्रैर्वहनीयं एवंविधमिन्द्रं हुवे आह्वयामि ॥ १९ ॥

अथविंशी—

सहिविश्वानिपार्थिवाँएकोवसूनिपत्यते । गिर्वणस्तमोअध्रिगुः॥२०॥२४॥

सः । हि । विश्वानि । पार्थिवा । एकः । वसूनि । पत्यते ।
गिर्वणःऽतमः । अध्रिऽगुः ॥ २० ॥ २४ ॥

सहि सखल्विन्द्रः विश्वानिसर्वाणिपार्थिवा पृथिव्यांभवानि वसूनिधनानिएकएवपत्यते ईष्टे नान्यःकश्चित् पत्यतिरैश्वर्यकर्मा कीदृशइन्द्रः गिर्वणस्तमः अतिशयेनगीर्भिःस्तुतिभिःसंभजनीयः अध्रिगुरधृतगमनः अप्रतिहतगतिरित्यर्थः ॥ २० ॥

॥ इतिचतुर्थस्यसप्तमेचतुर्विंशोवर्गः ॥ २४ ॥

अथैकविंशी—

सनोनियुद्भिरापृणकामंवाजेभिरश्विभिः । गोमद्भिर्गोपतेधृषत् ॥२१॥

सः । नः । नियुत्ऽभिः । आ । पृण । कामम् । वाजेभिः ।
अश्विऽभिः । गोमत्ऽभिः । गोऽपते । धृषत् ॥ २१ ॥

हेगोपते गवां पालयितः सत्वंनोस्माकंकामंनियुद्भिर्वडवाभिः धृषत्धृष्टंदारिद्र्यनाशनसमर्थंयथाभवतितथाआपृणापूरय यद्वा धृषदितीन्द्रविशेषणं शत्रूणांधर्षकस्त्वमित्यर्थः तथागोमद्भिर्बहुभिर्गोभिर्युक्तैःअश्विभिःबहुभिरश्वैरुपेतैर्वाजैरन्नैश्च अस्मदीयंकाममापूरय ॥ २१ ॥

अथद्वाविंशी—

तद्वोगायसुतेसचापुरुहूतायसत्वने । शंयद्गवेनशाकिने ॥ २२ ॥

तत् । वः । गाय । सुते । सचा । पुरुऽहूताय । सत्वने । शम् ।
यत् । गवे । न । शाकिने ॥ २२ ॥

हेस्तोतारोवोयूयंसुतेअभिषुतेसोमेसति पुरुहूतायबहुभिर्यजमानैराहूताय सत्वने शत्रूणांसादयित्रे धनानांवासनित्रेदात्रेइन्द्राय तत्स्तोत्रंसचा सह संहताभूत्वा गायगायत यत्स्तोत्रं शाकिनेशक्तिमतेइन्द्राय शंसुखकरंभवति गवेनयथागवेयवसंसुखकरं भवति तद्वदित्यर्थः॥ २२ ॥

अथत्रयोविंशी—

नघावसुर्नियमतेदानंवाजस्यगोमतः । यत्सीमुपश्रवद्गिरः ॥ २३ ॥

न । घ । वसुः । नि । यमते । दानम् । वाजस्य । गोऽमतः ।
यत् । सीम् । उप । श्रवत् । गिरः ॥ २३ ॥

वसुर्वासयितासइन्द्रः गोमतोबहुभिर्गोभिर्युक्तस्यवाजस्यान्नस्यबलस्यवा दानंप्रदानं नघ नखलु नियमते नियच्छति उपरतंकरोति यद्यदि सींसर्वतः गिरःअस्मदीयाःस्तुतीः उपश्रवत उपश्रृणुयात् स्तोत्रश्रवणेसति सर्वदाददातीत्यर्थः ॥ २३ ॥

अथचतुर्विंशी—

कुवित्संस्यप्रहिव्रजंगोमन्तंदस्युहागमत् । शचीभिरपनोवरत् ॥ २४ ॥

कुवित्ऽसस्य । प्र । हि । व्रजम् । गोऽमन्तम् । दस्युऽहा ।
गमत् । शचीभिः । अप । नः । वरत् ॥ २४ ॥

कुवित्सस्य कुविद्बहुशःस्यतिहिनस्तीतिकुवित्सोनामकश्चित् तस्यस्वभूतं गोमंतं बहुभिर्गोभिर्युक्तं व्रजंगोष्ठं दस्युहादस्यूनामुपक्षपयितृणांहन्तेन्द्रः प्रगमत् प्रकर्षेणगच्छति हियस्मादेवंतस्मात्शचीभिरात्मीयैः कर्मभिः प्रज्ञाभिर्वा नोस्माकंतागाः अपवरत् निगूढास्ताअपावृणोत् ॥ २४ ॥

अथपंचविंशी—

इमाउंत्वाशतक्रतोभिप्रणोनुवुर्गिरः । इन्द्रंवत्संनमातरः ॥ २५ ॥२५॥

इमाः । ऊं इति । त्वा । शतक्रतो इति शतऽक्रतो । अभि । प्र ।
नोनुवुः । गिरः । इन्द्र । वत्सम् । न । मातरः ॥ २५ ॥ २५ ॥

हेशतक्रतो बहुविधकर्मन् बहुविधप्रज्ञवेन्द्र त्वात्वामभिइमाअस्मदीयागिरः स्तुतयः प्रणोनुवुः प्रकर्षेणपुनःपुनर्गच्छन्ति नौतिरत्रगतिकर्मा तत्रदृष्टान्तः—वत्संनमातरः यथामातरोगावोगृहेवर्तमानंवत्संशीघ्रमभिगच्छन्तितद्वत् यद्वास्मदीयावाचस्त्वां अभिनो नुवुः अभितःशब्दयन्ति स्तुवन्ति यथागावोवत्समभिलक्ष्यहंभारवंकुर्वन्तितद्वत् ॥ २५॥

॥ इतिचतुर्थस्यसप्तमेपंचविंशोवर्गः ॥ २५ ॥

अथषड्विंशी—

दूणाशंसख्यंतवगौरसिवीरगव्यते । अश्वोअश्वायतेभव ॥ २६ ॥

दुःऽनशंम् । सख्यम् । तव । गौः । असि । वीर । गव्यते ।
अश्वः । अश्वऽयते । भव ॥ २६ ॥

हेइन्द्र तवत्वदीयंसख्यंसखित्वं दूणाशं दुर्नाशं नाशयितुमशक्यं अतिदृढमित्यर्थः अतोहेवीर वीरयितरिन्द्र गव्यतेगामात्मनइच्छतेत्वंगौरसि गवांप्रदानाभवसि उपचारात्कारणेकार्यशब्दः तथाअश्वायतेअश्वानात्मनइच्छतेअश्वोभव अश्वप्रदोभवसि ॥ २६ ॥

अथसप्तविंशी—

समंन्दस्वाह्यन्धसोराधसेतन्वामहे । नस्तोतारंनिदेकरः ॥ २७ ॥

सः । मन्दस्व । हि । अन्धसः । राधसे । तन्वा । महे । न ।
स्तोतारम् । निदे । करः ॥ २७ ॥

हेइन्द्र सतादृशस्त्वं अन्धसःसोमस्यपानेनहृष्टया तन्वाआत्मीयेनशरीरेणमन्दस्व मोदस्व किमर्थं महेमहते राधसेधनार्थं हिपूरणः अपिच त्वदीयंस्तोतारंनिदेनिंदकायतस्यवशंनकरः नकुर्याः ॥ २७॥

अथाष्टाविंशी–

इमाउँत्वासुतेसुतेनक्षन्तेगिर्वणोगिरः। वत्संगावोनधेनवः ॥ २८ ॥

इमाः। ऊँ इति। त्वा। सुतेऽसुते। नक्षन्ते। गिर्वणः।
गिरः। वत्सम्। गावः। न। धेनवः ॥ २८ ॥

हेगिर्वणोगीर्भिर्वननीयेन्द्र सुतेसुतेसोमेभिषुतेभिषुतेसति इमाअस्मदीयागिरःस्तुतयःत्वा त्वांनक्षन्ते व्याप्नुवन्ति धेनवोदोग्ध्यः गावोन गावइव वत्सं तायथाशीघ्रंवत्संव्याप्नुवन्तितद्वव उपूरणः ॥ २८ ॥

अथैकोनत्रिंशी–

पुरूतमंपुरूणांस्तोतॄणांविवाचि। वाजेभिर्वाजयताम् ॥ २९ ॥

पुरुऽतमम्। पुरूणाम्। स्तोतॄणाम्। विऽवाचि। वाजेभिः।
वाजऽयताम् ॥ २९ ॥

हेइन्द्र पुरुतमंपुरूणांबहूनांशत्रूणांतमयितारंग्लपयितारंत्वां पुरूणांबहूनांस्तोतॄणांअस्माकंस्तुतिःप्राप्नोत्वितिशेषः कीदृशानां विवाचिविविधाः स्तुतशस्त्रात्मिकावाचःयस्मिन्यज्ञेतस्मिन्वाजेभिर्वाजैर्हविर्लक्षणैरन्नैर्वाजयतांवाजवन्तंवेगवन्तंबलवन्तंवात्वांकुर्वताम् ॥ २९ ॥

अथत्रिंशी–

अस्माकमिन्द्रभूतुतेस्तोमोवाहिष्ठोअन्तमः। अस्मान्रायेमहेहिनु ॥ ३० ॥

अस्माकम्। इन्द्र। भूतु। ते। स्तोमः। वाहिष्ठः। अन्तमः।
अस्मान्। राये। महे। हिनु ॥ ३० ॥

हेइन्द्र वाहिष्ठोवोढृतमःअस्माकंस्तोम स्तोत्रंतेतवअन्तमःअन्तिकतमोभूतुभवतु त्वंचास्मान् महेमहते रायेधनायहिनुप्रेरय ॥ ३० ॥

अथैकत्रिंशी–

अधिबृबुःपणीनांवर्षिष्ठेमूर्धन्नस्थात्। उरुःकक्षोनगाङ्ग्यः ॥ ३१ ॥

अधि। बृबुः। पणीनाम्। वर्षिष्ठे। मूर्धन्। अस्थात्। उरुः।
कक्षः। न। गाङ्ग्यः ॥ ३१ ॥

बृबुर्नामपणीनांतक्षा तत्सकाशाल्लब्धधनोभरद्वाजः तदीयंदानमनेनतृचेनास्तौत् एतच्चम-नुनास्मर्यते—भरद्वाजःक्षुधार्तस्तुसपुत्रोनिर्जनेवने। बह्वीर्गाःप्रतिजग्राहबृबोस्तक्ष्णोमहायशाइति॥ पणनात्पणयोवणिजःएतत्संज्ञाअसुरावा तेषांतक्षाबृबुःवर्षिष्ठेमूर्धन्मूर्धनिमूर्धवदुच्छ्रितेस्थलेअध्य-स्थात् अधिष्ठितोभूत् गांग्यः गंगायाःकूलेउन्नतेभवः कक्षोन कक्षइव उरुविस्तीर्णःसन्जातितो-हीनोपिदातृत्वात्सर्वत्रश्रेष्ठोभवतीत्यर्थः॥ ३१॥

अथद्वात्रिंशी—

यस्यवायोरिवद्रवद्भद्रारातिःसहस्रिणी। सद्योदानायमंहते॥ ३२॥

यस्य। वायोःऽइव। द्रवत्। भद्रा। रातिः। सहस्रिणी।
सद्यः। दानाय। मंहते॥ ३२॥

वायोरिवद्रवत्क्षिप्रगामिनोयस्यबृबोः भद्राकल्याणी सहस्रिणीसहस्रसंख्यायुक्ता राति-र्दानंसद्यःस्तुतिसमयेएवदानायदानकामाययाचमानाय महसंमंहतेअपेक्षितं धनंददाति तंबृबुमि-तिउत्तरस्यामृचिसंबन्धः॥ ३२॥

अथत्रयस्त्रिंशी—

तत्सुनोविश्वेअर्यआसदागृणन्तिकारवः।
बृबुंसहस्रदातमंसूरिंसहस्रसातमम्॥ ३३॥ ३३॥

तत्। सु। नः। विश्वे। अर्यः। आ। सदा। गृणन्ति। कारवः।
बृबुम्। सहस्रऽदातमम्। सूरिम्। सहस्रऽसातमम्॥ ३३॥ २६॥

ततंबृबुंनोस्मदीयाःविश्वेसर्वेअर्यःस्तुतीनामीरयितारःकारवः स्तोतारः सुसुष्ठुआगृणन्ति अभिगृणन्ति अभिष्टुवन्ति कीदृशं सहस्रदातमंअतिशयेनसहस्रसंख्यस्यधनस्यदातारं सूरिंप्राज्ञं यद्वा प्रेरयितारंसहस्रसातमं अतिशयेनसहस्रसंख्यस्यस्तोत्रस्यधनस्यवासंभक्तारं॥ ३३॥

॥ इतिचतुर्थस्यसप्तमेषड्विंशोवर्गः॥ २६॥

त्वामिद्धीतिचतुर्दशर्चंतृतीयंसूक्तं बृहस्पतिपुत्रस्यशंयोरार्षमैन्द्रं प्रथमातृतीयाद्याअयुजो-बृहत्यः द्वितीयाचतुर्थ्याद्यायुजःसतोबृहत्यः तथाचानुक्रान्तं—त्वामिद्धिषळूनाप्रागाथमिति। सू-

र्कविनियोगोलैंगिकः यदिज्योतिष्टोमोबृहत्पृष्ठःस्यात्तदानींनिष्केवल्यस्यआद्यःप्रगाथःस्तोत्रियः सूत्रितंच—यद्युवैबृहत्त्वामिद्धिहवामहइति । महाव्रतेपिनिष्केवल्येअयंप्रगाथःशंसनीयः तथैवपंचमारण्यकेसूत्रितं—त्वामिद्धिहवामहेत्वंह्येहिचेरवइतिबृहतस्तोत्रियानुरूपाविति ।

तत्रप्रथमा—

त्वामिद्धिहवामहेसातावाजस्यकारवः ।
त्वांवृत्रेष्विन्द्रसत्पतिंनरस्त्वांकाष्ठास्वर्वतः ॥ १ ॥

त्वाम् । इत् । हि । हवामहे । साता । वाजस्य । कारवः ।
त्वाम् । वृत्रेषु । इन्द्र । सत्ऽपतिम् । नरः । त्वाम् ।
काष्ठासु । अर्वतः ॥ १ ॥

कारवःस्तोतारोवयं वाजस्यान्नस्यसातासातौसंभजनेनिमित्तभूतेसति हेइन्द्र त्वामिद्धि त्वामेव हवामहे स्तुतिभिराह्वयामः हेइन्द्र सत्पतिं सतांपालयितारं श्रेष्ठंत्वांनरः अन्येपिमनुष्याः वृत्रेष्वावरकेषुशत्रुषुसत्सुहवंते आह्वयन्ति तज्जयार्थं अपिच अर्वतोश्वस्यसंबन्धिनीषुकाष्ठासु यत्राश्वःक्रान्त्वातिष्ठति तासुकाष्ठासुसंग्रामेषुयुद्धकामाश्चत्वामेवाह्वयन्ति अतोवयंत्वामेवाह्वयाम-इत्यर्थः ॥ १ ॥

अथद्वितीया—

सत्वंनश्चित्रवज्रहस्तधृष्णुयामहःस्तवानोअद्रिवः ।
गामश्वंरथ्यमिन्द्रसंकिरसत्रावाजंनजिग्युषे ॥ २ ॥

सः । त्वम् । नः । चित्र । वज्रऽहस्त । धृष्णुऽया । महः ।
स्तवानः । अद्रिऽवः । गाम् । अश्वम् । रथ्यम् । इन्द्र ।
सम् । किर । सत्रा । वाजम् । न । जिग्युषे ॥ २ ॥

हेचित्र चायनीय वज्रहस्त वज्रबाहो अद्रिवः वज्रवन् यद्वा आदृणात्यनेनेत्यद्रिरशनिः तद्वन् एवंभूतइन्द्र धृष्णुयाधृष्णुः शत्रूणांधर्षयिता महोमहान्सतादृशस्त्वं स्तवानोस्माभिःस्तूयमानः सन् गांरथ्यंरथवाहनमश्वंचसंकिर सम्यक्प्रयच्छ जिग्युषे जितवते पुरुषाय भोगार्थं सत्रामहत्प्रभूतं वाजंन अन्नमिव यथाशत्रून्जितवतेभोगार्थंबह्वन्नंप्रयच्छसितद्वत् ॥ २ ॥

महाव्रते निष्केवल्ये यःसत्राहेत्यादिसूक्तशेषःशंसनीयः सूत्र्यतेहि—यःसत्राहाविचर्षणिरिति शेषोऽर्यंते अस्तुह्वर्यंतइतिसूक्तेइति । चातुर्विंशिकेहनिमाध्यंदिनसवने यःसत्राहेतिप्रगाथोवैकल्पिकोनुरूपः सूत्रितंच—यःसत्राहाविचर्षणिःस्वादोरित्थाविषूवतइति ।

प्रगाथेप्रथमासूक्तेतृतीया—

यःसं॒त्रा॒हा विच॑र्षणि॒रिन्द्रं॒तं हू॑महे व॒यम् ।
सह॑स्रमुष्क॒ तुवि॑नृम्ण॒ सत्प॑ते॒ भवा॑ स॒मत्सु॑ नो॒ वृधे ॥ ३ ॥

यः । स॒त्रा॒ऽहा । वि॒ऽच॑र्षणिः । इन्द्र॑म् । तम् । हू॒म॒हे॒ । व॒यम् ।
सह॑स्रऽमुष्क । तुवि॑ऽनृम्ण । सत्ऽप॑ते । भव॑ । स॒मत्ऽसु॑ ।
नः॒ । वृ॒धे ॥ ३ ॥

यः इन्द्रःसत्राहा महतांशत्रूणांहन्ता विचर्षणिर्विशेषेणसर्वस्यद्रष्टा तमिन्द्रंवयंहूमहे स्तुतिपदेराह्वयामः उत्तरार्धःप्रत्यक्षकृतः हेसहस्रमुष्क सहस्रशेफ यांकांचस्त्रियंसंभवन्निन्द्रः भोगलोलुपतया स्वशरीरेपर्वणिपर्वणिशेफान्ससर्जेतिकौषीतकिभिराम्नातं तदभिप्रायेणदंसंबोधनं हेतुविनृम्ण बहुधन सत्पते सतांपालयितरिन्द्र समत्सुसंग्रामेषु नोस्माकंवृधेवर्धनायभव ॥ ३ ॥

अथचतुर्थी—

बाध॑से॒ जना॑न्वृष॒भेव॑ म॒न्युना॒ घृषौ॑ मी॒ळ्ह ऋ॑चीषम ।
अ॒स्माकं॑ बोध्यवि॒ता म॑हाध॒ने त॒नूष्व॒प्सु सूर्ये॑ ॥ ४ ॥

बाध॑से । जना॑न् । वृ॒ष॒भाऽइ॑व । म॒न्युना॑ । घृषौ॑ । मी॒ळ्हे । ऋ॒ची॒ष॒म॒ ।
अ॒स्माक॑म् । बो॒धि॒ । अ॒वि॒ता । म॒हा॒ऽध॒ने । त॒नूषु॑ । अ॒प्ऽसु । सूर्ये॑ ॥ ४ ॥

हेऋचीषम ऋचासम ऋक्‌याहशंरूपंप्रतिपादयतिताहग्रूपेन्द्र घृषौशत्रूणांघर्षकेबाधकेमीळ्हेसंग्रामेजनान् अस्मदीयान्शत्रून् वृषभेव वृषभेणेव बलवतामन्युनाक्रोधेनत्वंबाधसे बाधस्व तथा महाधने महतोधनस्यनिमित्तभूतेसंग्रामेच अस्माकमविताऽरक्षिताबोधि बुध्यस्व रक्षितृत्वेनात्मानंजानीहि रक्षकोभवेतियावत् किमर्थं तनूषुतनयेषुअप्सूदकेषुसूर्येचलब्धव्येषुसत्सु एतेषांलाभार्थंसूर्यस्यलाभसंदर्शनंतदर्थमित्यर्थः ॥ ४ ॥

चातुर्विंशिकेहनिमाध्यंदिनसवनेब्राह्मणाच्छंसिनःइन्द्रज्येष्ठंनआभरेतिप्रगाथोवैकल्पिकोनुरूपः सूत्रितंच—इन्द्रज्येष्ठंनआभरात्वासहस्रमाशतमिति ।

तत्रप्रथमासूक्तेपंचमी—

इन्द्र॒ज्येष्ठं॒न॒आभ॑रँ॒ओजि॑ष्ठं॒पपु॑रि॒श्रवः॑ ।
येने॒मेचि॑त्रवज्रहस्त॒रोद॑सी॒ओभेसु॑शिप्र॒प्राः ॥ ५ ॥२७ ॥

इन्द्र॑ । ज्येष्ठ॑म् । नः॒ । आ । भ॒र॒ । ओजि॑ष्ठम् । पपु॑रि । श्रवः॑ । येन॑ । इ॒मे इति॑ । चि॒त्र॒ । व॒ज्र॒ऽह॒स्त॒ । रोद॑सी॒ इति॑ । आ । उ॒भे इति॑ । सु॒ऽशि॒प्र॒ । प्राः ॥ ५ ॥

हेइन्द्र ज्येष्ठंप्रशस्यतमं ओजिष्ठंओजस्वितमं अतिशयेनबलकरं पपुरिपूरकंश्रवोन्नंनोस्मभ्यंआभर आहर प्रयच्छ हेचित्र चायनीय वज्रहस्त वज्रबाहो हेसुशिप्र शोभनहनुक एवंभूत हेइन्द्र येनान्नेनइमेपरिदृश्यमानेउभेरोदसीद्यावापृथिव्यौआप्राः आपूरयसि तदन्नमाभरेत्यन्वयः ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेसप्तविंशोवर्गः ॥ २७ ॥

अथषष्ठी—

त्वामु॒ग्रमव॑सेचर्षणी॒सहं॒राज॑न्दे॒वेषु॑हूमहे ।
विश्वा॒सुनो॑विथु॒रापि॑ब्द॒नाव॑सो॒मित्रा॑न्सु॒षहा॑न्कृधि ॥ ६ ॥

त्वाम् । उ॒ग्रम् । अव॑से । च॒र्ष॒णि॒ऽसह॑म् । राज॑न् । दे॒वेषु॑ । हू॒म॒हे॒ । विश्वा॑ । सु । नः॒ । वि॒थु॒रा । पि॒ब्द॒ना । व॒सो॒ इति॑ । अ॒मित्रा॑न् । सु॒ऽसहा॑न् । कृ॒धि॒ ॥ ६ ॥

हेराजन् राजमानेन्द्र देवेषुदेवानांमध्ये उग्रमुद्गूर्णबलं चर्षणीसहं चर्षणीनांशत्रुभूतानां प्रजानामभिभवितारंत्वां अवसेरक्षणाय हूमहे आह्वयामः त्वंविश्वा सर्वाणि पिब्दना पिब्दनानि रक्षांसि पिहितं अव्यक्तंशब्दयन्तइतिपिब्दनानि पृषोदरादिः तानि सु सुष्ठु विथुरा व्यथितानि बाधितानि कुरु हेवसो वासकेन्द्र नोस्मदीयानमित्रानशत्रूंश्च सुषहान्सुखेनाभिभवितुंशक्यान्कृधि कुरु ॥ ६ ॥

अथसप्तमी—

यदिन्द्रनाहुषीष्वाँओजोनृम्णंचकृष्टिषु।
यद्वापञ्चक्षितीनांद्युम्नमाभरसत्राविश्वानिपौंस्या ॥ ७ ॥

यत्। इन्द्र। नाहुषीषु। आ। ओजः। नृम्णम्। च। कृष्टिषु। यत्। वा। पञ्च। क्षितीनाम्। द्युम्नम्। आ। भर। सत्रा। विश्वानि। पौंस्या ॥ ७ ॥

हेइन्द्र नाहुषीषु नहुषइतिमनुष्यनाम तत्संबन्धिनीषुकृष्टिषुप्रजासु आकारःसमुच्चये यच्चओजोबलंनृम्णंधनंचविद्यते यद्वा यच्चपंचपंचानांक्षितीनां निषादपंचमाश्चत्वारोवर्णाःपंचक्षितयः तेषांस्वरूपं द्युम्नंद्योतमानमन्नं तत्सर्वमस्मभ्यंआभराहर प्रयच्छ तथासत्रामहान्तिविश्वानिसर्वाणिपौंस्यानिबलानिचास्मभ्यंआहर ॥ ७ ॥

अथाष्टमी—

यद्वातृक्षौमघवन्द्रुह्यावाजनेयत्पूरौकच्चवृष्ण्यम्।
अस्मभ्यंतद्रिरीहिसन्नृषाह्येमित्रान्पृत्सुतुर्वणे ॥ ८ ॥

यत्। वा। तृक्षौ। मघऽवन्। द्रुह्यौ। आ। जने। यत्। पूरौ। कत्। च। वृष्ण्यम्। अस्मभ्यम्। तत्। रिरीहि। सम्। नृऽसह्ये। अमित्रान्। पृत्ऽसु। तुर्वणे ॥ ८ ॥

हेमघवन् धनवन्निन्द्र तृक्षौएतत्संज्ञेराजनि यद्वा यच्चबलंविद्यतेद्रुह्यावाद्रुह्यौच एतत्संज्ञेचजनेयद्बलमस्ति पूरौएतत्संज्ञेनृपेचयत्कच्चयत्किंचनवृष्ण्यंवीर्यंविद्यते तत्सर्वमस्मभ्यंस्तोतृभ्यः सम्यग्रिरीहि प्रयच्छ कदा नृषह्येनृभिर्योद्धृभिःसोढव्येयुद्धप्रवृत्ते किमर्थं पृत्सुपृतनासुसंग्रामेषु अमित्रान्शत्रून्तुर्वणेतुर्वितुंहिंसितुं ॥ ८ ॥ ,

चातुर्विंशिकेहनिनिष्केवल्येइन्द्रत्रिधात्वितित्रैरूपस्यसामप्रगाथःशंसनीयः सूत्रितंच—इन्द्रत्रिधातुशरणंत्वमिन्द्रप्रतूर्तिष्विति ।

तत्रप्रथमासूक्तेनवमी—

इन्द्रंत्रिधातुशरणंत्रिवरूथंस्वस्तिमत्।
छर्दिर्यच्छमघवद्भ्यश्चमह्यंचयावयादिद्युमेभ्यः ॥ ९ ॥

इन्द्र । त्रिऽधातु । शरणम् । त्रिऽवरूथम् । स्वस्तिऽमत् ।
छर्दिः । यच्छ । मघवत्ऽभ्यः । च । मह्यम् । च । यवय । दिद्युम् ।
एभ्यः ॥ ९ ॥

हेइन्द्र त्रिधातु त्रिप्रकारंत्रिभूमिकंत्रिवरूथंत्रयाणांशीतातपवर्षाणांवारकंस्वस्तिमत् अविनाशयुक्तं छर्दिःछदिष्मत् आच्छादनयुक्तं एवंगुणविशिष्टंशरणंगृहंमघवद्भ्यश्वमघंहविर्लक्षणंधनंतद्वद्भ्यश्चास्मदीयेभ्यःमह्यंभरद्वाजायचयच्छ देहि अपिचएभ्यःसकाशात् दिद्युं शत्रुप्रेरितं प्रद्योतमानमायुधंयवय पृथक्कुरु ॥ ९ ॥

अथदशमी—

येगव्यतामनसाशत्रुमादभुरभिप्रघ्नन्तिधृष्णुया ।
अधस्मानोमघवन्निन्द्रगिर्वणस्तनूपाअन्तमोभव ॥१०॥२८॥

ये । गव्यता । मनसा । शत्रुम् । आऽदभुः । अभिऽप्रघ्नन्ति । धृष्णुऽया ।
अध । स्म । नः । मघऽवन् । इन्द्र । गिर्वणः । तनूऽपाः । अन्तमः ।
भव ॥ १० ॥ २८ ॥

येजनाः गव्यताशत्रूणांगाइच्छतामनसायुक्ताःसन्तःशत्रुंशातयितारं वैरिणंआदभुर्हिंसिषुः येचधृष्णुयाधृष्णवःधृष्टाःसन्तःअस्मानभिलक्ष्यप्रघ्नंति प्रकर्षेणहिंसंति हेमघवन् धनवन् गिर्वणोगिरांसंभक्तरिन्द्र अधस्म अस्मिन्काले तेभ्यःसकाशात्नोस्माकंतनूपाः तनूनांशरीराणांरक्षिता सन् अन्तमःअन्तिकतमोभव ॥ १० ॥

॥ इतिचतुर्थस्यसप्तमेष्टाविंशोवर्गः ॥ २८ ॥

अथैकादशी—

अधस्मानोवृधेभवेन्द्रनायमवायुधि ।
यदन्तरिक्षेपतयन्तिपर्णिनोदिद्यवस्तिग्ममूर्धानः ॥ ११ ॥

अध । स्म । नः । वृधे । भव । इन्द्र । नायम् । अव । युधि ।
यत् । अन्तरिक्षे । पतयन्ति । पर्णिनः । दिद्यवः । तिग्मऽमूर्धानः ॥११॥

हेइन्द्र अधस्मतदानींनोस्माकंवृधेवर्धनायभव अपिचनायंयोस्माकंनयोनेतायुधियुद्धे तमपिअवरक्ष तदेत्युक्तंकदेत्यतआह पर्णिनः पक्षवन्तः तिग्ममूर्धानस्तीक्ष्णास्याः दिद्यवो दीप्ताःबाणाः यद्यदाअन्तरिक्षेभ्योनिपतयन्तिशत्रुभिर्विसृष्टाःपतन्ति तदानींवृधेभवेत्यन्वयः ॥ ११ ॥

अथद्वादशी–

यत्रशूरासस्तन्वोवितन्वतेप्रियाशर्मपितॄणाम् ।
अधस्मायच्छतन्वे३तनेचछर्दिरचित्तंयावयद्वेषः ॥ १२ ॥

यत्र । शूरासः । तन्वः । विऽतन्वते । प्रिया । शर्म । पितॄणाम् । अध । स्म । यच्छ । तन्वे । तने । च । छर्दिः । अचित्तम् । यवय । द्वेषः ॥ १२ ॥

यत्र यस्मिन्काले शूरासःशूराः शौर्यवन्तोयोद्धारः तन्वः स्वकीयानिशरीराणिवितन्वते विस्तारयन्ति स्वामिनोजयायशत्रूणांपुरतोदर्शयन्ति तथायस्मिन्कालेप्रियाप्रियाणि शर्मशर्माणि स्थानानि पितॄणांजनकानांसंबन्धीनि तैरर्जितानीतियावत् एतानिचवितन्वते शत्रूणांपुरस्तात्विस्तारयन्ति परित्यजन्तीतियावत् अधस्मअस्मिन्कालेतन्वेशरीरायतनेतनयायच छर्दिः छादनंआयुधानांनिवारकंकवचं अचित्तं शत्रुभिरज्ञातं यथाभवतितथायच्छ प्रयच्छ शत्रुज्ञानात्पूर्वमेवदेहीत्यर्थःअपिचद्वेषोद्वेष्टॄनशत्रून्यावय तेभ्योवियोजय ॥ १२ ॥

अथत्रयोदशी–

यदिन्द्रसर्गेअर्वतश्चोदयासेमहाधने ।
असमनेअध्वनिवृजिनेपथिश्येनाँइवश्रवस्यतः ॥ १३ ॥

यत् । इन्द्र । सर्गे । अर्वतः । चोदयासे । महाऽधने । असमने । अध्वनि । वृजिने । पथि । श्येनान्ऽइव । श्रवस्यतः ॥ १३ ॥

हेइन्द्र महाधनेजेतव्यस्यमहतोधनस्यनिमित्तेमहतिसंग्रामेसर्गेउद्योगेसति असमनेविषमे अध्वनिमार्गेअर्वतोस्मदीयानश्वान् यद्यदाचोदयासे प्रेरयसि वृजिनेकुटिलेपथिमार्गेअन्तरिक्षलक्षणेश्रवस्यतः श्रवःअन्नमामिषरूपंआत्मनइच्छतः श्येनानइवयथाआमिषार्थिनःश्येनाःअन्तरिक्षेशीघ्रंगच्छन्ति तथास्मदीयानश्वान्यदात्वंशीघ्रंगमयसि तदानीमस्माकंतन्वेतनयायच छर्दिर्यच्छेतिपूर्वस्यामृचिसंबन्धः ॥ १३ ॥

अथचतुर्दशी–

सिन्धूँरिवप्रवणआशुयायतोयदिक्लोशमनुष्वणि।
आयेवयोनवर्वृतत्यामिषिगृभीताबाह्वोर्गवि ॥ १४ ॥ २९ ॥

सिन्धून्ऽइव। प्रवणे। आशुऽया। यतः। यदि। क्लोशम्। अनु। स्वनि। आ। ये। वयः। न। वर्वृतति। आमिषि। गृभीताः। बाह्वोः। गवि ॥ १४ ॥ २९ ॥

उक्तस्यैवार्थस्यअतिशयप्रतिपादनार्थेयं प्रवणेनिम्नदेशेसिन्धूनिव स्यन्दमानानदीरिव आशुयाआशुशीघ्रंयतोगच्छतोश्वान् हेइन्द्र यदिचोदयासे प्रेरयसि कदाक्लोशमनुक्लोशमिति भय नाम भयमनुलक्ष्यस्वनिस्वनेआक्रोशेसति कीदृशास्तेश्वाः बाह्वोर्बाहुमूलयोर्गृभीताः कक्ष्ययाबद्धायेअश्वाः गविगोरूपेधनेजेतव्येसति आववृतति पुनःपुनरावर्तन्ते आमिषिआमिषे मांसे ग्रहीतव्ये सति वयोन यथाश्येनादयःपक्षिणःपुनःपुनरावर्ततेतद्वत् एवंभूतानश्वानभयेनक्रोशेसतियदात्वंप्रेरयसि तदानीमस्मदीयेभ्यः छर्दिःप्रयच्छेतिसंबन्धः यद्यपिऋषेर्युद्धेप्रसक्तिर्नास्तितथापिराजपुरोहितत्वेनराजकीयानां पुरुषाणांजयःप्रार्थ्यतइतिनकश्चिद्विरोधः ॥ १४ ॥

॥ इतिचतुर्थस्यसप्तमेएकोनत्रिंशोवर्गः ॥ २९ ॥

स्वादुरितिएकत्रिंशदृचंचतुर्थंसूक्तंभरद्वाजपुत्रस्यगर्गस्यार्षं प्रस्तोकइन्वित्येषात्रिष्टुप् दशाश्वानित्यनुष्टुप् दशरथानितिगायत्री महिराधइतिद्विपदाव्येकादशका युजानोहरितइत्येषाबृहती दिवस्पृथिव्याइतिजगती शिष्टास्त्रिष्टुभः आदितःपंचानांसोमोदेवता अगव्यूतिक्षेत्रमित्यर्धर्चप्रथमपादेदेवाउत्तरस्यभूमिः तृतीयस्यबृहस्पतिः चतुर्थस्यैन्द्रः प्रस्तोकइत्याद्याश्चतस्रःसृंजयपुत्रस्य राज्ञोदानस्तुतिरूपत्वात्तद्देवताकाः वनस्पतेवीड्वंगइत्ययंतृचोरथदेवत्यः उपश्वासयेतितृचोदुंदुभिदेवत्यः समश्वपर्णाइत्यर्धर्चऐन्द्रः शिष्टाइन्द्रदेवताकाः तथाचानुक्रान्तं–स्वादुरेकात्रिंशद्गर्गःपंचादौसौम्योगव्यूत्यर्धर्चोलिंगोक्तदेवतः प्रस्तोकइतित्रिष्टुबनुष्टुप्गायत्र्योद्विपदासार्धयस्यप्रस्तोकस्य दानस्तुतिः परौतृचौरथदुंदुभिदेवत्यावैन्द्रोन्त्योर्धर्चोयुजानोबृहतीदिवस्पृथिव्याजगतीति। आग्निमारुतेआदितश्चतस्रःशंसनीयाः सूत्रितंच–स्वादुष्किलायमितिचतस्रोमध्येचाह्वानमिति।

तत्रप्रथमा—

स्वादुष्किलायंमधुमाँउतायंतीव्रःकिलायंरसवाँउतायम् ।
उतोन्व१स्यपपिवांसमिन्द्रंनकश्चनसहतआहवेषु ॥ १ ॥

स्वादुः । किल । अयम् । मधुऽमान् । उत । अयम् । तीव्रः ।
किल । अयम् । रसऽवान् । उत । अयम् । उतो इति । नु । अस्य ।
पपिऽवांसम् । इन्द्रम् । न । कः । चन । सहते । आऽहवेषु ॥ १ ॥

अयंअभिषुतःसोमः स्वादुरास्वादनीयःकिलभवति उतापिच मधुमान्माधुर्यवांश्चायंसोमो-भवति तथायंसोमः तीव्रःकिल मदोत्पादनेतीक्ष्णःखलुभवति उतापिच अयंसोमोरसवान् सारवांश्चभवति अनेनवाक्यचतुष्टयेनसोमस्यमाधुर्यातिशयत्वंचप्रतिपादितं उतोअपिच अस्यसोमस्य द्वितीयार्थेषष्ठी इमंसोमंपपिवांसंपीतवन्तमिन्द्रं आहवेषुसंग्रामेषुनकश्चननकोपिसहते अभिभवति नुइतिपूरकः ॥ १ ॥

अथद्वितीया—

अयंस्वादुरिहमदिष्ठआसयस्येन्द्रोवृत्रहत्येममाद ।
पुरूणियश्च्यौत्नाशम्बरस्यविनवतिंनवचदेह्यो३हन् ॥ २॥

अयम् । स्वादुः । इह । मदिष्ठः । आस । यस्य । इन्द्रः ।
वृत्रऽहत्ये । ममाद । पुरूणि । यः । च्यौत्ना । शम्बरस्य ।
वि । नवतिम् । नव । च । देह्यः । हन् ॥२॥

इहास्मिन्यज्ञेअयंसोमः स्वादुरास्वादितःपीतःसन् मदिष्ठः अतिशयेनमदयिता आसबभूव यस्यसोमस्यपानेनइन्द्रोवृत्रहत्ये वृत्रहननकाले ममाद मत्तोबभूव यःसोमः शंबरस्यासुरस्य पुरूणिबहूनिच्यौत्नाच्यौत्नानिबलानिजघान तथादेह्यः दिग्धाःउपचिताःआसुरीःपुरीः तदीयान् देहान्वानवतिंनवचनवोत्तरनवतिसंख्याकाःयःसोमोविहन् व्यहन् अयंसोमइतिप्रथमपादेनसंबन्धः ॥ २ ॥

अथतृतीया—

अयंमेपीतउदियर्तिवाचमयंमनीषामुशतीमजीगः ।
अयंषळुर्वीरमिमीतधीरोनयाभ्योभुवनंकच्चनारे ॥ ३ ॥

अयम् । मे । पीतः । उत् । इयर्ति । वाचम् । अयम् । मनीषाम् ।
उशतीम् । अजीगरिति । अयम् । षट् । उर्वीः । अमिमीत । धीरः ।
न । याभ्यः । भुवनम् । कत् । चन । आरे ॥ ३ ॥

अयंसोमःपीतःसन् मेममवाचंउदियर्ति उद्गमयति अयमेवसोमउशतींकान्तांमनीषांबुद्धिं उदजीगः उद्गारयति प्रकाशयति(गॄनिगरणेइत्यस्माण्णयन्ताल्लुङिचङिरूपं)अपिचायंधीरोधीमान् सोमःषळुर्वीः षण्मोर्वीरंहसस्पान्तु द्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चेतिप्रतिपादिताद्युपृथिव्याद्याःषट्अमिमीत निर्मितवान् याभ्यउर्वीभ्यआरेदूरे विप्रकृष्टेदेशे कच्चन किंचन भुवनंभूतजातं नभवति अपितुआस्वेवसर्वंभूतजातंवर्ततेतादृशीरुर्वीर्निर्मितवान् ॥ ३ ॥

अथचतुर्थी—

अयंसयोवरिमाणंपृथिव्यावर्ष्माणंदिवोअकृणोदयंसः ।
अयंपीयूषंतिसृषुप्रवत्सुसोमोदाधारोर्व१न्तरिक्षम् ॥ ४ ॥

अयम् । सः । यः । वरिमाणम् । पृथिव्याः । वर्ष्माणम् ।
दिवः । अकृणोत् । अयम् । सः । अयम् । पीयूषम् ।
तिसृषु । प्रवत्ऽसु । सोमः । दाधार । उरु । अन्तरिक्षम् ॥ ४ ॥

सखल्वयंसोमः यःपृथिव्यावरिमाणं उरुत्वंविस्तृतत्वंअकृणोत्अकरोत् तथायंसोमोदिवोद्युलोकस्यवर्ष्माणं संहतत्वंदृढत्वंअकृणोदकरोत्अयंसोमःसद्भिभवति अपिचायंसोमः तिसृष्वोषधीषुअप्सुगोषुचप्रवत्सुप्रकृष्टास्वेतासुपीयूषंरसंदाधार धारयति तथाउरुविस्तीर्णमन्तरिक्षं चधारयति तथाचमंत्रान्तरं—त्वमिमाओषधीःसोमविश्वास्त्वमपोअजनयस्त्वंगाः । त्वमाततंथोर्व१न्तरिक्षमिति ॥ ४ ॥

अथपंचमी—

अयंविदच्चित्रदृशीकमर्णःशुक्रसद्मनामुषसामनीके ।
अयंमहान्महतास्कम्भनेनोद्द्यामस्तभ्नाद्वृषभोमरुत्वान् ॥५॥३०॥

---

१ ऋ० सं० १. ९१. २२ ।

अयम् । विदत् । चित्रऽदृशीकम् । अर्णः । शुक्रऽसद्मनाम् ।
उषसाम् । अनीके । अयम् । महान् । महता । स्कम्भनेन । उत् ।
द्याम् । अस्तभ्नात् । वृषभः । मरुत्वान् ॥ ५ ॥ ३० ॥

अयंसोमः चित्रदृशीकंविचित्रदर्शनं यद्वा आश्चर्यत्वेनदर्शनीयं अर्णःसर्वस्यप्रेरकं सौरं ज्योतिःविदत्लंभयति कस्मिन्काले शुक्रसद्मनांशुक्रंनिर्मलमन्तरिक्षंसद्मसदनंयासांतासामुषसां अनीकेप्रमुखेउषःकालइत्यर्थः अपिच महान्प्रवृद्धोयंसोमः महतास्थविष्ठेनस्कंभनेन स्तंभनसाधनेनमध्यवर्तिनान्तरिक्षेणद्यांद्युलोकंउदस्तभ्नात् ऊर्ध्वमस्थापयत् यथाअधोनपततितथाअन्तरिक्षंतस्याधारत्वेनकृतवानित्यर्थः कीदृशःसोमः वृषभोवृष्टेर्जनयिता सोमाहुत्याहिवृष्टिर्जन्यतेमरुत्वान्मरुद्भिर्युक्तः ॥ ५ ॥

॥ इतिचतुर्थस्यसप्तमेत्रिंशोवर्गः ॥ ३० ॥

अथषष्ठी—

धृषत्पिबकलशेसोममिन्द्रवृत्रहाशूरसमरेवसूनाम् ।
माध्यंन्दिनेसवनआवृषस्वरयिस्थानोरयिमस्मासुधेहि ॥ ६ ॥

धृषत् । पिब । कलशे । सोमम् । इन्द्र । वृत्रऽहा । शूर ।
समऽअरे । वसूनाम । माध्यन्दिने । सवने । आ । वृषस्व ।
रयिऽस्थानः । रयिम् । अस्मासु । धेहि ॥ ६ ॥

हेशूर शौर्यवन्निन्द्र वृत्रहा वृत्राणामावरकाणांशत्रूणांहन्तात्वं वसूनांधनानांसमरेसंग्रामे निमित्तभूतेसति कलशेद्रोणकलशेवस्थितंसोमंधृषत्धृष्टंयथाभवतितथापिब अपिच माध्यंदिने सवने आवृषस्व आसिंचस्व जठरंसोमेनपूरय सवैन्द्रंहिमाध्यंदिनंसवनं किंचरयिस्थानःरयीणांधनानांस्थानभूतस्त्वंरयिंधनमस्मासुधेहिधारय ॥ ६ ॥

अथसप्तमी—

इन्द्रप्रणःपुरएतेवपश्यप्रनोनयप्रतरंवस्योअच्छ ।
भवासुपारोअतिपारयोनोभवासुनीतिरुतवामनीतिः ॥ ७ ॥

इन्द्र॑ । प्र । नः॒ । पु॒र॒ए॒ताऽइ॑व । प॒श्य॒ । प्र । नः॒ । न॒य॒ । प्र॒ऽत॒रम् ।
वस्यः॑ । अच्छ॑ । भव॑ । सु॒ऽपारः॑ । अ॒ति॒ऽपा॒र॒यः । नः॒ । भव॑ ।
सु॒ऽनीतिः॑ । उ॒त । वा॒म॒ऽनीति ॥ ७ ॥

हेइन्द्र त्वंपुरएतेव पुरतोगंतेव नोस्मानप्रपश्य प्रकर्षेणईक्षस्व यथामार्गरक्षकःस्वयंपुरतोगच्छन्अनुगच्छतोरक्षणीयान्पथिकान्पश्यति तथापश्येत्यर्थः तथावस्योवसीयःश्रेष्ठंधनंअच्छाभिमुख्येनप्रतरं प्रकृष्टतरंअतिशयेनप्रणयअस्मान्प्रापय तथासुपारःसुष्ठुपारयिता दुःखेभ्यस्तारयिताभव तथानोस्मान्स्तोतॄन्अतिपारयः शत्रूनतिक्रामय सुनीतिःशोभननयनश्चास्माकंभव उतापिच वामनीतिः वामानांवननीयानांधनानांनेताभव यद्वास्मदर्थंश्रेष्ठप्रापणोभव ॥ ७ ॥

ऐन्द्रेपशौउरुंनइत्येषावपायायाज्या सूत्रितंच—उरुंनोलोकमनुनेषिविद्वान्प्रससाहिषेपुरुहूतशत्रूनिति । होत्रकैःसदःप्रसर्पणसमयेप्येषाजप्या सूत्रितंच—उरुंनोलोकमनुनेषिविद्वानितिजपंतइति । चातुर्विंशिकेहन्यहर्गणेषुचद्वितीयादिष्वहःसुमाध्यंदिनसवनेच्छावाकस्यैषाचारंभणीया सूत्रितंच—उरुंनोलोकमनुनेषिविद्वानितिकद्वद्व्यआरंभणीयाइति ।

सैषासूक्तेष्टमी—

उ॒रुंनो॑लो॒कमनु॑नेषिवि॒द्वान्स्व॑र्व॒ज्ज्योति॒रभ॑यंस्व॒स्ति ।
ऋ॒ष्वात॑इन्द्रस्थवि॑रस्यबा॒हूउप॑स्थेयामश॒रणा॑बृ॒हन्ता॑ ॥ ८ ॥

उ॒रुम् । नः॒ । लो॒कम् । अनु॑ । ने॒षि॒ । वि॒द्वान् । स्वः॑ऽवत् । ज्योतिः॑ ।
अभ॑यम् । स्व॒स्ति । ऋ॒ष्वा । ते॒ । इ॒न्द्र॒ । स्थवि॑रस्य । बा॒हू इति॑ ।
उप॑ । स्थे॒या॒म॒ । श॒र॒णा । बृ॒हन्ता॑ ॥ ८ ॥

हेइन्द्र विद्वान्जानंस्त्वंउरुं विस्तीर्णंलोकंस्थानंस्वर्गाख्यंनोस्मानअनुनेषि अनुगमय तथास्वर्वत्सुखवत्अभयंभयरहितंज्योतिश्चस्वस्तिक्षेमेणअनुनेषि अस्माननुगमय हेइन्द्र स्थविरस्यस्थूलस्यवृद्धस्यतेतवसंबंधिनौऋष्वादर्शनीयौ बृहन्तामहान्तौ बाहूत्वदीयौहस्तौशरणाशरणौरक्षकौरक्षकतयाउपस्थेयाम उपतिष्ठेम सेवेमहि ॥ ८ ॥

अथनवमी—

वरि॑ष्ठेनइन्द्रव॒न्धुरे॑धा॒वहि॑ष्ठयोःशताव॒न्नश्व॑योरा ।
इष॒मावक्ष॒िषांवर्षि॑ष्ठां॒मान॑स्तारीन्म॒घव॒न्रायो॑अ॒र्यः ॥ ९ ॥

वरिष्ठे । नः । इन्द्र । वन्धुरे । धाः । वहिष्ठयोः । शतऽवन् ।
अश्वयोः । आ । इषम् । आ । वक्षि । इषाम् । वर्षिष्ठाम् ।
मा । नः । तारीत् । मघऽवन् । रायः । अर्यः ॥ ९ ॥

हेइन्द्र वरिष्ठेउरुतमेविस्तीर्णतमेवंधुरे आत्मीयेरथे नोस्मान्धाःधेहिधारय अपिच हेशत-वन् शतसंख्यधनेन्द्र वहिष्ठयोर्वोढृतमयोः आकारःसमुच्चये अश्वयोरात्वदीययोःअश्वयोश्चा-स्मान्धारय तथाइषामन्नानांमध्येवर्षिष्ठांवृद्धतमांइषमन्नमावक्षि अस्मदर्थमावह आनय हेम-घवन्धनवन्निंद्र अर्योधनस्यस्वामी अन्यःकश्चित्नोस्माकंरायोधनानिमातारीत्माहिंसीत् ॥ ९ ॥

अथदशमी–

इन्द्रमृळमह्यंजीवातुमिच्छचोदयधियमयसोनधाराम् ।
यत्किंचाहन्त्वायुरिदंवदामितज्जुषस्वकृधिमादेववन्तम् ॥१०॥३१॥

इन्द्र । मृळ । मह्यम् । जीवातुम् । इच्छ । चोदय । धियम् ।
अयसः । न । धाराम् । यत् । किम् । च । अहम् । त्वाऽयुः ।
इदम् । वदामि । तत् । जुषस्व । कृधि । मा । देवऽवन्तम् ॥१०॥३१॥

हेइन्द्र मृळ मृळय अस्मान्सुखय जीवातुंजीवनौषधंचमह्यंदातुमिच्छ तथाधियंबुद्धिंचोद-य स्तुतिविषयांकर्मविषयांवाप्रेरय तीक्ष्णीकुरु अयसोनधारां अयोमयस्यखड्गादेःधारामिव सा यथासूक्ष्मातद्वत् सूक्ष्मविषयांधियंचोदयेत्यर्थः किंचत्वायुःत्वामात्मनइच्छन्इदमिदानींयत्किंच-नाहंवदामिसमीचीनमसमीचीनंवातज्जुषस्व मामांचदेववन्तंरक्षकैर्देवैरुपेतंकृधिकुरु ॥ १० ॥

॥ इतिचतुर्थस्यसप्तमेएकत्रिंशोवर्गः ॥ ३१ ॥

आयुष्कामेष्ट्यांइन्द्रस्यत्रातुस्त्रातारमित्यनुवाक्या सूत्रितंच–त्रातारमिन्द्रमवितारमिन्द्रंमाते-अस्यांसहसावन्परिष्टाविति ।

सैषानैकादशी–

त्रातारमिन्द्रमवितारमिन्द्रंहवेहवेसुहवंशूरमिन्द्रम् ।
ह्वयामिशक्रंपुरुहूतमिन्द्रंस्वस्तिनोमघवाधात्विन्द्रः ॥ ११ ॥

त्रातारम् । इन्द्रम् । अवितारम् । इन्द्रम् । हवेऽहवे । सुऽहवम् ।
शूरम् । इन्द्रम् । ह्वयामि । शक्रम् । पुरुऽहूतम् । इन्द्रम् ।
स्वस्ति । नः । मघऽवा । धातु । इन्द्रः ॥ ११ ॥

त्रातारंशत्रुभ्यःपालयितारमिन्द्रमाह्वयामि तथाअवितारं कामैस्तर्पयितारमिन्द्रमाह्वयामि हवेहवेसर्वेष्वाह्वयनेषु सुहवंसुखेनाह्वातुंशक्यंशूरंशौर्यवन्तं शक्रंसर्वकार्येषुशक्तं पुरुहूतंपुरुभिर्बहुभिःपालनार्थमाहूतं एवंविधमिन्द्रंह्वयाम्याह्वयामि एवमाहूतोमघवाधनवान्सइन्द्रःस्वस्ति अविनाशंनोस्मभ्यंधातुदद्वातु यद्वास्माकंविदधातु ॥ ११ ॥

अथद्वादशी—

इन्द्रःसुत्रामास्ववाँअवोभिःसुमृळीकोभवतुविश्ववेदाः ।
बाधतांद्वेषोअभयंकृणोतुसुवीर्यस्यपतयःस्याम ॥ १२ ॥

इन्द्रः । सुऽत्रामा । स्वऽवान् । अवःऽभिः । सुऽमृळीकः ।
भवतु । विश्वऽवेदाः । बाधताम् । द्वेषः । अभयम् । कृणोतु ।
सुऽवीर्यस्य । पतयः । स्याम ॥ १२ ॥

सुत्रामासुष्ठुत्राता स्ववान्धनवान्सइन्द्रः अवोभीरक्षणैःसुमृळीकः सुष्ठुसुखयिताभवतु तथाचविश्ववेदाःसर्वधनःसर्वविद्वान्वासइन्द्रः द्वेषःद्वेष्टॄन्शत्रून्बाधतां हिनस्तु अभयंभयरहितंचास्माकंकृणोतु करोतु वयंचतत्प्रसादात्सुवीर्यस्यशोभनवीर्यस्यपतयःस्याम भवेम ॥ १२ ॥

अथत्रयोदशी—

तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ।
ससुत्रामास्ववाँइन्द्रोअस्मेआराच्चिद्द्वेषःसनुतर्युयोतु ॥ १३ ॥

तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे ।
स्याम । सः । सुऽत्रामा । स्वऽवान् । इन्द्रः । अस्मे इति ।
आरात् । चित् । द्वेषः । सनुतः । युयोतु ॥ १३ ॥

यज्ञियस्ययज्ञार्हस्यतस्येन्द्रस्यसुमतौ शोभनायामनुग्रहात्मिकायांबुद्धौवयंस्याम विषयभूताभवेम तथाभद्रेकल्याणेसौमनसेसुमनोभावेपितदीयेस्याम भवेम सइन्द्रोस्मासुअनुग्रहात्मिकां बुद्धिंसौमनस्यंचकरोत्वित्यर्थः सुत्रामासुष्ठुत्रातास्ववान् धनवान् सइन्द्रश्च अस्मेअस्मत्तः आराच्चिद्दूरदेशेएवद्वेषःद्वेष्टॄन्सनुतः अन्तर्हितनामैतत् अंतर्हितान्युयोतुपृथक्करोतु ॥ १३ ॥

अथचतुर्दशी–

अवत्वेईन्द्रप्रवतोनोर्मिर्गिरोब्रह्माणिनियुतोधवन्ते ।
उरूनराधःसवनापुरूण्यपोगावज्रिन्युवसेसमिन्दून् ॥ १४ ॥

अव । त्वे इति । इन्द्र । प्रऽवतः । न । ऊर्मिः । गिरः ।
ब्रह्माणि । निऽयुतः । धवन्ते । उरु । न । राधः । सवना ।
पुरूणि । अपः । गाः । वज्रिन् । युवसे । सम् । इन्दून् ॥ १४ ॥

हेइन्द्र तेत्वांनियुतःस्तोतुःगिरः उक्थात्मिकावाचः ब्रह्माणिसामरूपाणिस्तोत्राणिच अवधवन्ते अवगच्छन्ति तत्रदृष्टान्तः–ऊर्मिःजलसंघः प्रवतोन प्रवणदेशानिव यथाउच्छ्रितात्स्थलान्निम्नदेशंशीघ्रंगच्छतितद्वत् नशब्दःसमुच्चये उरुउरूणि राधोराधांसिच हविर्लक्षणानिधनानि पुरूणिबहूनि सवनासवनानि बहवोभिषुताःसोमाश्च त्वामेवाभिगच्छन्ति हेवज्रिन् वज्रवन्निन्द्र अपोवसतीवर्याख्यागाःगोविकारानश्रृतदध्यादीनश्रयणार्थानइन्दून्सोमांश्च संयुवसेसम्यग्मिश्रयसि त्वांयष्टुंवसतीवरीभिरभिषुत्यतंसोममाशिरादिभिःश्रपणद्रव्यैःसंस्कुर्वन्तीत्यर्थः॥१४॥

अथपंचदशी–

कईंस्तवत्कःपृणात्कोयजातेयदुग्रमिन्मघवाविश्वहावेत् ।
पादाविवप्रहरन्नन्यमन्यंकृणोतिपूर्वमपरंशचीभिः ॥ १५ ॥ ३२ ॥

कः । ईम् । स्तवत् । कः । पृणात् । कः । यजाते । यत् । उग्रम् ।
इत् । मघऽवा । विश्वहा । अवेत् । पादौऽइव । प्रऽहरन् ।
अन्यम्ऽअन्यम् । कृणोति । पूर्वम् । अपरम् । शचीभिः ॥ १५ ॥ ३२ ॥

कःस्तोता ईमेनमिन्द्रंस्तवत् स्तुयात् स्तोतुंशक्नुयात् कोवापृणात् एनंप्रीणयेत् कश्चयजाते एनंहविर्भिर्यजेत यद्यस्मातअयंमघवाधनवानिन्द्रःउग्रमित्उद्गूर्णमेव विश्वहासर्वदाअवेत् आ-

त्मानंवेत्तिजानातिसर्वदाउग्रएवभवति तस्मात्कारणात् नकोप्येनंस्तोतुंप्रीणयितुंयष्टुंवाशक्नोतीतिभावः इतोपिस्तुत्यादेरविषयइत्याह—यस्मादयमिन्द्रःशचीभिरात्मीयाभिःप्रज्ञाभिःपूर्वंप्रथमभाविनंसन्तं स्तोतारंअपरंपश्चाद्भाविनंचअन्यमन्यंपरस्परव्यतिहारेणकृणोतिकरोति यःप्रथमभावी मुख्यस्तोतातंजघन्यंकरोति यश्चजघन्यःस्तोतातंमुख्यंकरोति तत्रदृष्टान्तः—प्रहरन्पादाविव पादौप्रहरन्मार्गेप्रक्षिपन्पुरुषःपूर्वंपादमपरंकरोति अपरंचपूर्वंतद्वत् अतोपिकारणादिन्द्रःस्तुत्यादेरविषयइतिभावः एतदादिकेनपंचर्चेनइन्द्रस्यातिस्वातंत्र्यंप्रतिपाद्यते ॥ १५ ॥

॥ इतिचतुर्थस्यसप्तमेद्वात्रिंशोवर्गः ॥ ३२ ॥

अथषोडशी—

शृण्वेवीरउग्रमुग्रंदमायन्नन्यमन्यमतिनेनीयमानः ।
एधमानद्विळुभयस्यराजाचोष्कूयतेविशइन्द्रोमनुष्यान् ॥ १६ ॥

शृण्वे । वीरः । उग्रम्ऽउग्रम् । दमऽयन् । अन्यम्ऽअन्यम् ।
अतिऽनेनीयमानः । एधमानऽद्विट् । उभयस्य । राजा ।
चोष्कूयते । विशः । इन्द्रः । मनुष्यान् ॥ १६ ॥

अयमिन्द्रोवीरोवीर्यवानितिशृण्वे श्रूयते किंकुर्वन् उग्रमुग्रंउद्गूर्णंउद्गूर्णंबलिनंशत्रुंप्रतिदमायन् दमःदमनं बाधनमिच्छन् अन्यमन्यंप्रथमंनेतव्यमन्यंपश्चान्नेतव्यंचान्यं पूर्वमपरंपरस्परव्यवहारेण स्तोतॄनअतिनेनीयमानः अत्यन्तंपुनःपुनर्नयन् अपिचएधमानद्विट् एधमानानांवर्धमानानांअसुन्वतांद्वेष्टा उभयस्यदिव्यस्यपार्थिवस्यचधनस्यराजाईश्वरोयमिन्द्रःविशःनिवेशयितॄन् स्वस्यपरिचारकान्मनुष्यान्चोष्कूयते रक्षणार्थंपुनःपुनराह्वयति ॥ १६ ॥

अथसप्तदशी—

परापूर्वेषांसख्यावृणक्तिवितर्तुराणोअपरेभिरेति ।
अनानुभूतीरवधून्वानःपूर्वीरिन्द्रःशरदस्तर्तरीति ॥ १७ ॥

परा । पूर्वेषाम् । सख्या । वृणक्ति । विऽतर्तुराणः । अपरेभिः ।
एति । अननुऽभूतीः । अवऽधून्वानः । पूर्वीः । इन्द्रः ।
शरदः । तर्तरीति ॥ १७ ॥

अयमिन्द्रः पूर्वेषांपूर्वभाविनांप्रशस्तानांकर्मणांकुर्वतांपुरुषाणांसख्यासखित्वान्निरावृणक्ति वर्जयति अपिच वितर्तुराणस्तानहिंसन् अपरेभिरपरैः अमुख्यैरप्रशस्तैरपिकर्मानुष्ठातृभिः एति सख्यंप्राप्नोति तथाअनानुभूतीः अपरिचरणाःप्रजाः अवधून्वानः परित्यजन् पूर्वीर्बह्वीः शरदःसंवत्सरान्अयमिन्द्रः तर्तरीति भृशमतिक्रामति स्तोतृभिःसहसख्यंकुर्वन् चिरकालंवसतीत्यर्थः ॥ १७ ॥

अथाष्टादशी—

रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय ।
इन्द्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादश ॥१८॥

रूपम्ऽरूपम् । प्रतिऽरूपः । बभूव । तत् । अस्य । रूपम् । प्रतिऽचक्षणाय । इन्द्रः । मायाभिः । पुरुऽरूपः । ईयते । युक्ताः । हि । अस्य । हरयः । शता । दश ॥ १८ ॥

अयमिन्द्रःप्रतिरूपोरूपाणांप्रतिनिधिःसन् रूपंरूपंतत्तदग्न्यादिदेवतास्वरूपंबभूवप्राप्नोति भूप्राप्ताविति धातुः इन्द्रःस्वमाहात्म्येनतत्तद्देवतारूपोभवतीत्यर्थः अस्यचेन्द्रस्यतत्प्राप्तमग्न्यादिदेवतास्वरूपंप्रतिचक्षणायप्रतिनियतदर्शनाय अयमग्निरयंविष्णुरयंरुद्रइत्येवमसंकीर्णदर्शनायभवति अपिचायमिन्द्रोमायाभिः ज्ञाननामैतत् ज्ञानैरात्मीयैःसंकल्पैःपुरुरूपोबहुविधशरीरःसन् ईयतेबहून्यजमानान्गच्छति ननुद्वावेवास्याश्वौ एकश्चरथः कथमनेनयुगपद्बहून्गच्छतीत्यतआह—अस्येन्द्रस्यहरयोश्वाःयुक्तारथेयोजिताःशतादश सहस्रसंख्याकाःअपरिमिताःसन्तिहि यस्मादेवंतस्माद्बहुशरीराणिस्वीकृत्ययुगपद्विष्मतोयजमानान्गच्छतीत्यर्थः अन्येमन्यन्ते इदिपरमैश्वर्येइत्यस्यधातोःरथानुगमादिन्द्रःपरमात्मासचाकाशवत्सर्वगतःसदानंदरूपः सएवोपाधिभिरन्तःकरणैःप्रतिशरीरमवच्छिन्नःसन् जीवात्मेतिव्यपदिश्यते सएवअनादिमायाशक्तिभिः वियदादिजगदात्मनाविवर्ततेशब्दादिविषयहरणशीलाःइन्द्रियवृत्तयश्चतेनैवसंबद्धाः एतत्सर्वंतस्य परमात्मनोयद्वास्तवंरूपंतस्यदर्शनायेति अयमर्थोनयाप्रतिपाद्यते रूपंरूपंरूप्यतइतिरूपं शरीरादिप्रतिशरीरंचिद्रूपःसर्वगतःपरमात्माप्रतिरूपः प्रतिबिंबरूपःसन् सर्वाणिशरीराणिबभूव प्राप्नोत् तच्चप्राप्तंप्रतिबिंबरूपंअस्यपरमात्मनःप्रतिचक्षणायप्रतिनियताकारस्यदर्शनायभवति सचेन्द्रः

परमेश्वरः मायाभिर्मायाशक्तिभिःपुरुरूपःवियदादिभिर्बहुविधरूपैरुपेतःसन्नीयते चेष्टते एतदपि अस्यपरमात्मनःप्रतिचक्षणायभवति अस्यचदशशतासहस्रसंख्याकाहरयःइन्द्रियवृत्तयःयुक्ताः विषयग्रहणायोद्युक्ताःसन्ति तदपिअस्यवास्तवरूपस्यदर्शनायभवतीति एवंस्थूलसूक्ष्मशरीरयोर्वियदादिमहाप्रपंचस्यचतत्वज्ञानहेतुत्वमनयाप्रत्यपादीति ॥ १८ ॥

अथैकोनविंशी—

युजानोहरितारथेभूरित्वष्टेहराजति ।
कोविश्वाहाद्विषतःपक्षआसतउतासीनेषुसूरिषु ॥ १९ ॥

युजानः । हरिता । रथे । भूरि । त्वष्टा । इह । राजति । कः ।
विश्वाहा । द्विषतः । पक्षः । आसते । उत । आसीनेषु । सूरिषु ॥ १९ ॥

हरिताहरितावश्वौ रथेयुजानोयुंजनत्वष्टादीप्तइन्द्रःइहत्रैलोक्येभूरिभूरिषु बहुषुप्रदेशेषु राजति दीप्यते उतअपिच सूरिषुस्तोतृषुअस्मादृशेषु आसीनेषुसत्सु विश्वाहासर्वदाइन्द्रादन्यः कोनामद्विषतःशत्रोः पक्षःपाचकोबाधकः सन् आसते आस्ते इन्द्रएवसर्वदा शत्रून्बाधतइत्यर्थः यद्वा पक्षइतिसकारान्तंसमीपवचनं इन्द्रादन्यः कोनामद्विषतः शत्रोः समीपेआसते आस्तेइन्द्रएवनिर्भयःसन्शत्रुसमीपेस्थातुंशक्नोतीतिभावः ॥ १९ ॥

अथविंशी—

अगव्यूतिक्षेत्रमागन्मदेवाउर्वीसतीभूमिरंहूरणाभूत् ।
बृहस्पतेप्रचिकित्सागविष्टावित्थासतेजरित्रइन्द्रपन्थाम् ॥२०॥२३॥

अगव्यूति । क्षेत्रम् । आ । अगन्म । देवाः । उर्वी । सती ।
भूमिः । अंहूरणा । अभूत् । बृहस्पते । प्र । चिकित्स । गोऽइष्टौ ।
इत्था । सते । जरित्रे । इन्द्र । पन्थाम् ॥ २० ॥ २३ ॥

अत्रोक्तं—अरण्येनिर्जनेगर्गोदेवानभूमिंबृहस्पतिं । इन्द्रंचास्तौत्स्वरक्षार्थंमृचामार्गच्युतोनयेति ॥ १ ॥ अगव्यूतीत्यत्रदेवान्पादेभूमिमथोत्तरे । बृहस्पतितृतीयेतुइन्द्रएवोत्तमेस्तुतइतिच ॥ २ ॥ हेदेवाः अगव्यूतिअगोचरंगोसंचाररहितंक्षेत्रंदेशंआगन्म आगतास्मः अतोमांरक्षतेति-

शेषः उर्वीविस्तीर्णासती भूमिश्चअंहूरणाअंहवः आहन्तारोदस्यवः तेषांरमणारमयित्रीअभूत् भवति अस्मान्अतःसापिरक्षतु हेबृहस्पते त्वंगविष्टौगवामन्वेषणेउपायेप्रचिकित्स प्रवेदय इत्थाइत्थमनेनप्रकारेणसतेभवते दुःखमनुभवतेजरित्रेस्तोत्रेमह्यं हेइन्द्र पंथांपंथानंमार्गंप्रचिकित्स प्रज्ञापय ॥ २० ॥

॥ इतिचतुर्थस्यसप्तमेत्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथैकविंशी–

दिवेदिवेसदृशीरन्यमर्धंकृष्णाअसेधदपसद्मनोजाः ।
अहन्दासावृषभोवस्नयन्तोदव्रजेवर्चिनंशम्बरंच ॥ २१ ॥

दिवेऽदिवे । सऽदृशीः । अन्यम् । अर्धम् । कृष्णाः । असेधत् । अप । सद्मनः । जाः । अहन् । दासा । वृषभः । वस्नऽयन्ता । उदऽव्रजे । वर्चिनम् । शम्बरम् । च ॥ २१ ॥

अयमिन्द्रः सद्मनः सदनात्स्वकीयादंतरिक्षैकदेशात्स्थानात्जाःजायमानःसूर्यात्मना प्रादुर्भवन् सदृशीस्तुल्यरूपाःकृष्णाःकृष्णवर्णारात्रीःदिवेदिवेप्रतिदिवसंअपासेधत् निवर्तयति किमर्थं अन्यमर्धंअहरर्धमपरंभागंप्रकाशयितुं अहोरात्रात्मकस्यदिवसस्यहिरात्रिरेकोभागः अपिचवृषभोवर्षयितासइन्द्रः दासादासौउपक्षपयितारौ यज्ञकर्मणांवस्नयन्तावस्नंनिवासहेतुभूतंधनं तदिच्छन्तौ वर्चिनंशंबरंचएतत्संज्ञावसुरौउदव्रजे उदकानिव्रजंत्यस्मिन्निति उदव्रजोदेशविशेषः तस्मिन्अहन्हतवान् ॥ २१ ॥

अथद्वाविंशी–

प्रस्तोकइन्नुराधंसस्तइन्द्रदशकोशयीर्दशवाजिनोदात् ।
दिवोदासादतिथिग्वस्यराधःशाम्बरंवसुप्रत्यग्रभीष्म ॥ २२ ॥

प्रऽस्तोकः । इत् । नु । राधसः । ते । इन्द्र । दश । कोशयीः । दश । वाजिनः । अदात् । दिवःऽदासात् । अतिथिऽग्वस्य । राधः । शाम्बरम् । वसु । प्रति । अग्रभीष्म ॥ २२ ॥

एतदाद्यासुचतसृषुसृंजयपुत्रस्यप्रस्तोकस्यराज्ञोदानस्तुतिः सएवदिवोदासःअश्वथःअति-थिग्वइतिचाख्यायते हेइन्द्र तेतवराधसःआराधयितुःस्तोतुः चतुर्थ्यर्थेषष्ठी त्वांस्तुवते मह्यंगर्गा-यप्रस्तोकोराजादशकोशयीः सुवर्णपूर्णान्दशसंख्याकान्कोशानदशवाजिनोश्वांश्च नुक्षिप्रंअदा-त् प्रायच्छत् इदितिपूरणः वयंचतस्माद्दिवोदासात्एतत्संज्ञात्प्रस्तोकात् वसुधनंप्रत्यग्रभीष्म प्र-तिगृहीतवन्तः कीदृशं अतिथिग्वस्य तस्यैवप्रस्तोकस्यस्वभूतंराधःराधकं शांबरं शंबरादसुरा-दागतंशंबरंहत्वा त्वयादत्तंतदीयमित्यर्थः ॥ २२ ॥

अथत्रयोविंशी—

दशाश्वान्दशकोशान्दशवस्त्राधिभोजना ।
दशोहिरण्यपिण्डान्दिवोदासादसानिषम् ॥ २३ ॥

दश॑ । अश्वा॑न् । दश॑ । कोशा॑न् । दश॑ । वस्त्रा॑ । अधि॑ऽभोजना ।
दशो॒ इति॑ । हि॒रण्य॒ऽपि॒ण्डान् । दिवः॑ऽदासात् । अ॒सा॒नि॒ष॒म् ॥ २३ ॥

दशदशसंख्याकानश्वान् दशसंख्याकान्हिरण्यपूर्णान्कोशान् अधिभोजना भोजनमि-तिधननाम अधिकंधनंयेषांमूल्यंतादृशानिदशसंख्यानिवस्त्राणिच दशोदशचदशसंख्याकांश्च हिरण्यपिंडान् सुवर्णपिंडान्एतान्सर्वान्दिवोदासात्प्रस्तोकात्अहमसानिषंसमभजं लब्धवा-नस्मि ॥ २३ ॥

अथचतुर्विंशी—

दशरथान्प्रष्टिमतःशतंगाअथर्वभ्यः । अश्वथःपायवेदात् ॥ २४ ॥

दश॑ । रथा॑न् । प्रष्टि॑ऽमतः । श॒तम् । गाः । अथ॑र्वऽभ्यः ।
अ॒श्व॒थः । पा॒यवे॑ । अ॒दा॒त् ॥ २४ ॥

दशदशसंख्याकान्प्रष्टिमतः प्रष्टिस्त्रिपदआधारः तद्वद्वहन्तीतिप्रष्टयोश्वाः तद्युक्तान्रथान् शतंशतसंख्याकागाश्चअथर्वभ्यः अथर्वगोत्रेभ्यऋषिभ्यः पायवेभरद्वाजपुत्रायएतत्संज्ञाया-स्मद्भ्रात्रेच अश्वथः अश्ववानेतत्संज्ञःप्रस्तोकः अदात् दत्तवान् ॥ २४ ॥

अथपंचविंशी—

महिराधोविश्वजन्यंदधानान्भरद्वाजान्त्सार्ञ्जयोअभ्ययष्ट ॥२५॥३४॥

महि । राधः । विश्वऽजन्यम् । दधानान् । भरत्ऽवाजान् । सार्ञ्जयः । अभि । अयष्ट ॥ २५ ॥ ३४ ॥

विश्वजन्यंसर्वजनहितंमहिमहत्राधोधनंदधानान्धारयतोभरद्वाजान्भरद्वाजपुत्रानस्मान् सार्ञ्जयःसृंजयपुत्रःप्रस्तोकः अभ्ययष्ट अपूजयत् ॥ २५ ॥

॥ इतिचतुर्थस्यसप्तमेचतुस्त्रिंशोवर्गः ॥ ३४ ॥

वनस्पतइत्येषारथारोहणेविनियुक्ता सूत्रितंच—वनस्पतेवीड्वंगोहिभूयाइत्येतयान्यान्यपि-वानस्पत्यानीति ।

सैषात्रषड्विंशी—

वनस्पतेवीड्वंगोहिभूयाअस्मत्सखाप्रतरणःसुवीरः ।
गोभिःसन्नद्धोअसिवीळयस्वास्थातातेजयतुजेत्वानि ॥ २६ ॥

वनस्पते । वीळुऽअंगः । हि । भूयाः । अस्मत्ऽसखा । प्रऽतरणः । सुऽवीरः । गोभिः । सम्ऽनद्धः । असि । वीळयस्व । आऽस्थाता । ते । जयतु । जेत्वानि ॥ २६ ॥

हेवनस्पते वनस्पतिविकाररथ त्वं वीड्वंगःदृढावयवोभूयाः भव अस्मत्सखावयंसखायोयस्यसताद‍ृशश्चभव प्रतरणःप्रवर्धयितासुवीरःशोभनैर्वीरैःशूरभटैःपुत्रादिभिर्वायुक्तश्चभव अपिच त्वंगोभिःगोविकारैश्चर्मभिः सन्नद्धोसि सम्यग्बद्धोभवसि ताद‍ृशस्त्वंवीळयस्व अस्मान्दृढीकुरु तेतवआस्थातात्वय्यवस्थितोरथीच जेत्वानिजेतव्यानिशत्रुसैन्यानिजयतु ॥ २६ ॥

अथसप्तविंशी—

दिवस्पृथिव्याःपर्योजउद्भृतंवनस्पतिभ्यःपर्याभृतंसहः ।
अपामोज्मानंपरिगोभिरावृतमिन्द्रस्यवज्रंहविषारथंयज ॥२७॥

दिवः । पृथिव्याः । परि । ओजः । उत्ऽभृतम् । वनस्पतिऽभ्यः ।
परि । आऽभृतम् । सहः । अपाम् । ओज्मानम् । परि । गोभिः ।
आऽवृतम् । इन्द्रस्य । वज्रम् । हविषा । रथम् । यज ॥ २७ ॥

दिवोद्युलोकात्पृथिव्याभूमेश्चउद्भृतं उद्धृतंसारत्वेनोपात्तं यदोजोबलमस्ति तद्रूपंवनस्पतिविकारत्वात्रथस्यवनस्पतयोहिपृथिव्याःसारभूताः तेचद्युसंबन्धिभिरुदकैःप्रवृद्धाः अतोरथस्यलोकद्वयसारत्वमुपपन्नं परिःपंचम्यर्थानुवादी अपिच वनस्पतिभ्योवृक्षेभ्यःपरिपूर्ववत्आभृतमाहृतंसहोबलरूपं अपामुदकानांओज्मानंप्रेरकं यद्वा ओज्मावेगः अपांवेगइववेगवन्तंगोभिः गोविकारैःचर्मभिःपरितआवृतं आवेष्टितं इन्द्रस्यवज्रंवज्रैकदेशं श्रूयतेहि—इन्द्रोवृत्रायवज्रमुदयच्छत्सत्रेधाव्यभजत् वज्रस्तृतीयंरथस्तृतीयंयूपस्तृतीयमिति । एवंगुणविशिष्टंरथंहविषापुरोडाशादिनाहेअध्वर्यो यजनूनमेषाउत्तराचरथदेवत्यस्यहविषोयाज्यानुवाक्येलिंगादवगंतव्ये॥२७॥

अथाष्टाविंशी—

इन्द्रस्यवज्रोमरुतामनीकंमित्रस्यगर्भोवरुणस्यनाभिः ।
सेमांनोहव्यदातिंजुषाणोदेवरथप्रतिहव्यागृभाय ॥ २८ ॥[1]

इन्द्रस्य । वज्रः । मरुताम् । अनीकम् । मित्रस्य । गर्भः ।
वरुणस्य । नाभिः । सः । इमाम् । नः । हव्यऽदातिम् ।
जुषाणः । देव । रथ । प्रति । हव्या । गृभाय ॥ २८ ॥

योरथः इन्द्रस्यवज्रः उक्तप्रकारेणवज्रैकदेशः मरुतांएतत्संज्ञानांदेवगणानांअनीकंअग्रभूतं तद्वत्शीघ्रगामीमित्रस्यअहरभिमानिनोदेवस्यगर्भोगर्भवदंतर्वर्तमानः अहनिहिरथःसंचरति वरुणस्यराव्यभिमानिदेवस्यनाभिःनाभिस्थानीयःनाभिर्यथादेहमध्येनेश्चल्येनावतिष्ठतेतद्वत् रात्रौक्वचिदेवस्थितः हेदेव द्योतमानरथयउक्तगुणः सतादृशस्त्वं इमांनोस्मदीयांहव्यदातिंहविर्दानवतींयागक्रियां जुषाणःसेवमानःसन्हव्या हव्यान्यस्मदीयानिहवींषि प्रतिगृभाय प्रतिगृहाण॥२८॥

परेणतृचेनसंग्रामेदुंदुभिरभिमर्शनीयः सूत्रितंच—उपश्वासयपृथिवीमुतद्यामितितृचेनदुंदुभिमभिमृशेदिति ।

---

1 तै० सं० ६. १. ३. ।

सैषात्रैकोनात्रिंशी—

उप॑श्वासयपृथि॒वीमु॒तद्यांपु॑रु॒त्राते॒मनु॑तां॒विष्ठि॑तं॒जग॑त्।
सदु॑न्दुभेस॒जूरिन्द्रे॑णदे॒वैर्दू॒राद्दवी॑यो॒अप॑सेधशत्रू॑न्॥ २९ ॥

उप॑। श्वा॒स॒य॒। पृ॒थि॒वीम्। उ॒त। द्याम्। पु॒रु॒ऽत्रा। ते॒।
म॒नु॒ता॒म्। विऽस्थि॑तम्। जग॑त्। सः। दु॒न्दु॒भे॒। स॒ऽजूः। इन्द्रे॑ण।
दे॒वैः। दू॒रात्। दवी॑यः। अप॑। से॒ध॒। शत्रू॑न्॥ २९ ॥

हेदुंदुभे पृथिवींउतअपिच द्यांदिवंउपश्वासय आत्मीयेनजयघोषेणाश्वासय यथा लोकद्वयंत्वदीयेनशब्देनापूरितंभवति तादृशंशब्दंकुर्वित्यर्थः अपिचविस्थितंविशेषेणस्थितं स्थावरंजंगमंच उभयविधंप्राणिजातंतेत्वदीयंशब्दंपुरुत्राबहुधामनुतांमन्यतांजानातु हेदुंदुभे स- त्वंइन्द्रेणअन्यैर्देवैश्चसजूःसहदूराद्दवीयः दूरादपिदूरतरंशत्रूनस्मदीयानअपसेध अपगमय अत्र- निरुक्तं[1]—दुंदुभिरितिशब्दानुकरणंद्रुमोभिन्नमितिवादुंदुभ्यतेर्वास्याद्धधकर्मणइत्यादि ॥ २९ ॥

अथत्रिंशी—

आक्र॑न्दय॒बल॒मोजो॑न॒आधा॒निःष्ट॑निहि॒दु॒रि॒ताबाध॑मानः।
अप॑प्रोथदुन्दुभेदु॒च्छुना॑इ॒तइन्द्र॑स्यमु॒ष्टिर॑सि॒वी॒ळय॑स्व ॥ ३० ॥

आ। क्र॒न्द॒य॒। बल॑म्। ओजः॑। नः॒। आ। धाः॒। निः।
स्त॒नि॒हि॒। दुः॒ऽइ॒ता। बाध॑मानः। अप॑। प्रो॒थ॒। दु॒न्दु॒भे॒।
दु॒च्छुनाः॑। इ॒तः। इन्द्र॑स्य। मु॒ष्टिः। अ॒सि॒। वी॒ळय॑स्व ॥ ३० ॥

हेदुंदुभे आक्रन्दयअस्मच्छत्रूनरोदय बलंसेनारूपंओजःशरीरबलंच नोस्मभ्यंआधाः आधेहि प्रयच्छ तथादुरितादुरितानि दुर्गमनानिबाधमानोहिंसंस्त्वंनिस्तनिहि नितरांशब्दंकु- रुस्तनशब्दइतिधातुः हेदुंदुभे दुच्छुनाःअस्मद्दुःखहेतुभूतंशुनंसुखंयासांताःतादृशीःशत्रुसेनाःइतो- स्मात्स्थानात्अपप्रोथबाधस्वत्वंचेन्द्रस्यमुष्टिरसि मुष्टिरिवशत्रूणांहन्ताभवसि अतोस्मान्वीळयस्व दृढीकुरु ॥ ३० ॥

---

1 नि० ९. १२.

अथैकत्रिंशी—

आमूरंजप्रत्यावर्तयेमाःकेतुमद्दुंदुभिर्वावदीति ।
समश्वपर्णाश्चरंन्तिनोनरोस्माकमिन्द्ररथिनोजयन्तु ॥३१॥३५॥

आ । अमूः । अज । प्रतिऽआवर्तय । इमाः । केतुऽमत् ।
दुन्दुभिः । वावदीति । सम् । अश्वऽपर्णाः । चरंन्ति । नः ।
नरः । अस्माकम् । इन्द्र । रथिनः । जयन्तु ॥ ३१ ॥ ३५ ॥

अस्याःपूर्वार्धोदुंदुभिदेवत्यः उत्तरार्धश्चेन्द्रः यद्वा उभावप्यर्धर्चावैन्द्रौ हेइन्द्र अमूःशत्रुषु स्थिताःतागाःआजअस्मान्प्रत्यागमय इमाःअस्मदीयागाःशत्रुभिर्जिघृक्षिताःप्रत्यावर्तय प्रतिनिवर्तय अयंचदुंदुभिःकेतुमत्प्रज्ञानवत् यथासर्वैर्ज्ञायतेतथावावदीतिभृशंशब्दंकरोति अश्वपर्णाःअश्वपतनाःअश्ववाहाश्चनोस्मदीयाश्चनरःपुरुषाःसंचरन्ति शत्रुभिर्युध्यमानावर्तन्ते तथासति हेइन्द्र अस्माकंरथिनः रथारूढाःपुरुषाःशत्रून्जयन्तु ॥ ३१ ॥

॥ इतिचतुर्थस्यसप्तमेपंचत्रिंशोवर्गः ॥ ३५ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेसप्तमोध्यायःसमाप्तः ॥ ७ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥
अथाष्टमोध्यायआरभ्यते। षष्ठमंडलस्यचतुर्थेनुवाकेचत्वारिसूक्तानिव्याकृतानि यज्ञायज्ञेतिद्वाविंशत्यृचंपंचमंसूक्तंबृहस्पतिपुत्रस्यशंयोरार्षं अत्रानुक्रम्यते—यज्ञायज्ञाद्यधिकाशंयुस्तृणपाणिकंपृश्निसूक्तंप्रगाथौबृहतीमहासतोबृहतीमहाबार्हतबार्हतौप्रगाथावित्याग्नेय्यःकाकुभःप्रगाथः पुरउष्णिग्बृहत्यतिजगतीतिमारुत्योंत्यास्तिस्रोवासांलिंगोक्तदेवताःकाकुभःप्रगाथःपुरउष्णिक्बृहतीतिपौष्ण्योबृहतीमहाबृहतीयवमध्यांत्यानुष्टुप्मारुत्योंत्याद्यावाभूम्योर्वापृश्नेर्वेति। यज्ञायज्ञावइत्येषाबृहती तृतीयद्वादशकात्त्र्यष्टकेतितल्लक्षणसद्भावात् द्वितीयासतोबृहती अयुजौजागतौ सतोबृहतीत्युक्तलक्षणोपेतत्वात् तृतीयाचतुर्थीबृहतीसतोबृहत्यौ पंचमीबृहती षष्ठीमहासतोबृहती अष्टाक्षरास्त्रयःपादाः द्वादशाक्षरौद्वौपादौसामहासतोबृहती सप्तमीमहाबृहतीअष्टाक्षराश्चत्वारः पादाः एकोद्वादशाक्षरःसामहाबृहती अष्टमीमहासतोबृहतीअष्टिनस्त्रयःद्वौजागतौसामहासतोबृहती नवमीबृहतीदशमीसतोबृहती एतादशाग्निदेवत्याः एकादशीककुप्मध्यमोयदिद्वादशाक्षरःउभयतोष्टकौद्वौपादौसाककुप् द्वादशीसतोबृहतीत्रयोदशीपुरउष्णिक् आद्योजागतः द्वितीयतृतीयौगायत्रौ सापुरउष्णिक् चतुर्दशीबृहतीपंचदशीअतिजगतीद्वापंचाशदक्षरा एकादश्याद्याःपंचमरुद्देवताकाः त्रयोदश्यादीनांतिसृणांलिंगोक्ताइन्द्रादयोवादेवताः षोडशीककुप् सप्तदशीसतोबृहतीअष्टादशीपुरउष्णिक् एकोनविंशीबृहतीषोळश्यादीनांचतसृणांपूषादेवताविंशीबृहतीएकविंशीयवमध्यामहाबृहतीआद्यौद्वावष्टकौतृतीयोद्वादशकःचतुर्थपंचमावष्टकौसायवमध्यामहाबृहतीविंश्येकविंश्योः पृश्निसूक्तमित्युक्तत्वान्मरुतांमातापृश्निर्देवताद्वाविंश्यनुष्टुप्साचापिपृश्निदेवत्याद्यावाभूमिदेवत्यावा सूक्तविनियोगोलैंगिकः । आग्निमारुतेयज्ञायज्ञावइत्ययंस्तोत्रियप्रगाथः सूत्रितंच—यज्ञायज्ञावोअग्नयेदेवोवोद्रविणोदाइतिप्रगाथौस्तोत्रियानुरूपाविति ।

तत्रैषाप्रथमा—

यज्ञायंज्ञावोअग्नयेंगिरागिराचदक्षसे ।
प्रप्रंवयममृतंजातवेदसंप्रियंमित्रंनशंसिपम् ॥ १ ॥

यज्ञाऽयंज्ञा । वः । अग्नये । गिराऽगिरा । च । दक्षसे । प्रऽप्र । वयम् । अमृतम् । जातऽवेदसम् । प्रियम् । मित्रम् । न । शंसिषम् ॥ १ ॥

हेस्तोतारोवोयूयंयज्ञायज्ञा यज्ञेयज्ञे सर्वेषुयागेषुदक्षसेप्रवृद्धायाग्नये गिरागिरास्तुतिरूपया वाचावाचास्तोत्रंकुरुतेतिशेषः चशब्दोभिन्नक्रमोवइत्यस्मात्परोद्रष्टव्यः यूयंचस्तोत्रंकुरुत वयमपितमग्निंप्रप्रशंसिषं प्रसमुपोदःपादपूरणइतिप्रशब्दस्यद्विरुक्तिःपादपूरणार्था व्यत्ययेनैकवचनं छान्दसोलुङ् प्रशंसाम कीदृशंअमृतंमरणरहितं जातवेदसंजातानांविदितारं जातप्रज्ञंजातधनंवा मित्रंन सखिभूतमिवप्रियंअनुकूलं यद्वा व्यत्ययेनत्वमित्यस्यवसादेशः अग्नयइतिचकर्मणिचतुर्थी क्रियाग्रहणमपिकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चशब्दश्चणितिनिपातश्चेदर्थेवर्तते दक्षसइतिचदक्षेर्वृद्धिकर्मणोन्तर्भावितण्यर्थाल्लटिरूपं चणायोगात्निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः तत्रायमर्थः-हेस्तोतस्त्वंयज्ञेयज्ञेइममग्निंगिरागिरास्तुत्यादक्षसेचवर्धयसिचेत्वयमपिअमृतत्वादिगुणकंतंप्रशंसाम ॥ १ ॥

अथद्वितीया-

ऊर्जोनपातंसहिनायमस्मयुर्दाशेमहव्यदातये ।
भुवद्वाजेष्वविताभुवद्वृधउतत्रातातनूनाम् ॥ २ ॥

ऊर्जः । नपातम् । सः । हिन । अयम् । अस्मऽयुः । दाशेम । हव्यऽदातये । भुवत् । वाजेषु । अविता । भुवत् । वृधः । उत । त्राता । तनूनाम् ॥ २ ॥

ऊर्जोन्नस्यबलस्यवानपातंपुत्रंप्रशंसिषमित्यनुषंगात्प्रशंसामेत्यर्थः (हिनेतिनिपातद्वयसमुदायोहीत्यस्यार्थे) सहिसखल्वयमग्निः अस्मयुरस्मान्कामयमानोभवति वयंचहव्यदातये हव्यानांहविषांदेवेभ्योदात्रे तस्मैअग्नयेदाशेन हवींषिदद्याम सचाग्निःवाजेषुसंग्रामेषुअवितारक्षितावृधोवर्धकश्चास्माकंभुवद्भवतु उतअपिच तनूनांतनयानामस्मत्पुत्राणांचत्रातारक्षिताभवतु ॥ २ ॥

अथतृतीया-

वृषाह्यग्नेअजरोमहान्विभास्यर्चिषा ।
अजस्रेणशोचिषाशोशुचच्छुचेसुदीतिभिःसुदीदिहि ॥ ३ ॥

वृषा । हि । अग्ने । अजरः । महान् । विऽभासि । अर्चिषा ।
अजस्रेण । शोचिषा । शोशुचत् । शुचे । सुदीतिऽभिः ।
सु । दीदिहि ॥ ३ ॥

हेअग्ने वृषावर्षिताकामानांवृष्टेःकर्तावा अजरोजरारहितः महान्गुणैरधिकः एवंभूतस्त्वं अर्चिषादीप्त्याविभासिहि विशेषेणप्रकाशसेखलु हेशुचे दीप्ताग्ने अजस्रेणअविच्छिन्नेनशोचिषा तेजसाशोशुचत् भृशंदीप्यमानस्त्वं सुदीतिभिःसुदीप्तिभिःसुदीदिहि सुष्ठुअस्मान्दीपय प्रकाशय ॥ ३ ॥

अथचतुर्थी—

महोदेवान्यजसियक्ष्यानुषक्तवक्रत्वोतदंसना ।
अर्वाचःसींकृणुह्यग्नेवसेरास्वावाजोतवंस्व ॥ ४ ॥

महः । देवान् । यजसि । यक्षि । आनुषक् । तव । क्रत्वा ।
उत । दंसना ॥ अर्वाचः । सीम् । कृणुहि । अग्ने । अवसे ।
रास्व । वाजा । उत । वंस्व ॥ ४ ॥

हेअग्ने त्वंमहोमहतोदेवान्यजसि यजमानानांयज्ञेहविर्भिःपूजयसि अतोस्माकमपियज्ञे-आनुषक् अनुषक्तंसन्ततंयथाभवतितथायक्षि तान्देवान्यज तदर्थंतवक्रत्वाप्रज्ञया उतापिचदंसनाकर्मणाच सीमितिपरिग्रहार्थीयः तान्सर्वान्देवान्अर्वाचः अस्मदभिमुखान् कृणुहिकुरु अवसेअस्मद्रक्षणार्थं तथावाजावाजान्हविर्लक्षणान्यन्नानिरास्वतेभ्योदेवेभ्योदेहि उतापिच त्वमपिवंस्वतुभ्यंप्रत्तानिहवींषिसंभजस्व ॥ ४ ॥

अथपंचमी—

यमापोअद्रयोवनागर्भमृतस्यपिप्रति ।
सहसायोमथितोजायतेनृभिःपृथिव्याअधिसानवि ॥ ५ ॥ १ ॥

यम् । आपः । अद्रयः । वना । गर्भम् । ऋतस्य । पिप्रति ।
सहसा । यः । मथितः । जायते । नृऽभिः । पृथिव्याः ।
अधि । सानवि ॥ ५ ॥ १ ॥

आपोवसतीवर्याख्याः अद्रयोग्रावाणः वनावनानिकाष्ठानिच ऋतस्ययज्ञस्योदकस्यवा गर्भं गर्भवदन्तर्वर्तमानंयमग्निंपिप्रति पूरयन्ति यद्वा आपःसमुद्रियाअद्रयोमेघाः वनान्यरण्यानिच ऋतस्यगर्भंवाडववैद्युतदावरूपेणवर्तमानं यमग्निंपिप्रति पूरयन्ति यश्चाग्निःनृभिर्नेतृभिःऋत्विग्भिःसहसाबलेनमथितःसन् पृथिव्याअधिभूमेरुपरि सानविसमुच्छ्रितेउत्कृष्टेदेवयजनदेशेजायतेप्रादुर्भवति सत्वंवंस्वेत्यन्वयः यद्वायःपप्रावित्यनयासंबन्धः ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेप्रथमोवर्गः ॥ १ ॥

अथषष्ठी—

आयःपप्रौभानुनारोदसीउभेधूमेनधावतेदिवि ।
तिरस्तमोददृशऊर्म्यास्वाश्यावास्वरुषोवृषाश्यावाअरुषोवृषा॥६॥

आ । यः । पप्रौ । भानुना । रोदसी इति । उभे इति । धूमेन ।
धावते । दिवि । तिरः । तमः । ददृशे । ऊर्म्यासु । आ ।
श्यावासु । अरुषः । वृषा । आ । श्यावाः । अरुषः । वृषा ॥ ६ ॥

योग्निः भानुनादीप्त्याउभेरोदसीद्यावापृथिव्यौआपप्रौ आपूरयति सः धूमेनदिविअन्तरिक्षेधावतेगच्छति धूमोहिमेघात्मनापरिणतःसन् अन्तरिक्षेगच्छति कार्यकारणयोरभेदविवक्षया तद्गमनमग्नावुपचर्यते अपिचायंअरुषः आरोचमानः वृषावर्षिताकामानां एवंगुणकोग्निःश्यावासुश्यावववर्णासुकृष्णासुऊर्म्यासु रात्रिनामैतत् निशासुतमोंधकारंतिरःतिरस्कृत्यआसमंतातददृशे दृश्यतेश्यावाः श्याववर्णारात्रीश्च आतिष्ठति अरुषोवृषेतिपुनरुक्तिरादरार्थापादपूरणार्थावा॥६॥

अथसप्तमी—

बृहद्भिरग्नेअर्चिभिःशुक्रेणदेवशोचिषा ।
भरद्वाजेसमिधानोयविष्ठ्यरेवन्नःशुक्रदीदिहिद्युमत्पावकदीदिहि॥७॥

बृहत्ऽभिः । अग्ने । अर्चिऽभिः । शुक्रेण । देव । शोचिषा ।
भरत्ऽवाजे । सम्ऽइधानः । यविष्ठ्य । रेवत् । नः । शुक्र ।
दीदिहि । द्युऽमत् । पावक । दीदिहि ॥ ७ ॥

हेदेव दानादिगुणयुक्त यविष्ठच युवतम शुक्र दीप्ताग्ने शुक्रेण निर्मलेनशोचिषातेजसा भरद्वाजेअस्मद्भ्रातरि समिधानः समिध्यमानस्त्वं बृहद्भिर्महद्भिरर्चिभिः तेजोभिः नोस्मदर्थं रेवद्धनयुक्तंयथाभवतितथादीदिहि दीप्यस्व तथापावक हेशोधकाग्ने द्युमद्द्योतमानेनचयुक्तं यथाभवतितथादीदिहि दीप्यस्व ॥ ७ ॥

अथाष्टमी—

विश्वासांगृहपतिर्विशामसित्वमग्नेमानुषीणाम् ।
शतंपूर्भिर्यविष्ठपाह्यंहसःसमेद्धारंशतंहिमाःस्तोतृभ्योयेचददति ॥८॥

विश्वासाम् । गृहऽपतिः । विशाम् । असि । त्वम् । अग्ने ।
मानुषीणाम् । शतम् । पूःऽभिः । यविष्ठ । पाहि । अंहसः ।
समऽइद्धारम् । शतम् । हिमाः । स्तोतृऽभ्यः । ये । च । ददति ॥ ८ ॥

हेअग्ने त्वंमानुषीणांमनोरपत्यभूतानां विश्वासांसर्वासांविशांप्रजानांगृहपतिरसि गृहस्वामीभवसि हेयविष्ठ युवतमाग्ने अतस्त्वंशतंहिमाः शतंहेमन्तानसंवत्सरानसमेद्धारंत्वांसम्यगिद्धं कृतवन्तंमांशतंशतेनशतसंख्याकैः पूर्भिःपालकैः अंहसः पापात आहन्तुः शत्रोर्वापाहिरक्ष येचस्तोतृभ्योददति धनंतवसमिन्धनस्यकर्तेप्रयच्छन्ति तांश्चपाहि ॥ ८ ॥

अथनवमी—

त्वंनश्चित्रऊत्यावसोराधांसिचोदय ।
अस्यरायस्त्वमग्नेरथीरसिविदागाधंतुचेतुनः ॥ ९ ॥

त्वम् । नः । चित्रः । ऊत्या । वसो इति । राधांसि । चोदय । अस्य ।
रायः । त्वम् । अग्ने । रथीः । असि । विदाः । गाधम । तुचे । तु । नः ॥ ९ ॥

हेवसो वासकाग्ने चित्रोदर्शनीयस्त्वंऊत्यारक्षयासह राधांसिधनानिनोस्मभ्यंचोदय प्रेरय सर्वत्रलोकेपरिदृश्यमानस्यरायोधनस्यत्वंरथीरसि रंहितानेताभवसि अतःकारणात्अस्मभ्यं धनानिप्रेरयेत्यर्थः अपिच नोस्माकंतुचेअपत्यनामैतत्अपत्याय अपततहेतुभूताय पुत्रादयेगाधं प्रतिष्ठांतुक्षिप्रंविदाः लंभय ॥ ९ ॥

अथदशमी–

पर्षितोकंतनयंपर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः।
अग्नेहेळांसिदैव्यायुयोधिनोदेवानिह्वरांसिच ॥ १० ॥ २ ॥

पर्षि । तोकम् । तनयम् । पर्तृऽभिः । त्वम् । अदब्धैः ।
अप्रयुत्वऽभिः । अग्ने । हेळांसि । दैव्या । युयोधि । नः ।
अदेवानि । ह्वरांसि । च ॥ १० ॥ २ ॥

हेअग्ने त्वं अदब्धैःकेनाप्यहिंसितैः अप्रयुत्वभिः यौतिरत्रपृथग्भावार्थः अपृथग्भूतैः संहतैः पर्तृभिःपालनसाधनैःतोकंपुत्रंतनयंपौत्रंचपर्षिपालय दैव्यादेवसंबन्धीनिच हेळांसिक्रोधान्नोस्मत्तोयुयोधि पृथक्कुरु अदेवानि मनुष्यसंबन्धीनिच ह्वरांसिहिंसनानिच अस्मत्तः पृथक्कुरु॥१०॥

॥ इतिचतुर्थस्याष्टमेद्वितीयोवर्गः ॥ २ ॥

अथैकादशी–

आसखायःसबर्दुघांधेनुमजध्वमुपनव्यसावचः।
सृजध्वमनपस्फुराम् ॥ ११ ॥

आ । सखायः । सबःऽदुघाम् । धेनुम् । अजध्वम् । उप ।
नव्यसा । वचः । सृजध्वम् । अनपऽस्फुराम् ॥ ११ ॥

हेसखायः समानख्यानाअध्वर्यवः सबर्दुघां सबरितिपयसोनाम अमरणहेतुभूतस्यपयसोदोग्ध्रींधेनुंगांआअजध्वं अभिगच्छत प्रामुत केनसाधनेन नव्यसानवीयसा नवतरेणवचःवचसा आह्वानरूपेणशब्देन तदनंतरंअनपस्फुरां स्फुरतिर्वधकर्मा अनपबाध्यांतांधेनुंउपसृजध्वं वत्सेनोपसृष्टांकुरुत मरुद्देवत्यत्वात्मरुतांयागायपयोदोग्धुमितिशेषः अथवामरुतांमातापृश्न्याख्यामाध्यमिकावाग्धेनुः हेसखायःस्तोतारः सबर्दुघांमरुज्जनहेतुभूतस्यपयसोदोग्ध्रींधेनुंपृश्निंनव्यसानवतरेणवचसास्तोत्रेणउपाजध्वमुपागच्छत अनपस्फुरांअनपबाधनीयांतांसृजध्वं बन्धनाद्विसृजत मुंचत ईदृशीमहतीधेनुः मरुतांमाताकिमुवक्तव्यंतेषांमाहात्म्यमितिमरुत्स्तुतिः ॥११॥

अथद्वादशी—

याशर्धायमारुतायस्वभानवेश्रवोमृत्युधुक्षत ।
यामृळीकेमरुतांतुराणांयासुम्नैरेवयावरी ॥ १२ ॥

या । शर्धाय । मारुताय । स्वऽभानवे । श्रवः । अमृत्यु । धुक्षत ।
या । मृळीके । मरुताम् । तुराणाम् । या । सुम्नैः । एवऽयावरी ॥ १२ ॥

याधेनुः अमृत्युअमरणहेतुश्रवोन्नंपयोलक्षणंमारुतायमरुत्संघायधुक्षतअधुक्षन् कीदृशाय शर्धायप्रसहनशीलाय स्वभानवेस्वायत्तदीप्तये याचतुराणांक्षिप्रकारिणांमरुतांमृळीकेसुखेतत्परावर्तते याचसुम्नैःसुखैर्हेतुभूतैः एवयावरीएवैर्गंतृभिरश्वैः मध्यमस्थानैरुदकैर्वासहयातीअन्येषामपिसुखार्थंवृष्टिजलैः सहागच्छन्ती तांधेनुंउपाजध्वमितिपूर्वत्रान्वयः अत्रापिपूर्ववन्मरुत्स्तुतिरधिगन्तव्या ॥ १२ ॥

अथत्रयोदशी—

भरद्वाजायावधुक्षतद्विता ।
धेनुंचविश्वदोहसमिषंचविश्वभोजसम् ॥ १३ ॥

भरत्ऽवाजाय । अव । धुक्षत । द्विता । धेनुम् । च ।
विश्वऽदोहसम् । इषम् । च । विश्वऽभोजसम् ॥ १३ ॥

हेमरुतः भरद्वाजायास्मद्भ्रात्रेद्विताद्वितयंअवधुक्षत दत्त किंतद्वितयं धेनुंचगांच इषंचअन्नंच कीदृशींधेनुं विश्वदोहसं विश्वस्यव्याप्तस्यबहुलस्यदोग्ध्रीं कीदृशमन्नं विश्वभोजसंसर्वेषांभोगपर्याप्तं ॥ १३ ॥

अथचतुर्दशी—

तंवइन्द्रंनसुक्रतुंवरुणमिवमायिनम् ।
अर्यमणंनमन्द्रंसृप्रभोजसंविष्णुंनस्तुषआदिशे ॥ १४ ॥

तम् । वः । इन्द्रम् । न । सुऽक्रतुम् । वरुणम्ऽइव । मायिनम् ।
अर्यमणम् । न । मन्द्रम् । सृप्रऽभोजसम् । विष्णुम् । न ।
स्तुषे । आऽदिशे ॥ १४ ॥

हेमरुद्गण तंतादृशंवःत्वांस्तुषेस्तौमि किमर्थंआदिशे आदेशनाय धनानामतिसर्जनाय प्रदानाय कीदृशंत्वां इन्द्रंनइन्द्रमिव सुक्रतुंसुकर्माणं वरुणमिवमायिनं मायावन्तंप्रज्ञावन्तंअर्यमणंअर्यमणमिव मन्द्रंस्तुत्यं विष्णुंन विष्णुमिवसृप्रभोजसं प्रसृप्तधनं· यदात्वस्यालिंगोक्तदेवतास्तदानींनिवशब्दौचशब्दार्थेद्रष्टव्यौ ॥ १४ ॥

अथपंचदशी–

त्वेषंशर्धोनमारुतंतुविष्वण्यनर्वाणंपूषणंसंयथाशता ।
संसहस्राकारिषच्चर्षणिभ्यआँआविर्गूळ्हावसूकरत्सुवेदानोवसूकरत्॥१५॥

त्वेषम् । शर्धः । न । मारुतम् । तुविऽस्वनि । अनर्वाणम् । पूषणम् ।
सम् । यथा । शता । सम् । सहस्रा । कारिषत् । चर्षणिऽभ्यः । आ ।
आविः । गूळ्हा । वसु । करत् । सुऽवेदा । नः । वसु । करत् ॥ १५ ॥

नेतिसंप्रत्यर्थे नसंप्रतिइदानीं त्वेषंदीप्तंतुविष्वणि बहुस्वनं अनर्वाणंअप्रत्यृतंशत्रुभिरनभिगतं पूषणंपोषकंमारुतंमरुत्संबन्धरूपमीदृशंशर्धोबलं स्तौमीतिशेषः सचमरुद्गणः यथायेनप्रकारेण शता शतसंख्याकानिधनानिसंसंहैवचर्षणिभ्योमनुष्येभ्योस्मभ्यंकारिषत् कुर्यात् आकारःसमुच्चये यथावासहस्रासहस्रसंख्याकानिधनानिचसंसहैवकारिषत्कुर्यात् तथास्तौमीतिपूर्वत्रान्वयः अपिच समरुद्गणः गूळ्हागूढानि संवृतानिवसुवसूनिधनानिआविष्करत् अस्मभ्यमाविष्करोतु तथावसुवसूनिधनानिसुवेदासुलभानिचनोस्माकंकरत् करोतु यदातुलिंगादियंपौष्णीतदामारुतं शर्धइवत्वेषंपूषणंपूपकमेतत्संज्ञंदेवंस्तौमीतियोजनीयं ॥ १५ ॥

अथषोडशी–

आमांपूषन्नुपद्रवशंसिषन्नुतेअपिकर्णआघृणे ।
अघाअर्योअरातयः ॥ १६ ॥ ३ ॥

आ । मा । पूषन् । उप । द्रव । शंसिषम् । नु । ते । अपिऽकर्णे ।
आघृणे । अघाः । अर्यः । अरातयः ॥ १६ ॥ ३ ॥

हेपूषन् मामांआद्रव रक्षणार्थमभिगच्छ हेआघृणे आगतदीप्ते अघाःआहंत्रीः अर्यः अरीः अभिगंत्रीः अरातयः शत्रुभूताः प्रजाः उपद्रवबाधस्व उपपूर्वोद्रवतिर्बाधायांवर्तते यथाप्रजांपशून्यजमानस्यउपद्रोद्रावयति अहंचनेतवअपिकर्णेकर्णावपिगतेसमीपदेशेस्थितःसन् नुक्षिप्रंशंसिषंप्रशंसामि ॥ १६ ॥

॥ इतिचतुर्थस्याष्टमेतृतीयोवर्गः ॥ ३ ॥

अथसप्तदशी—

माकाकंबीरमुद्वृहोवनस्पतिमशस्तीर्विहिनीनशः ।
मोतसूरोअहएवाचनग्रीवाआदधतेवेः ॥ १७ ॥

मा । काकम्बीरम् । उत् । वृहः । वनस्पतिम् । अशस्तीः । वि ।
हि । नीनशः । मा । उत । सूरः । अहः । इति । एव । चन ।
ग्रीवाः । आऽदधते । वेः इति वेः ॥ १७ ॥

ऋषिः पुत्रपौत्रसहितमात्मानंबहुपक्ष्याश्रयवनस्पतित्वेनरूपयनतस्यानुद्धारमाशास्ते हेपूषन् माकाकंबीरंकाकानांभर्तारंवनस्पतिंवृक्षंमाउद्वृहः उद्धर माबाधस्व पुत्रपौत्रादिभिः सखीभूतैरुपेतंअन्यैश्चबहुभिराश्रितंमांमाहिंसीरित्यर्थः हिशब्दश्चार्थे अशस्तीरशंसनीयाः अशंसनीयस्यदुःखस्यकीर्तयित्रीर्वाशत्रुभूताः प्रजाः विनीनशोहि विनाशयच मोतमाचसूरः प्रेरकः शत्रुः एवएवंमाअहःअस्मान्माहार्षीत् एवमित्यभिसंबन्धात आख्यानस्योदात्तवत्वाच्चअश्रुतोपियथेत्येतद्वाक्येध्याह्रियते ग्रीवाःगिरन्तिअन्तर्गतस्थापयन्तिबध्नन्तीतिग्रीवाःदामानि यथाव्याधाःवेःपक्षिणोहरणार्थंग्रीवाः दामानिजालरूपाणिआदधते भूम्यांनिदधते तैश्चनिहितैः पक्षिणोहरन्ति एवमस्मान्बन्धनोपायैःशत्रुर्माहार्षीरित्यर्थः ॥ १७ ॥

अथाष्टादशी—

दृतेरिवतेवृकमस्तुसख्यम् ।
अच्छिद्रस्यदधन्वतःसुपूर्णस्यदधन्वतः ॥ १८ ॥

दृतेःऽइव । ते । अवृकम् । अस्तु । सख्यम् । अच्छिद्रस्य ।
दधन्ऽवतः । सुऽपूर्णस्य । दधन्ऽवतः ॥ १८ ॥

हेपूषन् तेतवसख्यंसखित्वंअवृकंबाधकरहितंसर्वदैकरूपेणवर्तमानं अस्माकमस्तुसर्वदाभवतु दृतेरिवयथादृतेस्त्वदीयंसख्यंअविच्छिन्नंतद्वत् कीदृशोदृतिःअच्छिद्रस्यछिद्ररहितस्यसंश्लिष्टस्यदधन्वतोदधिमतःसुपूर्णस्यदध्नासुष्ठुपूरितस्यपुनर्दधन्वतइतिधन्वोधिकत्वद्योतनार्थः ईदृशोदृतिःसर्वदापूर्णोरथेवर्तते सइववयमपितवसखायोभवेमेत्यृषिराशास्ते ॥ १८ ॥

अथैकोनविंशी–

परोहिमर्त्यैरसिसमोदेवैरुतश्रिया ।
अभिख्यःपूषन्पृतनासुनस्त्वमवानूनंयथापुरा ॥ १९ ॥

परः । हि । मर्त्यैः । असि । समः । देवैः । उत । श्रिया । अभि ।
ख्यः । पूषन् । पृतनासु । नः । त्वम् । अव । नूनम् । यथा । पुरा ॥ १९

हेपूषन् मर्त्यैर्मर्त्येभ्योमनुष्येभ्यःपरःपरस्तात्स्थितोसि श्रियासंपदादेवैरुतसर्वैःदेवैश्चसमः समानोसि अतस्त्वंपृतनासुसंग्रामेषुनोस्मानभिख्यः अभिपश्य अनुग्रहदृष्ट्याविलोकय यथापुरायेनप्रकारेणपूर्वकालीनान्पुरुषान् ररक्षिथ एवंनूनमद्यइदानींअवअस्मान्रक्षहीतिपूरणः ॥ १९

अथविंशी–

वामीवामस्यधूतयःप्रणीतिरस्तुसूनृता ।
देवस्यवामरुतोमर्त्यस्यवेजानस्यप्रयज्यवः ॥ २० ॥

वामी । वामस्य । धूतयः । प्रऽनीतिः । अस्तु । सूनृता । देवस्य ।
वा । मरुतः । मर्त्यस्य । वा । ईजानस्य । प्रऽयज्यवः ॥ २० ॥

हेधूतयःकंपयितारः प्रयज्यवः प्रकर्षेणयष्टव्यामरुतः सासूनृताप्रियसत्यात्मिकामाध्यमिकायुष्मदीयावाक् प्रणीतिरस्तु अस्मदर्थंधनानांप्रणेत्रीभवतु देवस्यवामर्त्यस्यमनुष्यस्यवाईजानस्य इष्टवतः उभयविधस्यपुरुषस्यवामीप्रशस्तायावाक् वामस्यवननीयस्यधनस्यप्रणीतिः प्रणेत्री सासूनृतेत्यन्वयः प्रणीतिरस्तुअस्मदर्थं ॥ २० ॥

अथैकविंशी—

सद्यश्चिद्यस्यचर्कृतिःपरिद्यांदेवोनैतिसूर्यः ।
त्वेषंशवोदधिरेनामयज्ञियंमरुतोवृत्रहंशवोज्येष्ठंवृत्रहंशवः ॥ २१ ॥

सद्यः । चित् । यस्य । चर्कृतिः । परि । द्याम् । देवः । न । एति । सूर्यः । त्वेषम् । शवः । दधिरे । नाम । यज्ञियम् । मरुतः । वृत्रऽहम् । शवः । ज्येष्ठम् । वृत्रऽहम् । शवः ॥ २१ ॥

यस्यचमरुद्गणस्यचर्कृतिः कर्मसद्यश्चित्र सद्यएव द्यांपर्येति परिगच्छति दिव्यन्तरिक्षेपरितोवर्तते देवोन देवोद्योतमानःसूर्यइव तादृशागणात्मकामरुतः त्वेषंदीप्तंनामशत्रूणांनमयितृ यज्ञियंयज्ञार्हंशवोबलं दधिरेअधारयन् तच्च शवोबलंवृत्रहंवृत्रादेरसुरस्यहन्तृ भवति तच्चवृत्रहंशवः ज्येष्ठंसर्वेभ्यः प्रशस्ततमंभवति ॥ २१ ॥

अथद्वाविंशी—

सकृद्धद्यौरजायतसकृद्भूमिरजायत ।
पृश्न्यादुग्धंसकृत्पयस्तदन्योनानुजायते ॥ २२ ॥

सकृत् । ह । द्यौः । अजायत । सकृत् । भूमिः । अजायत । पृश्न्याः । दुग्धम् । सकृत् । पयः । तत् । अन्यः । न । अनु । जायते ॥ २२ ॥

सकृद्धसकृदेवद्यौरजायत उदपद्यत सकृदुत्पन्नैवस्थिताभवति नपुनस्तस्यांनष्टायांअन्या तत्सदृशीद्यौर्जायते भूमिश्चसकृदेवाजायत पृश्न्याः मरुतांमातुर्गोः पयश्चसकृदेकवारमेवदुग्धं यस्मात्पयसोमरुतोजज्ञिरे पृश्न्यैवैपयसोमरुतोजाताइतितैत्तिरीयकं¹ । यथाद्यावापृथिव्यौसकृदेवोत्पद्येते एवंपृश्निरपिसकृत् दुग्धेनैवपयसामरुतोजीजनत् ततःपरंअन्यः पदार्थोनानुजायते तत्सदृशोनोत्पद्यते ॥ २२ ॥

॥ इतिचतुर्थस्याष्टमेचतुर्थोवर्गः ॥ ४ ॥

---

१ तै० सं २. २. ११. ।

स्तुषेजनमितिपंचदशर्चैषष्ठंसूक्तं भारद्वाजस्यऋजिश्वनआर्षं वैश्वदेवं अंत्याषट्पंचाशद-क्षराशक्करी शिष्टास्त्रिष्टुभः तथाचानुक्रान्तं—स्तुषेपंचोनाऋजिश्वाहवैश्वदेवंहशक्कर्यन्तमिति । व्यूळ्हेदशरात्रेपंचमेहनिइदंवैश्वदेवनिविद्धानं सूत्रितंच—ऋभुर्विभ्वास्तुषेजनमितिवैश्वदेवमिति । आद्यामहानाम्नीव्रतेजप्या ।

सैषाप्रथमा—

स्तुषेजनंसुव्रतंनव्यसीभिर्गीर्भिर्मित्रावरुणासुम्नयन्तां ।
तआगमन्तुतइहश्रुवन्तुसुक्षत्रासोवरुणोमित्रोअग्निः ॥ १ ॥

स्तुषे । जनम् । सुऽव्रतम् । नव्यसीभिः । गीःऽभिः । मित्रावरुणा ।
सुम्नऽयन्ता । ते । आ । गमन्तु । ते । इह । श्रुवन्तु ।
सुऽक्षत्रासः । वरुणः । मित्रः । अग्निः ॥ १ ॥

सुव्रतं सुकर्माणंजनंदैव्यंजनंदेवसंघंनव्यसीभिःनवतराभिर्गीर्भिःस्तुतिभिः स्तुषे अहंस्तुवे तथा मित्रावरुणामित्रःप्रमीयतेस्त्रायकःवरुणःपापानांनिवारयिता एतावपिदेवौस्तौमि कीदृशौ सुम्नयन्तासुम्नंसुखंस्तोतॄणामिच्छन्तौ सुक्षत्रासःशोभनबलास्तेवरुणादयःसर्वेदेवाःइहास्मिन्यज्ञे-आगमन्तु आगच्छन्तु तेतादृशाःश्रुवन्तु अस्मदीयाःस्तुतीःशृण्वन्तुच अत्रमित्रादीनांपरिगणन-मुपलक्षणं सूक्तस्यसर्वस्यदेवताप्रतिपादकत्वात्अतएवपूर्वंजनमितिसामान्यनिर्देशः ॥ १ ॥

अथद्वितीया—

विशोविशईड्यमध्वरेष्वदृप्तक्रतुमरतिंयुवत्योः ।
दिवःशिशुंसहसःसूनुमग्निंयज्ञस्यकेतुमरुषंयजध्यै ॥ २ ॥

विशःऽविशः । ईड्यम् । अध्वरेषु । अदृप्तऽक्रतुम् । अरतिम् ।
युवत्योः । दिवः । शिशुम् । सहसः । सूनुम् । अग्निम् । यज्ञस्य ।
केतुम् । अरुषम् । यजध्यै ॥ २ ॥

विशोविशःसर्वस्याःप्रजायाःअध्वरेषुयज्ञेषुईड्यं ऋत्विग्भ्यःस्तुत्यं अदृप्तक्रतुंदर्परहितकर्मा-णंअमूढप्रज्ञंवा युवत्योर्द्यावापृथिव्योररतिमभिगन्तारंअर्यंस्वामिनंदिवोद्युलोकस्यशिशुंपुत्रं दि-

वस्परिप्रथमंजज्ञेअग्निरितिनिगमः। अथवादिवःस्तोतुःपुत्रभूतं तथापिनिगमोभवति त्वंपुत्रोभव-सियस्तेविधदिति सहसोबलस्यसूनुंपुत्रंयज्ञस्ययागस्यकेतुंप्रज्ञापकं अरुषमारोचमानं एवंगुण-कमग्निंयजध्यैयष्टुंस्तुपइत्यनुषज्यते स्तुषेस्तुषे ॥ २ ॥

अथतृतीया—

अरुषस्यंदुहितराविरूपेस्तृभिरन्यापिपिशेसूरोअन्या ।
मिथस्तुराविचरन्तीपावकेमन्मंश्रुतंनक्षतऋच्यमाने ॥ ३ ॥

अरुषस्यं । दुहितरा । विरूपेइतिविऽरूपे । स्तृऽभिः । अन्या ।
पिपिशे । सूरः । अन्या । मिथःऽतुरा । विचरन्तीइतिविऽचरन्ती ।
पावके इति । मन्म । श्रुतम । नक्षतः । ऋच्यमाने इति ॥ ३ ॥

इयमहोरात्रयोःस्तुतिः अरुषस्यरोचमानस्यसूर्यस्यदुहितरौ सूर्येणहिअहोरात्रयोर्विभा-गःक्रियते अतस्तदधीनात्मलाभत्वात्तस्यदुहितराविस्युच्यते विरूपेशुक्लकृष्णतयानानारूपेतयो-रन्याएकारात्रिःस्तृभिर्नक्षत्रैः पिपिशेपिश्यते संश्लिष्यते पिशअवयवइतिधातुः अन्याअहरात्मि-कादुहिता सूरःसूर्येणपिपिशेसंश्लिष्यते तेचनक्षत्रैःसूर्येणचालंकृतेभवतइत्यर्थः मिथस्तुरापरस्प-रंबाधयंत्यौअहोरात्रेनिर्वर्त्येते रात्र्याचाहरितिपरस्परंबाधः अतएवविचरन्तीविविधंपृथक्चरं-त्यौपावकेसर्वस्यशोधयित्र्यौ एवंभूतेअहश्चरात्रिश्चऋच्यमाने अस्माभिःस्तूयमानेसत्यौ श्रुतं श्रोतव्यंमन्ममननीयं स्तोत्रमस्मत्कृतंनक्षतःव्याप्नुतां ॥ ३ ॥

अथचतुर्थी—

प्रवायुमच्छाबृहतीमंनीषाबृहद्रयिंविश्ववारंरथप्राम ।
द्युतद्यामानियुतःपत्यमानःकविःकविमियक्षसिप्रयज्यो ॥ ४ ॥

प्र । वायुम् । अच्छ । बृहती । मनीषा । बृहत्ऽरयिम् ।
विश्वऽवारम् । रथऽप्राम । द्युतत्ऽयामा । निऽयुतः । पत्यमानः ।
कविः । कविम् । इयक्षसि । प्रयज्योइतिप्रऽयज्यो ॥ ४ ॥

---

१ ऋ० सं० ७. ३. २८. । २ ऋ० सं० ७ ५ १८. ।

बृहतीमहतीमनीषास्मदीयास्तुतिः वायुमच्छाभिमुख्येनप्रगच्छतु उपसर्गश्रुतेर्योग्यक्रियाध्याहारः कीदृशंवायुं बृहद्रयिंमहाधनं विश्ववारं विश्वैर्वरणीयं संभजनीयंरथप्रां रथस्यात्मीयस्यप्रातारंपूरयितारं यद्वा स्तोतॄणांरथंधनैःपूरयितारं अथप्रत्यक्षस्तुतिः हेप्रयज्यो प्रकर्षेणयष्टव्य वायो द्युतद्यामा प्रदीप्तयानःनियुतःआत्मीयरथयोज्याःवडवाःताःपत्यमानःअभिपतन् अभिगच्छन् यद्वा पत्यतिरैश्वर्यकर्मा तासांवडवानामीश्वरःकविःक्रान्तदर्शी एवंभूतस्त्वंकविंमेधाविनं स्तोतारंइयक्षसि धनेनपूजय ॥ ४ ॥

अथपंचमी–

समेवपुश्छदयदश्विनोर्योरथोविरुक्मान्मनसायुजानः ।
येनंनरानासत्येषयध्यैवर्तिर्याथस्तनयायत्मनेच ॥ ५ ॥ ५ ॥

सः । मे । वपुः । छदयत् । अश्विनोः । यः । रथः । विरुक्मान् ।
मनसा । युजानः । येन । नरा । नासत्या । इषयध्यै ।
वर्तिः । याथः । तनयाय । त्मने । च ॥ ५ ॥

अश्विनोःस्वभूतःसरथः मेमदीयंवपुः शरीरंछदयच्छादयतु तेजसाआच्छादयतु योरथोविरुक्मान्विरोचनवान विशेषेणदीप्यमानः मनसामनोव्यापारमात्रेणयुजानःअश्वैःसंयुज्यमानोभवति हेनरानेतारौ हेनासत्यासत्यस्वभावौ सत्यनेतारौ नासिकाप्रभवौवा अश्विनौ येनरथेन वर्तिःस्तोतृगृहं तनयायपुत्रायत्मनेआत्मनेतत्पित्रेस्तोत्रेचइषयध्यै कामानप्रापयितुंयाथः गच्छथः सरथइतिपूर्वत्रान्वयः ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेपंचमोवर्गः ॥ ५ ॥

अथषष्ठी–

पर्जन्यवातावृषभापृथिव्याःपुरीषाणिजिन्वतमप्यानि ।
सत्यश्रुतःकवयोयस्यगीर्भिर्जगतःस्थातर्जगदाकृणुध्वम् ॥ ६ ॥

पर्जन्यवाता । वृषभा । पृथिव्याः । पुरीषाणि । जिन्वतम् ।
अप्यानि । सत्यऽश्रुतः । कवयः । यस्य । गीःऽभिः । जगतः ।
स्थातः । जगत् । आ । कृणुध्वम् ॥ ६ ॥

हेपर्जन्यवाता पर्जन्यवायू वृषभावृष्टेःकर्तारौपृथिव्याः अन्तरिक्षनामैतत् अन्तरिक्षात् आप्यानि आप्तव्यानिपुरीषाणिपूरकाण्युदकानि जिन्वतंप्रेरयतं उत्तरोर्धर्चोमारुतः हेसत्यश्रुतः सत्यस्यस्तोत्रस्यश्रोतारः कवयोमेधाविनोमरुतः यस्यस्तोतुःगीर्भिःस्तुतिभिःयूयंस्तुताभवथ तस्यस्तोतुःजगत्स्थावरजंगमात्मकंसर्वंप्राणिजातंआकृणुध्वं आभिमुख्येनकुरुत हेजगतःस्थातःगणाभिप्रायमेकवचनं स्थावरजंगमात्मकस्यजगतोवस्थापकहेमरुद्गणेतियोज्यं ॥ ६ ॥

अन्वारंभणीयायांसारस्वतस्यहविषोयाज्यापावीरवीत्येषा सूत्रितंच—पावीरवीकन्याचित्रायुःपीपिवांसंसरस्वतइति । एकादशिनेसारस्वतपशोरेषैवपुरोडाशस्ययाज्या सूत्रितंच—पावीरवीकन्याचित्रायुर्यस्तेस्तनःशशयोमयोभूरिति । आग्निमारुतशस्त्रेप्येषा सूत्रितंच—राकामहमितिद्वेपावीरवीकन्याचित्रायुरिति ।

सैषासूक्तेसप्तमी—

पावी॑रवी क॒न्या॑ चि॒त्रायु॒ः सर॑स्वती वी॒रप॑त्नी॒ धियं॑ धात् ।
ग्नाभि॒रच्छि॑द्रं शर॒णं स॒जोषा॑ दुरा॒धर्षं॑ गृण॒ते शर्म॑ यंसत् ॥ ७ ॥

पावी॑रवी । क॒न्या॑ । चि॒त्रऽआ॑युः । सर॑स्वती । वी॒रऽप॑त्नी । धिय॑म् । धा॒त् । ग्नाभिः॑ । अच्छि॑द्रम् । श॒रण॑म् । स॒ऽजोषाः॑ । दुः॒ऽआ॒धर्ष॑म् । गृ॒ण॒ते । शर्म॑ । यं॒स॒त् ॥ ७ ॥

पावीरवीशोधयित्री कन्याकमनीया चित्रायुश्चित्रगमनाचित्रान्नावा वीरपत्नीवीरः प्रजापतिः पतिर्यस्यास्तादृशी यद्वा वीराणांपालयित्री एवंभूतासरस्वतीधियं अस्मदीयंकर्मयज्ञाख्यं धात्दधातु धारयतु ददातु वाशब्देनप्रतिपादितोह्यर्थोनुष्ठीयते अपिच्चग्नाभिर्देवपत्नीभिः सजोषाः सहप्रीयमाणाः यद्वाग्नाःगायत्र्यादीनिच्छंदांसि छन्दांसिवैग्नाइतिश्रुतेः । तैःसहप्रीयमाणाःगृणते स्तुवते मह्यंअच्छिद्रंछिद्ररहितंदुराधर्षं शत्रुभिः शीतवातादिभिश्चधर्षितुमशक्यं शरणंगृहं शर्मसुखंचयंसत्प्रयच्छतु ॥ ७ ॥

एकादशिनेपौष्णेपशोपथस्पथइतिहविषोयाज्या सूत्रितंच—पथस्पथःपरिपतिंवचस्याबृहस्पतेयापरमापरावदितिद्वेइति ।

---

१ तै० सं० ५. १. ७. ।

अथाष्टमी—

यस्पंथःपरिपतिंवचस्याकामेनकृतोअभ्यानळर्कम् ।
सनोरासच्छुरुधश्चन्द्राग्राधियंधियंसीषधातिप्रपूषा ॥ ८ ॥

पथःऽपंथः । परिऽपतिम् । वचस्या । कामेन । कृतः । अभि ।
आनट् । अर्कम् । सः । नः । रासत् । शुरुधः । चन्द्रऽअग्राः ।
धियम्ऽधियम् । सीसधाति । प्र । पूषा ॥ ८ ॥

पथस्पथः सर्वस्यमार्गस्यपरिपतिमधिपतिंअर्कमर्चनीयं पूषणं कामेनकाम्यमानेनफलेन कृतोवशीकृतःस्तोता वचस्यास्तुत्याअभ्यानट् अभ्यश्नुतां प्राप्नोतु सचपूषा नोस्मभ्यंशुरुधः शुचोरोधयित्रीर्गाः चन्द्राग्राः चन्द्रमितिहिरण्यनाम हिरण्यप्रमुखाः यद्वास्वर्णशृंगाः रासद्दातु रादानेअस्माल्लेटिरूपं तथाधियंधियंसर्वमस्मदीयंकर्म सपूषाप्रसीषधातिप्रसाधयतु ॥ ८ ॥

चातुर्मास्येषु पशौ प्रथमभाजमितिहविषोयाज्या सूत्रितंच—प्रथमभाजंयशसंवयोधांसोमापूषणाजननारयीणामितिसूक्तमिति ।

सैषासूक्तेनवमी—

प्रथमभाजंयशसंवयोधांसुपाणिंदेवंसुगभस्तिमृभ्वम् ।
होतायक्षद्यजतंपस्त्यानामग्निस्त्वष्टारंसुहवंविभावा ॥ ९ ॥

प्रथमऽभाजम् । यशसम् । वयःऽधाम् । सुऽपाणिम् ।
देवम् । सुऽगभस्तिम् । ऋभ्वम् । होता । यक्षत् । यजतम् ।
पस्त्यानाम् । अग्निः । त्वष्टारम् । सुऽहवम् । विभाऽवा ॥ ९ ॥

प्रथमभाजं प्रथमंउत्पत्तिकालएवविभक्तारंजंतूनां यावच्छोविरेतसःसिक्तस्यत्वष्टारूपाणिविकरोतितावच्छोअतत्प्रजायतेइतिश्रुतेः । यशसंयशस्विनं वयोधांवयसोन्नस्यहविर्लक्षणस्यधातारं धारयितारं यद्वा स्तोतृभ्योन्नप्रदं सुपाणिंहस्तस्यमणिबंधादूर्ध्वप्रदेशः पाणिः शोभनपाणिकंदेवंदानादिगुणयुक्तंसुगभस्तिं गभस्तिरितिबाहुनाम शोभनदोर्दंडं ऋभ्वंउरुभास-

१ तै० सं० १. ५. ९. ।

मानं महान्तंवापस्त्यानां पस्त्यमितिगृहनाम तत्स्थानांयजतंयष्टव्यं गृहस्थैर्यजनीयमित्यर्थः सुहवंसुखेनह्वातुंशक्यं एवंभूतंत्वष्टारंहोतादेवानामाह्वाता विभावा दीप्यमानोग्निः यक्षद्यजतु अनेनहविषायजतु ॥ ९ ॥

अथदशमी–

भुवनस्यपितरंगीर्भिराभीरुद्रंदिवावर्धयारुद्रमक्तौ ।
बृहन्तमृष्वमजरंसुषुम्नमृधग्घुवेमकविनेषितासः ॥ १० ॥ ६ ॥

भुवनस्य । पितरम् । गीःऽभिः । आभिः । रुद्रम् । दिवा । वर्धय । रुद्रम् । अक्तौ । बृहन्तम् । ऋष्वम् । अजरम् । सुऽसुम्नम् । ऋधक् । हुवेम । कविना । इषितासः ॥ १० ॥ ॥ ६ ॥

भुवनस्यभूतजातस्यपितरंपालयितारंरुद्रं रुद्दुःखंतद्द्रावयितारमीश्वरं आभिर्गीर्भिःस्तुतिभिःदिवाअहनिहेस्तोतर्वर्धय अक्तौरात्र्यांचतमेवरुद्रंस्तुतिभिर्वर्धय वयंचकविनाप्राज्ञेनरुद्रेणइषितासःप्रेषिताःप्रेरिताःसन्तः बृहन्तंमहान्तंऋष्वंदर्शनीयमजरंजरारहितं सुषुम्नंशोभनसुखं एवंगुणविशिष्टंरुद्रंऋधक् ऋद्धंसमृद्धंयथाभवतितथाहुवेम स्तवाम ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेषष्ठोवर्गः ॥ ६ ॥

अथैकादशी–

आयुवानःकवयोयज्ञियासोमरुतोगन्तगृणतोवरस्याम् ।
अचित्रंचिद्धिजिन्वथावृधन्तइत्थानक्षन्तोनरोअङ्गिरस्वत् ॥ ११ ॥

आ । युवानः । कवयः । यज्ञियासः । मरुतः । गन्त । गृणतः । वरस्याम् । अचित्रम् । चित् । हि । जिन्वथ । वृधन्तः । इत्था । नक्षन्तः । नरः । अङ्गिरस्वत् ॥ ११ ॥

हेयुवानोनित्यतरुणाः कवयः प्राज्ञाः यज्ञियासोयज्ञार्हाः एवंभूताहेमरुतः गृणतःस्तुवतः वरस्यांवरणीयांस्तुतिंप्रतिआगन्त आगच्छत अपिच हेनरोनेतारोमरुतः इत्थाइत्थमनेनप्र-

कारेणवृधन्तोवर्धमानाः यद्वा इत्थाअमुत्रान्तरिक्षेनक्षन्तोव्याप्नुवन्तः अंगिरस्वत्अंगिरसोगमनशीलारश्मयः तेयथाशीघ्रंनभस्थलंव्याप्नुवन्ति तद्वत् यद्वाऋषयएवांगिरसः तद्वत्शीघ्रगामिनः एवंभूतायूयं अचित्रंचित्ओषधिवनस्पतिभिर्निबिडोदेशश्चित्रंतद्विलक्षणं ओषध्यादिभिर्वियुक्तमपिदेशंजिन्वथ वृष्ट्यातर्पयथ हीतिपूरणः ॥ ११ ॥

अथद्वादशी-

प्रवीरायप्रतवसेतुरायाजायूथेवपशुरक्षिरस्तम् ।
सपिस्पृशातितन्विश्रुतस्यस्तृभिर्ननाकंवचनस्यविपः ॥ १२ ॥

प्र । वीराय । प्र । तवसे । तुराय । अज । यूथाऽइव । पशुऽरक्षिः ।
अस्तम् । सः । पिस्पृशति । तन्वि । श्रुतस्य । स्तृऽभिः । न ।
नाकम् । वचनस्य । विपः ॥ १२ ॥

वीरायविक्रान्तायविविधंशत्रूणामीरकायवा मरुद्गणाय प्राज हेस्तोतः स्तुतिंप्रगमय तथा तवसेबलिनेतुरायक्षिप्रगमनायचतस्मैगणायप्राज तत्रदृष्टान्तः—पशुरक्षिःपशुपालकः यूथेव सयथागोयूथानिसायंकालेअस्तंगृहंशीघ्रंगमयति तद्वत् शीघ्रंस्तुतिंप्रेरयेत्यर्थः सचमरुद्गणः वचनस्यवक्तुःविपःविप्रस्यमेधाविनःस्तोतुःश्रुतस्य क्रियाग्रहणमपिकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी श्रुतंश्रोतव्यंस्तोत्रं तन्वि आत्मीयेशरीरेपिस्पृशातिस्पर्शयतु संश्लेषयतु तत्स्तोत्रं हृद्गतंभवत्वित्यर्थः स्पर्शनेदृष्टान्तः—स्तृभिर्ननाकं यथानक्षत्रैर्नाकमन्तरिक्षंस्पर्शयतिसंश्लेषयति तद्वत् ॥ १२ ॥

अथत्रयोदशी-

योरजांसिविममेपार्थिवानित्रिश्चिद्विष्णुर्मनवेबाधिताय ।
तस्यतेशर्मन्नुपदद्यमानेरायामदेमतन्वा३तनाच ॥ १३ ॥

यः । रजांसि । विऽममे । पार्थिवानि । त्रिः । चित् । विष्णुः ।
मनवे । बाधिताय । तस्य । ते । शर्मन् । उपऽदद्यमाने । राया ।
मदेम । तन्वा । तना । च ॥ १३ ॥

योविष्णुःबाधितायअसुरैर्हिंसिताय मनवेप्रजापतये तदर्थंपार्थिवानिपृथिव्यासंबद्धानि रजांसिलोकान्त्रीन्लोकानितियावत् त्रिश्चित्त्रिमिमे चिदित्यवधारणे त्रिभिरेवविक्रमणैः परिमितवान् हेविष्णो तस्यतादृशस्यतेतव तृतीयार्थेषष्ठी ईदृशेनत्वयाउपद्यमाने अस्मभ्यंदीयमाने शर्मन्शर्मणिगृहेसुखेवावर्तमानाःसन्तोवयं रायाधनेनतन्वारोगादिरहितेनशरीरेणच तनातन-येनपुत्रेणच मदेम मोदेम हृष्टाभवेम ॥ १३ ॥

अथचतुर्दशी–

तन्नोअहिर्बुध्न्योअद्भिरर्कैस्तत्पर्वतस्तत्सविताचनोधात्।
तदोषधीभिरभिरातिषाचोभगःपुरंधिर्जिन्वतुप्रराये ॥ १४ ॥

तत्। नः। अहिः। बुध्न्यः। अत्ऽभिः। अर्कैः। तत्। पर्वतः।
तत्। सविता। चनः। धात्। तत्। ओषधीभिः। अभि।
रातिऽसाचः। भगः। पुरम्ऽधिः। जिन्वतु। प्र। राये ॥ १४ ॥

बुध्न्यःबुध्नमंतरिक्षंतत्रभवःअहिः एत्यन्तरिक्षइत्यहिः उक्तंच–अहिरयनादेत्यंतरिक्षइति। एतत्पदद्वयाभिधेयोदेवःअर्कैःअर्चनसाधनैर्मंत्रैःस्तूयमानःसन्नोस्मभ्यंतत्लोकेप्रसिद्धंचनोन्नं अद्भिःउदकैःसार्धंधातद्धातु विदधातु प्रयच्छतु पर्वतःपूरयिता पर्वपूरणइतिधातुः यद्वा पर्ववतवज्रंपर्वतःतद्वान् पर्वतस्यगिरेःशत्रुरितिवापर्वतःसचतच्चनोदधातु तथासवितापेरकोस्वश्चतच्चनोदधातु अपिचरातिषाचःरातिर्दानंसचन्तेसेवन्तइतिरातिषाचोविश्वेदेवाः तेचओषधीभिः ओषःपाकःआसुधीयतइतिओषधयस्तिलमाषाद्याः ताभिःसार्धंतदन्नमभिप्रयच्छन्तु तथापुरन्धिर्बहुधीःबहुप्रज्ञोवाबहुकर्मावाभगोभजनीयएतत्संज्ञोदेवश्चरायेधनार्थं प्रजिन्वत अस्मान्प्रेरयत ॥ १४ ॥

अथपंचदशी–

नूनोरयिंरथ्यंचर्षणिप्रांपुरुवीरंमहऋतस्यगोपाम्।
क्षयंदाताजरंयेनजनान्स्पृधोअदेवीरभिचक्रमामविशआदेवीरभ्यश्नवाम ॥ १५ ॥ ७ ॥

१ नि० २. १७.

नु । नः । र॒यिम् । र॒थ्यम् । च॒र्ष॒णि॒ऽप्राम् । पु॒रु॒ऽवीर॑म् । म॒हः । ऋ॒तस्य॑ । गो॒पाम् । क्षय॑म् । दा॒त॒ । अ॒जर॑म् । येन॑ । जना॑न् । स्पृध॑ः । अदे॑वीः । अ॒भि । च॒ । क्रमा॑म । विश॑ः । आऽदे॑वीः । अ॒भि । अ॒श्नवा॑म ॥ १५॥७॥

हेसर्वेदेवाः नोस्मभ्यंनुक्षिप्रंरयिंधनंक्षयंगृहंच दात प्रयच्छत कीदृशंरयिं रथ्यंरथसंबन्धिनं-रथयुक्तमित्यर्थः चर्षणिप्रां चर्षणयोमनुष्यास्तेषांपूरयितारं पुरुवीरं वीर्याज्जायन्तइतिवीराःपुत्रा-दयः बहुभिःवीरैरुपेतं महोमहतःऋतस्ययज्ञस्यगोपांरक्षकंदक्षिणारूपेणधनेनहियज्ञोरक्ष्यते मृ-तोयज्ञस्त्वदक्षिणइतिवचनात् कीदृशंक्षयं अजरंजरारहितं येनरयिणाक्षयेणचजनानशत्रून्स्पृधः स्पर्धमानाः अदेवीःअदेवसंबन्धिनीरासुरीःसेनाश्च अभिक्रमाम अभिभवेम तथाआदेवीःआ-गतादेवायासुहविःस्वीकारार्थं ताआदेव्यः तादृशीश्चविशःप्रजाःयज्ञानुष्ठायिनीःयेनधनेनगृहेण चअभ्यश्नवाम अभिप्राप्नवाम तादृशंधनंगृहंचदातेत्यन्वयः ॥ १५ ॥

॥ इतिचतुर्थस्याष्टमेसप्तमोवर्गः ॥ ७ ॥

॥ इतिषष्ठेमंडलेचतुर्थोनुवाकः ॥ ४ ॥

पंचमेनुवाकेद्वादशसूक्तानि तत्रहुवेवइतिपंचदशर्चंप्रथमंसूक्तं ऋजिश्वनआर्षं बहुदेवताकं त्रैष्टुभं हुवेवइत्यनुक्रान्तं गतःसूक्तविनियोगः ।

तत्रप्रथमा—

हु॒वे वो॑ दे॒वीमदि॑तिं॒ नमो॑भिर्मृळी॒काय॒ वरु॑णं मि॒त्रम॒ग्निम् ।
अ॒भि॒क्ष॒दाम॑र्य॒मणं॑ सु॒शेवं॑ त्रा॒तॄन्दे॒वान्त्स॑वि॒तारं॒ भगं॑ च ॥ १ ॥

हु॒वे । व॒ः । दे॒वीम् । अदि॑तिम् । नम॑ःऽभिः । मृ॒ळी॒काय॑ । वरु॑णम् । मि॒त्रम् । अ॒ग्निम् । अ॒भि॒ऽक्ष॒दाम् । अ॒र्य॒मण॑म् । सु॒ऽशेव॑म् । त्रा॒तॄन् । दे॒वान् । स॒वि॒तार॑म् । भग॑म् । च॒ ॥ १ ॥

हेदेवाः वोयुष्माकंमातरंदेवींद्योतमानां अदितिंअखंडनीयां अदीनांवा एतत्संज्ञांदेवतांमृ-ळीकायसुखार्थंनमोभिःनमस्कारैःस्तोत्रैर्वाहुवे ह्वयामि स्तौमि तथावरुणंवारकं मित्रंप्रमीतेस्त्रा-यकं देवं अग्निंचएतांश्चदेवाननमोभिर्हुवेतथाअभिक्षदां क्षदिर्हिंसाकर्मा अभिक्षत्तारं शत्रूणां हिंसितारं सुशेवं सुसुखंअर्यमणंचनमोभिर्हुवे सवितारंभगंचनमोभिर्हुवे किंबहुना त्रातॄन्पाल-यितॄन्सर्वान्देवाननमोभिःस्तोत्रैर्हुवेस्तौमि ॥ १ ॥

अथद्वितीया—

सुज्योतिषःसूर्यदक्षपितृननागास्त्वेसुमहोवीहिदेवान् ।
द्विजन्मानोयऋतसापःसत्याःस्वर्वन्तोयजताअग्निजिह्वाः ॥ २ ॥

सुऽज्योतिषः । सूर्य । दक्षऽपितॄन् । अनागाःऽत्वे । सुऽमहः । वीहि ।
देवान् । द्विऽजन्मानः । ये । ऋतऽसापः । सत्याः । स्वःऽवन्तः ।
यजताः । अग्निऽजिह्वाः ॥ २ ॥

हेसुमहः शोभनदीप्त सूर्य सर्वस्यप्रेरक दक्षपितॄन्दक्षःपितामहोयेषांतेदक्षपितरः पितृशब्दो-हिसामान्येनपूर्वपुरुषत्वमात्रंब्रूते यथाआहंपितॄन्त्सुविदत्राँअविन्सीति । एषांदक्षपितृत्वंचअदिति-र्ह्यजनिष्टेतिमंत्रादेवगम्यते । ईदृशानज्योतिषःशोभनज्योतिष्कान् देवान् अनागास्त्वेअनपराधत्वे वीहिकामयस्व यथास्माकंअपराधंतेनकुर्वन्तितथाकुर्वित्यर्थः येदेवाःद्विजन्मानःद्वयोर्लोकयो-र्जायमानाः प्रादुर्भवन्तः ऋतसापः ऋतंयज्ञंस्पृशन्तः सत्याःअवितथाःसत्यवादिनोवा स्वर्वन्तोध-नवन्तः यजतायष्टव्याः अग्निजिह्वाःअग्निर्जिह्वाऽऽस्यंयेषांते । एवंभूतायेदेवाःसन्ति तान्देवा-न्वीहीत्यन्वयः ॥ २ ॥

अथतृतीया—

उतद्यावापृथिवीक्षत्रमुरुबृहद्रोदसीशरणंसुषुम्ने ।
महस्करथोवरिवोयथानोस्मेक्षयायधिषणेअनेहः ॥ ३ ॥

उत । द्यावापृथिवी इति । क्षत्रम् । उरु । बृहत् । रोदसी इति ।
शरणम् । सुसुम्ने इतिसुऽसुम्ने । महः । करथः । वरिवः । यथा ।
नः । अस्मे इति । क्षयाय । धिषणे इति । अनेहः ॥ ३ ॥

उतापिच हेद्यावापृथिवी द्यावापृथिव्यौ उरुविस्तीर्णंक्षत्रंबलंकरथः कुरुतं तथारोदसी द्यावापृथिव्यौ सुषुम्ने सुसुखे युवांबृहन्महच्छरणंगृहंचकरथः कुरुतं महोमहत् वरिवोधनंनो-स्माकंयथास्यात्तथाकुरुतमित्यर्थः अपिच हेधिषणे धारयित्र्यौ द्यावापृथिव्यौ अनेहःपापरा-हित्यंचअस्मेअस्माकंक्षयायनिवासार्थंकुरुतं ॥ ३ ॥

---

१ ऋ० सं० ७. ६. १७. । २ ऋ० सं० ८. ३. १. ।

अथचतुर्थी—

आनोरुद्रस्यसूनवोनमन्तामद्याहूतासोवसवोधृष्टाः ।
यदीमर्भेमहतिवाहितासोबाधेमरुतोअह्वामदेवान् ॥ ४ ॥

आ । नः । रुद्रस्य । सूनवः । नमन्ताम् । अद्य । हूतासः ।
वसवः । अधृष्टाः । यत् । ईम् । अर्भे । महति । वा । हितासः ।
बाधे । मरुतः । अह्वाम । देवान् ॥ ४ ॥

रुद्रस्यसूनवः पुत्रामरुतः अद्यास्मिन्कालेआहूतासःआहूताःसन्तः नोस्मानप्रतिआनमन्तां आनताभवन्तु आगच्छन्तु कीदृशाः वसवोवासयितारः अधृष्टाः अन्यैरहिंसिताः यद्यदाईमेनान्मरुतोदेवान अर्भेअल्पेमहतिप्रभूतेवाबाधेसंग्रामे हितासोनिहिताःस्थिताःसन्तोवयं अह्वाम आह्वयाम तदानीमद्येत्यन्वयः ॥ ४ ॥

अथपंचमी—

मिम्यक्षयेषुरोदसीनुदेवीसिषक्तिपूषाअभ्यर्धयज्वा ।
श्रुत्वाहवंमरुतोयद्धयाथभूमारेजन्तेअध्वनिप्रविक्ते ॥ ५ ॥ ८ ॥

मिम्यक्ष । येषु । रोदसी । नु । देवी । सिसक्ति । पूषा ।
अभ्यर्धऽयज्वा । श्रुत्वा । हवम् । मरुतः । यत् । ह । याथ ।
भूम । रेजन्ते । अध्वनि । प्रऽविक्ते ॥ ५ ॥ ८ ॥

येषुमरुत्सुरोदसीरुद्रस्यपत्नीदेवीद्योतमानामाध्यमिकावाक् मिम्यक्ष नुक्षिप्रंसंगच्छते तथा-अभ्यर्धयज्वा स्तोतॄनअभ्यर्धयन् समृद्धान्कुर्वन्योयजति धनेनपूजयति तादृशःपूषापोषकोदेवश्च सिषक्ति यान्मरुतःसेवते अभ्यर्धयज्वाभ्यर्धयन्यजतीतियास्कः । हेमरुतस्तेयूयंहवमस्मदीयमाह्वानंश्रुत्वा यद्ध यदाखलु याथागच्छथ तदानींअध्वनिमार्गेप्रविक्तेगमनार्थंपृथक्कृतेसति तत्रविद्यमानानिभूमभूतजातानिरेजन्ते कंपन्ते तथाचमंत्रान्तरं—प्रवेपयन्तिपर्वतान्विविंचंतिवनस्पतीन् ॥५॥

॥ इतिचतुर्थस्याष्टमेष्टमोवर्गः ॥ ८ ॥

---

१ नि० ६. ६. । २ ऋ० सं० १. ३. १८. ।

अथषष्ठी—

अभित्यंवीरंगिर्वणसमर्चेन्द्रंब्रह्मणाजरितर्नवेन।
श्रवदिद्धवमुपचस्तवानोरासद्वाजाँउपमहोगृणानः ॥ ६ ॥

अभि। त्यम्। वीरम्। गिर्वणसम्। अर्च। इन्द्रम्। ब्रह्मणा।
जरितः। नवेन। श्रवत्। इत्। हवम्। उप। च। स्तवानः।
रासत्। वाजान्। उप। महः। गृणानः ॥ ६ ॥

हेजरितःस्तोतः त्यंतंप्रसिद्धंवीरंवीर्यवन्तंविशेषणशत्रूणामीरकंवा गिर्वणसंगिरांसंभक्तारं एवंविधमिन्द्रंनवेनाभिनवेनशोभनेनब्रह्मणास्तोत्रेण अभ्यर्चअभिष्टुहि सचस्तवानःस्तूयमानः सन् हवमस्मदीयंस्तोत्रंउपश्रवदित् उपशृणुयादेव अपिच गृणानःस्तूयमानइन्द्रः महोमहतः प्रभूतान्वाजान्अन्नानिचउपरासत् प्रदेयात् यतएवंअतःस्तुहीत्यर्थः ॥ ६ ॥

अथसप्तमी—

ओमानमापोमानुषीरमृक्तंधाततोकायतनयायशंयोः।
यूयंहिष्ठाभिषजोमातृतमाविश्वस्यस्थातुर्जगतोजनित्रीः ॥ ७ ॥

ओमानम्। आपः। मानुषीः। अमृक्तम। धात। तोकाय।
तनयाय। शम्। योः। यूयम। हि। स्थ। भिषजः। मातृऽतमाः।
विश्वस्य। स्थातुः। जगतः। जनित्रीः ॥ ७ ॥

हेआपः मानुषीर्मनुष्यहितायूयंअमृक्तमहिंसितं ओमानंअवनिरक्षतीत्योमारक्षकमन्नंतोकायपुत्रायतनयायतत्पुत्रायचधात धत्त प्रयच्छत तथाशंशमनमुपद्रवाणांयोर्यावनंपृथक्करणंच पृथक्कर्तव्यानांधत्त प्रयच्छत कुतइत्यत्नआह—हियस्माद्यूयंमातृतमाः मातृभ्योप्यधिकाभिषजः स्थभवथ तस्माद्धातेत्यन्वयः कथं मातृभ्योप्यधिकंभिषज्यमस्तीत्यत्नआह—विश्वस्यसर्वस्य स्थातुः स्थावरस्यजगतोजंगमस्यजनित्रीर्जनयित्र्योभवथ अतोयूयंभिषजःस्थ ॥ ७ ॥

अथाष्टमी—

आनोदेवःसवितात्रायमाणोहिरण्यपाणिर्यजतोजगम्यात्।
योदत्रवाँउपमोनयमानीकंयृणुतेदाशुषेवार्याणि ॥ ८ ॥

आ । नः । देवः । सविता । त्रायमाणः । हिरण्यऽपाणिः ।
यजतः । जगम्यात् । यः । दत्रऽवान् । उषसः । न । प्रतीकम् ।
विऽऊर्णुते । दाशुषे । वार्याणि ॥ ८ ॥

त्रायमाणोरक्षन् हिरण्यपाणिःसुवर्णहस्तःहितरमणीयपाणिर्वा यजतोयष्टव्यः एवंभूतः सवितापेरकोदेवः नःअस्मानआजगम्यादागच्छतु योदेवः दत्रवान्धनवान् उषसोनप्रतीकं उषसःप्रमुखमिव दाशुषेहवींषिदत्तवतेयजमानाय वार्याणि वरणीयानिधनानिव्यूर्णुते विवृणोति प्रकाशयति ससवितेत्यन्वयः ॥ ८ ॥

अथनवमी—

उतत्वंसूनोसहसोनोअद्यादेवाँअस्मिन्नध्वरेववृत्याः ।
स्यामहन्तेसदमिद्रातौतवस्यामग्नेअवसासुवीरः ॥ ९ ॥

उत । त्वम् । सूनो इति । सहसः । नः । अद्य । आ । देवान् ।
अस्मिन् । अध्वरे । ववृत्याः । स्याम । अहम् । ते । सदम् ।
इत् । रातौ । तव । स्याम् । अग्ने । अवसा । सुऽवीरः ॥ ९ ॥

उत अपिच हेसहसःसूनो बलस्यपुत्राग्ने त्वंअद्यास्मिन्कालेनो स्मदीयेअस्मिन्नध्वरेयागे देवान्यष्टव्यानिन्द्रादीनआववृत्याः आवर्तयआगमय अपिचाहं तेतवरातौधनस्यदाने सदमित् सर्वदेवबर्तमानःस्यांभवेयं तथाहेअग्ने तवावसात्वदीयेनरक्षणेनसुवीरःशोभनैर्वीरैःपुत्रपौत्रादिभिरुपेतश्चस्यांभवेयं ॥ ९ ॥

अथदशमी—

उतत्यामेहवमाजग्म्यातंनासत्याधीभिर्युवमङ्गविप्रा ।
अत्रिंनमहस्तमसोमुमुक्तंतूर्वतंनरादुरितादभीके ॥ १० ॥ ९ ॥

उत । त्या । मे । हवम् । आ । जग्म्यातम् । नासत्या । धीभिः ।
युवम् । अङ्ग । विप्रा । अत्रिम् । न । महः । तमसः । अमुमुक्तम् ।
तूर्वतम् । नरा । दुःऽइतात् । अभीके ॥ १० ॥ ९ ॥

उतअपिच हेविप्रा प्राज्ञौ नासत्या सत्यस्वभावौ सत्यस्यनेतारौवा हे अश्विनौ त्यातौमसि-द्यौयुवंयुवांधीभिःपरिचरणकैःकर्मभिरुपेतं मेमदीयंहवंस्तोत्रंअंग क्षिप्रं आजग्म्यातं आगच्छतं आगत्यच महोमहतस्तमसःअसुरकृतादंधकारात् अत्रिंन यथात्रिमृषिंअमुमुक्तं मोचितवन्तौस्थः हेनरानेतारावश्विनौ तथास्मानपिअभीकेअभ्यक्ते प्राप्तेसंग्रामेदुरिताद्दुःखाद्वशत्रुकृतात्तूर्वतंअ-स्मांस्तारयतं ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेनवमोवर्गः ॥ ९ ॥

अथैकादशी–

तेनोरायोद्युमतोवाजवतोदातारोभूतनृवतःपुरुक्षोः ।
दशस्यन्तोदिव्याःपार्थिवासोगोजाताअप्यामृळताचदेवाः ॥ ११ ॥

ते । नः । रायः । द्युऽमतः । वाजऽवतः । दातारः । भूत ।
नृऽवतः । पुरुऽक्षोः । दशस्यन्तः । दिव्याः । पार्थिवासः ।
गोऽजाताः । अप्याः । मृळत । च । देवाः ॥ ११ ॥

हेदेवास्तेयूयंद्युमतोदीप्तिमतः वाजवतोबलयुक्तस्यनृवतःनृभिःपुत्रादिभिरुपेतस्य पुरुक्षोःब-हुभिःकीर्तनीयस्य रायोधनस्यनोस्मभ्यंदातारोभूतभवत अपिच दशस्यन्तः कामान्प्रयच्छन्तः दिव्याःदिविभवाआदित्याः पार्थिवासः पृथिव्यांभवावसवः गोजाताःगोःपृश्निर्माध्यमिकावाक्ततः उत्पन्नामरुतः अप्याःअप्सुअन्तरिक्षेभवाःरुद्राश्च तेसर्वेयूयंअस्मान्मृळत सुखयत ॥ ११ ॥

अथद्वादशी–

तेनोरुद्रःसरस्वतीसजोषामीळ्हुष्मन्तोविष्णुर्मृळन्तुवायुः ।
ऋभुक्षावाजोदैव्योविधातापर्जन्यावातापिप्यतामिषंनः ॥ १२ ॥

ते । नः । रुद्रः । सरस्वती । सऽजोषाः । मीळ्हुष्मन्तः । विष्णुः ।
मृळन्तु । वायुः । ऋभुक्षाः । वाजः । दैव्यः । विऽधाता ।
पर्जन्यावाता । पिप्यताम् । इषम् । नः ॥ १२ ॥

मीळ्हुष्मन्तोवर्षणवन्तःतेदेवाः नोस्मानमृळन्तुमृळयन्तुसुखयन्तु केतेइतिचेदुच्यते—रुद्रःसरस्वतीचसजोषाः सहप्रीयमाणाः विष्णुर्वायुश्चऋभुक्षाः ऋभुर्विभ्वावाजइतित्रयःसौधन्वनाः तेषामाद्यः ऋभुश्चवाजोन्तिमश्चउपलक्षणमेतत् विभ्वाचदेवेभ्योदेवेभ्योहितः विधाताप्रजापतिश्च अपिचपर्जन्यावातापर्जन्यश्चवायुश्चउभौ नोस्मभ्यमिषमन्नंपिप्यतांवर्धयतां ॥ १२ ॥

अथत्रयोदशी—

उतस्यदेवःसविताभगोनोपांनपादवतुदानुपप्रिः ।
त्वष्टादेवेभिर्जनिभिःसजोषाद्यौर्देवेभिःपृथिवीसमुद्रैः ॥ १३ ॥

उत । स्यः । देवः । सविता । भगः । नः । अपाम् । नपात् ।
अवतु । दानु । पप्रिः । त्वष्टा । देवेभिः । जनिऽभिः । सऽजोषाः ।
द्यौः । देवेभिः । पृथिवी । समुद्रैः ॥ १३ ॥

उतापिच स्यः सः यःप्रेरकतयासर्वत्रप्रख्यातः ससवितादेवःभगश्चअपांनपाच्चअपामेवस्थानांपुत्रोमाध्यमिकोग्निः सचनोस्मानवतु कीदृशोपांनपात् दानु दातव्यंधनंपप्रिःप्रातापूरयिता प्रापूरणइत्यस्मादादृगमहनइतिकिनोलिड्वच्चावान्नलोकाव्ययेतिषष्ठीप्रतिषेधः तथादेवेभिर्देवैः जनिभिस्तत्पत्नीभिश्चसजोषाः सहप्रीतिस्त्वष्टाचदेवेभिर्देवैःसहप्रीयमाणा द्यौश्चसमुद्रैःसहप्रीयमाणा पृथिवीचएताश्चसर्वादेवताअस्मानवन्तु ॥ १३ ॥

आग्निमारुतेउतनोहिरित्येषा सूत्रितंच—उतनोहिर्बुध्न्यःशृणोतुदेवानांपत्नीरुशतीरवन्तुनइति ।

सैषासूक्तेचतुर्दशी—

उतनोहिर्बुध्न्यःशृणोत्वजएकपात्पृथिवीसमुद्रः ।
विश्वेदेवाऋतावृधोहुवानाःस्तुतामन्त्राःकविशस्ताअवन्तु ॥ १४ ॥

उत । नः । अहिः । बुध्न्यः । शृणोतु । अजः । एकऽपात् ।
पृथिवी । समुद्रः । विश्वे । देवाः । ऋतऽवृधः । हुवानाः । स्तुताः ।
मन्त्राः । कविऽशस्ताः । अवन्तु ॥ १४ ॥

उतअपिचअहिर्बुध्न्योनोस्माकंस्तोत्रंशृणोतु अजोजन्मरहितःएकःअसहायएवपद्यतेगच्छतीत्येकपात्एतत्पदद्वयाभिधेयोदेवश्चपृथिवीसमुद्रश्चअस्मदीयंस्तोत्रंशृणोतु अपिच ऋतावृधःऋतस्ययज्ञस्यसत्यस्यवावर्धयितारः हुवानाः अस्माभिराहूयमानाः पूर्वैःऋषिभिश्चस्तोत्रैःस्तुताः मंत्राःमंत्रणीयाःगुप्तंभाषितव्याः मंत्रप्रतिपाद्यावा कविशस्ताः कविभिर्मेधाविभिर्ऋषिभिःशस्त्रैःशंसिताईदृशाःविश्वेदेवाः अवन्त्वस्मानरक्षन्तु ॥ १४ ॥

अथपंचदशी—

एवानपांतोममतस्यंधीभिर्भरद्वांजाअभ्यंर्चन्त्यर्कैः ।
ग्नाहुतासोवसवोधृष्टाविश्वेंस्तुतासोंभूतायजत्राः ॥ १५ ॥ १० ॥

एव । नपांतः । ममं । तस्यं । धीभिः । भरत्ऽवांजाः । अभि । अर्चन्ति । अर्कैः । ग्नाः । हुतासः । वसंवः । अधृष्टाः । विश्वें । स्तुतासंः । भूत । यजत्राः ॥ १५ ॥ १० ॥

एवएवं योहंदेवान्स्तुतवान् तस्यममऋजिश्वनोनपातःपुत्राःभरद्वाजाः भरद्वाजगोत्रजाः सुहोत्रादयःधीभिःस्तोत्रैरर्कैरर्चनसाधनैरभ्यर्चन्ति अभिष्टुवन्ति हेयजत्राः यष्टव्यादेवाहुतासःपुरोडाशादिभिर्हविर्भिर्हुताःतर्पिताः वसवोनिवासयितारःअधृष्टाःकैरप्यहिंसिताः एवंभूताःविश्वेतेसर्वेग्नाः देवपत्न्यश्च स्तुतासोभूत तैःसुहोत्रादिभिःस्तुताभवत ॥ १५ ॥

॥ इतिचतुर्थस्याष्टमेदशमोवर्गः ॥ १० ॥

उदुत्यदितिषोडशर्चंद्वितीयंसूक्तंऋजिश्वनआर्षंवैश्वदेवं त्रयोदश्याद्यास्तिस्रउष्णिहःषोळश्यनुष्टुप् शिष्टास्त्रिष्टुभः तथाचानुक्रान्तं—उदुत्यत्षोळशत्र्युष्णिगनुष्टुबन्तमिति । गतःसूक्तविनियोगः

तत्रप्रथमा-

उदुत्यच्चक्षुर्महिमित्रयोराँएतिप्रियंवरुणयोरदंब्धम् ।
ऋतस्यशुचिदर्शतमनीकंरुक्मोनदिवउदिताव्यंद्यौत् ॥ १ ॥

उत् । ऊँ इति । त्यत् । चक्षुः । महि । मित्रयोः । आ । एति । प्रियम् । वरुणयोः । अदंब्धम् । ऋतस्यं । शुचि । दर्शतम् । अनीकम् । रुक्मः । न । दिवः । उत्ऽइंता । वि । अद्यौत् ॥ १ ॥

त्यत् ततप्रसिद्धंचक्षुः प्रकाशकंमहिमहद्विस्तृतंमित्रयोर्वरुणयोःप्रियं मित्रशब्दोवरुणशब्द-श्चेतरेतरयोगान्मित्रावरुणावुभावप्याचष्टेमित्रावरुणयोरतिप्रियंअदब्धंरक्षोभिरहिंसितं शुचिशुद्धं निर्मलं दर्शतंदर्शनीयं एवंभूतंऋतस्यादित्यस्यअनीकंतेजः आसर्वेषामभिमुखं उदेति उद्गच्छति उदिताउदितौसूर्यस्योदयेसतिउदितंतत्तेजःदिवोन्तरिक्षस्यरुक्मोन भूषणमिवव्यद्यौत् विद्यो-ततेप्रकाशते ॥ १ ॥

अथद्वितीया—

वेदयस्त्रीणिविदथान्येषांदेवानांजन्मसनुतराचविप्रः ।
ऋजुमर्तेषुवृजिनाचपश्यन्नभिचष्टेसूरोअर्यएवान् ॥ २ ॥

वेद । यः । त्रीणि । विदथानि । एषाम् । देवानाम् । जन्म । सनुतः ।
आ । च । विप्रः । ऋजु । मर्तेषु । वृजिना । च । पश्यन् ।
अभि । चष्टे । सूरः । अर्यः । एवान् ॥ २ ॥

यःसूर्यः त्रीणित्रिसंख्यानि विदथानिवेदितव्यानिस्थानानि त्रीन्लोकानवेदवेत्तिजाना-ति एषांएतत्लोकत्रयवर्तिनांदेवानांवसुरुद्रादित्यात्मकानां सनुतरंतर्हितनामैतत् अन्तर्हितं अप्रज्ञायमानं जन्मजननंचयोविप्रोमेधावीसूर्योवेत्ति आकारःपूरकः ससूरःसूर्यः मर्तेषुमनु-ष्येषुविद्यमानानिऋजुऋजूनिशोभनानिकर्माणिवृजिनावृजिनानिअशोभनानिकर्माणिच पश्य-न्साक्षितयाजानन्अभिचष्टे अभितःसर्वंजगत्प्रकाशयति तथाअर्यःस्वामीभूत्वाएवान् प्राप्तव्या-न् कामांश्चमनुष्येषुप्रकाशयति ॥ २ ॥

अथतृतीया—

स्तुषउवोमहऋतस्यगोपानदितिंमित्रंवरुणंसुजातान् ।
अर्यमणंभगमदब्धधीतीनच्छावोचेसधन्यःपावकान् ॥ ३ ॥

स्तुषे । ऊँ इति । वः । महः । ऋतस्य । गोपान् । अदितिम् । मित्रम् ।
वरुणम् । सुऽजातान् । अर्यमणम् । भगम् । अदब्धऽधीतीन् ।
अच्छ । वोचे । सऽधन्यः । पावकान् ॥ ३ ॥

हेदेवाः महोमहतऋतस्ययज्ञस्यगोपानरक्षकान्वोयुष्मानस्तुषेस्तुवे उइतिपूरणः तानेवदेवानाह—अदितिमदीनांदेवमातरंमित्रंवरुणंचएतान् सुजातान् शोभनजननान अर्यमणंभगंचअदब्धधीतीन् अहिंसितकर्मणः सधन्यः धनसहितान्पावकान् विश्वस्यशोधकान् ईदृशान्सर्वान्देवानअच्छवोचे अभिप्रब्रवीमीत्यर्थः ॥ ३ ॥

अथचतुर्थी—

रिशादसः सत्पतीँरदब्धान्महोराज्ञः सुवसनस्य दातॄन् ।
यूनः सुक्षत्रान्क्षयतोदिवोनॄनादित्यान्याम्यदितिंदुवोयु ॥ ४ ॥

रिशादसः । सत्ऽपतीन् । अदब्धान् । महः । राज्ञः । सुऽवसनस्य ।
दातॄन् । यूनः । सुऽक्षत्रान् । क्षयतः । दिवः । नॄन् । आदित्यान् ।
यामि । अदितिम् । दुवःऽयु ॥ ४ ॥

रिशादसः रिशतांहिंसकानांअसितॄन् क्षेप्तॄन् यद्वा रिशानांहिंसकानांअत्तॄनभक्षयितॄन् सत्पतीन् सतांपालयितॄन् अदब्धानहिंसितान महोमहतः राज्ञोराजमानानईश्वरान्वासुवसनस्य शोभननिवासस्यदातॄन् यूनोनित्यतरुणान सुक्षत्रान शोभनधनानशोभनबलानवा क्षयतःसर्वत्र निवसतः यद्वा क्षयतिरैश्वर्यकर्मा ईशानानदिवोद्युलोकस्यनॄननेतॄन आदित्यान् अदितेः पुत्रान् ईदृशानसर्वानदेवानदुवोयु लुप्तविभक्तिकमेतत् दुवोयुंदुवोस्मदीयंपरिचरणंकामयमानांअदितिंदेवमातरंच यामि प्राप्नोमि यद्वा यामियाचामि ॥ ४ ॥

अथपंचमी—

द्यौ३ष्पितःपृथिविमातरध्रुगग्नेभ्रातर्वसवोमृळतानः ।
विश्वआदित्याअदितेसजोषाअस्मभ्यंशर्मबहुलंवियन्त ॥५॥११॥

द्यौः । पितः । पृथिवि । मातः । अध्रुक् । अग्ने । भ्रातः ।
वसवः । मृळत । नः । विश्वे । आदित्याः । अदिते । सऽजोषाः ।
अस्मभ्यम् । शर्म । बहुलम् । वि । यन्त ॥ ५ ॥ ११ ॥

हेपितः पितृस्थानीयद्यौःद्युलोकहेमातः मातृस्थानीयेअध्रुगद्रोग्ध्रि पृथिवि हेभ्रातःभ्रातृस्थानीयाग्ने हेवसवोवासयितारोदेवाः तेसर्वेयूयंनोस्मान्मृळतसुखयत हेविश्वआदित्याःसर्वे-

अदितिपुत्रादेवाः हेअदित यूयंसजोषाः संगताभूत्वाअस्मभ्यंबहुलंअधिकंशर्मसुखं विस्तृतंवा-गृहंवियन्तिप्रयच्छत ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेएकादशोवर्गः ॥ ११ ॥

अथषष्ठी–

मानोवृकायवृक्येसमस्माअघायतेरीरधतायजत्राः ।
यूयंहिष्ठारथ्योनस्तनूनांयूयंदक्षस्यवचसोबभूव ॥ ६ ॥

मा । नः । वृकाय । वृक्ये । समस्मै । अघऽयते । रीरधत ।
यजत्राः । यूयम् । हि । स्थ । रथ्यः । नः । तनूनाम् । यूयम् ।
दक्षस्य । वचसः । बभूव ॥ ६ ॥

हेयजत्रायष्टव्यादेवाः नोस्मानवृकायहिंसकायस्तेनायवृक्येतस्यस्त्रियैचमारीरधत मावशं-नैष्ट मावशीकुरुत यद्वा वृकःअरण्यश्वा तस्यस्त्रीवृकी अपिचसमस्मैसर्वस्मैअघायतेअघमनर्थ-मस्माकमिच्छते शत्रुजनायअस्मान्मावशंनयत यूयंहियूयंखलु नोस्माकंतनूनांशरीराणांरथ्यो-नेतारःस्थ भवथ यूयमेवदक्षस्यास्मदीयस्यबलस्यवचसोवाक्यस्यचनेतारोबभूव अतःकारणा-त्अस्मान्मारीरधतेत्यन्वयः ॥ ६ ॥

अथसप्तमी–

मावएनोअन्यकृतंभुजेममातत्कर्मवसवोयच्चयध्वे ।
विश्वस्यहिक्षयथविश्वदेवाःस्वयंरिपुस्तन्वंरीरिषीष्ट ॥ ७ ॥

मा । वः । एनः । अन्यऽकृतम् । भुजेम । मा । तत् । कर्म ।
वसवः । यत् । चयध्वे । विश्वस्य । हि । क्षयथ । विश्वऽदेवाः ।
स्वयम् । रिपुः । तन्वम् । रिरिषीष्ट ॥ ७ ॥

हेदेवाः वोयुष्माकंस्वभूतावयंअन्यकृतंअन्यैःशत्रुभिःकृतमुत्पादितं एनःपापं माभुजेम मा-भुंक्ष्महि हेवसवोवासयितारोदेवाः यत्येनकृतेनपापेन चयध्वेअस्मान्बाधध्वे चयतिर्हिंसाक-र्मा तच्चपापंमाकर्म माकार्ष्म करोतेर्माङिलुङिमंत्रेघसेतिच्लेर्लुक् हेविश्वेदेवाः सर्वेदेवाः विश्व-

स्यसर्वस्यजगतोयूयंहिक्षयथ ईश्वराभवथ अतःकारणान्अस्मदीयोरिपुःशत्रुः तन्वंस्वशरीरं स्वयमेवरिरिषीष्ट हिंस्यात् यथैवंभवतितथाकुरुतेतिभावः ॥ ७ ॥

अथाष्टमी—

नमइदुग्रंनमआविवासेनमोदाधारपृथिवीमुतद्याम् ।
नमोदेवेभ्योनमईशएषांकृतंचिदेनोनमसाविवासे ॥ ८ ॥

नमः । इत् । उग्रम् । नमः । आ । विवासे । नमः । दाधार । पृथिवीम् । उत । द्याम् । नमः । देवेभ्यः । नमः । ईशे । एषाम् । कृतम् । चित् । एनः । नमसा । आ । विवासे ॥ ८ ॥

आस्तांतावत्देवानांमाहात्म्यं तदीयोनमस्कारोपिइत्थंमहाभागइतिब्रुवाणः कैमुतिकन्यायेनदेवानस्तौति—नमइत्नमस्कारएव उग्रमुद्गूर्णबलंसर्वोत्कृष्टंननहिमर्वलक्ष्यते अतोनमःनमस्कारं आविवासे परिचरामि नमःनमस्कारएव पृथिवींउतद्यांद्युलोकंचदाधार धारयति द्यावापृथिव्योप्राणिभिर्नमस्क्रियमाणे गत्यै। तदुपभोगायचिरकालमवतिष्ठेते अतोदेवेभ्यइदंशंनमस्करोमि एषांदेवानांनमोनमस्कारः ईशेईष्टे यतस्तेननेवशीकृताः कृतंचित्कृतमपिआचरितमप्येनः पापंनमसानमस्कारेणआविवासे विवासोवर्जनं वर्जयामि विनाशयामि ॥ ८ ॥

अथनवमी—

ऋतस्यवोरथ्यःपूतदक्षानृतस्यपस्त्यसदोअदब्धान् ।
ताँआनमोभिरुरुचक्षसोनृन्विश्वान्वआनमेमहोयजत्राः ॥ ९ ॥

ऋतस्य । वः । रथ्यः । पूतऽदक्षान् । ऋतस्य । पस्त्यऽसदः । अदब्धान् । तान् । आ । नमःऽभिः । उरुऽचक्षसः । नॄन् । विश्वान् । वः । आ । नमे । महः । यजत्राः ॥ ९ ॥

हेयजत्रायष्टव्यादेवाः वोयुष्मदीयस्यऋतस्ययज्ञस्यरथ्योरंहितॄन् नेतॄनपूतदक्षानशुद्धबलान ऋतस्ययज्ञस्यपस्त्यसदः यज्ञमेवन्धिनिपस्त्येदेवयजनलक्षणेगृहेसीदतोनिषण्णान अदब्धानरक्षःप्रभृतिभिरहिंसितान् उरुचक्षसोबहुद्रष्टॄन्नॄन्नेतॄन महोमहतःतानभि०नमयानिवोयुष्मान् आआभिमुख्येन क्रियमाणैर्नमोभिर्नमस्कारैःआनमे आनतोस्मि ॥ ९ ॥

अथदशमी–

तेहिश्रेष्ठंवर्चसस्तउंनस्तिरोविश्वांनिदुरितानयंन्ति ।
सुक्षत्रासोवरुणोमित्रोअग्निर्ऋतधीतयोवक्मराजंसत्याः ॥१०॥१२।

ते । हि । श्रेष्ठऽवर्चसः । ते । ऊँ इति । नः । तिरः । विश्वांनि ।
दुःऽइता । नयंन्ति । सुऽक्षत्रासः । वरुंणः । मित्रः । अग्निः ।
ऋतऽधीतयः । वक्मराजऽसत्याः । १० ॥ १२ ॥

येदेवाःवक्ष्यमाणगुणाः तेहितेखलु श्रेष्ठवर्चसः प्रशस्यतमदीप्तयोभवन्ति अतः तउतएव-नोस्माकंविश्वानिसर्वाणिदुरितापापानि तिरःतिरोहितानियथाभवन्तितथानयन्ति नयन्तु विना-शयन्त्वित्यर्थः येवरुणादयोदेवाः सुक्षत्रासः शोभनबलाःशोभनधनावाऋतधीतयः सत्यकर्माणः वक्मराजसत्याः वक्मवचनंस्तोत्रं तस्यराजानःईशानावक्मराजानः स्तोतारः तेषुसत्याःअवित-थाः एवंभूतास्तेहीत्यन्वयः ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेद्वादशोवर्गः ॥१२ ॥

अथैकादशी–

तेनइन्द्रंःपृथिवीक्षामंवर्धन्पूषाभगोअदिंतिःपञ्चजनाः ।
सुशर्माणःस्ववंसःसुनीथाभवंन्तुनःसुत्रात्रासंःसुगोपाः ॥ ११ ॥

ते । नः । इन्द्रंः । पृथिवी । क्षामं । वर्धन् । पूषा । भगंः ।
अदिंतिः । पञ्च । जनाः । सुऽशर्माणः । सुऽअवंसः । सुऽनीथाः ।
भवंन्तु । नः । सुऽत्रात्रासंः । सुऽगोपाः ॥ ११ ॥

तेदेवानोस्माकंक्षामनिवासभूमिंवर्धन्वर्धयन्तु केते इन्द्रः पृथिवीच पूषाचभगश्च अदि-तिरदीनादेवमाताच पंचजनादेवमनुष्याणांगंधर्वाप्सरसामित्यादिब्राह्मणोक्तादेवमनुष्यादयश्चते-चनोस्मदर्थंसुशर्माणः सुसुखाःस्ववसः शोभनान्नाः सुनीथाः सुप्रापणाश्चभवन्तु अस्मभ्यंशो-भनसुखादिकंप्रयच्छन्त्वितिभावः तथासुत्रात्रासः सुष्ठुत्रातारः सुगोपाः शोभनगोपायितारश्चभ-वन्तु उपस्थितेभ्यः शत्रुभ्योरक्षणंत्राणं तेषांउत्पत्तिनिरोधेन रक्षणंगोपनं ॥ ११ ॥

---

१ ऐ० ब्रा० ३. ३१.।

अथद्वादशी—

नूसद्मानंदिव्यंनंशिदेवाभारद्वाजःसुमतिंयातिहोता ।
आसानेभिर्यजमानोमियेधैर्देवानांजन्मवसूयुर्ववन्द ॥ १२ ॥

नु । सद्मानम् । दिव्यम् । नंशि । देवाः । भारत्ऽवाजः । सुऽमतिम् । याति । होता । आसानेभिः । यजमानः । मियेधैः । देवानाम् । जन्म । वसुऽयुः । ववन्द ॥ १२ ॥

अनयाऋषिरात्मानंपरोक्षवदाह—हेदेवाः भारद्वाजःभरद्वाजगोत्रजः होतास्तोतायमृषिः दिव्यंदिविभवंसद्मानंसदनंस्थानंनुक्षिप्रंनंशि व्याप्नोतु तथासुमतिंशोभनांमतिंयुष्मदीयामनुग्रहबुद्धिंच यातियाचते यातिर्याञ्चाकर्मा तदर्थंआसानेभिः आसीनैः सत्रासनंकुर्वद्भिः मियेधैर्मेध्यैर्मेधार्हैः अन्ययजमानैः सार्धं यजमानःयागंकुर्वन्नयमृषिः वसूयुर्वसूनिधनान्यात्मनइच्छन्देवानांजन्मजननंसंघंववंदवंदते स्तौति ॥ १२ ॥

दशरात्रस्यचतुर्थेहनिप्रउगशस्त्रेअपत्यंवृजिनमित्येषवैश्वदेवस्तृचः सूत्रितंच—अपत्यंवृजिनंरिपुमंबितमेनदीतमइत्यानुष्टुभंप्रउगमिति ।

तृचेप्रथमासूक्तेत्रयोदशी—

अपत्यंवृजिनंरिपुंस्तेनमग्नेदुराध्यम् ।
दविष्ठमस्यसत्पतेकृधीसुगम् ॥ १३ ॥

अप । त्यम् । वृजिनम् । रिपुम् । स्तेनम् । अग्ने । दुःऽआध्यम् । दविष्ठम् । अस्य । सत्ऽपते । कृधि । सुऽगम् ॥ १३ ॥

हेअग्ने त्वंत्यंतंप्रसिद्धंवृजिनंकुटिलंरिपुंपापकारिणंदुराध्यं दुःखस्याध्यातारंदुष्टाभिप्रायं एवंभूतंस्तेनंहिंसकंदविष्ठंदूरतमं अपास्य अपक्षिप असुक्षेपणइतिधातुः हेसत्पते सतांपालयितरग्ने अस्माकंसुगंशोभनेनगंतव्यंसुखंकृधि कुरु अत्रसर्वदेवात्मकस्याग्नेःस्तवनाद्वैश्वदेवत्वं ॥ १३ ॥

अथचतुर्दशी—

ग्रावाणःसोमनोहिकंसखित्वनायवावशुः ।
जहीन्यत्रिणंपणिंवृकोहिषः ॥ १४ ॥

ग्रावांणः । सोमा नः । हि । कम् । सखिऽत्वनायं । वावशुः । जहि ।
नि । अत्रिणंम् । पणिम् । वृकः । हि । सः ॥ १४ ॥

हेसोम नोस्मदीयाइमेग्रावाणःअभिषवार्थाःपाषाणाः तवसखित्वनायसख्यार्थंवावशुः कामयन्ते कमितिपूरकः हियस्मादर्थे यस्मादेवंतस्मात्त्वंपणिंवणिजमदातारं अत्रिणं अदनशीलं राक्षसादिकंनिजहि विनाशय सपणिर्वृकोहि आदानपरःखलुसर्वदास्मत्तोपहरणशीलः अतस्त्वंजह्नीत्यर्थः वृकआदानइतिधातुः ॥ १४ ॥

अथपंचदशी—

यूयंहिष्ठासुदानवइन्द्रंज्येष्ठाअभिद्यंवः ।
कर्तांनोअध्वन्नासुगंगोपाअमा ॥ १५ ॥

यूयम् । हि । स्थ । सुऽदानवः । इन्द्रंऽज्येष्ठाः । अभिऽद्यंवः । कर्तं ।
नः । अध्वंन् । आ । सुऽगम् । गोपाः । अमा ॥ १५ ॥

हेसुदानवः शोभनदानादेवाः यूयंहिष्ठ यूयंखलुप्रभवथ समृद्धाःस्थ इन्द्रज्येष्ठाः इन्द्रःज्येष्ठःमुख्योयेषांते अभिद्यवःअभिगतदीप्तयः तेयूयं अध्वन्अध्वनिमार्गेनोस्माकं अमासहैवगोपाः गोपायितारोरक्षितारःसन्तः सुगंसुखं आकारःसमुच्चये सुखंच कर्त कुरुत ॥ १५ ॥

प्रवासादागमनेअपिपंथामित्येषायजमानेनजप्या सूत्रितंच—अपिपंथामगन्महीतिप्रत्येत्यसमित्पाणिरिति ।

सैषासूक्तेषोडशी—

अपिपन्थांमगन्महिस्वस्तिगामंनेहसंम् ।
येनविश्वाःपरिद्विषोंवृणक्तिविन्दतेवसुं ॥ १६ ॥ १३ ॥

अपिं । पन्थांम् । अगन्महि । स्वस्तिऽगाम् अनेहसंम् । येनं ।
विश्वाः । परिं । द्विषः । वृणक्ति । विन्दते । वसुं ॥ १६ ॥ १३ ॥

पंथांपंथानंमार्गंअप्यगन्महि अपिगताःप्राप्ताःस्मः कीदृशं स्वस्तिगां सुखेनगन्तव्यं अनेहसं पापरहितं येनपथागच्छन् विश्वाःसर्वाःद्विषोद्वेष्टीःप्रजाः परिवृणक्ति परिवर्जयति बाधते वसुधनंचविंदते लभते तादृशंपंथानमित्यर्थः ॥ १६ ॥

॥ इतिचतुर्थस्याष्टमेत्रयोदशोवर्गः ॥ १३ ॥

नतद्दिवेतिसप्तदशर्चंतृतीयंसूक्तंऋजिश्वनआर्षंवैश्वदेवं आदितःषट्त्रिष्टुभः सप्तम्याद्याःष-
ड्गायत्र्यः त्रयोदशीत्रिष्टुप् चतुर्दशीजगती शिष्टास्तिस्रस्त्रिष्टुभः तथाचानुक्रान्तं—नतद्व्यूना-
सप्तम्याद्याःषड्गायत्र्यश्चतुर्दशीजगतीति । गतोविनियोगः ।

तत्रप्रथमा—

नतद्दिवानपृथिव्यानुमन्येनयज्ञेननोतशमीभिराभिः ।
उब्जन्तुतंसुभ्वःपर्वतासोनिहीयतामतियाजस्ययष्टा ॥ १ ॥
न । तत् । दिवा । न । पृथिव्या । अनु । मन्ये । न । यज्ञेन ।
न । उत । शमीभिः । आभिः । उब्जन्तु । तम् । सुऽभ्वः । पर्वतासः ।
नि । हीयताम् । अतिऽयाजस्य । यष्टा ॥१॥

अतियाजोनामकश्चिदृषिरस्मादृजिश्वनःउत्कृष्टस्यामहमितिबुध्यादेवान्यियक्षुरासऋषि-
स्तदीयंयजनंनिराचष्टाद्यया नतदतियाजस्यऋषेःतद्यजनंदिवाद्युलोकेनतत्रत्येनदेवगणेनयुक्त-
मित्यहंनानुमन्ये नानुमतिंकरोमि नचपृथिव्यापार्थिवेनापिदेवगणेनयुक्तमितिनानुमन्ये नचयज्ञे-
नमयानुष्ठितेनसदृशंतदित्यहंनानुमन्ये उतापिचआभिःशमीभिःअन्यैरपिमयाकृतैःएभिःकर्मभिः
सदृशमित्यपिनानुमन्ये मयावशीकृतादेवास्तदीयंयजनंनांगीकुर्वन्तिसचानभिज्ञत्वात्सम्यग्यष्टु-
मपिनशक्नोतीतिभावः अपिचतमृषिं सुभ्वःसुष्ठुभवन्तः पर्वतासः पर्वताः इन्द्रेणसहिताःसन्तः
उब्जन्तुहिंसन्तु उब्जिर्हिंसाकर्मा तथानस्यातियाजस्यऋजिश्वनोप्यतिशयेनाहंदेवान्यजामी-
तिबुध्यायुक्तस्यऋषेःयोयष्टायाजकःसनिहीयतां नितरांहीनोभवतु ॥१ ॥

अथद्वितीया—

अतिवायोमरुतोमन्यतेनोब्रह्मवायःक्रियमाणंनिनित्सात् ।
तपूंषितस्मैवृजिनानिसन्तुब्रह्मद्विषमभितंशोचतुद्यौः ॥ २ ॥
अति । वा । यः । मरुतः । मन्यते । नः । ब्रह्म । वा । यः ।
क्रियमाणम् । निनित्सात् । तपूंषि । तस्मै । वृजिनानि । सन्तु ।
ब्रह्मऽद्विषम् । अभि । तम् । शोचतु । द्यौः ॥ २ ॥

हेमरुतः यःपुरुषोनोस्मानतिमन्यतेअतीत्यस्वस्याधिक्यंमन्यतेअस्मत्तोपिस्वयमधिकइति-
बुध्यतेअस्माभिःक्रियमाणंब्रह्मस्तोत्रंवायोनिनित्सात् निन्दितुमिच्छेत्तस्मैपुरुषायतपूंषितेजांसि
वृजिनानिबाधकानिसन्तुभवन्तुब्रह्मद्विषन्तंशत्रुंद्यौरादित्यश्चअभिशोचतुअभितपतुअभिदहतु॥२॥

अथतृतीया—

किमङ्गत्वाब्रह्मणःसोमगोपांकिमङ्गत्वाहुरभिशस्तिपांनः ।
किमङ्गनःपश्यसिनिद्यमानान्ब्रह्मद्विषेतपुषिंहेतिमस्य ॥ ३ ॥

किम् । अङ्ग । त्वा । ब्रह्मणः। सोम । गोपाम् । किम् । अङ्ग । त्वा ।
आहुः । अभिशस्तिऽपाम् । नः । किम् । अङ्ग । नः । पश्यसि ।
निद्यमानान् । ब्रह्मऽद्विषे । तपुषिम् । हेतिम् । अस्य ॥ ३ ॥

किमंगेतिप्रसिद्धद्योतकौनिपातौ हेसोम त्वात्वांखलुब्रह्मणोमंत्रस्यकर्मणोवाब्रह्मजातेर्वागोपांगोपायितारं आहुः कथयन्तिपुराविदः तथानोस्माकमभिशस्तिपां अभिशंसकेभ्यःपालयितारंत्वामेवखल्वाहुः यद्वाअंगेत्यभिमुखीकरणे अंग हेसोम किंकारणंत्वांब्रह्मणोगोपामाहुः किंकारणंत्वात्वांअस्माकमभिशस्तिपामाहुः निंद्यमानान्परैर्दूष्यमाणान्नोस्मान् अंगहेसोम किंकारणंपश्यसि त्वामेवसर्वेब्रह्मणोरक्षकंशत्रुभ्यःपालकंचकथयन्ति अतोस्मासुपरैर्निन्द्यमानेषु औदासीन्यंतवानुचितं अतोब्रह्मद्विषेब्राह्मणद्वेष्ट्रेतस्मैतपुषिंतापकं हेतिमायुधंअस्यक्षिपप्रेरय ॥ ३ ॥

अथचतुर्थी—

अवन्तुमामुषसोजायमानाअवन्तुमासिन्धवःपिन्वमानाः ।
अवन्तुमापर्वतासोध्रुवासोवन्तुमापितरोदेवहूतौ ॥ ४ ॥

अवन्तु । माम् । उषसः । जायमानाः । अवन्तु । मा । सिन्धवः ।
पिन्वमानाः । अवन्तु । मा । पर्वतासः । ध्रुवासः । अवन्तु । मा ।
पितरः । देवऽहूतौ ॥ ४ ॥

जायमानाःप्रादुर्भवन्त्यउषसः मांअवन्तु रक्षंतु तथापिन्वमानाः वर्धमानाः सिन्धवः स्यन्दनशीलानद्यश्च मामामवन्तु तथाध्रुवासोनिश्चलाःपर्वतासःपर्वताश्च मामामवन्तु तथादेवहूतौदेवानांहूतिराह्वानमस्मिन्निति देवहूतिर्यागः तत्रविद्यमानाःपितरः पितृदेवताश्चमामामवन्तु ॥ ४ ॥

अथपंचमी—

विश्वदानींसुमनसःस्यामपश्येमनुसूर्यमुच्चरन्तम् ।
तथाकरद्वसुपतिर्वसूनांदेवाँओहानोवसागमिष्ठः ॥ ५ ॥ १४ ॥

विश्वऽदानीम् । सुऽमनसः । स्याम । पश्येम । नु । सूर्यम् ।
उत्ऽचरन्तम् । तथा । करत् । वसुऽपतिः । वसूनाम् । देवान् ।
ओहानः । अवसा । आऽगमिष्ठः ॥ ५ ॥ १४ ॥

हेदेवाः विश्वदानींसर्वदावयंसुमनसःस्याम शोभनमनस्काभवेम नुशब्दःसमुच्चये उच्चरन्तं उद्यन्तं सूर्यं सर्वदापश्येमच वसूनांवसुपतिः उत्कृष्टधनाधिपतिरग्निः देवानवसाअस्मदीयेनहविषाओहानोवहन् प्रापयन् आगमिष्ठः आगंतृतमः एवंगुणविशिष्टःसन् तथाकरत्अस्मान् तथाविधानुक्तप्रकारान्करोतु ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेचतुर्दशोवर्गः ॥ १४ ॥

अथषष्ठी–

इन्द्रोनेदिष्ठमवसागमिष्ठःसरस्वतीसिन्धुभिःपिन्वमाना ।
पर्जन्योनओषधीभिर्मयोभुरग्निःसुशंसःसुहवःपितेव ॥ ६ ॥

इन्द्रः । नेदिष्ठम् । अवसा । आऽगमिष्ठः । सरस्वती । सिन्धुऽभिः ।
पिन्वमाना । पर्जन्यः । नः । ओषधीभिः । मयःऽभुः ।
अग्निः । सुऽशंसः । सुऽहवः । पिताऽइव ॥ ६ ॥

अयमिन्द्रोनेदिष्ठमन्तिकतमंयथाभवतितथा अवसारक्षणेनसार्धंआगमिष्ठः आगन्तृतमोस्तु सिंधुभिः स्यन्दनैरुदकैःपिन्वमाना वर्धमानानदीरूपासरस्वतीच आगन्तृतमाभवतु ओषधीभिःसार्धं पर्जन्यश्चनोस्माकं मयोभूः सुखस्यभावयिताभवतु अग्निश्चपितेवपुत्रस्यजनकइव सुशंसः सुखेनशंसनीयः सुहवःसुखेनाह्वातव्यश्चभवतु ॥ ६ ॥

आग्रयणेवैश्वदेवस्यचरोःविश्वेदेवासआगतेत्यनुवाक्या सूत्रितंच–विश्वेदेवासआगतये केचज्मामहिनोअहिमायाइति ।

सैषासूक्तेसप्तमी–

विश्वेदेवासआगतशृणुतामइमंहवम् । एदंबर्हिर्निषीदत ॥ ७ ॥

विश्वे । देवासः । आ । गत । शृणुत । मे । इमम् । हवम् ।
आ । इदम् । बर्हिः । नि । सीदत ॥ ७ ॥

विश्वेदेवासः सर्वेदेवाः आगतआगच्छत आगत्यच मेमदीयंइमंहवंइदमाह्वानं शृणुत श्रु-त्वाच इदमास्तीर्णं बर्हिरानिषीदत आस्तीर्णेबर्हिषिनिषण्णाभवत उपविशत ॥ ७ ॥

अथाष्टमी—

योवोदेवाघृतस्नुनाहव्येनप्रतिभूषति । तंविश्वउपगच्छथ ॥ ८ ॥

यः । वः । देवाः । घृतऽस्नुना । हव्येन । प्रतिऽभूषति ।
तम् । विश्वे । उप । गच्छथ ॥ ८ ॥

हेदेवाः वोयुष्मानयोजनः घृतस्नुना घृतप्रक्षरणेनहव्येनहविषाप्रतिभूषति परिचरति तंज-नंविश्वेसर्वेयूयं उपगच्छथ उपगताभवथ ॥ ८ ॥

अथनवमी—

उपनःसूनवोगिरःशृण्वन्त्वमृतस्यये । सुमृळीकाभवन्तुनः ॥ ९ ॥

उप । नः । सूनवः । गिरः । शृण्वन्तु । अमृतस्य ।
ये । सुऽमृळीकाः । भवन्तु । नः ॥ ९ ॥

अमृतस्यमरणरहितस्यप्रजापतेः येसूनवः पुत्राः तेदेवाःनोस्माकंगिरःस्तुतीः उपशृण्वन्तु नोस्माकंसुमृळीकाः सुष्ठुमृडयितारः सुखयितारश्चभवन्तु ॥ ९ ॥

अथदशमी—

विश्वेदेवाऋतावृधऋतुभिर्हवनश्रुतः । जुषन्तांयुज्यंपयः ॥ १० ॥१५॥

विश्वे । देवाः । ऋतऽवृधः । ऋतुऽभिः । हवनऽश्रुतः ।
जुषन्ताम् । युज्यम् । पयः ॥ १० ॥ १५ ॥

ऋतावृधः ऋतस्ययज्ञस्यवर्धकाः ऋतुभिःकालविशेषैः हवनश्रुतः हवनस्यस्तोत्रस्यश्रो-तारः तस्मिनतस्मिन्यागकालेस्तूयमानाः ईदृशाविश्वेसर्वेदेवाःयुज्यंयोग्यंपयःआमिक्षारूपं जुष-न्तांसेवन्तां श्रूयतेहि—तप्तेपयसिदध्यानयतिसावैश्वदेव्यामिक्षेति ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेपंचदशोवर्गः ॥ १५ ॥

१ श० प० ब्रा०

अथैकादशी—

स्तोत्रमिन्द्रोमरुद्गणस्त्वष्टृमान्मित्रोअर्यमा । इमाहव्याजुषन्तनः ॥११॥

स्तोत्रम् । इन्द्रः । मरुत्ऽगणः । त्वष्टृऽमान् । मित्रः । अर्यमा ।
इमा । हव्या । जुषन्त । नः ॥ ११ ॥

मरुद्गणः मरुतोगणभूताः परिजनभूतायस्यतादृशइन्द्रः त्वष्टृमानत्वष्टृसहितोमित्रोर्यमाच नोस्माकंस्तोत्रं इमाहव्या इमानिहवींषिच जुषन्त सेवंतां ॥ ११ ॥

अथद्वादशी—

इमंनोअग्नेअध्वरंहोतर्वयुनशोयज । चिकित्वान्दैव्यंजनम् ॥ १२ ॥

इमम् । नः । अग्ने । अध्वरम् । होतः । वयुनऽशः ।
यज । चिकित्वान् । दैव्यम् । जनम् ॥ १२ ॥

हेहोतः देवानामाह्वातरग्ने दैव्यंदेवसंबन्धिनंजनंसंघंयजनीयं चिकित्वान जानंस्त्वंनोस्मदीय-मिममध्वरंहिंसारहितंयज्ञंवयुनशः ज्ञानक्रमेणयथानुपूर्व्यादेवाबुद्धिस्थाःतथायज यागंकुरु॥१२॥

वैश्वदेवशस्त्रस्यविश्वेदेवाइतियाज्या सूत्रितंच—आश्रुत्यैत्वेतिशम्स्वाजपद्विश्वेदेवाःशृणुते-मंहवंमइतियाज्येति । वैश्वदेवपशोर्एषवयाज्या सूत्रितंच—विश्वेदेवाःशृणुतेमंहवंमेयेकेचज्मामहिनोअहिमायाइति ।

सैषासूक्तेत्रयोदशी—

विश्वेदेवाःशृणुतेमंहवंमेयेअन्तरिक्षेयउपद्यविष्ठ ।
येअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वम् ॥१३॥

विश्वे । देवाः । शृणुत । इमम् । हवम् । मे । ये । अन्तरिक्षे ।
ये । उप । द्यवि । स्थ । ये । अग्निऽजिह्वाः । उत । वा । यजत्राः ।
आऽसद्य । अस्मिन् । बर्हिषि । मादयध्वम् ॥ १३ ॥

हेविश्वेदेवाः मेमदीयमिमंहवंआह्वानंशृणुत येयूयंअन्तरिक्षेस्थ अन्तरिक्षलोकेवर्तमाना-भवथ येचेउपतत्समीपस्थेभूलोकेभवथ येचद्यविद्युलोकेस्थ येचाग्निजिह्वाः अग्निर्जिह्वास्था-नीयोयेषां यद्वा अग्नेर्जिह्वा तयापोष्यमाणत्वात् जिह्वाइत्युच्यन्ते उतवा अपिवा येयजत्राः यजनीयाः तेसर्वेयूयंआस्तीर्णेस्मिन्बर्हिषि आसद्योपविश्यमादयध्वं सोमेनात्मानंतर्पयथ ॥१३॥

अथचतुर्दशी—

विश्वेदेवाममंशृण्वन्तुयज्ञियाउभेरोदसीअपांनपाच्चमन्म।
मावोवचांसिपरिचक्ष्याणिवोचंसुम्नेष्विद्वोअन्तमामदेम॥ १४ ॥

विश्वे। देवाः। मम। शृण्वन्तु। यज्ञियाः। उभे इति।
रोदसीइति। अपाम्। नपात्। च। मन्म। मा। वः। वचांसि।
परिऽचक्ष्याणि। वोचम्। सुम्नेषु। इत्। वः। अन्तमाः। मदेम॥ १४ ॥

यज्ञियायज्ञार्हाविश्वेदेवाः मममदीयं मन्ममननीयं स्तोत्रं शृण्वन्तु चित्तेवधारयन्तु तथाउभेरोदसी द्यावापृथिव्यौअपांनपात्मध्यमस्थानोग्निश्च अस्मदीयंस्तोत्रंशृण्वन्तु अथप्र-त्यक्षकृतः हेदेवाः वोयुष्मभ्यंपरिचक्ष्याणि वर्जनीयानि वचांसिस्तोत्राणि मावोचंमाब्रवीमि अ-पितुसमीचीनानिअतोवोयुष्माकमन्तमाःअन्तिकतमाःसन्तोवयं सुम्नेष्वित् युष्माभिर्दत्तेषुसुखे-ष्वेववर्तमानाः मदेम मोदेम ॥ १४ ॥

आग्रयणेवैश्वदेवस्ययेकेचज्मेतियाज्या सूत्रितंच—विश्वेदेवासआगतयेकेचज्मामहिनो-अहिमायाइति। वैश्वदेवपुरोडाशस्यैषैवायाज्या सूत्रमुदाहृतं।

सैषसूक्तेपंचदशी—

येकेचज्मामहिनोअहिमायादिवोजज्ञिरेअपांसधस्थे।
तेअस्मभ्यमिषयेविश्वमायुःक्षपउस्रावरिवस्यन्तुदेवाः॥ १५ ॥

ये। के। च। ज्मा। महिनः। अहिऽमायाः। दिवः। जज्ञिरे।
अपाम्। सधऽस्थे। ते। अस्मभ्यम्। इषये। विश्वम्। आयुः।
क्षपः। उस्राः। वरिवस्यन्तु। देवाः॥ १५ ॥

महिनोमहान्तः अहिमायाः मायेतिप्रज्ञानाम आहन्तृप्रज्ञाः एवंभूतायेकेचनदेवाः ज्मा पृथिवीनामैतत् पृथिव्यांजज्ञिरे प्रादुर्बभूवः येकेचन दिवोद्युलोकात्जज्ञिरे येकेचनअपांसधस्थे सहमादनेस्थाने अन्तरिक्षेजज्ञिरे तेसर्वेदेवाः अस्मभ्यं इषये इष्यतइतिइषिःपुत्रादिः तस्मैच विश्वंसर्वमायुरन्नंजीवनंवाक्षपः सर्वारात्रीः उस्राः सर्वाण्यहानिच सर्वदानैरंतर्येणवरिवस्यन्तु प्रयच्छन्तु ॥ १५ ॥   अथषोडशी—

अग्नींपर्जन्यावर्वतंधियंमेस्मिन्हवेंसुहवासुष्टुतिंनंः।
इळांमन्योजनयद्गर्भमन्यःप्रजावंतीरिषआधत्तमस्मे ॥ १६ ॥

अग्नींपर्जन्यौ । अवंतम् । धियंम् । मे । अस्मिन् । हवे ।
सुऽहवा । सुऽस्तुतिम् । नः । इळांम् । अन्यः । जनयंत् । गर्भम् ।
अन्यः । प्रजाऽवंतीः । इषंः । आ । धत्तम् । अस्मे इति ॥ १६ ॥

हेअग्नीपर्जन्यौ मेमदीयंधियंकर्मयज्ञलक्षणं अवतं गच्छतं रक्षतंवा हेसुहवासुखेनह्वातुं शक्यौ अस्मिनहवेयज्ञेनोस्मदीयांसुष्टुतिंशोभनांस्तुतिंचरक्षतं यद्वाअनुवृत्तोअवतिःश्रवणार्थः अवतं शृणुतं युवयोर्मध्येअन्यः पर्जन्यः इळामन्नंजनयज्जनयति वृष्ट्याह्योषधितनस्पतयोजायन्ते तेभ्यश्चान्नंजायते अन्योग्निर्गर्भंजनयति पुरुषेणभुक्तमन्नंजाठरेणाग्निनापक्वंसद्रेतोरूपेणपरिणमते तदेवयोषित्सुगर्भोभवति अतोयुवांप्रजावतीः प्रजाभियुक्ताः इषोन्नानि अस्मे अस्मासुआधत्तं अवस्थापयतं ॥ १६ ॥

अथसप्तदशी—

स्तीर्णेबर्हिषिसमिधानेअग्नौसूक्तेनंमहानमसाविवासे ।
अस्मिन्नोअद्यविदथेयजत्राविश्वेदेवाहविषिमादयध्वम् ॥ १७ ॥१६॥

स्तीर्णे । बर्हिषि । समऽइधाने । अग्नौ । सुऽउक्तेनं । महा ।
नमंसा । आ । विवासे । अस्मिन् । नः । अद्य । विदथे ।
यजत्राः । विश्वे । देवाः । हविषि । मादयध्वम् ॥ १७ ॥ १६ ॥

हेविश्वेदेवाः बर्हिषिदर्भपुंजवेद्यांस्तीर्णेसति अग्नौचसमिधानेसमिद्धेसति अनेनसूक्तेन स्तोत्रेणचमहामहतानमसानमस्कारेणच आविवासे पर्यचरं हेयजत्रायजनीयाविश्वेदेवाः अद्य-

अस्मिन्नदिनेनोस्मदीयेस्मिन्विदथेयज्ञेहविषि तृतीयार्थेसप्तमी हविषाअस्माभिर्दत्तेनमादयध्वं तृप्यध्वं ॥ १७ ॥

॥ इतिचतुर्थस्याष्टमेषोडशोवर्गः ॥ १६ ॥

वयमुत्वेतिदशर्चंचतुर्थंसूक्तं भरद्वाजस्यार्षंपौष्णं यांपूषन्नित्यनुष्टुप् शिष्टागायत्र्यः तथाचानुक्रान्तं—वयंदशपौष्णंतद्गायत्रंवैयांपूषन्ननुष्टुबिति । अर्थार्थिभिःप्रवसद्भिरेतत्जप्यं सूत्रितंच—वयमुत्वापथस्पथइत्यर्थंचर्यांचरिष्यन्नितिजपेदितिशेषः ।

तत्रप्रथमा—

वयमुंत्वापथस्पतेरथंनवाजंसातये । धियेपूंषन्नयुज्महि ॥ १ ॥

वयम् । ऊँ इति । त्वा । पथः । पते । रथम् । न । वाजंऽसातये । धिये । पूषन् । अयुज्महि ॥ १ ॥

हेपथस्पते मार्गस्यपालयितः पूषन् धियेकर्मार्थंवाजसातये अन्नस्यलाभायच वयंरथंनयुद्धेरथमिव त्वात्वांअयुज्महियुंज्महि अस्मदभिमुखंकुर्मः ऊंइतिपूरकः ॥ १ ॥

अथद्वितीया—

अभिनोनर्यंवसुंवीरंप्रयंतदक्षिणम् । वामंगृहपंतिंनय ॥ २ ॥

अभि । नः । नर्यम् । वसु । वीरम् । प्रयंतऽदक्षिणम् । वामम् । गृहऽपंतिम् । नय ॥ २ ॥

हेपूषन् नर्योनृभ्योहितंवसुधनं अभिप्राप्तुंवीरंदारिद्र्यस्यविशेषेणईरयितारं गमयितारं प्रयतदक्षिणंपूर्वमन्येभ्योपिदत्तधनं यद्वाप्रयतंशुद्धंदक्षिणंधनंयस्यतादृशंवामंवननीयं एवंविधं गृहपतिंगृहस्थंनोस्मान्नयप्रापय ॥ २ ॥

अथतृतीया—

अदित्सन्तंचिदाघृणेपूषन्दानांयचोदय । पणेश्चिद्विम्रंदामनंः ॥ ३ ॥

अदित्सन्तम् । चित् । आघृणे । पूषन् । दानांय । चोदय । पणेः । चित् । वि । म्रद । मनंः ॥ ३ ॥

हेआघृणे आगतदीप्ते पूषन् अदित्सन्तंचित् दातुमनिच्छन्तमपिपुरुषं दानायअस्मद्दानार्थंचोदय प्रेरय पणेश्चित्वणिजोपिवार्धुषिकस्यलुब्धस्यापिमनोहृदयंविम्रद दानार्थंमृदूकुरु ॥ ३ ॥

अथचतुर्थी—

विपथोवाजंसातयेचिनुहिविमृधोजहि । साधन्तामुग्रनोधियः ॥ ४ ॥

वि । पथः । वाजंऽसातये । चिनुहि । वि । मृधः । जहि ।
साधन्ताम् । उग्र । नः । धियः ॥ ४ ॥

हेउग्र उद्गूर्णबलपूषन् पथोमार्गान्वाजसातयेन्नलाभायविचिनुहि शोधितान्कुरु यैःपथिभिर्गताधनंलभेमहि तादृशान्पथःपृथक्कुर्वित्यर्थः मृधोबाधकान्तस्करादींश्चविजहि बाधस्व तथा नोस्माकं धियः कर्माणिअन्नलाभार्थंक्रियमाणानिसाधन्तां सिध्यन्तु सफलानिभवन्तु ॥ ४॥

अथपंचमी—

परितृन्धिपणीनामारयाहृदयाकवे । अथेमस्मभ्यंरन्धय ॥ ५ ॥१७॥

परि । तृन्धि । पणीनाम् । आरया । हृदया । कवे । अथ ।
ईम् । अस्मभ्यम् । रन्धय ॥ ५ ॥ १७ ॥

हेकवे प्राज्ञ पूषन् पणीनांवणिजांलुब्धानांहृदयाहृदयानिकठिनानिआरयासूक्ष्मलोहाग्रोदंडःप्रतोदइत्यारेतिचाख्यायते तथापरितृन्धि परिविध्यहृद्गतंकाठिन्यमपनयेत्यर्थः अथानन्तरं ईमेनान्पणीन्अस्मभ्यंरंधय वशीकुरु ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेसप्तदशोवर्गः ॥ १७ ॥

अथषष्ठी—

विपूषन्नारयातुदपणेरिच्छहृदिप्रियम् । अथेमस्मभ्यंरन्धय ॥ ६ ॥

वि । पूषन् । आरया । तुद । पणेः । इच्छ । हृदि । प्रियम् ।
अथ । ईम् । अस्मभ्यम् । रन्धय ॥ ६ ॥

हेपूषन् आरयाप्रतोदेनपणेर्वणिजोहृदयंवितुद विविध्य तस्यपणेर्हृदिहृदयेप्रियमस्मभ्यंअनुकूलंधनंइच्छ दातव्यमितीच्छांजनय अथानन्तरंअस्मभ्यंईमेनान्रन्धय वशीकुरु ॥ ६ ॥

अथसप्तमी—

आरिखकिकिराकृणुपणीनांहृदयाकवे । अथेमस्मभ्यंरन्धय ॥ ७ ॥

आ । रिख । किकिरा । कृणु । पणीनाम् । हृदया । कवे ।
अथ । ईम् । अस्मभ्यम् । रन्धय ॥ ७ ॥

हेकवे प्राज्ञपूषन् पणीनांवणिजांहृदयाहृदयानिआरिखआलिख आलिख्यचकिकिराकी-र्णानिप्रशिथिलानिकृणु कुरु मृदूनिकुर्वित्यर्थः अन्यद्गतं ॥ ७ ॥

अथाष्टमी—

यांपूषन्ब्रह्मचोदनीमारांबिभर्ष्याघृणे ।
तयासमस्यहृदयमारिखकिकिराकृणु ॥ ८ ॥

याम् । पूषन् । ब्रह्मऽचोदनीम् । आराम् । बिभर्षि । आघृणे ॥
तया । समस्य । हृदयम् । आ । रिख । किकिरा । कृणु ॥ ८ ॥

हेआघृणे आगतदीप्ते पूषन् ब्रह्मचोदनींब्रह्मणोन्नस्यप्रेरयित्रींयामारांबिभर्षि हस्तेधारय-सि तयासमस्यसर्वस्यलुब्धजनस्यहृदयंआरिख आलिख किकिराकिकिराणिकीर्णानिप्रशिथि-लानिचकुरु ॥ ८ ॥

अथनवमी—

यातेअष्ट्रागोओपशाघृणेपशुसाधनी । तस्यास्तेसुम्नमीमहे ॥ ९ ॥

या । ते । अष्ट्रा । गोऽओपशा । आघृणे । पशुऽसाधनी ।
तस्याः । ते । सुम्नम् । ईमहे ॥ ९ ॥

हेआघृणे आगतदीप्ते पूषन् तेत्वदीयायाअष्ट्राआरागोओपशाउपशेरतइत्योपशाः गावः ओपशायस्याःतादृशी अतएवपशुसाधनीपशूनांसाधयित्रीभवति तेत्वदीयायास्तस्याःसंबंधिसु-म्नंसुखंईमहे ॥ ९ ॥

अथदशमी—

उतनोगोषणिंधियमश्वसांवाजसामुत । नृवत्कृणुहिवीतये ॥ १० ॥ १८

उत । नः । गोऽसनिम् । धियम् । अश्वऽसाम् । वाजऽसाम्
उत । नृऽवत् । कृणुहि । वीतये । १० ॥ १८ ॥

उतअपिच हेपूषन् गोषणिंगवांसनित्रीं अश्वसांअश्वानांसनित्रीं वाजसांवाजानामन्नानांसनित्रीं उतअपिचनृवत्नृवतींनृणांवनित्रींदात्रीं एवंभूतांधियंबुद्धिंकर्मवानोस्माकंवीतयेखादनायउपभोगार्थं कृणुहि कुरु ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेष्टादशोवर्गः ॥ १८ ॥

संपूषन्नितिदशर्चंपंचमंसूक्तंभरद्वाजस्यार्षंपौष्णंगायत्रं संपूषन्नित्यनुक्रान्तं नष्टधनमन्विच्छतापुरुषेणैतज्जप्यं सूत्रितंच—संपूषन्विदुषेतिनष्टधनमधिजिगमिषन्मूळ्होवेति ।

तत्रप्रथमा—

संपूषन्विदुषानययोअंजसानुशासति । यएवेदमितिब्रवत् ॥ १॥

सम् । पूषन् । विदुषा । नय । यः । अंजसा । अनुऽशासति ।
यः । एव । इदम् । इति । ब्रवत् ॥ १ ॥

हेपूषन् पोषकदेव विदुषाजानतातेनजनेनसन्नय अस्मान्संगमय योविद्वानअंजसाऋजुमार्गेण अनुशासति अनुशास्ति नष्टद्रव्यप्राप्त्युपायमुपदिशति यश्चएवएवंइदंनष्टंभवदीयंधनमितिब्रवत्ब्रवीति नष्टंधनंदर्शयतीत्यर्थः तेनविदुषेत्य वयः ॥ १ ॥

अथद्वितीया—

समुपूष्णागमेमहियोगृहाँअभिशासति । इमएवेतिचब्रवत् ॥ २ ॥

सम् । ऊँ इति । पूष्णा । गमेमहि । यः । गृहान् । अभिऽशासति ।
इमे । एव । इति । च । ब्रवत् ॥ २ ॥

पूष्णानुगृहीतावयंसंगमेमहि तेनजनेनसंगच्छेमहि योजनोगृहान्येषुगृहेष्वस्मदीयानष्टाः पशवस्तिष्ठन्ति तान्गृहानअभिशासति अभिशास्ति आभिमुख्येनबोधयति यश्चइमेत्वदीयानष्टाःपशवःएवएवंतिष्ठन्तीतिचब्रवत् ब्रूयात् ॥ २ ॥

अथतृतीया—

पूष्णश्चक्रंनरिष्यतिनकोशोवपद्यते । नोअस्यव्यथतेपविः ॥ ३ ॥

पूष्णः । चक्रम् । न । रिष्यति । न । कोशः । अव । पद्यते ।
नो इति । अस्य । व्यथते । पविः ॥ ३ ॥

पूष्णःपोषकस्यदेवस्यचक्रंआयुधंनरिष्यति नविनश्यति अस्यचक्रस्यकोशश्चनावपद्यते नहीयते अस्यपविर्धाराचनोनैवव्यथते कुंठीभवति तेनचक्रेणचोरान्हत्वाअस्मदीयंधनंप्रकाशयेतिभावः ॥ ३ ॥

अथचतुर्थी–

योअस्मैहविषाविधन्नतंपूषापिमृष्यते । प्रथमोविन्दतेवसु ॥ ४ ॥

यः । अस्मै । हविषा । अविधत् । न । तम् । पूषा । अपि ।
मृष्यते । प्रथमः । विन्दते । वसु ॥ ४ ॥

योयजमानः अस्मैपूष्णेहविषाचरुपुरोडाशादिना अविधत् परिचरति तंयजमानंपूषानापिमृष्यते अपिशब्दईषदर्थे ईषदपिनहिनस्ति सचप्रथमोमुख्यःसन्वसुधनंविन्दते लभते ॥ ४ ॥

अथपंचमी–

पूषागाअन्वेतुनःपूषारक्षत्वर्वतः । पूषावाजंसनोतुनः ॥ ५ ॥ १९॥

पूषा । गाः । अनु । एतु । नः । पूषा । रक्षतु । अर्वतः ।
पूषा । वाजम् । सनोतु । नः ॥ ५ ॥ १९ ॥

पूषापोषकोदेवः नोस्मदीयागाःअन्वेतु रक्षणार्थमनुगच्छतु सचपूषाअर्वतोश्वान्रक्षतु चोरेभ्यःतथावाजमन्नंचनोस्मभ्यंपूषासनोतु प्रयच्छतु ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेएकोनविंशोवर्गः ॥ १९ ॥

अथषष्ठी–

पूषन्ननुप्रगाइहियजमानस्यसुन्वतः । अस्माकंस्तुवतामुत ॥६॥

पूषन् । अनु । प्र । गाः । इहि । यजमानस्य । सुन्वतः ।
अस्माकम् । स्तुवताम् । उत ॥ ६ ॥

हेपूषन् सुन्वतःसोमाभिषवंकुर्वतोयजमानस्यगाःपशून्अनुप्रेहि रक्षणार्थमनुगच्छ उत-अपिचस्तुवतांत्वद्विषयंस्तोत्रंकुर्वतामस्माकंगाश्चानुगच्छ ॥ ६ ॥

अथसप्तमी—

माकिर्नेशन्माकीं रिषन्माकीं संशारिकेवटे ।
अथारिष्टाभिरागहि ॥ ७ ॥

माकिः । नेशत् । माकीम् । रिषत् । माकीम् । सम् । शारि । केवटे
अथ । अरिष्टाभिः । आ । गहि ॥ ७ ॥

हेपूषन् अस्मदीयंगोधनंमाकिर्नेशत् मानश्यतु माकिर्माकीमित्येतौप्रतिषेधमात्रेवर्तेते माकींरिषत्माव्याघ्रादिभिर्हिंस्यतांमाकींमाचकेवटेकूपेसंशारि संशीर्णंभूत् कूपपातेनापिहिंसितंमाभवतु अथएवंसतिअरिष्टाभिरहिंसिताभिर्गोभिःसहआगहि सायंकालेआगच्छ ॥ ७ ॥

अथाष्टमी—

शृण्वन्तंपूषणंवयमिर्यमनष्टवेदसम् । ईशानंरायईमहे ॥ ८ ॥

शृण्वन्तम् । पूषणम् । वयम् । इर्यम् । अनष्टऽवेदसम् ।
ईशानम् । रायः । ईमहे ॥ ८ ॥

अस्मत्स्तोत्राणिशृण्वंतं इर्यंदरिद्रस्यप्रेरकं अनष्टवेदसं अविनष्टधनं ईशानंसर्वस्येश्वरं एवंविधंपूषणंदेवंवयंरायोधनानिईमहे याचामहे ॥ ८ ॥

चातुर्मास्येषुवैश्वदेवेपर्वणिपौष्णस्यहविषःपूषन्तवव्रतइत्येषानुवाक्या सूत्रितंच—वाममद्यसवितर्वाममुश्वःपूषन्तवव्रतेवयमिति ।

सैषासूक्तेनवमी—

पूषन्तवव्रतेवयंनरिष्येमकदाचन । स्तोतारस्तइहस्मसि ॥ ९ ॥

पूषन् । तव । व्रते । वयम् । न । रिष्येम । कदा । चन ।
स्तोतारः । ते । इह । स्मसि ॥ ९ ॥

हेपूषन् पोषक तेत्वदीयेव्रतेकर्मणिवर्तमानावयं कदाचनकदाचिदपिनरिष्येम हिंसिताननभवेम तादृशाश्चवयंइहास्मिन्कर्मणितेतवस्तोतारःस्मसिस्मः भवामः ॥ ९ ॥

अथदशमी—

परिपूषापरस्ताद्धस्तंदधातुदक्षिणम् ।
पुनर्नोनष्टमाजतु ॥ १० ॥ २० ॥

परि । पूषा । परस्तात् । हस्तम् दधातु । दक्षिणम् । पुनः । नः ।
नष्टम् । आ । अजतु ॥ १० ॥ २० ॥

पूषापोषकोदेवः परस्तात्परस्मिन्देशे सुसंचारादन्यस्मिन्चोरव्याघ्रादिभिरुषितेदेशे गच्छतोगोधनस्यनिवारणायस्वकीयंदक्षिणंहस्तंपरिदधातु परिधानंनिवारकंकरोतु नोस्मदीयंनष्टंच गोधनंपुनराजतु आगच्छतु आगमयतु ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेविंशोवर्गः ॥ २० ॥

एहिवामितिषळृचंषष्ठंसूक्तं भरद्वाजस्यार्षगायत्रंपौष्णं अनुक्रम्यतेच—एहिवांषडिति । गतोविनियोगः ।

तत्रप्रथमा—

एहिवांविमुचोनपादाघृणेसंसचावहै ।
रथीर्ऋतस्यनोभव ॥ १ ॥

आ । इहि । वाम् । विऽमुचः । नपात् । आघृणे । सम् ।
सचावहै । रथीः । ऋतस्य । नः । भव ॥ १ ॥

हेविमुचोनपात् विमुंचतिसृष्टिकालेस्वसकाशात्सर्वाःप्रजाःविसृजतीतिविमुक् प्रजापतिः तस्यपुत्र आघृणेआगतदीप्ते पूषन् वांवातिगच्छतिस्तुतिंप्राप्नोतीतिवास्तोता वागतिगंधनयोरित्यस्मादातोमनिन्क्विनिति विच् वांगन्तारंस्तोतारंमांएहि आगच्छ आवांचसंसचावहै समयावसंगच्छावहै यद्वा आवामित्यस्याद्याक्षरलोपेवामितिभवति आवांसचावहैइतिसंबन्धः यावसंगच्छावहैतादृशस्त्वंनोस्माकंऋतस्ययज्ञस्यरथीःरंहेजानेताभव तथासतितत्रत्यंहविस्त्वयापिलभ्यतइत्यर्थः ॥ १ ॥

अथद्वितीया—

रथीतममंकपर्दिनमीशानंराधसोमहः ।
रायःसखायमीमहे ॥ २ ॥

रथिऽतमम् । कपर्दिनम् । ईशानम् । राधसः । महः ।
रायः । सखायम् । ईमहे । ॥ २ ॥

रथितमंअतिशयेनरथिनं यद्वाअतिशयेनरंहितारंनेतारंकपर्दिनं कपर्दश्चूडातद्वन्तं राध्नो-त्यनेनेतिराधोधनं महोमहतोराधसोधनस्यईशानंस्वामिनं सखायं अस्माकंमित्रं एवंविधंपूषणंरा-योधनानिईमहेयाचामहे ॥ २ ॥

अथतृतीया—

रायोधारास्याघृणेवसोराशिरजाश्व । धीवंतोधीवतःसखा ॥ ३ ॥

रायः । धारा । असि । आघृणे । वसोः । राशिः । अजऽअश्व ।
धीवंतःऽधीवतः । सखा ॥ ३ ॥

हेआघृणे आगतदीप्ते पूषन् रायोधनस्यधारासि प्रवाहोभवसि स्तोतृभ्योबहुधनंनैरंतर्येण प्रयच्छसीत्यर्थः अजाश्वः अजाः छागाएवअश्वाः अश्वकार्यापन्नायस्यतादृशपूषन् वसोः वसुनोधनस्यराशिः संघश्चभवसि धनसंवश्चत्वय्येवनिवसतीत्यर्थः धीवतोधीवतः सर्वस्यस्तो त्रवतः पुरुषस्यसखामित्रभूतश्चभवसि ॥ ३ ॥

अथचतुर्थी—

पूषणंन्व१जाश्वमुपस्तोषामवाजिनम् । स्वसुर्योजारउच्यते ॥४॥

पूषणम् । नु । अजऽअश्वम् । उप । स्तोषाम । वाजिनम् ।
स्वसुः । यः । जारः । उच्यते । ४

अजाश्वंछागवाहनंवाजिनंअन्नवन्तंबलवन्तंवा पूषणंपोषकंदेवंनुअद्यउपस्तोषाम उपस्त-वाम यः पूषास्वसुरुषसोजारः उपपतिरित्युच्यते तंपूषणमित्यन्वयः ॥ ४ ॥

अथपञ्चमी—

मातुर्दिधिषुमब्रवंस्वसुर्जारःशृणोतुनः ।
भ्रातेन्द्रस्यसखामम ॥ ५ ॥

मा॒तुः । दि॒धि॒षुम् । अ॒ब्र॒व॒म् । स्वसुः । जा॒रः । शृ॒णो॒तु॒ । नः॒ ।
भ्राता॑ । इन्द्र॑स्य । सखा॑ । मम॑ ॥ ५ ॥

मातुः निर्मात्र्याः रात्रेः दिधिषुंपतिंपूषणंअब्रवं स्तौमि स्वसुरुषसोजारश्चपूषानोस्माकंस्तोत्राणिश्रृणोतु इन्द्रस्यभ्रातासहजातः पूषाममस्तोतुः सखामित्रभूतोस्तु ॥ ५ ॥

अथषष्ठी—

आजासः॑पू॒षण॒ꣳरथे॑निश्रृ॒म्भास्तेज॑न॒श्रिय॑म् ।
दे॒वंव॑ह॒न्तु॒बिभ्र॑तः ॥ ६ ॥ २१

आ । अ॒जासः॑ । पू॒षण॑म् । रथे॑ । नि॒ऽश्रृ॒म्भाः । ते ।
ज॒न॒ऽश्रिय॑म् । दे॒वम् । व॒ह॒न्तु॒ । बिभ्र॑तः ॥ ६ ॥ २१ ॥

अजासःअजाः छागाः निश्रृंभाःनिश्रथ्यसंबध्यहर्तारः तेपूष्णोवाहनतयाप्रसिद्धाः छागाः जनश्रियंजनंस्तोतृसंघंश्रयतिगच्छतीतिजनश्रीः तंपूषणंदेवंरथेबिभ्रतोधारयन्तःआवहन्तुआनयन्तु ॥ ६ ॥

॥ इतिचतुर्थस्याष्टमेएकविंशोवर्गः ॥ २१ ॥

यएनमितिषळृचंसप्तमंसूक्तं भरद्वाजस्यार्षंपौष्णमंत्यानुष्टुप् आदौपंचगायत्र्यः तथाचानुक्रान्तं—यएनमन्त्यानुष्टुबिति । गतोविनियोगः ।

तत्रप्रथमा—

यए॑नमा॒दिदे॑शतिकर॒म्भा॒दिति॑पू॒षण॑म् । नतेन॑दे॒वआ॒दिशे॑ ॥ १ ॥

यः । ए॒न॒म् । आ॒ऽदिदे॑शति । क॒र॒म्भ॒ऽअत् । इति॑ ।
पू॒षण॑म् । न । तेन॑ । दे॒वः । आ॒ऽदिशे॑ ॥ १ ॥

यःस्तोता एनंपूषणंपोषकंकरंभात्करंभानांघृतमिश्रानांयवसक्तूनांअत्तेतिआदिदेशति अभिष्टौति तेनपुरुषेणअन्योदेवःनआदिशे आदेष्टव्यः स्तोतव्योनभवति पूष्णएवसर्वस्याभितमस्यधनस्यलाभाद्देवतान्तरंनस्तौतिइत्यर्थः ॥ १ ॥

अथद्वितीया–

उतघासरथीतमःसख्यासत्पतिर्युजा। इन्द्रोवृत्राणिजिघ्नते॥ २ ॥

उत। घ। सः। रथिऽतमः। सख्या। सत्ऽपतिः। युजा।
इन्द्रः। वृत्राणि। जिघ्नते ॥ २ ॥

उतघ अपिच सःयःशत्रूणांहन्तृत्वेनप्रसिद्धस्तादृशः रथीतमः अतिशयेनरथीमहारथः सत्पतिः सतांपालयिता एवंगुणइन्द्रः सख्यामित्रभूतेनपूष्णायुजासहायभूतेनयुक्तःसन्वृत्राणि-शत्रून्जिघ्नतेहन्ति इन्द्रस्यापिअयमेवसाहाय्यकारीत्यर्थः ॥ २ ॥

अथतृतीया–

उतादःपरुषेगविसूरश्चक्रंहिरण्ययम्। न्यैरयद्रथीतमः ॥ ३ ॥

उत। अदः। परुषे। गवि। सूरः। चक्रम्। हिरण्ययम्।
नि। ऐरयत्। रथिऽतमः ॥ ३ ॥

उतापिच सूरः प्रेरकः रथीतमः अतिशयेनरथीनेतृतमोवापूषापरुषेपरुष्मतिपर्ववतिभास्व-तिवागविगच्छतीतिगौरादित्यः तस्मिन्हिरण्ययंहिरणमयंसुवर्णनिर्मितंअदस्तद्रथस्यचक्रंन्यैरय-न्नितरां प्रेरयतिस्म ॥ ३ ॥

अथचतुर्थी–

यदद्यत्वापुरुष्टुतब्रवामदस्रमन्तुमः। तत्सुनोमन्मसाधय॥ ४ ॥

यत्। अद्य। त्वा। पुरुऽस्तुत। ब्रवाम। दस्र। मन्तुऽमः।
तत्। सु। नः। मन्म। साधय ॥ ४ ॥

हेपुरुष्टुत बहुभिर्यजमानैःस्तुत दस्रदर्शनीय मन्तुमःज्ञानवन् पूषन् अद्येदानींयदुद्दिश्य त्वांब्रवाम स्तवाम नोस्माकंमन्ममननीयंसुसुष्ठुतद्धनं साधय उत्पादय ॥ ४ ॥

अथपंचमी–

इमंचनोगवेषणंसातयेसीषधोगणम्। आरात्पूषन्नसिश्रुतः ॥ ५ ॥

इमम् । च । नः । गोऽएषणम् । सातये । सीसधः ।
गणम् । आरात् । पूषन् । असि । श्रुतः ॥ ५ ॥

हेपूषन् नोस्माकंसातयेलाभायइमंचगणंमनुष्यसंघं गवेषणं गवामेषयितारं सीषधःसाधय हेपूषनआरातदूरदेशेपित्वंश्रुतोविश्रुतःप्रख्यातोसि भवसि ॥ ५ ॥

अथषष्ठी—

आतेस्वस्तिमीमहआरेअंघामुपावसुम् ।
अद्याचंसर्वतातयेश्वश्चंसर्वतातये ॥ ६ ॥२२॥

आ । ते । स्वस्तिम् । ईमहे । आरेऽअंघाम् । उपऽवसुम् ।
अद्य । च । सर्वऽतातये । श्वः । च । सर्वऽतातये ॥ ६ ॥ २२ ॥

हेपूषनत्वदीयांत्वयादेयांस्वस्तिंकल्याणींरक्षांआरेअघांआरेदूरेअघंपापंयस्याः तादृशीं उपावसुं उपगतधनां ईदृशींस्वस्तिं अद्यचअस्मिंश्चकाले सर्वतातये सर्वैर्ऋत्विग्भिः स्तायतइति-सर्वतातिर्यज्ञः तदर्थं यद्वासर्वेषांभोगानांविस्तारय श्वश्चपरस्मिन्नपिदिनेसर्वतातयेसर्वदासर्वतात्यर्थंआईमहे अतियाचामहे ॥ ६ ॥

॥ इतिचतुर्थस्याष्टमेद्वाविंशोवर्गः ॥ २२ ॥

इन्द्रानुपूषणेतिषळृचमष्टमंसूक्तं भरद्वाजस्यार्षंगायत्रमैन्द्रापौष्णं अनुक्रान्तंच—इन्द्रान्वैन्द्रंचेति । गतोविनियोगः ।

तत्रप्रथमा—

इन्द्रानुपूषणावयंसख्यायस्वस्तये । हुवेमवाजसातये ॥ १ ॥

इन्द्रा । नु । पूषणा । वयम् । सख्याय । स्वस्तये ।
हुवेम । वाजऽसातये ॥ १ ॥

इतरेतरयोगादिन्द्रपूषनशब्दयोरुभयत्रद्विवचनं इन्द्रापूषणौदेवौनुअद्यवयंस्वस्तयेसख्यायशोभनायसखित्वाय वाजसातये वाजस्यान्नस्यवलस्यवासातये संभजनायचहुवेम आह्वयाम स्तवाम ॥ १ ॥

अथद्वितीया—

सोमंमन्यउपासदत्पातवेचम्वोःसुतम् । करम्भमन्यइच्छति ॥२॥

सोमम् । अन्यः । उप । असदत् । पातवे । चम्वोः । सुतम् ।
करम्भम् । अन्यः । इच्छति ॥ २ ॥

चम्वोःअधिषवणफलकयोः सुतमभिषुतंसोमंअन्यःअनयोरेकतरइन्द्रः पातवेपातुंउपासदत् उपसीदति उपगच्छति अन्यएकतरः पूषाकरंभंघृतसिक्तंसक्त्वात्मकंहविःभक्षयितुमिच्छति ॥ २ ॥

अथतृतीया—

अजाअन्यस्यवह्नयोहरीअन्यस्यसंभृता । ताभ्यांवृत्राणिजिघ्नते॥३॥

अजाः । अन्यस्य । वह्नयः । हरी इति । अन्यस्य ।
सम्ऽभृता । ताभ्याम् । वृत्राणि । जिघ्नते ॥ ३ ॥

अनयोरिन्द्रापूष्णोःअन्यस्यएकस्यपूष्णः अजाः छागाः वह्नयोवाहकाअश्वाः अन्यस्यापरस्येन्द्रस्यसंभृतासंभृतौसम्यक्पुष्टौ हरीएतत्संज्ञावश्वौ वाहकौसचेन्द्रःताभ्यांवृत्राणिशत्रूनजिघ्नते हन्ति ॥ ३ ॥

अथचतुर्थी—

यदिन्द्रोअनयद्रितोमहीरपोवृषन्तमः । तत्रपूषाभवत्सचा ॥ ४ ॥

यत् । इन्द्रः । अनयत् । रितः । महीः । अपः ।
वृषन्ऽतमः । तत्र । पूषा । अभवत् । सचा ॥ ४ ॥

यद्यदा वृषन्तमः अतिशयेनवर्षिताइन्द्रः रितःपरितोगंत्रीर्महीः महतीः अपःवृष्ट्युदकानि अनयत्इमंलोकंप्रापयति तत्रतदानींपूषापोषकोदेवः सचाभवत्अस्येन्द्रस्यसहायोभवति ॥ ४ ॥

अथपंचमी—

तांपूष्णःसुमतिंवयंवृक्षस्यप्रवयामिव । इन्द्रस्यचारभामहे ॥ ५॥

ताम् । पूष्णः । सुऽमतिम् । वयम् । वृक्षस्य । प्र ।
वयाम्ऽइव । इन्द्रस्य । च । आ । रभामहे ॥ ५ ॥

पूष्णःपोषकस्यदेवस्यइन्द्रस्यच तांप्रसिद्धांसुमतिंकल्याणींमतिंअनुग्रहबुद्धिं वृक्षस्यमहीरुहस्यप्रवयां प्रकृष्टांदृढांशाखामिववयंआरभामहे अवलंबामहे आश्रयामहइत्यर्थः ॥ ५ ॥

अथषष्ठी–

उत्पूषणंयुवामहेभीशूँरिवसारथिः । मह्याइन्द्रंस्वस्तये॥६॥२३॥

उत् । पूषणम् । युवामहे । अभीशून्ऽइव । सारथिः ।
मह्यै । इन्द्रम् । स्वस्तये ॥ ६ ॥ २३ ॥

पूषणंपोषकंदेवमिन्द्रंचमह्यैमहत्यै स्वस्तयेरक्षार्थंउद्युवामहे उद्योजयामः उद्योजनमाकर्षणं तत्रदृष्टान्तः–सारथिःसूतः अभीशूनिव अभीशून्रश्मीन्अश्वबन्धनार्थान्आकर्षतितद्वत्॥ ६ ॥

॥ इतिचतुर्थस्याष्टमेत्रयोविंशोवर्गः ॥ २३ ॥

शुक्रंतइतिचतुर्ऋचंनवमंसूक्तं भरद्वाजस्यार्षंपौष्णं द्वितीयाजगती शिष्टास्त्रिष्टुभः तथाचानुक्रान्तं–शुक्रंचतुष्कंद्वितीयाजगतीति । वैश्वदेवेपर्वणिवैश्वदेवस्यहविषःशुक्रंतइतियाज्या सूत्रितंच–शुक्रंतेअन्यद्यजतंतेअन्यदिहेहवःस्वतवसइति । एकादशिनस्यपौष्णस्यपशोर्वपायाएषैवयाज्या सूत्रितंच–शुक्रंतेअन्यद्यजतंतेअन्यत्प्रपथेपथामजनिष्टपूषाइति । अमाभिष्टेवप्येषासूत्रितंच–शुक्रंतेअन्यद्यजतंतेअन्यदपश्यंगोपामनिपद्यमानमिति ।

सैषाप्रथमा–

शुक्रंतेअन्यद्यजतन्तेअन्यद्विषुरूपेअहनीद्यौरिवासि ।
विश्वाहिमायाअवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु ॥ १ ॥

शुक्रम् । ते । अन्यत् । यजतम् । ते । अन्यत् । विषुरूपेइतिविषुऽरूपे ।
अहनी इति । द्यौःऽइव । असि । विश्वाः । हि । मायाः । अवसि ।
स्वधाऽवः । भद्रा । ते । पूषन् । इह । रातिः । अस्तु ॥ १ ॥

हेपूषन् तेतवशुक्रंशुक्लवर्णंअन्यदेकमहर्भवतिवासरात्मकं तथातेतवसंबन्धियजतं यजिरत्रसंगतिकरणेवर्तते यजनीयं प्रकाशेनसंगमनीयं स्वतः कृष्णवर्णं अन्यदेकमहर्भवतिरात्र्याख्यं इत्थंविषुरूपे शुक्लकृष्णतयानानारूपे अहनीतवमहिम्नानिष्पद्येते यद्वाहेपूषन् त्वदीयमन्यदेकं रूपंशुक्लंनिर्मलंदिवसस्योत्पादकं त्वदीयमन्यदेकंरूपंयजतं केवलंयजनीयंनप्रकाशकं रात्रेरुत्पादकं अतएवविषुरूपे विषमरूपेअहनीअहश्चरात्रिश्चभवतः अहोरात्रयोः निर्माणेसूर्यएवकर्ता कथमस्यप्रसक्तिरितितत्राह—द्यौरिवासि यथाद्यौरादित्यः प्रकाशयितातथात्वंप्रकाशकोसि कुतइत्यतआह—हेस्वधावोन्नवन्पूषन् विश्वाः सर्वाः मायाः प्रज्ञाःहियस्मात्कारणात्अवसिरक्षसि अतःकारणात्त्वंसूर्यइवभवसीत्यर्थः तादृशस्यतेतवभद्राकल्याणीरातिर्दानंइहास्मासुअस्तुभवतु यास्कस्त्वाह—शुक्रंतेअन्यल्लोहितंतेअन्यद्यज्ञियंतेअन्यदयज्ञियंते अन्यदितिवाविषमरूपेअहनीकर्मणाद्यौरिवचासिसर्वाणिचप्रज्ञानान्यवस्यन्नवन्निति ॥ १ ॥

अथद्वितीया—

अजाश्वःपशुपावाजपस्त्योधियंजिन्वोभुवनेविश्वेअर्पितः ।
अष्ट्रांपूषाशिथिरामुद्वरीवृजत्संचक्षाणोभुवनादेवईयते ॥ २ ॥

अजऽअश्वः । पशुऽपाः । वाजऽपस्त्यः । धियम्ऽजिन्वः । भुवने ।
विश्वे । अर्पितः । अष्ट्राम् । पूषा । शिथिराम् । उत्ऽवरीवृजत् ।
सम्ऽचक्षाणः । भुवना । देवः । ईयते ॥ २ ॥

अजाश्वः छागवाहनः पशुपाः पशूनांपालयिता वाजपस्त्यः वाजाअन्नानिपस्त्येगृहेयस्य तादृशः धियंजिन्वः धियः स्तोतारः कर्माणिवातेषांप्रीणयिता विश्वेविश्वस्मिन्सर्वस्मिन्भुवने लोकेअर्पितः प्रजापतिनापोषकत्वेनस्थापितः अतएवंभूतः पूषापोषकोदेवः अष्ट्रांआरांस्वहस्तगतांशिथिरांशिथिलांसतींउद्वरीवृजत् उद्यच्छन्भुवनाभुवनानि सर्वाँल्लोकान्भूतजातानिवासंचक्षाणः संपश्यन् सूर्यात्मनाप्रकाशयन्ईयते नभसिगच्छति ॥ २ ॥

पौष्णस्यपशोर्वपापुरोडाशयोर्यास्तेपूषन्नित्यादिकेद्वेऋचावनुवाक्ये सूत्रितंच—यास्तेपूषन्नावोअन्तःसमुद्रइतिद्वपूषेमाआशाअनुवेदसर्वाइति ।

---

१ नि० १२. १७.

सूक्तेतृतीया–

यास्तेपूषन्नावोअन्तःसमुद्रेहिरण्ययीरन्तरिक्षेचरन्ति।
ताभिर्यासिदूत्यांसूर्यस्यकामेनकृतश्रवइच्छमानः ॥ ३ ॥

याः। ते। पूषन्। नावः। अन्तरिति। समुद्रे। हिरण्ययीः।
अन्तरिक्षे। चरन्ति। ताभिः। यासि। दूत्याम्। सूर्यस्य।
कामेन। कृत। श्रवः। इच्छमानः ॥ ३ ॥

हेपूषन् तेत्वदीयाःयाहिरण्ययीःहिरण्मय्यःहितरमणीयानावः समुद्रेउदधावन्तर्मध्येअन्त रिक्षेनभसिचचरन्ति संचरन्ति ताभिर्नौभिःसूर्यस्यदूत्यंयासिगच्छसि कदाचित्देवैःसार्धंसूर्येअ सुरवधार्थंप्रस्थितेसति तस्यभार्यास्वभर्तरिसंजातोत्सुकाबभूव तांप्रतिसूर्यःपूषणंप्राहैषीत् तेनचा त्रपूषास्तूयते अपिचत्वंश्रवोहविर्लक्षणमन्नंइच्छमानः इच्छन्कामेनपश्वादिविषयेण स्तोतृभिःकृ तःवशीकृतोसि ॥ ३ ॥

अथचतुर्थी–

पूषासुबन्धुर्दिवआपृथिव्याइळस्पतिर्मघवादस्मवर्चाः।
यंदेवासोअददुःसूर्यायैकामेनकृतंतवसंस्वञ्चम् ॥४॥२४॥

पूषा। सुऽबन्धुः। दिवः। आ। पृथिव्याः। इळः। पतिः। मघऽवा।
दस्मऽवर्चाः। यम्। देवासः। अददुः। सूर्यायै। कामेन। कृतम्।
तवसम्। सुऽअञ्चम् ॥ ४ ॥ २४ ॥

पूषापोषकोदेवः दिवआ द्युलोकस्यचपृथिव्याश्चसुबन्धुः शोभनोबन्धुर्भवति तथाइळस्प-तिः इळायाअन्नस्यपतिः मघवा मघमितिधननामतद्वान् यद्वा मंहतेर्दानकर्मणोभावसाधनोमघ शब्दः दानवान् दस्मवर्चाःवर्चइतिरूपनाम दस्मंदर्शनीयं वर्चोयस्यतादृशः यंपूषणंदेवासःसर्वेदेवाः सूर्यायैसूर्यस्यपत्न्यै यद्वासावित्र्यैसूर्याख्यायै अश्विनोर्वरणायअददुःदत्तवन्तः पुत्रःपितराववृणी तपूषेतिहिश्रूयते[1]–कीदृशंपूषणं कामेनपश्वादिविषयेणकृतं स्तोतृभिर्वशीकृतं तवसंबलवन्तंप्रवृद्धं वास्वंचंस्वंचनंसुष्ठुगच्छन्तं एवंविधंयंपूषणंददुः सपूषासुबन्धुरित्यन्वयः ॥ ४ ॥

॥ इतिचतुर्थस्याष्टमेचतुर्विंशोवर्गः ॥ २४ ॥

---

1 ऋ० सं० ८. ३. २२.।

प्रनुवोचेतिदशर्चंदशमंसूक्तंभरद्वाजस्यार्षं इन्द्राग्निदेवताकं सप्तम्याद्याश्चतस्रोनुष्टुभः शिष्टाः षट्बृहत्यः तथाचानुक्रान्तं—प्रनुदशैन्द्राग्नंतुबार्हतंचतुरनुष्टुबन्तमिति । गतोविनियोगः ।

तत्रप्रथमा—

प्रनुवोचासुतेषुवांवीर्या३यानिचक्रथुः ।
हतासोवांपितरोदेवशत्रवइन्द्राग्नीजीवथोयुवम् ॥ १ ॥

प्र । नु । वोच । सुतेषु । वाम् । विर्या । यानि । चक्रथुः । हतासः ।
वाम् । पितरः । देवऽशत्रवः । इन्द्राग्नी इति । जीवथः । युवम् ॥१॥

हेइन्द्राग्नी यानिवीर्याविर्याणिवीरकर्माणिचक्रथुःकृतवन्तौ युवांसुतेषुअभिषुतेषुसोमेषु अस्मद्यज्ञे वांयुवयोस्तानिवीर्याणि नुक्षिप्रंप्रवोच प्रवोचंब्रवीमि।तदेववीर्यंदर्शयतिहेइन्द्राग्नी देवशत्रवःदेवाः शत्रवःशातयितारोयेषांताद्दशाअसुराः पितरःहिंसकाःपीयतिर्हिंसाकर्मा तस्यैतद्रूपं ईद्दशाअसुराः वांयुवाभ्यांहतासोहताआसन्युवंयुवांतु जीवथःजीवनवन्तोभवथः असुरैर्नबाधिताविति यावत्॥१॥

अथद्वितीया—

बळित्थामहिमावामिन्द्राग्नीपनिष्ठआ ।
समानोवांजनिताभ्रातरायुवंयमाविहेहमातरा ॥ २ ॥

बट् । इत्था । महिमा । वाम् । इन्द्राग्नी इति । पनिष्ठः । आ ।
समानः । वाम् । जनिता । भ्रातरा । युवम् । यमौ । इहेहऽमातरा ॥२॥

हेइन्द्राग्नी वांयुवयोःमहिमामहत्त्वं इत्थाइत्थंअनेनप्रकारेण बट्सत्यं युष्मद्विषयंयज्जन्म महत्वंप्रतिपाद्यते तत्सर्वंयथार्थमित्यर्थः पनिष्ठःआपनिष्ठःस्तुत्यतमश्चप्रजापतिःसमानः एकएव वांयुवयोर्जनिताजनयिता अतोयुवंयुवांभ्रातराभ्रातरौस्थः अपिच यमौयमलौसहोत्पन्नौ इहेह-मातराइहचेहचसर्वत्रमाताययोस्ताद्दशौस्थः अदितिर्ह्यनयोर्मातासैवविस्तीर्णाभूमिरितिइहेहमात-राविति स्तूयते ॥ २ ॥

अथतृतीया—

ओकिवांसासुतेसचाँअश्वासप्तीइवादने ।
इन्द्रान्व१ग्नीअवसेहवज्रिणावयंदेवाहवामहे ॥ ३ ॥

ओ॒कि॒ऽवांसा॑ । सु॒ते । सचा॑ । अश्वा॑ । सप्ती॒इ॒वेति॒सप्ती॑ऽइव ।
आदने । इन्द्रा॑ । नु । अ॒ग्नी इति॑ । अव॑सा । इ॒ह । व॒ज्रिणा॑ । व॒यम्
दे॒वाः । ह॒वा॒म॒हे ॥ ३ ॥

हेइन्द्राग्नी सुतेअभिषुतेसोमेयुवांसचासहओकिवांसाओकिवांसौसमवेतौसंगतौभवतं उच समवायइत्यस्यैतद्रूपं तत्रदृष्टान्तः—आदनेभक्षणीयेघासेसप्तीइवाश्वा सर्पणशीलावश्वाविव नुअधवर्थेताद्दशाविन्द्राइन्द्रौअग्नीइन्द्राग्नी इहास्मिन्यज्ञेअवसारक्षणेनहेतुनाह्वामहे आह्वयामहे । इतरेतरयोगात्इन्द्रशब्देअग्निशब्देचद्विवचनं कीदृशाविन्द्राग्नी वज्रिणावज्रिणौ आयुधोपेतौ देवादानादिगुणयुक्तौ ॥ ३ ॥

अथचतुर्थी—

यइन्द्राग्नीसु॒तेषु॑वां॒स्तव॒त्तेष्वृ॑तावृधा ।
जो॒ष॒वा॒कंवद॑तःपज्रहो॒षिणा॒नदे॑वा॒भसथ॑श्च॒न ॥ ४ ॥

यः । इ॒न्द्रा॒ग्नी॒ इति॑ । सु॒तेषु॑ । वा॒म् । स्तव॑त् । तेषु॑ । ऋ॒त॒ऽवृ॒धा॒ ।
जो॒ष॒ऽवा॒कम् । वद॑तः । प॒ज्र॒ऽहो॒षि॒णा॒ । न । दे॒वा॒ः । भ॒सथ॑ः । च॒न ॥ ४ ॥

हेऋतावृधा ऋतस्यसत्यस्ययज्ञस्यवावर्धयिताराविन्द्राग्नी सुतेष्वभिषुतेषुसोमेषु यःस्तोता वांयुवांस्तवत्कुत्सितंस्तूयात् तेषुसोमेषुमध्येजोषवाकंवदतः जोषंजोषयितव्यंप्रीतिहेतुत्वेनकर्तव्यं स्वयमप्रीतिकरंताद्दशंवाकंवाक्यंवदतस्तस्यस्तोतुःसोमंहेपज्रहोषिणा पज्रःप्रार्जितःप्रसिद्धः होषोघोषः स्तोत्रंययोस्ताद्दशौहेदेवौ युवांनभसथोनभक्षयथः चनेतिपादपूरकःअत्रनिरुक्तं[1]—जोषवाकमित्यविज्ञातनामधेयंजोषयितव्यंभवति।यइन्द्राग्नीसुतेषुवांसोमेषुस्तौतितेष्वृतस्यवर्धयितारौनस्याश्नीथोयोयंजोषवाकंवदतिविजंजयंःप्रार्जितहोषिणौदेवौनतस्याश्नीथइति ॥ ४ ॥

अथपंचमी—

इन्द्रा॑ग्नी॒कोअ॒स्यवां॒न्देवौ॒मर्त॑श्चिकेतति ।
विषू॑चो॒अश्वा॑न्युयुजा॒नईं॑यत॒एकः॑समा॒नआर॑थे ॥ ५ ॥ २५ ॥

1 नि० ५. २१.

इन्द्राग्नी इति । कः । अस्य । वाम् । देवौ । मर्तः । चिकेतति । विषूचः । अश्वान् । युयुजानः । ईयते । एकः । समाने । आ । रथे ॥५॥२५॥

हेदेवौ द्योतमानाविन्द्राग्नी वांयुवयोःअस्यइदंकर्मकोमर्तोमनुष्यःचिकेतति जानीयात् न-कोपीत्यर्थः किंतत्कर्म विषूचः नानाअंचतोगच्छतोअश्वान्समानेउभयार्थेएकस्मिन्रथेयुव-योरेकइन्द्रः सूर्यात्मनावर्तमानः युयुजानः तादृशानश्वान्योजयन्आईयते सर्वंजगदभिगच्छति। यद्वाविषूचोनानारूपान्अश्वान्व्यापकान्रश्मीन् समानेएकरूपेरथेसंवत्सरात्मकेयुयुजानोयोज-यन् युवयोरेकःसूर्यात्माइन्द्रः आईयतेआगच्छति। एतद्युवयोःकर्मकोयथावज्जानीयादित्यर्थः॥५॥

॥ इतिचतुर्थस्याष्टमेपंचविंशोवर्गः ॥ २५ ॥

अथषष्ठी—

इन्द्राग्नीअपादियंपूर्वागात्पद्वतीभ्यः ।
हित्वीशिरोजिव्हयावावदच्चरत्त्रिंशत्पदान्यक्रमीत् ॥ ६ ॥

इन्द्राग्नी इति । अपात् । इयम् । पूर्वा । आ । अगात् । पत्ऽवतीभ्यः । हित्वी । शिरः । जिह्वया । वावदत् । चरत् । त्रिंशत् । पदा । नि । अक्रमीत् ॥ ६ ॥

हेइन्द्राग्नी अपात्पादरहिताइयमुषाःपद्वतीभ्यःपादयुक्ताभ्यःसुप्ताभ्यःप्रजाभ्यः पूर्वाप्रथ-माभाविनीसती आगात्आगच्छति। तथाप्राणिनांशिरोहित्वीप्रेरयित्री यद्वाशिरोहित्वात्यक्त्वा स्वयमशिरस्कासती जिह्वयाप्राणिस्थयातदीयेनवागिन्द्रियेणवावदत् भृशंशब्दंकुर्वन्तीचरत् ए-वंचरन्तीउषात्रिंशत्पदानिअवयवभूतान्त्रिंशन्मुहूर्तान्न्यक्रमीत् एकेनदिवसेनातिक्रामति एतच्च युवयोःकर्मतत्कोजानीयादितिपूर्वत्रान्वयः ॥ ६ ॥

अथसप्तमी—

इन्द्राग्नीआहितन्वतेनरोधन्वानिबाह्वोः ॥
मानोअस्मिन्महाधनेपरावर्क्तंगविष्टिषु ॥ ७ ॥

इन्द्राग्नी इति । आ । हि । तन्वते । नरः । धन्वानि । बाह्वोः । मा । नः । अस्मिन् । महाऽधने । परा । वर्क्तम् । गोऽइष्टिषु ॥ ७ ॥

हेइन्द्राग्नी नरोयोद्धारोमनुष्याःबाह्वोर्हस्तयोःधन्वानिधनूंषिअतन्वतेहि आततज्यानिकुर्वते-हि। युवांचास्मिन्महाधनेजेतव्येनमहाधनेनोपेतेसंग्रामे गविष्टिषुगवामन्वेषणेषुनोस्मान्मापरावर्क्कं मापरित्यजतं ॥ ७ ॥

अथाष्टमी–

इन्द्राग्नीतपन्तिमाघाअर्योअरातयः ।
अपद्वेषांस्याकृतंयुयुतंसूर्यादधि ॥ ८ ॥

इन्द्राग्नी इति । तपन्ति । मा । अघाः । अर्यः । अरातयः ।
अप । द्वेषांसि । आ । कृतम् । युयुतम् । सूर्यात् । अधि ॥ ८ ॥

हेइन्द्राग्नी अघाआहंत्र्यः अर्यःअभिगंत्र्यः अरातयःशत्रुसेनामातपन्तिमांबाधन्ते ताअपाकृतंअपाकुरुतं । तथाद्वेषांसिद्वेष्टॄन्शत्रून्सूर्यादधि अधिःपंचम्यर्थानुवादकः सूर्यदर्शनात्युयुतं-पृथक्कुरुतंचयथातेसूर्यंनपश्यन्तितथाकुरुतं मारयतमित्यर्थः ॥ ८ ॥

अथनवमी–

इन्द्राग्नीयुवोरपिवसुदिव्यानिपार्थिवा ।
आनइहप्रयच्छतंरयिंविश्वायुपोषसम् ॥ ९ ॥

इन्द्राग्नी इति । युवोः । अपि । वसु । दिव्यानि । पार्थिवा । आ ।
नः । इह । प्र । यच्छतम् । रयिम् । विश्वायुऽपोषसम् ॥ ९॥

हेइन्द्राग्नी युवोर्युवयोःदिव्यानिदिविभवानि पार्थिवापृथिव्यांभवानि लोकद्वयसंबन्धीनि वसुवसूनि अपिहितानियुवयोरेववर्तन्ते अतःकारणात्इहास्मिन्यज्ञेनोस्मभ्यंरयिंधनंआअभिप्रय च्छतं। कीदृशंरयिं विश्वायुपोषसं आयवइतिमनुष्यनाम सर्वेषांमनुष्याणांपोषणायपर्याप्तं यद्वास र्वस्यायुषःपोषणेशक्तं छान्दसोवर्णलोपः ॥ ९ ॥

अथदशमी–

इन्द्राग्नीउक्थवाहसास्तोमेभिर्हवनश्रुता ।
विश्वाभिर्गीर्भिरागतमस्यसोमस्यपीतये ॥ १० ॥२६॥

इन्द्राग्नी इति । उक्थऽवाहसा । स्तोमेभिः । हवनऽश्रुता । विश्वाभिः
गीःऽभिः । आ । गतम् । अस्य । सोमस्य । पीतये ॥ १० ॥२६ ॥

हेउक्थवाहसाउक्थैःस्तुतिभिर्वहनीयौ हेहवनश्रुता हवनस्यआह्वानस्यश्रोतारौ एवंभूतौ हेइन्द्राग्नी स्तोमेभिःस्तोत्रैःविश्वाभिःसर्वाभिर्गीर्भिःशस्त्ररूपाभिर्वाग्भिश्च हेतुभूताभिरागतमागच्छतं। किमर्थं अस्यास्मदीयस्यसोमस्यपीतयेपानार्थं ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेषड्विंशोवर्गः ॥ २६ ॥

श्नथद्वृत्रमितिपंचदशर्चमेकादशंसूक्तं भरद्वाजस्यार्षमैन्द्राग्नं आदौतिस्त्रस्त्रिष्टुभः चतुर्थ्याद्यानवगायत्र्यः त्रयोदशीत्रिष्टुप् चतुर्दशीबृहती पंचदश्यनुष्टुप् तथाचानुक्रान्तं—श्नथत्पंचोनागायत्रंतुत्रित्रिष्टुबादित्रिष्टुब्बृहत्यनुष्टुबन्तमिति। गतःसूक्तविनियोगः। वरुणप्रघासेषुऐन्द्राग्नस्यहविषः श्नथदित्येषायाज्या सूत्रितंच—इन्द्राग्नीअवसागतंश्नथद्वृत्रमुतसनोतिवाजमिति।

सैषाप्रथमा—

श्नथंद्वृत्रमुतसंनोतिवाजमिन्द्रायोअग्नीसहुरीसपर्यात्।
इरज्यन्तावसव्यंस्यभूरेःसहंस्तमासहंसावाजयन्ता ॥ १ ॥

श्नथंत्। वृत्रम्। उत। सनोति। वाजंम्। इन्द्रा। यः।
अग्नी इति। सहुरी इति। सपर्यात्। इरज्यन्ता। वसव्यंस्य।
भूरेः। सहःऽतमा। सहंसा। वाजऽयन्ता ॥ १ ॥

सपुरुषः वृत्रमावरकंशत्रुंश्नथत् हिनस्ति उतअपिच वाजमन्नंबलंवासनोति लभते यःपुरुषः सहुरीशत्रूणामभिभविताराविन्द्राग्नीसपर्यात् परिचरेत्। इतरेतरयोगादुभयत्रपूर्ववद्द्विवचनं कीदृशाविन्द्राग्नी भूरेःप्रभूतस्यवसव्यस्य वसुसमूहस्य यद्वास्वार्थिकोयत् धनस्यइरज्यन्ता ईशानौस्वामिनौ इरज्यतिरैश्वर्यकर्मा सहसाबलेनसहस्तमाअतिशयेनाभिभवितारौ शत्रूणांवाजयन्तावाजं हविर्लक्षणमन्नंआत्मनइच्छन्तौ यद्वावाजंस्तोतृभ्योदातव्यमन्नंकामयमानौ ॥ १ ॥

अथद्वितीया—

तायोधिष्टमभिगाइंन्द्रनूनमपःस्वंरुषसोअग्नऊह्लाः।
दिशःस्वंरुषसंइन्द्रचित्राअपोगाअंग्नेयुवसेनियुत्वान् ॥ २ ॥

ता। योधिष्टम्। अभि। गाः। इन्द्र। नूनम्। अपः। स्वः।
उषसंः। अग्ने। ऊह्लाः। दिशंः। स्वः। उषसंः। इन्द्र।
चित्राः। अपः। गाः। अग्ने। युवसे। नियुत्वान् ॥ २ ॥

हेइन्द्र हेअग्ने ता तौ युवांगाःआपःउदकानिस्वःसूर्यंउषसःउषःकालान् ऊह्लाःपणिभिर-पहृताः एवान्गवादीनभिलक्ष्ययोधिष्टं तैरसुरैःयुद्धंकृतवन्तौ नूनमितिपादपूरणार्थः हेइन्द्र त्वंदि-शःप्राच्याद्याःस्वःसूर्यंउषसश्चचित्राश्चायनीयाअपउदकानिच गाश्च पणिभिरपहृतानेतान्युवसे अनेनलोकेनायोजयःयद्वाअसुरैरावृतान्दिगादीन्असुरवधेनावरणमपनीय पृथक्कृतवानसीत्यर्थः हेअग्ने नियुत्वान्नियुद्भिरश्वैर्युक्तःसन् त्वमप्येवमकार्षीरित्यर्थः ॥ २ ॥

ऐन्द्राग्नस्यपशोर्वपायाआवृत्रहणेत्यनुवाक्या सूत्रितंच—आवृत्रहणावृत्रहभिःशुष्मैराभरतं शिक्षतंवज्रबाहूइति ।

अथतृतीया—

आवृ॑त्रहणावृत्र॒हभि॑ःशु॒ष्मैरिन्द्र॑या॒तंनमो॑भिरग्नेअ॒र्वाक् ।
यु॒वंराधो॑भि॒रक॑वेभि॒रिन्द्राग्ने॑अ॒स्मेभ॑वतमुत्त॒मेभि॑ः ॥ ३ ॥

आ । वृ॒त्र॒ऽह॒ना॒ । वृ॒त्र॒ऽहभि॑ः । शु॒ष्मैः॑ । इन्द्र॑ । या॒तम् ।
नम॑ःऽभिः । अ॒ग्ने॒ । अ॒र्वाक् । यु॒वम् । राध॑ःऽभिः । अक॑वेभिः ।
इ॒न्द्र॒ । अग्ने॑ । अ॒स्मे इति॑ । भ॒व॒त॒म् । उ॒त्ऽत॒मेभि॑ः ॥ ३ ॥

हेवृत्रहणा वृत्रस्यासुरस्यहन्तारौ हेइन्द्र हेअग्ने वृत्रहभिःवृत्रस्यहन्तृभिःवृत्रहननिमित्तैः शुष्मैर्बलैः नमोभिःअस्मभ्यंदातव्यैरन्नैश्च सार्धं अर्वाक्अस्मदभिमुखंआयातमागच्छतं । हेइन्द्र हेअग्ने युवंयुवांअकवेभिःअकुत्सितैर्महद्भिःउत्तमेभिः उत्कृष्टतमैःराधोभिःधनैःसहअस्मेअस्मा-सुभवतमाविर्भवतं ॥ ३ ॥

चातुर्विंशिकेहनिप्रातःसवनेच्छावाकशस्त्रेताहुवेइतिषळहःस्तोत्रियस्तृचः सूत्रितंच—ताहु-वेययोरिदमियंवामस्यमन्मनइति । पृष्ठ्याभिप्लवषडहयोःस्तोमवृद्धौताहुवइत्याद्यानवर्चआवा पार्थाः सूत्रितंच—ताहुवेययोरिदमितिनवेयंवामस्यमन्मनइत्येकादशेति ।

तत्रप्रथमासूक्तेचतुर्थी—

ताहु॑वे॒ययो॑रि॒दंप॒प्नेविश्वं॑पु॒राकृ॒तम् । इ॒न्द्रा॒ग्नीनम॑र्धतः ॥ ४ ॥

ता । हु॒वे॒ । ययोः॑ । इ॒दम् । प॒प्ने । विश्व॑म् । पु॒रा । कृ॒तम् ।
इ॒न्द्रा॒ग्नी इति॑ । न । म॒र्ध॒तः ॥ ४ ॥

ता तौ तादृशाविन्द्राग्नी हुवे आह्वये ययोरिन्द्राग्न्योः पुरापूर्वस्मिन्कालेकृतंविश्वंसर्वंइदं पूर्वास्त्वृक्षुकीर्तितंवीर्यंपमेपन्यते ऋषिभिःस्तूयते ताविन्द्राग्नीहुवइत्यन्वयः तौचेन्द्राग्नीन्ममर्धतःस्तोतॄन्नहिंस्तः अतःअस्मानप्याहूतोरक्षतामितिभावः मर्धतिर्हिंसाकर्मा ॥ ४ ॥

अथपंचमी–

उ॒ग्रावि॑घ॒निना॒मृध॑इन्द्रा॒ग्नीह॑वामहे । तानो॑मृळातई॒दृशे॑॥५॥२७॥

उ॒ग्रा । वि॒ऽघ॒निना॑ । मृध॑ः । इ॒न्द्रा॒ग्नी इति॑ ।

ह॒वा॒म॒हे॒ । ता । न॒ः । मृ॒ळा॒त॒ः । ई॒दृशे॑ ॥ ५ ॥ २७ ॥

उग्राउग्रौ उद्गूर्णबलौ अतएवमृधःशत्रून्विघनिनौविघनिनाविशेषेणहतवन्तौ इन्द्राग्नीहवामहे आह्वयामहे । तौचेन्द्राग्नीईदृशेस्मिन्संग्रामेनोस्मान्मृळातःसुखयतां यद्वामृळतिरुपदयाकर्मा नोस्माकंमृळतःउपदयांकुरुतां ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेसप्तविंशोवर्गः ॥ २७ ॥

अथषष्ठी–

ह॒तोवृ॒त्राण्यार्या॑ह॒तोदासा॑नि॒सत्प॑ती । ह॒तोविश्वा॒अप॒द्विष॑ः ॥६ ॥

ह॒तः । वृ॒त्राणि॑ । आर्या॑ । ह॒तः । दासा॑नि । सत्प॑ती॒इति॒सत्ऽप॑ती ।

ह॒तः । विश्वा॑ः । अप॑ । द्विष॑ः ॥ ६ ॥

ताविन्द्राग्नीआर्याआर्यैःकर्मानुष्ठातृभिःकृतानिवृत्राण्युपद्रवजातानिहतःहिंस्तः तथासत्पतीसतांपालयितारौइन्द्राग्नी दासानिदासाः कर्महीनाः शत्रवःतैः कृतानिचोपद्रवजातानि हितः अपिचविश्वाःसर्वाद्विषः द्वेष्ट्रीःशत्रुभूताःप्रजाः अपहतःविनाशयतः अत्रोस्माकमप्येवमेवकुरुतामितिभावः ॥ ६ ॥

चातुर्विंशिकेहनिप्रातःसवनेच्छावाकशस्त्रेइन्द्राग्नीयुवामितिषळहःस्तोत्रियस्तृचः सूत्रितंच–इन्द्राग्नीयुवामिमेयज्ञस्यहिस्थऋत्विजेत्यच्छावाकस्येति ।

तृचेप्रथमासूक्तेसप्तमी–

इन्द्रा॑ग्नीयुवामि॒मे॒३॑भिस्तोमा॑अनूषत । पिब॑तंशम्भुवासु॒तम् ॥७॥

इन्द्रा॑ग्नी॒ इति॑ । यु॒वाम् । इ॒मे । अ॒भि । स्तोमा॑ः ।

अ॒नू॒ष॒त॒ । पिब॑तम् । श॒म्ऽभु॒व॒ । सु॒तम् ॥ ७ ॥

हेइन्द्राग्नी युवांइमेस्तोमाःस्तोतारः अभ्यनूषत अभिष्टुवन्ति हेशंभुवा सुखस्यभावयिताराविन्द्राग्नी सुतमभिषुतमस्मदीयंसोमंपिबतं ॥ ७ ॥

अथाष्टमी–

यावांसन्तिपुरुस्पृहोनियुतोदाशुषेनरा । इन्द्राग्नीताभिरागतम् ॥ ८ ॥

या । वाम् । सन्ति । पुरुऽस्पृहः । निऽयुतः । दाशुषे ।
नरा । इन्द्राग्नी इति । ताभिः । आ । गतम् ॥ ८ ॥

हेनरानेताराविन्द्राग्नी वांयुवयोःस्वभूताःपुरुस्पृहःपुरुभिर्बहुभिःस्पृहणीयाः दाशुषेहवींषि दत्तवतेयजमानार्थंउत्पन्नाः या नियुतोश्वाःसन्ति हेइन्द्राग्नी ताभिर्नियुद्भिरागतंआगच्छतं ॥ ८ ॥

अथनवमी–

ताभिरागच्छतंनरोपेदंसवनंसुतम् । इन्द्राग्नीसोमपीतये ॥ ९ ॥

ताभिः । आ । गच्छतम् । नरा । उप । इदम् । सवनम् ।
सुतम् । इन्द्राग्नी इति । सोमऽपीतये ॥ ९ ॥

हेनरानेताराविन्द्राग्नी सूयतेअभिषूयतेइतिसवनःसोमः इदंसवनंइमंसोमंसुतमभिषुतंउपप्रति यद्वाइदंप्रातःसवनंउपअस्मिन्सवनेसुतमभिषुतंसोमंप्रतिताभिःनियुद्भिरागच्छतं किमर्थं सोमपीतये तस्यसोमस्यपानार्थं॥ ९ ॥

अथदशमी–

तमीळिष्वयोअर्चिषावनाविश्वापरिष्वजत् । कृष्णाकृणोतिजिह्वया ॥ १० ॥ २८ ॥

तम् । ईळिष्व । यः । अर्चिषा । वना । विश्वा । परिऽस्वजत् ।
कृष्णा । कृणोति । जिह्वया ॥ १० ॥ २८ ॥

हेस्तोतः तमग्निंईळिष्वस्तुहि योग्निःअर्चिषाज्वालारूपेणतेजसाविश्वासर्वाणिवनान्यरण्यानिपरिष्वजत् परिष्वजति परितोवेष्टयति यश्चतानिवनानिजिह्वयाज्वालयादग्धाकृष्णाकृष्णवर्णानिकृणोतिकरोति ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेष्टाविंशोवर्गः ॥ २८ ॥

अथैकादशी—

यइद्धआविवासतिसुम्नमिन्द्रस्यमर्त्यः । द्युम्नायसुतराअपः ॥११॥

यः । इद्धे । आऽविवासति । सुम्नम् । इन्द्रस्य ।

मर्त्यः । द्युम्नाय । सुऽतराः । अपः ॥ ११ ॥

योमर्त्योमनुष्यः इद्धेदीप्तेग्नौसुम्नंसुखकरंहविःइन्द्रस्यइन्द्रायआविवासति परिचरतिप्रय-च्छति चतुर्थ्यर्थेषष्ठी तस्यमर्त्यस्यद्युम्नायद्योतमानायान्नाय तदर्थंसुतराःसुखेनतरणीयाःअपः उदकानिवृष्ट्यात्मकानिइन्द्रःकरोतीतिशेषः ॥ ११ ॥

अथद्वादशी—

तानोवाजवतीरिषआशून्पिपृतमर्वतः । इन्द्रमग्निंचवोळ्हवे ॥ १२ ॥

ता । नः । वाजऽवतीः । इषः । आशून् । पिपृतम् ।

अर्वतः । इन्द्रम् । अग्निम् । च । वोळ्हवे ॥ १२ ॥

हेइन्द्राग्नी ता तौयुवांवाजवतीःअन्नवतीःइषःइष्यमाणावृष्टीः यद्वा वाजोबलंतद्वतीरिषो-न्नानि आशून्शीघ्रगान् अर्वतोश्वांश्चनोस्मभ्यंपिपृतंपूरयतं प्रयच्छतं । किमर्थं इन्द्रमग्निंचयुवां वोळ्हवेवोढुं हविर्भिःप्रापयितुं॥ १२ ॥

ऐन्द्राग्नस्यपशोर्हविषोनुवाक्याउभावामित्येषा सूत्रितंच—उभावामिन्द्राग्नीआहुवध्यैशु-चिंनुस्तोमंनवजातमद्येति ।

सैषासूक्तेत्रयोदशी—

उभावामिन्द्राग्नीआहुवध्याउभाराधसःसहमादयध्यै ।
उभादातारविषांरयीणामुभावाजस्यसातयेहुवेवाम् ॥ १३ ॥

उभा । वाम् । इन्द्राग्नी इति । आऽहुवध्यै । उभा । राधसः ।

सह । मादयध्यै । उभा । दातारौ । इषाम् । रयीणाम् । उभा ।

वाजस्य । सातये । हुवे । वाम् ॥ १३ ॥

हेइन्द्राग्नी उभाउभौसंहत्यवर्तमानौवांयुवांहुवेआह्वयामि किमर्थंआहुवध्यै आभिमुख्ये-नहोतुं तथाउभाउभौयुवामाह्वये राधसःराधसाराधकेनहविषासहयुगपदेवमादयध्यै मादयितुंतर्पयितुंसर्वेषुदेवेषुसत्सुआवयोराह्वानेकिंकारणमितिचेदुच्यते—उभाउभौतौयुवां इषामन्नानांरयीणां धनानांचदातारौस्थः अतःकारणात्उभाउभौ वांयुवां वाजस्यान्नस्यसातये संभजनायहुवे आह्वये ॥ १३ ॥

अथचतुर्दशी—

आनोगव्येभिरश्व्यैर्वसव्यै३रुपंगच्छतम् ।
सखायौदेवौसख्यायशंभुवेन्द्राग्नीताहवामहे ॥ १४ ॥

आ । नः । गव्येभिः । अश्व्यैः । वसव्यैः । उपं । गच्छतम् ।
सखायौ । देवौ । सख्याय । शम्ऽभुवा । इन्द्राग्नी इति ।
ता । हवामहे ॥ १४ ॥

हेइन्द्राग्नी गव्येभिर्गोसमूहैः अश्व्यैरश्वसमूहैः वसव्यैर्वसुसमूहैश्चसार्धं नोस्मानाभिमुख्येनउपगच्छतं शेषःपरोक्षकृतः सखायौसमानख्यानौदेवौ दानादिगुणयुक्तौ शंभुवा शंभुवौ सुखस्यभावयितारौ ता तादृशाविन्द्राग्नी सख्यायसखित्वार्थंवयंहवामहे आह्वयामहे ॥ १४ ॥

अथपंचदशी—

इन्द्राग्नीशृणुतंहवंयजमानस्यसुन्वतः ।
वीतंहव्यान्यागतंपिबतंसोम्यंमधु ॥ १५ ॥ २९ ॥

इन्द्राग्नी इति । शृणुतम् । हवम् । यजमानस्य । सुन्वतः । वीतम् ।
हव्यानि । आ । गतम् । पिबतम् । सोम्यम् । मधु ॥ १५ ॥ २९ ॥

हेइन्द्राग्नी सुन्वतः सोमाभिषवंकुर्वतोयजमानस्यहवमाह्वानंस्तोत्रंशृणुतं श्रुत्वाचतदीयानिहव्यानिहवींषिवीतं कामयेथां । कामयित्वाच आगतंआगच्छतं । आगत्यचसोम्यंसोमात्मकंमधुपिबतं ॥ १५ ॥

॥ इतिचतुर्थस्याष्टमेएकोनत्रिंशोवर्गः ॥ २९ ॥

इयमददादितिचतुर्दशर्चंद्वादशंसूक्तं भरद्वाजस्यार्षं सरस्वतीदेवताकं आदितस्तिस्रोजगत्यः त्रयोदश्यपिजगती चतुर्दशीत्रिष्टुप् शिष्टागायत्र्यः तथाचानुक्रांतं—इयंषळूनासारस्वतंत्रिजगत्यादिजगतीत्रिष्टुबन्तमिति। अत्रशौनकः—इयमित्येतदाद्यन्तुसूक्तंसारस्वतंजपेत्। द्विजः प्रातः शुचिर्भूत्वावाग्मीभवतिबुद्धिमानिति १ पार्ष्ठिकेषष्ठेहनिप्रउगेइयमददादितिसारस्वतस्तृचः सूत्रितंच—इयमददाद्रभसमृणच्युतमितिप्रउगमिति।

तत्रप्रथमा—

इयमददाद्रभसमृणच्युतंदिवोदासंवध्र्यश्वायदाशुषे।
याशश्वन्तमाचखादावसंपणिंतातेदात्राणितविषासरस्वति ॥१॥

इयम्। अददात्। रभसम्। ऋणऽच्युतम्। दिवःऽदासम्। वध्र्यऽश्वाय। दाशुषे। या। शश्वन्तम्। आऽचखाद। अवसम्। पणिम्। ता। ते। दात्राणि। तविषा। सरस्वति ॥ १ ॥

इयंसरस्वती रभसंवेगवन्तंऋणच्युतं वैदिकस्यदेवऋषिपितृसंबन्धिनोलौकिकस्यचऋणस्यच्यावयितारं दिवोदासमेतत्संज्ञंपुत्रं दाशुषेहवींषिदत्तवतेवध्र्यश्वाय एतत्संज्ञायऋषयेअददात् दत्तवती। यासरस्वतीशश्वन्तंबहुलंपणिंपणनशीलंवणिजं अदातृजनं अवसंकेवलंस्वात्मनएवतर्पकं आचखादआजघान। सेयमददादित्यन्वयः अथप्रत्यक्षीकृत्यस्तौति हेसरस्वति देवि तातानि पुत्रदानादीनितेत्वदीयानिदात्राणिदानानि तविषातविषाणिमहान्तिभवन्ति ॥ १ ॥

अथद्वितीया—

इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरूर्मिभिः।
पारावतघ्नीमवसेसुवृक्तिभिःसरस्वतीमाविवासेमधीतिभिः ॥ २ ॥

इयम्। शुष्मेभिः। बिसखाःऽइव। अरुजत्। सानु। गिरीणाम्। तविषेभिः। ऊर्मिऽभिः पारावतऽघ्नीम्। अवसे। सुवृक्तिऽभिः। सरस्वतीम्। आ। विवासेम। धीतिऽभिः ॥ २ ॥

सरस्वतीदेवतारूपेणनदीरूपेणचवर्तते देवतारूपास्तुताधुनानयानदीरूपांसरस्वतींस्तौति । इयं नदीरूपासरस्वतीशुष्मैःशोषकैरात्मीयैर्बलैःतविषेभिः महद्भिरूर्मिभिःतरंगैःगिरीणांपर्वतानांतीरसंबद्धानां सानुसानूनिअरुजद्भनक्ति । बिसखाइवबिसंखनतीतिबिसखाःसयथाबिसार्थंपंकंरुजतितद्वत् तांसरस्वतींपारावतघ्नीं परावतिदूरदेशेविद्यमानस्यापिवृक्षादेर्हंत्रीं सुवृक्तिभिःस्तुतिभिःधीतिभिःकर्मभिश्चअवसेरक्षणार्थंआविवासेम परिचरेम। यद्वा पारावतघ्नीं पारावारेपरावर्चीतीरेतयोर्घातिनीं । उक्तंच—पारावतघ्नींपारावारघातिनीमिति[1] ॥ २ ॥

अथतृतीया—

सरस्वतिदेवनिदोनिबर्हयप्रजांविश्वस्यबृसयस्यमायिनः ।
उतक्षितिभ्योवनीरविन्दोविषमेभ्योअस्रवोवाजिनीवति ॥ ३ ॥

सरस्वति । देवऽनिदः । नि । बर्हय । प्रऽजाम् । विश्वस्य । बृसयस्य । मायिनः । उत । क्षितिऽभ्यः । अवनीः । अविन्दः । विषम् । एभ्यः । अस्रवः । वाजिनीऽवति ॥ ३ ॥

हेसरस्वति देवनिदोदेवानांनिन्दकानसुरान्निबर्हयन् न्यबर्हयः अवधीः। तथाविश्वस्यव्याप्तस्यमायिनोमायाविनःबृसयस्य बृसयइतित्वष्टुर्नामधेयं त्वष्टुःप्रजांपुत्रंवृत्रासुरंचन्यवधीः।त्वत्साहाय्यादेवइन्द्रोहतवानित्यर्थः।उतअपिच हेवाजिनीवति अन्नवतिसरस्वति त्वंक्षितिभ्योमनुष्येभ्यः अवनीः असुरैरपहताभूमीःअविन्दः अलंभयः । एभ्योमनुष्येभ्यःविषमुदकंचअस्रवःअक्षारय । यद्वा क्षितयोसुरजनाः तेभ्यःसकाशात्अवनीःभूमीः अविन्दोलब्धवानसि तान्हत्वाएभ्यश्चासुरेभ्यः विषंमृतिहेतुभूतंगरलंअस्रवः ॥ ३ ॥

अथचतुर्थी—

प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥ ४ ॥

प्र । नः । देवी । सरस्वती । वाजेभिः । वाजिनीऽवती । धीनाम् । अवित्री । अवतु ॥ ४ ॥

---

[1] नि० २. २४.।

देवी दानादिगुणयुक्ता वाजिनीवती वाजोऽन्नंयस्यांक्रियायांसावाजिनी तद्युक्ता धीनां ध्यातॄणांस्तोतॄणांअवित्रीरक्षित्री एवंभूतासरस्वती वाजेभिरन्नैर्नोस्मान्प्रावतुप्रकर्षेणतर्पयतु ॥ ४ ॥

अथपंचमी–

यस्त्वांदेविसरस्वत्युपब्रूतेधनेहिते । इन्द्रंनवृत्रतूर्ये ॥ ५ ॥ ३० ॥

यः । त्वा । देवि । सरस्वति । उपऽब्रूते । धने । हिते । इन्द्रम् । न । वृत्रऽतूर्ये ॥ ५ ॥ ३० ॥

हेदेवि सरस्वति यःस्तोतावृत्रतूर्येसंग्रामेधनेहितेनिहितेनिमित्तभूतेसति इन्द्रंनइन्द्रमिवत्वां उपब्रूते स्तौति तंरक्षेतिशेषः ॥ ५ ॥

॥ इतिचतुर्थस्याष्टमेत्रिंशोवर्गः ॥ ३० ॥

अथषष्ठी–

त्वंदेविसरस्वत्यवावाजेषुवाजिनि । रदापूषेवनःसनिम् ॥ ६ ॥

त्वम् । देवि । सरस्वति । अव । वाजेषु । वाजिनि । रद । पूषाऽइव । नः । सनिम् ॥ ६ ॥

हेदेवि दानादिगुणयुक्ते हेवाजिनि वाजोबलमन्नंवातद्युक्तेहेसरस्वति त्वंवाजेषुसंग्रामेषुअव अस्मान्रक्ष । अपिच नोस्मभ्यंपूषेवपोषकोदेवइव सनिंसंभजनीयंधनंरद विलिख प्रयच्छे-तियावत् ॥ ६ ॥

अथसप्तमी–

उतस्यानःसरस्वतीघोराहिरण्यवर्तनिः । वृत्रघ्नीवष्टिसुष्टुतिम् ॥ ७ ॥

उत । स्या । नः । सरस्वती । घोरा । हिरण्यऽवर्तनिः । वृत्रऽघ्नी । वष्टि । सुऽस्तुतिम् ॥ ७ ॥

उतअपिच स्यासाप्रसिद्धासरस्वती घोराशत्रूणांभयकारिणी हिरण्यवर्तनिः वर्ततेअनेने-तिवर्तनिःरथःहिरण्मयोवर्तनिर्यस्याःसातथोक्ता वृत्रघ्नी वृत्राणांशत्रूणांहंत्री एवंभूतासासरस्वती नोस्मदीयांसुष्टुतिं शोभनांस्तुतिंवष्टिकामयतां ॥ ७ ॥

अथाष्टमी—

यस्यांअनन्तोअह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरतिरोरुवत् ॥८॥

यस्याः । अनन्तः । अह्रुतः । त्वेषः । चरिष्णुः । अर्णवः । अमः । चरति । रोरुवत् ॥ ८ ॥

यस्याःसरस्वत्याः अमोबलंअनन्तः अपर्यन्तः अपरिमितः अह्रुतः अहिंसितः अकुटिलोवात्वेषोदीप्तः चरिष्णुः चरणशीलः सर्वत्राप्रतिहतगतिरित्यर्थः अर्णवः उदकवान्उदकप्रदइत्यर्थः एवंभूतःसन् रोरुवद्भृशंशब्दंकुर्वन्चरति वर्तते । सानोविश्वाइत्युत्तरत्रसंबन्धः ॥८॥

अथनवमी—

सानोविश्वाअतिद्विषःस्वसॄरन्याऋतावरी । अतन्नहेवसूर्यः ॥९॥

सा । नः । विश्वाः । अति । द्विषः । स्वसॄः । अन्याः । ऋतऽवरी । अतन् । अहाऽइव । सूर्यः ॥ ९ ॥

सासरस्वतीनोस्मान्विश्वाःसर्वाद्विषोद्वेष्ट्रीःप्रजाःअतिनयतु अतितारयतु तथास्वसॄः स्वयंसारिणीः सहोत्पन्नावा ऋतावरी ऋतमित्युदकनाम तद्युक्ताअन्याश्चनदीः अस्मान्अतिनयतु यद्वा जस्येव वाच्छन्दसीतिपूर्वसवर्णदीर्घः उदकवत्यःस्वसारोभगिन्योअन्याःगंगाद्यानद्यश्चअस्मान् शत्रूनतिनयन्तु तत्रदृष्टान्तः—सूर्यःसर्वस्यप्रेरकआदित्यः अतन्सततंगच्छन् अहेवअहानीवयथाअहानिशीघ्रमतिनयतितद्वत् ॥ ९ ॥

दशरात्रेतृतीयेहनिप्रउगेउतनःप्रियेतिसारस्वतस्तृचः सूत्रितंच—उतनःप्रियाप्रियास्वित्यौष्णिहंप्रउगमिति । पवित्रेष्ट्यांउतनःप्रियेतिसारस्वतस्यहविषोनुवाक्या सूत्रितंच—उतनः प्रियाप्रियास्विमाजुह्वानायुष्मदानमोभिरिति ।

तृचेप्रथमासूक्तेदशमी—

उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा । सरस्वतीस्तोम्याभूत् ॥१०॥३१॥

उत । नः । प्रिया । प्रियासु । सप्तऽस्वसा । सुऽजुष्टा । सरस्वती । स्तोम्या । भूत् ॥ १० ॥ ३१ ॥

उत॰॰पिच नोस्माकंमियासुमियाणांमध्येमियाप्रियतमा सप्तस्वसागायत्र्यादीनिच्छंदांसि स्वसारोयस्यास्तादृशी नदीरूपायास्तुगंगाद्याःसप्तनद्यः स्वसारः सुजुष्टाः सुष्ठुपुरातनैर्ऋषिभिः सेविता एवंभूतासरस्वतीदेवीस्तोम्याभूत् स्तोतव्याभवतु ॥ १० ॥

॥ इतिचतुर्थस्याष्टमेएकत्रिंशोवर्गः ॥ ३१ ॥

अथैकादशी–

आपप्रुषिपार्थिवान्युरुरजोअन्तरिक्षम् । सरस्वतीनिदस्पातु ॥ ११ ॥

आऽपप्रुषी । पार्थिवानि । उरु । रजः । अन्तरिक्षम् । सरस्वती । निदः । पातु ॥ ११ ॥

पार्थिवानि पृथिव्याःसंबन्धीनि उरुउरूणि विस्तीर्णानि रजोरजांसिलोकान्अन्तरिक्षं अन्तराक्षान्तंनभश्च आपप्रुषी स्वतेजसापूरितवती । सरस्वतीदेवी निदःनिन्दकाच्छत्रोः पातु अस्मात्रक्षतु ॥ ११ ॥

अथद्वादशी–

त्रिषधस्थासप्तधातुःपञ्चजातावर्धयन्ती । वाजेवाजेहव्याभूत् ॥ १२॥

त्रिऽसधस्था । सप्तऽधातुः । पञ्च । जाता । वर्धयन्ती । वाजेऽवाजे । हव्या । भूत् ॥ १२ ॥

त्रिषधस्था त्रिषुलोकेषुसहावतिष्ठमाना त्रिलोकव्यापिनी सप्तधातुःसप्तधातवोवयवाः गायत्र्याद्यागंगाद्यावायस्याःसातथोक्ता पंचजाताजातानिनिषादपंचमान्चतुरोवर्णान्गंधर्वादीन्वा-वर्धयन्ती अभिवृद्धान्कुर्वन्ती ईदृशीसरस्वती वाजेवाजे युद्धेयुद्धेसर्वेषुयुद्धेषु हव्याभूत्ह्वातव्या भवति ॥ १२ ॥

अथत्रयोदशी–

प्रयामहिम्नामहिनासुचेकितेद्युम्नेभिरन्याअपसामपस्तमा ।
रथइवबृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती ॥ १३ ॥

प्र । या । मृहिम्ना । मृहिना । आसु । चेकिते । द्युम्नेभिः । अन्याः । अपसाम् । अपःऽतमा । रथःऽइव । बृहती । विऽभ्वने । कृता । उपऽस्तुत्या । चिकितुषा । सरस्वती ॥ १३ ॥

महिम्नामाहात्म्येनमहिनामहती द्युम्नेभिःद्युम्नैर्द्योतमानैःयशोभिरन्नैर्वायुक्तासती आसु आसांनदीनांदेवतानांमध्येयासरस्वतीप्रचेकिते प्रकर्षेणज्ञायते । याचअन्याःअन्यासां सुपांसुलु-गितिषष्ठीबहुवचनस्यजस् अपसांवेगवतीनांमध्येअपस्तमावेगवत्तमा याचरथइवविभ्वनेविभु-त्वायबृहती परिबृढा गुणैरधिकाकृता प्रजापतिनानिर्मिता सासरस्वतीचिकितुषा जानतास्तोत्रा उपस्तुत्याउपस्तोतव्याभवति ॥ १३॥

अथचतुर्दशी—

सरस्वत्यभिनोनेषिवस्योमापस्फरीःपयसामानआधक् । जुषस्वनःसख्यावेश्यांचमात्वत्क्षेत्राण्यरणानिगन्म ॥१४॥३२॥

सरस्वति । अभि । नः । नेषि । वस्यः । मा । अप । स्फरीः । पयसा । मा । नः । आ । धक् । जुषस्व । नः । सख्या । वेश्या । च । मा । त्वत् । क्षेत्राणि । अरणानि । गन्म ॥ १४ ॥ ३२ ॥

हेसरस्वति नोस्मान्वस्योवसीयः प्रशस्तंवसुधनंअभिनेषि अभिप्रापय मापस्फरीः अप्रवृद्धान्माकार्षीः । स्फारोवृद्धिः उपसर्गवशात्तद्विपरीतेवर्तते तथापयसोदकेनअधिकेननो-स्मान्माआधक् नाभिदह नबाधस्व । अपिचनोस्माकंसख्यासख्यानिसखिकर्माणिवेश्याप्रवेश-नानिचजुषस्व सेवस्व । वयंचत्वत्सकाशात्अरणानिअरमणानिनिकृष्टानिक्षेत्राणिमागन्म माप्रा-प्रवाम अपितुरमणीयान्येव ॥ १४ ॥

॥ इतिचतुर्थस्याष्टमेद्वात्रिंशोवर्गः ॥ ३२ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणा-चार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेअष्टमोध्यायः समाप्तः ॥ ८ ॥

॥ चतुर्थाष्टकः समाप्तः ॥ ४ ॥